मुग्धबोधं व्याकरणम्

महामहोपाध्यायेन श्रीमता वोपदेव-पण्डितेन

विरचितम्

श्रीमद्भि दुर्गादास-राम-गङ्गाधर-

तर्कवागीशैः

प्रणीताभ्यो विवृतिभ्यः सारमाकलय्य

पाणिन्यादिसूत्रसाम्यमभिप्रदर्श्य च

संस्कृतविद्यालयाध्यापकवरेण

श्रीगिरिशचन्द्र-विद्यारत्नेन

यत्नेन संस्कृतम्

तृतीयं संस्करणम्

कलिकाता

गिरिश-विद्यारत्न-वर्त्मनि चतुर्विंशति-सङ्ख्यक-सद्मनि

गिरिश-विद्यारत्न-यन्त्रे

श्रीमणिभूषण भट्टाचार्य्येण मुद्रितं

प्रकाशितञ्च

१८९१

প্রথম সংস্করণের বিজ্ঞাপন।

এতদ্দেশে যে যে স্থলে সংস্কৃত ভাষা শিক্ষার রীতি আছে তাহার অধিকাংশেই, অল্পায়াসে ও অল্প দিবসে ব্যুৎপাদক বলিয়া, মুগ্ধবোধ ব্যাকরণ পাঠনার প্রচলন দেখা যায়। তন্নিমিত্ত এই ব্যাকরণ অনেকপ্রকার আকারে অনেকবার মুদ্রিত হইয়াছে। কিন্তু ঐ সকল মুদ্রিত পুস্তকের অধিকাংশই ভ্রম-প্রমাদে পরিকলিত। তন্নিবন্ধন অধ্যাপক ও অধ্যেতৃগণের পাঠনা ও পঠন কার্য্যের অত্যন্ত অসুবিধা জন্মে, এবং অনেক বালকই অশুদ্ধ ও অসংলগ্ন পুস্তক অনুশীলনবশতঃ প্রায়ই প্রকৃত ব্যুৎপত্তি লাভ করিতে সমর্থ হয় না। আমি ঐ অসুবিধা ও অনিষ্ট নিবারণের বাসনায় এই পুস্তক মুদ্রিত করিলাম।

শ্রীযুক্ত বাবু শ্যামাচরণ সরকার মহাশয়, ইতিপূর্ব্বে মুগ্ধবোধ ব্যাকরণ সঙ্ক্ষিপ্ত টীকার সহিত বাঙ্গালা অক্ষরে মুদ্রিত করিতে আরম্ভ করিয়াছিলেন, সন্ধ্যধ্যায় এবং শব্দেরও কিয়দংশ পর্য্যন্ত মুদ্রিত হইয়াছিল। পরন্তু ব্যবস্থাদর্পণাদি গ্রন্থ প্রণয়নে ব্যস্ততা প্রযুক্ত সময়াভাবে ব্যাকরণের টীকা-সঙ্কলনে সমর্থ না হইয়া, নিজ প্রণালীতে তাহা প্রস্তুত করিতে, এই অভিসন্ধিপূর্ব্বক, আমাকে ভার দেন, যে সময়ে সময়ে উভয়ে একত্রিত হইয়া মৎসংগৃহীত টীকা পুনর্দৃষ্টি করত মুদ্রাঙ্কনার্থে প্রস্তুত করিব। কিন্তু তাহা করিতেও তিনি সময় না পাইয়া আমার প্রতিই সম্পূর্ণ ভারার্পণ করেন। তদনুসারে আমি ঐ প্রণালীমতে দুর্গাদাস, রাম ও গঙ্গাধর তর্কবাগীশের টীকা হইতে সার সংগ্রহপূর্ব্বক সমুদয় গ্রন্থ মুদ্রিত করিলাম। সংশোধন ও সুখবোধ বিষয়ে যথাসাধ্য যত্ন ও পরিশ্রম করিয়াছি।

অধ্যাপক ও ছাত্র-বর্গের বিশেষ সুবিধার উদ্দেশে, প্রত্যেক সূত্রের নিম্নভাগে পদচ্ছেদ-পূর্ব্বক বিভক্তি-নির্দ্দেশ করিয়াছি। ১।২ ইত্যাদি অঙ্ক, প্রথমা দ্বিতীয়াদি বিভক্তির জ্ঞাপক, এবং ।, ॥, ।॥, এই চিহ্নগুলি, একবচন, দ্বিবচন ও বহুবচনের সূচক। আর কোন কোন স্থলে ১।২ ইত্যাদি অঙ্কের পশ্চাৎভাগে (।) এক দাঁড়ি চিহ্ন দিয়া লুপ্ত বিভক্তির সঙ্কেত করা হইয়াছে। মূল গ্রন্থে সমস্ত সূত্রের আদি ভাগে একাদিক্রমে অঙ্ক বিন্যাস করিয়া, টীকার মধ্যে পদসাধন-স্থলে ঐ সকল অঙ্কের উল্লেখ করিয়াছি, তাহাতে পদসাধনের উপযোগী সমুদয় সূত্রগুলি অনায়াসেই নিষ্কাশিত হইতে পারিবে। এই প্রণালীতে সন্ধি, শব্দ, তিঙন্ত ও কৃদন্তের সমস্ত পদই প্রায় সাধিত হইয়াছে।

গ্রন্থকার এই ব্যাকরণে দশটী অধ্যায় এবং প্রত্যেক অধ্যায়ে চারি চারি পাদ নির্দ্দেশ করিয়াছেন; ঐ দশ অধ্যায় ও চল্লিশটী পাদ যে যে পৃষ্ঠে মুদ্রিত হইয়াছে, ঐ ঐ পৃষ্ঠের অঙ্ক বিন্যাসপূর্ব্বক একটী নির্ঘণ্ট-পত্র আদিভাগে যোজিত হইল। এবং এই গ্রন্থে যতগুলি সংজ্ঞা, শব্দ, ধাতু, সমাসান্ত, স্ত্রী-প্রত্যয়, তদ্ধিত-প্রত্যয় এবং কৃৎ-প্রত্যয় নির্দ্দিষ্ট হইয়াছে ঐ সমস্তই, অকারাদি বর্ণক্রমে সূচী করিয়া, এই পুস্তকের যে যে পৃষ্ঠে বা যে যে সূত্রে ঐ সকল বিষয় নির্দ্দিষ্ট আছে, ঐ সূচী সকলে তাহার অঙ্ক বিন্যাসপূর্ব্বক, শেষ ভাগে সংযোজিত হইল। যে কোন ব্যক্তির এই ব্যাকরণের যে কোন বিষয় জানিবার প্রয়োজন হইবে, তিনি ঐ সূচী দৃষ্টে তৎক্ষণাৎ তাহা অক্লেশেই নিষ্কাশিত করিতে পারিবেন।

এই গ্রন্থ মুদ্রিত করিতে যেরূপ ব্যয় হইয়াছে, ন্যূনকল্পে ৪ চারি টাকা মূল্য করিলেও তাহার অনুরূপ হয় না, কিন্তু তাহা হইলে পাঠকবর্গের, বিশেষতঃ বালকদিগের, ক্রয় করিতে কষ্ট হইতে পারে, এই বিবেচনায়, বিন্দুমাত্র অর্থলাভাংশ পরিত্যাগ করিয়া, ইহার মূল্য ২॥০ আড়াই টাকা স্থির করিলাম।

এক্ষণে অধ্যাপক মহাশয়দিগের নিকট প্রার্থনা—

এই পুস্তকে যে সকল দোষ দৃষ্ট হইবে, অথবা কোন বিষয়ের ন্যূনতা বা আধিক্য অনুভূত হইবে, অনুগ্রহ করিয়া ঐ ত্রুটি সংশোধনপূর্ব্বক অধ্যয়ন করাইবেন। এবং আমার প্রতি বিশেষ অনুগ্রহ করিয়া ঐ ত্রুটি আমাকে জানাইবেন; তাহা হইলে, যদি কখন এই পুস্তক পুনর্মুদ্রিত করিতে হয়, ঐ ত্রুটি আর ঘটিতে পারিবে না। ইতি

জ্যানুয়ারি, ১৮৭১ | শ্রীগিরিশচন্দ্র বিদ্যারত্ন
সংস্কৃত কলেজ, কলিকাতা।

দ্বিতীয় সংস্করণের বিজ্ঞাপন।

প্রায় দ্বাদশ বৎসরের পর মুগ্ধবোধ পুনর্মুদ্রিত হইল। গতবার মুদ্রাকরপ্রমাদবশতঃ যে দুই একটী ভ্রম ঘটিয়াছিল, সেগুলি এবার সংশোধন করা গেল। অধিকন্তু এবারে সাম্য-প্রদর্শনার্থ প্রায় প্রত্যেক সূত্রের টীকায় পাণিনি ব্যাকরণের সূত্রের অধ্যায়, পাদ ও সংখ্যা লিখিত হইল। এবং শেষভাগে, বোপদেব-সম্মত একটী লিঙ্গানুশাসন ও কতকগুলি উণাদি-প্রত্যয় সন্নিবেশিত হইল; আর সূত্র, আগম, আদেশ ও ধাত্ববয়ব সম্বন্ধীয় সূচী কয়েকটীও সংযোজিত হইল। ইতি

১লা নবেম্বর, ১৮৮২ | শ্রীগিরিশচন্দ্র বিদ্যারত্ন
সংস্কৃত কলেজ, কলিকাতা।

তৃতীয় সংস্করণের বিজ্ঞাপন।

প্রায় নয় বৎসরের পর মুগ্ধবোধের তৃতীয় সংস্করণ মুদ্রিত হইল। এবারে পুস্তকের অবয়ব কিছু বৰ্দ্ধিত হইয়াছে। পূর্ব্ববারে সূত্র ও বৃত্তিগুলি ক্ষুদ্রাক্ষরে মুদ্রিত হইয়াছিল, পাঠের সুবিধার্থ এবার ঐগুলি তদপেক্ষা বৃহৎ অক্ষরে মুদ্রিত হইয়াছে। আর পূর্ব্ববারে কেবল পাণিনি ও কাত্যায়নের সূত্রগুলি টীকায় দর্শিত হইয়াছিল; এবার প্রয়োজনমতে মহাভাষ্য, সিদ্ধান্তকৌমুদী, সুপদ্ম, কলাপ ও সংক্ষিপ্তসারের সূত্র বা তত্তন্মত লিখিত হইয়াছে। যে যে স্থলে বোপদেবের মতের সহিত পাণিন্যাদির অনৈক্য বা মতান্তর আছে, তথায় তাঁহাদিগের সেই ভিন্ন ভিন্ন মত লিখিয়া দেওয়া গিয়াছে। এবার শব্দ ও ধাতুর গণগুলি প্রায় সম্পূর্ণরূপে নিবেশিত হইয়াছে। ফলতঃ ব্যাকরণখানির অঙ্গসৌষ্ঠব-সম্পাদনে বিশেষ যত্ন করা গিয়াছে। শারীরিক অসুস্থতাবশতঃ স্বয়ং সমর্থ না হওয়ায় এই তৃতীয় সংস্করণ মুদ্রিত করিবার ভার আমার জ্যেষ্ঠ পুত্র কলিকাতা প্রেসিডেন্সী কলেজের সহকারী সংস্কৃতাধ্যাপক শ্রীমান্ হরিশ্চন্দ্র কবিরত্নের উপর অর্পিত হয়। তিনি যথাশক্তি পরিশ্রম করিয়া এই কার্য্য সম্পন্ন করিয়াছেন। ইতি

১লা অক্টোবর, ১৮৯১ | শ্রীগিরিশচন্দ্র বিদ্যারত্ন।

निर्घण्टः ।

मुग्धबोध-पठन-प्रयोजनम् ।

गीर्वाणवाणीवदनं मुकुन्द-
सङ्कीर्त्तनञ्चेत्युभयं हि लोके ।
सुदुर्लभं तच्च न मुग्धबोधा-
न्न लभ्यतेऽतः पठनीयमेतत् ॥

ग्रन्थकृत्-परिचयः ।

विद्वद्धनेश्वरच्छात्रो भिषक्केशवनन्दनः ।
वोपदेवश्चकारेदं विप्रो वेदपदास्पदम् ॥

वोपदेव-प्रशंसा ।

द्यौर्वाचस्पतिनेव, पन्नगपुरी शेषाहिनेवाभवत्
येनैकेन विदुष्मती वसुमती मुख्येन सद्भावताम् ।
सोऽयं व्याकरणार्णवैकतरणि-श्चातुर्य्यचिन्तामणि-
र्जीयात् कोविदगर्व्वपर्व्वतपविः श्रीवोपदेवः कविः ॥

संशोधनी प्रवर्द्धनी च ।

पृष्ठे	पङ्क्तौ	अशुद्धं	शुद्धं
३	१०	निरवकाशक: ॥	निरवकाशक: ॥ (११५ सू)
३२	१३	"वासमाने"	"वावसाने"
३८	१९	सुटप्रत्याहारस्वीकारेण न पृथक् संज्ञा कृता	सुटप्रत्याहारस्य सर्व्वनामस्थानसंज्ञा कृता (१।१।४३) ।
३८	२२।२३	७।१।२० सूत्रे द्रष्टव्यम् ।	१।१।४२ ।
४०	९	*	‡
४०	२७	१।१।२४-२६	१।१।३४-३६
४२	१०	इत्तौ	ह्रौत्तौ
४७	३	घु:	घ:
५०	२	सख्य:	सख्ये:
६४	१३	७।१।७०	७।१।७८
११०	२४	प्रसिद्ध: ।	प्रसिद्ध: । इति हकारान्ता: ।
१४७	१	तोऽक्रर्वा	तोऽक्षीर्वा
१५९	१७	नपुंसककिति	नपुंसकमिति
१५९	१८	धातूपाल्त	धातूपात्त
२३३	१	भूम: ।	भूमे: ।
२६५	१	गुणाद्देश्यम् ।	गुणादेशियम् ।
२९१	१३	घू: ।	घु: ।
२९१	१६	पाणिनि: १।१।४५ ।	पाणिनि: १।१।४५,६।१।१०८ ।
२९७	२४	१८, १९, २२, २३, २४ ।	१८, १९, २२, २३, १४, ३३ ।
३०२	७	(१०७७,	(१०७३,
३१२	२२	स्वम	स्वन
३०८	९	सुपाजेऽभ्राजे	सुपाजेऽन्वाजे
४२१	५	८९४ ।	७९४ ।
५१६	६	अनडुच्छेत	अनडुच्छूत
५२२	१९	सिद्धम् ।	सिद्धम् । "वहेर्धीवा" इतिकातन्त्र
५६१	१०	तादर्थ्य	तादर्थ्ये
५९४	२।१०	विल्गो वा	विन्दो वा

मुग्धबोधं व्याकरणम्।

मङ्गलाचरणम्।

मुकुन्दं सच्चिदानन्दं प्रणिपत्य प्रणीयते।
मुग्धबोधं व्याकरणं परोपकृतये मया॥*

१। ओं नमः शिवाय।†

(ओं ।१।, नमः ।१।, शिवाय ४।)।

इति नमस्कारसूत्रम्।‡

---

* मया वोपदेवेन सच्चिदानन्दं—सच्चासौ चिच्चासावानन्दश्चेति—नित्यज्ञानसुखस्वरूपं, मुकुन्दं—मुकम् मुक्तिं ददातीति—मुक्तिदातारं विष्णुमित्यर्थः। "मुकमव्ययमाख्यं निर्व्वाणमोक्षवाचकम्। यस्तद्ददाति भक्तेभ्यो मुकुन्दस्तेन कीर्त्तितः"॥ इति ब्रह्मवैवर्त्तपुराणम्। प्रणिपत्य प्रकर्षेण भक्तिश्रद्धातिशयेन नत्वा, मुग्धबोधं नाम सुन्दरबोधजनकम् अल्पबुद्धिबोधकं वा—मुग्धः सुन्दरमूढयोरिति विश्वः, व्याकरणं—व्याक्रियन्ते व्युत्पाद्यन्ते साधुशब्दाः अनेनेति शब्दव्युत्पादकशास्त्रं, परोपकृतये परेषां पाठकानामुपकाराय, श्रेष्ठोपकाराय वा, प्रणीयते प्रकर्षेण नीयते वृत्तिसहितं क्रियते इत्यर्थः।

† विघ्नबाहुल्यशङ्कया पुनर्मङ्गलमाचरति। शिवाय त्रिगुणातीताय ब्रह्मणे ओं नमः, "प्रसङ्क्षि पदे निस्त्रैगुण्ये शिवाय नमो नमः" इति प्रमाणम्। ओंशब्दप्रयोगेणापि मङ्गलं सूचितं,—तथाच ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ इति। अथवा शिवाय झटिति ग्रन्थसमाप्तिरूपमङ्गलाय ओं नमः हरिहरब्रह्मरूपिणे नमः, तथाच—अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः। मकारेणोच्यते ब्रह्मा प्रणवेन त्रयो मताः॥ इति।

‡ इति, "ओं नमः शिवाय" एतत् वाक्यं, नमस्कारस्य सूत्रं सूचकं—सूचयति अर्थं प्रत्याययतीति सूत्रम्॥ तथाच—

स्वल्पाक्षर-मसन्दिग्धं सारवत् विश्वतोमुखम् ।
अस्तोभ-मनवद्यञ्च सूत्रं सूत्रविदो विदुः ॥ इति ।

स्वल्पाक्षरं—ह्रस्वदीर्घगुणवृद्धिशब्दानां स्वर्णवित्रूपेण संज्ञाकरणेन, उदोऽनूर्द्ध-कर्म्मणीत्यादि (१।३।२४) पाणिनिसूत्राणाम् उदोऽनूर्द्धेहे (८७०) इत्यादि संक्षेपकरणेन च स्वल्पाक्षरत्वमेतद्ग्रन्थस्थसूत्राणाम् । असन्दिग्धं—भूस्थापिबदेभो लुक् पे (५५२) इत्यत्र पाधातुस्थाने पिबनिर्द्देशात् रक्षणार्थकशोधनार्थकयोर्न सन्देहः । सारवत्—निष्कृष्टार्थ-युक्तम् । विश्वतोमुखं—गुणवृद्धिसूत्रयोः (५४२,५७७) अन्येषाञ्च बहुषु प्रवृत्तिः । अस्तोभं—निरर्थकशब्दवर्जितम् । अनवद्यं—अश्लीलत्वादिदोषशून्यम् अनभिप्रेतसिद्धिनिवर्त्तकञ्च ।

तच्च षड्विधम्—

संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ॥ इति ।

व्यवहारार्थं शास्त्रे कृतः सङ्केतः संज्ञा । ग्रन्थस्य सङ्क्षेपनिर्व्वाहार्थं सङ्केतविशेषः परिभाषा । अप्राप्तप्रापको विधिः, स च द्विविधः—वर्णोत्पादनरूपः अभावरूपश्च ; अभावोऽपि द्विविधः—नाशो निषेधश्च । सामान्यप्राप्तस्य विशेषावधारणं नियमः । अन्यधर्म्मस्य अन्यत्रारोपणमतिदेशः । पूर्व्वसूत्रस्थपदस्य परसूत्रेषूपस्थितिरधिकारः, स तु त्रिविधः—सिंहावलोकिताख्यश्च मण्डूकप्लुतिरेव च ।

गङ्गास्रोत इव ख्याता अधिकारास्त्रयो मताः ।
आकाङ्क्षायान्तु सर्व्वेषामनुवृत्तिः परे भवेत् ॥ इति ।

कस्यापि शब्दस्य कतिपयसूत्रपर्य्यन्तमनुवृत्तिः सिंहावलोकिताख्या, एतदपेक्षया अधिकसंख्यकसूत्रानुवृत्तिः गङ्गास्रोतः । यथा, (३६) इत्यत्र दात्ते इत्यस्य पादशेष-पर्य्यन्तमनुवृत्तिः सिंहावलोकिताख्या, (६८) इत्यादौ मण्डूकप्लुतिः, (६५) इत्यत्र वेरित्यस्य गङ्गास्रोतः ।

सूत्रलक्षणं तद्भेदांश्च निर्द्दिश्य सम्प्रति सूत्रे वर्णनीयविषयानुपन्यस्यति—

कार्य्यी कार्य्यं निमित्तञ्च त्रिभिः सूत्रमुदाहृतम् ।
कदाचित् कार्य्यिकार्य्याभ्यां क्वचित् कार्य्यनिमित्ततः ॥
यस्य निर्द्दिश्यते कार्य्यं स कार्य्यी गदितो बुधैः ।
क्रियते यत्तु तत् कार्य्यं-मादेशप्रत्ययागमम् ।
यस्मात् परं, परे यस्मिन्, तन्निमित्तं द्विधा मतम् ॥

यथा (११५) जरस् जराचि तु इति सूत्रे जराशब्दः कार्य्यी, जरस् कार्य्यम्, अचीति निमित्तम् ।

अन्यच्च, सूत्रविषयक-विशेषनियमाः—

बहिरङ्गविधिभ्यः स्यादन्तरङ्गविधिर्बली ।
प्रत्ययाश्रितकार्य्यन्तु बहिरङ्गमुदाहृतम् ।

२ । शं शब्दैः ।

(शं ।१।, शब्दैः ३।।।) ।

शब्दैर्मङ्गलं स्यात् । इति प्रयोजनाभिधेयसम्बन्धाः । *

प्रकृत्याश्रितकार्य्यं स्यादन्तरङ्गमिति ध्रुवम् ।—(यथा ७०२ सूत्रे दरिद्र इत्यादौ) ।
प्रकृतेः पूर्व्वपूर्व्वं स्यादन्तरङ्गतरं तथा ॥
सावकाशविधिभ्यः स्यात् बली निरवकाशकः ।
कस्यचिद्भिन्नकार्य्यस्य प्रथमं पश्चतस्तथा ।
सम्भवेत् विषयो यस्य स विधिः सावकाशकः ॥
आदौ हि विषयो यस्य परतो न हि सम्भवेत् ।
स पण्डितगणैरुक्तो विधिर्निरवकाशकः ॥

तथा—सामान्यस्य विशेषस्य स्याद्विशेषविधिर्बली ।
बहवो विषया यस्य स सामान्यविधिर्भवेत् ।
अल्पः स्याद्विषयो यस्य स विशेषविधिर्मतः ॥
आगमादेशयोर्मध्ये बलीयानागमो विधिः ।
आगमोऽनुपघाती यः प्रकृतेः प्रत्ययस्य च ।
तयोर्य उपघाती स आदेशः परिकीर्त्तितः ॥
सकलेभ्यो विधिभ्यः स्याद्बली लोपविधिस्तथा ।
लोपस्वरादेशयोस्तु स्वरादेशविधिर्बली ॥ इति ।

* प्रयोजनाभिधेयसम्बन्धानाह शब्दैर्मङ्गलं स्यादिति । शब्दैरेव मङ्गलमुचितं स्यादित्यर्थः, शब्दव्युत्पादकशास्त्रारम्भे शब्दैरेव मङ्गलं कर्त्तव्यमिति न्यायात् । व्याकरण-व्युत्पन्नशब्दज्ञानाधीनं शास्त्रान्तरज्ञानं, तदधीना च वैदिकक्रिया, तत्फलं स्वर्गादि, अतएव शब्दैर्मङ्गलम् । इति प्रयोजनाभिधेयसम्बन्धाः—इतिशब्दस्याव्ययत्वेन प्रयोजनपक्षे सम्बन्ध-पक्षे च तृतीयान्तत्वम्, अभिधेयपक्षे प्रथमान्तत्वं बोध्यं, तेन 'इति' एभिः शब्दैर्व्याकरणस्य प्रयोजनं—मङ्गलरूपम्, 'इति' इमे शब्दाः व्याकरणस्याभिधेयाः—वाच्याः, 'इति' एभिः शब्दैः सह व्याकरणस्य सम्बन्धः व्युत्पाद्यव्युत्पादकभावः इत्यर्थः ।

स्याद्यन्ताधिकारः। *

१मः। सन्ध्यध्यायः। †

१म पादः—संज्ञा। ‡

१। अ इ उ ऋ लृ क, ए ओ ङ, ऐ औ च,— ह य व र ल, ञ ण न ङ म, झ ढ ध घ भ, ज ड द ग ब, ख फ छ ठ थ, च ट त क प, श ष साद्यन्ताख्याः। §

(अ—स ।१॥, आद्यन्ताख्याः १॥)।

एषां मध्ये ये वर्णास्ते आदिवर्णान्तवर्णसमाहारसंज्ञाः स्युः। ¶

---

* एकार्थावच्छिन्नाध्यायसमूहः अधिकारः।

† एकार्थावच्छिन्नपादसमूहः अध्यायः।

‡ एकार्थावच्छिन्नसूत्रसमूहः पादः।

§ आदिना सहितोऽन्तः आद्यन्तः स एव आख्या येषां ते।

¶ एषां मध्ये इति मध्यशब्दोऽधिकरणवाची, तेन अत्र सूत्रे ये वर्णास्ते आदिवर्णान्तवर्णयोर्यः समाहारो मिलनं स एव संज्ञा येषां तादृशाः—मध्यवर्णसहितादिवर्णान्तवर्णमिलिता अक्-आदिसंज्ञकाः स्युः, यथा—अक, अच, अव, अम, अब। इक, इङ, इच, इल। ऋक। एङ, एच, एह। ऐच। हल, हव, हस। यल, यम, यप। वस। ञम, ञप, ञस। णङ, णम, णप। झभ, झब, झप, झस। ढभ। जब। खथ, खप, खस। छत। चक, चप। शस।—(४०)। पाणिनिः—शिवसूत्राणि, १।१।७१ च।

४। इत् क्ते।

(इत् ।१।, क्ते ।४।)।

कस्मैचित् कार्य्यायोच्चार्य्यमाणो वर्ण इत्संज्ञः स्यात्। तस्य कार्य्यं अनुस्वारः। यथा अचि क-ङ-चाः संज्ञार्थाः। हसे अकार-उच्चारणार्थः। *

५। आ वत् स्वर्घप्लु।

(आ ।१।, वत् ।१।, स्व-र्घ-प्लु ।१।)।

अ आ अ३ इति वर्णत्रयं क्रमेण स्व-र्घ-प्लु-संज्ञं स्यात्। वत्शब्दात् इ ई इ३ इत्यादिषु च। † स्व एज् नास्ति'। ‡

६। अपोऽक् समोर्ण ऋटक् च।

(अपः १।, अक् ।१।, समः १।, र्णः १।, ऋटक् ।१।, च ।१।)।

---

* क्ते इति एकारान्तमव्ययं, क्ते कार्य्याय इत्। एति गच्छतीति इत्, कार्य्यकाले न तिष्ठतीति यावत्। दृष्टान्तमाह यथा—अचि अच्प्रत्याहारमध्ये क-ङ-चाः संज्ञार्थाः संज्ञैव अर्थः प्रयोजनं येषां ते। एवं हसे अकार उच्चारणार्थः, उच्चारणमेव अर्थः प्रयोजनं यस्य सः, हसवर्णे अकारस्य प्रयोजनान्तरं नास्ति। एतेन उच्चारणार्थोऽपि वर्णः इत्। पाणिनिः १।३।२-३।

† अश्च आश्च अ३श्च इति समाहारे आ, वदिति इवार्थोऽव्ययशब्दः, ततश्च आ स्वर्घप्लु-संज्ञं स्यात्, आवत् अन्योऽपि स्वर्घप्लुसंज्ञः स्यादित्यर्थः। तेन यथा अ आ अ३, तथा इ ई इ३, उ ऊ उ३, ऋ ॠ ऋ३, ऌ ॡ ऌ३ च। संक्षेपकृता ग्रन्थकारेण ह्रस्वदीर्घप्लुत-शब्देभ्यः संक्षिप्य स्वर्घप्लुसंज्ञा कृता, एवं सर्वत्र। एकमात्रो भवेत् ह्रस्वो, द्विमात्रो दीर्घ उच्यते। त्रिमात्रस्तु प्लुतो ज्ञेयो, व्यञ्जनञ्चार्द्धमात्रकम्॥ कालेन यावता पाणिः पर्य्येति जानुमण्डले। स मात्रा कविभिर्ज्ञेयेत्युक्तञ्चामरवेदिभिः। दूराह्वाने च गाने च रोदने च प्लुतो मतः॥ पाणिनिः १।२।२७।

‡ स्व एज् नास्तीति न सूत्रं, आ वदिति सूत्रस्य व्याख्यान्तर्गतमेव। अन्यथा 'स्व एज न' इत्येव कर्त्तव्यम्। एच् ह्रस्वसंज्ञो न भवति, किन्तु दीर्घसंज्ञः प्लुतसंज्ञश्च भवतीत्यर्थः।

समानो ऽपोऽक् च परस्परं र्ण-संज्ञः स्यात्, ऋक् च। *

साम्यन्त्वेकस्थानत्वम्। †

अत्रयम् एह ‡ क ख ग घ ङाः कण्ठ्याः।

इत्रयं च छ ज झ ञ शा ए ऐ या स्तालव्याः।

ऋत्रयं ट ठ ड ढ ण र षा मूर्द्धन्याः।

लृत्रयं त थ द ध न ल सा वो दन्त्याः।

उत्रयं प फ ब भ म वा ओ औ ओष्ठ्याः। §

एषां मध्ये यो येन समः स तस्य तत्र ततः। ¶

---

* ऽपः अक् इति पृथक्पदकरणेन सम इत्यस्य प्रत्येकेन सम्बन्धात् समोऽपः परस्परं र्णसंज्ञः, समोऽक् च परस्परं र्णसंज्ञः स्यादित्यर्थः, नतु ऽपाकोः परस्परं र्णसंज्ञेति। अकोऽन्तर्गतस्यापि ऋकः पृथगुपादानेन ऋवर्ण-लृवर्णौ असमानावपि परस्परं र्णसंज्ञौ स्तः। एतच्च स्पष्टतरमुच्यते, एकस्थानीय-वर्गीय-वर्णाः परस्परं र्णसंज्ञाः स्युः। अक्मध्ये एकस्थानीया वर्णाश्च परस्परं र्णसंज्ञाः स्युः। ऋवर्ण-लृवर्णौ च परस्परं र्णसंज्ञौ स्तः। र्णः सवर्णः। "तुल्यास्यप्रयत्नं सवर्णम्"—पाणिनिः १।१।९।

† समस्य भावः साम्यं समानवर्णत्वम्। एकं स्थानं येषां ते एकस्थानाः तेषां भावः एकस्थानत्वम्, एकस्थानोच्चरितत्वमित्यर्थः।

‡ स्थानज्ञानाधीनं साम्यज्ञानमिति स्थानं निरूपयति अत्रयमित्यादि। एह— ए ओ ऐ औ हं।

§ ए, ऐ ओ औ इत्येतेषाम् उच्चारणस्थानं कण्ठमुक्त्वा, ए ऐ इत्युभयोस्तालव्यकार्य्यार्थं तालव्यमध्ये, ओ औ इत्युभयोश्च ओष्ठ्यकार्य्यार्थम् ओष्ठ्यमध्ये भिन्नपदे पृथक् पठनम्। एवम् अन्तःस्थवकारस्य वैयाकरणमते उच्चारणस्थानम् ओष्ठमुक्त्वा दन्त्यकार्य्यार्थं दन्त्यमध्ये भिन्नपदे पाठः।

¶ एषां कण्ठ्य-तालव्य-मूर्द्धन्य-दन्त्योष्ठ्यानां वर्णानां मध्ये यो वर्णो येन वर्णेन समो भवति सः तस्य स्थाने (१), तस्मिन् परे (२), तस्मादुत्तरे च (३), स्यात्, यथा—अभविष्ट (१), शान्तः (२), वाग्घरिः (३)। अत्र ततस्तस्य तत्रेति नोक्त्वा, यथातिक्रमेण निर्द्देशः तत् द्वयोः त्रयाणां वा समवाये पूर्व्वपूर्व्वस्य प्रथमप्राप्त्यर्थम्। अत्र वदन्ति—षष्ठी सूत्रे ततः स्थाने, पञ्चमी च तदुत्तरे। सप्तमी च परे वाच्ये गम्ये चोपपदे क्वचित्॥ इति।

७। चपोदिताकानिता णः।

(चपा ३।, उदिता ३।, अका ३।, अनिता ३।, णः १।)।

उकारेता चपेन * इद्रहितेनाका † णो गृह्यते।

८। इङोऽरलेङ् गुः।

(इङः ६।, अर् अल् एङ् ।१।, गुः १।)।

इङः स्थाने अर् अल् एङ् एते गु-संज्ञाः स्युः। ‡

९। अच आरालैज् व्रिः।

(अचः ६।, आ आर् आल् ऐच् ।१।, व्रिः १।)।

अचः स्थाने आ आर् आल् ऐच् एते व्रिसंज्ञाः स्युः। §

---

* च ट त क पाः यदा उदितः स्युस्तदा सवर्णं गृह्णन्ति, तेन उदिद्भिः चु टु तु कु पुभिः क्रमेण च-वर्ग ट वर्ग त-वर्ग क-वर्ग प-वर्गाणां प्राप्तिः स्यात्। उदिद्रहितेन तु च ट त क प इति वर्णपञ्चकेन केवलं तत्तत् वर्णमात्रं गृह्यते।

† अ इ उ ऋ ऌ एते यदा इद्रहिताः स्युस्तदा सवर्णं गृह्णन्ति, तेन अनिद्भिः अ इ उ ऋ ऌ इत्येतैः क्रमेण अ आ अ, इ ई इ, उ ऊ उ, ऋ ॠ ऋ, ऌ ॡ ऌ, इत्येतेषां प्राप्तिः, किन्तु अकारादि-ऌकारान्त-वर्णानां मध्ये इत्युक्तेन येन केनचित् वर्णेन केवल-तन्मात्रवर्णो गृह्यते, यथा अ त इत्यनेन केवलम् अ इति वर्णमात्रं गृह्यते, नतु अ आ अ इति वर्णत्रयम्। परन्तु आदेशे प्रत्यये च प्रायशः अनिता अका तत्सवर्णो न ग्राह्यः। वर्णात् कारतकारौ स्वरूपे रात्तु इफ इत्यौणादिकसूत्रम्। पाणिनिः १।१।६९-७०।

‡ इ उ ऋ ऌ ए ओ वर्णानां स्थाने क्रमेणादिष्टाः—

ए ओ अर् अल् ए ओ वर्णाः (गु) गुणसंज्ञाः स्युः। समत्वात् इ-वर्ण-एकारयो-रैकारः, उ-वर्ण-ओकारयोरौकारः। अर् अल् इति द्वयोरेकदेश-रेफ-लकाराभ्यां सह ऋ ऌ इति द्वयोः समत्वात् तयोर्गुणे क्रमेण अरलौ स्याताम्, समुदायसाम्याभावेऽपि आंशिकसाम्यस्य ग्राह्यत्वात्। वृद्धिविधायकसूत्रेऽप्येवम्। पाणिनिः १।१।२।

§ अ इ उ ऋ ऌ ए ऐ ओ औ वर्णानां स्थाने क्रमेणादिष्टाः—

आ ऐ औ आर् आल् ऐ ऐ औ औ वर्णाः (व्रि) वृद्धिसंज्ञाः स्युः।

आदेशविशेषस्तु उच्चारणस्थानसाम्यात् पूर्ववत् ज्ञेयः। पाणिनिः १।१।१।

१०। प्रपरापसंन्यवानुनिर्दुर्व्यधिसूत्परिप्रत्यभ्यत्यप्युपाङ् गिः।

(प्र—आङ् ।१।, गिः १।)।

एते विंशतिर्गि-संज्ञाः स्युः।*

---

* प्र, परा, अप, सम्, नि, अव, अनु, निर्, दुर्, वि, अधि, सु, उत्, परि, प्रति, अभि, अति, अपि, उप, आङ्, एते विंशतिः (गि) उपसर्ग-संज्ञाः स्युः। विंशत्याद्याः सदैकत्वे सर्व्वाः संख्येयसंख्ययोरिति विंशतेरेकवचनान्तत्वम्। अत्र निर् दुर् शब्दौ रेफान्तौ निस् दुस् इति दन्त्यसान्तौ च।

क्रियायोगिनः प्रादेरेव उपसर्गसंज्ञा, न तु द्रव्यादियोगिनः। द्रव्यादियोगिनस्तु प्रकृष्टश्चासावेजश्चेति 'प्रैज' इत्यादौ उपसर्गसंज्ञाभावात् (२४) गेर्धोरिति न गुः। आदौ धातुयोगे पश्चात् लिङ्गसंज्ञायामुपसर्गत्वमस्त्येव।

क्रियावाचित्वमाख्यातुं प्रसिद्धोऽर्थः प्रदर्शितः। प्रयोगतोऽन्ये विज्ञेया अनेकार्था हि धातवः॥ इति धातुपाठे वोपदेववचनात् धातूनामनेकार्थत्वं सिद्धम्, उपसर्गाः पुनस्तदर्थद्योतकाः, न तु वाचकाः। उपसर्गस्य धातुलीनार्थद्योतकत्वम् आदानसन्दानादावनुसन्धेयम् इति माघटीकायां मल्लिनाथः। उक्तञ्च, निपाताश्चादयो ज्ञेया उपसर्गाश्च प्रादयः। द्योतकत्वात् क्रियायोगे लोकादवगता इमे॥ इति।

प्रादयः उपसर्गाः असंयुक्तावस्थायां न केषाञ्चिदर्थानां द्योतकाः, क्रियापदात् धातुमूलकशब्दाच्च प्राक् प्रयुज्यमानाः प्रायशो व्यवह्रियन्ते। क्वचिदुपसर्गद्वयं तत्त्रयं तच्चतुष्टयं वा मिलित्वा व्यवह्रियते—यथा, विहारः, व्यवहारः, सुव्यवहारः, समभिव्याहारः।

धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्त्तते। तमेव विशिनष्ट्यन्यः उपसर्गगतिस्त्रिधा॥ प्रादयः क्वचित् मूलपदप्रकाशितार्थस्य परिवर्त्तकाः,—यथा, आदत्ते, आगच्छति; क्वचिद्वा तदर्थे लीयन्ते,—यथा, प्रसूते, अवस्थितिः; क्वचिच्च मूलपदप्रकाशितार्थे विशेषेण अर्थान्तरं योजयन्ति,—यथा, प्रणमति, अनुताप:। किन्तु कस्य पदविशेषस्य संयोगे प्रादयः तदर्थं परिवर्त्तयन्ति, तत्पदार्थे कमर्थं योजयन्ति, कमर्थं न योजयन्ति वा, तत् सर्व्वमभिधानाभिधेयम्। पाणिनिः १।४।५९।

प्रादीनामर्थानाह पुरुषोत्तमदेवः—

प्र—गत्यारम्भोत्कर्ष सर्व्वतोभाव प्राथम्य ख्यात्युत्पत्ति व्यवहारेषु।

परा—पराभवानादर प्रत्यावृत्ति न्यग्भावेषु।

अप—अनादर भंश साकल्य वैरूप्य त्याग नञर्थेषु।

सम्—प्रकर्ष श्लेष नैरन्तर्यौचित्याभिमुख्येषु।

नि—निश्चय निषेधयोः।

अप्रशंसायां स्वती, नातिक्रमे ऽतिः, पर्यभी गतौ।
अपिः पदार्थ-सम्भाव्य-गर्हानुज्ञा-समुच्चये ॥ *

११। भ्वादिर्धुः।

(भ्वादि. ११, धुः ५१)।

भू सत्तायामित्यादिर्गणो धुसंज्ञः स्यात्। †

अव—निश्चय साकल्यानादरेषु।

अनु—पश्चात् सादृश्य लक्षण वीप्सेत्थम्भाव भाग हीन सामर्थ्य सहार्थ सामीप्य दैर्घ्य पुनरर्थेषु।

निर् निस्—अत्यर्थ निषेध निश्चय बहिष्करणेषु।

दुर् दुस्—निषेध कष्ट निन्दावक्षेपणेषु।

वि—विशेष वैरूप्य नञर्थ गति दानेषु।

अधि—उपरिभावे।

सु—पूजन शोभनानायासातिशयेषु।

उत्—ऊर्ध्वोत्कर्ष प्राकट्य नैकट्येषु। (उद् इति पृथगव्ययम्)।

परि—सर्व्वतोभावातिशय वीप्सेत्थम्भाव चिह्न भाग त्याग नियमेषु।

प्रति—लक्षण व्यावृत्ति प्रवृत्तीत्थम्भाव भाग प्रत्यर्पण सादृश्य विरोध वीप्सा समाधिषु।

अभि—समन्तादुभयार्थ लक्षण वीप्सेत्थम्भाव धर्षणेषु।

अति—अतिशयातिक्रम पूजनासम्भावनेषु।

अपि—पादरणाल्पत्व सम्भावन निन्दानुज्ञा समुच्चयेषु।

उप—अनुगति पश्चाद्भावानुकम्पाधिक्य हीन सामीप्य प्राथम्येषु।

आङ्—समन्तात् ग्रहण प्रत्यावृत्तीषदर्थ मर्य्यादा व्याप्तिषु।

* अत्र सूत्रे, सु अति प्रशंसायां, अति अतिक्रमे—फलोदयेऽपि क्रियाप्रवृत्तौ, परि अभि गतौ—एतौ यदा गत्यर्थधातुयोगे गतिं द्योतयतस्तदा, अपि अल्पत्वक्रियायोग्यतावलम्बन-निन्दानुमतिसमुच्चयेषु गि-संज्ञा न स्युः। एषु अर्थेषु गिसंज्ञाभावात्, सुस्तुत्वा इत्यादौ व्यस्त्यगुणकारिति (५४८) समासाभावे, गीक इत्यादिना (५७२) षत्वं न स्यात्, क्त्वो यप् च (११७६) न स्यात्, इति फलम्। किन्तु गिसंज्ञापठितस्य निपातत्वमित्यवश्यं वाच्यं, निपातत्वे सति अव्ययत्वम्, अतोऽतिराजीति सिद्धम्,—अव्ययत्वे व्यं पूर्व्वमित्यनेन (१९६) अतेः पूर्व्वनिपातः। पाणिनिः १।४।९३-९६।

† भूसत्ताया धातुसंज्ञानिरासायाह भू सत्तायामित्यादिर्गण इति। भू इत्यादि प्रकृतयः यदा सत्तादि-क्रिया-वाचिकास्तदैव (धु)धातुसंज्ञाः स्युः। भ्वादिगणो यथा—भ्वाद्यदादौ

१२। सित्यादिः ञिः।

(सित्यादिः १।, ञिः १।)।

स्यादिस्त्यादिश्च ञिसंज्ञः स्यात्। *

१३। क्व-द्व-ब्वान्येक-द्वि-बहुष्वेकशः।

(क्व-द्व-ब्वानि १।॥, एक-द्वि-बहुषु ७।॥, एकशः ।१।॥)।

ञेरेकैकं वचनं क्रमात् क्व-द्व-ब्व-संज्ञं स्यात्, तानि च क्रमादेक-द्वि-बहुष्वर्थेषु प्रयुज्यन्ते। †

१४। ञ्यन्तान्यौ दली।

(ञ्यन्तान्यौ १॥, द-ली १॥)।

ञ्यन्तशब्दो दसंज्ञः स्यात्, अन्यस्तु लिसंज्ञः। ‡

जुहोत्यादि-र्दिवादिः स्वादिरेव च, तुदादिश्च रुधादिश्च तनक्र्यादिचुरादय इति। "भ्वादयो धातवः"—पाणिनिः १।३।१।

* सिश्च तिश्च सिती, सिती आदी यस्य स सित्यादिः, द्वन्द्वात्परः श्रूयमाणः शब्दः प्रत्येकमभिसम्बध्यते इति न्यायात् स्यादिस्त्यादिश्चेति। शब्दोत्तरं प्रयुज्यमानाः सि औ जसादयः एकविंशतिः, धातूत्तरं प्रयुज्यमानाः तिप्-तसादयः साशीति-शत-संख्यकाश्च (ञि)विभक्तिसंज्ञाः स्युः। पाणिनिः १।४।१०४।

† विभक्तेरेक-वचनं क्वसंज्ञं, द्वि-वचनं द्वसंज्ञं, बहु-वचनं ब्वसंज्ञं स्यात्। एकवचनम् एकार्थे, द्विवचनं द्विसंख्यार्थे, बहुवचनं बह्वर्थे प्रयुज्यते। एकस्य क-कारं वचनस्य व-कारं गृहीत्वा क्व—इति सङ्केतितं, द्व्वयोरप्येवमेव। नित्यबहुवचनान्ता अपि शब्दाः सन्ति—यथा—दाराः, वर्षाः, सिकताः, जलौकसः, दशाः (वस्त्रान्तवाचिन्यः), बहुलाः, कृत्तिकाः, मघाः, लाजाः, गृहाः इत्यादि। गौरवे सर्व्वेभ्यो बहुवचनं—भट्टारकपादाः इत्यादि। विकल्पेऽपि बहुवचनं क्वचित्—यथा—सुमनसः सुमनाः, अप्सरसः अप्सराः इत्यादि। पाणिनिः १।४।१०२-१०३।

‡ विभक्त्यन्तशब्दः (द)पदसंज्ञः, तद्भिन्नशब्दो (लि)लिङ्गसंज्ञः स्यात्। (१२२) त्यलोपे त्यलक्षणमिति न्यायात् लुप्तविभक्तिकानां पदत्वन्तु आतिदेशिकं—यथा, उमा, गौरीत्यादि। पाणिनिः १।४।१४, १।२।४५-४६ च; तन्मते लि = प्रातिपदिकम्।

१५। लुपि न सन्ध्याद्यविधी।

(लुपि ७।, न ।१।, सन्ध्याद्यविधी १॥)।

लुबिति लोपे कृते यो लुप्तस्तदाद्यन्तयोः सन्धिर्न स्यात्, तदाद्यस्य च यो विधिः स च न स्यात्। *

१६। चादिर्गिर्निः।

(चादिः १।, गिः १।, निः १।)।

चादिर्गणो गिश्च नि-संज्ञः स्यात्। †

१७। णमितोऽन्त्याचोऽन्तेऽन्त्यस्यादौ।

(णम्-इतः १॥, अन्त्याचः ५।, अन्ते ७।, अन्त्यस्य ६।, आदौ ७।)।

---

* लुप्शब्देन लोपे कृते यो लुप्तस्तदाद्यन्तयोः सन्धिर्न स्यात्—यथा, (२७) हरएहि। तदाद्यस्य च विधानं यत् किमपि तन्न स्यात्, तेन राजभ्यामित्यादौ (१०८) न आ। इदन्तु न सर्व्वत्र, दृष्टौ भस्मीकरण इत्यादिज्ञापकात्, क्वचित् आद्याकारस्थाने विधिर्भवतीति, यद्वा नञा निर्द्दिष्टमनित्यमिति न्यायात् भस्मीकरणमित्यत्र न लुप्यपि आद्याकारस्थाने ईर्भवतीति। अत्र, आदिपदेन सिद्धे आद्य इति अवर्णग्रहणम् अवर्णाग्रिमनिषेधार्थम्; तेन लुप्तस्यादिस्थितावर्णनिमित्तकविधिरपि न स्यात्, यथा,—राजभिरित्यत्र (१०६) न ऐस्। अन्यनिमित्तकन्तु स्यादेव, यथा, चक्रवर्त्तिषु इत्यादौ नस्य लुप्यपि इलात् (१११) षत्वम्। अत्र 'सन्धि'शब्दग्रहणफलं (२३) दामोदर इत्यत्र स्वयं लिखितम्। पाणिनिः १।१।६३।

† चादिर्गणः—च, वा, ह, हा, हि, ही, हे, है, हो, रे, भो, नु, नु, स्म, वै, औस्, खिल, अह, एव, एवम्, नूनम्, शश्वत्, भूयस्, चेत्, कच्चित्, यत्र, तत्र, हन्त, माङ्, नञ्, यावत्, तावत्, वषट्, वौषट्, स्वाहा, स्वधा, स्वस्ति, ओम्, खलु, किल, अथ, सुष्ठु, अ, आ, इ, ई, उ, ऊ, ऋ, ऌ, ए, ऐ, ओ, औ, यथा, तथा, यदि, यत्, तत्, किम्, धिक्, हाहा, आहो, उत, अहे, अहो, अथो, ननु, अस्ति, अपि, इति, इव, वत, अमा, जातु, कथं, कुतः, कुत्र, आहोस्वित्, दिष्ट्या, अङ्ग, फट्, अये, अरे, उरी, उररी, उरूरी, ऊरी, ऊररी, ऊरूरी, तिर्य्यक्, इत्यादि;—गिश्च- प्रादयो विंशतिः, एते (नि)निपातसञ्ज्ञाः स्युः। गिशब्देनेह गिसंज्ञापठिता एव गृह्यन्ते—अतएव सत्यादीनामर्थादौ गिसंज्ञाभावेऽपि निसंज्ञा अव्ययसंज्ञा च। पाणिनिः १।४।५७-५८।

णित् यस्योच्यते तस्यान्त्याच: पर:, मित्तदौ, ङित्वस्य स्थाने, मिदादौ, स्यात् । *

१८ । परस्त्य: ।

(पर: १।, त्य: १।) ।

प्रकृते: परो य: स त्यसंज्ञ: स्यात् । †

१९ । अं अ: नुवी ।

(अं अ: ।१॥, नुवी १॥) ।

अकार उच्चारणार्थ:, बिन्दुद्विबिन्दुमात्रौ वर्णौ क्रमान्नु-वि-संज्ञौ स्त: । ‡

२० । ꣸क ×पm मून्यौ ।

(क ×पm १॥, मून्यौ १॥) ।

वज्र-गजकुम्भाकृती वर्णौ क्रमात् मू-नी-संज्ञौ स्त: । §

---

* णम्—ण न ङ म—इत् येषां ते णमित:, अन्ते भवम् अन्त्यम्, अन्त्यश्च सत् अच्चेति तस्मात् अन्त्याच: । मूर्द्धन्यणकारेदागम: स्थानिन: अन्त्याच: परे भवति, दन्त्यनकारेदागम: स्थानिनोऽन्ते, ङकारेदादेश: स्थानिनोऽन्त्यवर्णस्य स्थाने, मकारेदागम: स्थानिन: आदौ । यस्योच्यते इति षष्ठ्यन्तनिर्देशात् प्रत्ययेषु न प्रसङ्ग: । तेन ङकारेतो ङे-आदिविभक्तय: लिङ्गात् परा एव, एवं मूर्द्धन्यणकारेतो णबादय: धातो: परा एव । पाणिनि: १।१।४६,४७,४८,५३ ; तन्मते णित्=मित्, नित्=कित्, मित्=टित् ।

† प्रकृते: परो य: स (त्य)प्रत्ययसंज्ञ: स्यात् । पदस्य मूलभाग: प्रकृति: । "प्रतीयते विधीयते इति प्रत्यय: ।" सिद्धान्तकौमुदी । पाणिनि: ३।१।२ ।

‡ नुरनुस्वार: । विर्विसर्ग: ।

§ मूर्जिह्वामूलीय:—जिह्वामूलोच्चार्य: । नीरुपाध्मानीय:—उपाध्मानीयस्योत्पत्तिस्थानम् ओष्ठ:, उच्चारणन्तु सर्पश्वासवत् । कपावुच्चारणार्थौ । (६८ सूत्रं द्रष्टव्यम्) ।

नु-वि मू-नीनां णत्वविधौ स्वरता, स्वरसन्धौ व्यञ्जनता, तथाच—नुवी पूर्व्वेण सम्बद्धौ

२१ । हो झस् ।

(हः ।१।, झस् ।१।) ।

हकारो झस्संज्ञः स्यात् । *

इति संज्ञापादः ।

२य पादः—अच्सन्धिः । †

२२ । सह र्णे र्घः ।

(सह ।१।, र्णे ७।, र्घः १।) ।

र्णे परे पूर्व्वस्य, र्णेन सह र्घः स्यात् । ‡

मून्यौ तु परगामिणौ । चत्वारोऽयोगवाहाख्याः पत्वकर्म्मण्यचो मताः । अचः स्वयं विराजन्ते, हसस्तु परगामिणः ॥

* झस्-प्रत्याहारमध्ये (३) हकारस्याभावात् (५०) ग्रहितमित्यादिसिद्ध्यर्थं हकारो झस्संज्ञायां परिगणितः । पाणिनौ तु हल् इति पृथक् प्रत्याहारस्वीकारः ।

---

† संयोगशीलशब्दानामसंयोगे तेषामुच्चारणकार्कश्यम् असुश्राव्यता च भवति, तद्दोष-निवारणाय द्वौ शब्दौ, पूर्व्वशब्दशेषाक्षरस्य परशब्दप्रथमाक्षरस्य वा उभयोर्व्वा परिवर्त्तनेन, संयुज्येते,—एवंविधसंयोगः सन्धिराख्यातः । तस्य सामान्यनियमः—सन्धिरेकपदे नित्यो नित्यो धातूपसर्गयोः । समासेऽपि च नित्यः स्यात् स चान्यत्र विभाषितः ॥ इति ।

‡ पूर्व्वसवर्णस्य परसवर्णेन सह दीर्घः स्यात् ।—सवर्णद्वयमध्ये पूर्व्ववर्णस्य ह्रस्वत्वे परस्य दीर्घत्वे १, पूर्व्वस्य दीर्घत्वे परस्य ह्रस्वत्वे २, उभयोर्ह्रस्वत्वे ३, दीर्घत्वे वा ४, पूर्व्ववर्णो दीर्घो भवेत् ।—यथा, शिव-आशा = शिवाशा १, उमा-अर्च्चा = उमार्च्चा २, सुर-अरिः = सुरारिः ३, राजा-आगतः = राजागतः ४, इत्यादि । अत्र सूत्रे र्णेन र्घ इति कृते पौर्व्वापर्य्यनियमाभावात् होतृकार इत्यत्र परस्य दीर्घे होतॄकार इत्यनिष्टं स्यात् । अत एव दीर्घः स्यात्, अपः सवर्णत्वेऽपि (६) दीर्घत्वासम्भवात् । पाणिनिः ६।१।१०१ ।

मुरारिः, लक्ष्मीशः, विष्णूत्सवः, धातॢद्धिः, शक्ॢदन्तः, होतॢ-
कारः । *

२३ । आदिगेचोर्णुव्री ।

(आत् ५।, इक्-एचोः ६॥, णुव्री १॥) ।

अवर्णात् परयोरिगेचोरवर्णेन सह क्रमात् णुव्री स्तः । †
हृषीकेशः, दामोदरः । ‡
सन्धिग्रहणात् सन्धिलुप्येव न सन्धिः । §
माधवर्द्धिः, शिवल्कारः, कृष्णैकत्वं, मुकुन्दौकः, कृष्णैक्यं, भवौ-
षधम् । ¶

२४ । गेधोरनेधिन एङ्-ऋकोः ।

(गः ६।, धोः ६।, अन्-एध्-इनः ६।, एङ्-ऋकोः ६॥) ।

गेरवर्णात् परयोरेधिन्वर्जितस्य धोरिङ्ऋकोरवर्णेन सह क्रमात्
णुव्री स्तः । ||

---

* मुर-अरिः = मुरारिः, लक्ष्मी-ईशः = लक्ष्मीशः, विष्णु-उत्सवः = विष्णूत्सवः, धातृ-
ऋद्धिः = धातॢद्धिः, शकृ-ऌदन्तः = शकॢदन्तः, होतृ-ऌकारः = होतॢकारः ।

† अवर्णात् परस्य यथासम्भवम् इकः अवर्णेन सह गुणः (८) स्यात्, एचस्तु अवर्णेन सह वृद्धिः (९) स्यात् । पूर्व्वतः सहानुवृत्तिः । पाणिनिः ६।१।८७-८८ ।

‡ हृषीक-ईशः = हृषीकेशः, दामन्-उदरः = दामोदरः ।

§ लुपि न सन्ध्यात्वविधौ इत्यत्र सन्धिशब्दग्रहणात् सन्ध्यध्यायसूत्रेण लुप्येव सन्धिर्न स्यात्, अध्यायान्तरसूत्रेण लुपि तु सन्धिः स्यात्. अतोऽत्र दामन् इति शब्दस्य न-कारस्य अध्यायान्तर(अजन्ताध्याय)सूत्रेण (११८) लुपि दामोदर इति सन्धिः ।

¶ माधव-ऋद्धिः = माधवर्द्धिः, शिव-ऌकारः = शिवल्कारः, कृष्ण-एकत्वं = कृष्णैकत्वं, मुकुन्द-ओकः = मुकुन्दौकः, कृष्ण-ऐक्यं = कृष्णैक्यं, भव-औषधम् = भवौषधम् ।

|| आत् सह चेत्यनुवर्त्तते । उपसर्गाणां मध्ये प्र परा अप अव उप आ(ङ्) एभ्यः

प्रेजते, परोखति, अपार्च्छति । *

अनेधिनः किं—उपैधते, अवैति । †

२५ । लिधोर्वा ।

(लिधोः ६।, वा ।१।) ।

लिधोस्तु पूर्व्वोक्तं कार्य्यं वा स्यात् । ‡

प्रेकीयति प्रैकीयति, प्रोघीयति प्रौघीयति, प्रार्चीयति प्रर्चीयति, प्राल्कारीयति प्रल्कारीयति ।§

२६ । लोपोऽस्योमाङोः ।

(लोपः १।, अस्य ६।, ओम्-आङोः ७॥) ।

अवर्णस्य ओमाङोः परयोर्लोपः स्यात् । ¶

शिवायोन्नमः, शिवेहि, ब्रह्मोतं, राजर्षिः । ‖

रस्य एध-इन वर्जितस्य धातोः प्रादीनामवर्णेन सह एङीगुणः (८), ऋकौवृद्धिः (९) स्यात् । धातोर्लृकाराभावात् एङ्ऋतोरित्यनेनापि इष्टसिद्धौ लग्रहणं परत्रानुवृत्त्यर्थमेव । पाणिनि. ६।१।८९,९१,९४ ।

* प्र-एजते = प्रेजते, परा-ओखति = परोखति, अप ऋच्छति = अपार्च्छति ।

† उप-एधते (२३) = उपैधते, अव-एति (२३) = अवैति ।

‡ पूर्व्वोक्तनिमित्तीभूतेन उपसर्गावर्णेन सह नामधातोः एङ्ऋकोः क्रमात गुण(८) वृद्धी (९) वा स्तः । प्र-ओङ्कारीयति इत्यादौ पूर्व्वापरयोः परविधिर्बलवान् इति न्यायात् परसूत्रेण (२६) अवर्णस्य लोपे प्रोङ्कारीयति, न तु प्रौङ्कारीयति । पाणिनिः ६।१।९२,९४।

§ प्र-एकीयति = प्रेकीयति (वा २३) प्रैकीयति, प्र-ओघीयति = प्रोघीयति (वा २३) प्रौघीयति, प्र-ऋर्चीयति = प्रार्चीयति (वा २३) प्रर्चीयति, प्र-ऌकारीयति = प्राल्कारीयति, (वा २३) प्रल्कारीयति ।

¶ इह अवर्णग्रहणं सह-निवृत्त्यर्थम् । अवर्णस्य ओङ्कारे आदिष्टाङि च परे लोपः स्यात्, अनादिष्टे आङि परे दीर्घेणैव पदसिद्धेः अवर्णलोपस्य वैयर्थ्यात् । पाणिनिः ६।१।९५ ।

‖ शिवाय-ओम्-नमः (५०,५१) = शिवायोन्नमः ; अत्र, लोपोऽप्यादेश उच्यते इति न्यायात् स्थानिवदादेश इति नियमेन अकारस्य स्थानिवत्त्वेन अयांयोरिति (१७)

स्थानिवदादेशः। * द्वयोर्विभाषयोर्मध्ये विधिर्नित्यः।†

२७। एवेऽनियोगे।

(एवे ७।, अनियोगे ७।)।

अवर्णस्य एवे परे लोपः स्यात् अनियोगे।‡
अद्येव। नियोगे तु—अद्यैव गच्छ।§

२८। वौष्ठोत्वोः से।

(वा ।१।, ओष्ठोत्वोः ७॥, से ७।)।

अवर्णस्य ओष्ठोत्वोः परयोर्लोपः स्यात् वा से सति।¶
बिम्बोष्ठः बिम्बौष्ठः, स्थूलोतुः स्थूलौतुः।‖ से किं—तवौष्ठः।**

यकारस्य न लुप्। शिव आ-इहि (२३)=शिव-एहि=शिवेहि, आ-ऊतम् (२३)=ओतं, ब्रह्म-ओत=ब्रह्मोतम्, आ-ऋषिः (२३)=अर्षिः, राजा-अर्षिः=राजर्षिः।

* स्थानमस्यास्तीति स्थानी, आदिश्यतेऽसौ आदेशः। यो वर्णो यस्य वर्णस्य स्थाने आदिष्टः स पूर्वावर्णवत् भवतीत्यर्थः। वस्तुतस्तु येषु अनिष्टं तेषु स्थानिवत्त्वं नास्ति, अतएव प्राहुः—इष्टसाधनार्थमेव न्यायः स्वीक्रियते, नत्वनिष्टसाधनार्थमिति। पा. १।१।५६।

† पूर्व्वापरयोः सूत्रयोः विकल्पवाचिनि वाशब्दे प्रयुक्ते तन्मध्यवर्त्तिनि सूत्रे सूत्रयोः सूत्रेषु वा वाशब्दस्य नानुवृत्तिः, अतस्तद्विधिर्नित्यः, यथा—(२५) लिधोर्वा, (२८) वौष्ठोत्वोः से; इत्येतयोर्मध्ये (२६) लोपोऽस्यामाङोः, (२७) एवेऽनियोगे इत्येतयोः वाशब्दस्य नानुवृत्तिः। यत्र तु वाशब्दो व्यवस्थावाची, तत्र विभाषाद्वयमध्यवर्त्तिनः इष्टत्वात् नित्यत्वम् अनिष्टत्वादनित्यत्वं बोध्यम्—तेन (३७) अयांवीरिति, (३८) गोर्वेत्येतयोर्मध्ये, (३८) एङोऽतः इत्यस्य नित्यत्वम्। (६६) से तु क ख प फे वेति, (७१) यवाचि इत्येतयोर्मध्ये, (६७) शसि शमिति, (६८) क ख प फयोर्मूर्न्यावित्येतयोर्द्वयोर्विकल्पः, (६९) अतोऽश्व्युः, (७०) अ भो भगो इत्येतयोर्द्वयोर्नित्यत्वम्।

‡ अनियोगे अनियमे अनवधारणे इत्यर्थः। "एवे चानियोगे" इति वार्त्तिकम्।

§ अद्य एव=अद्येव। अद्य-एव गच्छ (२१)=अद्यैव गच्छ।

¶ ओष्ठे ओतौ च परे अवर्णस्य लोपः स्याद्वा समासे। वाशब्दस्येह व्यवस्थावाचित्वात् संज्ञायां नित्यम् अवर्णलोपः स्यात्, तेन प्रोष्ठो वृषः, प्रोष्ठी मत्स्यविशेषः। वार्त्तिकम्।

‖ बिम्ब-ओष्ठः=बिम्बोष्ठः, स्थूल-ओतुः=स्थूलोतुः, (वा २२) बिम्बौष्ठः, स्थूलौतुः। बिम्बे इव ओष्ठौ यस्य, स्थूलश्चासावोतुश्चेति समासवाक्यम्।

** से किं—से इति किमुक्तम्, असमासे—तव-ओष्ठ, (२२)=तवौष्ठः।

२९। त्रीसे त्वृतो व्रिं।

(त्रीसे ७।, तु ।१।, ऋतः १।, व्रिं २।)।

अवर्णात् पर ऋतो व्रिमाप्नोति त्रीसे सति। *
शीतार्त्तः। † त्रीसे किं—परमर्त्तः। ‡ त्वन्तस्य नानुवृत्तिः। §

३०। ऋण प्र वसन वत्सर वत्सतर दश कम्बलस्यर्णः।

(ऋण—कम्बलस्य ६।, ऋण. १।)।

एषामवर्णात् पर ऋणो व्रिमाप्नोति। ऋणार्णं, प्रार्णं। ¶

३१। स्वाच्चयोरीरोह्निन्यौ(ण्यौ)।

(स्व-अच्चयोः ६॥, ईर-ऊह्निन्यौ १॥)।

---

* अर्थवशात् विभक्तेर्विपरिणाम इति न्यायात् (२६) लोपोऽस्योमाङोरित्यवर्णस्य विभक्तिं विपरिणमय्याह अवर्णात् पर इति। वृद्धिविधानदर्शनादेव सहानुवृत्तिः। तृतीयासमासे अवर्णात् परस्य अव्यवहितस्य ऋतशब्दऋकारस्य पूर्व्वावर्णेन सह वृद्धिः स्यात् (९)। पाणिनि ६।१।८९ सूत्रस्य वार्त्तिकम्।

† शीत-ऋत. = शीतार्त्तः। शीतेन ऋतः—पीडित इति तृतीयातत्पुरुषसमासः। एवं क्षुधा-ऋतः = क्षुधार्त्त इत्यादि।

‡ परम ऋतः = परमर्त्तः। परमश्चासौ ऋतश्चेति कर्म्मधारयसमासे ऋतस्य वृद्ध्यभावेन (२३) गुणः (८)।

§ तुकारान्तस्य पदस्य परसूत्रे अनुवृत्तिर्नास्तीति। अनेन ज्ञापकेन त्वन्तभिन्नपदस्य परसूत्रेऽनुवृत्तिः सूचिता, परन्तु ज्ञापकसिद्धमनित्यमिति न्यायात् क्वचिदनिष्टे नानुवर्त्तते।

¶ ऋणापनयनार्थम् ऋणम् ऋणार्णं, प्रकृष्टमृणं प्रार्णं, वसनार्थमृणं वसनार्णं, वत्सरेण देयमृणं वत्सरार्णं, वत्सतरार्थमृणं वत्सतरार्णं, दश ऋणाः पयोदुर्गाणि सन्ति यस्मिन् यस्यां वा दशार्णो देशः दशार्णा नदी, कम्बलार्थमृणं कम्बलार्णम्। ऋणोऽस्त्रियां पयोदुर्गे देये नीचे दुरात्मनीति पद्मगोविन्दः। एतदन्यत्र तु (२३) गुणः—यथा, अधम-ऋणः = अधमर्णः, उत्तम-ऋणः = उत्तमर्णः। "प्रवत्सतरकम्बलवसनार्णदशानामृणे" इति वार्त्तिकम्। "अत्र कालापानुसारिणो वत्सरशब्दमपि पठित्वा वत्सरे देयमृणं वत्सरार्णमित्युदाहरन्ति। अपरे तु वत्सशब्दमपि पठन्ति। तत्सर्व्वं भाष्यादिविरुद्धम्" इति प्रौढमनोरमा।

अनयोरवर्णात् परावैतौ त्रिमाप्नुतः ।* स्वैरम्, अक्षौहिणी ।†

३२ । प्रस्योढोढ्यूहाः ।

(प्रस्य ६।, ऊढ-ऊढि-ऊहाः १॥) ।

प्रस्यावर्णात् परा एते त्रिं यान्ति । प्रौढः, प्रौढिः, प्रौहः ।‡

३३ । वैषैष्यौ ।

(वा ।१।, एष-एष्यौ १॥) ।

प्रस्यावर्णात् परावैतौ त्रिं वा प्राप्नुतः । प्रैषः प्रैष्यः, प्रेषः प्रेष्यः ।§

३४ । मनीषाः । (१॥) ।

मनीषाद्या निपात्यन्ते ।¶

---

* स्वाक्षयोः क्रममाह—स्वस्य अकारात् ईरः, अक्षस्य अकारात् ऊहिनी च, तेन सह त्रिमाप्नोति । सूत्रे ईर इत्यस्य अकार उच्चारणार्थः. तेन रेफान्त ईर् इत्यस्य ग्रहणं, तेन ईर-ईरिणोः प्राप्तिरिति—यथा, स्वैरं, स्वैरी, स्वैरिणी । स्वेरा इत्यत्र न स्यादनभिधानात । मलादिरहिते स्वैरं स्वच्छन्दमन्दयोस्त्रिष्विति शब्दाब्धिः । अक्षाणा-मूहिनीति वाक्ये "सञ्ज्ञायामेव" अक्षौहिणी (णत्वं)—परिमाणविशेषविशिष्टा सेना । अक्षाणामूहस्तत इनि कृते तु अक्षौहिणी(नी)त्येव भवति । पूर्व्ववत् वार्त्तिकम् ।

† स्व-ईरं=स्वैरम् । अक्ष-ऊहिनी=अक्षौहिणी ।

‡ प्र-ऊढः=प्रौढः, प्र-ऊढिः=प्रौढिः, प्र-ऊहः=प्रौहः । ऊहधातोः घञ् प्रत्ययेन ऊहशब्दः साध्यः, वहधातोस्तु क्त-क्ति-प्रत्ययाभ्यां ऊढ. ऊढिः इति पदद्वयं सिद्धम् प्रौढो भार इत्यत्र प्रपूर्व्वादाङ्पूर्व्वाच्च वहधातोः क्तप्रत्यये रूपम् । पूर्व्ववत् वार्त्तिकम् काशिकावृत्ति-कलाप-सुपद्म-सक्षिप्तसारमते (प्राचां मते भाष्येऽपि) वार्त्तिकसूत्रे ऊहशब्दस्य उल्लेखो नास्ति, नव्यानां मते तु भाष्य तदुल्लेखो दृश्यते ।

§ विकल्पेन वृद्धिविधानात् पक्षे गुणो भवतीत्यवसीयते, इयमेव वाशब्दस्य व्यवस्था । प्र-एषः=प्रैषः, प्र-एष्यः=प्रैष्यः । वा (८) प्रेषः, प्रेष्यः । दूत इत्यर्थः । पूर्व्ववत् वार्त्तिकम् ।

¶ यत् यत् लक्षणेनानुत्पन्नं तत् सर्व्वं निपातनात् सिद्धमिति भाष्यम् । तस्य सिद्धिः-क्वचित् वर्णागमैः, क्वचित् वर्णविपर्य्ययैः, क्वचित् वर्णविकारैः, क्वचित् वर्णनाशैः, क्वचिच्च धात्वर्थातिशयैर्ज्ञातव्या । निपातः पञ्चभेदो यथा—वर्णागमो वर्णविपर्य्ययश्च, द्वौ चापरौ वर्णविकारनाशौ । धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तमिति पूर्व्वाचार्य्याः । पाणिनि ६।१।८४ सूत्रस्य वार्त्तिकम् ।

मनीषा, हलीषा, लाङ्गलीषा, शकन्धुः, कुलटा, सीमन्तः, पतञ्जलिः, सारङ्गः । *

३५ । यलायवायावोऽच्यौचः ।

(यल्-अय्-अव्-आय्-आवः १॥, अचि ७।, इचः ६।—यला ३।, वा) ।

इचः स्थाने य् व् र् ल् अय् अव् आय् आव् एते अचि परे क्रमात् स्युः । † त्र्यम्बकः, विष्ण्वीशौ, धात्रच्युतौ, लाकृतिः, हरये, प्रभवे, नायकः, पावकः । ‡

३६ । वाव गोर्दान्ते ।

(वा ।१।, अव ।१।, गोः ६।, दान्ते ७।) ।

---

* मनस् ईषा = मनीषा—बुद्धिः । हल-ईषा = हलीषा, लाङ्गल-ईषा = लाङ्गलीषा, ईषा लाङ्गलदण्डः । संक्षिप्तसार-सुपद्म-मते ईषा गमनम् । शक-अन्धुः = शकन्धुः—शकदेशस्थकूपः । कर्काणां राजामन्धुः कर्कन्धुरित्यपि वक्तव्यम् । कुल-अटा = कुलटा—वेश्या । सीम-अन्तः = सीमन्तः—केशविन्यासः । पतत्-अञ्जलि = पतञ्जलिः—मुनिविशेषः । सार-अङ्गः = सारङ्गः—चातकादिः । शकन्ध्वादिषु पररूपं वाच्यमिति वार्त्तिकम् । अत्र अच्सन्धौ अन्त्लोपविधायकेऽपि सूत्रे बहुवचननिर्देशात् तस्मै आदिपदस्योपादानाच्च अन्यान्यपि पदानि निपातनात् सिध्यन्ति, इत्यादि बहुवचनान्ताः गणस्य संसूचकाः इति बोध्यः । तथाच—बृहस्पतिः, वाचस्पतिः, वनस्पतिः, बलाहकः, गोष्पदम्, आस्पदं, जीमूतः, तस्करः, मस्करी, अटवी, आश्चर्यं, पृषोदरः, केशवः, परोक्ष, पश्चार्द्धं, हरिश्चन्द्रः, भुवर्लोकः, अन्योऽन्यम्, परस्पर, परम्परा, पिशाचः, कपित्थः, निष्कं, इत्यमित्यादि । पाणिनिः ६।३।१०९ ।

† इ उ ऋ लृ ए ओ ऐ औ एतेषां वर्णानां स्थाने क्रमेण—

य् व् र् ल् अय् अव् आय् आव् एते क्रमात् स्युः अवर्णे एचि असमानाक्षरे च परे । समान-इकि परे तु (२२) दीर्घएव, यथा—लक्ष्मीशः, सामान्यविशेषयोर्मध्ये विशेषविधिर्बलवान् इति न्यायात् । सूत्रे यल इति अकारान्तपाठः उच्चारणसौकर्यार्थः (४) । पाणिनिः ६।१।७७-७८ ।

‡ त्रि-अम्बकः = त्र्यम्बकः, त्रीणि अम्बकानि चक्षूंषि यस्य । विष्णु-ईशौ = विष्ण्वीशौ, धातृ-अच्युतौ = धात्रच्युतौ, लृ आकृतिः = लाकृतिः, लृकारस्येव आकृतिर्यस्य । हरे ए = हरये, प्रभो-ए = प्रभवे, नै-अकः = नायकः, पौ-अकः = पावकः ।

गोरिचः स्थाने अवः स्याद्वा अचि परे दान्ते। * गवेशः, गवीशः। दान्ते किं, गवे। गवेन्द्र-गवाक्षौ नित्यम्। †

३७। अयां योर्लुब् वा।

(अयां ६।॥, योः ६॥, लुप् ।१।, वा ।१।)।

दान्ते स्थितानामयादीनां यवयोर्लुप् स्याद्वा। ‡ हरएहि हरयेहि, शम्भइदं शम्भविदं, श्रियाएति श्रियायेति, विष्णाउत्कः विष्णावुत्कः। §

३८। एङोऽतः।

(एङ ।५।, अतः ६।)।

दान्ते स्थितादेङः परस्य अकारस्य लुप् स्यात्। हरेऽव, विष्णोऽव। ¶

---

* इच इत्यस्यानुवृत्तिः। अव इति पृथक् विधानात् गोशब्दस्य ओकारस्थाने अकारान्त-अवादेशः स्याद्वा अचि परे पदान्ते। दशौ गोरिचः ग्रहणात् चित्रा गौर्यस्य इत्यादौ (३३०) गवावादेरित्यादिना गोरोकारस्थाने ह्रस्व-उकारादेशे चित्रगु-आचार्य्यः = चित्रगवाचार्य्यः इत्यादि सिद्धम्। गवीश इत्युदाहरणानन्तरम् अयां योरिति लक्षणकरणात् नात्र वलोपः, केचित् समासे न स्यादित्याहुः। पाणिनिः ६।१।१२२।

† गो-ईशः (२३) = गवेशः, वा (३५) गवीशः। गो-ए (३५) = गवे। गो-इन्द्रः = गवेन्द्रः, गो-अक्षः = गवाक्षः, उभयत्र नित्यमवादेशः। पाणिनिः ६।१।१२३-१२४।

‡ अयाम् इति बहुवचननिर्देशो गणार्थः। पदान्ते स्थितानाम् अय्, अव्, आय्, आव्, इत्येषां यवोर्लुप् स्याद्वा। अत्र वाशब्दस्य व्यवस्थया—क्वचिन्न स्यात्, क्वचित् वा स्यात्, क्वचिन्नित्यमिति मतम्। अभिधानादुदाहरणानि ज्ञेयानि। पाणिनिः ८।३।१९।

§ हरे-एहि (३५) = हरय्-एहि (३७) = हरएहि, शम्भो-इदं (३५) = शम्भव्-इदं (३७) = शम्भइदं, श्रियै-एति (३५) = श्रियाय्-एति (३७) = श्रियाएति, विष्णौ-उत्कः (३५) = विष्णाव्-उत्कः (३७) = विष्णाउत्कः। वा (३५) हरयेहि, शम्भविदं, श्रियायेति, विष्णावुत्कः। (१५) सन्धि-सूत्रेण लुप्करणात् हरएहि इत्यादौ न सन्धिः।

¶ अपदान्ते यथा—शे अनं (३५) = शयनं, भो-अनं (३५) = भवनम्। पाणिनिः ६।१।१०९।

३९। गोर्वा। (गोः ६।, वा ।१।)।

गोरति वा सन्धिः। * गवाग्रं गोऽग्रं गो-अग्रम्। †

४०। नाजो अन्तोऽनाङ् निः प्लुश्च।

(न ।१।, अच् ।१।, ओ-अन्तः १।, अनाङ् ।१।, निः १।, प्लुः १।, च ।१।)।

अच्मात्र ओकारान्तश्च निराङ्वर्जः सन्धिं नाप्नोति, प्लुश्च। ‡ अ-अनन्त, इ-ईश्वर, उ-उमेश, अहो-ईशान, कृष्ण-एहि।

अनाङ् किं—

मर्य्यादायामभिविधौ क्रियायोगेषदर्थयोः।
य आकारः स ङित् प्रोक्तो वाक्यस्मरणयोरङित्॥ §

---

* अर्थवशात् विभक्तेर्विपरिणाम इति न्यायात् अतः इति षष्ठ्यन्तपदं सप्तम्यन्तं भूत्वा अनुवर्त्तते, इत्यत आह गोरतीति। प्रकरणवशात् सन्धिः। अत्र पूर्व्वसूत्रात् एङः इत्यनुवर्त्त्य एङन्तस्य गोरिति वक्तव्यम्, तेन (चित्रगु-अग्रम्) चित्रग्वग्रमित्यत्र नास्य सूत्रस्य प्रसरः। पाणिनिः ६।१।१२२।

† गो-अग्रं (३६) = गवाग्रं, वा (३८) = गोऽग्रं (३९) = गो-अग्रम्।

‡ अच्मात्राव्ययस्य, ओकारान्ताव्ययस्य, प्लुतस्य च, अन्त्यावयवस्य शब्दान्तरस्याद्यावयवेन सह न सन्धिः। तेन अनन्त च, ईशान-अहो इत्यादौ सन्धिः स्यादेव। ओ अन्त इति पृथक्करणात् अच्पदेन तन्मात्रं प्रतीयते, अन्यथा व्रजवदाल (५७४) इत्यादिवत् अजन्तस्यैव प्राप्तिः स्यात्। तेन अ, इ, उ, ऋ, ऌ ए, ऐ, ओ, औ, इत्येकैक-निपातः, एवमोकारान्तोऽपि निपातः। नञा निर्दिष्टमनित्यमिति न्यायात् अहोऽतिरम्यमित्यादिसिद्धिः। पाणिनिः १।१।१४ १५।

§ ङिदनुबन्धशून्यस्य आकारस्य आङश्च भेदज्ञानं कथम् इत्यत आह—य आकारः—मर्य्यादायां सीमायाम् (१), अभिविधौ अभिव्याप्तौ (२), क्रियायोगे—क्रियावाचकपदपूर्व्ववर्त्तित्वे (३), ईषदर्थे, अल्पार्थे (४), वर्त्तते, स ङित् प्रोक्तः, तस्य सन्धिरिति भावः। महाभाष्ये यथा—ईषदर्थे क्रियायोगे मर्य्यादाभिविधौ च यः।

एतमातं ङितं विद्यात् वाक्यस्मरणयोरङित्॥

आत्मबोधादैकदेशादालोक्योपरतैर्हरिः।
आ एवं तत्त्वमर्य्यादा, आ एवं तत् कृतं मया॥ *

४१। त्वद्वेऽमीयू। (त्व-द्वे ७, अमी ई ऊ-ए—यू ।१।)।

त्वे निष्पन्नोऽमी-शब्दो, द्वे निष्पन्न ईदूदेदन्तश्च सन्धिं नाप्नोति। †
अमी-ईशाः, हरी-एतौ, विष्णू-इमौ, गङ्गे-इमे। त्वद्वे किम्—
अम्ययं, बध्वर्थः। ‡

४२। स्योद्वितौ। (सि-ओत्—स्योत् ।१।, वा ।१।, इतौ ७।)।

सौ जात ओकारः सन्धिं वा नाप्नोति इतौ परे। §

---

* यथा, आ-आत्मबोधात्—आत्मबोधात्—आत्मज्ञानपर्य्यन्तम् (१)। आ-एक-देशात्—ऐकदेशात्—एकदेशं करचरणादिकं व्याप्य(२)। आ-आलोक्य=आलोक्य—दृष्ट इत्यर्थः (३)। आ-उपरतैः=ओपरतैः—ईषद्विरक्तैः (४)। य आकारः—वाक्यार्थे (१) पूर्व्ववाक्यार्थानुभवयोः (२) वर्त्तते, स अङित्, अतएव तस्य सन्धिर्न स्यादित्यर्थः, यथा, आ एवं तत्त्वस्य ब्रह्मणो मर्य्यादा इति वाक्यं (१), मया तत् कृतम् आ एवम् इति स्मरणम् (२)।

† बहुवचननिष्पन्नः अमीशब्दः, द्विवचननिष्पन्नः ईकारान्तः ऊकारान्तः एकारान्तश्च सन्धिं नाप्नोति। अत्र ईकारादेः सन्धिनिषेधात् तन्निमित्तकस्यापि सन्धिनिषेधो बोध्यः—तेन गङ्गे-अत्र इत्यादौ नाकारलोपः। पाणिनिः १।१।११-१२।

‡ अमी-अयम्=अम्ययम्, अमी—रोगी। बध्वा-अर्थः (२१९)=बधू-अर्थः=बध्वर्थः, एवं नार्य्या-अर्थः=नार्य्यर्थः इत्यादौ ऊकार-ईकारयोः द्विवचननिष्पन्नत्वाभावात् सन्धिः स्यादिति। नञा निर्द्दिष्टमनित्यमिति न्यायात् द्विवचने अदस एकारस्य सन्धिः स्यादिति, तेन अमुके-इह (२५,२७) अमुक इह अमुकयिह, अमुके-अत्र (२८)=अमुकेऽत्र, एवं मणीवादिषु द्विवचननिष्पन्नस्यापि ईकारस्य इवे परे सन्धिः स्यादिति। यथा, मणी भार्य्या-पती चैव दम्पती जम्पती तथा। रोदसी वाससी चैव इवे जायापती तथा। अन्यैरपीह पठ्यन्ते पेचुपोप्रभृतान्यपीति मणीवादयः। अथवा इवार्थस्य वाशब्दस्य वशब्दस्य वा स्वीकारेण ते साध्याः। ईदूतोर्दीर्घग्रहणात् अभवावश्वावामित्यत्र ह्रस्वस्य सन्धिः।

§ सौ परे जात ओकारः उकारान्तशब्दस्य सम्बोधने एव सम्भवति, स ओकारः सन्धिं वा नाप्नोति इति शब्दे परे। पाणिनिः १।१।१६।

विष्णो-इति विष्ण-इति विष्णविति । *

४३ । उञ् णपात्त्वचि व वा ।

(उञ् ।१।, णपात् ५।, तु ।१।, अचि ७।, व ।१।, वा ।१।) ।

उञ् सन्धिं वा नाप्नोति इतौ परे, णपात् परस्तु वो वा स्यादचि । † उ-इति, विति । किम्वुक्तं, किमु-उक्तम् । ‡

४४ । वेक् स्वश्चार्णोऽसे ।

(वा ।१।, इक् ।१।, स्वः १।, च ।१।, अर्णे ७।, असे ७।) ।

इक् सन्धिं वा नाप्नोति, स्वश्च वा स्यादर्णे परे, नतु से, दान्ते । §
शार्ङ्गी-अत्र शार्ङ्गि-अत्र शार्ङ्ग्यत्र । असे किं—हर्य्यर्चा । ¶

४५ । ऋटक्यक् । (ऋकि ७।, अक् ।१।) ।

---

* विष्णो-इति = विष्णो-इति, वा (३५, ३७) विष्ण इति विष्णविति ।

† अकारोऽस्य नञ्वदव्ययत्वज्ञापकः । पूर्व्वतोऽनुवर्त्तमानेन वाशब्देन, उञ् सन्धिं वा नाप्नोति इतौ परे, इत्येकोऽर्थः । णपप्रत्याहारात् परस्तु व-कारो वा स्यादचि इत्य-परोऽर्थः । पाणिनिः १।१।१७, ८।३।३३ ।

‡ विधिबलात् सवर्णे परेऽपि उकारस्य वत्वं (३५), न तु दीर्घः (२२) । उकारस्य स्थानिवत्त्वेन अज्वद्भावेन वा दान्ते म (५३) इत्यनेन न मस्यानुस्वारः । विकल्पपक्षे (४०) नाञो चन्त इत्यनेन सन्धिनिषेधः ।

§ मण्डूकप्लुत्या (२६) सूत्रात् दान्ते इत्यस्यानुवृत्तिः । इक् प्रत्याहारः सन्धिं वा नाप्नोति, ह्रस्वोऽपि वा स्यात्, असमाने वर्णे परे, पदान्ते, असमासे । सन्धिनिषेधसम्बन्धी वाशब्दः पूर्व्वादनुवर्त्तत एव, इह पुनर्वाग्रहणं ह्रस्वसम्बन्धार्थम्, अन्यथा सन्धिनिषेधसम्बन्धस्य वाशब्दस्य सन्धिनिषेधेनैव चरितार्थत्वे ह्रस्वस्य नित्यत्वापत्तिः स्यात् । अत्र वाशब्दस्य व्यवस्थावाचित्वात् क्वचिदनित्यसमासेऽपि स्यात्, तेन नद्या-अम्भ इति समासे नदी-अम्भः नदिअम्भः नद्यम्भः इति । पाणिनिः ६।१।१२७ ।

¶ हरि-अर्चा (३५) = हर्य्यर्चा । ह्रस्वान्त-प्रत्युदाहरण-ज्ञापकात् ह्रस्वान्तस्यापि पक्षे सन्ध्यभाव इति सूचितं, तेन वारि-अत्र वार्य्यत्र इत्यपि भविता ।

अक् सन्धिं वा नाप्नोति ऋकि परे ह्रस्व वा स्यात् । *
ब्रह्मा ऋषिः, ब्रह्म ऋषिः, ब्रह्मर्षिः ।

इति अच्-सन्धि-पादः ।

३य पादः—हस्-सन्धिः ।

४६ । स्तु श्चुभिः श्चुशात् ।

(स्तु ।१।, श्चुभिः ३।।।, श्चु ।२।, अशात् ५।) ।

सकार-तवर्गौ शकारेण चवर्गेण वा योगे शकार-चवर्गौ क्रमात् प्राप्नुतः, नतु शात् परौ । *
सच्चित्, शार्ङ्गिञ्जय । अशात् किं—प्रश्नः । †

---

* इह वाद्वयमनुवर्त्तते । ऋगकौ प्रत्याहारौ । यत्र ह्रस्वसम्भावना नास्ति तत्र च वा सन्धिरिति—तेन, दधि ऋच्छति दध्यृच्छति इत्यादि । अत्र असमासे इति नानुवर्त्तते, तेन महांश्चासौ ऋषिश्चेति समासे, महाऋषिः महऋषिः महर्षिरिति कश्चिदाह । अतएव "समासेऽप्ययं प्रकृतिभावः" इति सिद्धान्तकौमुदी । वस्तुतस्तु अनित्यसमासे एवायं विधिः, तेन परमर्च्छतीत्यादौ न स्यात् । पाणिनिः ६।१।१२८ ।

---

* श्चुभिरिति बहुवचनं योगक्रमाभावसूचनार्थम् । तृतीयया साहित्यसूचनात् योगो लभ्यते । योगश्च अव्यवहितपूर्व्वापरैकतरवर्त्तित्वम् । तालव्यशकार-चवर्गयोरन्यतरेण सह अव्यवधाने स्थितौ दन्त्यसकार-तवर्गौ क्रमात् तालव्यशकार-चवर्गौ प्राप्नुतः शकार-चवर्गयोर्भावं प्राप्नुत इत्यर्थः—शकारचवर्गौ स्यातामिति यावत्, नतु तालव्यशकारात् परस्थितौ । अत्र "शात परस्य चुत्वं न स्यात्" इति सिद्धान्तकौमुदी । एकत्र दृष्टः शास्त्रार्थोऽन्यत्रापि प्रयुज्यते बाधकं विनेति नियमात्, परसूत्रोक्त 'नच दान्तात् टवर्गात् परौ' इतिवत् अत्रापि 'नच दान्तात् चवर्गात् पराविति' बोध्यं, तेन अच् सन्धिः, नञ्-समासः, क्रुञ् धातुः इत्यादिसिद्धिः । पाणिनिः ८।४।४०।४४ ।

† सत्-चित् = सच्चित्, शार्ङ्गिन्-जय = शार्ङ्गिञ्जय । प्रश्-नः = प्रश्नः ।

४७ । ष्टुभिः ष्ट्वपदान्तटोः ।

(षट्टुभिः ३।॥, षट् ।२।, अपि ७।, अपदान्तटोः ५।) ।

सकार-तवर्गौ षकारेण टवर्गेण वा योगे षकार-टवर्गौ क्रमात् प्राप्नुतः, न तु षकारे परे, न च दान्तात् टवर्गात् परौ । * तट्टीका, चक्रिण्ढौकसे । अपि किं—सत्-षष्ठः । अदान्तटोः किं—षट्-ते । †

४८ । षण्णां षण्णवति षण्णगर्य्यः । (१॥) ।

एते निपात्यन्ते । ‡

४९ । ले लस्तोः । (ले ७।, लः १।, तोः ६।) ।

ले परे तो लँकारः स्यात् । § तल्लयः, विद्वाँल्लिखति ।

यलौ द्विधारौ निरनुनासिकः सानुनासिकः ।
ञमोऽनुनासिकस्तेन तत्स्थाने सानुनासिकः ॥ ¶

---

* पूर्व्वतः स्तु इत्यस्यानुवृत्तिः । ष्टुभिरिति बहुवचनं पूर्व्ववत् । मूर्द्धन्यषकारटवर्गयो-रन्यतरेण सह अव्यवधाने स्थितौ दन्त्यसकारतवर्गौ क्रमात् मूर्द्धन्यषकारटवर्गौ भवतः, न तु मूर्द्धन्यषकारे परे, न च पदान्तटवर्गात् परस्थितौ । षट्-सन्त इत्यत्र नणटमङ (५७) इत्य-नेन टस्थाने तनकरणादेव, अनेन पुनः तस्थाने टकारो न स्यात् । पाणिनिः ८।४।४१-४३।

† तत्-टीका = तट्टीका, चक्रिन्-ढौकसे = चक्रिण्ढौकसे ; हे चक्रिन् त्वं गच्छ-सीत्यर्थः, ढौकृङ् गतौ इति कविकल्पद्रुम ।

‡ षष्-नाम् = षण्णां, षष्शब्दादामो नुमागमे (११०) निपातनात् षस्य णत्वे षण्णा-मिति । यत्र तु गौणत्वात् नुमागमो न स्यात् तत्र न निपातनं, तेन अतिषषामित्येव । षड्धिका नवतिः षण्णवतिः । षण्णा नगरी षण्णगरी । नगरीति स्त्रीनिर्द्देशात् षड्-नगरमित्यत्र न स्यात् । "अनाम्नवतिनगरीणामिति वाच्यम्" इति वार्त्तिकम् ।

§ तो तवर्गस्य । अत्र दान्ते स्थितयोस्तकारनकारयोरुदाहरणबलात् दान्ते इति बोध्य, तेन सुवन्लिगि (२४२) इत्यत्र न नस्य लः । पाणिनिः ८।४।६० ।

¶ विद्वाँल्लिखतीत्यत्र अनुनासिकहेतुमाह यलौ द्विधेति । अनुनासिकोऽर्द्धचन्द्राकृतिवर्णो

५०। म्नोर्नुं झस्यदान्ते।

(म्नोः ६॥, नुः १।, झसि ७।, अदान्ते ७।)।

अदान्ते स्थितयो र्मनयो र्नुः स्यात् झसि परे। रंस्यते, बृंहितम्।*

५१। अपे अम् नोः। (अपे ७।, अम् ।१।, नोः ६।)।

अदान्ते स्थितस्य नो अपे परे अम् स्यात। शान्तः, अङ्कितः।†

५२। वा त्वरयपेऽरयम्।

(वा ।१।, तु ।१।, अरयपे ७।, अरयम् ।१।)।

दान्ते अदान्ते वा स्थितस्य नो रेफवर्ज-यपे परे रेफवर्ज यम् वा

रुढ़ः, अपिच नासिकामनुलक्ष्यीकृत्य उच्चार्य्यतेऽसौ इति व्युत्पत्त्या अनुस्वारे अमे च वर्त्तते। नास्ति रो यस्मिन् सोऽरः यल इत्यस्य विशेषणम्, ततश्च रभिन्न यलप्रत्याहारो द्विधा भवति—निरनुनासिकः—अर्द्धचन्द्राकृतिवर्णशून्यः, सानुनासिकः—अर्द्धचन्द्राकृतिवर्णपूर्व्वकश्च। अमः स्वभावादनुनासिकः—नासिकामनुलक्ष्यीकृत्य उच्चार्य्यमाणः, तेन हेतुना तस्य स्थाने जायमानो यलः सानुनासिकः अर्द्धचन्द्राकृतिवर्णपूर्व्वक एव स्यात्, कारणगुणाः कार्य्यगुणमारभन्ते इति न्यायादित्यर्थः। एवम् अनुस्वारजातो यल् सानुनासिको भवति। विद्वाँल्लिखतीत्यत्र नस्थानजातत्वात् लकारस्य अर्द्धचन्द्राकृतिवर्णपूर्व्वकत्वम्, अर्द्धचन्द्राकृतिवर्णस्य अनुस्वारवत् पूर्व्वेणैव सम्बन्धः। अर इति किम, अवावरीत्यादौ (२६१) वनो नस्थानजातोऽपि रः निरनुनासिक एव। पाणिनिः १।१।८।

* रंस्यते इति रमधातोः स्यते विभक्तिः, पदमध्यगत्वात् मस्यादान्तत्वं, रम्-स्यते= रंस्यते। बृहिधातोः इदित्त्वेन नुणि क्तप्रत्ययः, अतएव नस्यादान्तत्वं, बृन्-हितं—बृंहितं, हो झस् (२१) इत्यनेन हस्य झस्त्वम्। अदान्ते इति किं—राजन् भुङ्क्ष्व। झसीति किं—मन्यसे, रम्यते। पाणिनिः ८।३।२४।

† अदान्ते स्थितस्य अनुस्वारस्य प्रत्येकवर्गान्तरे परे तद्वर्गशेषाक्षरः स्यात्। अत्र पूर्व्वतोऽनुवर्त्तमानेऽपि नोरिति पुनर्ग्रहणं सामान्यानुस्वारप्राप्त्यर्थम्, अन्यथा केवलमकारनकारजातानुस्वारप्राप्तौ जञ्जन्यते (८२७) इत्याद्यसिद्धिः स्यात्। शाम्-तः=(५०, ५१) शान्तः, अन् कितः=(५०,५१) अङ्कित। शमधातो अनकधातोश्च क्तः। पाणिनि. ८।४।५८।

स्यात्। * यलोऽनुनासिकः। † यँय्यम्यते यंयम्यते ‡, हरि-भज हरिंभज। कम्पते § इति पूर्व्वेण नित्यम्। अरे किं—रंरम्यते।

५३। दान्ते मोऽसम्राजो हसे नुः।

(दान्ते ७।, मः ६।, असम्राजः ६।, हसे ७।, नुः १।)।

दान्ते स्थितस्य मस्य हसे परे नुः स्यात्, न तु सम्राजः। शिवंस्तौति। असम्राजः किं—सम्राडिति। ¶

५४। पुंसः सन् खप्यम्परेऽख्ये।

(पुंसः ६।, सन् ।१।, खपि ७।, अम्परे ७।, अख्ये ७।)।

---

* पृथक्योगात् अदान्ते इति नानुवर्त्तते, तेन दान्ते अदान्ते वायं विधिः। तथाच, दान्ते अदान्ते वा स्थितस्य अनुस्वारस्य यवले परे यवला वा स्युः; दान्ते स्थितस्य तु वर्गाचरे परे तद्वर्गान्तो वा स्यादित्यर्थः। दान्ते यवले परे यथा—त्वँय्यच्च त्वंयच्च, सँव्वृ-णोमि संवृणोमि, त्वँल्लुब्धः त्वंलुब्धः। अदान्ते यवले परे यथा—यँय्यम्यते यंयम्यते, वँव्वम्यते वंवम्यते, लँल्लम्यते लंलम्यते। रमधातोः रूपान्तरेण लमधातुसिद्धि, रन्फात् लन्फवत्। पाणिनिः ८।४।५९।

† यलोऽनुनासिक इति—अत्र जायमानो यलः अनुनासिकः अनुनासिकवानित्यर्थः, अर्शआदित्वादच्प्रत्ययः। यमोऽनुनासिक इति तु लिपिकरप्रमादपाठः, तथात्वे हरिंभज इत्यत्रापि अनुनासिकपूर्व्वक जमापत्तेः।

‡ यमधातो यङि—यं-यम्यते = यँय्यम्यते (वा) यंयम्यते।

§ कन्-पते (५०.५१) = कम्पते। एवं भवन्तौ, अभ्भिष्ट इत्यादि। अत्र अनुस्वारस्य अदान्ते स्थितत्वात् पूर्व्वसूत्रेणैव नित्यमादेशः।

¶ शिवम्-स्तौति = शिवंस्तौति। सम्-राज्-इति = सम्राडिति, इतिशब्देन सम्राज-शब्दो यस्मिन्नर्थे रूढस्तत्रैव वर्जनमिति बोध्यम्। रूढिस्तु—येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः। शास्ति यश्चाज्ञया राज्ञः स सम्राडित्यमरोक्तिः। तेन सं शोभनं राजते इति संराट् चन्द्र इत्यत्र अनुस्वारः स्यादेव। पाणिनिः ८।३।२३।२५।

पुंसो मस्य सन् स्यात्, अम्परे खपि परे, नतु ख्ये। * पुंस्कोकिलः। अम्परे किं—पुंचीरम्। अख्ये किं—पुंख्यातः। †

५५। नोऽप्रशामद्धक्ते।

(नः ६।, अप्रशामः७६।, छते ७।)।

दान्ते स्थितस्य नस्य सन् स्यात्, अम्परे छते परे, न तु प्रशामः। ‡ शार्ङ्गिंश्छिन्धि, चक्रिंस्त्राहि। अम्परे किं—सन्त्सरुः। अप्रशामः किं—प्रशान्तनोति। §

५६। कांस्कान् नॄंः पि वा।

(कांस्कान् ।१।, नॄंः ।१।, पि ७।, वा ।१।)।

कांस्कान् कान्कान्, नॄंःपाहि नॄन्पाहि। ¶

---

* अम् परो यस्मात् सोऽम्परस्तस्मिन्, खपीत्यस्य विशेषणम्। पूर्व्वस्मात् मकारः अनुवर्त्तते। सनो न इत् तेन (१७) मस्यान्ते भवति; सकारे अकार उच्चारणार्थः। पाणिनिः ८।३।६, वार्त्तिकञ्च।

† पुमांश्चासौ कोकिलश्चेति विग्रहे (१६३) पुम्-कोकिलः=(५०) पुंस्कोकिलः, लुप्तसकारस्यादिविधित्वात् (१५) मस्य विसर्गाभावः। एवं पुंस्कृतिः, पुंस्तानं, पुंस्पुत्रः, पुंश्चातक इत्यादि। पुंसः स्वत्वास्पदीभूतं चीरम्=पुंचीरम्। पुंभिः ख्यातः=पुंख्यातः।

‡ अम्परे, दान्ते, सन्, इत्येतेषाम् अनुवृत्तिः, सनो न इत् (१७) मस्यान्ते भवति; सकारे अकार उच्चारणार्थः। अत्र सन्धिजातेतरनकारो ग्राह्यः, तेन किन्तत्र इत्यादौ न नस्य सन्। पाणिनि. ८।३।७।

§ शार्ङ्गिन्-छिन्धि=शार्ङ्गिन्-स-छिन्धि (५०,४६) शार्ङ्गिंश्छिन्धि। चक्रिन्-त्राहि=चक्रिन्-स-त्राहि (५०)=चक्रिंस्त्राहि। त्सरुः खड्गादिमुष्टौ स्यादित्यमरः। प्रशाम्-तनोति (१०२)=प्रशान्तनोति।

¶ कान् कान् इति पदद्वयस्य स्थाने कांस्कान् इति पदं निपात्यते वा, पकारे परे तु

५७। न ण टन ङः श्चकन् श शस् स शसि वा। (न ण टन ङः ६।, चकन् ।१।, श शस् स शसि ७।, वा ।१।)।

ान्ते स्थितस्य नस्य चन् शे, णस्य टन् शसि, टनयोस्तन् से, ङस्य कन् शसि, स्याद्वा।*. सञ्छम्भुः सञ्शम्भुः सञ्शम्भुः, ुगण्ट्षष्ठः सुगण्षष्ठः, षट्त्सन्तः षट्सन्तः, सन्त्सः सन्सः, ाङ्क्षष्ठः प्राङ्षष्ठः।†

५८। चपोऽबे जब्। (चपः ६।, अबे ७।, जब् ।१।)।

ान्ते स्थितस्य चपस्य जब् स्यात् अबे परे। वागीशः, चिद्रूपः।‡

५९। अमे अम् वा। (अमे ७।, अम् ।१।, वा ।१।)।

[इति पदस्य स्थाने नॄंः इति सानुस्वारविसर्गान्तं निपात्यते वा इत्यर्थः। कान्-कान् कांस्कान्, (वा) कान्कान्। नॄन् पाहि = नॄंःपाहि, (वा) नॄन्पाहि। पाणिनिः ३।१०।१२।३७।

* टश्च नश्च टनं, नश्च णश्च टनश्च ङश्चेति तस्य। चकात् न् चकन्, चक् प्रत्याहारः, ाच चन् टन् तन् कन् इति चत्वारि। दान्ते इत्यनुवर्त्तते। वा-ग्रहणं परत्र निवृत्त्यर्थम्। ादीनां न् इत्, तेन षन्ते भवन्ति (१७)। पाणिनिः ८।३।२८-३१।

† सन्-शम्भुः (५७.५०.५१,६१), त्रयो यत्रैकवर्गीया मध्यमस्तत्र लुप्यते इत्यनेन ोपे = सञ्छम्भुः। (पाणिनिमते सञ्च्छम्भुरित्यपि पदं स्यात्)। (६१) पक्षे न शस्य सञ्शम्भुः। चन अभावपक्षे (४६) सञ्शम्भुः। सुगण्-षष्ठः = सुगण्ट्षष्ठः (वा) ण्षष्ठः। षट्-सन्तः = षट्त्सन्तः (वा) षट्सन्तः। सन्-सः = सन्त्सः (वा) सन्सः। ङ् षष्ठः = प्राङ्क्षष्ठः (वा) प्राङ्षष्ठः।

‡ दान्तं इत्यनुवर्त्तते। चपस्थाने जब् स्यात्, साम्यात् यथाक्रमं वा। वाक्-ईशः वागीशः। चित्-रूप. = चिद्रूपः। पाणिनिः ८।२।३९।

दान्ते स्थितस्य चपस्य ञमे परे ञम् वा स्यात्। एतन्मुकुन्दः एतद्मुकुन्दः। *

६०। त्ये। (७)।

त्ये मे परे दान्ते स्थितस्य चपस्य ञम् स्यान्नित्यम्। चिन्मयं, वाङ्मयम्। †

६१। शहोश्चपात् वाऽमि छझभौ।

(शहोः ६॥, चपात् ५ॉ, वा ।१।, अमि ७।, छ-झभौ १॥)।

दान्ते स्थितात् चपात् परयोः श-हकारयोः क्रमेणामि परे छ-झभौ वा स्तः। ‡ तच्छिवः तच्शिवः, वाग्घरिः वाग्हरिः। अमि किं—वाक्श्चोततति। §

---

* चप इत्यनुवर्त्तते। एतत्-मुकुन्दः = एतन्मुकुन्दः, (वा) (५८) एतद्मुकुन्दः। पाणिनिः ८।४।४५।

† त्यः प्रत्ययः, त्ये ञ ण न ङ इत्येतेषामभावाद्दान्ते मे इति। विकल्पद्वयमप्यवर्त्तित्वादस्य नित्यत्वम्। चित्-मयं = चिन्मयं—(४८६) चिदात्मकम्। वाक्-मयं = वाङ्मयं—वागात्मकमित्यर्थः। "तत् प्रकृतवचने" इति पाणिनिसूत्रेण (५।४।२१) स्वार्थे चिन्मयमिति सिद्धम्। "एकाचो नित्यम्" इति सिद्धान्तकौमुदीमतेन विकारावयवयोरर्थयोः मयट्प्रत्ययेन, "तत् प्राचुर्य्येण प्रस्तुतमिति" गोयीचन्द्रव्याख्यानेन च वाङ्मयमिति सिद्धम्। पाणिनिः ८।४।४५ सूत्रस्य वार्त्तिकम्।

‡ शहोरिति स्थानिनिर्द्देशात् चपो निवृत्तिः, अतएव पुनश्चपो ग्रहणम्। दान्ते स्थितात् चपात् परस्य तालव्य-शकारस्य स्थाने छकारः स्यात्, एवं तादृश-चपात् हकारस्य झभ् स्यात्, अम्प्रत्याहारे परे। अत्र उत्तरसाम्यं ग्राह्यं, तेन चात् हस्य झ, टात् हस्य ढ, तात् हस्य ध, कात् हस्य घ, पात् हस्य भ। पाणिनिः ८।४।६२,६३,५५, वार्त्तिकञ्च।

§ तत्-शिवः (६१, ४६) = तच्छिवः, वा (४६) = तच्शिवः। वाक् हरिः (६१, ५८) = वाग्घरिः, वा (५८) = वाग्हरिः। वाक् श्चोततीत्यत्र तालव्यशकारात् परस्थितचकारस्य अम्त्वाभावात् न शस्य छः।

६२ । स्वाण्ङोऽचि द्विः ।

(स्वात् ५।, णङः १।, अचि ७।, द्विः १।) ।

स्वात् परो दान्ते स्थितो णङो द्विः स्यादचि परे । *

सुगण्णीशः, सन्नच्युतः, प्रत्यङ्ङात्मा । †

६३ । छोऽचः ।

(छः १। अचः ५।) ।

अचः परश्छकारो द्विः स्यात् । ‡

६४ । झप्झसोः खस्झबो श्चप्जबावन्ते च ।

(झप्झसोः ६॥, खस्झबोः ७॥, चप्जबौ १॥, अन्ते ७।, च ।१।) ।

झप्-झसयोः स्थाने खस्-झबयोः परयोः क्रमात् चप्-जबौ स्तः, विरामे च । शिवच्छाया, अच्छा । §

इति हस्-सन्धिपादः ।

---

* द्विरिति (४८५) सुजन्तमव्ययम् । अत्र (१८१) अणाणौ इति, (६६३) णिनमान् घे इति, (६३२) सन्यङन्तौ द्विरित्यादिज्ञापकात् समासे णङो द्विर्न स्यादिति बोध्यं, तेन षनन्तः, सनन्तः, तिङन्तः, यङन्तः, उणादिः, त्वनादिः, इत्यादयः सिद्धाः । वस्तुतस्तु ज्ञापकज्ञापितविधेरनित्यत्वात् क्वचिदपि स्यादेव, यथा, "सलिङ्गशास्त्रैः सन्नादिक्रत्तद्धित-समासजैः" इत्यमरः । स्वादिति किं, प्राङ् आस्ते = प्राङास्ते । दान्ते स्थित इति किम्, अनितीत्यादौ न स्यात् । पाणिनिः ८।३।३२ ।

† सुगण्-ईशः = सुगण्णीशः, सन् अच्युतः = सन्नच्युतः, प्रत्यङ्-आत्मा = प्रत्यङ्ङात्मा ।

‡ अत्र, मा(ङ्), आ(ङ्)भिन्न दीर्घात् पदान्ताच्च विकल्पेनेति वक्तव्यम् । वार्त्तिकमते छन्दसि विश्वजनादेः परोऽपि विकल्पेन, यथा, विश्वजनच्छत्रं विश्वजनछत्रमित्यादि । पाणिनिः ६।१।७३-७६ ।

§ झपः खसि चपादेशो झसो झबि जबस्तथा । विरामे तौ तयोः स्यातामित्यर्थः सम्प्रकीर्तितः ॥ स्पष्टमाह—वर्गादिचतुष्टयस्य स्थाने तद्वर्गस्य प्रथमवर्णः स्यात् खसे परे,

४र्थ पादः—वि-सन्धिः।

६५। वेः सोऽशसन्ते छते।

(वेः ६।, सः १।, अ-शसन्ते ७।, छते ७।)।

वेः सकारः स्यात् अ-शसन्ते छते परे। कृष्णश्चिन्त्यः, हरिष्टीकते, विष्णुस्त्राता। शसन्ते तु—कः त्सरुः।*

६६। से तु क-ख-प-फे वा।

(से ७।, तु ।१।, क-ख-प-फे ७।, वा ।१।)।

वेः सकारो वा स्यात् क-ख-प-फेषु परेषु, से सति। भास्करः भाःकरः, भास्खरः भाःखरः, भास्पतिः भाःपतिः, भास्फेरुः भाःफेरुः।†

झबे परे तु तद्वर्गस्य तृतीयवर्णः स्यात्, विरामे तु तद्वर्णद्वयं स्यात्। विरामः परवर्णाभावः। शसः स्थाने तु साम्यानुसारेण, यथा (२१३) दन्त्यसकारस्य दः। पाणिनिः ८।४।५३।५५-५६। "वावसाने" (८।४।५६) इति पाणिनिसूत्रेण विरामे परे विकल्पः।

---

* छत—छ ठ थ च ट त। अशसन्त इति, छतो विशेषणम्। कृष्णः-चिन्त्यः (४६) = कृष्णश्चिन्त्य.। हरिः-टीकते (४७) = हरिष्टीकते—हरिर्गच्छतीत्यर्थः। विष्णुः-त्राता = विष्णुस्त्राता। कः-त्सरुः—तकारस्य सकारान्तत्वात् न वेः सः। पाणिनिः ८।३।३४-३५।

† तुकारात् परत्र समासानुवृत्तिर्नास्ति। अत्रापि अशसन्त इति विशेषणस्यानुवृत्तिः—तेन च भर्यं त्साम इत्यादौ न स्यात्। वाशब्दोऽत्र व्यवस्थावाची—तेन, कार काम कंस कुम्भ कशी (कुशा) कील कर्ण कर्णी कुत्सित काण्ड कुत. करोति कृत्य काम्यक, पति पात्र पाठ पाशेषु—परेषु नित्यं स्यात् प्रयोगतोऽन्यत्रापि, यथा अयस्कारः, पयस्कुम्भ इत्यादि। गीःकारः गीःकाम इत्यादिषु न स्यात्। भासं करोतीति भास्करः भासा खरस्तीक्ष्णः, भासां पतिः, भासा फेरुः शृगालविशेष इति क्रमेण वाक्यम्। पाणिनिः ८।३।३८-४८ (विशेषतः ८।३।४५); एषु सूत्रेषु क्वचिन्नित्यम्, क्वचिद्विकल्प।

६७। शसि शस्। (शसि ७।, शस् ।१।)।

वेः शस् वा स्यात् शसि परे। हरिश्शेते हरिःशेते, सन्तष्-षट् सन्तःषट्, शिवस्सेव्यः शिवःसेव्यः।*

६८। कख-पफयोर्मून्यौ।

(कख-पफयोः ७॥, मून्यौ १॥)।

वेर्मून्यौ क्रमात् वा स्यातां कख-पफयोः परयोः।†
हरि×काम्यः हरिःकाम्यः, मणि×खनिः मणिःखनिः, कृष्ण^{m}-पाता कृष्णःपाता, भक्ति^{m}फलति भक्तिःफलति।

६९। अतोऽश्वब्युः। (अतः ५।, अत्-हवि ७।, उः १।)।

अकारात् परस्य वेरुकारः स्यात् अकारे हवि च परे। शिवोऽर्च्यः, शिवोवन्द्यः।‡

७०। अ भो भगो अघोभ्योऽबे लुप्।

(अ भो भगो अघोभ्यः ५॥, अबे ७।, लुप् ।१।)।

---

* श-ष-सेषु परेषु विसर्गस्य क्रमेण श-ष-सा वा स्युरित्यर्थः। पाणिनिः ८।३।३६।

† मण्डूकप्लुतगत्या अत्र अशसन्त इत्यनुवर्त्तते, तेन कःक्षीण कःप्साति इत्यादौ न मून्यौ। ख्याधातोः परेऽपि न स्त इति वक्तव्यं, तेन कःख्यातः। पाणिनिः ८।३।३७।

‡ अत्र अशसन्त इत्यस्य अनुवृत्तिर्नास्ति अनिष्टत्वात्, तेन रामोऽश्नातीत्यादौ स्यादेव। शिवोऽर्च्य इत्यादौ, प्रकृतेः पूर्व्वपूर्व्वं स्यादन्तरङ्गतरं तथेति न्यायेन विसर्गजातात् उकारतोऽन्तरङ्गस्य पूर्व्वाकारस्य सम्बन्धिनः सन्धेर्बलवत्त्वात् प्रथमतः न उकारस्य वकारः। शिवः-अर्च्यः (६९,२१,२८) = शिवोऽर्च्यः। शिवः-वन्द्यः (६९,२३) = शिवोवन्द्यः। अत्र अकारादप्लुतादिति अप्लुते अतीते च वक्तव्यम्। तेन सुश्रोत अत्र, पय अग्निदत्त इत्यादौ न स्यात्। पाणिनिः ६।१।११३-११४।

अवर्णात् भो भगो अघोभ्यश्च परस्य वेर्लुप् स्यात् अवे परे । वृद्धा नमस्याः, भो हरे, भगो रक्ष, अघो यज । *

७१ । य वाचि । (य ।१।, वा ।१।, अचि ७।) ।

अवर्णात् भो भगो अघोभ्यश्च परस्य वे र्यो वा स्यादचि परे । शिवयुग्रः शिवउग्रः, भोयच्युत भो अच्युत । †

७२ । रिचोऽवे । (र ।१।, इचः ५।, अवे ७।) ।

इचः परस्य वे रेफः स्यादवे परे । हरिरयं, चतुर्भुजः । ‡

७३ । रोऽचः । (रः ६।, अचः ५।) ।

अचः परस्य रेफस्य वे रेफः स्यादवे परे । भ्रातरव, धातर्गच्छ । §

---

* अत्र भोः-भगोः-अघोः-पदानि भवत् भगवत् अघवत्शब्दानां सम्बोधनसाधितानि (२२६), सिद्धान्तकौमुदी-गोयीचन्द्रमते सान्ताव्ययानि च बोध्यानि । भोः हरे—हे हरे, भगोः-रक्ष—भगवन् रक्ष, अघोः-यज—अघवन् (पापिन्) यज—पूजय । अकारात् अवे परे यथा—शिव आगच्छति । पाणिनिः ८।३।१७,२२ ।

† भो अच्युत इत्यादौ (१५) लुपि न सन्धीति न सन्धिः । किन्तु मजा निर्दिष्टमनित्यमिति न्यायात्, सैष दाशरथी रामः सैष राजा युधिष्ठिरः, एषैष रथमारुह्य मथुरां याति माधव इत्यादि-सिद्धिः (पा. ६।१।१३४) । पाणिनिः ८।३।१७,१८,२० ।

‡ इचः इति स्पष्टार्थम् । सामान्यविशेषन्यायलभ्यात्वाच्छब्दोऽर्थः स्पष्टो भवति । हरिः-अयं=हरिरयं ; चत्वारो भुजा यस्य स चतुः-भुजः=चतुर्भुजः । पाणिनिः ८।३।१४, ८।२।६६ ।

§ इचात् परस्य रेफजातविसर्गस्यासम्भवादेव सुतरामप्राप्तौ इच्निवृत्त्यर्थं पुनरचोग्रहणम् । भ्रातर् (१०२)=भ्रातः-अव=भ्रातरव, एवं धातः-गच्छ=धातर्गच्छ । पाणिनिः ८।३।१५, ८।३।१४, ८।२।६६ ।

७४ । खपि वा । (खपि ७।, वा ।१।) ।

अचः परस्य रेफस्य वे रेफः स्याद्वा खपि परे । गीर्पतिः गीष्पतिः गीःपतिः । *

७५ । नाह्नो रकक्नौ । (न ।१।, अह्नः ६।, रकक्नौ ७।) ।

अह्नो रेफस्य वे रेफो न स्यात् रेफे के क्नौ च परे । †
अहोरात्रः, अहस्करः, अहोभिः । ‡

७६ । हस्येतत्तदोऽनञकः सेर्लोपः ।
(हसि ७।, एतद्-तदः ५।, अनञकः ५।, सेः ६।, लोपः १।) ।

नञक्वर्जादेतदस्तदश्च परस्य सेर्वेर्लोपः स्यात् हसि परे । एष-

---

* पूर्व्वतः अचोऽनुवृत्तिः । मण्डूकप्लुतगत्या (६६) से तु कखपफे इत्यतः से इति चानुवर्त्तते । तेन इयं गीः पतिरसौ इत्यादौ न स्यात् । एवं गिर् धुर् अहन् एषामेव विसर्गस्य पतिशब्दे परे एव प्रायो बोध्यं, तेन गीःपाठः आशीःपतिरित्यादौ न स्यात् । क्वचित् प्रयोगानुसारात् नित्यमपि, तेन चतुर्थमिति (४५५) स्वयमुदाहरिष्यति । गीर् (१०२) गीः-पतिः = गीर्पतिः, (६६,१११) = गीष्पतिः, वा गीःपतिः । पाणिनिः ८।२।६९ सूत्रे "अहरादीनां पत्यादिषु वा रेफः" इति वार्त्तिकम् । अत्र "गीष्पतिरित्यसाधु" इति क्रमदीश्वरः । सिद्धान्तकौमुद्याञ्च "पत्यौ विसर्गोपध्मानीयौ" इत्युक्तत्वात् गीःपतिः गीᳶपतिः इत्येव पदद्वयं स्यात् । सुपद्मे तु गीष्पतिपदं दृश्यते । कातन्त्रे तु नास्ति । गीष्पतिर्धिषणो गुरुरित्यमरः ।

† अत्र रेफे इति रात्रि-रूप-रथन्तर-शब्दानामेव, तेन अहा-रजन्यौ, अहा रवी, इत्यादौ रेफः स्यात् । एवं क्विपदेन प्राप्तलोपकेरपि ग्रहणं, तेन दीर्घाह्नो निदाघ इत्यादौ (१४८) हसात् सिलोपेऽपि रेफनिषेधः । सेर्लुकि तु तत्र रेफः स्यादेव, तेन गताह-र्मंगलमित्यादौ (१६८) सेर्लुकि रेफः स्यादिति । पाणिनिः ८।२।६९, वार्त्तिकञ्च ।

‡ अहन् (२२७) = अहर्, (१०२) अहः-रात्रः (६९,२३) = अहोरात्रः । अहः-करः (६६) = अहस्करः । अहः-भिः (६९,२३) = अहोभिः ।

कृष्णः, स-विष्णुः । अनजकः किम्—अयः शिवः, एषको रुद्रः ।*

७७ । ढ्रोर्ढ्रि र्घश्चानुः ।

(ढ्रोः ६॥, ढ्रि ७, घः १।, च ।१।, (अन् ऋ)=अनुः ६।) ।

ढकारस्य ढकारे परे, रेफस्य रेफे परे, लोपः स्यात्, पूर्व्वस्य च ऋवर्जस्य घः । रूढः, हरीरम्यः । अनुः किं—वृढः ।†

इति वि-सन्धि-पादः ।

इति सन्ध्यध्यायः ।

---

* न विद्येते नञकौ यत्र सोऽनञकस्तस्मात् । तद्रूपवाचक-स-शब्दस्य इष-धातु-निष्पन्नस्य एष-शब्दस्य च वारणाय एतत्सदोर्ग्रहणम् । एषको रुद्र इति सूत्रनियमव्यतिक्रमो-दाहरणदर्शनात् एतत्सद्भ्यां सह नञकोर्न क्रमः । पाणिनिः ६।१।१३२ । लोपे सत्येव चेत् पादः पूर्य्यते, तदा अचि परे सन्धिर्भवति, ७१ सूत्रस्य टीका द्रष्टव्या ।

† न ऋ, अनृ तस्य अनुः । अत्र लोपविधिर्मुख्यत्वात् वृढ इत्यादौ ऋकारस्य दीर्घाभावेऽपि ढलोपः । यत्र तु लोपो न भवति तत्र दीर्घोऽपि न स्यात्, दीर्घविधेरानु-षङ्गिकत्वात् । रुढ् ढः=रूढः । हरिः-रम्यः (७२)=हरिर्-रम्यः=हरीरम्यः । पाणिनिः ८।३।१३-१४, ६।३।१११ ।

२यः । अजन्ताध्यायः ।

१म पादः—संज्ञा ।

७८। लेः—सि औ जस्, अम् औ शस्, टा भ्याम् भिस्, ङे भ्याम् भ्यस्, ङसि भ्याम् भ्यस्, ङस् ओस् आम्, ङि ओस् सुप् ।

(ले. ५।. सि—सुप् ।१।।।) ।

स्यादीन्येकविंशतिर्लेः पराणि प्रयुज्यन्ते । * ज श ट ङ पाः सि-ङस्योरिकारश्चेतः ।†

७९। त्रिशः प्री द्वी त्री ची पी षी स्त्रः ।

(त्रिशः ।१।।। प्री—स्त्रः १।।।) ।

स्यादीनि त्रीणि त्रीणि क्रमात् प्री द्वी त्री ची पी षी स्त्री-संज्ञानि स्युः । ‡

---

* स्विप्रभृतयः एकविंशतिर्विभक्तयः लिङ्गात् रामादिप्रकृतिभ्यः परस्थिता एव प्रयुज्यन्ते विभक्तीनां न तु पृथक् प्रयोगः, रामादिप्रकृतीनामपि केवलानां न प्रयोगः, नापदं शास्त्रे प्रयुञ्जीतेति न्यायात् । पाणिनिः ४।१।२ । सुस्थाने सिः, औट् स्थाने औ—इत्येव भेदः ।

† विभक्तीनां ज श ट ङ पाः इतो भवन्ति, सि-ङस्योरिकारश्च इत् भवतीत्यर्थः ;—जसो ज इत, शसः श इत्, टा इत्यस्य ट इत, ङे ङसि ङस् ङि एषां ङ इत, सुपः प इत्, सि ङसि एतयोः इकारश्च इत् भवतीति स्पष्टम् ।

‡ सि, औ, जस्,—प्री ; अम्, औ, शस्,—द्वी ; टा, भ्याम्, भिस्,—त्री ; ङे, भ्याम्, भ्यस्,—ची ; ङसि, भ्याम्, भ्यस्,—पी ; ङस्, ओस्, आम्,—षी ; ङि,

८०। सम्बुद्धौ सिर्घिः।

(सम्बुद्धौ ७।, सिः १।, घिः १।)।

सम्बोधने विहितः सिः घि-संज्ञः स्यात्। *

८१। स्यमौजसं घिः।

(सि अम् औ जस्।१॥, घिः १।)।

सि अम् औ जस् एते घि-संज्ञाः स्युः। †

८२। घिः क्लीवे। (घिः १।, क्लीवे ७।)।

नपुंसके घिरिव घि-संज्ञः स्यात्। ‡

८३। दान्तवत् सभि। (दान्तवत्।१।, सभि ७।)।

औस्, सुप्,—औ। प्रथमा द्वितीया तृतीया चतुर्थी पञ्चमी षष्ठी सप्तमीनाम् एकदेशं गृहीत्वा मदादित्वादीपि एताः संज्ञाः कृताः। (१२) सूत्रेण स्यादीनां (त्रि) विभक्ति-संज्ञा कृता, (पाणिनिः १।४।१०४)। (१३) सूत्रेण च प्रत्येकम् एकवचन-द्विवचन-बहु-वचनेषु एताः प्रयुज्यन्ते इति बोध्यम्, (पाणिनिः १।४।१०२)।

* सम्बुद्धिः—सम्बोधनं, चेतनाचेतनयोराभिमुख्येऽभिधानं, तत्र विहितस्य सेः घि-संज्ञा इत्यर्थः। पाणिनिः २।३।४९।

† अत्र स्यमौ घिरिति कृते, सम्बोधने सेर्घिसंज्ञाविधानरूपविशेषेण प्रथमायाः घिसंज्ञारूपसामान्यविधिर्बाधितः स्यात्, तेन हे पन्थाः (१९७) इति पदं न सिध्यति। औ इत्यस्य अमुजसोर्मध्ये पाठात् औकारद्वयस्य ग्रहणम्, अन्यथा व्युत्क्रमनिर्देशो व्यर्थः स्यात्। पाणिनौ सुट्प्रत्याहारस्थौकारेण न पृथक् संज्ञा कृता। (१।४।७) सूत्रस्थ-घि-संज्ञायाः अर्थस्तु भिन्न एव।

‡ नपुंसके (१९२) अमशसोः स्थाने जातः घिरिव घि-संज्ञः स्यात्, नतु स्यादिरित्यर्थः। तेन वारिणी इत्यादौ नसबमहन्नेति (१९४) न दीर्घः। पाणिनिः (७।१।२०) सूत्रं द्रष्टव्यम्।

सभयोः पदयोर्दान्तवत् कार्य्यं स्यात्। *

८४। भौ लिध्वोर्हसभसोरन्ते च।

(भौ ७, लिध्वोः ६॥, हसभसोः ७॥, अन्ते ७।, च ।१।)।

भौ परे यत् कार्य्यं वक्ष्यते तल्लिङ्गस्य हसे धोर्भसे स्यात्, अन्ते च तयोः। †

८५। हसोऽन्तः फः। (हसः १।, अन्तः १।, फः १।)।

हसो विरामश्च फ-संज्ञः स्यात्। ‡

८६। सर्व्व विश्व उभ उभय भवत् त्वत् त्वैक सम सिम नेमाः, अन्यान्यतरेतर डतर डतमाः, त्यद् तद् यद् एतदिदमदः किम् द्यस्मद्

---

* से भे च परे वस्तुतोऽदान्तस्यापि दान्तवत् कार्य्यं स्यात्, यथा, सुहिन्सु इत्यादौ दान्तवत्त्वात् म्नोर्मुरित्यनेन (५०) न नस्यानुस्वारः। एवं पुम्भ्यां पुंभ्यामित्यादौ दान्तवत्त्वात् दान्ते म(५३) इत्यनेन मस्यानुस्वारे,वा त्वरयपे ५२) इत्यनेन अनुस्वारस्थाने मकारो वेति। अत्र सभीति स्यादेरेव, तेन विद्वांस इत्यादौ अदान्तत्वात् (५०)नस्यानुस्वारः, दम्भ इत्यादौ च नस्यानुस्वारः, अनुस्वारस्य च (५१) मकारः। अत्र दवत् सभीति नोक्ता दान्तवदिति कथनेन, दान्तत्वेन विहितं यत् कार्य्यं तदेव स्यात् नतु विरामविहितमिति, तेन लिट्सु इत्यादौ (६४) झपझसोरित्यनेन विराममाश्रित्य न जब्। पाणिनिः १।४।१६-१७।

† यत् कार्य्यं भौ परे वक्ष्यते तत्, लिङ्गस्य हसे परे, धातोर्भसे परे, एवम् उभयोरेव विरामे परे स्यात्। हस इह स्यादेरेव, तेन दिशि भवं दिश्यमित्यादौ ग्रच्छाजेत्यादिभिः (१५४) षत्वादि र्न स्यात्। पाणिनौ भि-संज्ञा न दृश्यते।

‡ (२०२) धोर्म्नान: क्वसौत्यत्र मवयोः पृथक्ग्रहणस्वरसात् अत्र हसः स्यादेरेव, तेन हृष्टः हृष्टिरित्यादौ षोड़: फे (१५५) इति न स्यात्। विरामस्तु स्यादेस्त्यादेश्च। अन्तो विरामः, परवर्णाभाव इति यावत्। पाणिनौ फ-संज्ञा न दृश्यते।

युष्मदः, पूर्व्व परावर दक्षिणोत्तरापराधरान्तरस्वाः, स्विः।

(सर्व्व—नेमाः १॥, अन्य—डतमाः १॥, त्यद—युष्मदः १॥, पूर्व्व—स्वाः १॥, स्विः १।)।

दभेदो गणभेदार्थः। एते पञ्चत्रिंशत् शब्दाः स्विसंज्ञाः स्युः। *

समोऽतुल्ये, व्यवस्थायां पूर्व्वाद्यो ऽन्तरोऽपुरि।
वहिर्योगोपसंव्याने, स्वस्त्वज्ञातिधनाभिधः॥ †

८७। न गौण्याख्याचत्नीसासे।

(न।१।, गौण्याख्याचत्नीसासे ७।)।

गौणत्वे, संज्ञायां, चे, त्नाः से असे च, ते स्विसंज्ञा न स्युः। ‡

---

* सर्व्वादिगणः—सर्व्व विश्व उभ उभय भवत् त्वत् त्व एक सम सिम नेम इति। अन्यादिगणः—अन्य अन्यतर इतर डतर डतम इति। त्यदादिगणः—त्यद तद यद एतद इदम अदस् किम् द्वि अस्मद युष्मद् इति। पूर्व्वादिगणः—पूर्व्व पर अवर दक्षिण उत्तर अपर अधर अन्तर स्व इति। एषां (१६५, १३३, ११४ सूत्रेषु) विशेषकार्य्यार्थं गणभेदः। सर्व्वेषां बुद्धिस्थानां नाम=सर्व्वनाम, तदेकदेशग्रहणात् स्विरित्यादिः। उभयशब्दस्य द्विवचनं नास्तीति कैयटः, अस्तीति हरदत्तः। भवत्शब्दो युष्मदर्थः। त्वत् त्व इति द्वौ अन्यार्थौ। एकशब्दो यदा सङ्ख्यावाची तदा एकवचनान्तएव, यदा मुख्यादिवाची तदा द्विवचनबहुवचनान्तोऽपि। विश्वः सिमः एतौ सर्व्वार्थौ, नेमः अन्यार्थः। नेम इत्यर्द्धे इति सिद्धान्तकौमुदी। डतर-डतमौ प्रत्ययौ (५१०), तेन तदन्तानां कतरकतमादीनां ग्रहणम्। डतरान्तत्वेऽपि अन्यतरग्रहणम् अन्यतमस्य स्विसंज्ञानिषेधार्थम्। त्यदशब्दस्तदर्थः। पाणिनिः १।१।२७।

† अत्र समशब्दः अतुल्येऽर्थे स्विसंज्ञः, समः सर्व्वसमानयोरिति मेदिनी। पूर्व्वाद्यः व्यवस्थायां स्विसंज्ञः, व्यवस्था कथिता लोकैर्दिग्देशकालवाचिका। अन्तरः, अपुरि पुरभिन्ने, वहिर्योगे वहिःस्थितपदार्थे वाच्ये, उपसंव्याने परिधानवस्त्रे वाच्ये च स्विसंज्ञः। स्वशब्दस्तु अज्ञातिधनाभिधः—ज्ञातिश्च धनञ्च ज्ञातिधने, ते अभिदधाति कथयतीति तादृशः, न ज्ञातिधनाभिधोऽज्ञातिधनाभिधः स्विसंज्ञः, ज्ञातिधनभिन्ने आत्मनि आत्मीये च वाच्ये स्विसंज्ञः स्यादित्यर्थः। स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने इत्यमरः। पाणिनिः १।१।२४-३६, वार्त्तिकञ्च।

‡ गौणमप्रधानं तस्य भावो गौणत्वम्। चः द्वन्द्वः। सः समासः। तत्र असस्य सासो

८८। चे जसि वा। (चे ७।, जसि ७।, वा ।१।)।

चे ते स्विसंज्ञा वा स्युर्जसि परे। *

८९। पूर्व्वाद्यल्प प्रथम चरम तयायार्द्ध कतिपय नेमाः। (१॥)।

एते सप्तदश शब्दाः स्विसंज्ञा वा स्युः जसि परे। †

९०। तीयाङिति। (तीयः १।, ङिति ७।)।

तीयान्तः शब्दः स्विसंज्ञः स्याद्वा ङिति परे। ‡

९१। पूर्व्वोऽन्त्यादुङ्। (पूर्व्वः १।, अन्त्यात् ५।, उङ् ।१।)।

अन्त्यात् वर्णात् पूर्व्वो वर्णं उङ्संज्ञः स्यात्। §

ज्ञाः सासौ ओसासौ ; गौणश्च आख्या च यस्य तौसाओ चेति तस्मिन्। अप्राधान्ये, आख्यायां, द्वन्द्वसमासे, तृतीयासमासे, तृतीयासमासयोग्यवाक्ये च, ते सर्व्वादयः स्विसंज्ञाः न स्युरित्यर्थः। पाणिनिः १।१।२९-३१,३४।

* चे द्वन्द्वसमासे। ते सर्व्वादयः। पाणिनिः १।१।३१,३२।

† पूर्व्वादयो नव, अल्प प्रथम चरम तय अय अर्द्ध कतिपय नेम इत्यष्टौ च स्विसंज्ञाः वा स्युः जसि परे। तयायौ प्रत्ययौ (४६०,४६१), तेन द्वितय त्रितय द्वय त्रय इत्यादि। पाणिनिः १।१।३३ ३४।

‡ तीयः प्रत्ययः (४५७), तेन द्वितीय-तृतीयौ ग्राह्यौ। तीय इति तन्मात्रप्रत्ययान्तस्य ग्रहणं, नतु (४८७) जातीयप्रत्ययान्तानामपि। तीयान्तस्य अल्पादीनाञ्च गौणत्वे न गौणाख्येति (८७) निषेधः, तेन अतिद्वितीयाय अनल्पाः इत्येव स्यात्, एवमेव औमराः। पाणिनिः १।१।३३ सूत्रस्य वार्त्तिकम्।

§ अन्ते भवः अन्त्यः। भिन्नविधित्वात अस्य नित्यत्वम्। पाणिनिः १।१।६५।

९२। अन्त्याजादिष्टिः। (अन्त्याजादिः १।, टिः १।)।

अन्त्यो यो ऽच् तदादिवर्णष्टि-संज्ञः स्यात्। *

९३। लुकि न तत्र। (लुकि ७।, न ।१।, तत्र ७।)।

लुक् इति लोपे कृते यो लुप्तस्तस्मिन् परे यत् कार्य्यं तन्न स्यात्।†

९४। स्वरादि-नि-चित्तं व्यम्।

(स्वरादि नि-चित्त्वं १।, व्यम् १।)।

स्वरादिर्गणो-नि-अकारेतस्त्याश्च व्य-संज्ञाः स्युः। ‡

---

* अन्त्यश्चासौ अजेति अन्त्याच्, अन्त्याच्च आदिश्च सूत्रत्वात् पुंस्त्वम्। आदिशब्देन लक्षणया अन्त्याजादिर्बोध्यः। तेन अजन्तशब्दानां अन्त्याच् टिसंज्ञः, हसन्तानान्तु अन्त्याजादिवर्णष्टिसंज्ञः स्यादित्यर्थः। वृत्तौ तदादिवर्ण इत्यत्र वकारः लिपिकरप्रमादपतितः पाणिनिः १।१।६४।

† लुचधातोः क्विपि लुक्। सर्व्वत्र लुप्करणेन इष्टसिद्धिर्न भवति, यतः, पयइत्यत्र (१६८) स्यमोर्लुगिति सेर्लुपि, (१५) आदिविधित्वात् सस्य विसर्गानुपपत्तिः आदिभिन्नत्वात् (१८५) अत्वसोरिति अकारदीर्घापत्तिश्च स्यात्। पाणिनिः १।१।६३।

‡ स्वरादिर्गणः—स्वर्, अन्तर् प्रातर्, पुनर्, उच्चैस्, नीचैस् शनैस्, विना, ऋते युगपत्, अर्वाक्, आरात्, अस्तम्, पृथक्, ह्यस्, श्वस्, दिवा, नक्तम्, सायम्, चिरम् चिरेण, चिराय, चिरात्, चिरस्य, मनाक्, ईषत्, जोषम्, तूष्णीम्, बहिस्, समया निकषा, अन्तरा, अन्तरेण, सहसा, सपदि, स्वयम्, वृथा, अद्धा, सामि, साचि, साक्षात् वत्, तिरस्, आविस्, प्रादुस्, नाना, शम्, अलम्, कृतम्, अस्ति, उपांशु, दोषा मृषा, सुधा, मिथ्या, सत्यम्, मङ्क्षु, संवत्, पुरा, मिथो, मिथस्, प्रायस्, मुहुस्, अभीक्ष्णम् अनिशम्, सदा, झटिति, अञ्जसा, अन्वक्, साकम्, सार्द्धम्, समम्, सह, सना, कामम् परम्, नमस्, धिक्, भूर्, भुवर्, स्थाने, वरम्, इत्यादि आकृतिगणोऽयम्। नि निपात —(१६) चादिर्गणो निश्च, निरिति (१०) निसंज्ञापठितशब्दाः। विचभिन्नाः (१०२ अकारेतः प्रत्ययाः—चि (३४९) च्वि (४९५) चत् (४४०) अस्तात् (४९९) अशस् (४८ कृत्वस् (४८४) सुच् (४८५) अतरां (४६५) अतमां (४६५) थाच् (५१३) धाच् (४५ डाच् (५०१) नाच् (५००) क्त्वाच् (११६५) अतुम (११६४) अणम् (११८३) एते षोडश स्वरादिपठितानां वाचकत्वं, चादीनां द्योतकत्वम्, अतः स्वरादि-चाद्योः पृथक् ग्रहणम् पाणिनिः १।१।३७।

९५। ह्रसोऽनन्तरः स्यः।

(ह्रसः १।, अनन्तरः १।, स्यः १।)।

अचानन्तरितो ह्रसः स्य-संज्ञः स्यात्। *

९६। यूत् स्त्र्येव दी।

(यूत् ।१।, स्त्री ।१।, एव ।१।, दी ।१।)।

ईदूदन्तौ नित्यस्त्रीलिङ्गौ दी-संज्ञः स्यात्। †

९७। नास्त्रीयुवः। (न ।१।, अस्त्री ।१।, इयुवः ६।)।

इयुवस्थानावीदूतौ दीसंज्ञौ न स्तः, न तु स्त्री। ‡

९८। वामि। (वा ।१।, आमि ७।)।

इयुव ईदूच्च दीसंज्ञौ वा स्यादामि परे, न तु स्त्री। §

९९। स्त्री युच्च ङिति।

(स्त्री ।१।, युत् ।१।, च ।१।, ङिति ७।)।

---

* नास्ति अन्तरं व्यवधानं यस्य सः अनन्तरः। अचा अव्यवहितौ हस्वर्णः (स्यः) संयोगसंज्ञः स्यात्। पाणिनिः १।१।७।

† ईश्च ऊश्च यू, ताभ्यां त यूत्। दी—नदी। स्त्री एवेति एवशब्देन नित्यस्त्रीलिङ्गौ नियम्यति। यस्मिन्नर्थे यद्रूपेण स्त्रीलिङ्गशब्दः तस्मिन्नर्थे तद्रूपेण यदि लिङ्गान्तरं न भवति तदा नित्यस्त्रीलिङ्गः। यथा, नदी गौरी इत्यादि। पाणिनिः १।४।३।

‡ इयुवस्थानौ—इयुवप्राप्तियोग्यौ नित्यस्त्रीलिङ्गौ ईकारान्तोकारान्तौ नदीसंज्ञौ न भवतः, स्त्रीशब्दस्तु नदीसंज्ञः। पाणिनिः १।४।४।

§ नित्यस्त्रीलिङ्गौ इयुवस्थानौ स्त्रीशब्दभिन्नौ ईदूदन्तौ दीसंज्ञौ वा स्याताम् आमि परे। पाणिनिः १।४।५।

स्त्रीलिङ्ग इदुदन्तो नित्यस्त्रीलिङ्ग इयुव ईदूच दीसंज्ञः स्याद्वा ङिति परे, न तु स्त्री । *

१०० । अघ्यच्ताच्येप् पिः ।

(अघ्यच्ताच्येप् ।१।, पिः १।) ।

घिवर्ज-स्यादेरच् तसंज्ञावच्यंकारावीप् च एते पि-संज्ञाः स्युः । †

१०१ । सङ्ख्यावत् डत्यतुबहुगणा नेपि ।

(संख्यावत् ।१।, डति अतु बहु गणाः १।।।, न ।१।, ईपि ७।) ।

डत्यतु बहु गणानां संख्यावत् कार्य्यं स्यात्, न त्वीपि । ‡

इति संज्ञापादः ।

---

* सामान्यस्त्रीलिङ्गौ ऋस्वेकारान्तोकारान्तशब्दौ, चकारात् नित्यस्त्रीलिङ्गौ इयुवस्थानौ स्त्रीशब्दभिन्नौ ईदूदन्तौ च दीसंज्ञौ वा स्यातां ङिति परे । पाणिनिः १।४।६ ।

† न घिः अघिः अघेरच् अघ्यच्, अच्च यश्च अच्यौ, तस्य तद्धितस्य अच्यौ ताच्यौ, अघ्यच्च ताच्यौ च ईप् च तेषां समाहारः अघ्यच्ताच्येप् । भिन्नविषयत्वादस्य नित्यत्वम् । पाणिनिः १।४।१८ ।

‡ डति अतु प्रत्ययौ, तेन तदन्तानां कति यति तति यावत् तावत् एतावत् कियत् इयत् शब्दानां, बहु गण शब्दयोश्च संख्यावाचकशब्दवत् कार्य्यं स्यात्, न तु ईपि विषये, यत्र ईप् कर्त्तव्यं तत्र न संख्यावदित्यर्थः । पाणिनिः १।१।२३,२५ ।

२य पादः—अजन्त पुंलिङ्ग शब्दः ।

राम-स् इति स्थिते *—

१०२। स्रो विः फे। (स्रोः ६॥, विः १।, फे ७।)।

सकार-रेफयो विः स्यात् फे परे। † रामः।

औ-जसोः सन्धिः। रामौ रामाः। ‡

१०३। स्वदीभ्यां ध्यमशसादे र्लोपः।

(स्व-दीभ्यां ५॥, धि-अम्-शसादेः ६।, लोपः १।)।

स्वात् दीसंज्ञकाच्च परस्य धेरम्शसादेश्च लोपः स्यात्।

हे राम, रामं रामौ। §

---

* रामशब्दात् (७८) स् इति स्थिते लक्षणमाह।

† दान्तादान्तसाधारणयोः सकार-रेफयोः विसर्गः स्यात्, स्वादीय-हसे विरामे च परे। दान्तस्य—विरामे राम इत्यादि, हसे पयोभ्यामित्यादि। अदान्तस्य—हसि परे गीस्तः धूस्त इत्यादि। पयस्वान् भास्वान् इत्यादौ स्वादीयहस्परत्वाभावात् न विसर्गः। पाणिनिः ८।३।१५, ८।२।६६।

‡ औ परे जसि परे च सन्धिर्भवतीत्यनेन प्रकरणान्तरेऽपि सूत्रानुवृत्तिर्भवितेति सूचितम्। राम-औ = (२३) रामौ। राम-जस् (७८) = राम-अस् = (२२,१०२) रामाः।

§ अम् च शस् च अमशसौ तयोरादिः, धिश्च अम्शसादिश्च समाहारे तस्य। अत्र दीग्रहणम् अम्शसोरादिलोपार्थमेव, हे लक्ष्मि, हे वधु इत्यादौ (१५३) ह्रस्वे कृते ह्रस्वादेव धिलोपसिद्धेः। अत्र धिहसतोर्लोप इति यत्र कृतं तत्, अजर कुलमित्यत्र (१६६) संरमि कृते तस्यापि अकारलोपार्थम्। हे सम्बोधने, राम-सि (८०,१०३) राम। राम-अम् = रामं 'मो बिन्दुरवसाने वा' इति औणादिकसूत्रम्। राम-औ (२३) = रामौ। पाणिनिः ६।१।६९,१०७।

१०४। असनामि घः। (अस-नामि ७।, घः १।)।

असि नामि च परे स्वस्य घः स्यात्। *

१०५। पुंसि तु अस् न।

(पुंसि ७।, तु ।१।, अस् ।१।, न ।१।)।

स्वात् परः अस् न स्यात् पुंलिङ्गे। रामान्। †

१०६। टा भिस् ङे ङसि ङसोसा-मिनैसय-
यात् स्य योसो ऽतः।

(टा—ओसाम् ६।॥, इन—योसः १।॥, अतः ५।)।

अकारात् परेषामेषां स्थाने एते क्रमात् स्युः। ‡

---

* नामीति नुम्सम्बन्धिनकारेण सहिते आमि, तेन आनिनामित्यादौ न प्रसङ्गः। आमो ग्रहणेनैवेष्टसिद्धौ नामीति कृतम् आगमादेशयोर्मध्ये बलीयानागमो विधिरिति न्यायस्वीकारार्थं, तेन क्रोष्टूनामित्यत्र आदौ (११०) नुमि तृनादेशो (१४०) न स्यात्, एवं प्रकृते रामान् इत्यादौ दीर्घस्य स्थानिवत्त्वेन ह्रस्वपरत्वात् यथा असौ नकारविधानं तथा (११०) नुमागमो न स्यादिति सूचनार्थञ्च। पाणिनिः ६।१।१०२, ६।४।३।

† तु-ग्रहणं पुंसीत्यस्य परत्रानुवृत्तिनिवारणार्थम्। पुंस्त्वमिह अभिधानादिनिरूपित-विशेषधर्म्मवत्त्वं, न तु श्मश्र्वादिमत्त्वं, दारादि-तृणादिष्वव्याप्तेः, तथाच प्राहुः—शब्दसंस्कार-सिद्ध्यर्थमुपायाः परिकल्पिताः, सर्व्ववस्तुगता धर्म्माः शास्त्रे पुंस्त्वादयस्त्रयः। ये तु योन्यादि-सम्बद्धाः प्राणिजातीयगोचराः, न तेऽभ्युपायाः सिध्यन्ति कलत्रादि-तटादिषु इति। राम-अस्—(१०४,१०५) रामान्। पाणिनिः ६।१।१०३।

‡ अकारात् परेषां टा, भिस्, ङे, ङसि, ङस्, ओस् एषां स्थाने क्रमेण—
इन, ऐस्, अय, आत्, स्य, योस् एते भवन्ति।
एस् अत् न कृत्वा ऐस् आत् करणं निर्ज्जरसैः निर्ज्जरसात् (११५) सिद्ध्यर्थम्। पाणिनिः ७।१।९,१२,१३। ७।३।१०४।

१०७। ष्रृ णोऽदान्ते नोऽव्कुप्वन्तरेऽप्यतद्दात्तु-पक्कयुवाह्नः ससेप्स्यादे नैकाच्कोस्तु वा। *

(ष्रृ: ५।, णः १।, अदान्ते ७।, नः ६।, अव्कुप्वन्तरे ७।, अपि ।१।, अतद्दात् ५।, तु ।१।, अपक्कयुवाह्नः ६।, ससेप्स्यादेः ६।, नैकाच्कोः ६।, तु ।१।, वा ।१।) ।

षकारात् रेफात् ऋवर्णाच्च परस्य अदान्ते स्थितस्य नस्य णः स्यात्, अव्-कवर्ग-पवर्ग-व्यवधानेऽपि । †

यत्र दे न-स्ततोऽन्यत्र गतात्तु निमित्तात् परस्य, साहिहितेनेपा स्यादिना च सहितस्य, पक्कादिवर्जितस्य, स्यात्, तस्यैवैकाचः सकवर्गाच्चान्यस्य, वा स्यात् । रामेण । ‡

---

* ष च र च ऋश्च तस्मात् ष्रृः। अव् च कुश्च पुश्च तैरन्तरं व्यवधानं तस्मिन्। तत्र तत् दश्चेति तद्दं, न तद्दम्=अतद्दं तस्मात्, अतद्दपदेनात्र लक्षणया अतद्दस्थिताः षकाररेफऋवर्णा उच्यन्ते, अतएवाह यत्र दे नस्ततोऽन्यत्र गतादिति। पक्कश्च युवा च अहश्च पक्कयुवाहानि, न विद्यन्ते पक्कयुवाहानि यस्मिन् सः अपक्कयुवाहस्तस्य। ईप् च स्यादिश्च ईप्स्यादी, सात् ईप्स्यादी सेप्स्यादी ताभ्यां सह वर्त्तते योऽसौ ससेप्स्यादिस्तस्य। एकः अच् यस्य स एकाच्, कुः कवर्गवान्, एकाच्च कुश्च एकाच्कुः—एकाच्कवर्गवच्छब्दसम्बन्धी, न एकाच्कुः नैकाच्कुस्तस्य।

† अव् इह प्रथमवकारान्तः। अपिशब्दादव्यवधानेऽपि, यथा पुष्णां चतुर्णां नृणां मृणानित्यादि।

‡ नकारवत्पदपूर्ववर्त्तिपदस्थितात् षकार-रेफ-ऋवर्णात् परस्य, समासोत्तरविहितयोरीप्स्याद्योरेकतरेण युक्तस्य, पक्क युवन् अहन् सम्बन्धि नकारभिन्नस्य, नस्य णः स्यात्, तस्यैव—तादृशस्यैव नकारस्य, एकाचशब्दसम्बन्धि कवर्गयुक्तशब्दसम्बन्धि भिन्नस्य णो वा स्यात्, एतेन एकाचसम्बन्धिनः सकवर्गसम्बन्धिनश्च नकारस्य नित्यं णः स्यात्, तद्भिन्नस्य वा स्यादित्यर्थः। स्यादिना सहितः—स्यादिशातः स्यादियुक्तो वा। पक्कादेरुभयत्रापि निषेधः, एवम् अव्कुप्वन्तरेऽपीति उभयत्रापि बोध्यम्। एकाचको यथा, वृत्रहणौ, रम्यविणा ; श्रीकामिणौ, श्रीकामेण। एकाचकुभिन्नस्य यथा, हरिभाविणौ हरिभाविनौ, श्रीभावेण श्रीभावेन ; हरिभाविणा, हरिभाविना। समासोत्तरविहितेपोग्रहणात् हरेर्भाविनी

हरिभाविनी इत्यादौ न स्यात्। पक्वादेस्तु शुष्कपक्वेन, चारुयूना, दीर्घाह्ना इत्यादि। पाणिनिः ८।४।१,२,११-१३।

धातुना सह प्रादेः समासे नेयं व्यवस्था, धातुप्रकरणे (५४९), कृत्प्रकरणे च (९६८) तस्य पृथक् णत्वविधानात्। एवं—कुपौ पूर्व्वेण सम्बद्धौ मूर्द्धौ तु परगामिणौ। चत्वारो योगवाहाख्या णत्वकर्म्मणि शुचो मताः—इति नियमेन एषां व्यवधानेऽपि णत्वं स्यात्, यथा बृंहणम्, उर×कायेण, उरᳶपेण इत्यादि। क्रुञ्चति रञ्जयतीत्यादौ झसपरत्वात् (५०) नस्यानुस्वारे, पुनः (५१) अनुस्वारस्य ञकारे, सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति न्यायात् णत्वं न स्यात्। छिषः त्रुषः समर्षः इत्यादौ तु नकारे परे अनुस्वाराभावात् पूर्व्वनकारस्य णत्वे, (४७) ष्टुभिरित्यनेन परनकारस्यापि णत्वं, किन्तु निर्भिन्नः प्रभिन्न इत्यादौ पूर्व्वपदस्थनिमित्तत्वात् समेपस्यादिभिन्नत्वेन णत्वं न स्यात्।

राम-टा = (१०६, २३, १०७) रामेण।

अत्र वाशब्दस्य व्यवस्थया, केषाञ्चित् णत्वविधिहेतौ सति असति वा नित्यं णत्वं स्यात् (१), केषाञ्चित् वा स्यात् (२), केषाञ्चित् णत्वविधिहेतावपि न स्यात् (३), तद्यथा—

१। पूर्व्वपदस्थनिमित्तात् परस्य नो णः स्यात्, संज्ञायाम् अवकुपून्तरेऽपि, यथा—शूर्पणखा, द्रुणसः, खरणसः, वार्ध्रीणसः, खरणादः, नारायणः, परायणं, पारायणम्, उत्तरायणं, रामायणं, चान्द्रायणम्, अग्रणीः, ग्रामणीः, अक्षौहिणी। संज्ञायां किं, शुष्कनखः, ताम्रनखः। अवकुपून्तरे किं, त्रिलोचनः। पाणिनिः ८।४।३। वार्त्तिकञ्च।

रेफादियुक्त-वहनीय-वस्तुवाचक-शब्दात् वाहनशब्दस्य नित्यं णत्वं स्यात्, दर्भवाहणमित्यादि। अवकुपून्तरे किं, राजवाहनम्। पाणिनिः ८।४।८।

त्रिचतुर्भ्यां वयसि हायनस्य। यथा, त्रिहायणः, चतुर्हायणः। वयसीति किं—त्रिहायना शाला, त्रैहायनं गृहम्। वयः प्राणिधर्म्मः इति गोयीचन्द्रः।

प्रपूर्व्वापरप्रभृतिभ्यः अह्नशब्दस्य नित्यं णत्वं स्यात्। प्राह्ण इत्यादि। विरह्नः इत्यादौ तु न भवति। पाणिनिः ८।४।७।

प्र निर् दुर् परिभ्यो नसः। यथा, प्रणस इत्यादि। "नसश्च", इति सुपद्मे, "प्रादौ नसः" इति संक्षिप्तसारे।

अग्रे कोटरा सिध्रका मिश्रका सारिका पुरगा शराम्र कार्ष्य पीयूक्षा खदिर प्र नि-रन्तरिक्षु शसेभ्यो वनस्य नस्य नित्यं णत्वं स्यात्, यथा—अग्रेवणं कोटरावणमित्यादि। एभ्यः किं, इन्द्रवनम्। पाणिनिः ८।४।४,५।

२। द्विवर्णवृक्षवाचकात् द्विवर्णौषधिवाचकाच्च परस्थितस्य वनस्य नस्य णत्वं स्याद्वा, अवकुपून्तरेऽपि, न तु इरिकादेः परस्य। यथा, लोध्रवणं लोध्रवनं, मन्दारवणं मन्दारवनं,

१०८। आ क्ति-मभवि।

(अ।१।, आ।१।, क्ति मभवि ७।)।

अकार आकारः स्यात् क्तौ म-भ-वेषु परेषु।*

रोहिवणं व्रीहिवनं, दूर्व्वावणं दूर्व्वावनं, हरिद्रावणं हरिद्रावनमित्यादि। विंशाचः कं, देवदारुवनम्। अवकृष्णन्तेऽपीति किं, पर्कटीवनम्। इरिकादेस्तु इरिकावनं तिमिरवनम्, इत्यादि। हलौषधिभ्यां किं, विदारीवनम्। पाणिनिः ८।४।६। ार्त्तिकद्वयस्त्र।

पूर्व्वपदस्थित-निमित्तात् पानशब्दस्य भावकरणयोः प्रयुक्तस्य णत्वं वा स्यात्। यथा,—ीरपाणं क्षीरपानमित्यादि। पाणिनिः ८।४।१०।

गिरिणदी स्वर्णदी चक्रणदी गिरिणितम्ब चक्रणितम्ब गिरिणख गिरिणद्ध तूर्य्यमाण ाषीण मार्गयण शब्दानां णत्व वा स्यात्। पक्षे गिरिनदीत्यादि। ८।४।१० सूत्रस्य ार्त्तिकम्।

१। त थ द ध प भ युक्तस्य नस्य णत्वं न स्यात्, यथा, क्रन्दति ग्रन्थनं इन्द्रः दम्भन्ति ृप्नोति चुभ्नाति इत्यादि। पाणिनिः ८।४।२६,३६।

पूर्व्वपदान्तस्थषकारात् परपदस्थनकारस्य णत्वं न स्यात्, यथा, हविष्पानम्, आयुष्कान इत्यादि। पाणिनिः ८।४।३५।

भगिनी कामिनी भामिनी यामिनीनां णत्वं न स्यात्।

स्वभावतो मूर्द्धन्यणवन्तः शब्दाः—

> वाणी तूणीर वेणी फणि मणि लवणं कोण कल्याण बाणाः,
> गौणी घोणी कणाणु र्षण विपणि पणं स्थाणु पुण्यं विषाणम्।
> माणिक्यं शोण प्राणी गुण गण गणिका वेणु सिंहाण वीणा
> निर्व्वाणी निक्कणेण क्षण किण वणिजः कङ्कणं पाणि तूणी॥
> पिण्याकमपि चाणक्यमित्याद्याः स्युः स्वभावत इति।

* अत्र मकार-वकारौ त्यादेरेव, स्यादावसम्भवात्। एवञ्च विभक्तेरादावयव-मकारे ै एवायं विधिः, तेन रामम् इत्यादौ न आकारः। अतएव च 'त्वं मा' इत्यादि साधाय ङेभ्योर्मऽति (२१६) मकारे क्तेऽपि, समभौष्वाङ् (२१७) इति आकारविधानं तम्। अत्र मकारभकाराभ्यामकार. उच्चारणार्थः। पाणिनौ 'यञि' इति कथनात् मभि' इत्येव स्यात्। अत्र तु त्यादिभकारस्य त्यादिमकारवकारयोर्मध्यपाते ारणं सुधीभिर्विभावनीयम्। पाणिनिः ७।३।१०१,१०२।

रामाभ्यां रामैः, रामाय रामाभ्याम् । *

१०९ । ब्वे सभ्यः । (ब्वे ७।, सभि ७।, ए: १।) ।

अकार एकारः स्यात् ब्बौ ब्वें स-भयोः परयोः । †

रामेभ्यः, रामात् रामाभ्यां रामेभ्यः, रामस्य रामयोः । ‡

११० । नुमामः स्वद्यापसङ्क्राष्णः ।

(नुम ।१।, आमः ६। स्वद्याप्-सङ्क्राष्णः ५।)।

स्वात् द्या आपो रषनान्तसङ्ख्यायाश्च परस्याम आदौ नुम् स्यात्।

र्ष-णत्वे । § रामाणाम् । रामे रामयोः । ¶

१११ । क्विलात् क्ततोऽसात् सः षोऽदान्ते नुव्यन्तरेऽपि शास वस घस साढ़ाञ्च ।

(कु-इलात् ५।, क्तत: १।, असात् ।१।, स: १।, ष: १।, अदान्ते ७।, नु-वि-अन्तरे ७।, अपि ।१।, शास वस घस षाढ़ां ६।।।, च ।१।) ।

---

* राम भ्याम (१०८) = रामाभ्याम । राम भिस् (१०६, २३) = रामैः । राम ङे (१०६,२२) = रामाय ।

† अद अकारः अनुवर्त्तते । अकारात परयोस्यादिर्बहुवचनीय-सभयोरसम्भवात् स्यादेरेव सभयोर्ग्रहणम । पाणिनि: ७।३।१०३ ।

‡ राम-भ्यस् (१०९,१०२) = रामेभ्यः । राम-ङसि (१०६,२२) = रामात् । राम ङस् (१०६) = रामस्य । राम-ओस् (१०६,१०२) = रामयोः ।

§ र च ष च न च र्षा, सङ्ख्या चासौ र्षा चेति सङ्क्राष्णः, स्वश्च दीश्च आप् च सङ्क्राष्णश्च तत तस्मात । नुमः उमावितौ, उकारः प्राचीनानुवादार्थः, मिदादौ (१७) । येन विधिस्तदन्तस्येति न्यायादाह रषनान्त इति । रान्तषान्तनान्तानां मुख्यानामेव ग्रहणं, तेन प्रियचतुरां प्रियषषामित्यादौ न स्यात । र्णत्व णत्वञ्च ते भवत इति शेषः, एतत्कथनं (१०४,१०७) सूत्रद्वयस्य स्मरणार्थम् । पाणिनि. ७।१।५४,५५, १।१।२४ ।

¶ राम आम् (११०,१७, १०४, १०७) = रामाणाम् । राम ङि [(७८) इ इत्](२३) = रामे । राम-ओस् (१०६,१०२) = रामयोः ।

कवर्गादिलाच्च परः कृतः सादर्शो दमध्यगः सकारः शासादेश्च षः स्यात्, नु-वि-व्यवधानेऽपि ।*   एत्व-षत्वे ।   रामेषु ।†

एवं मुकुन्दानन्दगोविन्दादयः ।‡

---

* इल् प्रत्याहारः (३) । नुश्च विश्च नुवी, ताभ्यामन्तरं व्यवधानं तस्मिन् । नुरिह नुम्यमादौ (१६२) इत्यादिना विहितो नुमेव न त्वनुस्वारः, तेन हवींषि धनूंषि इत्यादौ षत्वं, न तु पुंसु इत्यादिषु । सर्पिःषु इत्यादौ अन्तरङ्गत्वादादौ रङो विसर्गे (१८७) पश्चात् षत्वं, न तु रेफात्, तथात्वे अहःसु इत्यादौ षत्वापत्तिः । मादिति घसात्प्रत्ययः (४६६) यथा अग्निसात् हरिसादित्यादि । कृत इति प्रत्ययादेशागमानामेकतमसम्बन्धीत्यर्थः, तेन स्वाभाविकसकारवतां धातूनां सस्य षत्वं न स्यात्, यथा सिसीयते इत्यादि । शास वस घसाम् अविकृतधातूनां पृथग्ग्रहणात् अकृतोऽपि सकारः किलात् परः षः स्यात्, यथा शिष्टः उषितः जक्षतुरित्यादि । सादृस्तु सहधातोः (१०२८) विण्प्रत्ययेन निष्पन्नस्य ढकारान्तस्य ग्रहणात् क्रियापेक्षा नास्ति, तेन तुराषाट् इत्यादौ षत्वं, न तु तुरासाह-मित्यादिषु । अत्र, सूत्रे अदान्ते इत्युक्ता वृत्तौ दमध्यग इति व्याख्यानं, समासे दान्ते-स्थितस्यापि क्वचित् दमध्यगत्वेन षत्वं स्यादिति सूचनार्थं, तेन गोष्पतिः निष्कुष इत्यादि सिद्धम् । इल उदाहरणानि यथा, अग्निषु वायुषु पितृषु रामेषु गोषु नौषु अव्ययषु वृत्तवत्सु वार्षु हल्षु । को:—वाक्षु प्राङ्क्षु । पाणिनिः ८।३।५५-६० ।

† एत्व षत्वे इति (१०९,१११) सूत्रद्वय-प्रयोगप्रदर्शनार्थम् । राम-सुप् [(७८)प इत्] (१०९, १११) = रामेषु ।

‡ विशेषविधानबहिर्भूताः यावन्तोऽकारान्तपुंलिङ्गशब्दाः एवं ज्ञेयाः ।

एतद्ग्रन्थोक्तनियमातिरिक्त-षत्वविधानानि ।—

अग्नेः स्तुतः, अङ्गुलेः सङ्गस्य, भीरोः स्थानस्य सस्य षः समासे । यथा, अग्निष्टुत्, अङ्गुलिषङ्गः, भीरुष्ठानम् । पाणिनिः ८।३।८०-८२ ।

दीर्घान्तादग्नेः सोमस्य सस्य षः समासे । यथा, अग्नीषोमौ । पाणिनिः ८।३।८२ ।

ज्योतिरायुरग्निभ्यः स्तोमस्य समासे । यथा, ज्योतिष्टोमः, आयुष्टोमः, अग्निष्टोमः । पाणिनिः ८।३।८२-८३ ।

गवियुधिभ्यां स्थिरस्य समासे । यथा, गविष्ठिरः, युधिष्ठिरः । पाणिनिः ८।३।९५ ।

मातुः पितुश्च स्वसुः सः षः समासे, अलुक्समासे तु वा । यथा, मातृष्वसा, पितृष्वसा । अलुक्समासे तु—मातुःष्वसा मातुःस्वसा, पितुःष्वसा पितुःस्वसा । पाणिनिः ८।३।८४-८५ ।

नि-नदीभ्यां स्नातेः कौशले । यथा, निष्णः, निष्णातः, नदीष्णः । पाणिनिः ८।३।८९ ।

११२। स्वे जस् ङे ङसि ङीना-मि स्मै स्मात् स्मिनोऽतः ।

(स्वे: ५।, जस् ङे ङसि ङीनां ६।॥, ङ स्मै स्मात् स्मिनः १।॥, अतः ५।) ।

प्रादग्रगौ स्थस्य । यथा, प्रष्ठः । पाणिनिः ८।३।९२ ।

वेः स्कभ्नातेर्ह्रासनयोः । यथा, विष्टरः । पाणिनिः ८।३।९३।

विकुपरिशमिभ्यः स्थलस्य । यथा, विष्ठलं, कुष्ठलं, परिष्ठलं, शमिष्ठलम् । कपिष्ठलः (तन्नामा ऋषिः) निपात्यते । पाणिनिः ८।३।९१।९६ ।

अम्ब गो भूमि द्वि त्रि कुङ्गु मञ्जि पुञ्जि दिव्यग्नि वर्हिभ्यः स्थस्य । यथा, अम्बष्ठः, गोष्ठः, भूमिष्ठः, द्विष्ठः, त्रिष्ठः, कुष्ठः, कङ्गुष्ठः, मञ्जिष्ठः, पुञ्जिष्ठ, दिविष्ठः, अग्निष्ठः, वर्हिष्ठः । एभ्यः किं, भूस्थः । स्थस्य किं, गोस्थितिः । परमेष्ठी सव्येष्ठा—निपात्यौ, पाणिनिः ८।३।९७ ।

इलात् सः षः संज्ञायामेकारे भात्तु वा । यथा, सुषेणः, हरिषेणः, वायुषेणः । नक्षत्रात्तु भरणिषेणः, भरणिसेनः । इलात् किं, विश्वक्सेनः । एकारे किं, त्रिस्रोताः । संज्ञायां किं, पृथुसेनः । पाणिनिः ८।३।९९,१०० ।

सुविनिर्दुर्भ्यः समसूत्योः । यथा, सुषमं, विषमं, निःषमं, दुःषमं, सुषूतिः, विषूतिः, निःषूतिः, दुःषूतिः । पाणिनिः ८।३।८८ ।

निर्दुर्वहिराविःप्रादुश्चतुरां सः (नतु प्रत्ययस्य) षः कखपफेषु । यथा, निष्पन्नः, दुष्करः, वहिष्कारः, आविष्कारः, प्रादुष्कृतं, चतुष्पथमित्यादि । पाणिनिः ८।३।४१ ।

निसस्तपतावनभ्यावृत्तौ । यथा, निष्टपति स्वर्णं परीक्षकः । आवृत्तौ तु निस्तपति स्वर्णं स्वर्णकारः, पुनः पुनरग्निं स्पर्शयतीत्यर्थः । पाणिनिः ८।३।१०२ ।

निःसुदुर्भ्यः साम-सेध सन्धिनां षः । यथा, निःषामा, सुषामा, दुःषामा, निःषेधः, निःषन्धिः, सुष्ठु, दुष्ठु इत्यादि । पाणिनिः ८।३।९८ ।

स्तम्भेरवाद्दाश्रयनिकटयोः । यथा, यष्टिमवष्टभ्य आस्ते, तामाश्रित्य तिष्ठतीत्यर्थः ; अवष्टब्धा गौः निकटे निरुद्धा आस्ते इत्यर्थः । अन्यत्र शीतेनावस्तब्धः । पाणिनिः ८।३।६८ ।

परिस्थितादेर्न सः षः । यथा, परिस्थितः, सुस्थितः, दुःस्थितः, क्रमसरः, धूमसरः इत्यादि । "दुःस्थादेश्च" इति क्रमदीश्वरः ।

स्वभावतो मूर्द्धन्यषकारवन्तः शब्दाः—

मञ्जूषेर्षा प्रदोषौ वृष वृषभ मृषाषाढ राष्ट्रोष्ट्र कष्टं,
घोषोष श्लेष्म भीष्मा त्विषय विष विषाणानि कुष्माण्ड षण्डौ ।
कल्माषं माष मेषामिष मिष महिषा वेष पाषाण योषित्-
पौषाभिषाम्भुषारोष्टर करुष पुरीषाम्बरीषाः करीषम् ॥

अकारान्तात् स्रेः परेषामेषां स्थाने एते क्रमात् स्युः। *
सर्व्वे सर्व्वस्मै सर्व्वस्मात् सर्व्वस्मिन्। †

११३। आत् सुमामः। (आत् ५।, सुम् ।१।, आमः ६।)

अवर्णान्तात् स्रेः परस्य आम आदौ सुम् स्यात्। एत्वषत्वे। ‡
सर्व्वेषाम्। शेषं रामवत्। § एवं विश्वादयोऽकारान्ताः।
उभशब्दो द्वान्तः। उभौ उभौ उभाभ्याम् उभाभ्याम् उभाभ्याम्
उभयोः उभयोः। ¶

पीयूषं त्रिपुषा हृषीक चषकावीषत् पृषत् किल्विषं,
प्रत्यूषघु कशा कषाय कलुषं यूषं भिषक् सर्षपौ।
पुष्पं पुष्कर वाष्प शष्प शुषिरं दुष्खं तुरुष्कौषधि
मुष्कं गोष्पद पौरुषे परुषमित्यते तथा चापरे॥

* अकारान्त सर्व्वनाम-शब्दात् परेषां जस् ङे ङसि ङीनां स्थाने क्रमात्——
इ स्मै स्मात् स्मिन् एते स्युः।
अत्र, जसङिताम इ स्मै स्मात् स्य स्मिन् इति कृते, अतिसर्व्वाय इत्यत्र सर्व्वनामत्वाभावात्
यथा स्मै न स्यात् तथा अतिसर्व्वस्य इत्यत्रापि ङसः स्थाने स्यादेशस्याप्रसङ्गः स्यात्, टाभिस् (१०६) इत्यनेनापि न भवितुमर्हति, अनेनैव विशेषेण निषेधात्। पाणिनिः ७।१।१४,१५,१७।

† सर्व्व-जस् (११२, २३) = सर्व्वे। सर्व्व-ङे = सर्व्वस्मै। सर्व्व-ङसि = सर्व्वस्मात्। सर्व्व ङि = सर्व्वस्मिन्।

‡ स्रेरित्यनुवर्त्तते, आत् अवर्णात् तेन सर्व्वासामित्यादि। सुम उमावितौ, उकारश्चिन्हार्थः, मिश्चाद्यादौ। आमः स्थाने सुम्विधानं विभक्तिसम्बन्धित्वार्थम्. अत-आह एत्वषत्वे इति, एत्वञ्च षत्वञ्च ते। सुमः स्यादीयसकारत्वात् (१०९) ब्वेसभ्यः इत्यनेन एकारः, पश्चात् षत्वं भविष्यतीत्यर्थः। स्यादिस्थाने सर्व्वावयवादेशे तु तस्मिन् परे न एकारः, यथा परस्मादित्यादि। पाणिनिः ७।१।५२।

§ सर्व्व आम (११३. १७. १०९, १११) = सर्व्वेषाम्। शेषम् उक्तादन्यत् रामवत् ज्ञातव्यमित्यर्थः, पुंनपुंसकयोः शेषमित्यमरः।

¶ उभशब्दो द्वान्त इति मुख्याभिप्रायेणोक्तं, तेन अधिगतौ उभौ येन स अध्युभः

जसि—नेमे नेमाः। * शेषं सर्व्ववत्।

११४। पूर्व्वादेः स्मात्-स्मिनौ वा।

(पूर्व्वादेः ५।, स्मात्-स्मिनौ १॥, वा ।१।)।

तौ। पूर्व्वस्मात् पूर्व्वात्, पूर्व्वस्मिन् पूर्व्वे। † शेषं नेमवत्।
एवं परादयः।

समोऽतुल्ये इत्याद्युक्तिः—

नमः समस्मात् पूर्व्वस्मै अन्तरस्मा असेधसाम्।
सुमेधसामन्तरस्मै सतां स्वस्मै स्वयम्भुवे॥ ‡

इत्यादि। उभशब्दादवयवार्थेऽयट्प्रत्ययेन साधितात् उभयशब्दात् द्विवचनं न प्रयुज्यते इति सम्प्रदायः। एकत्वसङ्ख्यावाचकादेकशब्दात् एकवचनमेव।

* नेम-जस् (८९, ११२, २३) = नेमे, वा (२२, १०२) नेमाः।

† तौ इति वृत्तिः। पूर्व्वविहितौ (११२) स्मात् स्मिनौ पूर्व्वादेर्वा स्याताम्। अतएव ङसि ङ्योः स्थाने, अतश्चेति वक्तव्यं, पूर्व्वाद्यल्पेति (८९) सूत्रेण जसि परे वा सिसंज्ञामकृत्वा, अत्र, पूर्व्वादेरि स्मात्-स्मिनौ वा इति यन्न कृतं तत्, पूर्व्वाशब्दात् जसः स्थाने (५११) तसि कृते, पुंवत् सेरिति (३२०) पुंवद्भावे, पूर्व्वतः, (वा सिसंज्ञायां ८९) पूर्व्वातः इति पदद्वयासिद्ध्यर्थम्। पूर्व्व-ङसि—पूर्व्वस्मात्, वा (१०६, २२) पूर्व्वात्। पूर्व्व-ङि—पूर्व्वस्मिन्, वा (२३) पूर्व्वे। पाणिनिः ७।१।१६।

‡ समोऽतुल्ये (८६) इत्यादेरुदाहरणान्याह नमः इति—स्वयम्भुवे ब्रह्मणे नमः, कीदृशाय, समस्मात् सकलात् पूर्व्वस्मै पूर्व्वकालीनाय पूर्व्वकालवर्त्तिने इत्यर्थः, अत्र समशब्दस्य अतुल्यार्थत्वेन पूर्व्वशब्दस्य च कालार्थतया व्यवस्थावाचित्वेन सिसंज्ञा। पुनः कीदृशाय, असेधसां निर्बुद्धीनाम् अन्तरस्मै वहिःस्थिताय, सुमेधसां सुबुद्धीनाम् अन्तरस्मै सदा संसर्गात् परिधानवस्त्रस्वरूपाय, सतां साधूनां स्वस्मै आत्मीयाय; अत्र अन्तरशब्दस्य वहिर्योगवाचित्वेन उपसंव्यानवाचित्वेन च सिसंज्ञा, स्वशब्दस्य च ज्ञातिधनभिन्नार्थत्वेन सिसंज्ञा।

समायेषु परायैषां मुक्तयेऽर्थान्तराय च ।
यदुस्वाय नम: स्वाय मल्लैर्जुष्टाय शार्ङ्गिणे ॥ *
अतिसर्व्वाय सर्व्वाय साध्वन्यानां सखिद्विषे ॥
कालावराय कालेन पूर्व्वाय जगतो नम: ॥ †

जसि—साध्वन्ये साध्वन्या: । जसि—अल्पे अल्पा: ।
शेषं रामवत् । एवं प्रथमादय: । द्वितीयस्मै द्वितीयाय, द्वितीयस्मात् द्वितीयात्, द्वितीयस्मिन् द्वितीये । एवं तृतीय: । निर्जर: । ‡

---

* प्रत्युदाहरणान्याह समायेति—शार्ङ्गिणे विष्णवे नम: । कीदृशाय एषु जगत्सु समाय तुल्याय जगन्मयत्वादित्यर्थ:, अत्र समशब्दस्य तुल्यार्थत्वेन न सिसंज्ञा । पुन: कीदृशाय एषां जगतां मध्ये पराय श्रेष्ठाय नित्यत्वादित्यर्थ:, अत्र परशब्दस्य व्यवस्थावाचित्वाभावात् न सिसंज्ञा । किमर्थं नम इत्याह मुक्तये मोक्षाय, अर्थान्तराय प्रयोजनान्तराय धर्म्मार्थकामार्थमित्यर्थ, अत्र अन्तरशब्दस्य वहिर्योगादिभिन्नार्थत्वेन न सिसंज्ञा । पुन: कीदृशाय यदुस्वाय यदूनां ज्ञातये, स्वाय धनाय यदूनामिति समस्तपदेन सम्बन्ध:, समस्तस्यासमस्तेन नित्याकाङ्क्षेण सङ्गतिरितिन्यायात्, अत्र स्वशब्दस्य ज्ञातिधनवाचित्वात् न सिसंज्ञा । पुन. कीदृशाय मल्लै वीरै: जुष्टाय सेविताय इति पद्यपूरणार्थम् ।

† न गौण्याख्येत्यस्य (८७) उदाहरणान्याह अतिसर्व्वायेति, सर्व्वाय शिवाय नम:, अत्र सर्व्वशब्दस्य "सर्व्व: शिव: स्थाणुरिति" सहस्रनाममध्ये पाठेन संज्ञावाचित्वात् न सिसंज्ञा । कीदृशाय अतिसर्व्वाय सर्व्वमतिक्रान्ताय, अत्र गौणत्वात् न सिसंज्ञा । पुन: कीदृशाय साध्वन्यानां सखिद्विषे, साधवश्च अन्ये च साध्वन्यास्तेषां, सखा च द्विट् च तस्मै, क्रमात् साधूनां सख्ये, असाधूनां द्विषे शत्रवे इत्यर्थ:, अत्र साध्वन्यानामिति द्वन्द्वसमासस्थितत्वात् न सिसंज्ञा. समासान्तविधेरनित्यत्वात् सखिद्विषे इत्यत्र (३२३) चैकादित्यनेन न अप्रत्यय: । पुन: कीदृशाय जगत: कालावराय कालेन कनिष्ठाय अत्र कालावरायेति तृतीयातत्पुरुषसमासस्थितत्वात् न सिसंज्ञा । पुन: कीदृशाय जगत: कालेन पूर्व्वाय, अत्र तृतीयातत्पुरुषसमासयोग्यवाक्यस्थितत्वात् न सिसंज्ञा ।

‡ साध्वन्यशब्दस्य जसि तु (८८) चे जसि वेत्यनेन विकल्पेन सिसंज्ञायां साध्वन्ये साध्वन्या: इति पदद्वयम् । अल्पे अल्पा: इति (८९) पूर्व्वाद्यल्पेत्यनेन जसि परे वा सिसंज्ञा । एवं प्रथमे प्रथमा:, चरमे चरमा:, द्वितये द्वितया:, त्रितये त्रितया:, द्वये द्वया:, त्रये त्रया:, अर्द्धे अर्द्धा:, कतिपये कतिपया:, नेमे नेमा: । माघकाव्ये तु द्वयेषामिति

११५ । जरस् जराचि तु ।

(जरस् ।१।, जरा ।१।, अचि ७।, तु ।१।) ।

जराशब्दो जरस् वा स्यादचि परे ।

निर्जरसौ निर्जरसः, निर्जरसं निर्जरसौ निर्जरसः, निर्जरसा ।
केचिदादाविनाताविच्छन्ति, निर्जरसिन, निर्जरसैः, निर्जरसे, निर्जरसः, निर्जरसादित्यादि । पक्षे ङसि च रामवत् । ※

११६ । पाद दन्त यूष निशा पृतना मासासन सानु नासिकोदक हृदयासृक् यकृत् शकृत् शीर्ष दोषः—पद्दद् यूषन्निश् पृन्मासासन् सु नसुदन् हृदसन् यकन् शकन् शीर्षन् दोषणः शसादि-पौ ।

(पाद –दोषः १॥, पद—दोषणः १॥, शसादि पौ ७।) ।

प्रयोगो दृश्यते, तत्र महाकविलिखितत्वात् साध्यम्, इयमिष्यन्तीति क्विपि इयेष्शब्देन वा । जोमराम् उभयशब्दमपि प्रयान्तं मत्वा उभये उभयाः इति वदन्ति । द्वितीय-ङे=(९०, ११२) द्वितीयस्मै, वा स्त्रिमञ्ज्ञायां (१०६, २२) द्वितीयाय इत्यादि तृतीयशब्दोऽप्येवम् । निर्जर-सि (१०२)=निर्जरः । निर्गता जरा यस्येति बहुव्रीहिसमासः ।

※ पुंलिङ्गे सूत्रकरणात् विकृतस्यापि जराशब्दस्य ग्रहणं, एकदेशविकृतमनन्यवत् भवतीति न्यायात् तेन जरा जर इत्युभयस्यापि जरस् वा स्यादचि परे । प्रकरणबलात् अचीति स्यादेरेव, तेन निर्जरस्यार्च्चा निर्जरार्च्चा इत्यादौ न प्रसङ्गः । अत्र तु-शब्दो व्यवस्थापकः, व्यवस्था च केचिदादाविनाताविच्छन्तीति । बहिरङ्गविधिभ्यः स्यादन्तरङ्ग-विधिर्बलीति न्यायादादौ जरसादेशे सम स्यादिलोपः असो नकारस्य न स्यात्, एवं टा ङे ङसीनाम् इनायातोऽपि न स्युः । किञ्च सर्व्वावयवादेशेन ह्रस्वपरत्वाभावात् आमो नुमागमोऽपि न स्यात् तेन निर्जरसामिति, एवं पदां दतामित्यादयोऽपि । केचित् पण्डिताः सावकाशविधिभ्यः स्यादबली निरवकाशक इति न्यायेन, जरसादेशकरणात् आदौ टा-ङस्योः स्थाने इनातौ इच्छन्ति, तन्मते (टा, १०६) निर्जरसिन, (ङसि, १०६) निर्जरसादिति । पक्षे जरसादेशाभावपक्षे, हसे परे भ्याम् भिस् भ्यस् सुप् एषु परेषु चेत्यर्थः । पाणिनिः ७।२।१०१ ।

एषां स्थाने एते क्रमात् स्यु र्वा शसादौ पौ च परे। *

पदः पदा पद्भ्यामित्यादि। दतः दता दद्भ्यामित्यादि।

११७। सदानोऽल्लोपोऽम्वस्यात् पौ वा त्वीङ्योः।

(सदा ।१।, अन ६।, अत्-लोपः १।, अ-म्व-स्यात् ५।, पौ ७।, वा ।१।, तु ।१।, ईङ्यो. ७।)।

अनोऽकारस्य नित्यं लोपः स्यात् पौ परे, ईङ्योस्तु वा, न तु मस्यात् वस्याच्च परस्य। †

---

* एतेषां स्थाने एते आदेशाः क्रमात् भवन्ति, यथा—

पाद	दन्त	यूष	निशा	पृतना	मास	आसन	सानु
पद्	दत्	यूषन्	निश्	पृत्	मास्	आसन्	स्नु
नासिका	उदक	हृदय	असृज्	यकृत्	शकृत्	शीर्ष	दोष
नस्	उदन्	हृद्	असन्	यकन्	शकन्	शीर्षन्	दोषन्

अत्र शसादिग्रहणेन पूर्व्वविभक्तिनिरासात् क्लीबे औकारस्य पित्वेऽपि तत्र न स्यात्। अत्र आसनशब्दस्थाने आसन् इति पदं साधयता वोपदेवेन काशिकामतमेव प्रामाणिकत्वेन गृहीतम्; सिद्धान्तकौमुदीकारेण तु आस्यशब्दस्थाने आसन् इति वदता तन्मतं प्रामादिकमिति सिद्धान्तितम्। वाशब्दस्य व्यवस्थया क्वचिद्वा स्यात् (१), क्वचिन्नित्यं (२), क्वचिन्न स्यात् (३), प्रयोगत इति। यथा, (१) शसादौ विकल्पः स्वयमुदाहृतः, एवं सुदतौ सुदन्तौ इत्यादौ च। (२) केशार्थे शीर्षण्यः, पूरयितव्यार्थे उदकुम्भ इत्यादि। (३) पादप्रक्षालनजलार्थे पाद्यमित्यादि। पाणिनिः ६।१।६३।

† सदेति पूर्व्व-वाधिकारनिवृत्त्यर्थम्। अथवा सदेति सप्तम्यन्तं सुखत्वे गौणत्वे चेत्यर्थः, तेन पूजितपूष्णः पीतयूष्णः इत्यादि सिद्धम्। म च वश्चेति म्वः (मवान्तः) म्वश्चासौ स्यश्चेति म्वस्यः, न म्वस्यः अम्वस्यस्तस्मात्, मवसंयोगात् यथा—कर्म्मणः यज्वनः इत्यादि। ईङ्योरिति ङि-साहचर्य्यात् ई इति विभक्तिसम्बन्धीयमेव ग्राह्यम्, तेन अह्नी अहनी इत्यादि; ईपि तु नित्यं राज्ञी विदाम्नीत्यादि। वार्त्तघ्न. पौष्णः धार्त्तराज्ञः एषाम् अनेनैव सिद्धौ (४३५) इन् अण् इति सूत्रमेवं ज्ञापयति—तद्धितस्य अपि ये च न सर्व्वत्र अनोऽल्लोपः, तेन राजन्यः मूर्द्धन्य इत्यादि सिद्धम्। पाणिनिः ६।४।१३४,१३६,१३७।

यूष्णः यूष्णा । *

११८ । नो लुप् फेऽधौ ।

(नः ६।, लुप् ।१।, फे ७।, अधौ ७।) ।

नस्य लुप् स्यात् अधौ फे परे । † यूषभ्यामित्यादि । ङौ—यूष्णि यूषणि यूषे । मासः मासा माभ्यामित्यादि । ‡ पद्मे धौ च रामवत् । पदादयः पृथक्शब्दा इत्येके । §

११९ । सङ्ख्या-वि-सायाद्वाह्नोऽहन् ङौ ।

(सङ्ख्या-वि-सायात् ५।, वा ।१।, अह्नः ६।, अहन् ।१।, ङौ ७।) ।

सङ्ख्या-वि-सायेभ्यः परस्याह्न इत्यस्य अहन् वा स्यात् ङौ । ¶

---

* यूष शस् (११६)=यूषन्-शस् (११७, १०७)=यूष्णः । एवं यूष टा=यूष्णा ।

† लिङ्गान्तस्थस्य अन्तस्थ-नकारस्य लुप् स्यात् स्यादीय-हसे विरामे च न तु धौ । धिवर्जनादेव लिङ्गान्तनकारस्य प्राप्तिः, तेन (हनधातो घ्नां दिपि) अहन् इत्यादौ न प्रसङ्गः । प्रशान् भवान् इत्यादौ कृतत्वात् न नस्य लोपः । पाणिनिः ८।२।७,८ ।

‡ यूष-ङि (११६, ११७, १०७)=यूष्णि, वा यूषणि, वा यूषे । मास-शस्=मासः । मास-टा=मासा । मास-भ्याम् (११६, १०२, ७०)=माभ्यां ।

§ एके—केचित् पण्डिताः पद्प्रभृतयः पृथक् शब्दाः सन्तीति वदन्ति । एतत् वोपदेवस्यापि मतम्, अतएव कारके (२८१) आवसतात् स छन्न इति द्वितीयैकवचने स्वयमुदाहृतम् ।

¶ सङ्ख्यावाचकशब्द विशब्द सायशब्देभ्यः परस्य अह्न इत्यकारान्तशब्दस्य अहन् वा स्यात् ङौ परे । द्वयोरह्नोर्भवः द्व्यह्नः, विगतम् अहः व्यह्नः, अह्नः सायः सायाह्नः । सङ्ख्यादेराश्च इति (२५३) षप्रत्यये, सर्व्वैकदेश इति (२५४) अह्नादेशे एषामदन्तत्वम् । पाणिनिः ६।३।११० ।

द्व्यह्नि द्व्यहनि द्व्यह्ने, व्यह्नि व्यहनि व्यह्ने, सायाह्नि सायाहनि सायाह्ने। *

विश्वपाः विश्वपौ विश्वपाः, विश्वपां विश्वपौ। †

१२०। धोरालोपोऽघ्यवौ।

(धोः ६।, आ-लोपः १।, अचि ७।, अघौ ७।)।

धोराकारस्य लोपः स्यात् अघावचि परे।

विश्वपः, विश्वपा विश्वपाभ्यामित्यादि। एवं शङ्खध्मादयः। ‡

धोः किं—हाहाः हाहा हाहाभ्यामित्यादि। §

शेषं विश्वपावत्।

हरिः।

१२१। युङ्गा-मौ यू। (युङ्गाम् ५॥, औ।१।, यू २॥)।

---

* द्व्यह्न ङि = द्व्यहन्-इ (११७) = द्व्यह्नि, वा द्व्यहनि, वा द्व्यह्ने इत्यादि।(इत्यदन्ताः)

† विश्वं पाति रक्षति यः स विश्वपाः विष्णुः। विश्वपा-सि (१०२) = विश्वपाः। विश्वपा-औ (२३) = विश्वपौ। विश्वपा-अम् (२२) = विश्वपाम्।

‡ धात्ववयवीभूताकारस्य लोपः स्यात् घिभिन्न-स्यादीयाचि परे। तद्धिताच-यकारयोः परयोः ययोर्लोप (२५८) इत्यनेन आकारलोपस्यावश्यकत्वे धोरालोपः पौ इति यन्न कृतं तत् गोमायुः स्नायुः पायुरित्यादौ (४४७) आकारस्थित्यर्थम्। विश्वपा शस् = विश्वपः इत्यादि। शङ्खं धमतीति शङ्खध्माः। एवं पुण्यं तायते इति पुण्यताः, आज्यपाः शुभंया इत्यादि। पाणिनिः ६।४।१४०।

§ हा इति कुत्सितं शब्दं जहातीति औणादिक-डाप्रत्ययेन, उर्वेचीति (६१०) आकारलोपे हाहा इति आकारस्य धात्ववयवत्वाभावात् न आकारलोपः। क्विप्प्रत्यये तु धात्ववयवत्वेन आकारलोप एव—हाहः। हाहा गन्धर्व्वः। "आतोऽनाप इति वक्तव्यम्" इति वार्त्तिकम्—आबन्तभिन्नानामाकारलोप इत्यर्थः। अत्र "धातोः किं हाहान्" इति सिद्धान्तकौमुदी। "हाहान्तु वा, हाहाः हाहः हाहान् वा" इति सौपद्मे। "हाहः" इति क्रमदीश्वरः। "अव्युत्पन्नोऽपि गन्धर्व्ववाचको हाहाशब्दोऽस्ति तस्य हाहान् हाहे इत्यादि भवति" इति गोयीचन्द्रः। (इत्यादन्ताः)।

इकारोकाराभ्यां पर औ क्रमादिकारोकारौ प्राप्नोति। हरी।*

१२२। गुर्धिजसङिन्तसु। (गः १।, धि-जस्-ङित्सु ७॥)।

इदुतोर्गुः स्यात् धौ जसि ङिति च परे। हरयः।†
त्यलोपे त्यलक्षणं—हे हरे। हरिं हरी हरीन्।‡

१२३। टादसश्चास्त्रियांन्तु ना।

(टा।१। अदसः ५।, च।१।, अस्त्रियां ७।, तु।१।, ना।१।)।

इदुद्भ्यामदसश्च परष्टा ना स्यात्, न तु स्त्रियाम्।§

---

* इश्च उश्च यू, पश्चात् तकारानुबन्धेन युतौ ताभ्यां। क्रमश्च इकारात् औ इ, उकारात् औ उ। हरि-औ=(१२१,२२) हरी। पाणिनिः ६।१।१०२।

† अत्र, इदुद्भ्यां विहिते एव धौ परे बोध्यं, तेन हे नदि हे सुभ्रु इत्यादौ सुभ्रूङीति (१५२) ह्रस्वे पश्चात् न गुणः। ङिति च साक्षात् परे बोध्यं, अन्यथा मत्यै इत्यत्र दा ङितामिति (१५६) अमि कृतेऽपि अनेन गुणापत्तिः स्यात्। हरि-जस्=(१२२, ३५) हरयः। पाणिनिः ७।३।१०८, १०९, १११।

‡ प्रत्ययस्य लोपे सति प्रत्ययस्य लक्षणं चिह्नं स्वीक्रियते इत्यर्थः, येन केनापि शब्देन प्रत्ययलोपे तत्प्रत्ययसम्बन्धि कार्य्यं स्यादिति यावत्। (पाणिनिः १।१।६२)। यथा, राजा इत्यादौ (१४८) सेर्लोपे (१६४) दीर्घः। वाचामीशः वागीशः इत्यादौ (३१९) विभक्तिलुकि विभक्त्यन्तविहिता पदसंज्ञा सिद्धा। हे हरे इत्यत्र आदौ गुणे कृते, स्थानिवत्त्वेनैव धिलोपे सिद्धे, त्यलोपे त्यलक्षणमिति न्यायस्वीकारः स्थानिवदादेश इति न्यायस्य व्यभिचारसूचनार्थः। हे—हरि सि (८०, १०३, १२२)=हरे। हरि-अम (१०३)=हरिम्। हरि-शस् (१०४,१०५)=हरीन्।

§ मात् स्वचीविति (२३५) उत्वे उदन्तत्वादेव ना-आदेशे सिद्धे अदसो ग्रहणं वैभक्तिक-सकलकार्य्यानन्तरमेव उत्वंभवतीति ज्ञापनार्थं, तेन अमुष्मै इत्यादौ आदौ स्मै कृते (११२) पश्चादुत्वे (२३५) षत्वे च (१११) पदसिद्धिः। पाणिनिः ७।३।१२०।

हरिणा हरिभ्यां हरिभिः, हरये हरिभ्यां हरिभ्यः। *

१२४। ङसिङसोश्च।

(ङसि-ङसोः ६।, च १।)।

एङः परस्य ङसिङसोः अतः पूर्वरूपम् एकादेशः स्यात्। †

हरेः हरिभ्यां हरिभ्यः। हरेः हर्योः हरीणाम्। ‡

१२५। अच्च घेः।

(अत् १।, च १।, घेः ६।)।

इदुद्भ्यां परस्य ङेः औः स्यात्, घेः अच्च। §

१२६। टेर्लोपो डिति, विंशते-स्तस्य डिति।

(टेः ६।, लोपः १।, डिति ७।, विंशतेः ६।, तेः ६।, तु ।१।, अङौ ७।)।

डिति परे पूर्वस्य टेर्लोपः स्यात्, विंशते-स्तेस्त्वङौ। ¶

---

* हरि-टा (११३, १०७) = हरिणा। हरि ङे (१२२, ३५) = हरये।

† ङः परः अः ङः तस्य ङस्य, स च ङसिङसोरेव सम्भवति, अत आह ङसिङसो-ङस्येति। एङ इति प्रकृतेर्विकृतेरपि, तेन गोः द्योरित्यादि। पाणिनिः ६।१।११०।

‡ हरि-ङसि (१२२, १२४, १०२) = हरेः। एवं ङस् = हरेः। हरि ओस् (३५) = हर्योः। हरि-आम् (११०, १०४, १०७) = हरीणाम्।

§ यद्यपि, युद्भ्यां ङेरौ इति इदुद्भ्यां सह ङेरौ विधाने कृते परसूत्रे अङाविति वक्तव्यं न स्यात्, तथापि डौ-करणं परसूत्रे स्वाद्यध्यायप्रकरणीय-डिति परे एव विंशते-स्ति-लोपार्थं, तेन विंशतिमाचष्टे विंशतयति इत्यत्र (८५५) णिप्रत्ययस्य (४६७) डित्त्वेऽपि टेरेव लोपः न तु तेः। पाणिनिः ७।३।११८-११९। एतन्मते मौत्।

¶ डिति परे तत्पूर्वशब्दस्य टेर्लोपः स्यात्, विंशतिशब्दस्य तु ति-भागस्य लोपः स्यात्, अङौ डिसम्बन्धिभिन्ने डिति परे, डिसम्बन्धि डिति परे तु विंशतिशब्दस्य टे-र्लोप एवेत्यर्थः। यथा, विंशतेः पूरणः इत्यर्थे विंशतिशब्दात् (४५०) डटि कृते ति-भागलोपे विंशः, डौ तु विंशतौ। पाणिनिः ६।४।१४२ १४३।

हरी हर्य्यौः हरिषु । * एवं श्रीपत्यग्निरव्यादयः । †

१२७ । सख्यृद्भ्यां सेर्डाधेः ।

(सख्यृद्भ्यां ५॥, सेः ६।, डा ।१।, अधेः ६।) ।

सखि-शब्दात् ऋकारान्ताच्च परस्य से र्डा स्यान्न तु धेः ।
सखा । अधेः किं, हे सखे । ‡

१२८ । घौ त्रिः । (घौ ७।, त्रिः १।) ।

सख्यु ऋकारस्य च त्रिः स्यात् अधौ घौ परे । §
सखायौ सखायः, सखायं सखायौ सखीन् । ¶

१२९ । सख्युष्टाङिता-माएउसुसौ ।

(सख्युः ५।, टा-ङिताम् ६॥, आ ए उस् उस् औ ।१॥) ।

---

* हरि-ङि (१२५, १२६)=हरौ । हरि-सुप् (१११)=हरिषु ।

† श्रीपतिश्च अग्निश्च रविश्च ते आदयो येषां ते । आदिपदात् विशेषभिन्न-यावतीय-पुंलिङ्ग-ह्रस्वेकारान्तशब्दाः एवमित्यर्थः ।

‡ सखा च ऋच्च ताभ्यां, सख्यृद्भ्याम् । सखि-सि=सखि-डा[ड-इत] (११६)=सखा । हे सखि-सि (धि)=(१०३,१२२) सखे । पाणिनौ सखिपतिशब्दसाधनप्रकारः सम्यक् विभिन्न एव । ७।१।९२,९३, ७।२।११५, ६।१।१११, ७।३।११८ ।

§ अर्थवशात् विभक्तेर्विपरिणाम इति न्यायात् सख्यृद्भ्यां पदं षष्ठ्यन्तं भूत्वा अधेरिति पदञ्च सप्तम्यन्तं भूत्वा इहानुवर्त्तते । सखिशब्दस्य ऋकारान्तशब्दस्य च अन्त्याचः त्रिः स्यात् अधौ घौ परे । पाणिनिः ७।२।११५ ।

¶ सखि-औ=सखै-औ (३५)=सखायौ । एवं जस् अम् औ परे । सखि-शस् (१०४,१०५)=सखीन् ।

सख्युः परेषां टाङितां स्थाने आ ए उस् उस् औ एते क्रमात् स्युः।*

सख्या सख्ये सख्युः सख्युः सख्यौ। † शेषं हरिवत्।

१३०। पत्युरसे। (पत्युः ५।, असे ७।)।

पतिशब्दात् परेषां टाङितां स्थाने आ ए उस् उस् औ एते क्रमात् स्युर्न तु से। पत्या पत्ये पत्युः पत्युः पत्यौ। असे किं, श्रीपतिना इत्यादि। शेषं हरिवत्। ‡

कतिशब्दो ब्वान्तः। §

---

* आ ए उसुसौ इत्यत्र सूत्रत्वात् न सन्धिः। टा ङे ङसि ङस् ङि स्थाने क्रमेण आ ए उस् उस् औ भवन्ति। टादिस्थाने आ आदि करणं ना-आदिनिषेधार्थम्। किन्तु. क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते इति अथवा आतिदेशिकं कार्य्यमनित्यमिति न्यायात् सखिना वानरेन्द्रेण इत्यादि सिद्धम्। सख्याङ्गामिति घौ त्रिरिति सख्याष्टाङितामिति एतेषु सखिशब्दस्य मुख्यस्यैव ग्रहणम्। गौणस्यापि ग्रहणमिति भाष्यकारः, तन्मते जितसखा, जितसखायौ, जितसख्या इत्यादि, एवमतिशयितः सखा अतिसखा इत्यादि च। किञ्च, पुंलिङ्ग एव ग्रहणं, स्त्रियान्तु नित्यमीबन्तत्वात् (२७४) सखी गौरीवत्, क्लीवे चास्य न प्रयोगः। पाणिनिः १।४।७, ६।२।११२, ७।३।११८।

† सखि-टा = सखि-आ (३५) = सख्या। एवं ङे ङसि ङस् ङि योगे।

‡ अत्रापि पूर्व्वसूत्रवत् क्रमान्वयः, न्यायस्वीकारश्च, तेन पतिना नीयमानायाः इति, नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ इति, सीतायाः पतये नमः इत्यादि च सिद्धं, छान्दसमिति केचित्। पति-टा = पति आ (३५) = पत्या। एवं ङे ङसि ङस् ङि परे। श्रीपति टा (१२३) = श्रीपतिना, श्रियाः पतिः श्रीपतिरिति विग्रहः। शेषं पतिशब्दस्येत्यर्थः। पाणिनिः १।४।८।

§ कतिशब्दः कियत्परिमितवाचकः, अतएव अनिश्चितबहुत्वार्थत्वेन बहुवचनान्त एव भवति।

१३१ । डतिसङ्ख्याष्णो जस्शसो लुक् ।

(डति सङ्ख्या ष्-णः ५, जस्-शसोः ६॥, लुक् ।१।) ।

डत्यन्तात् षान्त नान्त सङ्ख्यायाश्च परयो र्जस्शसो र्लुक् स्यात् ।*
कति कति कतिभिः कतिभ्यः कतिभ्यः कतीनां कतिषु । एवं यति तति ।

डति-व्य-ष्णान्तसङ्ख्यास्मद्-युष्मदः सदृशास्त्रिषु ।†
त्र्यादयः सङ्ख्याशब्दाः ब्वान्ताः । ‡

१३२ । त्रेरयङ् नामि । (त्रेः ६।, अयङ् ।१।, नामि ७।) ।

त्रिशब्दस्य अयङ् स्यात् नामि परे, ङित्वादन्त्यस्य स्थाने । §

---

* ष च न च ष्णु, सङ्ख्या चासौ ष्णचेति सङ्ख्याष्णा, डतिश्च सङ्ख्याष्णा चेति तस्मात् । डतिः प्रत्ययः, तेन डत्यन्ता कति यति-तति इति त्रयः । एषां मुख्यानामेव ग्रहणं, तेन प्रियकतयः अतिषषः अतिपञ्चानः इत्यादौ न लुक् । लुक्करणात् कति इत्यादौ (१२२) सुधीत्यादिना न गुणः, पञ्च इत्यादौ नान्तत्वात् (१६४) न दीर्घः, (९३) लुकि न तच्चेति निषेधात् । पाणिनिः १।१।२४ २५, ७।१।२२ ।

† ष च न च ष्णौ, ष्णौ अन्तौ यस्याः सा ष्णान्ता, ष्णान्ता चासौ सङ्ख्या चेति ष्णान्त-सङ्ख्या, डतिश्च व्यश्च ष्णान्तसङ्ख्या च अस्मच्च युष्मच्च ते । डतिप्रत्ययान्त-अव्यय सङ्ख्या-वाचक षान्तनान्त अस्मद्-युष्मद्-शब्दाः त्रिषु लिङ्गेषु सदृशास्तुल्या एव भवन्ति इति नियमात् एषां लिङ्गविहितविशेषकार्य्यं न भवतीत्यर्थः । एषां मुख्यानामेव ग्रहणं, युष्मद-स्मदोस्तु गौणत्वे मुख्यत्वे च । अस्मद्युष्मत्संख्यास्त्रिषु सरूपाः इति सिद्धान्तकौमुदी ।

‡ आदिशब्दस्य व्यवस्थावाचकत्वात् अष्टादशपर्य्यन्ता एव, ऊनविंशत्यादीनान्तु एक-वचनान्तत्वमेव, 'विंशत्याद्या सदैकत्वे सर्व्वाः सङ्ख्येयसङ्ख्ययो'रित्यमरात् ।

§ त्रिशब्दस्य मुख्यस्यैव ग्रहणं, तेन प्राप्तत्रीणामित्यादौ न स्यात् । परमाश्च ते त्रयश्चेति तेषां परमत्रयाणामित्यादौ मुख्यत्वात् स्यादेव । नाम्ययङ् त्रेरिति तु श्रुति-दुःखावहत्वान्न कृतं ; क्वचिन्न स्यादित्यर्थमिति केचित्, तेन त्रीणामिव समुद्राणामिति सिद्धम् । पाणिनिः ७।१।५३ ।

त्रयाणां त्रिषु । * द्विशब्दो दान्तः । †

१३३ । त्यदां टेरः क्वौ । (त्यदां ६॥, टेः ६।, अः १।, क्वौ ७।) ।

त्यदादीनां टेरकारः स्यात् क्वौ परे । ‡

द्वौ द्वौ, द्वाभ्यां द्वाभ्यां द्वाभ्यां, द्वयोः द्वयोः । §

वातप्रमीः वातप्रम्यौ वातप्रम्यः । ¶

१३४ । यूतोऽम्शसो-र्नावदीधोः ।

(यूतः ५।, अम्-शसोः ६॥, नौ १॥, अदीधोः ५।) ।

दीधुवर्जादीदूदन्तात् परयोरम्शसोः स्थाने क्रमात् मनौ स्तः ।

---

* त्रि-आम् (११०, ११२, १०४, १०७) = त्रयाणाम् । त्रि-सुप् (१११) = त्रिषु ।

† द्विशब्दो सुखेन एव द्विवचनान्तः, तेन प्रियद्विः पुरुष इति । येषां शब्दानामाकृतेरन्यथात्वं न जायते ते एवादौ वक्तव्याः, अतएव इकारान्तशब्दानामुदाहरणे आदौ त्रिशब्दमुक्त्वा पश्चात् द्विशब्दः कथितः ।

‡ अनुकरणशब्दस्य स्विसंज्ञाभावेन टेरत्वाभावे त्यदामिति पदं सिद्धम् । बहुवचनं गणार्थम् । स्विसंज्ञानामेव त्यदादीनां टेरकारः स्यात्, तेन अतितद् अतितदौ अतितदः, अतितन्दि कुलानि, इत्यादौ गौणे न स्यात् ; युष्मदस्मदोस्तु गौणेऽपि, एवं द्वियुष्मदस्मदां न तसीति वक्तव्यम् ; तेन अतियुष्मान् अत्यस्मान् अतित्वान् अतिमान् इत्यादि ; तसि तु द्वितः युष्मत्तः अस्मत्तः त्वत्तः मत्तः अतियुष्मत्तः इत्यादि । लिङ्गात् विभक्तेरावश्यकत्वेऽपि क्रियहणं साक्षात् क्वौ परे एव ज्ञेयं, तेन सः एषः इत्यादौ इसादुत्तरे आदौ न सेर्लोपः । त्यदां डङ् क्वौ इति यन्न कृतं तत् प्रक्रियालाघवार्थमेवेति । पाणिनिः ७।२।१०२ ।

§ द्वि-औ = द-औ (२३) = द्वौ । द्वि-भ्याम् (१०८) = द्वाभ्याम् । द्वि-ओस् (१०६) = द्वयोः । इति इदन्ताः ।

¶ वातं प्रमिमीते प्रमाति वेति वातप्रमीः औणादिकः ई(कित्)प्रत्ययः । मृगविशेष इत्यर्थः । वातप्रमी-औ (३५) = वातप्रम्यौ । जस् (३५) = वातप्रम्यः । सम्बुद्धौ हे वातप्रमीः । क्विबन्तवातप्रमीशब्दस्य तु अमि शसि ङौ च विशेषः—वातप्रम्यम्, वातप्रम्यः, वातप्रम्यि ।

वातप्रमीं वातप्रम्यौ वातप्रमीन्, वातप्रम्या वातप्रमीभ्या-मित्यादि। एवम् अतिलक्ष्म्यादयः।*

सुधीः।†

१३५। धोरियुवचि। (धोः ६।, इय्-उव् ।१।, अचि ७।)।

धोरीदूतोः स्थाने क्रमादियुवौ स्तोऽचि परे।‡ सुधियौ सुधियः इत्यादि। एवं सुश्रीयवक्र्यादयः।§ प्रधीः।¶

१३६। क्व्याद्यनेकाचोऽस्यादहनपुनर्वर्षा-काराद्यन्यभूसुधियोर्यृवौ।

(क्व्याद्यनेकाचः ६।, अस्यात् ५।, अदृन्—सुधियोः ६॥, यवौ १॥)।

क्वादेर्व्यादेरनेकाचश्च धोरीदूतोरस्यात् परयोः क्रमात् यवौ

---

* नदीसंज्ञक-धातु-भिन्नात् ईदूदन्तात् शब्दात् परस्य अम्स्थाने म शस्स्थाने न स्यात्। वातप्रमी-अम्=वातप्रमीम्। वातप्रमी-औ (३५)=वातप्रम्यौ इत्यादि। अतिलक्ष्म्यादयः इति आदिपदेन अतितन्त्री बहुप्रेयसी अतिवधू अतिचमू इह प्रभृतयः। पाणिनिः ६।१।१०७।१०२।

† सु शोभना धीर्यस्येति सुधीः। ध्यैधातोः क्विपप्रत्यये धीः (१०३७)।

‡ विभक्तिं विपरिणमय्य ईदूतोरनुवृत्तिः। धात्ववयवीभूतयोः ईदूतोः स्थाने क्रमात् इयुवौ स्तः अचि परे। प्रायेण विच्क्विप्प्रत्ययान्तशब्दानामेव ईदूतोर्धात्ववयवत्वं सम्भवति, तथाच—"विच्क्विबन्ता हि धातुत्वं न त्यजन्ति कदाचन। क्वचित् त्यजन्ति धातुत्वं सुधीनीति-प्रदर्शनादिति॥" अचीति स्यादेरेव, क्वचित् तद्धितस्यापि, तेन धाः स्वायम्भुवं ययुरिति सिद्धम्। विशेषविधित्वात् (२२) सह यौ घं इत्यस्यापि बाधकोऽयं तेन ङौ सुधियि इत्येव। पाणिनिः ६।४।७७।

§ सुधी-औ=सुधियौ इत्यादि। श्रयत्येनां श्रीः (१०३५), सुष्ठु श्रीर्यस्य सः सुश्रीः यवेन क्रीणातीति यवक्रीः। आदिशब्दात् शुद्धधी नी सुभू कटप्रू स्वयम्भू प्रभृतयः।

¶ प्रकृष्टा धीर्यस्य सः प्रधीः।

स्तः अचि परे, न तु दृन्भू-पुनर्भू-वर्षाभू-काराभूभ्योऽन्यस्य भू-शब्दस्य सुधियश्च । *

प्रध्यौ प्रध्यः इत्यादि । एवं दीध्यादयः । †

कव्याद्यनेकाचः किं, शुद्धधियौ । असात् किं, यवक्रियौ । नीः नियौ । ‡

---

* कश्च व्यश्च कव्ये, ते आदी यस्य स कव्यादिः, स च अनेकाच्च कव्याद्यनेकाच् तस्य । दृन् च पुनर् च वर्षाश्च कारा च ता आदयो येषां ते दृन्पुनर्वर्षाकारादयः, तेभ्योऽन्यः दृन्पुनर्वर्षाकाराद्यन्यः, स चासौ भूश्चेति दृन्पुनर्वर्षाकाराद्यन्यभूः, स च सुधीश्च तौ दृन्पुनर्वर्षाकाराद्यन्यभूसुधियौ, न तौ अदृन्पुनर्वर्षाकाराद्यन्यभूसुधियौ तयोः ।

यवौ इति द्विवचनान्तेन क्रमनिर्वाहार्थं पूर्वतः यूतोरिति द्विवचनान्तं भूत्वा अनुवर्त्तते । ततश्च—कारकादेरव्ययादेरनेकाचश्च धातोरीदूतौ यद्यसंयोगात् परौ भवतस्तदा तयोः क्रमात् यवौ स्तातामचि परे, दृन्भ्वादिभिन्नभूशब्दस्य सुधियश्च न स्तादित्यर्थः । इयुवोर्निषेधे (३५) यत्नाययवायेत्यनेन सिद्धावपि यवविधानं (२२) दीर्घबाधनार्थं, तेन ऊौ प्रध्यि । अत्र दृन्पुनर्वर्षाकारादि-भूशब्दस्य व-विधाने तद्भिन्नभूवर्जनस्य कष्टगम्यतया स्पष्टार्थमेव तद्भिन्नभूवर्जनं कृतम् । अचापि अचीति स्यादेरेव, तेन प्रधीश्वर इत्यादौ न प्रसङ्गः । दृन् इति हिंसार्थमव्ययं तस्मै भवतीति दृन्भूः पन्नगवज्रयोः, पुनर्भूः स्यात् द्विरूढायां, पुनर्नवायां वर्षाभूः स्त्रियां किञ्चलुके भवे, काराभूर्निगड़स्थाने इति कोषः ।

अत्र चायं विशेषः—स्याद्युत्पत्तेः पूर्वं कारकाव्ययाभ्यां कृतसमासस्यैव धातोरीदूतोर्यवौ स्तः न तु स्याद्यन्तस्य समासे, तेन भयम् भीरिति क्विपि, ईषत् भीर्येषां ते ईषद्भियः, दुःस्थिता धीर्येषामिति दुर्धियः इत्यादि । तथाच वृश्चिकभिया पलायमानस्य आशीविषमुखे विनिपात इति भाष्यम् । अत्र वृश्चिकस्य भीरिति (वृश्चिकसम्बन्धिनी भीः) कारकादित्वाभावादिति केचित् । परन्तु सुष्ठु धीः प्रकृष्टा धीरिति नित्यस्त्रीत्वे सुधीप्रध्यौ गौलक्ष्मीवदिति (१५८) कथनात् स्वमते नेयं व्यवस्था । पाणिनिः ६।४।८२-८५ । गतिकारकपूर्वस्यैवेष्यते यणादेशः इति वार्त्तिकम् ।

† दीधीङ् चलु देवने दीधी इति धातोः क्विपि दीधीरिति अनेकाच्, आदिपदात् अग्रणी सुती लूनी सुखी प्रभृतयः ।

‡ शुद्धा धीर्यस्य सः शुद्धधीः । शुद्धधी-औ (१३५)=शुद्धधियौ । एवं यवक्रियौ, नियौ ।

१३७। न्यापदीभ्यो ङेराम्।

(नी-आप्-दीभ्य: ५॥, ङे: ६।, आम् ।१।) ।

नीशब्दादापो याश्च परस्य ङे-राम् स्यात्। नियाम्। शेषं सुधीवत्। अग्रणी: अग्रण्यौ। ङौ—अग्रण्याम्। शेषं प्रधीवत्। *

१३८। त-तज-खादीयों ङसोर्वोः।

(त-तज-खात् ५।, ईय. ५।, ङ: १।, वा ।१।, उ: १।) ।

तात् तस्थानजाद्वर्णात् खाच्च परादीकारजात् यकारात् परो ङसिङसो र्ङ उ: स्याद्वा। सुत्यु: सुत्य:। लून्यु: लून्य:। सुख्यु: सुख्य:। †

शम्भु र्हरिवत् साध्य:। ‡

शम्भु: शम्भू शम्भव:, शम्भुं शम्भू शम्भून्, शम्भुना शम्भुभ्यां शम्भुभि:, शम्भवे शम्भुभ्यां शम्भुभ्य:, शम्भो: शम्भुभ्यां शम्भुभ्य:, शम्भो: शम्भ्वो:

---

* अत्र केवलनीशब्दस्य तदन्तशब्दस्य च ग्रहणं, तेन नियाम् अग्रण्यां ग्रामण्यामित्यादि। क्लीबे तु अन्तरङ्गत्वादादौ ह्रस्वे गुणि अतिनिनि कुले, पुंवद्भावपक्षे अतिनियामिति। नी ङि = नी-आम् (१३५) = नियाम। अग्रे नयतीति क्विपि अग्रणी: नायक:। अग्रणी-औ, कारकादित्वात् (१२६) = अग्रण्यौ इत्यादि। पाणिनि: ७।३।११६।

† तकारस्य स्थाने जात: तज:, तश्च तजश्च खश्च ततजखं तस्मात्, ईकारस्य स्थाने य: ईयस्तस्मात्। एतेन तकार तकारजातवर्ण-खकारेभ्य: परस्थितात् कव्याद्यनेकाच इत्यनेन जातयकारात् ङसिङसोरकार उ: स्याद्वा इत्यर्थ:। सुतमिच्छति सुतमिवाचरति वा इत्यादि वाक्ये सुतीयतीति सुतीयधातो: क्विपि (७७५,६४२) सुती शब्द:। एवं लूनमिच्छतीति लूनी, सुखमिच्छतीति सुखीरित्यादि। सुती-ङसि (१२६,१३८) = सुत्यु, वा सुत्य:। एवं लून्यु लून्य:, सुख्यु: सुख्य इत्यादि। पाणिनि: ६।१।११२। इति ईदन्ता।

‡ हरिशब्दे इकारस्य कार्य्यम् अत्र तु उकारस्येति विशेष:, साधनसूत्राणि तुल्यानीति।

शम्भूनां, शम्भौ शम्भ्वोः शम्भुषु। हे शम्भो। एवं विष्णु-वायु-भान्वादयः।

१३९। क्रोष्टोस्तुनस्तृन्नधौ घौ स्त्रियाञ्च।

(क्रोष्टोः ६।, तुनः ६।, तृन् ।१।, अधौ ७।, घौ ७।, स्त्रियां ७।, च ।१।)।

क्रोष्टुशब्दस्य तुनः स्थाने तृन् स्यात् अधौ घौ परे स्त्रियाञ्च। न इत्। *

(१२७) सख्युङ्गामिति। क्रोष्टा, हे क्रोष्टो।

(१२८) घौ त्रिरिति, क्रोष्टारौ क्रोष्टारः क्रोष्टारं क्रोष्टारौ क्रोष्टून्। †

१४०। वाच्यघौ। (वा ।१।, अचि ७।, अघौ ७।)।

क्रोष्टोस्तुनस्तृन् वा स्यात् अघावचि परे। क्रोष्ट्रा। ‡

---

* क्रोशतीति क्रुशधातोरौणादिक-तुन्प्रत्यये क्रोष्टु इति लिङ्गं (शृगालवाचकं), तस्य तुनः स्थाने तृन् आदेशः स्यात्। तृन् इत्यस्य नकारः (१४३) घावसम्तृणोरिति गुणनिषेधकतया सार्थकः, न तु नित्त्वादन्ते, तथा सति तुनो ग्रहणं निरर्थकं स्यात्। गौणस्यापि ग्रहणं तेन बहुक्रोष्टा देशः। स्त्रियाञ्चेति स्त्रीलिङ्गवर्त्तित्वे सति निमित्तान्तरस्य नापेक्षा, तेन क्रोष्ट्री बहुक्रोष्ट्री इत्यत्र तृणि (२५७) ऋदन्तत्वादीप्। स्त्रियां नित्यमिति क्रमदीश्वरः। क्लीवे तु आगमविधेर्बलवत्त्वादादौ नुणि बहुक्रोष्टूनि वनानि इत्यादि। पाणिनिः ७।१।९५।

† क्रोष्टु-सि = क्रोष्टृ डा (१२६) = क्रोष्टा। हे क्रोष्टु-सि (घि) (१०३,१२२) = क्रोष्टो। क्रोष्टु शस् (१०४,१०५) = क्रोष्टून्।

‡ पूर्व्वसूत्रे घिग्रहणादेव अत्र घिभिन्नप्राप्तौ पुनर्घिग्रहणं कदाचिदपि यस्य घित्वं सम्भवति तन्निषेधार्थम्, अतएव शस्विभक्तौ न तृन्, यतः क्लीवे शौ (१६२) कृते शसो (८२) घित्वसम्भवात्। टाद्यचीति पाणिनिक्रमदीश्वरप्रभृतयः। अत्र अचीति स्यादेरेव, तेन क्रौष्टुरिदं (ण-प्रत्यये) क्रौष्टवमिति। क्रोष्टु-टा = क्रोष्टृ-आ (३५) = क्रोष्ट्रा। पाणिनिः ७।१।९७।

१४१ । ऋतो ङो ङुः । (ऋतः ५।, ङः १।, ङुः १।) ।

ऋकारात् परो ङसिङसो ङौं ङुः स्यात्, ङ इत् ।
क्रोष्टुः क्रोष्टुः क्रोष्टोः क्रोष्टूनाम् । *

१४२ । णुङिध्योः । (णः १।, ङि-ध्यौः ७॥) ।

ऋकारस्य णुः स्यात् ङौ धौ च परे । क्रोष्टरि † क्रोष्टोः ।
पक्षे हसे च शम्भुवत् । ‡

हूहूः हूह्वौ हूह्वः इत्यादि, वातप्रमीवत् । एवमतिचम्वादयः ।
सुभ्रूः सुभ्रुवौ सुभ्रुवः इत्यादि, सुधीवत् । एवं कटप्रूस्वयम्भ्वादयः ।
सुलूः सुल्वौ सुल्वः इत्यादि, प्रधीवत् । एवं हूनभूखलप्वादयः । §
धाता, त्वन्तक्रोष्टुवत् । धौ हे धातः । एवं नप्तृहोतृपोतृ-
दयः । ¶ पिता, हे पितः ।

---

* क्रोष्टु-ङसि = क्रोष्टृ-उस् (१२६, १०२) = क्रोष्टुः, एवं ङस् परे । क्रोष्टु-ओस् (१४०, ३५, १०२) = क्रोष्ट्रोः । क्रोष्टु-आम् (११०, १०४) = क्रोष्टूनाम् । आगमादेशयो-र्मध्ये बलीयानागमो विधिरिति न्यायादादौ नुमागमे अच्परत्वाभावात् न तृन् । पाणिनिः ६।१।१११ ।

† क्रोष्टु-ङि (१४०, १४२) = क्रोष्टरि । पाणिनिः ७।३।११० ।

‡ पक्षे तृणोऽभावपक्षे, हसे भिसादौ परे शम्भुशब्दवत् । इति उदन्ताः ।

§ हूहूशब्दस्य अमि शसि च (१३४) यूत इत्यनेन हूहूं हूहून् । सुभ्रू औ (१३५) = सुभ्रुवौ इत्यादि । सुलू-औ (१३६) = सुल्वौ इत्यादि । हाहा हूहूश्चैवमाद्या गन्धर्वा-स्त्रिदशौकसामिति, खलपूः स्याद्बहुकर. (खलं चत्वरं पुनाति मार्जयति) इति चामरः । कटप्रूः पुंसि राक्षसे, विद्याधरे महादेवे तथा स्यादक्षदेवने इति मेदिनी । इति ऊदन्ताः ।

¶ धातृ-सि (१२७, १२६) = धाता । निरवकाशत्वादादौ सेर्डा टिलोपश्च, अतएव (१४३) गुणस्याप्रसङ्गः । धौ हे धातृ-सि (१०३, १४२, १०२) = धातः । धातृशब्द-साम्यात् नप्त्रादयः (६६०) तृनन्ता एव, तथाच—नप्ता च होता गदितोऽथ पोता, वक्ताथ

पिता माता ननान्दा ना सव्येष्टृभ्रातृयातरः।
जामाता दुहिता देवा न त्वनन्ता इमे दश॥ *

१४३। घावस्वस्रादीनाम्। (घौ ७, अ स्वसृत्रणोः ६॥)।

घौ परे ऋकारस्य णः स्यात् नतु स्वसृत्रणोः। † पितरौ पितरः, पितरं पितरौ। शेषं धातृवत्। एवं जामातृभ्रात्रादयः।

१४४। नुर्वा नामि घः।

(नुः ६।, वा।१।, नामि ७, घः १।)।

नृशब्दस्य नामि परतो घः स्यात् वा। नृणां नृणाम्। ‡ शेषं पितृवत्। §

नेष्टा तदनु प्रशास्ता। शास्ताथ शंस्ता च त्वनन्ततुल्याः, अष्टेति शब्दाः खलु वृद्धिभाजः॥ एते अष्टशब्दाः पौत्रादिषु रूढाः, नम हु पू चद निश् प्र-शास शास शंस, एतेभ्यो धातुभ्यः तृन्प्रत्ययेन सूत्रतो निपातनाच्च सिद्धाः। एवं यावतीयत्वनन्ताः धातृशब्दवत् ज्ञेयाः। पाणिनिः ६।४।११।

* मातृशब्दो जननीवाचकः, परिमाणवाचकत्वे त्वनन्त एव, तेन धान्यस्य मातारौ पुरुषौ। सव्येष्टृशब्दः रथवामपार्श्वस्थितवीरे रूढः टवर्गद्वितीयवान्। यातृशब्दः स्वामिभ्रातृस्त्रीवाचकः, अन्यत्र तृनन्तः, तेन तीर्थस्य यातारौ पुरुषौ। ननान्दृ सव्येष्टृ देवृशब्दाः न तृनन्तवत् प्रतीयमानाः किन्तु तृनन्तत्वेन निपातनात् सिद्धाः। अत एते दश शब्दा वस्तुतः तृनन्ता अपि न तृनन्ताः, तृनन्तकार्य्यं (१२८) घौ त्रिरित्यनेन वृद्धिं न भजन्ते इत्यर्थः, (१४३) घावस्वस्र इत्यनेन गुणं लभन्ते इति यावत्।

† पाणिनिः ७।३।११०।

‡ नामीति मुख्यगौणसाधारणार्थं, तेन अतिनॄणाम् अतिनृणामिति। नृ आम्—(११०,१०७) नॄणां, वा नृणाम्। पाणिनिः ६।४।६। इति ऋदन्ताः।

§ ॠदन्तस्य, लृदन्तस्य, लॄदन्तस्य, एदन्तस्य च रूपं वोपदेवेन विरलप्रचारत्वात् न प्रदर्शितम्। सिद्धान्तकौमुद्यान्तु कॄ गमॢ से इति शब्दत्रयस्य रूपं लिखितम्।

१४५। ओरौ घौ। (ओः ६।, औ ।१।, घौ ७।)।

ओकारस्य औकारः स्यात् घौ परे। गौः गावौ गावः। *

१४६। आ अम्शसोः। (आ ।१।, अम्-शसोः ७।)।

ओकारस्य आकारः स्यात् अमि असि च परे। †
गां गावौ गाः, गवा गोभ्याम् इत्यादि।
(१२४) ङस्येङो लोप इति, गोः गोः। ‡

१४७। रै रा स्भि। (रै ।१।, रा ।१।, स्भि ७।)।

रैशब्दो रा स्यात् से भे च परे। §
राः रायौ रायः, राभ्यामित्यादि। ¶
ग्लौः ग्लावौ ग्लावः इत्यादि। ||

इति अजन्त पुंलिङ्ग पादः।

---

* पाणिनि: ७।१।९०।

† अत्र आ इत्र, ओकारस्य आ स्यात् द्वितीयाया अकारे परे इति यन्न कृतं तत् स्पष्टार्थम्। पाणिनि: ६।१।९३।

‡ इति ओदन्ताः।

§ गौणत्वेऽपि, तेन क्लीवेऽपि सुराभ्यां सुरासु इति। (१६७) क्लीवे ह्रस्वः इति ह्रस्वेऽपि एकदेशविकृतमनन्यवत् भवतीति न्यायात् रा आदेशः। पाणिनि: ७।२।८५।

¶ इति ऐदन्ताः।

|| इति औदन्ताः।

१४८ । आबीब्ङसात् सेर्लोपः ।

(आप्-ईप्-ङसात् ५।, सेः ६।, लोपः १।) ।

आप ईपो ङसाच्च परस्य सेर्लोपः स्यात् । उमा । *

१४९ । यौराप: । (ई ।१।, औः १।, आपः ५।) ।

आपः पर औरी स्यात् । उमे उमाः । †

१५० । धिटौस्से: । (धि टा ओसि ७।, एः १।) ।

आप एः स्यात् धौ टौसोश्च परतः । हे उमे ।
उमाम् उमे उमाः, उमया उमाभ्याम् उमाभिः । ‡

१५१ । ङितां यम् । (ङितां ६।।।, यम् ।१।) ।

आपः परेषां ङितां यम् स्यात्, म इत् । उमायै उमाभ्याम्
उमाभ्यः, उमायाः उमाभ्याम् उमाभ्यः, उमायाः उमयोः उमा-

---

* आप् च ईप् च ङस् च तस्मात्, सूत्रत्वाददन्तत्वम् । (१९३) स्यान्तस्योरादित्यनेन ङसात् सेर्लोपे सिद्धे अत्र ङसो ग्रहणं सिलोपानन्तरं तत्पूर्व्वकार्य्यनिर्व्वाहार्थं, स्यान्त-स्यारादित्यनेन लुपि तु (१५) लुपि न सन्धीत्यनेन पूर्व्वकार्य्यनिषेधापत्तिः स्यादिति । उ शिवं मीयते जानातीति माङ् ञि शब्दे इति मा-धातोर्डप्रत्यये (९९७) उम इति शब्दात् स्त्रियाम् आपि उमा इति रूपम् । पाणिनिः ६।१।६८ ।

† औस्थाने दीर्घ-ईकारकरणं नरसी इति सिद्ध्यर्थम् । आपो ग्रहणात् ईप्-ङसी-र्निवृत्तिः । उमा-औ = उमा-ई (२३) = उमे । उमा-जस् (२२) = उमाः । पाणिनिः ७।१।१८ ।

‡ विभक्तिविपरिणामेन आप इति षष्ठ्यन्तमनुवर्त्तते । धौ टौसोश्च त्र्युभयोः विशेषणाय हसौ परत्र इति पदं (५११) तसन्तत्वेनोक्तम् । हे उमा-सि (धि) (१४८,१५०)

नाम्। (१३७) न्यापदीभ्यो ङेरामिति। उमायाम्, उमयोः उमासु। एवं दुर्गामायाम्बिकादयः। *

१५२। स्वेः स्यम् स्वश्च। (स्वेः ५।, स्यम् ।१।, स्वः १।, च ।१।)।

स्वेराबन्तात् परेषां ङितां स्यम् स्यात्, पूर्व्वस्य च स्वः। †

सर्व्वस्यै सर्व्वस्याः सर्व्वस्याः सर्व्वस्याम्। आमि—सर्व्वासाम्। शेषम् उमावत्। एवं विश्वादय आबन्ताः। ‡

अपुरीत्युक्तेः—अन्तरायै नगर्य्यै। §

द्वितीयस्यै द्वितीयायै, द्वितीयस्याः द्वितीयायाः, द्वितीयस्यां द्वितीयायाम्। शेषमुमावत्। एवं तृतीया। ¶

=उमे। उमा-अम् (२२)=उमाम्। उमा-औ (१४८,२१)=उमे। उमा-अस् (२२)=उमाः। उमा-टा (१५०,२५)=उमया। पाणिनिः ७।३।१०५-१०६।

* आप इति पञ्चम्यन्तमनुवर्त्तनम्। आबन्तशब्दात् परेषां ङे-ङसि-ङस्-ङि एषां स्थाने यम् स्यात्, मित्वादादौ। य इति अकारान्तः। ङिति य इति करणे (१०६) टाभिसित्यादिना अयाद्यादेशापत्तिः स्यादिति। उमा-ङे=उमा-य-ए (२३)=उमायै। एवं ङसिङसोः उमा-य-अस् (२२)=उमायाः। उमा-ओस् (१५०,२५)=उमयोः। उमा-आम् (११०)=उमानाम्। उमा-ङि (१३७, १५१, २२)=उमायाम्। विशेषविधिवहिर्भूताः दुर्गा माया अम्बिकादयः सर्व्वे आबन्तशब्दा एवमित्यर्थः। पाणिनिः ७।३।११३।

† आबन्तसर्व्वनामशब्दात् परेषां ङितां स्थाने स्यम् स्यात्, मित्वादादौ, स्यमः पूर्व्वस्थितस्य दीर्घस्य ह्रस्वश्च। यद्यपि ङस्यम् इति कृते स्वश्चेति न वक्तव्यं स्यात्, तथापि अस्यै इत्यादि साधने सकारपरत्वाभावे (२०६) मभ्य इत्यस्याप्रवृत्तिः स्यात्। पाणिनिः ७।३।११४।

‡ सर्व्वा-ङे=सर्व्व-स्य-ए (२३)=सर्व्वस्यै। सर्व्वा-ङसि (२२)=सर्व्वस्याः, एवं ङस् परे। सर्व्वा-ङि (१३७) सर्व्व-स्य-आम् (२२)=सर्व्वस्याम्। सर्व्वा-आम (११३)=सर्व्वासाम्। एवं विश्वा, आदिपदेन यावतीयाबन्ताः सर्व्वनामशब्दाश्च एवं ज्ञेयाः।

§ (८६) समोऽतुल्ये इत्यत्र पुरभिन्ने वहिर्योगे अर्थे अन्तरशब्दस्य स्विसंज्ञाविधानात्—अन्तरायै (वहिः स्थितायै नगर्य्यै पर्य्यै इत्यर्थः) इत्यत्र न स्विसंज्ञा, अतएव उमाशब्दवत्।

¶ द्वितीया-ङे (९०) वा स्विसंज्ञायां—द्वितीयस्यै द्वितीयायै इत्यादि। पाणिनि ७।३।११५।

१५३। सुभ्रू दी द्व्यजम्बार्थानां धौ स्वः।

(सुभ्रू दी द्वि अच् अम्बार्थानां ६।।।, धौ ७।, स्वः १।)।

सुभ्रुवो दा द्व्यजम्बार्थानाञ्च स्वः स्यात् धौ परे। हे अम्ब। शेषमुमावत्। एवमक्काल्लादयः।

द्व्यचः किं, हे अम्बाले, हे अम्बिके।*

जरा। (११५) जरस् जराचि तु। जरसौ। केचिदादा-वीत्वमिच्छन्ति। जरसी जरे।† जरसः जराः इत्यादि।

(११६) पाद्दन्तेति, नासिका-पृतना-निशानां नस्-पृत्-निशः। नसः नसा नोभ्यामित्यादि। पृतः पृता पृद्भ्यामित्यादि। निशः निशा।

१५४। श छ्राज भ्राज यज व्रज सृज मृज व्रश्च भ्रस्जां षङ् भौ।

(श—भ्रस्जां ६।।।, षङ् ।१।, भौ ७।)।

शान्तानां छान्तानां राजादेश्च षङ् स्यात् भौ परे।‡

---

* द्वौ अचौ येषां ते द्व्यचः, अम्बा जननी अर्थो येषां ते अम्बार्थाः, द्व्यचश्च ते अम्बार्थाश्चेति द्व्यजम्बार्थाः, सुभ्रूश्च दी च द्व्यजम्बार्थाश्च ते तेषाम्। आदित्वाद्द्व्यर्थ्यात् सुभ्रू-शब्दः स्त्रीलिङ्ग एव, पुंसि तु हे सुभ्रूर्देवदत्त इति क्रमदीश्वरः। क्लीबे तु (१६७, १२१) हे सुभ्रो सुख इति। सुभ्रूशब्दस्य नदीसंज्ञकशब्दस्य द्विस्वरयुक्तमातृवाचकशब्दस्य च धौ परे स्वः स्यात्। मातृवाचकस्तु मुख्यएव ग्राह्यः, तेन हे गौरि, हे अम्बे इत्यादि। एवम् अक्का, अल्ला, आदिशब्दात् अत्ता अप्पा प्रभृतयः। हे अम्बाला सि (धि) (१४८, १५०)—अम्बाले इत्यादि। पाणिनिः ७।३ १०७। हे सुभ्रूः इति सिद्धान्तकौमुदी कातन्त्राश्च। हे सुभ्रु इति सौपद्मा जौमराश्च।

† जरा-औ (१४६, ११५)=जरसौ, वा जरा औ (१४९,२३)=जरे।

‡ शश्च छ च राज च इत्यादि द्वन्द्वे तेषाम्। एषां दशानां षङ् स्यात् भौ (८४) परे—लिङ्गप्रकरणे हस्विरामयोः, धातुप्रकरणे झस्विरामयोरित्यर्थः। पाणिनिः ८।२।३६।

१५५ । षो डः फे । (षः ६।, डः १।, फे ७।) ।

षस्य डः स्यात् फे परे । निड्भ्याम् इत्यादि । पक्षे घौ च उमावत् । *

गोपा, विश्वपावत् । †

मतिर्हरिवत्, स्त्रीत्वात् न शस् न, न टा ना । मतीः मत्या । ‡

१५६ । य्या ङितामम् । (य्याः ५।, ङितां ६।।, अम् ।१।) ।

य्याः परेषां ङिताम् अम् स्यात्, न इत् । मत्यै मतये, मत्याः मतेः, मत्याम् मतौ । एवं श्रुति-स्मृति-बुद्ध्यादयः । §

१५७ । स्त्रियां त्रिचतुरोस्तिसृचतसृ ऋवत् क्तौ । (स्त्रियां ७।, त्रिचतुरोः ६।।, तिसृ-चतसृ ।१।, ऋवत् ।१।, क्तौ ७।) ।

---

* फे इति (८५) स्यादीय-इसे विरामे च बोध्यम् । (६४) झपभसोरित्यनेन षस्थाने साम्यात् ड भवत्यपि, निशाशब्द-सुपि निट्सु इत्याद्यर्थमेतत्सूत्रकरणम् । निशा-भ्याम (११६)=निश्-भ्याम् (१५५)=निड्भ्याम् । निश् आदेशस्य विकल्पपक्षे, घौ परे च निशाशब्दः उमाशब्दवत् । पाणिनिः ८।४।५३।

† गां पृथिवीं पातीति क्विपि (१०३२) गोपाशब्दः विश्वपाशब्दवत् । इत्यादन्ताः ।

‡ मतिर्बुद्धिः, हरिशब्दवत्, किन्तु स्त्रीलिङ्गस्य विशेषविधिनिषेधौ भवत एव । (१०५, ११३) एतत् सूत्रकार्यद्वयं [शस्स्थाने न, टास्थाने ना च] न स्यादित्यर्थः । मति-शस् (१०३, १०४)=मतीः । मति-टा (३५)=मत्या ।

§ ङितां स्थाने विधानात् अम् विभक्तिसम्बन्धित्वम्, अतएव स्त्रियै इत्यादौ स्यादीयापि परे (१३५) धोरियुवचीति इयादेशः । मति-ङे=(९९, नदीसंज्ञायां) मति-अम्-ए (३५, २२)=मत्यै । नदीसंज्ञाया विकल्पे मति-ए (१२२, ३५)=मतये । मति-ङसि (वा ङस्)=मति-अ-अस् (३५,२२,१०२)=मत्याः, वा नदीसंज्ञायां (१२१,१२४,१०२)=मतेः । मति-ङि (१३७, ३५)=मत्याम्, वा नदीसंज्ञायां (१२५, १२६)=मतौ । यावतीर्यात्तिप्रत्ययान्ताः (११४७) अन्ये च इकारान्तस्त्रीलिङ्गशब्दाः एवं ज्ञेयाः । पाणिनिः ७।३।११२, १।४।६।

त्रिचतुरोः स्त्रीलिङ्गे क्रमात् तिसृचतसृौ स्तः ङौ परे । तौ च ऋवत्, तेन न णुत्रिर्घाः । तिस्रः तिस्रः तिसृभिः तिसृभ्यः तिसृभ्यः तिसृणां तिसृषु । *

टेरत्वे सत्याप् । द्वे द्वे द्वाभ्यां द्वाभ्यां द्वाभ्यां द्वयोः द्वयोः । †

गौरी गौर्य्यौ गौर्य्यः, हे गौरि, गौरीं गौर्य्यौ गौरीः, गौर्य्या गौरीभ्यां गौरीभिः ।

(१५६) याङितामम् । गौर्य्यै गौरीभ्यां गौरीभ्यः, गौर्य्याः

---

* तिसृचतसृ इति समाहारः । स्त्रीलिङ्गे वर्त्तिनः त्रिशब्दस्य तिसृ स्यात्, चतुर्-शब्दस्य चतसृ स्यात् ङौ परे । तौ आदेशौ दीर्घऋदन्ततुल्यौ, दीर्घतुल्यकथनात् ह्रस्व-स्थाने जायमानाः णुत्रिर्घाः [(१४३) घावस्सृतृणोरिति गुणः, (१२८) घौ त्रिरिति वृद्धिः, (१०४) शस्नामि र्घ इति दीर्घः] न स्युः, अन्यत्तु स्यादेव, तेन तिसृणामिति ह्रस्वात् नुम् । (१०३) शसोऽकारलोपाभावस्तु—णुश्च त्रिश्च र्घश्च अश्च इति विग्रहे णुत्रिर्घाः इत्यनेन अकारकार्य्यस्यापि निषेधात् ज्ञेय इति ।

अत्र प्रकरणबलात् स्त्रियां प्राप्तौ स्त्रियामिति ग्रहणं, यत्र त्रिचतुरोर्न स्त्रियां वृत्तिः ततः कृतसमासे स्त्रियां वृत्तावपि तत्र न तिसृचतसृौ भवतः इत्यभिप्रायार्थं, तेन प्रियास्त्रयो यस्याः सा प्रियत्रिरिति मतिवत् । प्राक् स्त्रियां वृत्तौ पश्चात् कृतसमासे सर्व्वलिङ्ग-वर्त्तिनोरपि तयोः तिसृचतसृौ भवत एव, तेन प्रियास्तिस्रो यस्य सः (१२७) प्रियतिसा, तथा क्लीवेऽपि प्रियतिसृ कुलमित्यादि, सिद्धान्तकौमुद्यान्तु प्रियत्रि प्रियतिसृ इति पद-द्वयं लिखितम् । प्रियत्रीणामिति कातन्त्रम् सौपद्माश्च, प्रियत्रयाणामिति तु क्रमदीश्वरः । "आमि प्रियत्रयाणामिति विशेषः" इति भट्टोजिदीक्षितः । विभक्तिलुकि तु न आदेशः, तेन तिसृभिः कृतं त्रिकृतम् । किन्तु घावस्सृ इति सूत्रविहितभिन्नो गुणः स्यादेव, तेन हे प्रियतिसर्देवदत्त, (१४२) प्रियतिसरि देवदत्ते इति । नान्तत्वात् प्राप्तदीर्घोऽपि (१६४) न निवार्य्यः, तेन प्रियतिसृणि कुलानि । ङसिङसोः प्रियतिसः इत्यत्र अकारकार्य्यत्वात् (१४१) डुरपि न स्यादिति । तिस्र इत्यादौ, दन्त्यादेशकरणात् न षत्वम् । पाणिनिः ७।२।९९,१०० । ६।४।४ ।

† (१२१) त्यदां टेरः ङौ इति टेरकारे द्व इति अकारान्तात् (१४९) स्त्रियामत इति आप् भवति, ततः द्वा इति शब्दस्य उमाशब्दवत् रूपम् । द्वा-औ (१४९,२१)—द्वे । द्वा-ओस् (१५०, ३५)=द्वयोः । इति इदन्ताः ।

गौरीभ्यां गौरीभ्यः, गौर्य्याः गौर्य्याः गौरीणां, गौर्य्यां गौर्य्योः गौरीषु । एवं वाणी-काली-नद्यादयः । *

लक्ष्मीः । अनीबन्तत्वात् न सिलोपः । शेषं गौरीवत् । एवं अवी-तन्त्र्यादयः । † स्त्री, हे स्त्रि । ‡

१५८ । स्त्री भ्रूर्धुः । (स्त्री ।१।, भूः ।१।, धुः ।१।) ।

स्त्रीशब्दो भ्रूशब्दश्च धुसंज्ञः स्यात् । §
(१२५) धात्रियुवचि । स्त्रियौ स्त्रियः ।

१५९ । स्त्री वामश्सोः । (स्त्री ।१।, वा ।१।, अम् शसोः ७॥) ।

स्त्रीशब्दो धुसंज्ञो वा स्यात् अमि शसि च परे । ¶
स्त्रियं स्त्रीं स्त्रियौ स्त्रियः स्त्रीः, स्त्रिया स्त्रीभ्यां स्त्रीभिः, स्त्रियै

---

* गौरी-सि(१४८)=गौरी । गौरी-औ(९५)=गौर्य्यौ इत्यादि । हे गौरी-सि (धि) (९६) यूत् स्त्र्येवदीति नदीसंज्ञायां (१४८,१५२)=गौरि । गौरी अम (१०२)=गौरीम् । एवं शसविभक्तौ गौरीः । आदिना विशेषभिन्ना यावतीया ईबन्तशब्दाः एवं ज्ञेयाः ।

† लक्ष्मीरिति पदं लक्ष कङ् दर्शने इति धातोः औणादिक-मीप्रत्ययेन सिद्धं, नत्वीबन्तम् । अतएव (१४८) न सिलोपः । एवं, अव तन्त्र तृ धातुभ्यः औणादिक ई प्रत्ययेन अवीः तन्त्री, तरीरिति तन्त्रीस्तकारमध्यः, आदिपदेन श्री ह्री धी भी प्रभृतीनां क्विबन्तानामपि ग्रहणम् । तथाच—अवी तन्त्री तरी लक्ष्मी श्री ह्री धी भ्यादि शब्दतः, अनीबन्ततया सेर्न लोपो गौर्य्य न क्रस्वता इति । कौमरास्तु प्रियपपीः बहुयज्वोरित्युभयत्वाच पठन्ति ।

‡ स्त्री-सि(१४८)=स्त्री । हे स्त्री सि(धि)(१४८.[(९६) नदीसंज्ञायां]१५२)=स्त्रि

§ स्त्री भू शब्दयोरीदूतौ-धात्ववयवत्वाभावात्, (१२५) इयुवार्थं धुसंज्ञाविधानम् पाणिनिः ६।४।७९ ।

¶ स्त्रीग्रहणं भूनिवृत्त्यर्थम् ।

स्त्रीभ्यां स्त्रीभ्यः, स्त्रियाः स्त्रीभ्यां स्त्रीभ्यः, स्त्रियाः स्त्रियोः स्त्रीणां, स्त्रियां स्त्रियोः स्त्रीषु । *

श्रीः श्रियौ श्रियः । हे श्रीः । ङित्यामि च भेदः । श्रियै श्रिये, श्रियाः श्रियः, श्रियाः श्रियः, श्रीणां श्रियां, श्रियां श्रियि श्रीषु । †

सुध्यादयः पुंवत् । सुष्ठु धीः, प्रकृष्टा धीरिति नित्यस्त्रीत्वे सुधीप्रध्यौ श्रीलक्ष्मीवत् । ‡

धेनुर्मतिवत् साध्यः । धेनुः धेनू धेनवः इत्यादि । §

---

* स्त्रीशब्दात् अमि शसि च स्त्रियं स्त्रियः इति, अनेन सूत्रेण धातुसंज्ञायाम् आदौ (१२५) इयादेशे पश्चादीदन्तत्वाभावात् (१०२) अमशसोरादिर्लोपो न स्यात्; घुसंज्ञाविकल्पपक्षे तु (१०२) स्त्रीं स्त्रीरिति । ङे ङसि ङस् ङि विभक्तिषु स्त्रियै स्त्रियाः स्त्रियाः स्त्रियाम् एतेषु (९९) स्त्रीयुश्च ङितीत्यत्र स्त्रीशब्दवर्जनात् (९६) नित्यनदीसंज्ञायाम् आदौ (१५६) याडागमम्, (१२७) ङेराम च, पश्चात् इयादेशः । आमविभक्तौ स्त्रीणामित्यत्र (९८) वामीति सूत्रे स्त्रीशब्दवर्जनात (९६) नित्यनदीसंज्ञायाम् आगमविधेर्बलवत्त्वादादौ (११०) नुम्, अतएव अच्परत्वाभावात् न इयादेशः । "स्त्रियमतिक्रान्तः अतिस्त्रिः । हे अतिस्त्रे ।" इति सिद्धान्तकौमुदी । पाणिनिः ६।४।८० ।

† हे श्रीरिति (९७) नास्त्रीयुव इति नदीसंज्ञानिषेधात् (१५२) न ह्रस्वः । ङिति आमि च भेदः स्त्रीशब्दात् विशेष इत्यर्थ, (९९) स्त्रीयुश्च ङितीति (९८) वामीति सूत्राभ्यां नदीसंज्ञाविकल्पनात् रूपद्वयमिति यावत् । श्री-ङे (९९, १५६, १२५, २२) = श्रियै, वा (१२५) श्रिये । श्री आम (९८, ११०, १०७) = श्रीणां, वा (१२५) श्रियाम् । श्री-ङि (९९, १२७, १२५) = श्रियां, वा (१२५) श्रियि ।

‡ सु शोभना धीर्यस्याः यस्य वा इति बहुव्रीहौ सुधीशब्दस्य स्त्रीलिङ्गपुंलिङ्गयोरेकरूपतया नित्यस्त्रीत्वाभावेन नदीसंज्ञाभावात् स्त्रीलिङ्गविहितकार्य्याभावे पुंवदित्यर्थः. आदिशब्दात् सुश्री-यवक्री प्रध्यादयः । शोभना चासौ धीश्चेति सुधीः, प्रकृष्टा चासौ धीश्चेति प्रधीरिति कर्म्मधारयसमासे तु नित्यस्त्रीत्वान्नदीसंज्ञायां सुधी-प्रध्यौ क्रमात श्री-लक्ष्मीवत् । सुधीशब्दः इयस्थानित्वेन ङिति आमि च (९९, ९८) वा नदीसंज्ञायां श्रीशब्दवत्, प्रधीशब्दस्तु नित्यस्त्रीत्वेन (९६) नित्यं नदीसंज्ञायां लक्ष्मीशब्दवदित्यर्थः । इतीदन्ता. ।

§ इति उदन्ताः ।

वधू गौरीवत्। वधूः वध्वौ वध्वः इत्यादि। एवं चमूतन्वादयः।*

भ्रूः श्रीवत्। भ्रूः भ्रुवौ भ्रुवः इत्यादि। सुभ्रूः हे सुभ्रु।†

पुनर्भूः सुलूवत्।‡ सुभूः पुंवत्।§

स्वसा धातृवत्। माता पितृवत्।¶

द्यौ-र्गौवत्।‖

सुराः पुंवत्।**

नौः ग्लौवत्।††

इति अजन्त स्त्रीलिङ्ग पादः।

---

* तनूशब्दः (२७९) ऊङन्तपक्षे वधूवत्, अनूङन्तपक्षे धेनुवदित्यर्थः।

† भ्रू औ (१५८, १३५)=भ्रुवौ इत्यादि। हे सुभ्रू धि (१५३, १०३)=सुभ्रु। सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न्यायेन धिसन्निपातजनितो ह्रस्वविधि-र्धिलोपनिमित्तं न भवतीत्यतः सुभ्रुरिति पदं विसर्गान्तमिति केचित्। हे सुभ्रूरिति तु पाणिनीयाः (१५३ सूत्रस्य टीका द्रष्टव्या)।

‡ पुनर्भूशब्दस्य (१३६) कव्यादीति वकारप्राप्त्या सुलूशब्देन साम्यं न तु सर्व्वरूपैः, तेनास्य नित्यस्त्रीत्वात् दीसंज्ञायां सर्व्वत्र वधूशब्दवदेव। एवं दृन्भू वर्षाभू काराभूणां रूपम्।

§ सुभूशब्दस्य नित्यस्त्रीत्वाभावेन दीसंज्ञाभावादित्यर्थः। इति ऊदन्ताः।

¶ धातृवदिति (१२८) वृद्धिप्राप्त्या, पितृवदिति (१४३) गुणप्राप्त्या, साम्यं, न तु सर्व्वरूपैः, तेन शसि स्वसॄः मातॄरिति च। इति ऋदन्ताः।

‖ इति ओदन्ताः।

** सु शोभनो राः धनं यस्या इति विग्रहे सुरैशब्दो रैशब्दवदित्यर्थ.। इति ऐदन्ताः।

†† इति औदन्ताः।

४र्थ पादः—अजन्त क्लीवलिङ्ग शब्दः ।

१६०। क्लीवात् स्यमोऽधेर्मोऽतः ।

(क्लीवात् ५।, सि अमः ६।, अधेः ६।, मः १।, अतः ५।) ।

अकारान्तात् नपुंसकात् परस्याधेः सेरमश्च मः स्यात् । *
ज्ञानं, हे ज्ञान ।

१६१। क्लीवादीयौः । (क्लीवात् ५।, ई ।१।, औः १।) ।

क्लीवात् पर औरी स्यात् । ज्ञाने । †

१६२। जस्शसोः शिः । (जस्शसोः ६।, शिः १।) ।

क्लीवात् परस्य जसः शसश्च शिः स्यात्, श इत् । ‡

१६३। नुम्यमादौ झसन्तरलादौ तु वा ।

(नुम् ।१।, अयमादौ ७।, झसन्तरलादौ ७।, तु ।१।, वा ।१।) ।

---

* (१०२) स्वदीर्घ्यामित्यनेन अम आदिलोपे कृते सिद्धेऽपि अमः स्थाने मविधानं (१६८) स्यमोर्लुगित्यनेन स्वदीर्घ्यामित्यस्य बाधितत्वात् लुगापत्तिवारणार्थम् । ज्ञानमित्यत्र मकारस्य विभक्त्याद्यवयवभिन्नत्वात् (१०८) ना ञिमभत्रौत्यनेन न-त्वा । पाणिनिः ७।१।२४ ।

† अत्र पुनः क्लीवादित्युपादानं सामान्यार्थम्, तेन सर्व्वस्मात् क्लीवात् औकार ई स्यादित्यर्थः । ज्ञान-औ = ज्ञान-ई (२३) = ज्ञाने । पाणिनिः ७।१।१९ ।

‡ शित्करणं विशेषज्ञापनार्थम्, इ इति कृते सप्तम्येकवचनभ्रमो जायते, (१८८) अधौ सौ शौ घं इत्यादिषु विशेषकरणं कष्टकरञ्च स्यात् । कति पञ्च अष्ट फलानि इत्यादिषु (१३१) लिङ्गविहितकार्य्यनिषेधात् न शिः । गौणे तु अतिकतीनि अतिपञ्चानि इत्यादौ स्यादेव । पाणिनिः ७।१।२० ।

क्लीबस्य शौ परे नुण् स्यात्, न तु यमादौ, झसन्तरलयोरादौ तु वा स्यात् । *

१६४ । नसब्मह्न्नोऽधो घौऽधौ घौ ।

(नस्-अप्-महत्-न: ६।, अधो: ६।, घं: १।, अधौ ७।, घौ ७।) ।

नसन्तस्य आपो महतो नान्तस्य च धुवर्जस्य घं: स्यात् अधौ घौ परे । ज्ञानानि । ही शीवत् । शेषं रामवत् । एवं वन-धन-फलादय: । †

१६५ । तोऽन्यादेर्मोऽनेकतरात् ।

(त: १।, अन्यादे: ५।, म: ६।, अनेकतरात् ५।) ।

अन्यादे: परस्य स्यमोर्मस्य त: स्यात् न त्वेकतरात् परस्य ।

---

* यम् प्रत्याहार:, यमस्यादि: यमादि:, न यमादि-रयमादिस्तस्मिन् । झस् अन्ते ययोस्तौ झसन्तौ, झसन्तौ च तौ रलौ चेति झसन्तरलौ तयोरादिस्तस्मिन् । नुणो ण इत् अन्त्याच: पर: (१७) । उकारेत् चिह्नार्थ:, न तु [नु] बिन्दुमात्रमिति वक्ष्यति (२४२) । नुण: प्रकृतिभाजित्वात् ज्ञानानि इत्यादौ नान्तत्वात् (१६४) दीर्घ: । चत्वारि, प्रशामि इत्यादौ यमादौ कर्त्तव्यत्वेन न नुण् । अत्र नुण्यम: इति यमन्तस्यैव निषेधे कृते स्वभ् शब्दस्य जसि स्वम्भि जलानि इत्यादौ यमन्तत्वात् नुणोऽप्रसङ्ग: स्यात् । पाणिनि: १।१।४२, ७।१।७२ ।

† नस् च अप् च महांश्च न च समाहारे तस्य । नृसभागान्तस्य अप्शब्दस्य महत्-शब्दस्य नान्तस्य च अन्त्यस्वरस्य दीर्घो भवति धिभिन्ने घौ परे, न तु धातो: नृस्-भागान्तस्य नान्तस्य च इत्यर्थ: । यथा—विद्वान् आप: महान् । न इति नान्तलिङ्गस्य ग्रहणं, यथा राजा इत्यादि । ज्ञानानीत्यादौ नुणो लिङ्गभाजित्वात् नान्तत्वम् । पचन् इत्यादौ तु नकारस्य लिङ्गभाजित्वेऽपि लिङ्गमध्यविहितत्वात् न नान्तत्वम् । अधौ किं, हे विद्वन् इत्यादि । पूर्व्वत: शिरनुवृत्तावपि घौ-कथनं सर्व्वलिङ्गेषु दीर्घार्थम् । ज्ञान जस् (१६२,१६३,१६४) = ज्ञानानि । द्वितीया प्रथमावत् । शेषं प्रथमाद्वितीया-भिन्नं रामशब्दवत् । यावतीय-क्लीबलिङ्ग-अकारान्तशब्दा एवमित्यर्थ: । पाणिनि: ६।४।८,१०,११ ।

अन्यत् अन्ये अन्यानि । हे अन्य । पुनस्तद्वत् । शेषं पुंवत् । *
एवमन्यतरादय: । अनेकतरात् किम्—एकतरम् ।

१६६ । जरातोऽम वा । (जरात: ५।, अम् ।१।, वा ।१।)।

जराशब्दात् परस्य स्वमोर्मस्य अम् स्यात् वा ।
अजरसम् अजरम्, अजरसी अजरे, अजरांसि अजराणि । पुनस्तद्वत् । शेषं पुंवत् । †

(११६) पाद्दन्तेति शीर्षहृदयोदकासनानां शीर्षन्हृदुद्-नासन: । शीर्षाणि शीर्ष्णा शीर्षभ्यामित्यादि । ‡ हृन्दि हृदा हृद्भ्यामित्यादि । उदानि उद्गा उदभ्यामित्यादि । आसानि आस्ना आसभ्यामित्यादि । पक्षे शेषे च प्राग्वत् ।

---

* प्रकरणबलात् स्वमो: स्थाने जातस्य मकारस्य तकारो भवतीति, तेन पुंलिङ्गे अमि अन्यमिति । अन्यतमस्य अन्यादित्वाभावात् अन्यतममित्येव । अन्य-सि (१६०, १६५)=अन्यत् । पाणिनि: ७।१।२५ । एकतरात् प्रतिषेधो वक्तव्य इति वार्त्तिकञ्च ।

† क्लीवेऽपि जराग्रहणात् शब्दान्तरेण प्राप्तसमासात् जराशब्दादित्यर्थ: । नास्ति जरा यस्य तत् अजरम् । अजर-सि (१६०, १६६, ११५)=अजरसम् । जरसादेशाभाव-पक्षे (१०३) स्वदीभ्यामित्यनेन अम आदिलोपे अजरम् । अमोऽभावपक्षे च अजरमिति । अत्र अमो नित्यत्वेऽपीष्टसिद्धौ वाग्रहणं व्यवस्थार्थं, व्यवस्था च—द्वितीयैकवचने अमि अन्तरङ्गत्वाद्-बलवतोऽपि जरसादेशात् पूर्व्वम् अम: स्थाने (१६०) मकार: स्याम्, पश्चा-दनेन अमि अम: स्थितिरिति ; अन्यथा आदौ जरसादेशे (१६८) स्वमोर्लुगिति अमो-लुगापत्ति: स्यादिति । अजर-औ (१६१, ११५)=अजरसी, पक्षे (२३)=अजरे । अजर-जस् (१६२,११५, १६३, १६४, ५०)=अजरांसि, पक्षे अजराणि । पाणिनिमते सन्निपातपरिभाषया न जरस्, अजरम् ; परत्वात् जरसि कृते सन्निपातपरिभाषया न (अमो) लुक्, अजरसम् ।

‡ शीर्ष-शस् (१६२,११६,१६४,१०७)=शीर्षाणि । शीर्ष-टा (११६, ११७, १००)=शीर्ष्णा, शीर्ष-भ्याम् (११६,११८)=शीर्षभ्यां । इत्यदन्ता: ।

१६७। क्लीबे ह्रस्वः। (क्लीबे ७।, ह्रस्वः १।)।

क्लीबे घेस्य ह्रस्वः स्यात्। श्रीपं, ग्रामवत्। *

१६८। स्यमोर्लुक्। (षि-अमोः ६।, लुक् ।१।)।

क्लीबात् परयोः स्यमोर्लुक् स्यात्। † वारि।

१६९। नुम्मिकोऽच्यनामि।

(नुम् ।१।, इकः ६।, अचि ७, अनामि ७।)।

इगन्तस्य क्लीबस्य नुम् स्यात् अचि परे, न त्वामि। वारिणी वारीणि। ‡

१७०। गुणं धौ वा। (गः १।, धौ ७।, वा ।१।)।

इगन्तस्य क्लीबस्य गुणो वा स्यात् धौ परे। हे वारे हे वारि। §

---

* येन विधिस्तदन्तस्येति न्यायात् क्लीवलिङ्गशब्दस्य अन्तदीर्घस्य ह्रस्वः स्यात्, निमित्ता-न्तरापेक्षा नास्तीत्यर्थः। श्रियं पातीति श्रीपा, क्लीवलिङ्गवर्त्तित्वात् ह्रस्वे श्रीपमिति। पाणिनिः १।२।४७। इत्यादन्ताः।

† (१६०) अकारान्तक्लीवात् स्यमो र्म-विधानेन अत्र अकारान्तभिन्नात् क्लीवादिति बोध्यम्। लुक्करणेन (९३) लुकि न तदेति निषेधात् तस्मिन् परे तत् किम् इत्यादौ न (१३१) टेरः। विरामविहितन्तु स्यादेव, यथा पयः हविः इत्यादि। पाणिनिः ७।१।२५।

‡ अत्र येन केनापि प्रकारेण इगन्तस्यापि ग्रहणं, तेन प्रद्युनी सुगुनी सुरिणी इत्यादि सिद्धम्। नुमो मित्त्वात् (१७) अन्त्याचः परः। स्थाने जातस्य प्रकृतिभागि-त्वात् वारीणि इत्यादौ नान्तत्वात् (१६४) दीर्घः। अनामीति आम्भिन्ने स्वादौये अचि परे इत्यर्थः, तेन वारीणमित्यादौ न स्यात्। वारि-औ (१६१, १६९, १०७)= वारिणी। वारि-जस् (१६२, १६९, १६४, १०७)=वारीणि। पाणिनिः ७।१।७३।

§ हे वारे इत्यादौ स्यमोर्लुगिति सेर्लुकि (९३) लुकि न तदेति निषेधात् (१२२) गुर्धिङसित्यस्याप्राप्तौ अनेन पुनर्विकल्पेन गुणविधानम्। इहापि येन केनापि इगन्तस्य ग्रहणं, तेन हे प्रद्यो हे प्रद्यु इत्यादि।

वारिणी वारीणि, वारिणा वारिणी वारिभिः वारिणः वारिणोः वारीणाम् । *

वारिणि वारिणोः । इसे इरिवत् ।

१७१ । पुंवद्वार्थोक्तपुंस्कं टाद्यचि ।

(पुंवत् ।१।, वा ।१।, अर्थोक्तपुंस्कं १।, टाद्यचि ७।) ।

इगन्तं क्लीबम् अर्थेन प्रोक्तपुंस्कं पुंवत् वा स्यात् टाद्यचि । अनादये अनादिने इत्यादि । शेषं वारिवत् । अर्थेन किं, पीलुने फलाय । †

१७२ । दध्यस्थिसक्थ्यक्ष्णोऽनङ् ।

(दधि अस्थि-सक्थि-अक्ष्णः ६।, अनङ् ।१।) ।

एषामनङ् स्यात् टाद्यचि, अङावितौ ।

(११७) अनोऽल्लोपः । दध्ना दध्ने दध्नः दध्नः दध्नोः दध्नां दध्नि दधनि दध्नोः । शेषं वारिवत् । एवम् अस्थि सक्थि अक्षि । ‡

---

* वारि-आम (११०,१०४, १०७) = वारीणाम् ।

† पुमानिव पुंवत् । अर्थेन एकार्थेन उक्तः पुमान् येन तत् अर्थोक्तपुंस्कम् । तदुक्तम्—
एक एव हि यः शब्दः पुंसि क्लीबे च वर्त्तते । एकमेवार्थमाख्याति उक्तपुंस्कः स उच्यते ॥
यथा, नास्ति आदिर्यस्य तत् अनादि कुलम् आदिरहितमित्यर्थः, एवं अनादिः पुरुषः आदिरहित इत्यर्थः, अतएव अनादिशब्दः एकार्थोक्तपुंस्कः । एकार्थेन किं पीलुने फलाय, पीलुशब्दः फलवाचित्वे क्लीबलिङ्गः, वृक्षवाचित्वे पुंलिङ्गः इति न एकार्थेन उभयलिङ्गता । अनादि ङे (पुंवद्भावे, १२१,३५) = अनादये । पुंवद्भावविकल्पपक्षे (१६८) = अनादिने । एवं कटवे कटुने इत्यादि । पाणिनिः ७।१।७४ ।

‡ दधि च अस्थि च सक्थि च अक्षि च समाहारे तस्य । (१७) ङित्त्वादन्त्यस्य स्थाने। गौणेऽप्ययमादेशः, तेन पीतदध्ना पुरुषेण, धृतास्थ्ना शिवेन, पीतदध्ने स्त्रियै इत्यादि । अत्र दध्यादीनां रूढ़ानामेव ग्रहणं, तेन दधातीति (१११९) दधिः, अस्य दधये दधिने ब्राह्मणाय इत्यत्र अनङ् न स्यात् । दधि-टा = दधन्-आ (११७) = दध्ना इत्यादि । दध्ना-मित्यत्र असर्वनामस्थानत्वादनङ्, न आमः स्थाने नुम् । पाणिनिः ७।१।७५ । इति इदन्ताः ।

सुधि सुधिनी सुधीनि। हे सुधे हे सुधि। द्वौ प्रीवत्। सुधिया सुधिना इत्यादि। एवं प्रध्यादयः। *

मधु मधुनी मधूनि। हे मधो हे मधु। द्वौ प्रीवत्। मधुना मधुभ्यामित्यादि। एवम् अम्बु-सान्वादयः। (११६) पादद्न्तेति स्नु वा। स्नूनि सानूनि इत्यादि भेदः। †

धातृ धातृणी धातॄणि। धौ—हे धातः हे धातृ। द्वौ प्रीवत्। धात्रा धातृणा इत्यादि। एवं ज्ञातृ-कर्त्रादयः। ‡

१७३। एचो युत् स्वम्। (एचः १॥, युत् ।१।, स्वं २।)। §

प्रद्यु प्रद्युनी प्रद्यूनि। हे प्रद्यो हे प्रद्यु। द्वौ प्रीवत्। प्रद्यवा प्रद्युना इत्यादि। ¶ सुरि सुरिणी सुरीणि। हे सुरे हे सुरि। सुराया सुरिणा सुराभ्यामित्यादि। ‖ सुनु सुनुनी सुनूनि। हे सुनो हे सुनु। सुनावा सुनुना इत्यादि। **

इति क्लीवलिङ्ग पादः।

इति अजन्ताध्यायः।

---

* सु शोभना धीर्यस्येति सुधि कुलम् इत्यादीनामप्येकार्थेन उक्तपुंस्कत्वम्। एवं प्रध्यादयः। इति ईदन्ताः।

† इति ऊदन्ताः।

‡ दधातीति धातृ कुलम् अस्याप्येकार्थेन उक्तपुंस्कत्वम्। एवं जानातीति ज्ञातृ कुलम्, करोतीति कर्तृ कुलमित्यादि। सुधि, मधु, धातृ—औ (१६१,१६९)=सुधिनी, मधुनी, धातृणी। सुधि, मधु, धातृ—जस (१६२, १६९, १६४)=सुधीनि, मधूनि, धातॄणि। सम्बोधने (१७०) वा गुणः। टाप्रभृतिविभक्तौ पुंवद्भावविकल्पः। इति ऋदन्ताः।

§ (१६७) क्लीवे स्व इत्यादिभि. स्वं प्राप्नुवन्त एचो युदेव (इत, उत) भवन्तीत्यर्थः। एकारस्य ह्रस्वः कण्ठत्वेन साम्यात् अकार एव जायते, अतः एतत्सूत्रकरणम्। पाणिनिः १।१।४८।

¶ प्रकृष्टा द्यौः स्वर्गो यस्मात् तत् प्रद्यु पुण्यम्। अस्य पुंवद्भावे गोशब्दवत्। इति ओदन्त

‖ शोभनो राः धनं यस्य तत् सुरि कुलम्। अस्य पुंवद्भावे रैशब्दवत्। इति ऐदन्ताः।

** शोभना नौर्यस्य तत् सुनु जलम्। अस्य पुंवद्भावे ग्लौशब्दवत्। इति औदन्ताः।

३यः । हसन्ताध्यायः ।

१म पादः—हसन्त पुंलिङ्ग शब्दः ।

१७४ । द्विरुक्तजक्षादी द्विः ।

(द्विरुक्त-जक्षादी १॥, द्विः १।) ।

कृतद्वित्वशब्दो जक्षादिश्च द्विसंज्ञः स्यात् । *

१७५ । हो ढो भौ । (हः ६।, ढः १।, भौ ७।) ।

हस्य ढः स्यात् भौ परे । †

(१४८)शावीब्भसात् सेर्लोपः। (६४)झप्झसोरिति चप्जबौ वा। लिट् लिड् लिहौ लिहः, लिहं लिहौ लिहः, लिहा लिड्भ्यामित्यादि ।

१७६ । दादेर्घः । (दादेः ६।, घः १।) ।

हकारादेर्हस्य घः स्यात् भौ परे । ‡

---

* पूर्व्वं प्रयोजनाभावादनुक्तां संज्ञामाह द्विरुक्तेति । द्विः (४८५) उक्तं यस्य स द्विरुक्तः, सच जक्षादिश्च तौ द्विरुक्तजक्षादी । जक्षादिश्च—जक्षितिश्च दरिद्राति-चकास्तिः शास्तिरेव च । दीधी वेवी च जागर्त्ति-र्जक्षादिः सप्तधातुभिः ॥ द्विसंज्ञाफलन्तु (१६२, २४३,५६३,६६७) एतेषु सूत्रेषु द्रष्टव्यम् । पाणिनिः ६।१।५,६ ।

† लिङ्गस्य धातोश्च हस्य ढः स्यात् भौ परे इत्यर्थः । पाणिनिः ८।२।३१ ।

‡ द आदिर्यस्य स दादिस्तस्य । दादेरिति शब्दस्य धातोर्वा विशेषणं, यस्यैव शब्दस्य धातोर्वा अन्तस्थितो हकारः तस्यैव आदिस्थितो दकार इत्यभिप्रायः, तेन धुक् धुग्, भाक् भाग् इत्यादौ स्यात्, दधिलिट् इत्यादौ न स्यादित्यर्थः । पाणिनिः ८।२।३२ ।

१७७। झभान्तस्यादिजबां झभाः फे, धोस्तु सध्वेऽन्ते च।

(झभान्तस्य ६।, आदिजबां ६॥।, झभाः १॥।, फे ७।, धोः ६।, तु ।१।, सध्वे ७।, अन्ते ७।, च ।१।)।

झभान्तस्यादौ स्थितानां जबानां झभाः स्युः फे परे, धोस्तु सध्वे अन्ते च।

धुक् धुग् दुहौ दुहः, दुहं दुहौ दुहः, दुहा धुग्भ्यामित्यादि।*

१७८। मुहां घड् वा भौ।

(मुहां ६॥।, घड् ।१।, वा ।१।, भौ ७।)।

मुहादीनां घड् वा स्यात् भौ परे।

मुक् मुग् मुट् मुड् मुहौ मुहः, मुहं मुहौ मुहः, मुहा मुग्भ्यां मुड्भ्यामित्यादि।

एवं द्रुह-स्नुह-नश-स्निहः।†

---

* झभः अन्ते यस्य स झभान्तः तस्य आदौ स्थिताः जबः तेषाम्। तदयमर्थः—यस्य शब्दस्य धातोर्वा अन्ते झभ्, तस्यैव आदिस्थितानां ज ड द ग ब इत्येतेषां स्थाने क्रमेण ———————— झ ढ ध घ भ इत्येते भवन्ति, शब्दस्य—फे (८५, हषि विरामे च) परे, धातोस्तु—सध्वे विरामे च परे इत्यर्थः। अत्र विशेषः—आदौ जब् अन्ते झभ् मध्ये हस्-वर्णस्य एकस्वरस्य च व्यवधानेऽपि भविष्यति न तु बहुस्वरव्यवधाने, तेन गर्द्दभमाचष्टे इति औ क्विपि गर्द्दभ् इत्यादौ न स्यात्। व्यध्यौ ताडे इति धातोर्दन्त्यवकारत्वात् मृगाविन्त् इत्यादावपि न प्रसङ्गः। जकारस्य झकारो न स्यादिति औमराः, तेन जभशब्दस्य जप्, जेह् शब्दस्य जेट् इति पदं भविष्यति (संक्षिप्तसारे सुबन्तपादस्य १५९ सूत्रं द्रष्टव्यम्)। दुह-सि (१४८, १७६, १७७, ६४)—धुक् धुग् इत्यादि। पाणिनि. ८।२।३७।

† मुहामिति बहुवचनं गणार्थम्। गणश्च मुह द्रुह स्नुह नश स्निह इति। द्रुहशब्दस्य मुहादिपाठबलात् पक्षे हो ढो भावित्यनेन ढः, न तु दादेर्घ इत्यनेन घः, तेन ध्रुक् ध्रुग् ध्रुट् ध्रुड् इति। मुह-सि (१४८, १७८, ६४)—मुक् मुग्। पक्षे (१७५, ६४)—मुट मुड्। पाणिनिः ८।२।३३,६१।

१७९। वाहो वौ पौ श्वेतात्तु वा।

(वाहः ६।, वा ।१।, औ ।१।, पौ ७।, श्वेतात् ५।, तु ।१।, वा ।१।)।

वाहो वा-शब्दस्य औः स्यात् पौ परे, श्वेतवाहस्तु वा। विश्वौहः विश्वौहा इत्यादि। शेषं लिड्वत्। *

१८०। अनादूः। (अनात् ५।, ऊः १।)।

अनवर्णात् परो वाहो वा ऊः स्यात् पौ परे। भूहः भूहा इत्यादि। †

१८१। अनडुच्चतुरोऽणाणौ धिघ्योः।

(अनडुह्-चतुरः ६।, अण्-आणौ १॥, धिघ्योः ७॥)।

अनडुह्-चतुरश्च धौ परे अण् घौ परे आण् स्यात्, ण इत्। ‡

१८२। हो नः सौ। (हः ६।, नः १।, सौ ७।)।

अनडुहो हस्य नः स्यात् सौ परे। अनड्वान्। हे अनड्वन्।

---

* वाह् इति वहधातोः (१०२८) विण्प्रत्ययेन सिद्धम्। औ-करणेऽपि सिद्धे औ-करणं हसात् परस्यापि प्राप्त्यर्थं, तेन वार्वाह् शब्दस्य शसादौ वारौहः इत्यादि। विश्व-वाह्-शस्=विश्व-औह्-शस् (२३)=विश्वौहः इत्यादि। पाणिनिः ६।४।१३२,६।१।८६।

† अः अवर्णः, न अः अनस्तस्मात् अनात्। यादृग्जातीयस्य विप्रतिषेधो विधि-रपि तादृग्जातीयस्येति न्यायात् अवर्णसजातीयोऽजेव ग्राह्यः, न तु हस्। ततश्च— पूर्व्वसूत्रम् अवर्णविषयं हस्विषयञ्च, एतत् सूत्रम् इवर्णाद्यच्-विषयमिति। भूवाह्-शस् =भू-ऊह्-शस् (२२)=भूहः। एवं शालिवाह्-शस् (१८०, ३५)=शाल्यूहः इत्यादि। अकारान्तोपपद एव वाहः साधुरिति कैयटादयः, तेन तन्मते भूवाट् शालिवाट् इत्यादि पदानि असाधूनि। पाणिनिः ६।४।१३२।

‡ अनडुश्चतुरः इति एकवचनं क्रमनिरासार्थम्। अणाणौ धिघ्योरित्युभयत्र द्विव-चनान्तत्वात् क्रमोऽस्त्येव। (१७) चित्त्वादन्त्याचः परौ भवतः। पाणिनि ७।१।९८,९९।

अनड्वाहौ अनड्वाहः। अनडुहः अनडुहा। *

१८३। स्रस्ध्वस्वस्वनडुहां दङ् फे।

(स्रस्-ध्वस्-वसु-अनडुहां ६॥, दङ् ।१।, फे ७।)।

एषां दङ् स्यात् फे परे, अङावितौ। अनडुद्भ्यामित्यादि। †

१८४। श्वेतवाहवयाजुक्थशासपुरोडाशां डसङ्।

(श्वेतवाह—पुरोडाशां ६॥, डसङ् ।१।)।

एषामन्तस्य डसङ् स्यात् फे परे, डङावितौ। ‡

१८५। अत्वसोऽधोः सौ घोऽधौ।

(अतु-असः ६।, अधोः ६।, सौ ७।, घः १।, अधौ ७।)।

अत्वन्तस्यासन्तस्य च घः स्यात् अधौ सौ परे, न तु धोः। श्वेतवाः। §

---

* उभयोरनुवृत्तावपि चतुरो हकाराभावात् अनडुह एवेत्यर्थः। अनडुह्-सि (१४८, १८१) = अनडु-आ-ह्(३५,१८२) = अनड्वान्। धौ अनड्वन् इत्यादि। पाणिनिः ७।१।८२।

† स्रन्स ध्वन्स धातुभ्यां क्विप्प्रत्यये स्रस् ध्वस् शब्दौ, वसुरिति (१०९६) क्वसु-प्रत्ययान्तः विद्वस् प्रभृतिः। (१७) दङो ङित्त्वादन्त्यस्य स्थाने। झपझसोरित्यनेन (६४) सस्य दे सिद्धेऽपि, सोर्विः फे (१०२) इत्यस्य बलवत्त्वेन बाधितत्वादनेन दङ्विधानम्। सुवः इत्यत्र सुपूर्व्वक वस धातोः क्विपि वसुप्रत्ययान्तत्वाभावान्न दङ्। पाणिनि ८।२।७२।

‡ ङित्त्वादन्त्यस्य स्थाने, (१२६) डित्त्वात् टिलोपः, अस् इत्यस्य स्थितिः। श्वेतवाह् अवयाज् उक्थशास् पुरोडाश् एतेभ्यो डस्विधानेन सिद्धावपि, एतेषां स्थाने डसङ्-करणं डसङो लिङ्गभाजित्वार्थं, तेन श्वेतवाहादीनामसन्तत्वात् अत्वसोऽधोरिति दीर्घः स्यात्। अत्वसोऽधोरित्यत्र असन्तलिङ्गस्यैव ग्रहणं, तेन दन्त्यशासौ सचेति दन्त्यस् इत्यत्र न दीर्घः। पाणिनिः ३।२।७१,७२।

§ अतुश्च अस् च तस्य। अतुप्रत्ययेन अत्भागान्तस्य (४४१,४४२) धात्ववयवभिन्नास-भागान्तस्य च (३४२,३४३,४६६,१०२२,१०९६,११०३) दीर्घः स्यात् धिभिन्ने सौ परे

१८६। डसडो धौ वा। (डसडः ६।, धौ ७।, वा ।१।)।

डसडो धौ परे वौ वा स्यात्। हे श्वेतवाः हे श्वेतवः। श्वेतवाहौ श्वेतवाहः, श्वेतवाहं श्वेतवाहौ श्वेतौहः श्वेतवाहः, श्वेतौहा श्वेतवाहा श्वेतवोभ्यामित्यादि। *

(१११) क्विलादिति षः। तुराषाट् तुराषाड् तुरासाहौ तुरासाहः, तुरासाहं तुरासाहौ तुरासाहः, तुरासाहा तुराषाड्भ्यामित्यादि। †

चत्वारः चतुरः, ‡ चतुर्भिः चतुर्भ्यः चतुर्भ्यः। (११०) नुमाम इति चतुर्णाम्।

१८७। रडो विः सुपि। (रडः ६।, विः १।, सुपि ७।)।

रडो विः स्यात् सुपि परे, न त्वन्य-रेफस्य। चतुर्षु। §

इत्यर्थः। अत्वन्तस्य यथा श्रीमान् मघवान् युष्मदर्थे भवान् इत्यादि। अत्वन्तस्य किं, भवन् कुर्वन् इत्यादौ (११००) अनन्तस्य न स्यात्। अधोः किं, सुवः इति। श्वेतवाह्-सि (१४८,१८४,१८५,१०२)=श्वेतवाः (इन्द्रः)। पाणिनिः ६।४।१४।

* (१८४) श्वेतवाहेत्यनेन कृतडसडोऽकारस्य दीर्घः स्याद्वा धौ परे इत्यर्थः। हे श्वेतवाह-सि [धि] १८४)=श्वेतवस्, अनेन दीर्घे, (१०२)=श्वेतवाः, वा श्वेतवः। श्वेतवाह्-अस् (१७९, २३)=श्वेतौहः, वा श्वेतवाहः इत्यादि। श्वेतवाह्-भ्याम् (१८४; १०२, ६९)=श्वेतवोभ्याम्। पाणिनिः ८।२।६७।

† तुरां वेगं सहते इति (१०२८) तुरासाह्-सि (१४८, १७५, १११, ६४)=तुराषाट् तुराषाड् (इन्द्रः) इत्यादि। "तुरं सहते इत्यर्थे छन्दसि सहः इति (३।२।६३) ण्विः। लोके तु साहयतेः क्विप्" इति सिद्धान्तकौमुदी। इति हकारान्ताः।

‡ चतुर्-जस् (१८१,३५,१०२)=चत्वारः, शसि चतुरः।

§ (१०२) सोरित्यनेन विसर्गसिद्धावपि अयमारम्भो नियमाय, तेन सुपि परे रेफस्य विसर्गो भवन् (२२७) रुरूपस्य स्यात् न त्वन्यरेफस्य। अतः चतुर्-सु (१११)=चतुर्षु इत्यादौ न (१०२) विसर्गः, पिपठीःषु, सजूःषु, अहःसु इत्यादौ स्यादिति। पाणिनिः ८।३।१६।

प्रियचत्वाः, हे प्रियचत्वः, प्रियचत्वारौ प्रियचत्वारः, प्रियचत्वारं प्रियचत्वारौ प्रियचतुरः, प्रियचतुरा प्रियचतुर्भ्यामित्यादि। *

(१६४) नसब्‌महन्न इति घत्वे, (११८) नो लुप्। राजा, हे राजन्, राजानौ राजानः, राजानं राजानौ। (११७) अनोऽल्लोपः। राज्ञः, राज्ञा राजभ्यामित्यादि। ङौ—राज्ञि राजनि। †

(११७) अम्वस्यादित्युक्तेः ब्रह्मणः यज्वनः इत्यादि। शेषं राजवत्।

१८८। हन्पूषार्य्यम्णोऽधौ सौ शौ घः।

(हन्—हनः ६।, अधौ ७।, सौ ७।, शौ ७।, घः १।)।

एषां घः स्यात् अधौ सौ परे, शौ च।

वृत्रहा, हे वृत्रहन्, वृत्रहणौ वृत्रहणः, वृत्रहणं वृत्रहणौ। ‡

१८९। हनो ङ्णो घ्नो न णः।

(हनः ६।, ङ्णः ६।, घ्नः १।, न ।१।, णः १।)।

---

* प्रियचत्वा इति प्रियाश्चत्वारो यस्य सः इति गौण्ये सर्व्वलिङ्गभाजित्वम्। प्रियचतुर्-सि (१४८, १८१, १०२)=प्रियचत्वाः इत्यादि। इति रकारान्ताः।

† राजा इत्यत्र आदौ नस्य लुपि (१५) तदाद्यविधिर्निषेधात् दीर्घो न स्यादत आह नसब्‌महन्न इति घत्वे नो लुप् इति। प्रकृतेः पूर्व्वपूर्व्वं स्यादन्तरङ्गतरं तथेति न्यायात् अन्तरङ्गत्वादादौ अकार-दीर्घं इत्यभिप्रायः। सिलोपस्तु सर्व्वादावेव, सर्व्वविधिभ्यो लोपविधिर्बलवानिति न्यायादिति भावः। राजन्-सि (१४८, घत्वे नो लुप्)=राजा।

‡ हनधातुनिष्पन्न-हन् इत्यस्य, पूषन् अर्य्यमन् इति शब्दद्वयस्य, इन्भागान्तस्य च दीर्घः स्यादित्यर्थः। नान्तत्वात् (१६४) प्राप्तदीर्घस्य नियमोऽयं, तेन एषां सौ शौ च परे एव दीर्घो नान्यस्मिन् धौ परे इति। प्लीहन् दीर्घाहन् फल्गाहन् इत्यादीनां हनधातु-निष्पन्नत्वाभावात् नसब्‌महन्न इत्यनेनैव दीर्घः। वृत्रं हतवान् इति वृत्रहा इत्यादिः। पाणिनि. ६।४।१२,१३।

हनस्थाने जातस्य क्षस्य घ्नः स्यात्, तस्य च नस्य णो न स्यात्।
वृत्रघ्नः वृत्रघ्ना वृत्रहभ्यामित्यादि।
एवं पूषन् अर्य्यमन् शार्ङ्गिन् यशस्विन् प्रभृतयः। *

१९०। पूष्णो ङि-ङिर्वा।

(पूषः ५।, ङिः १।, ङिः १।, वा ।१।)।

पूषि पूष्णि पूषणि। †

१९१। मघोनस्तुङ् वा क्विप्योः।

(मघोनः ६।, तुङ् ।१।, वा ।१।, क्वि-प्योः ७॥)।

मघवन् शब्दस्य तुङ् वा स्यात् क्वौ पौ च परं, उङावितौ। ‡

१९२। त्रिदचोऽद्वे नुण् घौ।

(उ-ऋ-इत्-अचः ६।, अद्वेः ६।, नुण् ।१।, घौ ७।)।

उकारेत ऋकारेतोऽचश्च नुण् स्यात् घौ परे, न तु द्वेः। §

---

* हन इति हनधातुसम्बन्धिनो क्षस्यैवेत्यर्थः, तेन हाधातुनिष्पन्ने अङ्घ्रि पूर्व्वाह्ण इत्यादौ घ्नादेशो न स्यात्। णत्वनिषेधस्तु सति सम्भवे। वृत्रहन्-शस् (११७=वृत्रक्षः, अनेन घ्ने)=वृत्रघ्नः इत्यादि। पूषा अर्य्यमा च सूर्य्यः। पाणिनिः ७।३।५४, ८।४।२२।

† पूषन्शब्दात् परो ङि-ङिः स्यात्। ङित्वात् (१२६) टिलोपे पूषि, एतत् पदं पाणिनीयादिभिर्न मन्यते; सारस्वतानुसारेणात्र लिखितम्। पक्षे (११७) अनोऽल्लोपो वा इति पूष्णि पूषणि।

‡ तुङः उकारेत् (१९२) नुणर्थं, ङकारेत् (१७) अन्त्यवर्ण-स्थाने आगमनार्थम्। पौ परे यथा, माघवतं माघवत्यं माघवती। मघवद्भिरिति पदं (९३) लुकि न तद्वेत्यत्र तथा निर्द्दिष्टमनित्यमिति न्यायात् सिद्धमिति केचित्। मघशब्दात् वतुप्रत्ययेन सिद्धो मघवच्छब्दोऽप्यस्ति, तुङ्करणन्तु प्राचीनानुवादार्थम्। अनुवृत्तावपि वा-ग्रहणं परत्र निवृत्त्यर्थम्। पाणिनिः ६।४।१२८।

§ उश्च ऋश्च उ, उ इत् यस्य स उित्, उित् च अच् च तस्य। अच् इति क्विबन्त-गत्यर्थाञ्चो ग्रहणं, तेन बहवोऽचः (स्वराः) यस्मिन् स बह्वच् इत्यादौ न स्यात्। अच, 'अद्वेरिति

१९३। स्यान्तस्याराल्लुप् फे।

(स्यान्तस्य ६।, अरात् ५।, लुप् ।१।, फे ७।)।

स्यस्यान्तस्य लुप् स्यात् फे परे, न तु रात् परस्य। *
मघवान् मघवा, हे मघवन्, मघवन्तौ मघवानौ, मघवन्तः मघवानः, मघवन्तं मघवानं, मघवन्तौ मघवानौ। †

१९४। श्वयुवमघोनामुवोऽते पौ।

(श्व-युव-मघोनाम् ६॥, उः १।, वः ६।, अते ७।, पौ ७।)।

एषां वशब्दस्य उः स्यात् पौ परे, न तु ते। ‡

निषेधोऽयं धातुरेव न चान्यत' इति विद्यानिवासः, तेन क्वसुप्रत्यये जगन्वान् पेचिवान् इत्यादौ स्यादेव। . चिकीर्षन् इत्यादौ तु सनन्तादीनां (६३१) पृथक् धातुसंज्ञाविधानात् द्विरुक्तनिबन्धनो नुणनिषेधो न स्यादिति। यङ्लुगन्तस्य तु न पृथक् धातुसंज्ञा कृता (६३१ सूत्रस्य टीकायां अदादिगणे यङ्लुगन्तस्य वर्ज्जनात्)। अतएव पापचदित्युदाहरता क्रमदीश्वरेण यन्लुगन्तान्न नुम् इत्युक्तम्। तेन परिलेलिहदित्येव। पाणिनिः ७।१।७०।

* स्यस्य अन्तः स्यान्तस्तस्य। सन्धिजातभिन्न-संयोगान्तस्य लुप् स्यात् फे परे, पूर्व्ववर्त्ति-रेफसंयोगस्य न स्यात्। लुप्करणात् (१५) आद्यविधिर्न स्यात्, सम्यग्व्यायविहित-कार्य्यन्तु स्यादेव. तेन पिपठ्शब्दस्य अनेन अन्त्यलुपि, (६४) झपझमोरित्यनेन चप् जव करणे पिपक् पिपग् इति। अरादिति किं—ऊर्क्, अमार्ट् इत्यादौ न संयोगान्तस्य लोपः। पाणिनिः ८।२।२३,२४।

† मघवन्-सि (१४८,१९१,१९२,१९३,१८५)=मघवान् इन्द्रः। तृङो विकल्पपक्षे (१६४,११८)=मघवा। हे मघवन्-सि [धि] (१४८,१९१,१९२.१९३)=मघवन्, तृङो विकल्पपक्षेऽपि मघवन् इति। मघवन्-औ (१९१)=मघवन्तौ, तृङो विकल्पपक्षे (१६४) =मघवानौ, इत्यादि।

‡ श्वन् च युवन् च मघवन् च ते तेषाम्। मघोनामिति निर्द्देशात् नान्तपक्ष एवायं विधिः, तेन मघवतः इत्यादौ न स्यात्। अते तद्धितभिन्ने पौ परे। तद्धिते तु शौवनं यौवनं माघवनमिति। गौणेऽप्ययं विधिः, तेन धृतयुनः बहुयूनः दृष्टमघोनः इति। पाणिनिः ६।४।१३३।

मघवतः मघोनः, मघवता मघोना, मघवद्भ्यां मघवभ्या-
मित्यादि। *

शुनः शुना। यूनः यूना इत्यादि।

१८५। अर्व्वणोऽनञस्तुङ् त्येऽसौ तु।

(अर्व्वणः ६।, अनञः ६।, तुङ् ।१।, त्ये ७।, असौ ७।, तु ।१।)।

नञ्वर्जस्यार्व्वणो नस्य तुङ् स्यात् असौ त्ये परे। †

अर्व्वन्तौ अर्व्वन्तः, अर्व्वन्तम् अर्व्वन्तौ अर्व्वतः, अर्व्वता अर्व्वद्भ्याम् इत्यादि। अनञः किम् अनर्व्वा, हे अनर्व्वन्, अनर्व्वाणौ अनर्व्वाणः, इत्यादि। शेषं यज्ववत्। ‡

१८६। पथिमथ्यृभुक्षां थितो नमौ घौ।

(पथि-मथि-ऋभुक्षां ६।।।, थ-इतोः ६।।, नमौ १।।, घौ ७।)।

पथिन् मथिन् ऋभुक्षिन् एषां थस्य नम् स्यात् इकारस्य चाकारः घौ परे। §

---

* मघवन् शस्(१८१)=मघवतः। तुङो विकल्पे—(१८४,२३)=मघोनः इत्यादि।

† नास्ति नञ् यत्र सोऽनञ् तस्य। सिभिन्नेषु सर्व्वेषु प्रत्ययेषु अर्व्वणस्तुङ् स्यात्। उकारेत् (१८२) नुमर्थं, ङित्त्वादन्त्यस्य (१७) स्थाने। गौणेऽप्ययं विधिः, तेन अत्यर्व्वन्तौ इत्यादि। अर्व्वतां कुलम् अर्व्वत्कुलम् इत्यादौ (३१८) लुक्यपि, नञा निर्द्दिष्टमनित्यमिति न्यायात् (८३) लुकि न तन्नेत्यनेन न निषेधः। अर्व्वत इदम् आर्व्वतम् इत्यादौ प्रत्यये परे भवति। पाणिनिः ६।४।१२७।

‡ अर्व्वन्-औ=अर्व्वत्-औ (१८२)=अर्व्वन्तौ इत्यादि। अर्व्वा घोटकः। नञ्-रहितदशायां सिवर्जनात् नञ्युक्तदशायां सौ परे स्यादित्याशङ्क्याह अनर्व्वा इति, अत्रापि न स्यादित्यभिप्रायः।

§ पन्थाश्च मन्थाश्च ऋभुक्षाश्च ते तेषाम्। थ च इश्च थितौ तयोः। नम् च आश्च नमौ। थस्य नम् इति सम्भवतः पथिमथोरेव, इकारस्य आकार इति सर्व्वेषामेव। (१७) मित्त्वादादौ। पाणिनौ ७।१।८६ इति सूत्रेण इतः अत्; ७।१।८७ सूत्रेण तु थस्य न्यादेशः अतो न आत्करणम्। संक्षिप्तसारे प्रक्रियालाघवात् आनिति कृतम्।

१९७। टेरा सौ। (टे: ६।, आ ।१।, सौ ७।)।

पथ्यादीनां टेरा स्यात् सौ परे। पन्थाः पन्थानौ पन्थानः, पन्थानं पन्थानौ। *

१९८। लोपोऽच्यघौ। (लोप: १।, अचि ७।, अघौ ७।)।

पथ्यादीनां टेर्लोपः स्यात् अघावचि परे।

पथः पथा पथिभ्यामित्यादि। एवं मन्थाः, ऋभुक्षाः। †

(१३१) डतिसङ्ख्याया इति। पञ्च पञ्च पञ्चभिः पञ्चभ्यः पञ्चभ्यः।

१९९। नो नामि घः। (न: ६।, नामि ७।, घः १।)।

नान्तस्य नामि परे घः स्यात्। पञ्चानां, पञ्चसु। ‡

---

* सौ परे पूर्व्वसूत्रेण थस्य नमि इकारस्य च आकारे पन्थान् इति स्थिते राजा इतिवत् आदौ सिलोपे (१४८) पश्चान्नलोपे (११८) पन्था इति निर्व्विसर्गमेव रूपं स्यात्, एवं सम्बोधने नलोपाभावे हे पन्थान् इत्यनिष्टमपि स्यात्, अतः एतत्सूत्रकरणम्। इदानीन्तु आदौ टेराकारे हसपरत्वाभावात् सेर्लोपाभावे सस्य विसर्गे पन्थाः, हे पन्थाः इति। गौणेऽप्ययं विधिः, तेन अपन्थाः इति। पथिन्-औ (१९६)=पन्थानौ इत्यादि। पाणिनिः ७।१।८५।

† लोपोऽचीति कृते पथिमथ्यृभुक्षामिति विशेषविधिना बाधितत्वादघेरच एव प्राप्तौ अघाविति पुनः कथनं यादृग्जातीयस्येति न्यायेन स्यादेरच एव प्राप्त्यर्थं, तेन पथोऽन्त पथ्यन्त इत्यादौ न प्रसङ्गः। लोपः पौ इति कृतेऽपि स्त्रियां नान्तत्वाद्दीपि अतिमथिनी अत्यृभुक्षिणी इत्यादौ टिलोपानिष्टापत्तिः स्यात्। क्लीबे तु अतिमथी अत्यृभुक्षी कुले इत्यादौ टिलोपः स्यादेव, जसशसोस्तु अतिमन्थानि अत्यृभुक्षाणि कुलानि। मन्थाः मन्थन दण्डः, ऋभुक्षाः इन्द्रः। भट्टोजिदीक्षितस्तु—"स्त्रियान्नान्तलक्षणे ङीपि भत्वाट्टिलोपः सुपथी नगरी, अनृभुक्षी सेना" इति लिखितवान्। एवमेव कौमराः। पाणिनि ७।१।८८।

‡ नुमसम्बन्धि-नकारेण सहित आम=नाम तस्मिन् नामि, तेन यज्वनां दक्षिणाः इत्यादौ न प्रसङ्गः। पञ्चानामिति आमो (११०) नुमागमे अन्तरङ्गत्वादनेन दीर्घे (११८ नो लुप् फेऽघाविति नस्य लुप्। मुख्ये एवायं विधिः, गौणत्वे तु प्रियपञ्चामिति पाणिनिः ६।४।७।

२००। वाष्टनो जस्शसोर्डौः।

(वा ।१।, अष्टनः ५।, जस्शसोः ६॥, डौः १।)।

अष्टनः परयो र्जस्शसो र्डौः स्यात् वा, ड इत्। अष्टौ अष्ट, अष्टौ अष्ट। *

२०१। ङा क्तौ वा। (ङा ।१।, क्तौ ७।, वा ।१।)।

अष्टनो ङा स्यात् वा क्तौ परे, ङ इत्। अष्टाभिः अष्टभिः, अष्टाभ्यः अष्टभ्यः, अष्टाभ्यः अष्टभ्यः, अष्टानाम्, अष्टासु अष्टसु। †

२०२। धोर्मोनः फम्वि।

(धोः ६।, मः ६।, नः १।, फम्वि ७।)।

धोर्मस्य नः स्यात् फे मे वे च परे। प्रशान् प्रशामौ प्रशामः, प्रशामं प्रशामौ, प्रशान्भ्यामित्यादि। ‡

---

* मुख्ये एवायं विधिः, तेन प्रियाष्टानः इत्यादौ न स्यात्। डौ इत्यस्य विकल्पपक्षे अष्ट इत्यत्र बलवत्त्वादादौ (१३१) जस्शसोर्लुकि (९३) लुकि न तत्रेति निषेधात् (२०१) न ङा। पाणिनिः ७।१।२१।

† ङ इत् (१७) अन्त्यस्य स्थाने। अनुवृत्तावपि वा-ग्रहणं परत्र निवृत्त्यर्थम्। अष्टानामिति आदौ (११०) नुमागमे पश्चात् अनेन ङादेशः, विकल्पपक्षे (११०) नुमागमे, (१९९) दीर्घे, (११८) नकारलुप्, एकाकृति पदद्वयम्। पाणिनिः ७।२।८४। इति नकारान्ताः।

‡ स्यादीय-हसस्यैव भसंज्ञकत्वे वमयोरप्राप्तौ पृथग्वचनम्। ततश्च धात्ववयवीभूतमकारस्य फे परे न स्यात्, तिङन्तकृदन्तयो र्मकारस्य च वमयोः परयोः न स्यादित्यर्थः। प्र-शमधातोः क्विपि (१०३८) प्रशाम् शब्दः, प्रशाम्-सि (१४८) अनेन मस्य नः=प्रशान्। प्रशाम् भ्याम्, अनेन मस्य नः=प्रशान्भ्यां, (८३) दान्तवत्त्वात् न नस्य (५०) अनुस्वारः। तथा स्थानिवत्त्वात् नस्य न लुप् (११८)। वमयोः परयोः यथा, जङ्गम्मि जङ्गम्वः जङ्गम्मः, जगन्वान् इत्यादि। पाणिनि. ८।२।६४।

२०३। इदमोऽयमियं पुंस्त्रियोः सौ।

(इदमः ६।, अयम्-इयम् ।१॥, पुंस्त्रियोः ७॥, सौ ७।)।

इदमः पुंलिङ्ग-स्त्रीलिङ्गयोः क्रमेणायमियमौ स्तः सौ परे। अयम्। *

२०४। टोमोऽदसश्च क्तौ।

(टः ६।, मः १।, अदसः.६।, च ।१।, क्तौ ७।)।

इदमोऽदसश्च दस्य मः स्यात् क्तौ परे। इमौ इमे, इमम् इमौ इमान्। †

२०५। टौसोरिदमोऽनकोऽनः।

(टा-ओसि ७।, इदमः ६।, अनकः ६।, अनः १।)।

अनक इदमः टौसोः परयोरनः स्यात्। अनेन। ‡

२०६। सभ्यः। (सभि ७।, अः १)।

अनक इदमः अः स्यात् से भे च परे। §

---

* अयमियम् इति लुप्तप्रथमाद्विवचनान्तं पुंस्त्रियोरित्यनेन यथासङ्ख्यार्थम्। इदन्तु मुख्यत्वे एव, गौणे तु अतीदम् अतीदमौ इत्यादि। पाणिनिः ७।२।१०८,१११।

† साक्षात् क्तौ परे इत्यर्थः। अस्य पुत्रः—इदम्पुत्रः, अमुष्य कन्या—अदःकन्या, अमीभिः कृतम्—अदःकृतम्, इत्यादौ मोलुंकि न दस्य मः। इदम्-औ (१३३, २०४, २३)=इमौ। इदम्-जस् (१३३,२०४,११२,२३)=इमे इत्यादि। पाणिनिः ७।२।१०९।

‡ नास्ति अक् यस्य सोऽनक् तस्य। इदमो ग्रहणम् अदसो निवृत्त्यर्थम्। इदम्-टा =अन-टा (१०६,२३)=अनेन। पाणिनिः ७।२।११२ (इद स्थाने अन)।

§ स च भ च तस्मिन् सभि। अनक इदम इत्यनुवर्त्तते। विभक्त्यवयव-सभयोः परयोरित्यर्थः। तेन अस्य सिद्धिः इदंसिद्धिरित्यादौ न प्रसङ्गः। यत्तु अनक्तौ—इमकस्मै धनं देहि, अथ अस्मै भूमिं देहि, इमकाभ्यां वेदोऽधीतः अथ आभ्यां शास्त्रमधीतम्, इति

(१०८) श्रा क्तिमभवि । आभ्याम् ।

२०७ । भिस भिसोऽदसश्च ।

(भिस ।१।, भिस ६।, अदस: ५।, च ।१।) ।

अनक इदमोऽदसश्च परस्य भिसो भिसेव स्यात्, न त्वैस् । *
(१०९) त्वेसभ्येः । एभिः । (१३३) टेरत्वे, (२०४) दस्य मत्वे,
(११२) ङे स्मै, पश्चात् (२०६) अः । अस्मै आभ्याम् एभ्यः,
अस्मात् आभ्याम् एभ्यः,अस्य अनयोः एषाम्,† अस्मिन् अनयोः
एषु ।

अनकः किम्—

२०८ । त्यादिव्यासभोसक्तिस्त्रिस्वे वाक् प्राक् टे व्यक दश्च ।

(त्यादि—सेः ६।, वा ।१।, अक ।१।, प्राक् ।१।, टेः ५।, व्यक ।१।, दः १।, च ।१।) ।

त्याद्यन्तस्य व्यस्य स-भ-ओस्-वर्ज त्यन्त-स्तेः स्त्रेश्च टेः पूर्व्वोऽक्
स्याद्वा, व्यकस्य दश्च । ‡

प्रयोगः—तत् नञा निर्द्दिष्टमनित्यमिति न्यायात् समाधानीयम् । अत्र सूत्रे इदम् इत्यत्र
"प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यैव ग्रहणम्" इति न्यायात् आम्व्यवधानेऽपि स्यादिति
वक्तव्यम् (हसन्तस्त्रीलिङ्गपादो द्रष्टव्यः) । पाणिनि ७।२।११३, १।१।२१ ।

* अत्र अनक इति विशेषणम् अदसोऽपि, अनकभ्याम् इदमदोभ्यां परस्य भिसो
भिस् एव स्यात् तद्रूपेणैव स्थितिरित्यर्थः । तेन अमुकैरिति सिद्धम् । नैसदसश्चेति कृते
सिद्धेऽपि गौरवं कदाचिदैसप्रामाण्यार्थं, तेन इमैर्गुणैरित्यादि सिद्धम् । क्रमदीश्वरेण तु"इमै-
र्विपक्वमिति तु इदमर्थेमशब्दस्य रूपम्" इति लिखितम् । पाणिनिः ७।१।११ ।

† इदम्-आम् (१३३,२०४,११३,२०६,१०९,१११)=एषाम् ।

‡ ति आदिर्यस्य स त्यादिः । सच भच ओस् च ते सभोसः, न विद्यन्ते सभोसो
यत्र सा असभोस्, असभोस् क्तिर्यस्मात् सोऽसभोसक्तिः, स चासौ स्त्रिश्चेति असभोस्-
क्तिस्त्रिः । त्यादिश्च व्यश्च असभोसक्तिस्त्रिश्च स्त्रियति तस्य ।

इमकेन इमकाभ्याम् इमकैरित्यादि। *

२०९। द्वीटौसीदैतयोरेनोऽनूक्तौ।

(द्वी-टा-ओसि ७।, इद-एतयोः ६॥, एनः १।, अनूक्तौ ७।)।

द्वयां टौसोश्च परत इदमेतदोरिदैतयोरेनः स्यात् उक्तस्य पश्चादुक्तौ। †

इमं विद्धि हरेर्भक्तं विद्ध्यथैनं शिवार्च्चकम्।
इमाविमान् वित्त शैवान् एनावेनांस्तु वैष्णवान्॥
अनेन पूजितः कृष्णोऽथैनेन गिरिशोऽर्च्चितः।
अनयोः केशवः स्वामी शिवः स्वामी अथैनयोः॥ ‡

त्याद्यन्तस्य भवति पचतीत्यादे, व्यस्य प्र परा धिक् इत्यादेः, रु-भ-ओस्-भिन्न-विभक्त्यन्त-सर्व्वनामशब्दस्य केवलसर्व्वनामशब्दस्य च टेः (९२) पूर्व्वम् अक् स्यात् वा, अकि कृति अव्ययान्त-वास्य दश्च स्यादित्यर्थः।

यथा—भवतकि भवतक इत्यादि। प्रक परका उच्चकैः धकित् इत्यादि। साभि इत्यव्ययस्य टेः पूर्व्वम् अक् न स्यादिति वक्तव्यम्। पूर्व्वणक युष्माककमित्यादि। सभोस्-त्यन्तस्य तु अस्मे आसाम् आभ्याम् अनयोरित्यादिषु न स्यात्, असकौ युष्मकत् इत्यादिषु सभयोरभावे स्यादेव। केवलस्य तु सर्व्वकेण सर्व्वकत्र इत्यादि। विभक्त्युत्पत्तेः पूर्व्वमकि कृते पुनर्व्विभक्त्यन्तस्य अक् न स्यात्, तेन सर्व्वकेणक इत्यादयः प्रयोगा न स्युः। पाणिनिः ५।३।७१,७२।

* इमकेन इत्यादिषु विभक्त्युत्पत्तेः प्राक् अकि कृते (२०५, अन) (२०६, अ) (२०७, भिस्) एते आदेशा न स्युरिति।

† द्वी च टा च ओस् च तस्मिन्। इतश्च एतश्च तौ तयोरिदैतयोः। अनु पश्चात् उक्तिः अनूक्तिस्तस्याम्। अनूक्तिरिह यमुद्दिश्य पूर्व्वमुक्तिः तमुद्दिश्य यदि पश्चादुक्तिः स्यादिति बोध्यं, तेन इमं भोजय, इमं प्रेरय, इत्यत्र एकस्य भोजनमपरस्य प्रेरणमतो न स्यात्। इदैतयोरिति निर्द्देशात् मकारदकारौ हित्वा भवतीति, तेन क्लीवे एनदिति (२४२) स्वयं वक्ष्यति। एन इति प्रकृत्यन्तरमप्यस्ति। पाणिनिः २।४।३४।

‡ हे साधो, इमं जनं हरेर्भक्तं विद्धि जानीहि इति उक्तिः, अथ, एनं (तमेव) शिवार्च्चकं विद्धि इति पश्चादुक्तिः। एवं सर्व्वत्र। हे साधवः, इमौ इमान् शैवान् वित्त, एनौ

(१३३) त्यदां टेरः क्वौ। कः कौ के इत्यादि।*

(१७७) झभान्तस्येति बस्य भः। भुत् भुद् बुधौ बुधः, बुधा भुद्भ्यामित्यादि।†

२१०। युजिरोऽसे नुण् घौ।

(युजिरः ६।, असे ७।, नुण् ।१।, घौ ७)।

युजिरो युज्शब्दस्य नुण् स्यात् घौ परे, नतु से।‡

२११। चुङ् क्रुङ् युङ् स्रग् दिगसृगृत्विक् दधृक् दृक् स्पृक् स्पृगुष्णिहां कुङ् भौ।

(चुङ्—उष्णिहां ६।।।, कुङ् ।१।, भौ ७।)।

चवर्गान्तानामञ्चादीनाञ्च कुङ् स्यात् भौ परे।§

एनान् वैष्णवान् वित्त, यूयमिति शेषः। अत्र इमौ इमान् इत्युभयोर्विशेषणं शैवान् इति, तथा एनौ एनान् इत्युभयोर्विशेषणं वैष्णवानिति उक्तवता आचार्य्येण नानालिङ्गानां नानावचनान्तानां विशेष्याणाम् एकं विशेषणं परस्यैव लिङ्ग सङ्ख्याञ्च भजतीति सूचितम्। अनेन कृष्णः पूजितः, अथ एनेन (तेनैव) गिरिशोऽर्च्चितः। अनयोः स्वामी केशवः, अथ एनयोः स्वामी शिवः इत्यर्थः। अत्र द्वितीयाया एकद्विबहुषु वचनेषु टा-ओस्-विभक्त्योश्च यथाक्रममुदाहृतमिति।

* काः इति किम् सि, लोपस्वरादेशयोस्तु स्वरादेशविधिर्बलीति न्यायात् आदौ (१३३) टेरत्वे, से विसर्गः। किम्-जस् (१३३, ११२, २३)=के इत्यादि। इति मकारान्ताः।

† बुध्यते इति बुधधातोः क्विपि, बुध्-सि (१४८,१७७,६४)=भुत् भुद् इत्यादि। इति धकारान्ताः।

‡ युजिर इति कथनात् "युजिर् योगे" इति धातोः क्विबन्तस्य युज्शब्दस्येत्यर्थः, नतु युज् समाधावित्यस्य। पाणिनिः ७।१।७१।

§ चुश्च अन्च्च क्रुन्च्च युनज्च सज्च दिश्च असृज्च ऋत्विज्च दधृष्च दृश्च स्पृश्च स्पृष्च उष्णिह्च ते तेषाम्। चुश्चवर्ग, सच धात्ववयवएव बोध्यः, तेन बहुच् बहुनज् इत्यादौ न स्यात्। युनज् इति युज्शब्दस्य (२१०) नुणि कृते रूपम्। अन्च

(५०) ञोर्नुर्भस्यदान्ते। (५१) जपे ञम् नोः। (१९३) स्यान्त-स्यारात् लुप् फे। युङ् युञ्जौ युञ्जः, युञ्जं युञ्जौ युजः, युजा युग्भ्यामित्यादि। *

असे किं—सुयुक् सुयुजौ सुयुजः इत्यादि। युजिरः किं—युक् समाधिमान्। अञ्च् क्रुञ्च् युजामेव प्राक् कुङ् पृथक्-ग्रहणात्, तेन खन् खञ्जौ खञ्जः इत्यादि। †

(१५४) भ्रस्जादीति षङ्। (१५५) षोड़ः फे। राट् राड् राजौ राजः। एवं विभ्राट् देवेट् परिव्राट् विश्वसृट् परिमृट्। ‡

क्रुञ्च युञ्ज एषां चवर्गान्तत्वेनैव प्राप्तौ पृथग्ग्रहणं नियमार्थं, नियमश्च एषां त्रयाणामेव (१९३) संयोगान्तलोपात् पूर्वं कुङ् स्यात्, अन्यथा संयुक्तचवर्गान्तानान्तु आदौ संयोगान्तलुप्। सृज् असृज् ऋत्विज् एषां चवर्गान्तत्वेऽपि, (१५४) भ्रस्जादीति षङ्-बाधनार्थं ग्रहणम्। ऊर्द्धं स्निह्यतीति क्विपि उष्णिह्, अस्य (१७८) मुहादिविहितघढौ विकल्पपक्षे (१७५) ढोढ्ढाभावित्यस्य बाधनार्थं ग्रहणम्। कुङ् इति कुः कवर्गः, ङ इत्। चवर्गमध्ये ककारस्य (१५४) भ्रस्जादीति बाधितत्वेन, धात्ववयव जकारासम्भवेन च च ज झ इत्येषां स्थाने क्रमेण क ग घ इत्येते स्युरित्यर्थः। चवर्गसाहचर्यात् अन्येषामपि अत्र गृहीतशब्दानां क ग घ एषामेकतम एव स्यात्, पश्चात् झपभसामित्यनेन यथायोग्यं कगौ स्यातामित्यर्थः। रुज भुज धातुभ्यां क्तप्रत्यये रुग्णः भुग्नः इत्यादौ अन्तरङ्गत्वादादौ अनेन जस्य गकारे पश्चात् तकारस्य नकारः। रामानन्द-काशीश्वरौ तु अत्र कुङ् कृत्वा, रुग्ण-भुग्नादिसाधनाय सूत्रान्तरं कल्पयतः। भौ परे इति चवर्गान्तार्थमेव तेन चवर्गान्तधातूनामपि स्यात्, अन्यथा केवलशब्दानामेव ग्रहणात् हसे विरामे चेत्यर्थः। विश्वसृज् शब्दस्य सिद्धान्तकौमुदीमते विश्वसृट् इति, क्रमदीश्वरमते तु विश्वसृक् इति रूपम्। पाणिनिः ३।२।५९, ८।२।३०, ६२।

* युज्-सि (१४८,२१०,२११,५०,५१,१९३)=युङ्। युज्-औ (२१०,५०,५१) =युञ्जौ। इत्यादि।

† खजि पाङ्गुल्ये इति खन्ज धातोः क्विप्प्रत्यये, खन्ज-सि (१४८,१९३)=खन्।

‡ राजते इति राजधातोः क्विपि राट् राड्। एवं विभ्राजते इति विभ्राट्। देवान् यजतीति देवेज् शब्दः। परिव्रजतीति, विश्वं सृजतीति, परिमृजतीति—परिव्राट् भिक्षुः, विश्वसृट् (वा विश्वसृक्) विधिः, परिमृट् मार्जकः।

२१२। विश्वराजोऽदा। (विश्वराजः ६।, अत् ।१।, आ ।१।)।

विश्वराजोऽकारस्य आ स्यात् भौ परे।

विश्वाराट् विश्वाराड् विश्वराजौ विश्वराजः। *

२१३। स्यादेः सो लोपः कोऽषढन्यरचः।

(स्यादेः ६।, सः ६।, लोपः १।, कः ६।, अषढन्यरचः ६।)।

स्यादौ स्थितस्य सस्य लोपः स्यात् भौ परे, कस्य च—न तु षढाभ्यामन्यस्य स्थाने जातस्य रचस्य। †

भृट् भृड्। (६४) झपझसोरिति सस्य दः, (४६) सुश्चुभिश्चुश्चादिति, भृज्जौ भृज्जः इत्यादि। ऊर्क् ऊर्ग् ऊर्जौ ऊर्जः इत्यादि। ऋत्विक् ऋत्विग् ऋत्विजौ ऋत्विजः इत्यादि। अवयाः हे अवयाः हे अवयः अवयाजौ अवयाजः, अवयोभ्यामित्यादि। ‡

---

* विश्वराजशब्दस्य विश्वस्यैव अकारः सम्भवति अतस्तस्यैव आत्वं, तेनास्य धातुत्वासम्भवात् भा इत्यस्यानुवृत्तावपि तदन्तःपाति-फे परे एव बोध्यम्। विश्वराज्-सि (१४८,१५४,१५५,६४,२१२)=विश्वाराट् विश्वाराड्। पाणिनि. ६।३।१२८।

† स्यः संयोगः, सस्यादिः स्यादिस्तस्य। षश्च ढश्च षढौ ताभ्यामन्यः षढन्यः, ततः (४३३) इदमर्थे अप्रत्यये षढन्यः षढन्यजात इत्यर्थः। रच इति उपचारात् रचधातु-सम्बन्धीत्यर्थः, षढन्यश्च रच च इति समाहारे षढन्यरच, न षढन्यरच अषढन्यरच तस्य, कः इत्यस्य विशेषणम्। संयोगादेः सस्य लोपः स्यात, एवं षढजातभिन्नककारं रचधातुककारञ्च वर्जयित्वा अन्य ककारस्य लोपः स्यात्, ततश्च जातककारमध्ये षढजातककारस्य रचभिन्नधातु-ककारस्य च (संयोगादिस्थितस्य) लोपः स्यात भौ परे इत्यर्थः। तेन, विविट् लिलिट् अरक्षीत् इत्यादौ स्यात्, नतु पिपक् गोरक् इत्यादौ। कस्माता इत्यादौ संयोगस्यादान्तत्वान्न स्यात्। पाणिनिः ८।२।२९।

‡ भ्रस्ज-धातोः क्विपि, (६६१) भृस्ज-सि (१४८,२१३,१५४,१५५,६४)=भृट् भृड्। ऊर्जधातोः क्विपि, ऊर्ज्-सि (१४८,२११,६४)=ऊर्क् ऊर्ग्। ऋतौ यजतीति ऋतु-यजधातोः क्विपि ऋत्विक् पुरोहितः। अवयजतीति निपातनात् विणि अवयाज्-सि (१४८,१८४,१८५,१०२)=अवयाः। सम्बोधने (१८६)=अवयाः अवयः। अवयाज्-भ्याम् (१८४, १०२,६९,२३)=अवयोभ्याम्। इति जकारान्ताः।

२१४। त्यदां तदोः सः सौ।

(त्यदां ६।।।, तदोः ६।।, सः १।, सौ ७।)।

त्यदादीनां तदयोः सः स्यात् सौ परे। स्यः त्यौ त्ये इत्यादि सर्व्ववत्। एवं तद्। एषः एतौ एते इत्यादि। *

(२०८) ह्रीटोसीदेतयोरेनोऽनक्ताविति प्रयोगस्तु इदम्वत्। †

२१५। युष्मदस्मदो-स्त्वाहौ युवावौ यूयवयौ त्वन्मदौ तुभ्यमह्यौ तवममौ सि-द्व-जस्-क्ष-ङे-ङस्सु।

(युष्मद् अस्मदोः ६।।, त्व-अहौ १।।, युव-आवौ १।।, यूय वयौ १।।, त्वद्-मदौ १।।, तुभ्य-मह्यौ १।।, तव-ममौ १।।, सि-द्व-जस्-क्ष-ङे-ङस्सु ७।।।)।

अनयोः क्रमादेते आदेशाः एषु परेषु क्रमात् स्युः। ‡

२१६। ङेभ्योर्मः।

(ङे भ्योः ६।।, मः १।)।

---

* त्यदामिति बहुवचनं गणार्थं त्यदादीनामित्यर्थः। सौ परे त्यदादीनां (१३३) टेरकारे अवशिष्टौ यौ तकारदकारौ तयोः स्थाने सः स्यादित्यर्थः। तेन त्यद्-तद्-एतदां तकारस्य अदसो दकारस्येति यावत्। अत्र सिसंज्ञकानां त्यदादीनां ग्रहणात् अतित्यदादीनां न स्यात्। पाणिनिः ७।२।१०६।

† इदम्वदिति——एतं विद्धि हरेर्भक्तं विद्यार्थैनं शिवार्च्चकमित्यादि।

‡ त्वश्च अहश्च त्वाहौ इत्यादि द्वन्द्वः। सिश्च द्वश्च जस् च क्षश्च ङेश्च ङस् च ते तेषु। द्वं द्विवचनं, क्षम एकवचनम्। मुख्यत्वे गौणत्वे चायं विधिः, यथा त्वम् अहम्, अतित्वम् अत्यहम्।

क्रमश्च——सौ परे	द्विवचने	जसि परे	एकवचने	ङे परे	ङसि परे
युष्मदः स्थाने त्व	युव	यूय	त्वद्	तुभ्य	तव
अस्मदः स्थाने अह	आव	वय	मद्	मह्य	मम

पाणिनिः ७।२।९४,९२,९३,९७,९५,९६।

युष्मदस्मद्भ्यां परस्य ङे इत्यस्य स्थाने म: स्यात्। त्वं अहं। *

२१७। सभमौष्वाङ्। (स-भ-अम्-औषु ७॥, आङ् ।१)।

युष्मदस्मदोराङ् स्यात् से भे अमि औकारे च परे।
युवां आवां, यूयं वयं, त्वां मां, युवां आवां। †

२१८। शस्-भ्यंस्-ङसि-भ्यस्-ङस्-सामां न-ङभ्यम्-त-त-ङाकमः। (शस्—सामां ६॥, न—आकमः १॥)।

युष्मदस्मद्भ्यां परेषामेषां स्थाने न-ङभ्यम्-त-त-ङ-आकम् एते क्रमात् स्युः, ङ इत्। युष्मान् अस्मान्। ‡

---

* एतदादिषु चतुर्षु सूत्रेषु विधानं मुख्यगौणसाधारणम् आचार्य्यसम्मतम्। युष्मद्, अस्मद्-सि (२१५,२१६)=त्वं अहं। पाणिनि: ७।१।२८।

† आङो ङ इत् अन्त्यवर्णस्थाने। भे परे आङ्करणं भिसस्थाने ऐसवारणार्थम्। से भे मात्रादेव, तेन त्वं युष्मत् इत्यादौ न आङ्। युष्मद्, अस्मद्-औ (२१५,२१७,२१६)=युवां, आवां। युष्मद्, अस्मद्-अम् (२१५,२१७,२१६)=त्वां मां। पाणिनि: ७।२।८८।

‡ स्वसम्बन्धि-सकारेण सहित आम्=साम्, शस् च भ्यस् च इत्यादिद्वन्द्वे तेषाम्। न च ङभ्यम् च इत्यादिद्वन्द्वे ते। अत्र नकारे तकारद्वये च अकार उच्चारणार्थः। (१३१) उतिव्यणान्तेत्यादिना लिङ्गविहित-कार्य्यनिषेधात् (१०५) पुंसि तु शस् न इत्यस्य अप्राप्तौ त्रिषु लिङ्गेषु शसो न-विधानम्। भ्यसो भ्यम् न कृत्वा ङभ्यम्करणम् (२१७) आङ्निवारणार्थम्। ङसौ ङकरणं (१०६) स्यवारणार्थम्। आम: सुम् (११३) मुख्ये एव भवति, अत्र च साम आकम्विधानात् गौणे आम: (२१९) एङ् एव।

क्रमश्च——

शस्	४ भ्यस्	ङसि	५ भ्यस्	ङस	साम्	एषां	स्थाने—
न्	ङभ्यम	त,	त्	ङ	आकम्	एते	क्रमात् स्युः।

युष्मद्, अस्मद्-शस् (१३३,२१८,१०४)=युष्मान्, अस्मान्। पाणिनि: ७।१।२९,३०,३२, ३१,२७,३३।

२१९। एङ् टाङ्याामि। (एङ् ।१।, टा-ङि-आमि ७।)।

युष्मदस्मदोरेङ् स्यात् टाङ्योः परयोरामि च, ङ इत्। *

त्वया मया युवाभ्यां आवाभ्यां युष्माभिः अस्माभिः, तुभ्यं मह्यं युवाभ्यां आवाभ्यां युष्मभ्यं अस्मभ्यं, त्वत् मत् युवाभ्यां आवाभ्यां युष्मत् अस्मत्, तव मम युवयोः आवयोः युष्माकं अस्माकं। †

अतित्वयां अतिमयां अतियुवयां अत्यावयां अतियुष्मयां अत्यस्मयां। ‡

(२१५) क्त-द्वयोरर्थस्यापि ग्रहणात्। एवं सर्व्वत्र। §

---

* एङो ङ इत् अन्त्यस्य स्थाने। मुग्धत्वे (२१८) आम आकमविधानात् अत्र आमीति गौणार्थमेव। पाणिनि. ७।२।८९।

† युष्मद्, अस्मद्-टा (२१५, १३३, २१९, ३५) = त्वया, मया। युष्मद्, अस्मद् भ्याम् (२१५,२१७) = युवाभ्यां, आवाभ्यां। युष्मद् अस्मद् भिस (२१७) = युष्माभिः, अस्माभिः। युष्मद्, अस्मद् ङे (२१५,२१६) = तुभ्यं, मह्यं। युष्मद्, अस्मद्-४ भ्यस् (२१८,१२६) = युष्मभ्यं, अस्मभ्यं। युष्मद्, अस्मद्-ङसि (२१५.२१८) = त्वत्, मत्। युष्मद्, अस्मद्-५ भ्यस् (१३३,२१८) = युष्मत् अस्मत्। युष्मद्, अस्मद्-ङस् (२१५, २१८ १२६) = तव, मम। युष्मद्, अस्मद्-ओस् (२१५,१०६,१०२) = युवयोः, आवयोः। युष्मद्, अस्मद्-आम् (१३३, ११३, २१८) = युष्माकं, अस्माकं।

‡ त्वामतिक्रान्तानामिति वाक्ये अतियुष्मद्शब्दस्य आम्विभक्तौ, व्यासवाक्यान्तर्गतत्वामिति एकवचनस्य अर्थं गृहीत्वा (२१५) त्वद् आदेशे, (१३३,२१९,३५) अतित्वयामिति, एवं मामतिक्रान्तानाम् अतिमयां। युवामतिक्रान्तानामिति वाक्ये युवामिति द्विवचनस्य अर्थं गृहीत्वा युव आदेशे अतियुवयां, एवम् आवामतिक्रान्तानाम् अत्यावयां। युष्मान् अतिक्रान्तानामिति वाक्ये बहुत्वे आदेशाभावात् अतियुष्मद्शब्दस्य आम्विभक्तौ (१३३,२१९,३५) अतियुष्मयां, एवम् अत्यस्मयामिति।

§ अतित्वयामित्यादौ बहुवचने त्वदाद्यादेशाः कथमित्याशङ्क्याह क्तद्वयोरिति। तत्रायमर्थः---युष्मदस्मदो मुख्यत्वे गौणत्वे च, (२१५) सि-जस्-ङे-ङसां स्वरूपेण ग्रहणात् तेषु परेषु त्व अह यूय वय तुभ्य मह्य तव मम एते आदेशाः स्युरेव। सिजसादिभ्योऽन्यत्र युष्मदस्मदोर्मुख्यत्वे एकवचने परे त्वन्मदौ, द्विवचने परे युवावौ, बहुवचने

त्वयि मयि युवयोः आवयोः युष्मासु अस्मासु । *

२२० । द्वीचीषीणां ङैङ्वैं स्ते-मे वां-नौ वस्-नसौ वाऽपादवाक्यादौ-चचवाहाहैवाद्दगद्दश्यर्थैः-त्वा-मा त्वमा ।

(द्वी-ची-षीणा ६॥, ङैः ३॥ ङैः ३॥, ङ्वैः ३॥, ते मे ।१॥, वां-नौ ।१॥, वस्-नसौ १॥, वा ।१।, अपादवाक्यादौ ७।, अ च वा ह अह एव अद्दगद्दश्यर्थैः ३॥, त्वा मा ।२॥, तु ।१।, अमा ३।) ।

परे स्वरूपेणावस्थानम् । गौणत्वे तु परविभक्तिमनादृत्य केवलयुष्मदस्मदादेरेकत्वे त्वन्मदौ, द्वित्वे युवावौ, बहुत्वे स्वरूपेणावस्थानमिति उदाहरणं यथा—त्वामतिक्रान्तः त्वामतिक्रान्तौ त्वामतिक्रान्ताः इत्यादि वाक्येषु—अतित्वं अतित्वां अतियूयं, अतित्वां अतित्वां अतित्वान्, अतित्वया अतित्वाभ्यां अतित्वाभिः, अतितुभ्यं अतित्वाभ्यां अतित्वभ्यं, अतित्वत् अतित्वाभ्यां अतित्वत्, अतितव अतित्वयोः अतित्वयां, अतित्वयि अतित्वयोः अतित्वासु । युवामतिक्रान्तः युवामतिक्रान्तौ युवामतिक्रान्ताः इत्यादि वाक्येषु—अतित्वं अतियुवां अतियूयं, अतियुवां अतियुवां अतियुवान्, अतियुवया अतियुवाभ्यां अतियुवाभिः, अतितुभ्यं अतियुवाभ्यां अतियुवभ्यं, अतियुवत् अतियुवाभ्यां अतियुवत्, अतितव अतियुवयोः अतियुवयां, अतियुवयि अतियुवयोः अतियुवासु । युष्मानतिक्रान्तः युष्मानतिक्रान्तौ युष्मानतिक्रान्ताः इत्यादि वाक्येषु—अतित्वं अतियुष्मां अतियूयं, अतियुष्मां अतियुष्मां अतियुष्मान्, अतियुष्मया अतियुष्माभ्यां अतियुष्माभिः, अतितुभ्यं अतियुष्माभ्यं अतियुष्मभ्यं, अतियुष्मत् अतियुष्माभ्यां अतियुष्मत्, अतितव अतियुष्मयोः अतियुष्मयां, अतियुष्मयि अतियुष्मयोः अतियुष्मासु । एवं मामतिक्रान्तः इत्यादिषु आवामतिक्रान्तः इत्यादिषु अस्मानतिक्रान्तः इत्यादिषु च बोध्यम् प्रयोगः । त्वया कृतं त्वत्कृतम्, मम धनं मद्धनम्, त्वामिच्छति त्वद्यति, त्वामाचष्टे त्वदयति, त्वदीषदूनं त्वत्कल्पं इत्यादि विभक्तिलुकि अपि एकवचनस्य अर्थं गृहीत्वा त्वन्मदादेशः स्यादेव ।

द्विवचनस्यार्थे क्वचिदादेशा न स्युरिति वक्तव्यम्—यथा, युवयोरयं युष्मदीयं, युवयोर्धनं युष्मद्धनम्, आवयोर्गुरुः अस्मद्गुरुः, आवाभ्यां कृतं अस्मत्कृतम् । युवामिच्छति युवामिवाचरति वा युष्मद्यति, युवामाचष्टे युष्मयति, इत्यादावपि द्विवचनार्थे आदेशो न स्यात् ।

* युष्मद्, अस्मद्-ङि (२१५, १३३, २१८, ३५)=त्वयि, मयि । युष्मद्, अस्मद्-सप् (२१७)=युष्मासु, अस्मासु । अत्र "णिङक्तिवन्तयोश्च त्वमादयस्मादौ" इत्यादिभिः क्रमदीश्वरसूत्रैः णिचक्तिवन्तयोः युष्मदस्मदोरुदाहरणानि तेन प्रदर्शितानि । यथा, युष्मान् युष्माभिः युष्मभ्यं (युष्मभ्यमिति कातन्त्रम्), युष्मत् युष्माकम् (युष्माकमिति कातन्त्रम्), युष्मासु ।

युष्मदस्मदोः द्वीचीषीणां ङैः सहितयो स्ते-मे, द्वै वां-नौ, ट्वै वस्-नसौ, क्रमाद्वा स्याताम्, श्रमा-युक्तयोस्तु त्वा-मा, न तु पादस्य वाक्यस्य चादौ स्थितयोः, न चवाह्वै-रदर्शनार्थदृश्यर्थ-श्रुभिश्च योगे। *

दामोदरस्त्वावतु मापि मित्र,
ददातु ते मेऽपि मुदं मुकुन्दः।
निहन्तु ते विष्णुरघानि मेऽपि,
रक्षत्वसौ वामपि नौ मुरारिः॥
ददातु वां नावपि शर्म्म कृष्णः,
करोतु वां श्रीदयितो दयां नौ।

---

* पादश्च वाक्यञ्च पादवाक्ये, तयोरादिः पादवाक्यादिः, न पादवाक्यादिरपाद-वाक्यादिस्तस्मिन्। पादः पद्यचतुर्भागैकभागः, "पादशब्देनात्र ऋक्पादः श्लोकपादश्च गृह्यते" इति पाणिनिटीका। वाक्यं परस्परसाकाङ्क्षपदसमूहः। "साख्यातं साव्ययं सकारकं सविशेषणं वाक्यमिहाभिप्रेतम्, न तु लौकिकपदसङ्घातः सम्बन्धार्थौ वाक्य मिति" इति क्रमदीश्वरः। दृक् दर्शनम्, न दृक् अदृक्, दृशिर्दर्शनमर्थो येषां ते दृश्यर्थाः, अदृशि अदर्शने दृश्यर्थाः अदृग्दृश्यर्थाः ; च च वा च ह च अह च एव च अदृग्दृश्यर्थाश्च ते चवाहाहैवादृग्दृश्यर्थाः, पश्चात् नञ्योगे तैः।

द्वितीया-चतुर्थी-षष्ठीनाम् एकवचनैः सह युष्मदस्मदौ ते-मे, द्विवचनैः सह वां-नौ, बहुवचनैः सह वस्-नसौ, अमा सहितयोस्तु त्वा-मा, क्रमात् वा स्याताम्। अमा सहितयो स्त्वा-मा इति विशेषाभिधानेन चतुर्थीषष्ठ्योरेकवचनेन ते-मे, द्वितीयैकवचनेन त्वा-मा इति निष्कर्षः। पादस्य वाक्यस्य वा आदौ स्थितयोः युष्मदस्मदोरेते आदेशा न स्युः। च वा ह अह एव इति पञ्चभिरव्ययैर्योगेऽपि एते आदेशा न स्युः। अत्र ह अह स्थाने हा हु इति व्याख्यानमयुक्तं पाणिनि-सर्व्ववर्म्म-चन्द्र-पद्मनाभ-क्रमदीश्वरादि-मतविरोधात्। एवं स्वभावात् दर्शनार्था ये धातवस्ते यदि धातूनामनेकार्थत्वात् दर्शनभिन्ने अर्थे वर्त्तन्ते, तदा तैर्योगेऽपि एते आदेशा न स्युरित्यर्थः। पाणिनिः ८।१।२२,२०,२१,१८,२४,२५,२२।

पुष्णातु वो नोऽपि हरिर्धनं वो
दद्यातु नो. हन्त्वशुभानि वो नः ॥ *

अपादवाक्यादौ किं—

युष्मानवत्वविरतं कृष्णोऽस्मान् पातु शङ्करः । †

अ-चादियोगे‡ किं—

तुभ्यं मह्यञ्च दद्यात् स्वं गोविन्दो मह्यमेव शम् ।
श्रीकण्ठो मामपेक्ष्य त्वा-मालोकयति पूजकम् ॥ §

---

* हे मित्र, दामोदरः श्रीकृष्णः त्वा (त्वां) मा (मां) अपि अवतु रक्षतु। मुकुन्दः ते (तुभ्य) मे (मह्य) अपि भद्रं हर्षं ददातु। विष्णुः ते (तव) मे (मम) अपि अघानि पापानि निहन्तु। असौ मुरारिः वां (युवां) नौ (आवां) अपि रक्षतु। कृष्णः वां (युवाभ्यां) नौ (आवाभ्यां) अपि शर्म्म सुखं ददातु। श्रीदयितः श्रीपतिः वां (युवयोः) नौ (आवयोः) दयां करोतु। हरिः वः (युष्मान्) नः (अस्मान्) अपि पुष्णातु। वः (युष्मभ्य) नः (अस्मभ्यं) धनं ददातु। वः (युष्माकं) नः (अस्माकं) अशुभानि हन्तु।

द्वौचाश्रीर्णामित्यस्य एतानि यथाक्रममुदाहरणानि।

† प्रत्युदाहरणन्तु—

कृष्णः अविरतं निरन्तरं युष्मान् अवतु, इत्यत्र युष्मान् इति पादादिस्थितत्वात् न व इति आदेशः। अस्मान् शङ्करः पातु इति वाक्यादिस्थितत्वात न न इति आदेशः।

‡ योगे इति कथनात् साक्षाद्योगेऽयं निषेधः, परम्परासम्बन्धे तु आदेशः स्यादेव; यथा हरौ हरिश्च मे स्वामी। इति सिद्धान्तकौमुदी। यत्र चादिभि र्न युष्मदस्मदोर्योगः अपि तु अर्थान्तरस्य, तत्रापि त्वादयः स्युः। इति क्रमदीश्वरः।

§ गोविन्दः तुभ्यं मह्यञ्च स्व धनं दद्यात्, शं कल्याणं मह्यमेव दद्यादिति शेषः। अत्र तुभ्यमिति पादादिस्थितत्वात्, मह्यञ्चेति मह्यमेवेति च चादियोगात् न आदेशः। अत्र युष्मदस्मदोरामेव चादियोगे निषेधः, तेन रामो धनमेव दद्यात ते इत्यादौ स्यादेव। श्रीकण्ठः मामपेक्ष्य त्यक्त्वा त्वां पूजकम् आलोकयति विचारयतीत्यर्थः, अत्र ईक्षधातुः लोकधातुश्च दर्शनार्थोऽपि इह पुनस्त्यागार्थौ विचारार्थश्च प्रयुक्तः, अतोऽदर्शनार्थ-दृश्यर्थधातुयोगे न आदेश इति।—ते मे इत्यादिकम् अव्ययमप्यस्ति, तेन श्रीस्ते सास्तामित्यादि प्रयोगः। प्रथमातृतीययोरप्यादेशा इति वामनः, तेन "गेये केन विनीतौ वां," वां युवामिति प्रथमायुक्तस्यादेशः। एव "कारितास्ते यतोऽतस्त्वां," अत्र ते त्वया इति तृतीयायुक्तस्यादेश इति।

२२१ । सदान्वक्तौ ऽसादिप्रगाः ।

(सदा ।१।, अन्वक्तौ ७।, असादिप्रगाः ५।) ।

अनयोरेते अन्वादेशे नित्यं स्युः, न तु सपूर्व्वात् प्रान्तात् परयोः ।

यूयं वयं विनीतास्तत् पातु वो नो महेश्वरः ।
यूयं वयं हितास्तेन, सोऽस्मान् पातु स वः शिवः ॥*

२२२ । नाविशेष्यान्याद्यामन्त्रात् ।

(न ।१।, अविशेष्यान्याद्यामन्त्रात् ५।) ।

विशेष्यपूर्व्वमनामन्त्रपूर्व्वञ्च हित्वा अन्यस्मादामन्त्रादेते आदेशा न स्युः । †

शम्भोऽस्मान् रक्ष, लक्ष्मीश सेव्य नोऽवाव सर्व्व नः । ‡

---

* अन पश्चादुक्तम अनुक्तं तस्मिन । आदिना पूर्व्वस्थपदान्तरेण सह वर्त्तते या सा सादि, सादिश्चासौ प्रौ चेति सादिप्रौ, पश्चान्नञ्योगे तस्या.। अन्वादेशे उक्तस्य पश्चादुक्तौ युष्मदस्मदोः स्थाने एते आदेशा नित्यं स्यु किन्तु पूर्व्वस्थितपदान्तरेण सहितात प्रथमान्तपदात परयो र्युष्मदस्मदो-रनुक्तावपि एते आदेशा नित्यं न स्युः, पूर्व्वसूत्रेणैव विभाषया स्युरित्यर्थ.। यूयं वयं विनीता. इति उक्तिः. तत्तस्मात् महेश्वरः वो युष्मान् नोऽस्मान पातु इति पश्चादुक्तौ नित्यमादेशः। सपूर्व्वात् प्रथमान्तात्, यूयं वयं हिताः, तेन स शिवः अस्मान् पातु, स वो युष्मान् पातु इति शेषः। अत्र विकल्पेनादेशः। पाणिनि. ८।१।२६।

† विशेष्यञ्च अन्यञ्च ते विशेष्यान्ये, अन्यदिति आमन्त्राभिन्नपदमित्यर्थः। ते आदौ यस्य तत् विशेष्यान्यादि, तच्च तत् आमन्त्रञ्चेति विशेष्यान्याद्यामन्त्रं, पश्चात नञ्योगे तस्मात। आमन्त्रं सम्बोधनविहित-प्रथमान्तपदम। विशेष्यामन्त्रपूर्व्वं यदामन्त्रं आमन्त्राभिन्नपदपूर्व्वञ्च यदामन्त्रम एतदुभयभिन्नादामन्त्रात् परयो र्युष्मदस्मदोरेते आदेशा न स्युः, ततश्च पूर्व्वपदरहितात् विशेषणपूर्व्वाच्च आमन्त्रात् परयो र्न स्युरिति निष्कर्षः। पाणिनि: ८।१।७२,७३।

‡ शम्भोऽस्मान् रक्ष इति उदाहृत्य, प्रत्युदाहरति हे लक्ष्मीश सेव्य नोऽस्मान् अव, हे सर्व्व नोऽस्मान् अव, लक्ष्मीशेति विशेष्यपूर्व्वात् सेव्य इत्यामन्त्रात् परतया

सुपात् सुपादौ सुपादः, सुपादं सुपादौ। *

२२३। पात् पत् पौ। (पात् ।१।, पत् ।१।, पौ ७।)।

पादः पत् स्यात् पौ परे। सुपदः सुपदा सुपाद्भ्यामित्यादि। †

(२११) चुङिति कुङ्। (५०) नंस्य नुः। (५१) नोर्ङः। (१९३) स्यान्तस्य लुप्। प्राङ् प्राञ्चौ प्राञ्चः, प्राञ्चं प्राञ्चौ। एवं क्रुञ्चतिर्य्यञ्चोदञ्चादयः। ‡

२२४। अचोऽल्लोपो घंश्च।

(अचः ६।, अल्लोपः १।, घंः १।, च ।१।)।

अचोऽकारस्य लोपः स्यात् पौ परे, पूर्व्वस्य च घंः।

प्रतीचः प्रतीचा प्रत्यग्भ्यामित्यादि। §

निषेधो नाभूत्, एवम् अव इत्यनामन्त्र्यपूर्व्वात् सर्व्वे इत्यामन्त्र्यात् परतया निषेधो नाभूदिति।

* सु शोभनौ पादौ यस्येति विग्रहे (३४७) पादस्थाने पाद्-आदेशः। सुपात् सुपाद् इति च सिद्धान्तकौमुदी।

† (३४७) पादस्थाने आदिष्टपाद्शब्दस्य पद् स्यात् पौ परे इत्यर्थः। स्त्रियां सुपदी, त्रिपदीत्यादि। क्लीवे त्रिपदी वस्तुनी इति। योगविभागात् द्विपदा इत्यपि। पाणिनिः ६।४।१३०। इति दकारान्ताः।

‡ अन्चु गतिपूजनयोरित्यस्य क्विपि (५६८) पूजार्थत्वान्नलोपाभावे प्रान्च् इति लिङ्गम्; गत्यर्थस्य तु नलोपे प्राच् इति लिङ्गम् तत्रापि (१९२) विदञ्चइति नुणि कृते प्राङ् प्राञ्चौ प्राञ्च इति, स्यादिपञ्चके उभयोरेव समानं रूपं, शसादौ तु पूजार्थस्य— प्राञ्चः प्राञ्चा प्राङ्भ्यां प्राङ्सु, गत्यर्थस्य च प्राचः प्राचा प्राग्भ्यां प्राक्षु इति भेदः। क्रुञ्चतीति क्रुङ्, तिरः वक्रम् अञ्चतीति तिर्य्यङ्, उत् ऊर्द्धम् अञ्चतीति उदङ्, सर्व्वत्र क्विपि रूपम्।

§ अच् इति गत्यर्थान्चधातोः क्विपि ग्रहणम्। घंश्चेति सम्भवपरो विधिः, तेन स्वभावदीर्घादपि अल्लोपः स्यात्, यथा नदीचः गोचः इत्यादि। गोच इत्यत्र पूर्व्वे

२२५। तिर्य्यगमुमुयगदमुयगुदचां तिरश्चा-मुमुईचादमुईचोदीचः।

(तिर्य्यक्—उदचां ६॥, तिरश्च—उदीचः १॥)।

एषामेते क्रमात् स्युः पौ परे।

तिरश्चः तिरश्चा तिर्य्यग्भ्यामित्यादि।

अमुमुईचः अमुमुईचा अमुमुयग्भ्यामित्यादि। एवमदमुयङ्।

उदीचः उदीचा उदग्भ्यामित्यादि। शेषं पूर्व्ववत्। *

(१५४) भ्रस्जेति चस्य षत्वे, तन्निमित्तस्य शस्य सत्वे, (२१३) स्यादेः सो लोपः। सुव्रट् सुव्रड् सुव्रश्चौ सुव्रश्चः इत्यादि। †

(१६४) नसम्महन्न इति घः। (१८३) स्यान्तस्य लोपः। महान् महान्तौ महान्तः, महान्तं महान्तौ महतः, महता महद्भ्यामित्यादि।

ह्रस्वाभावान्न दीर्घः, अल्लोपस्य विशेषात् (३९) गोर्व्वेत्यस्य च न विषयः। दिवं अञ्चतीति दिवच्शब्दस्य शसि अनेन अल्लोपे (२४०) वस्य उत्वे, अनेन दीर्घे द्यूच इत्यादि। अत्र अल्लोपो घेश्चेति कृतेऽपीष्टसिद्धौ अचो ग्रहणं पूर्व्वं पदान्तरस्थिते-रावश्यकत्वं ज्ञापयति, तेन केवलस्य अचः—अचः, अचा इत्यादौ न प्रसङ्गः। प्रति अञ्चतीति प्रत्यच् इति लिङ्गम्। पाणिनिः ६।४।१३८, ६।३।१३८।

* तिर्य्यच अमुमुयच् अदमुयच् उदच् इत्येषां स्थाने तिरश्च अमुमुईच अदमुईच उदीच् इत्येते आदेशाः क्रमात् स्युः। अमुमुईच अदमुईच इति सन्ध्यभावनिर्द्देशात् न सन्धिः। तिरः अञ्चतीति तिर्य्यङ्। अमुमञ्चतीति अमुमुयङ्, अदमुयङ्। उत् अञ्चतीति उदङ्। सर्व्वत्र अन्चधातोः क्विप्। शेषं पूर्व्ववत् प्रान्च-शब्दवदित्यर्थः। पाणिनिः ६।४।१३९, ६।३।९४, ८।२।८०।

† सुव्रट् इति, व्रस्च् श छेदे इति व्रस्च धातुर्दन्त्यमध्यः, पश्चात् चकारयोगात् (४६) तालव्यमध्यः। नकारजावनुस्वारपञ्चमौ झलिधातुषु। सकारजः शकारश्च षाट्टवर्गस्तवर्गजः॥ सुव्रश्चतीति क्विपि (१६१) सुव्रश् इति रूपं, सुव्रश्-सि (१४८, १५४, चस्थाने ष, ततः निमित्तस्यापाये नैमित्तिकस्याप्यपाय इति न्यायात् शस्थाने स, ततः २१३, १५५, ६४)—सुव्रट् सुव्रड्। इति चकारान्ताः।

भवन् भवन्तौ भवन्तः, भवन्तं भवन्तौ भवतः, भवता भवद्भ्या-मित्यादि। शेषं महद्वत्।

(१८५) अत्वसोऽधोरिति—श्रीमान्, शेषं भवद्वत्, एवं यशस्व-दादयः। *

२२६। भगवदघवद्भवतां भगोऽघोभो वा धौ। (भगवत्-अघवत्-भवतां ६।।।, भगो-अघो-भो ।१।।।, वा ।१।, धौ ७।)।

एषामेते क्रमात् स्युर्वा धौ परे। हे भगोः हे भगवन्, हे अघोः हे अघवन्, हे भोः हे भवन्। शेषं श्रीमद्वत्। †

(१९२) अद्देरित्युक्ते-र्न नुण्—ददत् ददतौ ददतः इत्यादि। एवं जक्षत्-जाग्रदादयः। ‡

---

* महानिति, मह त् क पूजे इति धातोरौणादिकोऽत्प्रत्ययः। अत्वन्तस्यापि (१६४) नसन्महन्न इत्यत्र महतो ग्रहणात् स्यादिपञ्चके दीर्घः। भवन्निति भूधातोः शतृप्रत्यये भवत् इति रूपं, ऋदित्त्वात् (१९२) त्रिदच इति नुण्, (१९३) स्यान्तस्य लुप्। सर्व्वनामस्तु भवत्-शब्दस्य भाधातोर्डवतुप्रत्ययेन रूपम्, तत्र सि-विभक्तौ अत्वन्तत्वेन (१८५) दीर्घः। श्रीर्विद्यतेऽस्य श्रीमान्, एवं यशो विद्यतेऽस्य यशस्वानित्यादयः।

† भगवदघवतोर्वत्वन्तयोः भवतश्च डवत्वन्तस्य ग्रहणम्। भगवदघवद्भवतां वत उस् इति कृते उसन्तत्वात् रङ् भवितुमर्हति, तथा सति विसर्गस्य रेफजातत्वात् भोः पते इत्यादौ (७४) खपि वेत्यस्य विषयः स्यात्। एषां टेर्डोस् इत्यकरणन्तु स्पष्टार्थम्। हे भगोः इत्यादौ हसात् सिलोपस्य प्राथमिकत्वेऽपि सर्व्वावयवादेशस्य बलवत्त्वात् प्रागेवा-देशे हसपरत्वाभावात् सिलोपाभावे विसर्गः। शेषं श्रीमद्वदिति—(१८५) अत्वसो-ऽधोरित्यनेन दीर्घो भविष्यतीत्यर्थः। सिद्धान्तकौमुदीमते भगोस् अघोस् भोस् एते सकारान्ता निपाताः। वृत्तिकार-भाष्यकृन्मते तु भोः शब्द एवाव्ययम्।

‡ ददिति दाधातोः शतृप्रत्ययेन रूपं, द्विरुक्तत्वात् न नुण्। एवं जक्षत् जाग्रत् शासत् चकासत् बिभ्यत् जुह्वत् प्रभृतयः। पाणिनिः ७।१।७८,६।१।६। इति तकारान्ताः।

(१५४) शक्राजेति षड्—विट् विड् विशौ विशः, विशं विशौ विशः, विशा विड्भ्यामित्यादि।

(१७८) मुहां घङ्गिति—नक् नग् नट् नड् नशौ नशः, नशं नशौ नशः, नशा नग्भ्यां नड्भ्यामित्यादि।

(१८४) श्वेतवाहेति डस्ङ्—पुरोडाः, हे पुरोडाः हे पुरोडः, पुरोडाशौ पुरोडाशः, पुरोडोभ्यामित्यादि।

(२११) चुङिति कुङ्—स्पृक् स्पृग् स्पृशौ स्पृशः, स्पृशा स्पृग्भ्यामित्यादि। *

दधृक् दधृग् दधृषौ दधृषः, दधृग्भ्यामित्यादि।
षट् षड्, षड्भिः षड्भ्यः षण्णां षट्सु। †

२२७। सषेसुससजुषह्नां रङ् फेऽन्तः।

(सष इस् उस् सजुष् अह्नां ६।।।, रङ् ।१।, फे ७।, अन्तः ६।)।

सस्य स्थाने जातस्य षस्य इसुसः सजुषोऽह्नश्च रङ् स्यात् फे परे, न तु चान्तस्य। ‡

---

* विश नश स्पृश धातोः क्विपि क्रमेण विश् नश् स्पृश् शब्दाः। पाणिनिः ८।२।६३,३।२।५८। (१०२९) पुरः अग्रे दाश्यतेऽसौ पुरोडाः हविः, दाशधातोः विण्प्रत्ययेन निपातनात् सिद्धः। सम्बोधने (१८६) डसङो धौ वेति विकल्पः। पाणिनिः ३।२।७१। इति शकारान्ताः।

† धृष्धातोः क्विपि निपातनात् दधृष्शब्दः सिद्धः। षण्णामिति (४८) निपातनात् सिद्धम्।

‡ दन्त्यसस्य स्थाने जातो मूर्द्धन्य-षः सषः, सषश्च इस् च उस् च सजुष् च अहन् च तेषाम्। पिपठिष् चिकीर्ष् बुभूर्षादीनां क्विपः प्राक् षत्वे सस्थाने जात-षः। (१०३२) इसुसौ दन्त्यान्तौ, यथा पिस्ट गत्यां (पिस गतौ इति सिद्धान्तकौमुदी) सुपीः,

२२८। र्व्यनचतयीको धोर्घोऽकुर्कुरोऽखेः।

(र्वि ७।, अनच्तयि ७।, इकः ६।, धोः ६।, घः १।, अकुर्कुरः ६।, अखेः ६।)।

धोरिको घः स्यात् वि रेफे च, न तु कुर्कुरोः, न च खेः, नाचि तये च। *

पिपठीः पिपठिषौ पिपठिषः, पिपठीर्भ्यां पिपठीःषु। एवं चिकीर्षादयः। †

तुस ध्वाने (तुस खण्डने इति सिद्धान्तकौमुदी) सुतूः, एवम् हविः धनुरित्यादि। सजुषौ मूर्द्धन्यान्तत्वादप्राप्तौ पृथगुक्तिः, जुषी प्रीतिसेवनयोः, जोषणं जुट्, सह जुषा वर्त्तते या सा सजूः। चान्तस्य तु, लिहो ञ ल स्वादे लिलिचतीति क्विपि लिलिट्, अत्र (१७५) हस्य ढत्वे (६०२) षढोः कः से इति ढस्य कत्वे, (१११) क्विलादित्यनेन सनः सस्य षत्वेऽपि चान्तत्वात् न रङ्। पिपठीस्तवः, आशीर्वादः, अहर्निशम् इत्यादौ विभक्तेर्लुकि विरामे रङ् स्यादेव। पाणिनिः ८।२।६६,६८ (रुः)।

* र च व च र्व तस्मिन् र्वि, रेफसाहचर्य्यात् वकारोऽत्र दन्त्यः तेन उब्जतीत्यत्र न दीर्घः। तस्तद्धितः, तश्चासौ य चेति तय, अच्च तय च अच्तयौ, न विद्येते अच्तयौ यस्मात् सोऽनच्तय तस्मिन्, अनच्तयीति र्वि इत्यस्य विशेषणम्। कुर् च कुर् च कुर्कुर, न कुर्कुर अकुर्कुर तस्य। (५३८) न खिरखिस्तस्य। धातुसम्बन्धीयस्य कुर्कुर-भिन्नस्य इको घः स्यात्, नास्ति अच् तयश्च यस्मात् तादृशे रेफे वकारे च परे, न तु खेरित्यर्थः। अत्र सूत्रे र्वि इति आदौ रेफस्य पश्चात् वकारस्य ग्रहणम्, वृत्तौ तु वि रेफे इति वैपरीत्यं अनच्तयीत्यनेन क्रमान्वयनिरासार्थम्। उदाहरणम् यथा, रेफे परे—गीः धूः पिपठीरित्यादि। वकारे परे—दीव्यति सीव्यतीत्यादि। अनच्तयीति किं—गिरौ दिवौ, धुर्य्यः दिव्यमित्यादि। तयसाहचर्य्यादत्र अच् प्रत्ययस्यैव, तेन गीरर्थः आशीरारम्भः इत्यादौ दीर्घः स्यादेव। धोः किं—हविः धनुरित्यादि। अकुर्कुरः किं—कुर्य्यात् कुर्य्यादित्यादि। अखेः किं—रीधातौ ठौ-विभक्तौ रिर्य्यं, व्रीडधातोः विव्रीड, व्येधातोः संविव्यतुः इत्यादि। अनेन दीर्घे कृतेऽपि (५५६) झभखयहर्घेत्यनेन पुनर्ह्रस्वेनैवेष्टसिद्धौ अत्र कथं खिवर्जनमिति चेत्—अस्य विशेषविधित्वात् झभखर्घेत्यनेन पुनर्ह्रस्वासम्भवात्। पाणिनिः ८।२।७६—७९, वार्त्तिकद्वयञ्च।

† पठधातोः सनि पिपठिष इति धातोः क्विपि (७७५) हसाल्लोप इति अकारलोपे पिपठिष् इति लिङ्गम्। पिपठिष्-सि (१४८,२२७,२२८,१०२)=पिपठीः। एवं

द्दोः दोषौ दोषः। (११६) पाददन्तेति दोषन् वा। दोष्णः दोषः, दोष्णा दोषा दोषभ्यां दोर्भ्यामित्यादि।

(२१३) स्यादेः सो लोपः। विविट् विविड् विविचौ विविचः, विविड्भ्यामित्यादि।

पिपक् पिपग् पिपचौ पिपचः, पिपग्भ्यामित्यादि। एवं गोरक्दिधचादयः। *

सुपीः सुपिसौ सुपिसः, सुपीर्भ्यां सुपीःषु। एवं सुतूः। विद्वान्, हे विद्वन्, विद्वांसौ विद्वांसः, विद्वांसं विद्वांसौ। †

२२९। वंसो वंः सेमप्युर्मतुप्योः।

(वसो' ६।, वः १।, सेम् ।१।, अपि ।१।, उः १।, मतुप्योः ७॥)।

वसो वंशब्दं इमसहितोऽपि उः स्यात् मतौ पौ च परे। विदुषः विदुषा।(१८३)स्रसंध्वसवस्विति दङ्,विद्वद्भ्यामित्यादि।

चिकीर्षादय इति, एवमिति रङ्प्राप्त्यर्थं, न तु सर्व्वरूपसाम्यार्थं, तेन चिकीर्ष्शब्दस्य सुपि, षस्य रङि, (१९३) स्यान्तस्यारादित्यत्र स्यान्तस्येति भिन्नपदज्ञापकात् रादपि रङो लोपे. (१८७) रङो विः सुपीति नियमात् रेफस्य विसर्गाभावे (१११) किलादिति षत्वे चिकीर्षु इति पदम्। एवं तुतूर्षु प्रभृति-शब्दस्यापि।

* दोरिति दमेर्डोसिरित्यौणादिकसूत्रेण दोष् इति लिङ्गं बाहुवाचकम्। दोष्-शस् (११६,११७,१११,१०२)=दोष्णः। विविट् इति विशधातोः सनि क्विपि च विविच इति लिङ्गम्, विविच्-सि (१४८,२१३,१५४,१५५,६४)=विविट् विविड्। पचधातोः सनि क्विपि च पिपच्शब्दस्य चकारजात-ककारस्य (२१३) लोपाभावे, (१९३) स्यान्तस्य लुपि पिपक् पिपग् इति। गां रक्षतीति गोरक्ष्शब्दस्य (२१३) रक्षवर्जनात् ककार-लोपाभावः। दहधातोः सनि क्विपि च दिधक् दिधग् इत्यादि। इति षकारान्ताः।

† सुपीरिति सुतूरिति च सुपूर्व्वकात् पिसधातोः तुसधातोश्च क्विपि, इसन्तत्वात् उसन्तत्वाच्च रङ्। विद्वानिति विदधातोः शतृप्रत्यये (११०३) शतुः क्वस्वादेशे, विद्वस्-सि (१४८,१९२,१६४,१९३)=विद्वान्। पाणिनिः ६।४।१३१, वार्त्तिकञ्च।

पेचिवान् पेचिवांसौ पेचिवांसः, पेचिवांसं पेचिवांसौ पेचुषः, पेचुषा पेचिवद्भ्यामित्यादि। जगन्वान् जगन्वांसौ जगन्वांसः, जगन्वांसं जगन्वांसौ। वस्योत्वे तन्निमित्तस्य नस्य मत्वे—*

२३०। हनगमजनखनघसामुङ्लोपोऽङेऽच्यणौ।

(हन गम जन-खन घसां ६॥, उङ्-लोपः १।, अङे ७।, अचि ७।, अणौ ७।)।

एषामुङ्लोपः स्यादणावचि, न तु ङे।

जग्मुषः जग्मुषा जगन्वद्भ्यामित्यादि। एवं जघ्निवान्। †

(१६४) अधोरित्युक्तेः, सुहिन् सुहिंसौ सुहिंसः, सुहिन्भ्याम्। ध्वत् ध्वसौ ध्वसः, ध्वद्भ्याम्। एवं स्रत्।

उक्थशाः, हे उक्थशाः हे उक्थशः, उक्थशासौ उक्थशासः, उक्थशोभ्यामित्यादि। ‡

---

* सूत्रे वइति अदन्तग्रहणात् अकारसहितस्यैव उः, इम्‌सहितोऽपीति सति सम्भवे। वस्वन्तात् (४४२) मतोः प्रसङ्गाभावेऽपि, मतौ परे वसोर्वस्य उविधानं ज्ञापयति "वस्वन्तात् (४४१) मतुरेव भविष्यतीति", विद्वस्‌शब्दात् मतौ विदुष्मान्। पेचिवान् इति पचधातोः वसुः पेचिवस्-सि (१४८,१९२,१६४,१९३)=पेचिवान्। पेचिवस्-औ (१९२ १६४,५०)=पेचिवांसौ। गमधातोः क्वसौ, वकारे परे (२०२) मस्य नकारे जगन्वस् इति लिङ्गम्। वस्योत्वे इति—शसि परे जगन्वस्‌शब्दस्य वस्य उत्वे, सएव वकारो निमित्तं यस्य स तन्निमित्तस्तादृशस्य नस्य, निमित्तस्याभावे नैमित्तिकस्याप्यभाव इति न्यायात्, मत्वे, जगमुष् इति स्थिते इत्यर्थः। पाणिनिः "वसोः सम्प्रसारणम्" इति (६।४।१३१)। अत्र अन्तरङ्गोऽपि इड़ागमः सम्प्रसारणविषये न प्रवर्त्तते, "अकृतव्यूहाः पाणिनीयाः" इति परिभाषया।

† यस्मिन् परे गुणो निषिद्धस्तादृशे अचि परे (५६५) ङभिन्ने, एतेषां पञ्चानां धातूनां उङोऽकारस्य लोपः स्यादित्यर्थः, अयमच् आख्यातकृतोरेव सम्भवति। अल्लोप इति कृते सिद्धेऽपि उङ्लोपकरणं (१११९) हिंस्रादुङ्लोपिन इति सूत्रे एषां ग्रहणार्थम्। जगम्-उष् इति गम् इत्यस्य अनेन उङ्लोपे जग्मुष इति। गमधातोः क्वसौ (१०९८) जघ्निवान् इति च। पाणिनिः ६।४।९८।

‡ (१६४) नमव्‌महन्न इत्यत्र धात्ववयवत्वर्जनात्, सु हिनस्तीति क्विपि सुहिन्म्

२३१। पुंसोऽसुङ् घौ।

(पुंस: ६।, असुङ् ।१।, घौ ७।)।

पुंसोऽसुङ् स्यात् घौ परे, उङावितौ।

पुमान् पुमांसौ पुमांसः, पुम्भ्यां पुंभ्यामित्यादि। *

२३२। से डौंशनसपुरुदंशोऽनेहसोऽधेः।

(सेः ६।, डा ।१।, उशनस-पुरुदंशस्-अनेहसः ५।, अधेः ६।)।

एभ्यः परस्य सेर्डा स्यात्, न तु धेः। उशना। †

२३३। धेर्ङडनौ वोशनसः।

(धेः ६।, ङ-डनौ १॥, वा ।१।, उशनसः ५।)।

उशनसः परस्य धे र्ङ-डनौ वा स्तः, ङ इत्। हे उशन हे उशनन् हे उशनः, उशनसौ उशनोभ्याम्। ‡

इत्यस्य न दीर्घः, (१९३) स्यान्तस्य लुप् सुहिन् इति। ध्वन्स धातोः क्विपि, ध्वस्-सि (१८३) ध्वत् इति। उक्थानि सामाङ्गानि शंसतीति (१०२९) विणि निपातनात्, उक्थशास्-सि (१४८,१८५,१०२) = उक्थशाः। ८।२।६७ पाणिनिसूत्रे चकारादुक्थशाः।

* असुङ उदित्वात् (१९२) नुण्, ङित्वादन्त्यस्य स्थाने। पुम्स्-सि, असुङ् = पुमस् सि (१४८,१९२,१६४,१९३) = पुमान्। पुम्स-भ्याम् (१९३,५३,५२) = पुम्भ्यां, वा पुंभ्यां। पाणिनिः ७।१।८९।

† उशना दैत्यगुरुः। पुरुदंशा इन्द्रः, अयं शब्दः उकारवद्रेफवान्। अनेहा कालः। अनेन सेर्डा कृते (१२६) टेर्लोप इति टिलोपः। पाणिनिः ७।१।९४।

‡ ङ-डनौ ङ इत, अ अन् स्थितिः। उशनसः सम्बोधने रूपत्रयम्—अदन्तं नान्तं सान्तञ्च। सान्तपक्षे (१८५) धिवर्जनान्न दीर्घः। "वशेः कनसिः" इत्यौणादिकसूत्रेण सम्प्रसारणाच्च उशनस्-धि (२३३,१२६) = उशन इत्यादि। "अस्य सम्बुद्धौ वानङ् नलोपश्च वा वाच्यः" इति वार्त्तिकम्। काशिकावृत्तौ च "सम्बोधने तूशनसस्त्रिरूपं सान्तं तथा नान्तमथाप्यदन्तम्" इत्युक्तम्।

अनेहा, हे अनेहः, अनेहसौ अनेहसः, एवं पुरुदंशा।
वेधाः, हे वेधः, वेधसौ वेधसः इत्यादि।
(१८५) अधोरित्युक्तेः, सुवः सुवसौ। *

२३४। अदसः सेरौः। (अदसः ५।, सेः ६।, औः १।)।

अदसः परस्य से-रौः स्यात्। असौ। †

२३५। मात् स्वर्णावुऊ। (मात् ५।, स्वर्णौ १॥, उ-ऊ ।१॥)।

अदसो मात् परौ स्वर्णावुदूतावाप्नुतः। अमू। ‡

---

* अनेहस्-सि (२३२,१२६)=अनेहा कालः, "नञि हन एह च" इति औणादिकसूत्रेण असिः। "विधाञो वेध च" इत्यौणादिकसूत्रेण असिः, यद्वा विधधातोः असप्रत्यये वेधस्-सि (१४८,१८५,१०२)=वेधाः विधाता। सुपूर्व्वक-वसधातोः क्विप्-प्रत्यये सुवस् इत्यत्र अकारस्य धात्ववयवत्वात् (१८५) न दीर्घः।

† अत्र, पूर्व्वतः वाशब्दः केवलं व्यवस्थावाची भूत्वा अनुवर्त्तते। व्यवस्था च—अकयुक्ताददसः से-रौर्व्वा, अनकस्तु नित्यमिति ; तेन असकौ असुकः पुमान्, असकौ असुका स्त्री। असुकः असुका इत्याकाराणि पदानि त्वपाणिनीयानि "सौ औत्वप्रतिषेधः साकच्काद्वा वक्तव्यः सादुत्वञ्च" इति वार्त्तिकात् ; "असुक इत्यागमिकम्" इति क्रमदीश्वरः। सुपद्मे तु "असकौ असुकौ वा, असुकश्चेत्येके" इति। क्लीवे तु सेर्लुकि कृते, (९३) लुकि न तत्रेति निषेधात् (२१४) त्यदां तदोरित्यस्य (२०४) दोमोऽदसश्चेत्यस्य च अप्राप्तौ अदक. कुलमिति। अदस्-सि (२३४,१३३,२१४)=असौ। पाणिनिः ७।२।१०७, वार्त्तिकञ्च।

‡ अदसशब्दस्य मकारात् परस्थितस्य ह्रस्वस्वरस्य स्थाने उ, दीर्घस्वरस्य स्थाने ऊ भवत इत्यर्थः। मात् किं, अमुष्य शिष्यः अदःशिष्यः, अमुष्य स्त्री अदःस्त्री इत्यादौ विभक्तिलुकि (९३) लुकि न तत्रेति निषेधात् (२०४) दस्य मकाराभावे मपरत्वाभावात् न उ। अत्र उ-ग्रहणेनैव उवर्णप्राप्तौ उ ऊ इत्युभयग्रहणं प्रत्ययादेशयोः इद्गृहितेनाक्षा सवर्णो न गृह्यते (७) इति ज्ञापनार्थम्। अदस्-औ (१३३,२०४,९३,२३५)=अमू। पाणिनिः ८।२।८०।

२३६। एरी ब्वे। (एः १।, ई ।१।, ब्वे ७।)।

अदसो मात् परो ब्वे निष्पन्न एकार ई स्यात्। अमी। अमुं अमू अमून्। (१२३) टादसश्चास्त्रियान्तु ना। अमुना अमूभ्यां अमीभिः, अमुष्मै अमूभ्यां अमीभ्यः, अमुष्मात् अमूभ्यां अमीभ्यः, अमुष्य अमुयोः अमीषां, अमुष्मिन् अमुयोः अमीषु। *

इति हसन्त पुंलिङ्ग पादः।

२य पादः—हसन्त स्त्रीलिङ्ग शब्दः।

२३७। नहो धङ् भौ। (नहः ६।, धङ् ।१।, भौ ७।)।

नहो हस्य धङ् स्यात् भौ परे।

उपानत् उपानद् उपानहौ उपानहः, उपानद्भ्यां। †

(२११) चुङिति कुङ्। उष्णिक् उष्णिहौ, उष्णिग्भ्यामित्यादि। ‡

---

* पूर्व्वतो मादित्यनुवर्त्तते। बहुवचनस्थानजात एकार ई स्यादित्यनेन अमू स्त्रियौ, अमू फले इत्यादौ न स्यात्। अदस्-जस् (१३३,२०४,११२,२३,२३६)=अमी। अदस्-अम् (१३३,२०४,१०३,२३५)=अमुं। अम-शस् (१०५,१०४,२३५)=अमून्। अम भ्याम् (१०८,२३५)=अमूभ्यां। अम भिस् (१०९,२३६,१०२)=अमीभिः। अमुष्मै इत्यादौ (१३३,२०४,११२,२३५,१११) एवं पदसिद्धिः। ङस् ओस् स्थाने (१०६) स्य योस् भवतः, आम्स्थाने (११३) साम् भवति। पाणिनिः ८।२।८१। इति सकारान्ताः।

---

† ङित्वादन्त्यस्य स्थाने, अतो व्याख्यायां हस्य धङ् इत्युक्तम्। भौ (८४) इति कथनात् लिङ्गस्य धातोश्च ग्रहणम्। उपानह्यतेऽनयेति क्विपि उपानत्, पादुकेत्यर्थः। धीलु अनात्सीत् अनद्ध इत्यादि। पाणिनिः ८।२।३४।

‡ ऊर्द्ध स्निह्यतीति (उद्-स्निह-क्विप्) उष्णिक्, छन्दोविशेषः वेदे प्रसिद्धः।

२३८। दिव औङ् सौ। (दिवः ६।, औङ् ।१।, सौ ७।)।

दिव औङ् स्यात् सौ परे। द्यौः दिवौ दिवः। *

२३९। वाम्याङ्। (वा ।१।, अमि ७।, आङ् ।१।)।

दिव आङ् स्यात् वा अमि परे। द्यां दिवं दिवौ दिवः, दिवा। †

२४०। उहस्युङ्। (उहसि ७।, उङ् ।१।)।

दिव उङ् स्यात् उवर्णे हसि च परे। द्युभ्यां। ‡
गीः गिरौ गिरः। एवं पूः। §

---

* द्यौरिति स्वरादेशत्वादादौ वस्य औकारे सेर्विसर्गः। गौणत्वे चायं विधिः, तेन अतिद्यौरित्यपि। द्यौः स्वर्गः, आकाशश्च। "द्यौः स्वर्गसुरवर्त्मनोः" इति विश्वः। पाणिनिः ७।१।८४।

† अयमपि मुख्यत्वे गौणत्वे च, दिव्शब्दस्य अमि द्यां दिवं, अतिदिव्शब्दस्य अतिद्यां अतिदिवं। ननु द्योशब्दस्य द्यामिति, दिव्शब्दस्य दिवमिति उभयपदसिद्धौ वाम्याङिति व्यर्थमिति चेन्न, (१४६) आ अम्शसोरित्यत्र मुख्यस्यैव ग्रहणेन अतिद्या-मित्यस्यानुपपत्तेः। पाणिनीयाः (पाणिनिपद्मनाभक्रमदीश्वरादयः) दिव्शब्दात् द्यामिति पदं न मन्यन्ते। कातन्त्रे तु "वाम्बा" इति सूत्रेण पदद्वयं स्यादेव।

‡ अत्र वेति नानुवर्त्तते अनिष्टत्वात्। इच्छया हि व्यवहितमप्यनुवर्त्तते अव्यव-हितमपि नानुवर्त्तते इति तान्त्रिकाः। स्यादिमध्ये सभाभ्यां विना अन्यहसोऽसम्भवात् सभि इति न कृत्वा हसि-ग्रहणं सामान्यहस्प्राप्त्यर्थं, तेन दिवः पतिः द्युपतिरित्यादि। अत्र दिवो वकारः दान्ते स्थितो वक्तव्यः, तेन दिवमिच्छति दिव्यति, दिवि भवो दिव्य-इत्यादौ न स्यात्। (१६८) स्यमोर्लुक्यपि भवतीति च वक्तव्यं, तेन सुद्यु कुलमित्यादि। पाणिनिः ६।१।१३१। इति वकारान्ताः।

§ गिरतीति गृधातोः क्विपि, गिर्-सि (१४८,२२८,१०२) = गीः, वाक्यम। गिरौ इत्यादिषु रेफस्य अच्परत्वात् न दीर्घः।

(१५७) स्त्रियां त्रिचतुर इति चतस्र। चतस्रः चतस्रः चतसृभिः चतसृभ्यः चतसृभ्यः चतसृणां चतसृषु। *

(१३३,२४९) टेरत्वे सत्याप्। का के काः इत्यादि, सर्व्वा-वत्। एवं यद्। †

(२०३) इदमोऽयमितीयं। इयं इमे इमाः, इमां इमे इमाः, अनया आभ्यां आभिः, अस्यै आभ्यां आभ्यः, अस्याः आभ्यां आभ्यः, अस्याः अनयोः आसां, अस्यां अनयोः आसु। ‡

स्रक् स्रजौ स्रजः, स्रग्भ्यां। §

(१३३,२४९) टेरत्वे आप्। स्या त्ये त्याः इत्यादि सर्व्वा-वत्। एवं तद् एतद्। ¶

वाक् वाचौ वाचः, वाग्भ्यां। ‖

अप्शब्दो ब्वान्तः। (१६४)नसबमहन्नइति र्घः। आपः,अपः। **

२४१। भ्यपो दङ्। (भि ७, अपः ६।, दङ् ।१।)।

अपो दङ् स्यात् भि परे। अद्भिः, अद्भ्यः अद्भ्यः, अपां अप्सु। ††

---

* चतुर्शब्द. स्त्रीलिङ्ग त्रिशब्दवत्। इति रकारान्ताः।

† किम्-सि (१३३ २४९ १४८)=का इत्यादि।

‡ इदम्-औ (१३३,२०४,२४९,१४९,२३)=इमे। इमा-टा (२०५.१५०,३५)=अनया। इमा-भ्यां (२०६)=आभ्यां, इत्यादि सर्व्वावत् साध्यम। इति मकारान्ताः।

§ सृज्यते इति सृजधातोः क्विपि, स्रज् सि (२११,१४८)=स्रक् माला। इति जकारान्ताः।

¶ त्यद्-सि=त्या सि (२१४)=स्या। इति दकारान्ताः।

‖ उच्यतेऽसाविति वचधातोः क्विपि, वाच्-सि (२११ १४८)=वाक् वाक्यम्। इति चकारान्ताः।

** ब्वान्त इति शब्दशक्तिस्वभावादुक्तम्। आपो जलानीत्यर्थः।

†† अत्र याशब्दस्य नानुवृत्तिः। अत्र प्रकरणबलात् भ इति स्यादेरेव, तेन अब्भय-मित्यादौ न प्रसङ्गः। गौणेऽप्ययं, तेन स्वद्भ्यामित्यादि। पाणिनिः ७।४।४८। इति पकारान्ताः।

दिक् दिशौ दिशः, दिग्भ्यामित्यादि । एवं दृक् । *

त्विट् त्विषौ त्विषः, त्विड्भ्यामित्यादि । †

सजूः सजुषौ सजुषः, सजूर्भ्यां सजूःषु । एवं आशीः । ‡

(२३४) अदसः सेरौः । असौ अमू अमूः, अमुं अमू अमूः, अमुया अमूभ्यां अमूभिः, अमुष्मै अमूभ्यां अमूभ्यः, अमुष्मात् अमूभ्यां अमूभ्यः, अमुष्य अमुयोः अमूषां, अमुष्मिन् अमुयोः अमूषु । §

इति हसन्त स्त्रीलिङ्ग पादः ।

३य पादः—हसन्त क्लीवलिङ्ग शब्दः ।

(१६८) स्वमोर्लुगिति । (१८३) स्रस् ध्वस् वस्विति दङ् । स्वनडुत् स्वनडुहो । (१८१) अनडुच्चतुरोऽणावणाविति । स्वनड्वांहि । पुनस्तद्वत् । शेषं पुंवत् । ¶

चत्वारि । ‖ ब्रह्म ।

---

* इति शकारान्ताः ।

† दिश् दृश् त्विष् धातुभ्यः क्विपि दिक् दृक् त्विट् इति पदानि ।

‡ जुषधातोः क्विपि जुट् प्रीतिः, सह जुषा वर्त्तते इति सजुष्-सि (१४८,२१७,२२८, १०३)—सजूः । आ-शास धातौ क्विपि आशीरिति. इसन्तत्वात् रङ्, विशौ च वेधा स्त्री त्वाशीर्हिताशंसाहिदंष्ट्रयोरित्यमरसिंहेन दन्त्यान्तमध्ये पठितत्वात् । इति षकारान्ताः ।

§ असौ अमू अमू इत्यादिषु अदस्शब्दस्य सि-आदि-विभक्तिषु—(१३३,२४६,२१४, २३४.२०४,१४६,१५०,१५२.१३७,११३,२३५) इत्यादीनि सूत्राणि यथायथं प्रवर्त्तन्ते । इति सकारान्ताः ।

¶ शोभनोऽनड्वान् यस्मिन् गोष्ठे तत् स्वनडुत् । स्वनडुह्-औ (१६१)=स्वनडुही । स्वनडुह्-जस् (१६२,१६३,१८१,३५,५०)=स्वनड्वांहि । इति हकारान्ताः ।

‖ चतुर्-जस् (१६२,१८१,३५)—चत्वारि । इति रकारान्ताः ।

२४२ । क्लीवे नो लुब्वा धौ ।

(क्लीवे ७।, नः ६।, लुप् ।१।, वा ।१।, धौ ७।) ।

नपुंसके नस्य लुप् स्यात् वा धौ परे। हे ब्रह्म हे ब्रह्मन्, ब्रह्मणी ब्रह्माणि। अहः अह्नी अहनी अहानि, अहोभ्यां। *

किं के कानि। इदं इमे इमानि। †

असृक् असृजी असृञ्जि, असानि असृञ्जि, अस्ना असृजा असभ्यां असृग्भ्यामित्यादि। ‡

ऊर्क् ऊर्ज्जी ऊर्न्जि ऊर्जि।

सुवल् सुवल्गी सुवन्ल्गि सुवल्गि।

(१६३) नुस्यमेत्यत्र झसन्तरलयोरादौ तु वा नुण्।
उकारेतो नुर्विन्दुमात्रस्य नाख्या। §

---

* (११८) नो लुप् फेऽधाविति धौ निषेधादप्राप्ते विभाषेयम्। लुप्करणात् तदादिविधेर्निषेधे हे धनि इत्यादौ (१७०) स्वधौ वेति गुणो न स्यात्। "सम्बुद्धौ नपुंसकानां न वा वाच्यः" इति वार्तिकम्। अहन्-सि (१४८,२२७,१०१) = अहः। अहन्-औ (१६१ ११७) = अह्नी, वा अहनी। अहन्-जस् (१६२,१६४) = अहानि। अहन्-भ्याम् (२२७,१०२,६६) = अहोभ्यां। इति नकारान्ताः।

† किम्-सि (१६८) = किम्। किम्-औ (१३३,१६१,२३) = के। किम्-जस् (१३३,१६२,१६३,१६४) = कानि। इदम्शब्दः किम्-शब्दवत्, (२०४) दौ म इति विशेषः। इति मकारान्ताः।

‡ असृज्-सि (१६८,२११) = असृक् [रक्तम्]। असृज्-शस् (११६,१६२,१६४) = असानि, यमादौ निषेधात् (१६३) न नुण्। वा असनादेशे असृज्-शस् (१६२,१६३ ५०,५१) = असृञ्जि। अस्ना (११७)। असभ्यां (११८)।

§ ऊर्जधातोः सु-वल्गधातोश्च क्विपि ऊर्ज-सुवल्ग-शब्दौ। ऊर्ज्ज सि (१६८,२११ = ऊर्क्। ऊर्ज्ज औ (१६१) = ऊर्ज्जौ। ऊर्ज-जस् (१६२,१६३) = ऊर्न्जि, वा ऊर्जि इति जकारान्ताः। सुवल्ग-सि (१६८,१९३) = सुवल्। यंयम्यते इत्यादौ (८२७) अम अपञ्चमेत्यादिना यथा नुरित्यनुस्वारागमः क्रियते, (१६३) नुस्यमेत्यत्र न तथा, अ उकारेतां नु नंकारः न तु विन्दुमात्रस्य अनुस्वारस्य संज्ञा यथं। अनुस्वारागमसन्देह वारणाय इदमुक्तम्। इति गकारान्ताः।

त्यत् त्ये त्यानि। एवं यत् तत् एतत्।(२०९) अन्वादेशे तु एनत्। गवाक् गोची गवाञ्चि। तिर्य्यक् तिरश्ची तिर्य्यञ्चि। एवं परे। यकृत् यकृती यकृन्ति, यकानि यकृन्ति, यकभ्यां यकृद्भ्यामित्यादि। एवं शकृत्। ददत् ददती।*

२४३। दः शतुर्नुम् शौ।

(दः ५।, शतुः ६।, नुम् ।१।, शौ ७।)।

दः परस्य शतुर्नुम् स्यात् वा शौ परे।

ददन्ति ददति। एवं यच्छत्-जाग्रदादयः। तुदत्।†

२४४। आदीपोः। (आत् ५।, ई-ईपोः ७॥)।

अवर्णात् परस्य शतुर्नुम् स्याद्वा ईकारे ईपि च परे।

तुदन्ती तुदती तुदन्ति। भात् भान्ती भाती भान्ति।‡

पचत्।

---

* एनदिति (१६८) अमो लुकि कृते, (९३) लुकि न तन्नेति निषेधेऽपि (२०९) इदेतयोरेनादेशविधानसाफल्यार्थम् एतभागस्य एनादेशः स्यादेव, (१३३) टेरत्वाभावे दकारस्थितिः। ("एनदिति नपुंसकैकवचने" इति वार्त्तिकम्)। इति दकारान्ताः। गामञ्चतीति क्विपि गवाक्। गवाच्-औ (१६१,२२४)=गोची। सिद्धान्तकौमुद्याम् अन्चधातोः गतिपूजनार्थभेदेन विविधानि पदानि प्रदर्शितानि, यथा—गवाक् गवाग्, गोअक् गोअग्, गोक् गोग्; गवाङ् गोअङ् गोङ्; गोची, गवाञ्ची गोअञ्ची गोञ्ची; गवाञ्चि गोअञ्चि गोञ्चि इत्यादि। तिरः अञ्चतीति तिर्य्यक्। तिर्य्यच्-औ (१६१,२२५) =तिरश्ची। एवं परे, अदमुयगादय इत्यर्थः। इति चकारान्ताः। यकृत् रोगविशेषः, शकृत् तालव्यादिः विष्ठावाचकः, उभयत्र (११६) पाद्दन्नेति यकन् शकन् आदेशः। ददिति दाधातोः शतृप्रत्यये रूपम्।

† (१९२) त्रिदश इति वैर्निषेधादप्राप्ते विभाषेयम्। ददत्-जस् (१९२,२४३)= ददन्ति, वा ददति। तुदधातोः शतरि तुदत्। पाणिनिः ७।१।७९।

‡ ईपः पृथक्ग्रहणात् ई इति (१६१) क्लीबाद्यौ इत्यनेन आदिष्टस्य ईकारस्य ग्रहणं,

२४५। अपयनो नित्यं। (अप्-यन: ५।, नित्यं १।)।

अपो यनश्च परस्य शतुर्नित्यं नुण् स्यात् ई ईपो: परयो:। पचन्ती पचन्ति। दीव्यत् दीव्यन्ती दीव्यन्ति। *

स्वप् स्वपी। (१६४) नसवमहनोऽधो घं:। स्वाम्पि, स्वपा। (२४१) भ्यपो दङ्। स्वद्भि:। †

(२२७) सषेति रङ्। धनु: धनुषी धनूंषि। एवं हवि:। पय: पयसी पयांसि, पयसा पयोभ्यां। अद: अमू अमूनि। द्वौ प्रीवत्। ‡

इति हसन्त क्लीवलिङ्ग पाद:।

तेन तुदत इदं तुदतीयमित्यादौ न प्रसङ्ग:। औ विभक्तौ तुदन्ती तुदती इति अनेन वा नुण्। नसि पूर्व्वेण (१६३) नित्यम्। भाधातो. शतृप्रत्यये भात्। एवं या, वा, स्ना, श्रा, द्रा, पा, रा, ला. ख्या, मा, प्सा. धातुभ्य: शतृप्रत्यये रूपम्। क्र्यादेराकारलोपेऽपि स्थानिवत्त्वात् क्रीणन्ती क्रीणती इत्यादि। लुनतीत्यत्र तु प्रथममाकारलुकि कृते नुम् न भवति इति गोयीचन्द्र.। अत्र स्यतृप्रत्ययस्यापि वा नुण् वक्तव्यं, तेन यास्यन्ती यास्यती भविष्यन्ती भविष्यती इत्यादि। पाणिनि: ७।१।८०।

* धातोर्विहितात् अप: यनश्च परस्येत्यर्थ:, गच्छन्ती गमयन्ती पुत्रकाम्यन्ती ज्ञानीयन्ती इत्यादय:। मालेवाचरन्ती मालान्ती, वीणेवाचरन्ती वीणान्ती इत्यपि दुर्गसिंह:। विच्छधातो: (६३७) विच्छास्तुतिपणौ वाय इति आयपक्षे अपि विच्छायन्ती इति नित्यं, विकल्पपक्षे तुदादित्वात् शे (२४४) विच्छन्ती विच्छती इति। कुर्व्वन्तीति धातुपारायणे, तद्बहुनामसम्मतमिति गोयीचन्द्र.। पाणिनि: ७।१।८१। इति तकारान्ता:।

† शोभना आपो यत्र सरसि तत् स्वप्, (४०४) नाव्यर्यां स्वतेरित्यादिना समासान्तनिषेध:। स्वप्-जस् (१६२,१६३ १६४,५०,५१)=स्वाम्पि। इति पकारान्ता:।

‡ धनधातोरुस् धनु:। हुधातोरिस् हवि:। पय इति (१६८) सेर्लुकि. (८३) लुकि न तत्रेति निषेधात् (१८५) न दीर्घ:। एवम् अद: इत्यत्रापि (२१४) द: सौ न स्यात्। अम्विभक्तौ च (२०४) दो मौ न स्यात्। इति सकारान्ता:।

२४६ । व्याल्लुक् क्तेः । (व्यात् ५।, लुक् ।१।, क्तेः ६।) ।

व्यात् परस्याः क्तेर्लुक् स्यात् । । स्वः प्रातः, च वा ह्य है उच्चैः उच्चकैः धिक् धकित्, प्र परा, हरिवत् कृत्वा । *

२४७ । उदः सः स्थास्तम्भोः ।

(उदः ५।, सः ६।, स्थास्तम्भोः ६॥) ।

उदः परयोरनयोः सस्य लुक् स्यात् । उत्थानं उत्तम्भः । †

---

* अव्ययानां लिङ्गकार्य्याभावात् पुंलिङ्गादिशब्देष्वनुक्त्वा पृथगुपन्यासः कृतः । तथाच—सदृशं त्रिषु लिङ्गेषु सर्व्वासु च विभक्तिषु, वचनेषु च सर्व्वेषु यन्न व्येति तदव्ययमिति प्राञ्चः । अलिङ्गानामव्ययानां विशेषणस्य तु नपुंसकत्वमेव सामान्यत्वान्नपुंसकमिति वचनात् यथा शोभनं प्रातरिति । पाणिनिः २।४।८२ ।

विभक्तेर्लुक्करणात विभक्तिनिमित्तककार्य्यं न स्यात्, तेन स्वः नम इत्यादौ सेर्लुकि (१८५) अत्वसोऽधोरिति दीर्घो न स्यात् । विसर्गस्तु विराममाश्रित्य स्यादेव । एवं, खलु ननु इत्यादौ (१२२) गुधिजसित्यादिना गुणो न स्यात् । अव्ययात विभक्त्युत्पत्तेः प्रयोजनन्तु पदत्वं, तेन उद्गच्छति उन्मज्जतीत्यादौ तकारस्य (५८,५९) दकार-नकारौ स्याताम । एवं, विभक्तिलुक्यपि विभक्त्यर्थस्य विद्यमानत्वात स्वर्गच्छति स्वः पततीत्यादौ स्वर्गस्य कर्म्मतादिप्रतीतिः स्यादेव । गौणे तु न विभक्तिलोपः, तेन प्राप्तं स्वः येन्ते प्राप्तस्वरः इति । अत्र (६४) संज्ञासूत्रोक्त-चतुर्व्विधाव्ययानां क्रमेणोदाहरणं दर्शयति स्वः इत्यादि । उच्चकैः धकित (२०८) टेः पूर्व्वं अक्, व्यकस्य दश्च । हरिरिव हरिवत, वत्प्रत्ययान्तः । कृधातोः क्त्वाच् कृत्वा इति । अत्र पाणिनिना "तद्धितश्चासर्व्वविभक्तिः" (१।१।३८) इति सूत्रेण तसिलादिप्रत्ययान्तानां तथा "अव्ययीभावश्च" (१।१।४१) इति सूत्रेण तत्समासान्तपदानामपि अव्ययत्वं स्वीकृतम् ।

† पाणिनिः ८।४।६१ । अत्र कः स्थाता कः स्तम्भः इत्यादौ विसर्गस्य वा लोपो वक्तव्यः । यथा कस्थाता कस्तम्भ इत्यादि । "स्वस्था भवन्ति मयि जीवति धार्त्तराष्ट्राः" इति वेणीसंहारे । "खर्परे शरि वा विसर्गलोपो वक्तव्यः" इति वार्त्तिकम् ; "वा शरि खर्परे" इति पद्मनाभः ; "कादियुक्ते शषसे लुग्वा" इति क्रमदीश्वरः ; "शषसेष्वघोषपरेषु विसर्ज्जनीयस्य" इति श्रीपतिदत्तश्च ।

२४८ । वातोऽवाप्योः ।

(वा ।१।, अतः ६।, अवाप्योः ६॥) ।

अवाप्योरकारस्य लुक् स्यात् वा । वगाहः अवगाहः, पिधानं अपिधानम् । *

इति व्यपादः ।

इति हसन्ताध्यायः ।

---

* अवाप्योर्विकल्पेन अकारलोपस्य इह सामान्यतो विधानं, केचित्तु वतरति वतीर्णं वतंसः वगाहः, पिनह्यति पिनद्धः पिदधाति पिधानं केवलमेतानि पदानि विकल्पे भवन्तीति वदन्ति । अत्र अपेरुपसर्गस्यैव ग्रहणम् । "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः" इति भागुरिमतम् ; "अपेरल्लुग्धाञोर्वा" इति क्रमदीश्वरः ; "अवस्याप्यल्लुक् क्वचिदिति वक्तव्यम्" इति गोयीचन्द्रः ; "धाञ्नह्योरपेरुपसर्गस्यादेः", "अवस्य तंसे" इति च श्रीपतिदत्तः ।

প্রচলিতাব্যয়শব্দসংগ্রহঃ।

অ

অ	অভাব, ভেদ, অপ্রাশস্ত্য, ঈষৎ, সাদৃশ্য, বিরোধ*।
অকস্মাৎ	অকারণ, হঠাৎ।
অগ্রতস্	প্রথমে। সম্মুখে।
অঘীস্	সম্বোধন—পাপিন্।
অঙ্গ	সম্বোধন। পুনঃ।
অচিরাৎ	শীঘ্র।
অচ্ছ	আভিমুখ্য।
অঞ্জসা	শীঘ্র। যথার্থ।
অট্টট্ট	উচ্চ শব্দ।
অতস্	অতএব।
অতি	প্রকর্ষ। লঙ্ঘন।
অতীব	অতিশয়, অধিক।
অত্র	এই, এই স্থানে।
অথ, অথো	অনন্তর। প্রশ্ন। মঙ্গল। আরম্ভ। সাকল্য।
অথকিম্	আর কি, হাঁ।
অদ্ধা	সত্য, যথার্থ।
অদ্য	আজি, এক্ষণে।
অধরাৎ, অধরেণ	নীচে।
অধস্, অধস্তাৎ	নীচে।
অধুনা	ইদানীং।
অনু	পশ্চাৎ। সাদৃশ্য।
অনুপদম্	অনন্তর।
অন্ততস্	শেষে, ন্যূনকল্পে।
অন্তর্	মধ্যে, শেষে। অন্তঃকরণ।
অন্তরা	ব্যতিরেকে। মধ্যে।
অন্তরেণ	বিনা। মধ্যে।
অন্যৎ	অন্যপ্রকার।
অন্যতরেদ্যুস্	দুয়ের এক দিনে।
অন্যতস্	অন্যত্র। অন্য হইতে।
অন্যত্র	অন্য স্থানে। বিনা।
অন্যথা	অন্যপ্রকার।
অন্যদা	অন্য সময়ে।
অন্যতরেদ্যুস্, অন্যেদ্যুস্, অধরেদ্যুস্, অপরেদ্যুস্	অন্য দিনে।
অপি	সমুচ্চয়। প্রশ্ন। সম্ভাবনা। নিন্দা। শঙ্কা।
অভিতস্	সর্ব্ব দিকে। উভয় দিকে। অভিমুখে। সাকল্য। শীঘ্রতা।
অভীক্ষ্ণম্	পুনঃ পুনঃ।
অমা	সহিত। সমীপ।
অমুত্র	পরলোকে।
অয়ি	সম্বোধন। প্রশ্ন। অনুনয়।
অয়ে	ওহো, স্মরণ। সম্বোধন।
অরে, অরেরে	সম্বোধন।
অর্ব্বাক্, অর্ব্বাচ্	পূর্ব্বে, পশ্চাৎ। বক্র।
অলম্	ব্যর্থ। সমর্থ। ভূষণ। পর্য্যাপ্তি। বারণ।
অবশ্যম্	নিশ্চয়।
অবাক্	দক্ষিণ দিক্, দেশ, কাল।
অসকৃৎ	পুনঃ পুনঃ।

* অর্থের মধ্যে যে যে স্থলে বিশেষ্য বিশেষণাদি শব্দ ব্যবহৃত হইল, সেই সেই স্থলে তদ্বাচক বুঝিতে হইবে।

অস্তম্ — অদর্শন, নাশ।
অস্তি — থাকা।
অস্তু — অসূয়াপূর্ব্বক স্বীকার।
অহহ, অহহা — অদ্ভুত,আহা। খেদ,উহু।
অহি — সম্বোধন।
অহো — আশ্চর্য্য।
অহোবত — করুণা, আহা।
অহ্নায় — শীঘ্র।

আ

আ — স্মরণ, ও-ও।
আঙ্ — সীমা। ব্যাপ্তি। ঈষৎ।
আম্ — স্বীকার।
আঃ — বিরক্তি,কোপ। পীড়া।
আরাৎ — দূর। সমীপ।
আবিস্ — প্রাকাশ্য।
আহো, আহোস্বিৎ — সন্দেহ। প্রশ্ন।

ই

ই — খেদ। কোপ।
ইতরেদ্যুস্ — অন্য দিনে।
ইতি — এই। শেষ। এইহেতু।
ইতিহ — পরম্পরা।
ইত্থম্ — এইপ্রকার।
ইদানীম্ — এক্ষণে।
ইব — সদৃশ। বাক্যালঙ্কার।
ইস্ — খেদ। বিস্ময়।

ঈ

ঈষৎ — অল্প।

উ

উ — বিতর্ক। পাদপূরণ। ক্রোধোক্তি।
উচ্চকৈস্, উচ্চৈস্ — উচ্চ। অধিক।
উত — সংশয়। সমুচ্চয়।
উতাহো, উতাহোস্বিৎ — প্রশ্ন। বিকল্প।
উত্তরতস্, উত্তরাৎ, উত্তরেণ — উত্তরে।
উত্তরেদ্যুস্ — পর দিনে।
উদক্ — উত্তর দিক্,দেশ,কাল
উপজোষম্, উপযোষম্ — আনন্দ।
উপাংশু — নির্জন।
উভয়তস্ — উভয় দিকে।
উভয়দ্যুস্, উভয়েদ্যুস্ — উভয় দিনে।
উম্ — ক্রোধ। প্রতিজ্ঞা।
উররী, উরী, উররী — স্বীকার।
উষা — নিশা-শেষ।

ঊ

ঊ — দুঃখ।
ঊম্ — গর্ব্ব। ক্রোধ। প্রশ্ন।
ঊররী, ঊরী, ঊররী — স্বীকার। বিস্তার

ঋ

ঋতে — বিনা।

এ

এ — স্মরণ। সম্বোধন।
একদা — এক সময়ে।
এতর্হি — এক্ষণে।
এব — অবধারণ।
এবম্ — এইপ্রকার। সম্মতি। সাদৃশ্য। অবধারণ।

ঐ

ঐ — স্মরণ। সম্বোধন।
ঐষমস্ — বর্ত্তমান বৎসর।

ও

ও — সম্বোধন। স্মরণ।
ওম্ — প্রণব। সম্মতি।

ঔ

ঔ — সম্বোধন।

क

कच्चित् — প্রশ্ন। ইচ্ছাপ্রকাশ।

कच्चे — তৃপ্ত্যর্থ।

कति — কত, কিয়ৎ।

कथम् — কিরূপে।

कदा, कदाचन, कदाचित्, कर्हि, कर्हिचित् — কখন, কবে।

कम् — জল। মস্তক।

कामम् — যথেষ্ট। অকামানুমতি।

कारिका — মর্য্যাদা। যত্ন। পীড়া।

किञ्च — কিছু, আরো।

किञ्चन, किञ्चित् — অল্প, কিয়দংশ।

किन्तु — পরন্তু।

किमु — সংশয়।

किम् — কুৎসিত। প্রশ্ন। বিতর্ক।

किमुत — অতিশয়। বিকল্প।

किमु, किंस्वित् — বিতর্ক, সম্ভাবনা।

किंवा — অথবা।

किल — নিশ্চয়। অলীক। সম্ভাবনা। প্রসিদ্ধি। ঐতিহ্য। অনুনয়। হেতু।

कु — কুৎসিত। পাপ। ঈষৎ।

कुतस् — কিহেতু। কোথাহইতে। কোথায়।

कुत्र — কোথায়।

कुत्रचित् — কোন স্থলে।

केशाकेशि — চুলাচুলি।

क्व — কোথায়।

क्वचन, क्वचित् — কোথাও।

ख

खलु — নিশ্চয়। বাক্যালঙ্কার। নিষেধ। প্রশ্ন। অনুনয়।

च

च — সমুচ্চয়। সমাহার। অন্বাচয়। ইতরেতর। পাদপূরণ।

चतुर्द्धा — চারিপ্রকার। চারিবার।

चिरम्, चिरेण, चिराय, चिररात्राय, चिरात्, चिरस्य, चिरे — চিরকাল, বহুকাল।

चेत् — যদি।

ज

जातु — কদাচিৎ, কখন।

जोषम् — নীরব। সুখ।

झ

झटिति — শীঘ্র।

त

तत् — তন্নিমিত্ত, তবে।

ततस् — তদনন্তর। তন্নিমিত্ত।

तत्र — তথায়।

तथा — সেইপ্রকার। সাদৃশ্য।

तदा, तदानीम् — তৎকালে, তখন।

तावत् — পবিমাণ। সাকল্য। পর্য্যন্ত। অবধারণ। বাক্যালঙ্কার।

तिरस् — বক্র। অপ্রকাশ। অন্তর্ধান।

तिर्य्यक् — বক্র। পার্শ্ব।

तु — কিন্তু। নিশ্চয়। ভেদ। পাদপূবণ।

तूष्णीम्, तूष्णीकाम् — মৌনী, স্থির।

त्रेधा, त्रैधम् — তিনপ্রকার।

द

दक्षिणतस्, दक्षिणात्, दक्षिणेन — ডানিদিকে।

दण्डादण्डि — লাঠালাঠি।

दिवा — দিনে।

दिष्ट्या — ভাগ্যক্রমে। হর্ষ।

दुष्ठु — কু, নিন্দিত।

দোষা	রজনী।
দ্রাক্	শীঘ্র।
দ্বিধা, দ্বেধা	দ্বিবার। দুইপ্রকার।

ধ

ধিক্	নিন্দা। নির্ভর্ৎসন।

ন

ন, নঞ্	না, নিষেধ।
নক্তম্	রাত্রি।
ননু	প্রশ্ন। অনুজ্ঞা। অনুনয়। আমন্ত্রণ। অবধারণ। বিরোধোক্তি।
নমস্	নমস্কার, প্রণাম।
নবতিধা	নব্বুইপ্রকার।
নবতিশস্	নব্বুইবার।
নবধা	নয়প্রকার। নয়বার।
নবশস্	নয় নয়টী।
নহি, না	নিষেধ।
নানা	বহুবিধ। উভয়। বিনা।
নাম	সম্ভাবনা। প্রসিদ্ধি। ক্রোধ। স্বীকার। নিন্দা।
নাস্তি	নাই, নহে।
নিকষা	নিকটে।
নিতরাম্	অবশ্য। অত্যন্ত।
নিত্যদা	সর্ব্বদা।
নীচকৈস্,নীচৈস্	ক্ষুদ্র, অল্প।
নু	প্রশ্ন। বিকল্প।
নূনম্	নিশ্চয়। বিতর্ক।
নো	নিষেধ, না।
ন্যক্	নীচ, ঘৃণ্য।

প

পঞ্চধা	পাঁচপ্রকার। পাঁচবার।
পরম্	কেবল। অনন্তর।
পরমম্	সম্মতি।
পরশ্বস্,পরঃশ্বস্	আগামি তৃতীয় দিনে।
পরাক্	বক্র, কুটিল।
পরারি	পূর্ব্বতর বৎসর।
পরিতস্	চারি দিকে।
পরুৎ	পূর্ব্ব বৎসর।
পরেদ্যবি, পরেদ্যুস্	পরদিনে।
পশ্চাৎ	পরে। পশ্চিমে।
পুনঃপুনর্	বারংবার।
পুনর্	অপ্রথম,ভূয়ঃ। ভেদ।
পুরতস্	সম্মুখে।
পুরস্, পুরস্তাৎ	পূর্ব্ব দিকে। প্রথমে। সম্মুখে। অতীত কালে।
পুরা	চিরাতীত। ভবিষ্যৎ। নিকটে।
পূর্ব্বেণ	পূর্ব্ব দিকে। পূর্ব্বে।
পূর্ব্বেদ্যুস্	পূর্ব্ব দিনে।
পৃথক্	ভিন্ন। নীচ।
পৃষ্ঠতস্	পশ্চাৎভাগে।
প্রকামম্	যথেষ্ট। স্বেচ্ছাক্রমে।
প্রগে	প্রাতঃকালে।
প্রতি	প্রতিনিধি। প্রত্যেক।
প্রত্যক্	পশ্চিম দিক্, দেশ, কাল। পশ্চাৎ।
প্রত্যহম্	প্রতিদিন।
প্রত্যুত	বৈপরীত্য।
প্রসহ্য	হঠাৎ। বলপূর্ব্বক।
প্রাক্	পূর্ব্ব দিক্, দেশ,কাল।
প্রাতর্	প্রভাত।
প্রাদুস্	প্রাকাশ্য। নাম।
প্রাধ্বম্	আনুকূল্য।
প্রায়শস্	বাহুল্যরূপে।
প্রায়স্	বাহুল্য।
প্রাহ্নে	প্রভাতে।

প্রেত্য	পরলোকে।

ফ

ফট্	মন্ত্রাংশবিশেষ। অনুকার শব্দ।

ব

বলবৎ	অতিশয়।
বহুশস্	বাহুল্যরূপে।

ভ

ভগোস্	সম্বোধন—ভগবন্।
ভূয়স্	বাহুল্য। বারংবার।
ভূরি	বহু।
ভূরিশস্	বহুবার।
ভৃশম্	অতিশয়। বহুবার।
ভো, ভোস্	সম্বোধন—ভবন্।

ম

মংক্ষু	শীঘ্র। অতিশয়।
মৎ	মদীয়।
মনস্	তৃপ্ত্যর্থ।
মনাক্	ঈষৎ। আস্তে আস্তে।
মম	মমতা, মায়া।
মা, মাস্ম	নিন্দা। নিষেধ, না।
মিথস্	পরস্পর। নির্জ্জনে।
মিথ্যা, মুধা	বৃথা। নিষ্ফল।
মুষ্টামুষ্টি, মুষ্টীমুষ্টি	কীলাকীলি।
মুহুস্	বারংবার।
মৃষা	মিথ্যা।

য

যৎ	যেহেতু। যেমন। যাহাতে।
যতস্	যেহেতু। যখন। যেমন।
যত্র	যেখানে।
যথা	যেপ্রকার। সত্য। অনতিক্রম। সাদৃশ্য।
যথাক্রমম্, যথাযথম্, যথার্হম, যথাবৎ, যথাস্বম্	যথাযোগ্য, যথার্থ।
যথাশক্তি	শক্ত্যনুসারে।
যথেপ্সিতম্	ইচ্ছানুরূপ।
যদা	যখন। যেহেতু।
যদি	সম্ভাবনা। পক্ষান্তরে।
যাবৎ	পরিমাণ। সাকল্য। পর্য্যন্ত। অবধারণ।
যুগপৎ	এককালে।

র

রহস্	নির্জ্জনে।

ব

ব	সাদৃশ্য।
বৎ	সদৃশ।
বত	খেদ। হর্ষ। বিস্ময়। অনুকম্পা। আমন্ত্রণ।
বরম্	উৎকৃষ্ট।
বষট্, বৌষট্	হবির্দান-মন্ত্র।
বহিস্	বাহির।
বা	বিকল্প। বিতর্ক। সমুচ্চয়। উপমা। বাক্যপূরণ।
বিধিবৎ	যথাবিধি।
বিনা	ব্যতিরেকে।
বিষ্বক্, বিশ্বক্	সর্ব্বত্র। সর্ব্বব্যাপী।
বৃথা	নিরর্থক। অবিধি।
বৈ	পাদপূরণ।

শ

শনৈস্	ক্রমশঃ, অল্পে অল্পে।
শশ্বৎ	নিরন্তর। সহিত।

शान्तम्	নিবৃত্ত, বারিত।
श्रत्	শ্রদ্ধা।
श्वस्	আগামি দিনে।

स

संवत्	বৎসর। বিক্রমাব্দ।
सकृत्	একবার। সহিত।
सत्रा	সহিত।
सदा, सना	সর্ব্বদা।
सद्यस्	তৎক্ষণে, তখনি।
सपदि	শীঘ্র, তৎক্ষণে।
समन्ततस्, समन्तात्	সকল দিকে।
समम्	সহিত। যুগপৎ।
समया	সমীপে। মধ্যে।
समुपजोषम्	ভাগ্যবশতঃ। হর্ষ।
सम्प्रति	এক্ষণে।
सम्यक्	সত্য। সুন্দর। সমুদয়।
सर्व्वतस्	সকল দিকে।
सर्व्वत्र	সকল স্থানে।
सर्व्वथा	সকলপ্রকারে।
सर्व्वदा	সকল সময়ে।
सहसा	হঠাৎ, অতর্কিত।
साकम्	সহিত।
साक्षात्	প্রত্যক্ষ। তুল্য।
साचि	বক্র, নত।
सामि	অর্দ্ধ। নিন্দিত।
साम्प्रतम्	সম্প্রতি। উচিত।
सायम्	সন্ধ্যাকাল।
सार्द्धम्	সহিত।
सुचिरम्	বহুকাল।
सुतराम्	অত্যন্ত। অবশ্য। অগত্যা।
सुष्ठु	অতিশয় সুন্দর।
स्थाने	উচিত।
स्म	অতীত। পাদপূরণ।
स्वतस्	নিজ হইতে।
स्वधा	পিতৃদান-মন্ত্রবিশেষ।
स्वयम्	নিজে।
स्वर्	স্বর্গ। পরলোক।
स्वस्ति	শুভ। আশীর্ব্বাদ। পুণ্য।
स्वाहा	হবির্দান-মন্ত্রবিশেষ।
स्वित्	প্রশ্ন। বিতর্ক, সংশয়।

ह

ह	সম্বোধন। পাদপূরণ।
हंहो	সম্বোধন।
हञ्जे	ভৃত্যার প্রতি সম্বোধন।
हण्डे	নীচার প্রতি সম্বোধন।
हन्त	খেদ। হর্ষ। অনুকম্পা। বাক্যারম্ভ।
हला	সখীর প্রতি সম্বোধন।
हा	বিষাদ। শোক। পীড়া।
हि	হেতু। অবধারণ। পাদপূরণ।
हिरुक्	ভিন্ন। মধ্যে। নিকটে।
हिहि, हीही	আহ্লাদ। হাস্য।
ही	বিস্ময়।
हुम्, हूम्	স্বীকার। পরিপ্রশ্ন। বিতর্ক।
हे, हेहे, है, हो	সম্বোধন।
ह्यस्	গত দিনে।

प्र-परादयो विंशतिरुपसर्गाश्चाव्ययशब्दाः ।—१०म-सूत्रं द्रष्टव्यम् ।

एतद्भिन्ना अपि अव्ययशब्दाः बहवः सन्ति ।

४र्थः। स्याद्यन्ताध्यायः।

१म पादः—स्त्रीत्यः।

२४९। स्त्रियामत आप्।

(स्त्रियाम् ७।, अतः ५।, आप् ।१।)।

स्त्रीलिङ्गे स्थितादकारान्तादाप् स्यात्। मेधा, सर्व्वा।*

२५०। हसाद्वा। (हसात् ५।, वा ।१।)।

स्त्रियां हसन्तादाप् स्याद्वा। वाचा वाक्, दिशा दिक्।†

---

* लिङ्गसाधनयोग्यानपि आबादीन् काठिन्यभयात् स्त्रीलिङ्गपादे नोक्ता पृथक् वदति स्त्रियामित्यादि। लिङ्गानां स्त्रीत्वविवक्षायां स्याद्युत्पत्तेः प्रागेव यथासम्भवमाबादयः स्युः, त्यदादेस्तु स्याद्युत्पत्तेः पश्चात् (१३३) टेरत्वे अदन्तत्वादाप् स्यादिति, अतएव त्यदादेष्टेरत्वे सत्याप् (१५७,२४०) इति स्वयमुक्तम्। आबीपोः पकारस्तु (१४८) आबीब्भसादित्यादिषु गोपा-श्रीपा-प्रभृतीनामप्राप्तये विशेषणार्थः। ऊपस्तु पकारः (४६३) रूपकल्पे चबूप् इत्यादौ ङसादेः प्राप्तये विशेषणार्थः। मेधा मेधधातोः (११५४) अप्रत्यये, मेध इति नित्यस्त्रीलिङ्गादाप्। पाक्षिकस्त्रीलिङ्गन्तु—सर्व्वा। पाणिनिः ४।१।४। शूद्रा चामहत्पूर्व्वा इति वार्त्तिकम्।

† शिष्टप्रयोगानुसारेणैव स्याद्वा न तु सर्व्वस्मात् हसन्तादिति। यथा—क्षुधा वाचा दिशा क्रुधा विपाशा च स्रजा रुजा। गिरोष्णिहा देवविशा, पक्षे क्षुध्-वाग्-दिगादयः॥ (भागुरिमतम्)। "गिरादेर्वा" इति पद्मनाभः। "उष्णिहादेरित्येके" इति क्रमदीश्वरः। एवं वाशब्दस्य व्यवस्थया, द्विपात् त्रिपात् चतुष्पादित्यादौ न स्यात्, द्विपदा त्रिपदा चतुष्पदा ऋक् इत्यादौ तु स्यात् (पाणिनिः ४।१।९)। ऋचि किं, द्विपदी स्त्री।

२५१ । मनो डाप् । (मनः ५।, डाप् ।१।) ।

स्त्रियां मनन्तात् डाप् स्याद्वा । सीमे सीमानौ, पामे पामानौ ।*

२५२ । ह्रेऽनः । (ह्रे ७।, अनः ५।) ।

स्त्रियां ह्रे स्थितादनन्तात् डाप् स्याद्वा । बहुयज्वे बहुयज्वानौ ।†

२५३ । ईप् चाम्वस्थात् । (ईप् ।१।, च ।१।, अम्वस्थात् ५।) ।

मस्थवस्थान्यपरानन्तात् ह्रे स्थितात् स्त्रियामीप् डाप् च स्याद्वा । बहुराज्ञ्यौ बहुराजे बहुराजानौ ।‡

---

* मन्भागान्तात् डाप् वा स्यात्, डपावितौ । सीमे इति सिधातोः, इमनि, पामे इति पाधातो र्मनि, सीमन् पामन् इति लिङ्गम्, आभ्यां डापि औविभक्तौ सीमे पामे इति । पक्षे सीमानौ पामानौ । सीमसीमे स्त्रियामुभे, पामपामा विचर्चिका (रोग-विशेषः) इत्यमरः । सिविभक्तौ विकल्पपक्षे रूपसाम्यात् नोदाहृतम् । एवं ददातीति दामा, अत्रापि दामे दामानौ इति । अपिच सुधर्मे सुधर्माणौ, बहुपटिमे बहुपटिमानौ । "मन इति नेदं प्रत्ययग्रहणं किन्तु वर्णग्रहणं, तेन अतिमहिमानौ अतिमहिमे" इति गोयीचन्द्रः । पाणिनिः ४।१।११—१३ ।

† मसंयोग-वसंयोग-परभिन्नतामन्तादेवायं विधिः, तदन्यत्र परसूत्रेण बाधितत्वात् । बहवो यज्वानो ययोः सभयोस्ते सभे इति विग्रहे बहुयज्वे, पक्षे (१६४) बहुयज्वानौ । एवं बहुब्रह्मे बहुब्रह्माणौ, सुधर्मे सुधर्माणौ इत्यादि । पाणिनिः ४।१।१२ ।

‡ मश्च वश्च म्वं म्वस्थं तत् स्थश्चेति म्वस्थः, न म्वस्थः अम्वस्थस्तस्मात् । मव इत्यनेन मवान्त उच्यते । व्याख्यायां मस्थवस्थान्यपरानन्तादिति, मस्थश्च वस्थश्च तौ ताभ्यामन्यः मस्थवस्थान्यः, तस्मात् परोऽन् मस्थवस्थान्यपरान्, सोऽन्ते यस्य तस्मादिति विग्रहः । मसंयोग-वसंयोगभिन्नवर्णात् परो योऽन् तदन्तादीप् चकारात् डाप् च स्याद्वा । बहुराज्ञ्यौ इति बहवो राजानो ययोः सभयोस्ते इति विग्रहे बहुराजन्शब्दात् अनेन ईपि (११७,४६) बहुराज्ञी-शब्दात् औ । पक्षे डापि (१२६) बहुराजा-शब्दात् औ (१४९,२३) = बहुराजे । उभयोरप्राप्तिपक्षे नान्तस्थितिः । एवं दृष्टपूष्ण्यौ दृष्टपूषे दृष्टपूषाणौ, सुदाम्न्यौ सुदामे सुदामानौ स्त्रियौ इत्यादि । (२७६) न मन्संख्येत्यनेन ईप्निषेधस्तु बहुव्रीहेरन्यत्र ज्ञेयः । तत्र बहुयुवा पूः दृष्टमघवा स्त्री इत्युभयत्र ईप् न स्यात् डाप् तु स्यादेवेति वक्तव्यम् । पाणिनिः ४।१।२८, ६।४।१३७ ।

२५४। काप्यनाशीरकेऽदिदयत्तत्क्षिपादेः।

(कापि ७।, अनाशीरके ७।, अत् ।१।, इत् ।१।, अयत्तत्क्षिपादेः ६।)।

आशीरर्थकवर्जे कापि परे अकार इकारः स्यात्, न तु यत्-तत्-क्षिपादेः।

सर्व्विका कारिका। आशीरके तु जीवका।

यदादेस्तु यका सका, क्षिपका ध्रुवका चटका। *

२५५। द्वैषसूतपुत्रवृन्दारकस्वज्ञाजभस्त्राधुत्य-क्योर्वा।

(द्वैष—धुत्यक्योः ६।।, वा ।१।)।

हादेर्धुत्यवर्जयोः कययोश्चाकार इकारः स्याद्वा कापि।

---

* कयुक्त आप् काप् तस्मिन्। आशिषि अकः आशीरकः, नास्ति आशीरको यत्र सोऽनाशीरकस्तस्मिन् कापीत्यस्य विशेषणम्। यादृग्जातीयस्य विप्रतिषेधो विधिरपि तादृग्जातीयस्येति न्यायात् आशीरकवर्जनात् कृतककारस्य ग्रहणं न तु प्रकृतेः, तेन नक-धातोः (९९३) पचादित्वाटनि नका, शकधातोः शका इत्यादौ न इकारः स्यात्। मयेय-मित्यत्र तु मामिका इति आदेशत्वात् कृतककार एव। (मामकनरकयोरुपसंख्यानमिति वार्त्तिकम्।) सर्व्विकेति सर्व्वा इत्यस्य (२०८) टेः पूर्व्वं अक्—सर्व्वका इति कापि परे सर्व्वस्य अकार इकारः। कारिकेति करोति या इति वाक्ये कृधातोः (९९०) णकप्रत्यये आपि कारका इति कापि अकार इकारः। जीवकेति जीवतादिति वाक्ये (१००६) आशिषि अकः, पश्चात् स्त्रियां जीवका इति, आशीरर्थभिन्ने जीविका इत्येव। यका सका इति या सा इति पदद्वयस्य (२०८) टेः पूर्व्वं अकि रूपम्। क्षिपादिस्तु— "क्षिपका ध्रुवका चैव करका धारकेष्टका। एड़का चटकायाश्च पितृणामष्टका भवेत्। उपत्यकाधित्यका च तारका भदृगंशयो। वर्णका वस्त्रभेदे स्यात शकुनौ वा तु वर्त्तिका।" इष्टकेति इषधातोः, अष्टकेति अशधातोरौणादिकस्तकः "इष्यशिभ्यां तकन्"। अष्टका-तारका-वर्णकानाम् अन्यस्मिन्नर्थे अष्टिकेत्यादयः। अष्टिका खारी। वर्णिका नटादीनाम्। दीपदशायाम् वर्त्तिकेत्येव। पाणिनिः ७।३।४४,४५, वार्त्तिकानि च। "स आप् सुपः परो यदि न भवति" इति किं, "बहुपरिव्राजका नगरी" इत्यत्र "बहवः परिव्राजका अस्यामिति विग्रहे सुबन्तादयं टाप्" इति पाणिनिटीका।

द्विकेँ द्वके, चटकिका चटकका, आर्यिका आर्यका।
धुत्ययोस्तु—नायिका क्वत्यिका। *

२५६। वाच्चापोऽनुक्तपुंस्कस्य।

(वा ।१।, आत् ।१।, च ।१।, आपः ६।, अनुक्तपुंस्कस्य ६।)।

आपः स्थाने जातोऽकार इदाच्च स्याद्वा कापि न तूक्तपुंस्कस्य। गङ्गिका गङ्गाका गङ्गका। उक्तपुंस्कस्य तु शुभ्रिका। †

---

* द्व इति द्विशब्दस्य टेरत्वे रूपम्। एष इति एतदः सौ रूपम्। त्य इति नच प्रत्ययस्य संज्ञा किन्तु (५२५) त्यनेत्यनेन क्वतस्य त्यप्रत्ययस्य ग्रहणम्। धश्च त्यश्च धत्यौ, न धत्यौ अधत्यौ। कश्च यश्च क्य, अधत्ययोः क्य अधत्यक्य। द्वश्च एषश्च सूतश्च पुत्रश्च वृन्दारश्च स्वश्च ज्ञश्च अजश्च भस्त्रा च एषां समाहारः द्वैषसूतपुत्रवृन्दारस्वज्ञाजभस्त्रं, तच्च अधत्यक्य च तौ तयोः। द्वादीनां नवानां अकारस्य इकारः स्याद्वा कापि, धातोः ककारयकारौ हित्वा त्यस्वरूपस्य च यकारं हित्वा अन्यौ यौ ककारयकारौ तयोरकारस्य च इकारः स्याद्वा कापीत्यर्थः। द्विकेँ द्वके इति द्विशब्दात् औ क्वते (१३३) टेरत्वे, (२०८) टेः पूर्व्वं अकि, (२४९) आपि द्वका इति स्थिते अनेन वा अकारस्य इः। एवं एषिका एषका, सूतिका सूतका, पुत्रिका पुत्रका, वृन्दारिका वृन्दारका इत्यादि। भस्त्रिका भस्त्रकेति, भस्त्रा चर्म्मप्रसेविका इत्यमरः। भस्त्रा एव (४३३) स्वार्थे ककारे, (४३७) ह्रस्वे, भस्त्रका इति स्थिते अनेन वा इकारः। भस्त्र इत्यकारान्त इति वार्त्तिकम्। एषां गौणत्वेऽपि बहुस्त्रिका बहुस्त्रका इत्यादि। चटकिकेति चटधातोरौणादिकोऽकः, ततः चटकाशब्दात (४३३) स्वार्थे ककारादि। आर्यिकेति ऋधातोः (९७१) घ्यणि आर्य्याशब्दात् स्वार्थे ककारादि। उभयत्र वा अकारस्य इः। नायिकेति नीधातोः (९९०) णकप्रत्यये नायकशब्दात आप्, धातुसम्बन्धियकारत्वादस्याप्राप्तौ पूर्व्वेण नित्यम इकारः। धातोः ककारस्य यथा—चकधातोः णकप्रत्यये चाकिकेत्यादि पूर्व्वेण नित्यम्। क्वत्यिकेति क्व भवा इति वाक्ये (५२५) क्वत्या, ततः स्वार्थे (४३३) ककारे क्वत्यका इति स्थिते पूर्व्वेण नित्यमिकारः। एवं तत्रत्यिका दाक्षिणात्यिका अमात्यिका इत्यादि। त्यस्वरूपनिषेधात् भात्यिका भात्यका इति। पाणिनिः ७।३।४६,४७, वार्त्तिकञ्च।

† उक्तः पुमान् येन तत् उक्तपुंस्कं, न उक्तपुंस्कमनुक्तपुंस्कं (लिङ्गं) तस्य। आपः स्थाने (४३७) केऽकः स्व इत्यनेन जातो योऽकारस्तस्य स्थाने इकार आकारश्च स्यात् वा कापि, परेऽकारांशातः, न तु उक्तपुंस्कशब्दस्य। गङ्गा एव इति वाक्ये (४३३,४३७)

२५७। ष्टिन्नृञ्च्वाहनदादेरीप्।

(ष्-ट्-उ-ऋ-इत् न् ऋ अञ्च् वाह् नदादेः ५।, ईप् ।१।)।

षकारेत-टकारेत उकारेत ऋकारेतो नान्ता-ऋदन्ता-दञ्चो वाह्नो नदादेश्च ईप् स्यात् स्त्रियाम्। *

२५८। यथोर्लोपोऽयुक्तौ पौ।

(यथोः ६॥, लोपः १।, अ-युक्तौ ७।, पौ ७।)।

गङ्गका इति स्थिते अनेन अकारस्य इकारः आकारस्य, पक्षे अकारस्थितिः। एवं दुर्गिका दुर्गाका दुर्गका इत्यादि। शुभ्रिकेति पूर्व्वेण नित्यमिकारः। शुभ्रः पुमान् इति च भवतीत्ययमुक्तपुंस्कः शब्दः। पाणिनिः ७।३।४८,४९।

* ष च ट च उश्च ऋश्च इरः, ते इतो येषां तेऽद्वितः, तेच न च ऋश्च अञ्च् च वाह् च नदादिश्चेति तस्मात्। नकार-ऋकारयोः केवलयोरसम्भवात् तदन्तयोर्ग्रहणम्। ध्वंसु स्रंसु इत्यादौ धातोरुकारेतस्तु नात्र ग्रहणं "धातोरुगितः प्रतिषेधः" इति वार्त्तिकात्। अत्र षकारेत्-टकारेत्-नदादीनां मुख्यानामेव ग्रहणं, तेन बहुवैष्णवा, बहुभूषणा, बहुनदा इत्यादौ न स्यात्। अन्येषां गौणानामपि, तेन अतिविदुषी, अतिपचन्ती, अतिदण्डिनी, अतिकर्त्री, अतिप्रतीची, अतिशाल्यूही इत्यादि स्यादेव। नदादिश्च (गौरादिरिति पाणिनिः)—

नदी मद श्वर सौरी गौर चेल भष लवाः।
दर कन्दर तर्कारा-तरुणः कण-काकिणी।
बदरामलकौ सूद-हरीतक-विभीतकाः।
गवी देवी धातकश्च मातामह-पितामहौ।
द्रोणः स्थूणाढकौ पात्र-कोषातक-पुटाम्रटः।
[अयःस्थूण इति पाणिनिः, आयस्थूण इति क्रमदीश्वरः।]
कवाटमावटौ नाटौ नटौ भोट-पटौ शठः।
वराटः शष्कुलः सूचः शचौ मण्डल-कुण्डलौ।
लोहिताण्डोऽथ कुष्माण्ड मठ पुष्कल पिप्पलाः।
[लोहाण्ड इति पाणिनिः।]
कदलः कन्दलः पिण्ड-काकलौ शल्लकी लवः।

इवर्णावर्णयोर्लोपः स्यात् अयावक्तौ पौ परे ।

ष—वैष्णवी वराकी । *

२५९ । क्यङ्य्चौ चानात्यपत्यण्णस्य ।

(क्य-ङ्य-च्वौ ७।, च ।१।, अनाति ७।, अपत्यण्णस्य ६।) ।

अपत्यार्थ-ण्णस्य लोपः स्यात् अयावक्तौ पौ परे, क्य-ङ्य-च्वौ च, नत्वाकारे । गार्गी । †

अनडुत् सूर्म्म-कोलौ च पिशङ्गातस-वेतसाः ।
मालतः श्रम-सूर्पौ च विल्व मण्डप कंकयाः ।
मडुलौ मह-मण्डौ च सुषवः पृथिवः पृथुः ।
ऋष्यौ मनुष्यौ मत्स्यश्च मुकयौ गवयौ हयः ।
महत् वृहत् तरः शृङ्गः एतदाद्या नदादयः ।'८३ ।
(एतद्भिन्ना ह्यनेकेऽपि गौरादौ पठिताः पुनः ।)

• पुत्रशब्दोऽपि नदादाविति क्रमदीश्वरः । पाणिनिः ४।१।५,६,१५,४१,६१,"अज्ञेयोप-संख्यान"मिति वार्त्तिकञ्च ।

अत्र ८३संख्यको नदादिः पठितः, संक्षिप्तसारे तु ११०संख्यकः । पाणिनीयो गौरादिस्तु १५०संख्यकः ।

* इश्च अश्च तौ यौ, तयोः ययोः । युश्च क्तिश्च युक्ती, न विद्येते युक्ती यत्र पौ सोऽयुक्तिस्तस्मिन् । अत्र अश्च इश्च इति समासे एलोप इति कृते एकारलोपभ्रमो जायते अतः ययोरिति । (४७०) प्रेष्ठः श्रेष्ठ इत्यादौ प्र श्र इत्याद्यादेशस्य अकारान्तनिर्द्देशात् न अकारलोपः । पारस्त्रैणेय इत्यत्र तु (४१६) द्विपदवृद्धिविधानात् न ईकारलोपः । अयुक्तौ किं ऊर्णायुः रामेण इत्यादि । ष—इति षकारेत्शब्दस्य उदाहरणज्ञापकम् । वैष्णवी, विष्णुर्देवता यस्याः इत्यर्थे विष्णुशब्दात् (४३३) विकारसङ्घेति ण्णप्रत्यये वैष्णव-शब्दादीप् । वराकी—वृधातोः (११११) भिक्षजल्पेति षाकप्रत्यये वराकशब्दादीप् । पाणिनिः ६।४।१४८ ।

† क्यश्च ङ्यश्च च्विश्चेति क्यङ्यच्वि तस्मिन् । न आत् अनात् तस्मिन् । अपत्ये ण्ण अपत्यण्ण तस्य । चकारात् युक्तिवर्ज्जे पौ च । गार्गी इति गर्गस्य स्त्र्यपत्यम् इति अपत्यार्थे (४१५) ण्णे कृते, गार्ग्यशब्दात् (२५७) षकारेत्त्वादीपि, अनेन पौ परे ण्णलोपः ।

२६०। सूर्य्यागस्त्यस्य तिष्यपुष्यस्य ण्यात्रमत्स्य-स्येयेपो भण्णे ईपि यः।

(सूर्य्यागस्त्यस्य ६।, तिष्यपुष्यस्य ६।, ण्यात्रमत्स्यस्य ६।, ईयेपोः ७॥, भण्णे ७।, ईपि ७।, यः ६।)।

एषां यस्य लोपः स्यात् ईयेपोः परयोः, नचत्रणे ईपि च।
सौरी आगस्ती चातुरी। *

ट—त्रयी भूषणी। उ—विदुषी श्रीमती भवती। (२४५) अप्-यनो नित्यम्, ऋ—पचन्ती। (२४४) आद्दीपोः, तुदन्ती तुदती, भान्ती भाती। न—दण्डिनी अर्व्वती राज्ञी शुनी, मघवती मघोनी। ऋ—कर्त्री क्रोष्ट्री। अन्च—प्रतीची प्रत्यञ्ची, तिरश्ची तिर्य्यञ्ची, अमुमुईची अदमुईची, उदीची। वाह—भारौही, श्वेतौही श्वेतवाही, शाल्यूही। नदी मर्त्ती गौरी। †

क्ये—गार्ग्यमिच्छति (८४३) गार्गीयति। ङ्ये—गार्ग्यं इवाचरति (८४८) गार्गायते। च्वौ—अगार्ग्यो गार्ग्यो भवति (४९५) गार्गीभवति। विभक्तौ—गार्गे इत्यादि। आकारे तु गार्ग्यायणः। अपत्य-ण्यास्येति किं, सुभगस्य भावः सौभाग्यं, सौभाग्यमिच्छति (८४३) सौभाग्यीयति। पाणिनिः ६।४।१५०—१५२।

* सूर्य्यागस्त्ययोरीये ईपि च परे, तिष्यपुष्ययोर्नक्षत्रार्थविहिते णे परे, ण्यात्र-मत्स्ययोरीपि परे यस्य लोपः स्यादित्यर्थः। ण्यात्र इति अपत्यार्थभिन्नस्य ग्रहणं, पूर्व्वसूत्रे तस्य ग्रहणात्। सौरीति सूर्य्यस्येयमित्यर्थे (४३३) णे सौर्य्य इति स्थिते (२५७) षित्त्वादीपि अनेन यलोपः। एवं आगस्ती। चातुरीति चतुरस्य भावः इत्यर्थे (४३३) ण्ये चातुर्य्य इति स्थिते (२५७) ईपि अनेन यलोपः, एवम् औचिती मैत्री सामग्री। पाणिनिः ६।४।१४९, वार्त्तिकत्रयञ्च।

† ट इति टकारेत् उदाह्रियते इत्यर्थः। त्रयी त्रयाणां पूरणीत्यर्थे (४६१) त्रि-शब्दात् अयट्। भूष्यतेऽनयेति भूषधातोः करणवाच्ये (११३४) अनट्, टित्त्वादीप्।

२६१ । णच्खसाद्वनो रङीप् वा तु हे ।

(णच्खसात् ५।, वनः ५।, रङ् ।१।, ईप् ।१।, वा ।१।, तु ।१।, हे ७।) ।

णादचः खसाच्च विहितात् वन ईप् स्यात्, वनो रङ् च स्त्रियां, हे तु वा !

अवावरी धीवरी हरिद्दृश्वरी, बहुधीवरी बहुधीवा । *

उ इति उकारेत् उदाह्रियते इत्यर्थः । विदुषीति विदधातोः शतृ, (११०३) शतृस्थाने क्वसुः, विद्वस्शब्दात् उदित्त्वादीपि, (२२६) वस्थाने उः । श्रीमतीति श्रीरस्त्यस्या इति वाक्ये (४४१) श्रीशब्दात् मतुः, उदित्त्वादीप् । भवतीति भाधातोरौणादिको डवतुः,भवत् शब्दादीप् । ऋ इति ऋकारेत उदाहरणम् । पचन्तीति पचधातोः (११००) शतृ । तुदधातोः भाधातोश्च शतृप्रत्यये विकल्पेन नुण् । न इति नान्तस्येत्यर्थः । दण्डिनीति दण्डोऽस्त्यस्या इति वाक्ये (४४४) इन्, अर्व्वतीति अर्व्वन्शब्दात् नान्तत्वादीपि (१६५) तुङ् । राजन्शब्दादीपि (११७,४६) राज्ञीति । शुनीति श्वन्शब्दादीपि (१६४) वस्य उः । मघवन्शब्दादीपि (१६१) तुङो विकल्पः, विकल्पपक्षे (१६४) वस्य उः । ऋ इति ऋदन्तस्येत्यर्थः । कर्त्रीति करोति या सा इति कृधातोः (६६०) तृन्, ततो ऋदन्तत्वादीप् । क्रोष्ट्रीति क्रोष्टुशब्दस्य स्त्रियां (१३६) तुनः स्थाने तृन्, ततः ईप् । अन्च इति अन्चधातोः क्विबन्तस्येत्यर्थः । प्रतिपूर्व्वकात् अन्चधातोः (१०३२) क्विपि (५६७) नलोपे, प्रत्यच्शब्दात् ईपि (२२४) प्रतीची । पूजार्थे (५६८) नलोपाभावे प्रत्यञ्च्शब्दादीपि प्रत्यञ्ची । तिर्य्यच्शब्दादीपि (२२५) तिरश्ची । तिर्य्यञ्च्शब्दादीपि तिर्य्यञ्ची । अमुमुयच् अदमुयच् उदच् शब्देभ्य ईपि (२२५) अमुमुईची अदमुईची उदीची । वाह इति विणन्त-वहधातोरित्यर्थः । भारं वहतीति (१०२८) विण्-प्रत्यये भारवाहशब्दादीपि (१७६) वा स्थाने औ । श्वेतवाहशब्दादीपि, वा औ । शालिवाहशब्दादीपि(१८०)वा-स्थाने ऊः । नदादेरुदाहरणमाह नदी, मत्स्यशब्दादीपि, (२६०) अनेन यलोपः । (२६३) जातेरत इत्यत्र यकारोङवर्जनादप्राप्तौ नदादित्वादीप् । गौरशब्दादीपि गौरीति ।

* णान्तात् अजन्तात् खसन्ताच्च धातोः परः (१०३२) वामुसिसित्यनेन विहितो यो वन्प्रत्ययस्तस्मात् ईप् स्यात् स्त्रियाम, ईपि सति वनो रङ् च स्यात, बहुव्रीहौ त रङीपौ वा स्त इत्यर्थः । अवावरीति ओणधातोः (१०३२) वनिपि, (१०३१) णकारस्य आकारे (३५) ओकारस्य अवि अवावन् इति स्थिते अनेन ईप् रङ् च । धीवरीति

२६२। स्नश्चोधःसंख्यादिदामवयोऽर्थहायनाद्धे।

(स् ।१।, नः १।, च ।१।, ऊधस्-सङ्ख्यादि-दाम-वयोऽर्थहायनात् ५।, हे ७।)।

ऊधसः सङ्ख्यापूर्व्वात् दाम्नो वयोऽर्थ-हायनाच्च ईप् स्यात् हे, सस्य च नः स्यात्। पीनोध्नी द्विदाम्नी द्विहायनी। *

२६३। जातेरतोऽस्त्री-युङ्-सत्काण्डप्राक्-प्रान्तशतैकादिपुष्प-संभस्त्राजिनैकशणपिण्डादिफल-नादिमूलात्।

(जातेः ५।, अतः ५।, अस्त्री—मूलात् ५।)।

धाधातोः (१०३२) क्वनिपि (६१२) ङी, धीवन् इत्यस्मात् ईप् रङ् च, एवं त्रिभावरीत्यादि। हरिदृश्वरीति हरिं पश्यति या इति वाक्ये हरि-दृश धातोः क्वनिपि हरिदृश्वन्, वनिपो वकारस्य दन्त्यत्वेन भसपरत्वाभावात् (१५४) न षङ्। तस्मादीप् रङ् च। बहुधीवरीति बहवो धीवानः (कैवर्त्ताः) यस्यां नद्यामिति बहुव्रीहौ ईप् रङ् च, ईपोऽप्राप्तिपक्षे रङोऽप्यभावः, एकयोगनिर्द्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिरिति न्यायात्। पक्षे—बहुधीवन्-सि (१४८,१६४,११८) बहुधीवा। ण्वन्तत्वात् किं यज्वा। पाणिनिः ४।१।७, वार्त्तिकद्वयञ्च।

* वयः अर्थो यस्य स वयोऽर्थः स चासौ हायनश्चेति वयोऽर्थहायनः, दाम च वयोऽर्थहायनश्च तौ, सङ्ख्या आदिर्ययोस्तौ सङ्ख्यादी, तौ च तौ दामवयोऽर्थहायनौ चेति सङ्ख्यादिदामवयोऽर्थहायनौ, ऊधस् च सङ्ख्यादिदामवयोऽर्थहायनौ चेति तस्मात्। ऊधसः सङ्ख्यापूर्व्वदाम्नः सङ्ख्यापूर्व्ववयोऽर्थहायनाच्च स्त्रियामीप्, बहुव्रीहौ सस्य नः स्यादिति सम्भवादूधस एव। हे इत्यस्य पुनरुपादानं परसूत्र निवृत्त्यर्थम्। पीनोध्नीति पीनम् ऊधो यस्याः सा गौः, पीनोधसशब्दादीप् सस्य च नः। द्वे दामनी (रज्ज्वौ) यस्याः सा द्विदाम्नी गौः। असङ्ख्यादेस्तु सुदामे सुदामानौ इति (२५३) पूर्व्वेण वा स्यात्। द्वौ हायनौ वर्षौ यस्याः सा द्विहायनी, द्विवर्षा गौः। असङ्ख्यादेस्तु गतहायना। वयोऽर्थः किं, द्विहायना शाला। वयस्तु प्राणिनो गतपरमायुः। हे इति किं ऊधोऽतिक्रान्ता अत्यूधाः। पाणिनिः ५।४।१३१, ४।१।२५—२७। अत्र "संख्याव्ययादेर्ङीप्" इति पाणिनिसूत्रेण ऊधस्शब्दोऽपि संख्यादि व्यादिश्च गृह्यते, तेन द्व्यूध्नी, अत्यूध्नी, द्विविधोध्नी इति। अतएव वोपदेवेन सामान्यत एव ऊधस्शब्दः प्रथमं प्रयुक्तः।

जातिवाचिनोऽकारान्तात् स्त्रियामीप् स्यात् न तु स्त्रीयुङादेः। मृगी हंसी शीतपाकी। स्त्रीयुङादेस्तु—मक्षिका वैश्या सत्पुष्पा संफला अमूला। जातेः किं—मन्दा। *

आकृतिग्रहणा जातिर्लिङ्गानाञ्च न सर्व्वभाक्।
सकृदाख्यातनिर्ग्राह्या गोत्रञ्च चरणैः सह ॥ †

---

* स्त्री नित्यस्त्रीलिङ्गः। य उङ् यस्य स युङ्। सच्च काण्डञ्च प्राक् च प्रान्तञ्च शतञ्च एकञ्च ते आदयो यस्य तत् सत्काण्डप्राक्प्रान्तशतैकादि, तच्च तत् पुष्पञ्चेति तत्। सम् च भस्त्रा च अजिनञ्च एकञ्च शणञ्च पिण्डञ्च ते आदयो यस्य तत् संभस्त्राजिनैकशण-पिण्डादि, तच्च तत् फलञ्चेति तत्। नञ् आदिर्यस्य तत् नादि नादि च तत् मूल-ञ्चेति नादिमूलम्। ततः स्त्री च युङ् च सत्काण्डप्राक्प्रान्तशतैकादिपुष्पञ्च संभस्त्राजिनैक-शणपिण्डादिफलञ्च नादिमूलञ्चेति। पश्चात् नञ्समासे अस्त्रीयुङ्सत्काण्डप्राक्प्रान्त-शतैकादिपुष्पसंभस्त्राजिनैकशणपिण्डादिफलनादिमूलं तस्मात्। मृगजातिः स्त्री मृगी, हंसजातिः स्त्री हंसी। शीते पाको यस्याः सा शीतपाकी, ओषधिविशेषः। जाति-वाचिनो मुख्यादेव ईप्, तेन बहुमृगा भूमिः अब्राह्मणा पुरीत्यादौ न स्यात्। शीतपाकी-त्यादिषु तु गौणदशायामेव जातित्वम्, अतोऽत्र जातेर्मुख्यत्वमेव। नित्यस्त्रीलिङ्गात्तु मक्षिका बलाका इत्यादि। युङस्तु वैश्या क्षत्रिया। ऋष्यहयगवयादीनां युङ्त्वादप्राप्तौ गदादौ पाठादीप्। पुष्पात्तु सत्पुष्पा काण्डपुष्पा इत्यादि। एभ्यः किं, शङ्खपुष्पी चौरपुष्पी। अजातेस्तु बहुपुष्पा लता। फलात्तु संफला भस्त्राफला, भस्त्र इत्यकारान्तो-ऽपि वार्त्तिके, तेन भस्त्रफला। एवं त्रिफला श्वेतफला। एभ्यः किं, रक्तफली। अजातेस्तु बहुफला। नादिमूलात्तु अमूला। नञ्पूर्व्वनिषेधात् शतमूलीत्यादि भवति। अजातेस्तु दृढमूला। मन्दा इति मन्दगुणयुक्ता स्त्री जातित्वाभावान्न ईप्। पाणिनिः ४।१।६३,६४, वार्त्तिकद्वयञ्च। अत्र सूत्रे कलापसुपद्ममतानुसारेण प्राक्पुष्पा इत्येव धृतं वोपदेवेन; वार्त्तिके तु सामान्यतः अच् (अनच् इति क्रमदीश्वरः) इत्युक्तम्; अतएव प्राक्पुष्पा प्रत्यक्पुष्पा इति भट्टोजिदीक्षितः, अवाक्पुष्पा इत्यपि क्रमदीश्वरः। संभस्त्रेत्यत्र च एकशब्दः अधिक इव प्रतीयते "संभस्त्राजिनशणपिण्डेभ्यः फलात् प्रतिषेधो वक्तव्यः" इति वार्त्तिके अदृष्टत्वात्, सुपद्मे संक्षिप्तसारे कातन्त्रपरिशिष्टे च अनुल्लिखात्।

† अथ जातिवाचकशब्दज्ञापनार्थं जातिलक्षणमाह आकृतिग्रहणेत्यादि—

आक्रियते व्यज्यते अनयेति आकृतिरवयवसंस्थानं, आकृत्या ग्रहणं ज्ञानं यस्याः सा आकृतिग्रहणा जातिः, जातिराकृतिग्रहणा आकृतिव्यङ्ग्या भवतीत्यर्थः। अथवा

गार्गी कठी कौथुमी। *

'गृह्यतेऽनेनेति ग्रहणं करणसामान्यविशेषत्वाभावास्य स्त्रीलिङ्गत्वम्', 'आकृतिर्ग्रहणं यस्याः सा आकृतिग्रहणा संस्थानव्यङ्ग्येति यावत्' इति गोयीचन्द्रः, 'अनुगतसंस्थानव्यङ्ग्येत्यर्थः' इति सिद्धान्तकौमुदी। तेन मनुष्यगोमृगहंसादीनाम् आकृत्या व्यज्यमाना मनुष्यत्व-गोत्वमृगत्वहंसत्वादि र्जातिः। एवं लक्षणे सति, ब्राह्मणक्षत्रियवैश्यशूद्राणां पृथक् आकृतेरभावात् ब्राह्मणत्वादेर्जातित्वं नायातमिति लक्षणान्तरमाह लिङ्गानामिति, या च लिङ्गानां न सर्वभाक्—सर्वाणि लिङ्गानि न भजति, सा च जातिरित्यर्थः। तेन ब्राह्मणादीनां द्विलिङ्गमात्रभाजित्वेन ब्राह्मणत्वादिर्जातिरिति। एवञ्च सति, हंसं दृष्टवतोऽपि अज्ञातहंसस्य जनस्य तदाकृत्या हंसत्वं व्यञ्जितुं न शक्यते अतो हंसत्वस्य न जातित्वमिति प्रथमलक्षणदोषः, एवं देवदत्तादि-संज्ञाशब्दस्यापि सर्व्व-लिङ्गाभाजित्वेन जातित्वापत्तेर्द्वितीयलक्षणदोषश्च, इति दोषद्वयमपाकर्त्तुं द्वयोर्लक्षणयो-र्विशेषणमाह सकृदिति। सकृदेकवारम् आख्यातेन उपदेशेन निर्ग्राह्या निश्चयेन ग्रहीतुं शक्या जातिरित्यर्थः। तेन प्राक् ईदृशो हंस इत्युपदेशे, पश्चात् हंसं दृष्टवतस्तदाकृत्या हंसं व्यञ्जितुं शक्यत एवेति प्रथमलक्षणस्य न दोषः, एवं देवदत्तादिसंज्ञाशब्दस्य एक-व्यक्तावुपदेशे व्यक्त्यन्तरे ज्ञानाभावात् न जातित्वमिति द्वितीयलक्षणस्यापि न दोषः। "एतेन जातेरेकत्वं नित्यत्वं प्रत्येकं परिसमाप्तिश्च स्वरूपं दर्शितवान्" इति गोयीचन्द्रः। एवं लक्षणद्वयेऽपि सति, गार्ग्यादीनां कठादीनाञ्च आकृतिव्यङ्ग्यत्वाभावात् सर्व्वलिङ्ग-भाजित्वाच्च न जातित्वमायातमतः पारिभाषिकं जातिलक्षणमाह गोत्रञ्चेति, पुत्र-पौत्रादिकमपत्यं गोत्रं, चरणं वेदैकदेशः, एतदुभयञ्च जातिरित्यर्थः। "अपत्यप्रत्ययान्तः शाखाध्येतृवाची च शब्दो जातिकार्य्यं लभत इत्यर्थः" इति सिद्धान्तकौमुदी। अत्र जातेर्लक्षणान्तराणि प्रदर्श्यन्ते—"असर्व्वलिङ्गत्वे सति एकस्यां व्यक्तौ कथनाद्व्यक्त्यन्तरे कथनं विनापि सुग्रहा जातिः" इति सिद्धान्तकौमुदी। "या द्रव्यस्योत्पत्तावुत्पद्यते नाशे च नश्यति युगपद्गुणैः सम्बध्यते न सर्व्वलिङ्गं भजते बह्वनर्थानुपैति सा जाति-रभिधीयते। यदुक्तं, प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद्गुणैः। असर्व्वलिङ्गां बह्वर्थां तां जातिं कवयो विदुः॥ एतस्मिन् दर्शने युवत्वकुमारत्ववृद्धत्वादीनामजातित्वम्" इति क्रमदीश्वरः।

* गर्गस्यापत्यं स्त्री इति वाक्ये (४१५) ष्यप्रत्यये गार्ग्यशब्दादनेन ईपि (२६०) यलोपः। युङ्त्वादीप्निषेधेऽपि विशेषतो विधानात् गार्ग्यादीनां न निषेधः। षित्त्वात् पूर्व्वेण (२५७) ईप्सम्भावनायामपि गार्ग्यादीनां जातिसंज्ञाफलन्तु—गार्गी भार्य्या यस्यासौ गार्गीभार्य्य इत्यादौ (३२८) पुंवद्भावनिषेधः। गार्गी चासौ भार्य्या चेति कर्म्मधारये गार्ग्यभार्य्या इत्यादौ तु (३५०) पुंवद्भावः, गार्गीत्वम् इत्यादौ पुनः (३५०) पुंवद्भाव-निषेधश्च। कठशाखाध्ययनकर्त्ता कठः तस्य स्त्रियाम् अनेन ईप्, एवं कौथुमीत्यादि।

२६४। गुणाद्वोतोऽखरुस्योङः।

(गुणात् ५।, वा ।१।, उतः ५।, अ-खरु-स्योङः ५।)।

गुणवाचकादुकारान्तात् स्त्रियामीप् स्याद्वा, न तु खरोः स्योङश्च। मृद्वी मृदुः। खरुस्योङस्तु खरुः पाण्डुः। गुणात् किम्—

सत्त्वे निविशतेऽपैति पृथग्जातिषु दृश्यते।
आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः॥

धेनुः।*

---

* स्यः संयोग उङ् यस्य स स्योङ्, खरुश्च स्योङ् चेति खरुस्योङ्, न खरुस्योङ् अखरुस्योङ् तस्मात्। गुणवाचकादिति गुणं वक्तीति कर्त्तरि णकः। अभेदोपचारात् गुणविशिष्टद्रव्यवाचकादुकारान्तादित्यर्थः। मार्द्दवगुणविशिष्टा स्त्री मृद्वी,वा मृदुः। एवं पट्वी पटुः, लघ्वी लघुः, गुर्व्वी गुरुरित्यादि। खरुशब्दस्य शुक्लगुणवाचकत्वात् प्राप्तौ निषेधः। "खरुः पतिंवरा कन्या" इति भट्टोजिदीक्षितः। "खरुः तीक्ष्णः" इति गोयीचन्द्रः। 'गुणमाह—

सत्त्वे इति। यः सत्त्वे द्रव्ये निविशते तदाश्रयति, अपैति तस्मादपगच्छतीत्यर्थः। यथा श्यामता आम्रादिफले निविशते पश्चात् पक्वदशायां तस्मादपैति। एवं पृथग्जातिषु द्रव्यान्तरेषु दृश्यते आम्रादिवत् कदल्यादिषु दृश्यते, स गुणः स्यादित्यर्थः। "पृथग्जातिषु दृश्यते नानाजातिष्ववलोक्यते इत्यर्थः।—तथाहि श्यामता आम्रे तृणे गवि च दृश्यते, एतेन जातेर्गुणत्वं निरस्तं, अतः सत्ता द्रव्ये गुणे कर्म्मणि च वर्त्तते नासौ जातिर्द्रव्यादपैति जन्मनः प्रभृत्या विनाशपर्य्यन्तमाधारद्रव्यापरित्यागात् न च जातिः।—नहि गोत्वमश्वजातौ दृश्यते नाप्यश्वत्वं गोजातौ।" इति गोयीचन्द्रः। एवं सति गमनादिकर्म्मणो गुणत्वापत्तिः द्रव्ये प्रवेशनिर्गमयोगात् द्रव्यान्तरेषु च दर्शनात्, अतआह आधेयश्चेति, यः आधेयः उत्पाद्यः, अक्रियाजो न क्रियाजन्यश्च, अनित्यो नित्यश्च भवतीत्यर्थः, पक्वघटादिरक्ततागुण उत्पाद्यः आकाशादिमहत्त्वादिगुणो नित्य इति, कतिपये गुणा अनित्याः कतिपये च नित्या इति तात्पर्य्यम्। कर्म्मणस्तु सर्व्वत्रैवानित्यत्वामिति तन्निरासः। "उत्पादनीयो नित्यश्च" इति तृतीयपादस्य पाठान्तरं वक्ति क्रमदीश्वरः। एवञ्चेत् तर्हि द्रव्यमपि गुणोऽस्तु—अवयवि द्रव्यं हि आरम्भकावयवे निविशते अवयवविनाशात्तस्मादपैति च, द्रव्यान्तरेषु च एवं दृश्यते, द्रव्याणि च कतिचिदनित्यानि नित्यानि च कतिचित् सन्ति, अत उक्तम् असत्त्वप्रकृतिरिति, सत्त्वं प्रकृतिः स्वरूपं यस्य स सत्त्वप्रकृतिः, न सत्त्वप्रकृतिरसत्त्वप्रकृतिः द्रव्यभिन्न इत्यर्थः। धेनुरिति गुणलक्षणायोगात् न ईप्। एतद्गुणलक्षणकारिका तु सिद्धान्तकौमुद्यां न दृश्यते, भाष्यकृता एतस्या अव्याख्यानात्। पाणिनिः ४।१।४४, वार्त्तिकञ्च।

२६५। पाच्छोणादिस्वाङ्गेतोऽक्तेर्वा।

(पाद — स्वाङ्गेत: ५।, अक्तेः ५।, वा ।१।)।

पादः शोणादेः स्वाङ्गादिकारान्ताच्च स्त्रियामीप् स्याद्वा न तु क्तेः। त्रिपदी त्रिपात्, शोणी शोणा चण्डी चण्डा, बिम्बोष्ठी बिम्बोष्ठा। *

स्वाङ्गात् किम्—

स्वाङ्गं स्यादद्रवं मूर्त्तं प्राणिस्थमविकारजम्।
दृष्टं तत्रातत्स्थमपि तद्वत्तादृशि च स्थितम्॥ †

---

* पाद् च शोणादिश्च स्वाङ्गञ्च इत् च तस्मात्। न क्तिः अक्तिस्तस्याः। (३४७) सङ्ख्या-सुपमानादित्यनेनादिष्टात् पाद-शब्दात् शोणादेः स्वाङ्गवाचकात् शब्दात् क्तिभिन्नेकारान्ताच्च स्त्रियामीप् स्याद्वा इत्यर्थः। शोणादिश्च—शोणः कृपण-कल्याणौ पुराणः कमलस्तथा। विकटोदारचण्डाश्च साधारणविशङ्कटौ। सहायारालभरजा विशालाद्यास्तथा परे इति। अत्र शोणादिगणेन इकारान्तेन च पाणिनीयो बह्वादिः (४।१।४५) लक्ष्यते, परन्तु तत्र सहायसाधारणशब्दौ न दृश्येते, आकृतिगणोऽयमिति लिखनात् तु भवत्येव। कश्चि-श्रोणिप्रभृतिस्वाङ्गानामिकारान्तत्वेन प्राप्तः मुखनखादीनाञ्च स्त्रीत्वाभावात् स्वाङ्गमिह गौणमेवेति, तेन बिम्बोष्ठी दीर्घनखीत्यादि। अतएव पाणिनौ उपसर्जनादिति (४।१।५४), संक्षिप्तसारे च अप्रधानार्थादिति, सुपद्मे अप्रधानादिति, कातन्त्रपरिशिष्टे च बहुव्रीहौ इति लिखनम्। त्रिपदीति त्रयः पादाः यस्याः इति बहुव्रीहौ (३४७) पादस्य पाद-आदेशे त्रिपादशब्दादनेन ईप्, (२२३) पादः पदादेशः। त्रिपदी शङ्काधारपात्री। पक्षे त्रिपात्। शोणवर्णा स्त्री शोणी वा शोणा। चण्डी चण्डा इति शोणादित्वात् वा ईप्, अत्यन्तकोपना स्त्रीत्यर्थः। बिम्बे इव ओष्ठौ यस्याः इति बिम्बोष्ठी बिम्बोष्ठा स्त्री, स्वाङ्गवाचकत्वात् वा ईप्, अत्र स्वाङ्गादुपसर्जनाददन्तादिति सिद्धान्तकौमुदीलिखनात् शोभना शिखा सुशिखा इत्यत्र न ईप्। पाणिनिः ४।१।८, ४३,४५,५४, "कृदिकारादक्तिन." इति वार्त्तिकञ्च।

† स्वाङ्गलक्षणमाह—स्वाङ्गं स्यादिति। अद्रवं द्रवभिन्नं, मूर्त्तं साकारं (काठिन्या-दिस्पर्शविशेषो मूर्त्तिरिति गोयीचन्द्रः), प्राणिस्थं प्राणिनि स्थितं (मुखनासिकाभ्यां यो वायुः निष्क्रामति स प्राणः सोऽस्यास्तीति प्राणी तत्र यत् तिष्ठति तत् प्राणिस्थमिति गोयीचन्द्रः), अविकारजं धातुवैषम्यादिरूपविकारात् न जातम्—एवम्भूतं यद्वस्तु तत्

बहुस्वेदा द्रवत्वात् । सुज्ञाना अमूर्त्तत्वात् । सुमुखा शाला अप्राणिस्थत्वात् । सुशोफा विकारजत्वात् । *

सुकेशी सुकेशा रथ्या, अप्राणिस्थस्यापि प्राणिनि दृष्टत्वात् ।

सुस्तनी सुस्तना प्रतिमा, प्राणिवत् प्राणिसदृशे स्थितत्वात् । †

राजी राजिः, क्तेस्तु बुद्धिः मतिः । ‡

स्वाङ्गं स्यादित्यर्थः । यथा बिम्बोष्ठी बिम्बोष्ठा । द्वितीयलक्षणमाह दृष्टं तत्रातत्स्थमपीति—तत्र प्राणिनि दृष्टम् अनन्तरम् अतत्स्थम् अप्राणिस्थमपि अद्रवमूर्त्ताविकारजं यदङ्गं तदपि स्वाङ्गं स्यादित्यर्थः । यथा सुकेशी सुकेशा रथ्या । तृतीयं लक्षणमाह—तद्वत् तादृशि च स्थितमिति—तद्वत् प्राणिस्थवत्, तादृशि प्राणितुल्ये स्थितस्य अद्रवमूर्त्ताविकारजं यत् तच्चापि स्वाङ्गं स्यादित्यर्थः । यथा सुस्तनी सुस्तना प्रतिमा । उक्तकारिकायाः पाठान्तरमपि दृश्यते यथा सिद्धान्तकौमुद्याम्—"अद्रवं मूर्त्तिमत् स्वाङ्गं प्राणिस्थमविकारजम् । अतत्स्थं तत्र दृष्टञ्च तेन चेत्तत् तथा युतम् ॥" "तस्य चेत्तत् तथा युतम्" इति क्रमदीश्वरः ।

* अद्रवादिपद-व्यावृत्तिमाह—बहवः स्वेदा (घर्म्माः) यस्याः सा बहुस्वेदा, स्वेदस्य द्रवत्वात् न स्वाङ्गत्वमित्यर्थः । सुष्ठु ज्ञानं यस्याः सा सुज्ञाना, ज्ञानस्य अमूर्त्तत्वात् । सुष्ठु मुखं यस्याः सा सुमुखा शाला, अत्र शालामुखस्य अप्राणिनि स्थितत्वात् । सुष्ठु शोफः (शोथः) यस्याः सा सुशोफा, शोफस्य विकारजत्वात्, न स्वाङ्गत्वमिति सर्व्वत्रान्वय ।

† सुष्ठु केशो यस्याः सा सुकेशी सुकेशा रथ्या इति द्वितीयलक्षणोदाहरणम् । सुष्ठु स्तनौ यस्याः सा सुस्तनी सुस्तना प्रतिमा इति तृतीयलक्षणोदाहरणम् ।

‡ राजी राजिरिति राजधातोः इप्रत्ययः, एवं गोणी शमी मणी वनी श्रेणी रजनी अवनीत्यादि, पक्षे गोणिरित्यादयः । स्रीः स्री, लक्ष्मीः लक्ष्मी इति दुर्घटरचितक्रमदीश्वरौ । निषेधो यज्जातीयस्य विधिरपि तज्जातीयस्येति न्यायात्, क्तिवर्जनात् क्तिकारादेवायं विधिः, तेन सुगन्धिः युवजानिरित्यादौ न स्यात् । उपलक्षणात् कारिः (११५९), अकरणिः (११६०) अजीवनिरित्यादौ न स्यात् ।

स्वाङ्गवाचके विशेषः—

बह्वचां स्वाङ्गानां मध्ये नासिकोदराभ्यामेव ईप् वा स्यात् । तुङ्गनासिकी तुङ्गनासिका, क्षीणोदरी क्षीणोदरा । आभ्यां किं, पृथुजघना, चारुवदना, दीर्घलोचना इत्यादि । पाणिनिः ४।१।५५ ।

संयोगोङ्स्वाङ्गानां मध्ये अङ्गोष्ठकण्ठकर्णशृङ्गाङ्गदन्तगात्रवालपुच्छेभ्य एव ईप् वा

२६६। धात् क्रीतात्। (धात् ५१, क्रीतात् ५१)।

धनेन क्रीयते स्म—धनक्रीती। *

२६७। क्तादल्पे। (क्तात् ५१, अल्पे ७)।

धादित्येव। अभ्रेण लिप्यते स्म—अभ्रलिप्ती। †

२६८। स्वाङ्गाद्ध्वे। (स्वाङ्गात् ५१, ह्वे ७१)।

स्वाङ्गात् परो ह्वे स्थितो यः क्तस्तस्मादीप् स्यात्। शङ्खभिन्नी। ‡

स्यात्। दीर्घजङ्घी दीर्घजङ्घा इत्यादि। एभ्य. किं, सुनेत्रा सुगुल्फा इत्यादि। पाणिनिः ४।१।५५, वार्त्तिकानि च।

प्रोष्ठी कुगलान्ती नित्यं संज्ञायाम्। प्रोष्ठी शफरी, कुगलान्ती ओषधिविशेषः।

शर कवर विष मणिभ्यः पुच्छात् नित्यम्। शरपुच्छीत्यादि। वार्त्तिकम्।

उपमानपूर्व्वात् पुच्छपक्षाभ्यां नित्यम्। श्वपुच्छी काकपक्षी इत्यादि। उपमानात् किं सितपक्षा हंसीत्यादि। वार्त्तिकम्।

क्रोड खुर बाल शफ गुद घोण घोणा गल भग ग्रीवादेर्न ईप्। पाणिनिः ४।१।५६।

सह विद्यमान नञः परात् स्वाङ्गात् न ईप्। सकेशा इत्यादि। पाणिनिः ४।१।५७।

नख-मुखाभ्यां संज्ञायां न ईप्। शूर्पणखा कालमुखा। पाणिनिः ४।१।५८।

मन्त्रार्थे पाद इत्यस्मात् न ईप्। चतुष्पादा ऋक्। पाणिनिः ४।१।९।

* करणपूर्व्वात् क्रीतादीप् स्यात् स्त्रियाम्। स्याद्युत्पत्तेः प्रागेव समासे एतद्विधानं, अतो धनेन क्रीयते स्म इति वाक्यम्। धनेन क्रीता धनक्रीता इत्यत्र न स्यात्। धात् किं, राज्ञा क्रीयते स्म राजक्रीता इति। पाणिनिः ४।१।५०।

† करणपूर्व्वात् क्तान्तादीप् स्यात् स्त्रियां करणस्य अल्पत्वे सति। इहापि स्याद्युत्पत्तेः प्राक् समासः, अत आह अभ्रेण लिप्यते स्मेति वाक्यम्। अल्पे किं, जलपूर्णा घटी, चन्दनानुलिप्ता अङ्गनेत्यादि। पाणिनिः ४।१।५१।

‡ पृथग्योगात् धादिति अल्पे इति च नानुवर्त्तते, केवलं क्तादित्यनुवर्त्तते। स्वाङ्गवाचकशब्दात् परो बहुव्रीहिसमासे स्थितो यः क्तान्तशब्दस्तस्मादीप् स्यात्। शङ्खो (ललाटास्थि) भिन्नो यया इति शङ्खभिन्नी। शङ्खो निधौ ललाटास्थ्नीत्यमरः। ह्वे इति

२६९। वाच्छन्नाज्जातेः।

(वा ।१।, अच्छन्नात् ५।, जातेः ५।)।

आच्छादनजातिवर्ज्जात् जातिवाचिनः परात् ह्रे स्थितात् क्तादीप् स्याद्वा।

इक्षुभक्षिती इक्षुभक्षिता। छन्नात्तु वस्त्रच्छन्ना। *

२७०। पत्न्यामपालकान्तात्।

(पत्न्याम् ७।, अपालकान्तात् ५।)।

पुंवाचकादपालकान्तादीप् स्यात् भार्य्यायाम्।

गोपी। पालकान्तात्तु गोपालिका। †

किं पादपतिता। उपसर्गव्यवधानेऽपि क्वचित् स्यात्, यथा ओष्ठनिचिती। अत्र (पाणिनिः ६।२।१७०) क्तमितजातप्रतिपन्नेभ्यो न स्यादिति, यथा दन्तजाता, मासजाता, सुखजाता, दुःखजाता, बहुकृता, अकृता, सुकृता, कुण्डमिता, कुण्डप्रतिपन्ना इत्यादि। विवाहे पाणिगृहीती यया सा पाणिगृहीती पत्नी, अन्यत्र पाणिगृहीता इति च वक्तव्यम्। पाणिनिः ४।१।५२, वार्त्तिकद्वयञ्च।

* छन्नं वस्त्रजाति, नास्ति छन्नं यत्र सोऽच्छन्नस्तस्मात्। इक्षुर्भक्षिती यया सा इक्षुभक्षिती इक्षुभक्षिता, एवं वृकदष्टी वृकदष्टा इत्यादि। वस्त्रं छन्नं परिहितं यया सा वस्त्रच्छन्ना, एवं वसनप्रावृता इत्यादौ न स्यात्। अत्रापि कृतादिभ्यो न स्यात्, तेन इक्षुकृता इत्यादि। पाणिनिः ४।१।५३, वार्त्तिकम्, ६।२।१७० च।

† पालकोऽन्ते यस्य स पालकान्तः, पश्चान्नञ्योगे तस्मात्। पालकान्तवर्ज्जनात् अकारान्तादेवायं विधिरिति। किञ्च पालकग्रहणेनैवेष्टसिद्धौ अन्तग्रहणं—पालकपर्य्यन्तस्य ज्येष्ठादिगणस्य (कातन्त्रपरिशिष्टोल्लिखितस्य) प्रापणार्थम्। तेन, ज्येष्ठ कनिष्ठ मध्यमोत्तम गोपालक पशुपालक वर्ज्जात् पुंवाचकादकारान्तादीप् स्यात् 'पत्नीवाच्ये इत्यर्थः। पुंवाचकादिति किं देवदत्ता। गोपस्य पत्नी—गोपी, एवं पितामही मातामहीत्यादि। गोपालकस्य पत्नी—गोपालिका (२४९,२५४), एवं ज्येष्ठा कनिष्ठा मध्यमा उत्तमा पशुपालिका। गोपीत्यादिषु जातित्वादीपि सिद्धे इह उदाहरणं निषिद्धानामपि प्रापणार्थं, तेन क्षत्रियस्य पत्नी क्षत्रियी, वैश्यस्य पत्नी वैश्यीत्यादि। पाणिनिः ४।१।४८, "गोपालिकादीनां प्रतिषेधः" इति वार्त्तिकञ्च।

२७१। ब्रह्मरुद्रभवसर्व्वमृडेन्द्रवरुणादानङ् च।

(ब्रह्म—वरुणात् ५।, आनङ् ।१।, च ।१।)।

एभ्यः पत्न्यामीप् स्यात्, तेषामानङ् च। ब्रह्माणी रुद्राणी। *

२७२। मातुलोपाध्यायक्षत्रियाचार्य्यसूर्य्यार्य्याद्वा। (मातुल—अर्य्यात् ५।, वा ।१)।

मातुलानी मातुली। अन्ये ईपमपि विकल्पयन्ति, तदा मातुलेत्यादि। तद्वाशब्दोऽव्यवस्थार्थः। आचार्य्यानी, अत्र न णत्वं। †

२७३। वृषाकप्यग्निमनुपूतक्रतुकुसितकुसिदादैङ् च। (वृषाकपि—कुसिदात् ५।, ऐङ् ।१।, च ।१।)।

---

* ब्रह्मा च रुद्रश्च भवश्च सर्व्वश्च मृड़श्च इन्द्रश्च वरुणश्च तस्मात्। प्रधानस्य ईप्-प्रत्ययस्यानुरोधात् पञ्चम्यन्तत्वम्। आनङो ङित्त्वादन्त्यस्य स्थाने। ब्रह्मणः पत्नी ब्रह्माणी, एवं रुद्राणी भवानीत्यादि। अत्र वार्त्तिकमते ब्रह्माणमानयतीति ब्रह्माणी, न तु ब्रह्म-शब्दादानङ्। एवं शक्राणी शिवानीत्यादि। पाणिनिः ४।१।४९।

† मातुलश्च उपाध्यायश्च क्षत्रियश्च आचार्य्यश्च सूर्य्यश्च अर्य्यश्च तस्मात्। ईप् आनङ् इत्युभयोरनुवृत्तिः। एभ्यः पत्न्यामीप् स्यात् तेषामानङ् च वा स्यादित्यर्थः। मातुलस्य पत्नी मातुलानी मातुली, अन्येषां मते ईपोऽपि विकल्पः, तेन मातुला इत्याद्यपि। स्वमते तु वाशब्दस्य व्यवस्थया ज्ञेयम्, अभिधानानयनितानि पदानि भविष्यन्तीति भावः, यथा—उपाध्यायात् पत्न्यामानङ् वा स्यात्, तेन उपाध्यायानी उपाध्यायी। स्वयं व्याख्यातृत्वे केवलम् ईप् वा स्यात्, तेन उपाध्यायी उपाध्याया। अर्य्यं क्षत्रियाभ्यां पत्नीत्वाच्य अर्य्यी क्षत्रियी, जातौ अर्य्याणी अर्य्या, क्षत्रियाणी क्षत्रिया। आचार्य्यात् पत्न्याम् आचार्य्यानी, स्वयं व्याख्यातृत्वे आचार्य्या। सूर्य्यनामकस्य कस्यचित् पत्नी सूरी (२६०), देवतायान्तु सूर्य्या। महाशूद्रात् पत्न्यां जातौ च ईबेव—महाशूद्री (वार्त्तिकम्)। आचार्य्यानीत्यत्र रेफात् णत्वसम्भावनायामपि वाशब्दव्यवस्थया न णत्वमिति। (४।१।४९) पाणिनिसूत्रस्य वार्त्तिकानि।

एभ्यः पत्न्यामीप् स्यात् तेषामैङ् च । वृषाकपायी अग्नायी मनायी । *

२७४ । नारी सखी यवानी यवनानी हिमान्यरण्यानी मनावी पतिवत्न्यन्तर्व्वत्नी पत्नी भाणी गोणी नागी स्थली कुण्डी काली कुशी कामुकी घटी कवरी नील्यशिश्वः । (नारी—अशिश्वः १॥) ।

एते निपात्यन्ते । †

---

* वृषाकपिश्च अग्निश्च मनुश्च पूतक्रतुश्च कुसितश्च कुसिदश्च (कुसिद इति पाणिनौ, कुशीद इति संक्षिप्तसारे. कुसिदशब्दो ह्रस्वमध्यो न तु दीर्घमध्य इति सिद्धान्तकौमुद्याम्) तस्मात् । अत्रापि प्रधानस्य ईपोऽनुरोधात् पञ्चम्यन्तत्वम् । उत्तरत्र वाग्रहणेन मध्यवर्त्तित्वादस्य नित्यत्वम् । ऐङ् इत्यस्य ङित्त्वादन्त्यस्य स्थाने । वृषाकपेः पत्नी वृषाकपायी, हरविष्णू वृषाकपी इत्यमरः । पूतक्रतुरिन्द्रः । पाणिनिः ४।१।३६—३८ । "मनोरौ वा" (४।१।३८) इति सूत्रेण मनावी मनुश्च । परसूत्रे मनावीति पदं प्रदत्तम् ।

† निपातो ह्यर्थविशेषे भवतीत्यत.—

नरजातिस्त्रियां नारी, वयस्यायां सखी मता ।
यवनानी लिपेर्भेदे, यवानी गर्हिते यवे ।
हिमानी हिमसंहत्याम्, अरण्यानी महावने ।
मनावी च मनोः पत्नी, पतिवत्नी सभर्त्तृका ।
अन्तर्व्वत्नी च गर्भिण्यां, पत्नी पाणिगृहीतिका ।
भाणी कस्मिन् व्यञ्जने च, गोणी धान्यादिपात्रके ।
नागी स्त्रियां स्यात् स्थूलायां, कान्तायाश्चाहिदन्तिनोः ।
स्थली अकृत्रिमा भूमिः, कुण्डी पात्रविशेषके ।
काली च कृष्णवर्णायां, कुशी लौहविकारके ।
कामुकी मदनायत्ता, घटी क्षुद्रवटी मता ।
कवरी केशविन्यासे, नीली प्राणिनि चौषधौ ।
अशिश्वी शिशुरिक्तायां स्त्रियामेव निपातनम् ।

अत्र नारीति नृशब्दात् नरशब्दाच्च ईपि निपात्यम् । सखीति इदन्तत्वात् (२६५) विकल्पे

२७५ । पद्धती शक्ती युवत्यनड्वाह्यौ श्वेन्येनी हरिणी भरिणी रोहिणी लोहिन्यसिक्नी पलिक्न्यो वा । (पद्धती—पलिक्न्यः १॥, वा ।१।) ।

पक्षे—पद्धतिः शक्तिः यूनी अनडुही श्वेता एता हरिता भरिता रोहिता लोहिता असिता पलिता । असिक्नी अवृद्धा, पलिक्नी वृद्धा । *

ङीपि प्राप्ते, नित्यार्थो निपातः । यवनजातिस्त्रीत्यर्थे यवनी । मनोः पत्नीत्यर्थे मनायीत्यपि पूर्व्वेण (२७३) । पतिवत्नीत्यत्र पतिर्विवाहकर्त्ता, तेन पतिमती सेना । अल्पत्वविवक्षायां प्रायशो लिङ्गसामान्यादीप्, तेन मठी पटी कुटी वंशी मृणालीत्यादि, अल्पो वृक्षः वृक्षक इत्यादौ न स्यात् । अत्र वक्तव्य—(पाणिनिः ४।१।३५) एकः पतिरस्या इत्यर्थे एकपत्नी, समानः पतिरस्याः सपत्नी, एवं श्वपत्नी वीरपत्नी भ्रातृपत्नी भद्रपत्नी पुत्रपत्नी पिण्डपत्नीति नित्यम्; "विभाषा सपूर्व्वस्य" (पाणिनिः ४।१।३४) इति सूत्रेण तु विकल्पः, यथा, दृढपतिः दृढपत्नी, गृहपतिः गृहपत्नी, वृषलपतिः वृषलपत्नीत्यादि तत्पुरुषे बहुव्रीहौ च । एवं ज्ञानपदी । "संज्ञायां वा" इति वार्त्तिकेन नीली नीला । पाणिनिः ४।१।३२,३३,३८,४१,४९,६२ । "घटकुम्भात् पात्रे" इति कातन्त्रपरिशिष्टे श्रीपतिदत्तः । सुपद्मे घटीशब्दो गौरादौ पठितः । "नृनरयोर्वृद्धिश्च" इति शार्ङ्गरवादिगणपाठसूत्रम् (पाणिनिः ४।१।७२) ।

* पद्धती इत्यादयो निपात्यन्ते वा । पादस्य हतिः पद्धती, शकधातोः क्तिः शक्ती अस्त्रभेदः, (अन्ये तु शक्तिरेव), क्त्यन्तत्वेन (२६५) अप्राप्तौ ङीपो विभाषा । युवन्शब्दात् तिप्रत्ययं कृत्वा वा निपात्यते—युवती युवतिरिति च । अनडुह्शब्दात् (२५७) ङीपि, आम् वा निपात्यते । श्वेत एत हरित भरित रोहित लोहित शब्देभ्यो वर्णवाचकेभ्यः वा ङीप् तकारस्य नकारश्च निपात्यते, णत्वे भरिणी रोहिणीति नित्यम् । असितशब्दादवृद्धायां पलितशब्दात् वृद्धायाम् ङीप् तकारस्य क्नश्च निपात्यते । पक्षे—पद्धतिशक्तिभ्यां (२६५) ङीप्निषेधः । यूनी अनडुही (२५७) ङीप् । पाणिनिः ४।१।३९,४१,४५,७७, वार्त्तिकञ्च । "युवतीति तु यौतेः शत्रन्तात् ङीपि बोध्यम्" इति सिद्धान्तकौमुदी ।

अत्र वक्तव्यम्—ईश्वरशब्दादीप् वा, ईश्वरी ईश्वरा । "व्यवस्थावाचित्वात् ईश्वरा ईश्वरीति औणादिको वरट्" इति सुपद्मे ।

केवल (केरल इति पद्मनाभक्रमदीश्वरौ, केरली ज्योतिर्विशेषस्य नामेति गोयीचन्द्रः)

२७६। न मन्संख्यास्वस्त्रजादेः।

(न ।१।, मन्-सङ्ख्या-स्वसृ-अजादेः ५।)।

एभ्य ईप् न स्यात्। सीमा, पञ्च, स्वसा माता, अजा बाला। (१०१) नेपीत्युक्तेः—यावती बह्वी। *

सुमङ्गल मामक (मामकी देवताविशेषः) भागधेय भेषज समान (समानी छन्दोविशेषः) पाप आर्य्यकृत दीर्घजिह्व अपर (अवर इति क्रमदीश्वरः) रैवक देवक केकय भिक्षुकादेरीप् नाम्नि। केवलीत्यादि। नाम्नीति किं केवला इत्यादि। पाणिनिः ४।१।३०।

छोड़ादि(अजादिरिति पाणिनिः)भिन्नादवार्द्धके वयसि वर्त्तमानात् शब्दादीप् स्यान्मुख्ये। कुमारी किशोरी कलभी तरुणीत्यादि। गौणे तु—बहुकुमारा पुरी। वार्द्धके वयसि—स्थविरा वृद्धा। छोडादेस्तु—छोडा बाला वत्सा कन्या इत्यादि आकृतिगणः। त्रयाणां फलानां समाहारः त्रिफला, अत्र स्त्रीत्वं आप् च निपात्यते। पाणिनिः ४।१ ४,२०। "अजादित्वात् त्रिफला" इति सिद्धान्तकौमुदी।

* स्वसा च अजश्च स्वस्रजौ, तौ आदी ययोस्तौ स्वस्रजादी, मन् च सङ्ख्या च स्वस्रजादी चेति, तस्मात्। मन्प्रत्ययान्तात् सङ्ख्यावाचकात् स्वसादेः अजादेश्च ईप् न स्यादित्यर्थः। सीमन्शब्दात् (२५१) डापोऽप्राप्तिपक्षे नान्तत्वात् प्राप्तस्य (२५७) ईपो निषेधः। एवम् अतिपाटिमा इत्यादि। अत्र मन ईपवर्जनं नान्तत्वात् प्राप्तस्य (२५७) ईप एव निषेधार्थं, तेन लब्धसीम्नौ लब्धसीमे लब्धसीमानौ इत्यादिषु (२५३)ईप् चाम्वस्यादित्यनेन ईप् स्यादेव। सङ्ख्यावाचकानां मध्ये एकद्वित्रिषड्बहूनामीपोऽसम्भवः, तिसृचतसृ' स्वस्रादिपाठादेव ईपनिषेधः, ततश्च पञ्चाद्यष्टादशपर्य्यन्तानां मुख्यत्वे (१३१) त्रिषु लिङ्गेषु समत्वविधानेनैव लिङ्गकार्य्यनिषेधे सिद्धे, अत्र सङ्ख्यावर्जनं नान्तसङ्ख्याभ्यो गौणत्वे ईपनिषेधार्थं, तेन प्रियपञ्चा द्रौपदी इत्यादौ, अपञ्चा इत्यादौ च (२५३) ईप् चाम्वस्यादित्यनेन ईप् न स्यात्, एवम् अतिपञ्चा स्त्रीत्यादौ (२५७) ह्रिन्नुष्णाक्ष्वित्यनेन ईप् न स्यात्। किञ्चात्र नञोऽल्पार्थत्वात् विंशतिषष्ठ्यादेः(२६५)पाङ्क्तोणादीत्यनेन ईप् वा स्यादेव। पञ्च इत्युदाहरणं लिपिकरप्रमादः। पञ्चेति उदाहरणात् नान्तसङ्ख्याया एव ईपनिषेध इति केचित्। सामान्यतो निषेधात् एकस्य पत्नी एका इत्यादौ ईप् न स्यादित्यपरे। स्वस्रादिश्च—स्वसृ मातृ यातृ दुहितृ ननान्दृ तिसृ चतसृ कति यति तति, इति दश। माता अत्र जननी, याता स्वामिभ्रातृपत्नी, तेन धान्यस्य मात्री, तीर्थस्य यात्री इत्यादौ ईप् स्यादेव। तिसृ चतसृ इत्येतयोः सङ्ख्यावाचकत्वान्निषेधे अत्र गौणत्वे ग्रहणं, तेन प्रियतिसा प्रियचतसा इत्यादि। कतियतितत्तीनां मुख्यत्वे (१३१) लिङ्गकार्य्यनिषेधात् गौणत्वे प्रियकतिरित्यादौ ईप् न स्यात्। अजादिश्च—अज बाल अश्व बड़व एड़क चटक कोकिल मूषिक परभृत परपुष्ट अन्यपुष्ट करट

२७७ । उतोऽयुङ्रज्ज्वादेर्नृप्राणिजातेरूङ् ।

(उत. ५।, अयुङ्रज्ज्वादेः ५।, नृप्राणिजातेः ५।, ऊङ् ।१।) ।

स्त्रियामुकारान्तात् नृजातेरप्राणिजातेश्च ऊङ् स्यात् न तु युङो रज्ज्वादेश्च । कुरूः कर्कन्धूः । प्राणिजातेस्तु, धेनुः । युङ्-रज्ज्वादेस्तु, अध्वर्युः, रज्जुः हनुः । *

२७८ । वामलक्षणशफसहसहितसंहितोपमानादूरोः ।

(वाम लक्षण-शफ-सह-सहित-संहित-उपमानात् ५।, ऊरोः ५।) ।

वामोरूः रम्भोरूः । †

वर्त्तक पिपीलिकादिः । अयमजादिः पाणिनीयाद्भिद्यते, तत्र परभृतादयो न दृश्यन्ते एवं स्वाङ्गजातिभ्यां पराः कृतमितजातप्रतिपन्नाश्च, कंशकृता हस्तमिता इत्यादि । (१०१) अपीत्युक्तेरिति ईपि कर्त्तव्ये डवतुबहुगणानां सङ्ख्यावद्भावनिषेधात यावतीत्यत्र उदित्त्वात् (२५७) ईप् । बह्वीत्यत्र (२६१) गुणवाचकादीप् । पाणिनिः ४।१।४,१०,११ । पाणिनीयं स्वस्रादिगणे कति यति ततीनां निवेशो न दृश्यते ।

* य उङ् यस्य स युङ्, रज्जुरादिर्यस्य स रज्ज्वादिः, युङ् च रज्ज्वादिश्च तत् युङ्रज्ज्वादि, नास्ति युङ्रज्ज्वादि यस्यां सा अयुङ्रज्ज्वादिस्तस्याः । ना च अप्राणी च तत् नृप्राणि, तच्च तत् जातिश्चेति नृप्राणिजातिस्तस्याः । मनुष्यजातेः अप्राणिजातेश्च उकारान्तात् शब्दात् स्त्रियामूङ् स्यात्, न तु यकारोङो रज्ज्वादेश्च । नृजातेः—कुरूरिति, कुरुशब्दः कुरुदेशस्थमनुष्यजातिवाची, एवं काद्रूः । अप्राणिजातेः—कर्कन्धूरिति कर्कन्धु-शब्दः बदरीजातिवाची, एवं अलाबूः । धेनुरिति नृभिन्नप्राणिजातित्वात् न ऊङ्, एवं कृकवाकुः आखुः । "ननु सुतनूमनुपालयानुयान्तीं वरतनु सम्प्रवदन्ति कुक्कुटा इत्यत्र दीर्घान्तसुतनुशब्देन समासः" इति क्रमदीश्वरः । अध्वर्युरिति चरणत्वेन जातित्वात् प्राप्तौ युङ्त्वान्निषेधः अध्वर्युर्ब्राह्मणी । रज्ज्वादिश्च—रज्जुः हनुः कङ्गुः प्रियङ्गुः स्नायुरित्यादि । पाणिनिः ४।१।६६, वार्त्तिकश्च ।

† वामश्च लक्षणश्च शफश्च सहश्च सहितश्च संहितश्च उपमानश्च तस्मात् । वामादिभ्यः षड्भ्य उपमानवाचकाच्च परो य ऊरुशब्दस्तस्मादूङ् स्यात् स्त्रियाम् । वामौ सुन्दरौ ऊरू यस्याः सा वामोरूः । एवं लक्षणशब्दात् (४४६) अर्श आदित्वात् अप्रत्ययेन लक्षणौ

२७९। तन्वादेर्वा। (तन्वादेः ५।, वा ।१।)।

तनूः तनुः, चञ्चूः चञ्चुः। *

इति स्त्रीत्वपादः।

२य पादः—कारकम् (क)।

२८०। ल्यर्थसम्बुद्ध्युक्तार्थे प्री।

(ल्यर्थ सम्बुद्धि उक्तार्थे ७।, प्री ।१।)।

लेरर्थे सम्बोधने त्यैरुक्तार्थे के सति च प्री स्यात्।

कृष्णः श्रीः ज्ञानं। हे विष्णो। †

सुलक्षणान्वितौ ऊरू यस्याः सा लक्षणोरूः; शफौ खुरौ इव संश्लिष्टौ ऊरू यस्याः सा शफोरूः; सहेते इति सहौ ऊरू यस्याः सा सहोरूः, विलक्षणोरुसहिता वा; हितेन सहितौ ऊरू यस्याः सा सहितोरूः, (३८८) संहितशब्दस्य विकल्पे सहितौ संहितौ संश्लिष्टौ ऊरू यस्याः सा सहितोरूः संहितोरूः; उपमानात्, रम्भे इव ऊरू यस्याः सा रम्भोरूः, एवं करभोरूः। एभ्यः किं, वृत्तोरुः पीनोरुरित्यादि। पाणिनिः ४।१।६९,७०; सहितसहाभ्याञ्चेति वक्तव्यमिति वार्त्तिकञ्च।

* तनुरादिर्यस्य तस्मात्। तन्वादेर्वा ऊप् स्यादित्यर्थः। तन्वादिर्यथा—तनुश्चञ्चु-वरभीरुः कद्रुः पङ्गुः प्रियङ्गवः। गण्डुः कुहुरिति प्रोक्तास्तन्वादौ सरयुस्तथा॥ तनुशब्दात् गौणेऽपि वरतनूः सुतनूरित्यादि। अत्र—बाहन्त-कद्रुकमण्डलुभ्यो नित्यमूप् स्यात् संज्ञायामिति वक्तव्यम्, भद्रबाहूरित्यादि (पाणिनिः ४।१।६७,७२)। श्वशुरस्य पत्नी श्वश्रूरिति निपात्यम् "श्वशुरस्योकाराकारलोपश्च" इति वार्त्तिकम्।

---

† स्यादिभिर्लिङ्गानां रूपाणि निरूप्य स्यादीनामर्थान् निरूपयति ल्यर्थेत्यादि।—लिर्लिङ्गं, लेरर्थो ल्यर्थः, सम्बुद्धिः सम्बोधनं, उक्तोऽर्थो यस्य तत् उक्तार्थं कारकं—ल्यर्थश्च सम्बुद्धिश्च उक्तार्थश्च एतेषां समाहारस्तस्मिन्।

अर्थोऽभिधेयः—तथाच 'शब्देनोच्चार्य्यमाणेन यद्वस्तु प्रतिपाद्यते, तस्य शब्दस्य तद्वस्तु

सर्व्वोऽर्च्यो जीवनः पाता दानीयः प्रभवो लयः । *

ज्ञायतामर्थसंज्ञयेति' प्राञ्चः । एवञ्च, "अस्मात् शब्दादयमर्थो बोद्धव्यः" इतीश्वरेच्छाशक्ति-रभिधा, तया प्रतिपाद्यः अभिधेय इति । शक्तिज्ञानञ्च व्याकरणादिभ्यो भवति, यथा —शक्तिग्रह व्याकरणोपमान-कोषाप्तवाक्यात् व्यवहारतश्च । सान्निध्यतः सिद्धपदस्य वृद्धाः वाक्यस्य शेषात् विवृतेर्वदन्ति ॥ ल्यर्थश्च पञ्चधा त्रिधा वा, तदुक्तं—स्वार्थो द्रव्यञ्च लिङ्गञ्च सङ्ख्या कर्म्मादिरेव च. अमी पञ्चैव लिङ्गार्थास्त्रयः केषाञ्चिदग्रिमा इति । स्वार्थो विशेषणं, द्रव्यं विशेष्यं, लिङ्गं पुंस्त्वादि, संख्या एकत्वादि, कर्म्मादिर्द्वितीयादिरिति ।

लिङ्गस्य अर्थे, सम्बोधने, प्रत्ययैः कथितार्थे कारके च सति, प्रथमा स्यादित्यर्थः । किञ्च यदा लिङ्गार्थातिरिक्तकर्म्मादयर्थो न विवक्ष्यते तदैव लिङ्गात् प्रथमा स्यात्, अन्यथा कृष्णं स्मरामीत्यादावपि प्रथमापत्तेः । लिङ्गार्थस्य एकत्वद्वित्वबहुत्वेषु क्रमादेकवचन-द्विवचनबहुवचनानि प्रयोज्यानि (१२) । यथा—घटः घटौ घटाः । एको द्वौ बहव-इत्यादिषु सङ्ख्या एव लिङ्गार्थः, विभक्तिप्रयोगस्तु—"नापदं शास्त्रे प्रयुञ्जीत" इति नियमात् पदत्वार्थं, कर्म्मत्वादिप्रतीत्यर्थञ्च । अतएव प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानामिति प्राञ्चः । पुंस्त्वादिकमपि लिङ्गार्थ इति ज्ञापयन्नाह कृष्णः श्रीः ज्ञानमिति । पाणिनिः २।३।४६,४७ ।

नहि क्रियारहितं वाक्यमस्तीति न्यायात् सर्व्वत्रैव क्रियाध्याहारेण उक्तार्थत्वात् प्रथमाप्राप्तौ कथं ल्यर्थग्रहणमिति ? उच्यते, यत्र असमापकक्रियापदं कर्त्रादिपदयुक्तं तत्रैव क्रियाध्याहारः, यत्र तु केवलो रूढ़शब्दः प्रयुज्यते तत्र तथाध्यावसरो नास्तीति । एवम् एकादिशब्द. यदा संख्येयवाची तदा घटादिना समानाधिकरणः स्यात्, तत्र लिङ्गार्थे प्रथमा—यथा, एको घटः, पञ्च ब्रीहिरित्यादि ।

आभिमुख्यविधानं सम्बुद्धिः । वृक्ष, लते, इत्यादावचेतनेषु तूपचारः । "सम्बोधनञ्च प्रवर्त्तनाविषयबोधनादिफलकाभिमुख्य" इति सिद्धान्तकौमुदीटीका । "सिद्धस्याभि-मुखीभावमात्रं सम्बोधनं विदुः । प्राप्ताभिमुख्यः पुरुषः क्रियासु विनियुज्यते ॥" इति हरिकारिका ।

* उक्तार्थे उदाहरति सर्व्व इत्यादि । सर्व्वः शिवः—अर्च्यः, जीवनः, पाता, दानीयः, प्रभवः, लयश्च । अर्च्यतेऽयमिति कर्म्मणि व्यण्, अत्र सर्व्व इति कर्म्म उक्तम् । जीव्यतेऽनेनेति जीवनः करणे अनट्, अत्र सर्व्व इति करणमुक्तम् । पातीति पाता कर्त्तरि तृन्, अत्र सर्व्व इति कर्त्ता उक्तः । दीयतेऽस्मै इति दानीयः, (९६५) कृतो बहुलं-कभावे इत्यनेन सम्प्रदाने अनीयः, अत्र सर्व्व इति सम्प्रदानमुक्तम् । प्रभवत्यस्मादिति प्रभवः अपादाने अल्, अत्र सर्व्व इत्यपादानमुक्तम् । लीयतेऽस्मिन्निति लयः अधिकरणे अल्, अत्र सर्व्व इत्यधिकरणमुक्तम् । त्यैरुक्तार्थे के इति बहुवचननिर्द्देशात् अन्यैरुक्तार्थे-ऽपि प्रथमा—तथाच सिद्धान्तकौमुद्याम् "अभिधानन्तु प्रायेण तिङ्कृत्तद्धितसमासैः,"

२८१। कर्म्मक्रियाविशेषणाभिनिविशाधिशीङ्स्थासन्वध्युपावस-ङं ढं द्वी। (कर्म्म—ङं १।, ढं १।, द्वी।१।)।

कार्य्यं क्रियाविशेषणम् अभि-नि-विशादेर्ङश्च ढसंज्ञं स्यात्, तत्र च द्वी। *

"अभिहिते प्रथमा" "तिङ्समानाधिकरणे प्रथमा" इति वार्त्तिकद्वये च। तिङा यथा—रामो वनं ययौ, अत्र कर्त्ता उक्तः, रामेण रावणो जघ्ने, अत्र कर्म्म उक्तम्। कृता तु—सर्व्वोऽर्च्य इत्यादि स्वयमुदाहृतम्। तद्धितेन यथा—वाचा कृतं वाचिकम्, अत्र कर्म्म उक्तं, तर्कं वेत्त्यधीते वा तार्किकः, अत्र कर्त्ता उक्तः। समासेः यथा—आरूढो वानरो यं स आरूढवानरो वृक्षः, छिन्नश्छागो येन स छिन्नच्छागः खड्गः, कृता पूजा येन स कृतपूजो भक्तः, दत्ता भूमिर्यस्मै स दत्तभूमिर्विप्रः, निर्गताः पक्षिणो यस्मात् स निर्गतपक्षी वृक्षः, सप्त तारा यस्मिन् तत् सप्ततारमाकाशम्—एषु क्रमेण कर्म्म करण कर्त्तृ सम्प्रदानापादानाधिकरणानि उक्तानि। अव्ययेनाप्युक्तार्थे प्रथमा—यथा विषवृक्षोऽपि संवर्द्ध्य स्वयं छेत्तुमसाम्प्रतम्। 'कृष्ण इति' 'कृष्णेति मङ्गलं नाम' इत्यादाविति शब्दस्य वर्णमात्राभिधायकत्वेन न विभक्त्युत्पत्तिः इतिशब्दस्यैव विभक्तिकार्य्यकारित्वम्। पीतमम्बरं यस्यासौ पीताम्बरो हरिरित्यादौ सम्बन्धनाप्युक्तार्थत्वे प्रथमेति वक्तव्यम्।

* क्रियाया विशेषणं क्रियाविशेषणम्। अभिनिः अभिनिः, अभिनेर्विशः अभिनिविश, शीङ् च स्थाश्च आसश्च शीङ्स्थास, अधेः शीङ्स्थास अधिशीङ्स्थास. अनुश्च अधिश्च उपश्च आङ् च ते अन्वध्युपाः, तेभ्यो वसः अन्वध्युपावसः, ततः अभिनिविशश्च अधिशीङ्स्थास च अन्वध्युपावसश्च तेषां ङं पश्चात्—कर्म्म च क्रियाविशेषणञ्च अभिनिविशाधिशीङ्स्थासन्वध्युपावसङश्च एतेषां समाहारः। क्रियायाः कर्म्मणः, क्रियाया विशेषणस्य, अभिनिविशादेरधिकरणस्य च, कर्म्मसंज्ञा स्यात्, तेषु च द्वितीया स्यादित्यर्थः। क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते इति न्यायात् गृहेऽधिष्ठानं, ग्रामेऽधिवसतीत्यादिकमपि स्यात्। क्रियाविशेषणे तु केवलं द्वितीयाया एकवचनं स्यात् क्रियाया लिङ्गसंख्याविनिर्म्मुक्तत्वात्।

क्रियते यत् तत् कर्म्म, करोतेर्निखिलक्रियावाचकत्वात् कर्त्तुर्व्यापारैर्यत् साध्यते तत् कर्म्म इति यावत्। "कर्त्तुरीप्सिततमं कर्म्म" इति पाणिनिः (१।४।४९)। क्रियाव्याप्यं कर्म्मेति पद्मनाभः। कर्त्तृसमुद्दिष्टं कर्म्मेति क्रमदीश्वरः। यत् क्रियते तत् कर्म्मेति सर्व्ववर्म्माचार्य्यः। तच्च कर्म्म त्रिविधं—निर्व्वर्त्त्यं विकार्य्यं प्राप्यञ्चेति। निर्व्वर्त्त्यते उत्पाद्यते यत् तत् निर्व्वर्त्त्यं, यथा घटं करोति, पुत्रं प्रसूयते इत्यादि। विक्रियते विद्यमानं वस्तु

रामं नमति सानन्दं धर्म्मानभिनिविश्य सन् । *

श्रीशोऽधिशेतेऽहिमधिष्ठितोऽब्धि-

मध्यास्य घोषं मथुरामनूष्य ।

अवस्थान्तरं नीयते यत् तत् विकार्य्यं, तदपि द्विविधं प्रकृतेरुच्छेदकं प्रकृतेर्गुणान्तराधायकञ्च, यथा काष्ठं दहति, सुवर्णं कुण्डलं करोति इत्यादि । निर्व्वर्त्यविकार्य्याभ्यामन्यत् प्राप्यं, यथा ग्रामं गच्छतीत्यादि । तथञ्चोक्तं हरिणा --यदसज्जायते सद्वा जन्मना यत् प्रकाशते, तन्निर्व्वर्त्त्यं, विकार्य्यञ्च कर्म्म द्वेधा व्यवस्थितम । प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठादिभस्मवत्, किञ्चित् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् । क्रियाकृतविशेषाणां सिद्धिर्यत्र न विद्यते, दर्शनादनुमानाद्वा तत् प्राप्यमिह कथ्यते । परे तु अनीप्सितमपि प्रतिकूलमनुकूलञ्च कर्म्मान्तरं वदन्ति, यथा ओदनं बुभुक्षुर्विषं भक्षयतीत्यादि । अस्मते प्राप्यान्तर्गतमेव तत् ।

क्रिया धात्वर्थस्तस्य विशेषणं क्रियाविशेषणम् । तच्च समानाधिकरणमेव, असमानाधिकरणविशेषणे (२८८) तृतीयाविधानात् । क्रियाविशेषणस्य कारकत्वं कैश्चिदेवमङ्गीक्रियते यथा "मृदु पचतीति क्रियाविशेषणत्वात् द्वितीयान्तम् । धातूपात्तभावनां प्रति हि फलांशः कर्म्मीभूतः । तथाच फलसामानाधिकरण्ये द्वितीया," "क्रियायाः कृत्रिमकर्म्मत्वविवक्षायां तद्विशेषणत्वात् द्वितीया" इति मनोरमा । "द्वितीयेति क्रियाविशेषणादिति भावः" इति शब्दरत्नम् । "सामान्ये नपुंसकमिति—अनेनैव क्रियाविशेषणानां नपुंसकत्वे सिद्धे 'क्रियाविशेषणानां क्लीवत्वं द्वितीयान्तत्वञ्च' इति न । पूर्व्वं धातूपात्तभावनां प्रति फलांशस्य कर्म्मतया तत्समानाधिकरणे क्रियाविशेषणे द्वितीयान्तत्वस्यापि सिद्धेः, तस्य क्रियाजनकत्वमपि स्वज्ञानद्वारा बोध्यम्" इति शब्देन्दुशेखरश्च । क्रमदीश्वरेण च "अपृथग्रूपक्रियाया विशेषणस्य कर्म्मत्वं क्लीवत्वञ्च" इति सूत्रं कृतम् । अतः पृथग्रूपक्रियाविशेषणस्य कर्म्मत्वादिकं न स्यात्, तेन साधुः पाकः साधू पाकौ इत्यादि, कृदभिहितो भावो द्रव्यवत् प्रकाशते इति न्यायेन द्रव्यत्वातिदेशात् पाकस्य पृथग्रूपत्वम् । क्रियाविशेषणस्य कर्म्मत्वेऽपि अकर्म्मकधातूनामकर्म्मकत्वमेव, कर्म्मनिबन्धनकार्य्यं किमपि न स्यादिति यावत् । कर्म्मसंज्ञाफलन्तु स्तोकं बिभेतीति स्तोकभीशब्दस्य (१३६) क्व्याद्यनेकाच इत्यनेन कारकादित्वात् यकारप्राप्तिरित्यादि । पाणिनिः २।३।२, १।४।४६—४८, वार्त्तिकञ्च ।

* रामं नमतीत्यादि । सन् साधुः धर्म्मान् अभिनिविश्य सानन्दं यथा स्यात्तथा रामं नमतीत्यन्वयः । रामम् इति नमनक्रियाव्याप्यं कर्म्म । सानन्दमिति क्रियाविशेषणं, आनन्देन सह वर्त्तते यत् तत्, आनन्दसहिताभिन्नो नमस्कार इत्यर्थः । धर्म्मानिति अभिनिविशधातोरधिकरणे कर्म्मत्वम् ।

यो द्वारकामध्युषितो विकुण्ठ-
मुपावसच्चावसतात् स हृन्नः ॥ *

२८२ । देशाध्वकालभावं वाढैः ।

(देश-अध्वन्-काल-भाव १।, वा ।१।, अढैः ३।।।) ।

अढैर्धुभिर्योगे एते ढसंज्ञा वा स्युः ।

नदीर्वनेषु चोषित्वा क्रोशान्नल्वेष्वहर्निशि ।
चंक्रमित्वा प्रियानीतिं रामो रक्षोवधे स्थितः ॥ †

---

* शौरिः इति । यः शौरिः अब्धिमधिष्ठितः सन् अहिमधिशेते, घोषमध्यास्त मथुरा-मन्वष्ट द्वारकामध्युषितः सन् विकुण्ठमुपावसच्च स नोऽस्माकं हृत् हृदयम् आवसतादित्य-न्वयः । अहिमिति अधिशीङः, अब्धिमिति अधितिष्ठतेः, घोषमिति अध्यास्तेः, मथुरा-मिति अनुवसतेः, द्वारकामिति अधिवसतेः, विकुण्ठमिति उपवसतेः, हृत् इति आवसतेः, अधिकरणे कर्म्मत्वम् । हृत् इति हृद्शब्दस्य रूपम् (११६) । आवसतादिति तुपः स्थाने (९५९) तातङ् । कर्म्मणि वाच्येऽपि एतेषां कर्म्मत्वं, यथा नकुलाधिष्ठितो हयः, बलैरध्यु-षिताम्तस्य मलयाद्रेरुपत्यकाः इत्यादि । गृहे अधिष्ठान कल्याणे अभिनिवेशः इत्यादि-प्रयोगस्तु आतिदेशिकमनित्यमिति न्यायात् समाधानीयः । अत्र अधिशीङ्स्थासामकर्म्म-काणामेव ग्रहणं, तेन वने राजानमधितिष्ठति अपेक्षते इत्यर्थः इत्यादि ।

† देशश्च अध्वा च कालश्च भावश्च तेषां समाहारस्तत् । नास्ति ढं कर्म्म येषां ते अढाः तैः । देशः पृथगेकैकदेशः नदीवनपर्व्वतादिः । अध्वा अध्वपरिमाणं क्रोशनल्वादिः । यथा—किष्कुर्हस्ते वितस्तौ च नल्वः किष्कुचतुःशतम् । चतुर्हस्तो धनुस्तस्य सहस्रं क्रोश-मुच्यते । क्रोशद्वयन्तु गव्यूतिस्तद्द्वयं योजनं विदुरिति । कालः क्षणदण्डमुहूर्त्तप्रहर-दिनरात्रिपक्षमासवत्सरादिः । भावो धात्वर्थः । अकर्म्मकधातुयोगे देशादीनां कर्म्मसंज्ञा वा स्यादित्यर्थः । अकर्म्मकाश्च—सत्तालज्जास्थितिजागरणं वृद्धिक्षयभयजीवितमरणं । शयनक्रीडारुचिदीप्त्यर्था नैते कर्म्मणि धातव उक्ता इति ॥ विस्तरस्तु (९३२) सूत्रे द्रष्टव्यः । नदीरित्यादि—रामः नदीः वनेषु च उषित्वा, अहः दिवसं निशि रात्रौ क्रोशान् क्रोशपरिमितान् पथः नल्वेषु नल्वपरिमितेषु पथिषु चंक्रमित्वा इतस्ततो भ्रमित्वा, प्रियानीतिं प्रियायाः सीताया आनयनं रक्षोवधे च स्थित इत्यन्वयः । अत्र उषित्वेति वसधातुयोगे नदीरिति कर्म्मत्वं, पक्षे वनेषु इति (३०९) सप्तमी । चंक्रमित्वा वर्क्रमित्वा इति यङि चंक्रम्यधातोः क्त्वाच्, वक्रगमनार्थत्वादकर्म्मकत्वे तद्योगात् क्रोशानिति

२८३। सदाध्वादि व्याप्तौ सर्व्वैः सिद्धे तु घं।

(सदा ।१।, अध्वादि ।१।, व्याप्तौ ७।, सर्व्वैः ३।।।, सिद्धे ७।, तु ।१।, घं १।)।

सर्व्वैर्धुभिर्योगे अत्यन्तसंयोगे अध्वादयो नित्यं ढसंज्ञाः स्युः, अर्थसिद्धौ तु घसंज्ञाः।

भक्त्यैः क्रुष्टोऽन्वितः क्रोशं मासौ गुरुगृहे स्थितः।
गुरूपदेशं निभृतो माभ्यामध्यैष्ट वाङ्मयम्॥ *

२८४। घोऽज्ञौ ञेः शब्दाशनगतिज्ञार्थोढ़-ग्रहृदृशश्रो-रखादनीक्रन्दायशब्दायह्वादासूतघवहा-

---

अहरिति च कर्म्मत्वं, पचे मल्वेष्विति निशीति च सप्तमी। स्थित इति स्थाधातुयोगे प्रियामौतिमिति कर्म्मत्वं, पचे रक्षोवधे इति सप्तमी। पाणिनिः २।३।५, वार्त्तिकञ्च ; "देशकालाध्वगन्तव्या. कर्म्मसंज्ञा ह्यकर्म्मणाम्" इति कारिका च। अत्र वक्तव्यम्— "अकर्म्मकधातुप्रयोगेऽक्रियान्तरान्तर्भावे देशभावाभ्याञ्च" इति क्रमदीश्वरसूत्रम्। तेन क्रियान्तरान्तर्भावे—मास आस्ते इत्यादि, अभिव्याप्येत्यर्थः।

* सदा नित्यम्। व्याप्तिः साकल्येनाभिसम्बन्धः अविच्छेद इति यावत्। अतएव "कालाध्वभ्यामविच्छेदे" इति क्रमदीश्वरसूत्रम्, "कालाध्वभ्यामतिसंयोगे" इति पद्मनाभसूत्रञ्च। सर्व्वैः सकर्म्मकैरकर्म्मकैश्च धातुभिर्योगे क्रियाविच्छेदाभावे गम्यमाने अध्वकालभावाः नित्यं कर्म्मसंज्ञाः स्युः, अर्थसिद्धौ प्रयोजनसिद्धौ (अपवर्गे इति पाणिनिः ; अपवर्गः फलप्राप्तिरिति सिद्धान्तकौमुदी, फलप्राप्तौ क्रियापरिसमाप्तिरपवर्ग इति पद्मनाभः) सत्यां तु करणसंज्ञाः स्युरित्यर्थः। भक्त्यैरित्यादि—छात्रः क्रोशं व्याप्य भक्त्यैरन्वितः अनुगतः सन्, मासौ व्याप्य गुरुगृहे स्थितः सन्, गुरूपदेशं व्याप्य निभृतः अत्यन्तासक्तः सन्, माभ्यां व्याप्य वाङ्मयं सकलं शास्त्रम् अध्यैष्ट अधीतवान् इत्यन्वयः। अत्र अन्वित इति सकर्म्मकधातुयोगे क्रोशे अनुगमनक्रियाविच्छेदाभावात् कर्म्मत्वम्। एवं स्थित इत्यस्य योगे मासौ इति, निभृत इत्यस्य योगे गुरूपदेशमिति च कर्म्मत्वम्। अध्यैष्ट इत्यस्य योगे माभ्यामिति अध्ययनजन्यज्ञानरूपप्रयोजनस्य सिद्धत्वेन करणत्वम्। अर्थसिद्धेरभावे अह्ना मासौ ग्रन्थोऽधीत इत्यत्र किमपि न ज्ञातमित्यर्थः। पाणिनिः २।३।५,६ ; वार्त्तिकञ्च।

हिंसाभक्षो ह्रक्रमाभिवादिदृशस्तु वा। (घः १।, ञ्यौ ७।, ञेः ६।, शब्द—ज्ञौः ६।, अखाद—भक्षः ६।, ह्र-क्र माभिवादि दृशः ६।, तु ।१।, वा ।१।)।

ञ्यान्तानां शब्दार्थादीनां यो घः स ञ्यन्तानां ढं स्यात्, न तु खादादेः, ह्रक्रादेस्तु वा। *

---

* अशनं भोजनं पानञ्च, ज्ञा ज्ञानम्। शब्दश्च अशनञ्च गतिश्च ज्ञा च शब्दाशनगतिज्ञाः ते अर्था येषां ते शब्दाशनगतिज्ञार्थाः। नास्ति ढं कर्म्म येषां ते अढाः। शब्दाशनगतिज्ञार्थाश्च अढाश्च ध्वश्च दृशश्च श्रुश्चेति तेषां समाहारस्तस्य। सूतः सारथिः गवादिनियन्ता च घः कर्त्ता यस्य स सूतघः, न सूतघोऽसूतघः, स चासौ वहश्चेति असूतघवहः। न हिंसा अहिंसा, अहिंसायां भक्षः अहिंसाभक्षः। खादश्च नीश्च क्रन्दश्च अयश्च शब्दायश्च ह्वाश्च अदश्च असूतघवहश्च अहिंसाभक्षश्च तेषां समाहारः, पश्चान्नञ्योगे अखादनीक्रन्दायशब्दायह्वादासूतघवहाहिंसाभक्षस्तस्य। अभेर्वादिः अभिवादिः, अभिवादिश्च दृशश्च 'अभिवादिदृशौ, ञे आत्मनेपदे अभिवादिदृशौ ञाभिवादिदृशौ। ह्रश्च क्रश्च ञाभिवादिदृशौ चेति समाहारे तस्य।

शब्दार्थाः उच्चारणार्थाः, शब्दकर्म्मका धातव इति यावत्। अशनार्थाः भक्षणार्थाः। गत्यर्थाः गमनार्थाः प्रवेशारोहणतरणप्रापणार्था अपि। ज्ञार्थाः ज्ञानार्थाः। अढाः सत्ताद्यर्थाः। अञ्यन्तकाले शब्दार्थादीनां धातूनां यः कर्त्ता, स तेषां ञ्यन्तकाले कर्म्म स्यात्, खादादेर्न स्यात, ह्रक्रादेस्तु वा स्यादित्यर्थः। अत्र दृशश्रुधात्वोर्ज्ञानार्थत्वेऽपि पुनर्ग्रहणं क्वचिदन्यार्थकत्वेऽपि स्यादिति ज्ञापनार्थम्। खाद अद भक्ष—एषामशनार्थत्वात्, नी अय वह—एषां गत्यर्थत्वात्, क्रन्द ह्वा (ह्वे)—एतयोः शब्दार्थत्वात् प्राप्तौ निषेधः। शब्दाय इति नामधातुः, शब्दं करोतीत्यर्थे (८५१) सिद्धः, अस्य शब्दार्थत्वादकर्म्मकत्वाद्वा प्राप्तौ निषेधः। ञ्यन्तक्रियाव्याप्यत्वेनैव अञ्यन्तकर्त्तुः कर्म्मत्वे सिद्धेऽपि एतत् सूत्रं नियमार्थम्, अन्येषां न स्यादित्यर्थः। अत्र च शब्दार्थादीनाम् एकवारञ्यन्तानामेव ग्रहणं, तेन पिता पुत्रेण शिष्यं वेदं पाठयति इत्यादौ पुत्रादीनां न कर्म्मत्वम्। अत्र अकर्म्मकधातोः (२८२) देशादेः कर्म्मत्वेऽपि, (२८१) एवमधिशीङादेरधिकरणस्य कर्म्मत्वेऽपि, अञ्यन्तकालीनकर्त्तुरपि कर्म्मत्वं स्यादिति वक्तव्यम्, अतएव (९३२) वनन्तेव गोपी रजनिमजागरीति स्वयं वक्ष्यति। निसर्गपारीणमसौ भवन्तमध्यापयच्छास्त्रमनेकमिन्द्रः इति भट्टिः। एवं अकर्म्मकधातूनामकर्म्मकत्वे सति अञ्यन्तकर्त्तुः कर्म्मत्वं स्यात, यथा मथुरामासते पीड़ितो भवति, शूरः शत्रुमाघातयति। अपिचान्यत्रापि कर्म्मत्वं भवति, यथा फलं व्याजितैः नृपैरिति रघुः। पाणिनिः १।४।५२, ५३, वार्त्तिकानि च।

गेयमध्यापयद् गोपान् याज्ञिकान्नमभोजयत्।
स्वधामागमयच्छत्रून् भक्तांस्तत्त्वमबोधयत् ॥
धर्म्ममस्थापयद् विष्णुर्वेदानग्राहयद् विधिम्।
दैत्यानदर्शयच्छक्तिं वेणुमश्रावयच्च गाः ॥ *

खादादेस्तु—रक्षांस्यखादयदनाययदूर्द्ध्वलोक-
माक्रन्दयत् कपिभिरायददाशु रामः।
शब्दाययन् रिपुमजूहवदादयच्च
शैलानवाहयदभक्षयदिष्टभक्ष्यम् ॥ †

---

* क्रमेण उदाहरणं दर्शयति—विष्णुः गोपान् गेयं (गानं) अध्यापयत्, अधीङ्‌ अध्ययने इत्यस्मात् णिः, अण्यन्तकालीनकर्त्तॄणां गोपानां कर्म्मत्वम्, एवं सर्व्वत्र। विष्णुः गोपान् याज्ञिकान्नम् अभोजयत्, भुज धौ ञाणि भक्षे णिः। विष्णुः शत्रून् स्वधाम वैकुण्ठम् अगमयत्, हत्वेति शेषः, ओ गम् लृ गत्यां णिः। विष्णुः भक्तान् तत्त्वं याथार्थ्यं अबोधयत्, बुध्यौ ङ अवगमने णिः। विष्णुः धर्म्ममस्थापयत्, ष्ठि ष्ठा स्थाने णिः। विष्णुः विधिं वेदान् अग्राहयत्, ग्रह ञ गादाने णिः। विष्णुः दैत्यान् शक्तिम् अदर्शयत्, दृशिनौ प्रेक्षे णिः। विष्णुः गाः वेणुमश्रावयत्, श्रु श्रवणे णिः। (एतेषां अण्यन्तावस्था क्रमेण प्रदर्श्यते—गोपा गेयम् अध्यैयत, गोपा याज्ञिकान्नमभुञ्जत, शत्रवः स्वधाम अगच्छन्, भक्तास्तत्त्वमबुध्यन्त, धर्म्मोऽतिष्ठत्, विधिर्वेदानगृह्णात्, दैत्याः शक्तिमपश्यन्, गावो वेणुमशृण्वन्।)

† खादादेरुदाहरणं—रामः कपिभिः रक्षांसि अखादयत्, खाद्द भक्षणे णिः, अत्र अण्यन्तकालीनकर्त्तॄणां कपीनां अण्यन्तावस्थायां कर्म्मत्वाभावे अनुक्तकर्त्तृत्वात् (२८८) तृतीया, एवं सर्व्वत्र। रामः कपिभिः रक्षांसि ऊर्द्ध्वलोकम् अनाययत्, णी ञ प्रापणे णिः। रामः कपिभिः रक्षांसि आक्रन्दयत् आह्वयदित्यर्थः, आङ्‌पूर्व्वक-क्रदि तु रोदने आह्वाने णिः। रामः कपिभिः रक्षांसि आशु शीघ्रम् आययत् प्रापयदित्यर्थः। अय ङ गतौ णिः। रामः कपिभिः रक्षांसि शब्दाययन् सन् रिपुम् अजूहवत्, शब्दाययन्निति शब्दायधातोः शतृप्रत्ययः। अजूहवदिति ह्वे ञ स्पर्द्धायां णिः। रामः कपिभिः रिपुम् आदयच्च, अद लौ भक्षे णिः। रामः कपिभिः शैलान् अवाहयत्, वहौ ञ प्रापणे णिः। रामः कपिभिः इष्टभक्ष्यं (फलमूलादि) अभक्षयत्, भक्ष भक्षणे णिः। (एतेषामण्यन्तावस्था क्रमेण

सारथिव-हिंसार्थयोस्तु—

वाहानवाहयत् पार्थमरींश्चाभक्षयद्धरिः । *

ह्रादेस्तु—शैलानहारयत् कीशान् ऋक्षैर्वृक्षानजीहरत् ।

कपीनकारयत् सेतुं वानरैरपि राघवः ॥

स्माभिवादयते वृद्धान् जानकीं लक्ष्मणेन च ।

सीतां रामेण चात्मानमदर्शयत लक्ष्मणः ॥ †

२८५ । याच्ञार्थ दुह चि प्रच्छ रुध ब्रू शास जि नी वहः ।

यथा—कपयः रक्षांसि अखादन्, कपयः रक्षांसि ऊर्द्ध्वलोकमनयन्, कपयः रक्षांसि आक्रन्दन्, कपयः रक्षांसि आयन्त, कपयः शब्दायमानाः रिपुम् आह्वन्, कपयः शैलान् अवहन्, कपयः दृष्टभक्षम् अभक्षन् इति ।)

* सूतवद्ध-हिंसार्थभक्षयोरुदाहरणं—हरिः वाहान् घोटकान् पार्थमर्ज्जुनम् अवाहयत् सारथिर्भूत्वा इत्यर्थः, हरिः वाहान् अरीन् अभक्षयत् अहिंसयच्च अत्र अवाहयदित्यत्र सारथिकर्त्तृकत्वात्, अभक्षयदित्यत्र च हिंसार्थत्वात् अजान्तकालीनकर्तॄणां वाहानां कर्म्मत्वम् । (वाहाः पार्थमवहन्, वाहा अरीनभक्षन् इत्यजान्तावस्था ।)

† ह्रादेरुदाहरणम्—राघवः कीशान् वानरान् शैलानहारयत्, पक्षे—ऋक्षैर्भल्लूकैः वृक्षानजीहरत् । राघवः कपीन् सेतुमकारयत्, पक्षे—वानरैरपि सेतुमकारयदिति शेषः । राघवो जानकीं वृद्धानभिवादयते स्म, पक्षे—लक्ष्मणेन च, वृद्धानभिवादयते स्मेति शेषः, अभिवादयते इति अभिपूर्व्वो वदधातुः अजन्तो नमस्कारे वर्त्तते, पुनः ञौ कृते, (६४१) पूर्व्वञेर्लोपे, (६१९) फलवत्कर्त्तर्य्यात्मनेपदम् । एकवार-ञौ कृते अभिवादिधातोर्नमस्कारार्थकत्वात् शिष्यो गुरुमभिवादयतीत्यादौ (२८१) नित्यमेव कर्म्मत्वम् । लक्ष्मणः सीताम् आत्मानम् अदर्शयत, पक्षे—रामेण च, आत्मानमदर्शयतेति शेषः । अदर्शयतेति, अजान्तकालीन-कर्म्मणो लक्ष्मणस्य अजान्तकालीनकर्त्तृत्वात् (८९९) ञेढें इत्यात्मनेपदम् । पिता पुत्रं चन्द्रं दर्शयतीत्यादौ अजान्तकालीनकर्त्तुः पुत्रस्य नित्यमेव कर्म्मत्वम् । (कीशाः शैलानहरन्, ऋक्षाः वृक्षान् अहार्षुः, कपयः सेतुमकुर्व्वन्, वानरा अपि, जानकी वृद्धानभिवादयति स्म, लक्ष्मणश्च, सीता लक्ष्मणमपश्यत्, रामश्च लक्ष्मणमपश्यदित्यजान्तावस्था ।)

दुह् दण्डि ग्रह् क्षप् मन्थ
मुष् पचाद्या ध्रवो द्विढा: ॥ *

(याच्ञार्थ—वह: १॥, ह—पचाद्या: १॥, ध्रव: १॥, द्विढा: १॥) ।

तमर्थयेऽहं मोक्षं, यो गोपैर्दुग्धमदुग्ध गा: ।
फलान्यवाचिनोद् वृक्षान्, वार्त्ता: पप्रच्छ वल्लवान् ॥
रुरोध गोकुलं गोपीरब्रवीच्च मनोहरम् ।
गोपालानन्वशात् केलींस्तत्राजय्यं जिगाय तान् ॥
वृन्दावनमनैषीद् गा-स्तंच्छिशूनवहद् व्रजम् ।
जहारारण्यमाभीरी-र्दैत्यान् प्राणानदण्डयत् ॥
जग्राह यज्वनो भोज्य-मकर्षत् पूतनां बलम् ।
ममन्थामृतमम्भोधिं मुमोष दितिजांश्च तत् ।
योऽसौ पचति लोकानां पुण्यपापं सुखासुखम् ॥ †

---

* याच्ञा अर्थो येषां ते याच्ञार्था: याच अर्थ नाथ भृगि ह प्रभृतय: । पश्चात् हन्द्वे वहपर्य्यन्तम् एकं पदं, श्लोकार्द्धविरामार्थे पृथक्पदकरणम् । पच आद्यो येषां ते पचाद्या:, पश्चात् दुह दण्डिश्च इत्यादि हन्द्व: । द्वि ढे येषां ते द्विढा: । एते धातव: स्वभावात् द्विकर्म्मका भवन्तीत्यर्थ: । कर्त्तु: क्रियाव्याप्यत्वात् मुख्यस्य कर्म्मत्वं सिद्धम्, अनेन तु गौणस्य कर्म्मत्वं विधीयते । साक्षात् क्रियान्वयित्वं मुख्यत्वं, परम्परया क्रियान्वयित्वं गौणत्वमिति । पाणिनीये वार्त्तिके धृतस्य दुहादिगणस्य मध्ये ग्रहधातो: पाठाभावात् "अगिग्रहत्तं जनको धनुस्तत्" इत्यादिकमसाधु इति अनुन्यासवाभटौ (क्रमदीश्वर:) । पाणिनि: १।४।५१ ।

† तमर्थये इत्यादि । अहं तं श्रीकृष्णं मोक्षम् अर्थये याचे, य: गोपै: सह गा: दुग्धम् अदुग्ध । यो वृक्षान् फलानि अवाचिनोत् । यो वल्लवान् वार्त्ता: पप्रच्छ, गोपान् वृत्तान्तं जिज्ञासितवानित्यर्थ: । यो गोकुलं गोपी: रुरोध, गोपीरन्त: स्थापयन् गोकुलमावृणोदित्यर्थ: । यो गोपी: मनोहरं (वच इति शेष:) अब्रवीच्च । यो गोपालान् केलीन् अन्वशात् शिक्षितवान् । यश्च केलिविषये तान् गोपालान् अजय्यं जेतुमशक्यं जिगाय । यो वृन्दावनं गा अनैषीत् प्रापयामास । यस्तच्छिशून्

२८६। धिक्समयानिकषाहान्तरान्तरेणे-नातियेनतेनाभ्युभयपरिसर्व्वतोविनतेऽभिपरिप्रत्य-नूपद्युपर्य्यधोऽधिभिः। (धिक्—अधिभिः ३॥)।

एभिर्योगे द्वी स्यात्।

वीप्सेत्थम्भावचिह्नेऽभिस्तेषु भागे परिप्रती।
अनुस्तेषु सहार्थे च हीनेऽनूपौ मताविह॥ *

गोवत्सान् व्रजम् अवहत् नीतवान्। यः आभीरीरण्यं जहार निनाय। यो दैत्यान् प्राणान् अदण्डयत्, प्राणान् गृहीत्वा अघातयदित्यर्थः। यो यज्वनां भोज्यं जग्राह। यः पूतनां बलम् अकर्षत्, पूतनां विकृष्य बलं गृहीतवानित्यर्थः। योऽम्भोधिम् अमृतं ममन्थ, समुद्रमुन्मथ्य अमृतमुत्थापितवानित्यर्थः। यस्तत् अमृतं दितिजान् मुमोष खण्डित-वान्। योऽसौ कृष्णः लोकानां पुण्यपापं सुखासुखं पचति—पुण्यं सुखं, पापम् असुखं, पचति परिणमयतीत्यर्थः।

अत्र पचाद्या इत्यादि-पदेन गुरु शिष्यं ग्रामं प्रहिणोतीत्यादि। ब्रू इत्यनेन ब्रुवर्थ-ग्रहणं, तेन गद कथ भनस प्रभृतीनां संग्रहः। वृक्षं नौकां करोति, सुवर्णं कुण्डलं करोतीत्यादौ प्रकृतिविकृतिभावेन एकमेव कर्म्म, तेन वृक्षो नौका क्रियते इत्यत्र द्वयोरेव उक्तत्वात् न गौणमुख्यव्यवहारः, किन्तु प्रकृतेः सङ्ख्यानुसारेणैव क्रियाप्रयोगः, यदुक्तं—प्रकृतेर्विकृतेर्वापि यत्रोक्तत्वं द्वयोरपि। वाचकः प्रकृतेः सङ्ख्यां गृह्णाति विकृतेर्न तु इति। पचादिश्च—पच वच वप वद चल पत नद भष चर गाह देव मद चप सेव मेथ इत्यादि आकृतिगणः।

* अभिश्च उभयश्च परिश्च सर्व्वश्च तेभ्यस्तस्। उपरिश्च अधश्च अधिश्च ते, द्वयश्च ते उपर्य्यधोऽधयश्चेति ते उपर्य्युपरि अधोऽधः अध्यधि इति द्विरुक्ताः, पश्चात् द्वन्द्वः। द्युपरीति किं, गण्डस्योपरि विस्फोटक इत्यादौ षष्ठी स्यादेव, न तु द्वितीया। धिक्—निर्भर्त्सननिन्दयोरित्यमरः। समया—अन्तिकमध्ययोरित्यमरः। निकषा—अन्तिके इत्यमरः। हा—विषादशुगर्त्तिषु इत्यमरः। अन्तरा—मध्ये इत्यमरः। अन्तरेण, विना, ऋते—वर्जने इत्यमरः। एन—(५१८)वैनोऽपौत्यनेन विहित एनप्रत्ययान्तः। अति—अतिक्रमणार्थः, प्रकर्षे लङ्घनेऽप्यतीत्यमरः। येमतेनौ—यादृक्तादृगर्थौ। अभितः—समीपोभयतःशीघ्रसाकल्याभिमुखे इत्यमरः। उभयतः—उभयदिशोः। परितः, सर्व्वतः—समन्तादर्थम्, समन्ततस्तु परितः सर्व्वत इत्यमरः।

अत्र अभिपरिप्रत्यनूपानामर्थविशेषएव ग्रहणमित्याह वीप्सेति। इह द्वितीयाविधाने,

धिग्लोकमीश्वराभक्तं, समया माधवं रमा।
निकषा गिरिशं गौरी, हा लोकं केशवद्विषम्॥
कृष्णोऽन्तरा ब्रह्मशम्भू, नान्तरेणाच्युतं सुखम्।
दक्षिणेन हरिं रुद्रो, गोविन्दमति नेश्वरः॥
येनेशं हरिरीशस्तं तेनेशमभितोऽर्चकाः।
रामकृष्णावुभयतो गोपेशं, परितः परे॥
प्रमथाः सर्व्वतः सर्व्वं, शर्म्म नेशार्चनं विना।
मुक्तिर्नर्त्तेऽच्युतोपास्तिं, भूतं भूतमभि प्रभुः॥
भक्तो विभुमभि, प्राज्ञो गोविन्दमभि तिष्ठति।
हरिं पर्य्यभवल्लक्ष्मी-र्हरं प्रति हलाहलम्॥
विष्णुमन्वर्च्चते भर्गः, शक्रादय उपाच्युतम्।
लोकानुपर्य्युपर्य्यास्तेऽधोऽधोऽध्यधि च माधवः॥ *

अभिः वीप्सेत्थम्भावचिह्ने मतः, परिप्रती तेषु वीप्सेत्थम्भावचिह्नेषु भागे च मतौ, अनुः तेषु वीप्सेत्थम्भावचिह्नभागेषु सहार्थे च मतः, अनूपौ हीने मतावित्यन्वयः। द्रव्यगुणक्रियाभिर्युगपत् व्याप्तुमिच्छा वीप्सा। कस्यचित् प्रकारस्यापत्तिरित्थम्भावः। चिह्नं लक्षणम्, अन्यत् स्पष्टम्। अभ्यादिरिह अनुपसर्ग एव। धिक्प्रभृतिभिर्योगे द्वितीया स्यादिति सूत्रार्थः, योगस्त्विह अर्थेनैव, न तु शब्देन। पाणिनिः १।४।८३—८७,९०,९१,९५,२।३।८,भाष्यञ्च। उपान्वध्याङ्वसः (१।४।४८) इति पाणिनिसूत्रव्याख्यानन्तरं धिक्समयेत्यादियोगादुपपदविभक्तिमाह भट्टोजिदीक्षितः।

* ईश्वराभक्तं लोकं धिक्, स निन्द्य इत्यर्थः। रमा लक्ष्मीः माधवं समया, माधवस्य समीपे। गौरी गिरिशं निकषा, गिरिशस्य समीपे। केशवद्विषं लोकं हा, स विषादार्हः शोकार्हो वा। हा राम! हा तात! इत्यादौ हा-शब्दस्य वक्तुः शोकादिव्यञ्जकत्वात् रामादौ न द्वितीया, सम्बोधने प्रथमैव। कृष्णः ब्रह्मशम्भू अन्तरा, ब्रह्मशम्भ्वोर्मध्ये। अच्युतं कृष्णम् अन्तरेण विना सुखं न भवतीति शेषः। रुद्रो हरिं दक्षिणेन, हरेर्दक्षिणे स्थितः। गोविन्दम् अति ईश्वरो न, गोविन्दस्य अतिक्रमिता ईश्वरो नास्तीत्यर्थः। हरिरीशं येन ईशस्तं हरिं तेन, हरिरीशस्य यादृशः ईशो हरेस्तादृश-

२८७। दिवो घं वा। (दिव: ६।, घं १।, वा ।१।)।

दिवो घं ढं स्याद्वा। अक्षै-रक्षान् वा दीव्यतीश:। *

२८८। साधनहेतुविशेषणभेदकं घं कर्त्ता घस्त्रौ। (साधन—भेदकं १।, घं १।, कर्त्ता १।, घ: १।, त्रौ ।१।)।

नेत्रै: पुण्येन भूषाभि र्नाम्ना दृष्ट: शिवो जनै:। †

इत्यर्थ:, हरीशौ अभिशाविति यावत्। अर्भका: ईशमभित: समीपे। रामकृष्णौ गोपेशं नन्दम् उभयत:, गोपेशस्य उभयो: पार्श्वयो ; परे अन्ये गोपबालका: गोपेशं परित:. गोपेशस्य समन्तात। प्रमथा: शिवगणा: सर्व्वं शिवं सर्व्वत:, शिवस्य सर्व्वासु दिक्षु। ईशार्च्चनं विना शर्म्म सुखं न स्यादित्यर्थ:। अच्युतोपास्तिं विष्णूपासनाम् ऋते मुक्तिर्न स्यादित्यर्थ:। प्रभुरीश्वर: भूतं भूतम् अभि, सर्व्वप्राणिषु अस्तीत्यर्थ:, अत्र वीप्सायां द्वित्वम्। भक्त: विभुम् अभि, इत्थम्भावापन्न:, विभुविषये भक्तिभावापन्न इत्यर्थ:। प्राज्ञ: गोविन्दम् अभि, अभिलक्षीकृत्य तिष्ठतीत्यर्थ:, अत्र चिह्नार्थ:। लक्ष्मी: हरिं परि अभवत्, समुद्रे मथिते लक्ष्मी: हरेर्भागोऽभवदित्यर्थ:। हलाहलं विषं हर प्रति, हरस्य भाग अभवदित्यर्थ:। भर्ग: शिव: विष्णुम् अनु विष्णुना सह अर्च्यते। शक्रादयो देवा: अच्युतम् उप, अच्युतात् हीना इत्यर्थ:। माधव: लोकान् उपरि उपरि लोकानाम् उपरि समीपे आस्ते, एवं लोकान् अधोऽध: समीपे, अध्यधि इतस्तत: समीपे आस्ते इत्यर्थ:, अत्र सामीप्ये द्वित्वम्। उपर्य्युपरिबुद्धीनां चरन्तीश्वरबुद्धय-इत्यत्र उपरिबुद्धीनां श्रेष्ठबुद्धीनाम् उपरीत्यर्थ:, तेन न द्वि-उपरि-योग:। अत्र व्याप्त्यर्थे यावत्शब्दयोगे द्वितीया वक्तव्या ; नदीं यावदरण्यानीत्यादि।

* क्रीड़ार्थस्य दिवधातो: करणं कर्म्मसंज्ञं स्याद्वा। अत्र वाशब्दो व्यवस्थावाची, तेन दीव्यते: करणं नित्यं कर्म्मसंज्ञं स्यात्, द्वितीया तु वा स्यादित्यर्थ:। अतएव दिव: सदैव सकर्म्मकत्वात् अक्षा दीव्यन्ते इति कर्म्मणि प्रत्यय:, अक्षाणां देविता इति (३०५) कृद्योगे कर्म्मणि षष्ठीत्यादि। पाणिनि: १।४।४३।

† साध्यते कर्म्म निष्पाद्यतेऽनेनेति साधनं करणम्। तथाच क्रियायां साध्यायां बहूनां कारणानां मध्ये यद् वस्तु अव्यवधानेन क्रियानिष्पत्तिकारणं विवक्षितं तदेव साधनं भवति, अतएव "साधकतमं करणम्" इति पाणिनि: (१।४।४२)। तथाच—कारणाव्यवधाने तु क्रियानिष्पत्तिकारणम्। यद्वै विवक्षितं तेषु करणं तत् प्रकीर्त्तित-

२८९। सहवारणसमोनार्थार्थविनापृथङ्नानाद्यैः।

(सह—नानाद्यैः ३॥।)।

एभिर्योगे भी स्यात्।

सहेशार्च्योऽच्युतो भेदेनालं; तेन समोऽस्ति कः।
विकारै रहितः शम्भुः, सतामर्थः शिवार्चया॥
श्रीनेशेन विना, शम्भुः पृथक् विश्वेन, तत् पुनः।
न नाना शम्भुना, रामात् वर्षेणाधोक्षजोऽवरः॥ *

मिति। यद्वा "क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्। विवक्षते यदा तत्र करणत्वं तदा स्मृतम्॥ वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम्। स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः॥ इति हरिकारिका। कायेन मनसा वाचा इत्यादौ—बहूनामपि करणत्वम्। फलसाधनयोग्यः पदार्थो हेतुः, यथा—विद्यया यशः, धनेन कुशलमित्यादि। कर्त्रधीनं साधनं, यदधीना कर्तुः प्रवृत्तिः स हेतुरिति साधनहेत्वोर्भेदः। "द्रव्यादि-साधारणं निर्व्यापारसाधारणञ्च हेतुत्वम्, करणत्वन्तु क्रियामात्रविषयं व्यापारनियतञ्च" इति सिद्धान्तकौमुदी। विशेष्यतेऽनेनेति विशेषणं, जटाभिस्तापस इत्यादि। भेदयति सामान्यावगमे इतरेभ्यो व्यवच्छिनत्ति यत् तत् भेदकं व्यवच्छेदकं, नाम्ना शिव इत्यादि। विशेषणं विद्यमानं, भेदकन्त्वविद्यमानमित्यनयोर्भेदः। प्रकृत्या पटुः, जात्या ब्राह्मणः, जन्मना अन्धः, स्वभावेनोदारः, सुखेन याति, साकल्येनादत्ते, प्रायेण वैष्णवः, दशाहेन शुध्येत, अक्ष्णा काणः इत्यादौ पटुत्वभवनादीनां प्रकृत्यादेः साधनत्वविवक्षया करणे तृतीयेति दुर्गसिंहः। प्रकृत्यादिभ्य उपसंख्यानमिति वार्त्तिकम्। यः करोति स कर्त्ता, कृत्याश्रयः कर्त्ता इति तार्किकाः। "स्वतन्त्रः कर्त्ता" इति पाणिनिः (१।४।५४)। "क्रियामुख्यप्रयोजको कर्त्ता" इति क्रमदीश्वरः।

साधनहेतुविशेषणभेदकम् इति समाहारद्वन्द्वः। धं करणं, घः कर्त्ता। साधनादीनि ध-संज्ञानि स्युः, कर्त्ता घसंज्ञः स्यात्, उभयत्र भी स्यादित्यर्थः। नेत्रैरिति। नेत्रैः करणैः, पुण्येन हेतुना, भूषाभिर्विशिष्टः, नाम्ना भेदकेन, शिवः, अन्यैः कर्तृभिर्दृष्टः इत्यन्वयः। पाणिनिः २।३।१८,२१,२३।

* अर्थः प्रयोजनम्; सह च वारणञ्च समश्च ऊनश्च अर्थश्च ते अर्थाः अभिधेयाः येषां ते सहवारणसमोनार्थार्थाः। नाना आद्या येषां ते नानाद्याः। ततः, सहवारण-समोनार्थार्थाश्च विना च पृथक् च नानाद्याश्च ते तैः। एभिर्योगे तृतीया स्यादित्यर्थः।

२९० । कालभाण्डे वा ।

(कालभात् ५।, डे ७।, वा ।१।) ।

कालवाचिनो नक्षत्रात् डे त्री स्याद्वा ।

रोहिण्यामभवत् कृष्णो रोहिण्यासीच्च चण्डिका । *

२९१ । मानाद्वीप्सायां ढे ।

(मानात् ५।, वीप्सायां ७।, ढे ७।) ।

शतं शतं पयोऽपीप्यत् वत्सान् विष्णुः शतेन गाः ।

अत्र अर्थेनैव योगे, न तु शब्देन, तेन सहागतः पित्रा इत्यादौ व्यवधानेऽपि स्यात्; एवं सहार्थादिभिर्गम्यमानैरपि स्यात् । सहेत्यादि—अच्युतः ईशा शिवेन सह अर्च्यः, ईष्टेति ईशधातोः क्विपि ईशशब्दः, एवं साकं सार्द्धं समममित्यादिभिः । अच्युतेशयोः भेदेन अलं भेदो व्यर्थ इत्यर्थः, एव मास्म मा इत्यादिभिर्वारणार्थैः । तेन अच्युतेन समः कोऽस्ति, एवं समान तुल्य इत्यादिभिः, इवशब्दस्य तु सादृश्यद्योतकत्वेन वाचकत्वाभावात् तेन योगे न स्यात्; एवं तुलोपमाशब्दयोगेऽपि न स्यात्, यथा कृष्णस्य तुला नास्ति इत्यादि । अत्र समार्थैः षष्ठ्यपीति (३०२) सूत्रे वक्ष्यति । शम्भुर्विकारैः कामक्रोधादिभिः रहितः हीन इत्यर्थः, एवमल्पादिभिः । सतां साधूनां शिवाज्ञया अर्थः प्रयोजनम् । ईशेन विना श्रीः त्रिवर्गसम्पत्ति-र्न स्यादित्यर्थः । शम्भुर्विश्वेन पृथक्, विश्वस्य नश्वरत्वादित्यर्थः । तत् विश्वं पुनः शम्भुना न नाना न भिन्नं, विश्वस्य शम्भुमयत्वात् । पृथग्विनानानाभिस्तृतीया द्वितीया पञ्चमी चेति पाणिनिः (२।३।३२) । अत्र ग्रन्थे पृथङ्नानाशब्दाभ्यान्तु तृतीयैव । अन्यार्थेन तु पञ्चमी । आद्यशब्दात्—अधीनजः कृष्णः रामात् बलदेवात वर्षेण अवरः कनिष्ठ इत्यर्थः, अत्र अवरशब्दयोगे वर्षेणेति तृतीया । एवं मासेन पूर्व्वः, शस्त्रेण कलहः, गुड़ेन मिश्र इत्यादि । अत्र, प्रसितोत्सुकाभ्यां योगे तृतीयासप्तम्यौ स्यातामिति (पाणिनिः २ ३।४४) वक्तव्यम । पाणिनिः २।३।१९,३२.७२, वार्त्तिकञ्च ।

* नक्षत्रवाचका अश्विन्यादयः शब्दाः, चन्द्रपर्व्वेषु तत्तन्नक्षत्रविशिष्टकालेषु च वर्त्तन्ते । अत्र च,काले वर्त्तमानादश्विन्यादिशब्दादधिकरणे तृतीया वा स्यादित्यर्थः । कृष्णः रोहिण्यां रोहिणीनक्षत्रयुक्तकाले अभवत अवततार, चण्डिका च रोहिण्या तादृशे काले आसीदवतीर्णा । अत्र रोहिण्यामिति अधिकरणे रोहिण्या इति तृतीया वा । एवं पुष्ये पुष्येण वा गच्छेदित्यादि । काले किं, रोहिण्यां प्रीतिश्चन्द्रस्य । पाणिनिः २।३।४५ ।

द्विद्रोणेन क्रीणाति, पञ्चकेन क्रीणाति; द्विद्रोणं पञ्चकं।*

२९२। संज्ञोऽस्मृतौ। (संज्ञ: ६।, अस्मृतौ ७।)।

स्मरणादन्यस्मिन्नर्थे वर्त्तमानस्य संपूर्व्वस्य जानातेर्ढे त्री स्याद्वा।

संजानीष्व स्व-मीशा च संजानीहि तत: शिवम्। †

२९३। संदानो भेऽधर्म्मे नित्यम्।

(संदान: ६।, भे ७।, अधर्म्मे ७।, नित्यं १।)।

संपूर्व्वदानसम्बन्धिनि अधर्म्मे भे त्री स्यान्नित्यम्।

संयच्छते स्म गोप्येष्टं श्रीश: संयच्छति श्रियै। ‡

---

* ढे कर्म्मणि प्रयुज्यमानात् मानवाचकात्, कर्म्मणो विशेषणीभूतादिति यावत्, वीप्सायां वाच्यायां तृतीया वा स्यादित्यर्थ:। मानम् इयत्तापरिच्छेदकं, तेनात्र परिमाण-वाचकस्य सङ्ख्यावाचकस्य च ग्रहणमिति। विष्णु: शतं शतं वत्सान् पयोऽपीप्यत्, शतेन गावश्च पयोऽपीप्यर्दिति शेष:। अत्र शतं शतमिति कर्म्मणि शतेन इति तृतीया वा। शतं शतमिति अनुक्तवीप्सायां द्वित्वं, शतेन इति तृतीयया वीप्साया उक्तत्वात् न द्वित्वम्। (शतं शतं वत्सा: गावश्च पय: अपु: इति अन्यान्तवाक्यं, वत्सान् इति गा इति च अन्यान्त-कर्त्तु: कर्म्मत्वम्।) द्विद्रोणेन क्रीणाति द्विद्रोणं क्रीणाति, द्विद्रोणपरिमितं द्रव्यं क्रीणाती-त्यर्थ:; पञ्चकेन क्रीणाति पञ्चकं क्रीणाति, पञ्च पञ्च पशून् क्रीणातीत्यर्थ:। द्विद्रोणेनेति पञ्चकेनेति च कर्म्मणि तृतीया वा। द्वौ द्वौ द्रोणौ परिमाणमस्य इति समासेन, पञ्च पञ्च परिमाणमस्य इत्यर्थे विहित-तद्धितप्रत्ययेन च उक्तत्वात् न द्वित्वम्। अत्र "गम्यमानापि क्रिया विभक्तौ प्रयोजिका इति, शतेन शतेन वत्सान् पाययति पय:, शतेन परिच्छिद्येत्यर्थ:।" इति सिद्धान्तकौमुदी। "द्विद्रोणेन धान्यं क्रीणातीति" प्रकृत्यादिभ्य उपसंख्यानमित्यस्योदाहरणमिति तत्रैव।

† सभो ज्ञा: संज्ञास्तस्य, न स्मृतिरस्मृतिस्तस्याम्। हे माधो त्वं स्वमात्मानम् ईशा शिवेन च संजानीष्व सम्यक् जानीहि, (८९८) संप्रतेरस्मृतौ इत्यात्मनेपदम्। अत्र ईशा इति कर्म्मणि तृतीया, स्वमिति विकल्पपक्ष:। स्मृतौ तु—ततस्तदनन्तरं शिवं सञ्जानीहि स्मर इत्यर्थ:। पाणिनि: २।३।२२।

‡ संपूर्व्वस्य दा-न 'दाने' इत्यस्य प्रयोगे अधर्म्मे धर्म्मविरुद्धे भे सम्प्रदाने नित्यं तृतीया स्यादित्यर्थ:। श्रीश: श्रीपति: गोप्या परस्त्रिया इष्टं वाञ्छितं संयच्छते स्म, दत्त-

२६४। यस्मै दित्सासूयाक्रोधेर्ष्यारुचिद्रोह-स्थाक्रुङ्श्लाघस्पृहिशपराधीक्षाप्रतिश्रुप्रत्यनुगृधार्य्यर्थो भं चौ तादर्थ्ये च।

(यस्मै ४।, दित्सा—धार्य्यर्थाः १॥, भं ११, चौ ।१।, तादर्थ्ये ७।, च ।१।)।

यस्मै दातुमिच्छा, असूयादयः स्थादेरर्थश्च यस्मै, तद् भ-संज्ञं स्यात्, तत्र चौ, तादर्थ्ये च।*

वान्! अत्र गोप्या इति अधर्म्मसम्प्रदाने तृतीया। (९०८) दानः सा चेद्धर्थे इत्यात्मनेपदम्। अधर्म्मे किं—श्रीशः श्रियै निजपत्नीं संयच्छति इष्टमिति शेषः। "अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया" इति वार्त्तिकम्।

* आप्रतिभ्यां श्रुः आप्रतिश्रुः, प्रत्यनुभ्यां गृः प्रत्यनुगृः, स्थाश्च क्रुङ्च श्लाघश्च स्पृहिश्च शप च राध च ईक्ष च आप्रतिश्रुश्च प्रत्यनुगृश्च धारिश्च ते, तेषामर्थाः स्थाक्रुङ्श्लाघस्पृहिशपराधीक्षाप्रतिश्रुप्रत्यनुगृधार्य्यर्थाः। ततः, दित्सा च असूया च क्रोधश्च ईर्ष्या च रुचिश्च द्रोहश्च स्थाक्रुङ्श्लाघस्पृहिशपराधीक्षाप्रतिश्रुप्रत्यनुगृधार्य्यर्थाश्च ते। दानस्य पात्रं सम्प्रदानम्। "कर्म्मणा यमभिप्रैति स सम्प्रदानम्" इति पाणिनिः १।४।३२। "क्रियया यमभिप्रैति सोऽपि सम्प्रदानम्" इति वार्त्तिकम्। "प्रदानाभिसम्बध्यमानं सम्प्रदानम्" इति पद्मनाभः।

दातुमिच्छा दित्सा, काशीस्थविप्राय गां ददातीत्यादि-सिद्ध्यर्थम् इच्छापर्य्यन्तग्रहणम्। दानन्तु स्वस्वत्वध्वंसानन्तर परस्वत्वोत्पत्त्यनुकूलव्यापारः, अतएव रजकस्य वस्त्रं ददातीत्यादौ न सम्प्रदानत्वम्। अत्रैव भयं ददातीत्यादिप्रयोगस्तूपचारात्। एवञ्च "ददात्यर्थस्य गौणत्वेऽपि सम्प्रदानं भवत्येव, खण्डिकोपाध्यायः शिष्याय चपेटं ददातीति भाष्यप्रयोगात्"। सिद्धान्तकौमुदीटीका। मम ब्राह्मणे दानमित्यादिषु तु विवक्षावशात् न सम्प्रदानम्। त्रिविधं हि सम्प्रदानम्—"अनिराकरणात् कर्त्तुस्त्यागाङ्गकर्म्मणेप्सितम्। प्रेरणानुमतिभ्याञ्च लभते सम्प्रदानताम्॥" इति हरिकारिका। तत्र अनिराकर्त्तृ सम्प्रदानं यथा, देवाय वस्त्रं ददाति; प्रेरकं सम्प्रदानं यथा, याचकाय धनं ददाति; अनुमन्तृ सम्प्रदानं यथा, गुरवे गां ददाति। असूया गुणेषु दोषारोपः, क्रोधश्चित्तविकारविशेषः, ईर्ष्या अक्षमा, रुचिरनुरागः, द्रोहोऽनिष्टाचरणम्। असूयाद्यर्थानां धातूनां कर्त्तुं प्रति असूयादिकं तत् सम्प्रदानमिति। "क्रुधद्रुहोरुपसृष्टयोः कर्म्म" इति पाणिनिसूत्रेण (१।४।३८) देवदत्तं संक्रुध्यति राजानमभिद्रुह्यतीत्यत्र कर्म्मणि द्वितीयैव,

ददातु सज्ञः स सुखं हरिः, स्मरात्
गोपीगणोऽसूयति कुप्यतीर्ष्यति।
स्म रोचते द्रुह्यति तिष्ठते ह्नुते-
ऽश्लाघिष्ट यस्मै स्पृहयत्यशप्त च॥ *

गर्गो राध्यति रामाय कृष्णाय ईक्षते व्रजे।
शुभाशुभं पर्य्यालोचयदित्यर्थः।

न तु चतुर्थी। ख्याधात्वर्थ इह स्थित्या स्वाभिप्रायज्ञापनेच्छा, एवं ह्नु-श्लाघ-शप-धातूनां यथाक्रमं ह्नवन-श्लाघन-शपनैः स्वाभिप्रायज्ञापनेच्छा अर्थः। अतएव "श्लाघादेर्यं ज्ञीप्सा" इति क्रमदीश्वरः। "श्लाघह्नुङ्स्थाशपां प्रयोगे यत् ज्ञपयितुमिच्छा तत् सम्प्रदानं स्यात्" इति गोयीचन्द्रः। स्थादीनां प्रयोगे यं प्रति स्वाभिप्रायज्ञापनेच्छा तत् सम्प्रदानमित्यर्थः। स्पृहिधातोः कर्म्मैव सम्प्रदानम्। राध इति दैवादिकस्य स्वादेश्च ग्रहणं, राध ईक्ष इति द्वयोरत्र शुभाशुभपर्य्यालोचनमर्थः, यस्य शुभाशुभपर्य्यालोचनं तत् सम्प्रदानमिति। आप्रतिपूर्व्वशृणातेरङ्गीकारोऽर्थः, स च यस्य सम्बन्धे क्रियते तत् सम्प्रदानम्। प्रत्यनुपूर्व्वगृणाते (नतु गिरतेः) पूर्व्ववक्तुः प्रोत्साहनमर्थः, तत्र पूर्व्ववक्ता सम्प्रदानम्। धारीति धृधातुर्ण्यन्तः, तस्य गृहीतापरिशोधनमर्थः, तत्र यस्य धनं गृहीतं तत् सम्प्रदानमिति। ततश्च दित्सादिधार्य्यर्थपर्य्यन्तानां यो विषयः स सम्प्रदानसंज्ञः स्यात्, तत्र च चतुर्थी स्यादित्यर्थः। तादर्थ्ये इति—स चासौ अर्थश्चेति तदर्थः तस्य भावस्तादर्थ्यं, एवञ्च तस्यार्थो निवृत्तिस्तदर्थः, तदर्थ एव तादर्थ्यं, ततश्च, तादर्थ्यञ्च तादर्थ्यञ्च इत्येकशेषे तादर्थ्ये तस्मिन्, यत् प्रयोजनं तस्मात्, यस्य निवृत्तिस्तस्मादपि चतुर्थीत्यर्थः। यथा—ज्ञानाय पाठः, मशकाय धूम इत्यादि। पाणिनिः २।३।१३,१।४।३२—४१, वार्त्तिकञ्च।

* स हरिः सज्ञः साधुभ्य सुखं ददातु। सज्ञ इति दित्सया सम्प्रदानत्वम्। यस्मै हरये गोपीगणः स्मरात् कामाद्धेतोः असूयति स्म, यस्य गुणेषु दोषारोपणमकरोदित्यर्थः, असूं करोतीति कण्ड्वादित्वात् (८५४) क्य, स्मशब्दयोगे (९३४) अतीते क्तौ। एवं यस्मै कुप्यति स्म, ईर्ष्यति स्म। यस्मै रोचते स्म यस्यानुरागपात्रमासीदित्यर्थः। यस्मै द्रुह्यति स्म। गोपीगणो यस्मै तिष्ठते स्म यं स्वाभिप्रायं विज्ञापयितुमैच्छदित्यर्थः, तिष्ठते इति (८६९) आत्मनेपदम्। यस्मै ह्नुते स्म अपह्नवेन यं स्वाभिप्रायं विज्ञापयितुमैच्छदित्यर्थः। यस्मै अश्लाघिष्ट श्लाघनेन यं स्वाभिप्राय विज्ञापयितुमैच्छदित्यर्थः। यस्मै स्पृहयति स्म। यस्मै अशप्त च शपथेन यं स्वाभिप्रायं विज्ञापयितुमैच्छदित्यर्थः, अशप्तेति (८६८) आत्मनेपदम्।

विभीषणायाशुश्राव राज्यं प्रत्यशृणोद्यशः।

प्रतिज्ञातवानित्यर्थः।

रामः प्रत्यगृणात्तस्मै लक्ष्मणोऽन्वगृणात् कपिः।

रामं वदन्तं प्रोत्साहयामास इत्यर्थः।

सर्व्वो धारयते सर्व्वं सद्भ्यस्तं भज मुक्तये।*

२९५। शक्तार्थ वषड्ढित सुख स्वाहा स्वधा स्वस्ति नमोभिः। (शक्तार्थ—नमोभिः ३।॥)।

एभिर्योगे ची स्यात्।

दैत्येभ्योऽलं हरिः, पूष्णे वषट्, सद्भ्यो हितं सुखम्।
स्वाहाग्नये, स्वधा पित्रे, स्वस्ति धात्रे, नमः सते॥ †

---

* गर्गो मुनिः व्रजे गोष्ठे रामाय बलदेवाय राध्यति स्म, कृष्णाय ईक्षते स्म, रामस्य कृष्णस्य च शुभाशुभं पर्य्यालोचयदित्यर्थः (पर्य्यालोचयदिति, आकितो वा चुरादय इति ज्ञापकात् लोचृ ईक्षे इति भौवादिकात् स्वार्थे ञिः)। रामः विभीषणाय राज्यम् आशुश्राव यशश्च प्रत्यशृणोत् दातुं प्रतिज्ञातवानित्यर्थः। लक्ष्मणस्तस्मै रामाय प्रत्यगृणात, कपिः सुग्रीवः (तस्मै रामाय) अन्वगृणात, विभीषणाय राज्यं यशश्च दास्यामीति वदन्तं रामं साधुवादैः प्रोत्साहयामासेत्यर्थः। सर्व्वः शिवः सद्भ्यो भक्तेभ्यः सर्व्वं (वाञ्छितं) धारयते, दयालुतया शिवस्य अधमर्णत्वेन निर्द्देशः, धारयते इति फलवत्कर्त्तरि (६१६) आत्मनेपदम्। हे साधो मुक्तये मुक्त्यर्थं तं सर्व्वं भज, अत्र मुक्तये इति तादर्थ्ये चतुर्थी। यत्र निमित्तस्य कर्म्मकारकेण सह योगो वर्त्तते तत्र (३११) सप्तम्येव, यथा वस्त्रेषु रजकमवधीदिति। अत्र तु सर्व्वेण सह मुक्तेर्न योगः।

† शक्तः अर्थो येषां ते शक्तार्थाः अलंशक्तप्रभुसमर्थपर्य्याप्तप्रभृतयः, ते च वषट् च हितञ्च सुखञ्च स्वाहा च स्वधा च स्वस्ति च नमश्च तैः। अत्र हित सुख इत्यनेन हितार्थसुखार्थयोर्ग्रहणम्। वषट् स्वाहा स्वधा स्वस्ति नमः इत्येतेषां त्यागार्थानां मन्त्रार्थानाञ्च ग्रहणम्। अत्र "अर्थशब्देन प्रयोजनार्थानां ग्रहणम्; हितशब्देन कल्याणपर्य्याय-पठितानां भद्रशोभनशिवादीनां साधुप्रभृतीनाञ्च ग्रहणम्; सुखशब्देन मुत्प्रीत्यादीनां

२९६। ढेनाशिषि वा।

(ढेन ३।, [अथवा ढे ७।, न ।१।], आशिषि ७।, वा ।१।)।

सद्भ्यः सतां वा शं भूयात्।*

२९७। परिक्रियो घे वा।

(परिक्रियः ६।, घे ७।, वा ।१।)।

भक्त्यै मुक्तिः परिक्रीता सद्भिर्विष्णोः कृषारिभिः।†

ग्रहणम्" इति भरतः। नारायणं नमस्कृत्य इत्यादौ उपपदविभक्तेः कारकविभक्तिर्गरीयसीति (बलीयसीति वा) न्यायात् कर्म्मत्वम्। पाणिनिः २।३।१६, वार्त्तिकञ्च।

दैत्येभ्य इति—हरिर्दैत्येभ्योऽलं समर्थः। पूर्णा सूर्य्याय वषट्, पूर्णा यद्दातव्यं तत् वषट् इत्युच्चार्य्य दातव्यमित्यर्थः। सद्भ्यः साधुभ्यो हितं सुखञ्च भवतीति शेषः। अग्नये स्वाहा, पित्रे स्वधा, धात्रे स्वस्ति, मत्ते विष्णवे नमः, अग्न्यादिभ्यो यत् दातव्यं तत् क्रमेण स्वाहा इत्यादि उच्चार्य्य दातव्यमित्यर्थः। अत्र शक्तार्थैर्हितसुखैश्च योगे षष्ठ्यपीति (३०२) वक्तव्यम्; "शक्तार्थैः षष्ठ्यपीष्यते" इति क्रमदीश्वरः। तेन प्रभुर्बुभूषुर्भुवनत्रयस्य, नाप्रीयोदस्य कश्चनेत्यादि साधु।

* ढ-शब्देन कर्म्म क्रिया चोच्यते, ढशब्दस्य क्रियावाचकत्वं घे चादिढे क्तः (१०९२) इत्यत्र आदिढे आदिक्रियायामित्यर्थेन स्वयं वक्ष्यति। ततश्च प्रयुज्यमानेन क्रियावाचकपदेन योगे आशिषि (इष्टार्थाविष्करणे) गम्यमानायां चतुर्थी वा स्यादित्यर्थः। अथवा—आशिषि गम्यमानायां चतुर्थी वा स्यात् न तु ढ कर्म्मणि प्रयुज्यमाने इत्यर्थः। कर्म्मणि तु कृष्णः सतां शं करोतु इत्यादौ न स्यात्। आशिषि किं, तेषां कुशलं जातम्. आयुष्यं प्राणिनां घृतमित्यादि। सद्भ्यः सतां वा इति पक्षे षष्ठीविधानात् षष्ठ्यर्थ एवायं विधिरिति, तेन ग्रामे कुशलं भूयादित्यादौ न स्यात्। अत्र स्वस्तिवर्जकुशलायुष्यप्रयोजनमद्रभद्रहितसुखपथ्यार्थाभनार्थैरेव योगे ज्ञेयम्। पाणिनिः २।३।७३।

† परिपूर्व्वस्य क्रीणातेः प्रयोगे घे करणे चतुर्थी स्याद्वा इत्यर्थः। भक्त्यै इति—सद्भिः साधुभिः विष्णोः सकाशात् भक्त्यै मुक्तिः परिक्रीता, अरिभिः शत्रुभिः कृषा द्वेषेण, मुक्तिः परिक्रीतेति शेषः। उदाहरणद्वयेन विकल्पो दर्शितः। एवं द्रोणाय द्रोणेन वा परिक्रीतो वृषलः। परेः किं, शतेन क्रीतोऽश्वः। वेतने एवायं विधिरिति क्रमदीश्वरः। "चतुर्थी च परिक्रीतो वेतनादौ करणे" इति तत् सूत्रम्। तृतीया सिद्धैव, चतुर्थ्यर्थं विधानमिति गोयीचन्द्रः। व्यवस्थार्थं परसूत्रे वाशब्दोऽवश्य-वक्तव्ये वाक्यमध्यवर्त्तित्वेनास्य नित्यत्वप्राप्तौ, विकल्पार्थं वाग्रहणम्। पाणिनिः १।४।४४।

२९८। गत्यर्थमन्यढे चेष्टावज्ञेऽनध्वाकाकशूकशृगालनावन्ने वा।

(गत्यर्थमन्यढे ७।, चेष्टावज्ञे ७।, अनध्वा—अन्ने ७।, वा ।१।) ।

गत्यर्थमन्यत्योर्ढे क्रमान्मार्गकाकादिवर्ज्जे चेष्टावज्ञयोश्चौ स्याद्वा ।

> व्रजाय व्रजति शौरी व्रजं व्रजति केशवः ।
> न त्वा तृणाय मन्येऽहं न त्वा मन्ये तृणं खल ॥

चेष्टावज्ञे किं—मनसा द्वारकामेति; त्वां मन्येऽहं जनार्द्दनम् । अध्वादौ तु—गच्छत्यनन्तः पन्थानं, न त्वा काकं स मन्यते । *

* गतिरर्थो यस्य स गत्यर्थः, सच मन्यश्च तत् तस्य ढं तस्मिन् । चेष्टा च अवज्ञा च तत्तस्मिन् । न अध्वा अनध्वा. काकश्च शूकश्च शृगालश्च नौश्च अन्नञ्च तत, न तत् अकाकशूकशृगालनावन्नं, अनध्वा च अकाकशूकशृगालनावन्नञ्च द्वयोः समाहारस्तस्मिन् । यथाक्रमदर्शनार्थं नञ्द्वययोगः । चेष्टा कायकृतव्यापारः, अवज्ञा अपकृष्टत्वेन ज्ञानम् । ततश्च—गत्यर्थधातोरध्ववर्जित कर्म्मणि चेष्टायां गम्यमानायां, मन्यते. काकादिवर्जिते कर्म्मणि अवज्ञाया गम्यमानायां, चतुर्थी वा स्यादित्यर्थ. । मन्य इत्यत्र श्यना निर्द्देशात् मन् अवबोधने इति तनादिपठितो न गृह्यते ; यथा न त्वां तृणं मन्वे । अतः तृणाय न गणयतीत्यादि असाधु । व्रजायेति—शौरः व्रजाय व्रजति, केशवः व्रजं व्रजति, पादचारेण गच्छतीत्यर्थः । हे खल अहं त्वा त्वां तृणाय न मन्ये, त्वा त्वां तृणं न मन्ये, तृणादप्यपकृष्टं मन्ये इत्यर्थः । मनधातोर्येन कर्म्मणा अवज्ञा गम्यते तत्रैव चतुर्थी वा स्यात्. अतएव त्वा इत्यत्र न चतुर्थी ; इदमेव क्रमदीश्वरेण "युष्मदादेरनभिधानान्न स्यात्" इति सूत्रेण स्पष्टीकृतम् । मनसा द्वारकामेतीत्यत्र चेष्टाभावात्, त्वां मन्येऽहं जनार्द्दनमित्यत्र च अवज्ञाभावात् न चतुर्थी । अनन्तः पन्थानं गच्छतीत्यत्र अध्वकर्म्मकत्वात्, स त्वा त्वां काकं न मन्यते इत्यत्र काककर्म्मकत्वाच्च न चतुर्थी । एवं शूकादिकर्म्मण्यपि न चतुर्थी स्यात् । केचित् शूकेत्यत्र शुक श्व इति वा पठन्ति । एवं, तादर्थ्ये चतुर्थीसिद्धावपि, ग्रामाय सङ्गच्छतीत्यादिषु (८७५) समो गमृच्छेत्यादिना अढत्वादात्मनेपदप्राप्तिनिरासार्थमिदमित्याहुः । पाणिनिः २।३।१२,१७ ; वार्त्तिकञ्च ।

२९९। यतोऽपायभीजुगुप्सापराजयप्रमादादानभूत्राणविरामान्तर्द्धिवारणं ञं पी।

(यतः ५।, अपाय—वारणं १।, ञं १।, पी।१।)।

यत एते तत् ञसंज्ञं स्यात्, तत्र पी। *

> विभीषणः पदाद्भ्रष्टो, भ्रातुर्भीतो, जुगुप्सितः।
> पापात्, पराजितो दुःखा-दप्रमत्तो विधेः, सतः॥
> आत्तविद्यो, मुनेर्जातो, भ्रातुस्त्रातो निजै-र्भवात्।
> विरतोऽन्तर्हितो दुष्टात्, शोकात् रामेण वारितः॥ †

---

* अपायश्च भीश्च जुगुप्सा च पराजयश्च प्रमादश्च आदानश्च भूश्च त्राणश्च विरामश्च अन्तर्द्धिश्च वारणश्चेति समाहारः। एते यस्मात् भवन्ति तदपादानसंज्ञं स्यात्, तत्र पञ्चमी स्यादित्यर्थः। अपायश्चलनं, भीर्भयं, जुगुप्सा निन्दया मनोनिवृत्तिः, पराजयः सोढुमशक्त्या निवृत्तिः, प्रमादः शास्त्रविहितकर्म्माकरणम्, आदानं ग्रहणं, भूरुत्पत्तिः प्रादुर्भावश्च, त्राणं रक्षणं, विरामो विरतिः, अन्तर्द्धिरन्तर्द्धानं, वारणं निवारणम्। अपादानं त्रिविधम्—"निर्द्दिष्टविषयं किञ्चिदुपात्तविषयं तथा। अपेक्षितक्रियञ्चेति त्रिधापादानमिष्यते॥" इति हरिकारिका। "ध्रुवमपायेऽपादानम्" इति पाणिनिः १।४।२४। तत्र पञ्चमी २।३।२८। भीः त्राणम् १।४।२५। पराजयः १।४।२६। वारणम् १।४।२७। अन्तर्द्धिः १।४।२८। भूः १।४।३०,३१। आदानम् १।४।२९। एवं पठनं, श्रवणं, ज्ञानमध्ययनमित्यादि; अत्र उपयोगे इति कथनात् नटस्य गाथां शृणोति, न तु नटात्; अतएव "अगुरुत्वे षष्ठी" इति क्रमदीश्वरः। जुगुप्सा, प्रमादः, विरामश्च—वार्त्तिकम्।

† विभीषण इत्यादि—विभीषणः पदात् स्थानात् भ्रष्टश्चलितः, भ्रातुः रावणात् भीतः, पापात् जुगुप्सितः पापं निन्दन् तस्मात् निवृत्त इत्यर्थः, दुःखात् पराजितः दुःखं सोढुमशक्त्या निवृत्तः, विधेः शास्त्रविहितकर्म्मणः अप्रमत्तः अनिवृत्तः, सतः पण्डितात् आत्तविद्यः आत्ता गृहीता विद्या येन तादृशः, मुनेर्विश्रवसो जातः उत्पन्नः, भ्रातू रावणात् (वधोद्यतात्) निजैरात्मीयैस्त्रातो रक्षितः, भवात् संसारव्यापारात् विरतो निवृत्तः, दुष्टात् (रावणात्) अन्तर्हितो लुक्कायितः, रामेण शोकात् वारितः त्वामहं लङ्काराजं करिष्यामीत्यादि प्रियवचनमुक्त्वा शोकात् निवारित इत्यर्थः। एवं यवेभ्यो गां वारयति, कूपादन्धं वारयतीत्यादि।

३००। अन्यारब्ध्यार्थारात्वहिर्विनर्त्तेप्रति-पर्य्यपाङ्दिक्शब्दैर्हेतुयबर्थे च।

(अन्य—शब्दैः ३।।।, हेतुयबर्थे ७।, च ।१।)।

एभिर्योगे हेतौ यबन्तस्यार्थे च ङ्सी स्यात्। *

आङ् व्याप्तिसीम्नो-स्त्यागेऽन्यौ, प्रतिदाननिधौ प्रति। †

नेतरो विष्णुरीशानात्, भवात् प्रभृति सोऽर्च्यते।

सोऽस्मदारात् वहिस्त्वत्, शं विना नार्थो वृषाद्दते॥

भक्तेः प्रत्यमृतं शम्भोः, प्रद्युम्नः केशवात् प्रति।

पर्य्यनन्तात् त्रयस्तापाः, आमृत्योः सेव्यतां हरिः॥

ब्रह्मास्त्यासकलात्, पूर्व्वः कृष्णाद्रामोऽवरो गदः।

आनन्दादीश्वरः शैलादासनादीक्षतेऽलकाम्॥

शैलमारुह्य आसने उपविश्येत्यर्थः। ‡

---

* अन्यश्च आरब्ध्यश्च अन्यारब्ध्यौ, तौ अर्थौ येषां ते अन्यारब्ध्यार्थाः। दिशि वर्त्तमानाः शब्दाः दिक्शब्दाः, अन्यारब्ध्यार्थाश्च आराश्च वहिश्च विना च ऋते च प्रति च परि च अप च आङ् च दिक्शब्दाश्च ते तैः। यप् इति क्त्वास्थाने यबादेशः, तस्य केवलस्यासम्भवात् तदन्तस्य ग्रहणम्, तस्यार्थो यबर्थः, हेतुश्च यबर्थश्चेति हेतुयबर्थं तस्मिन्। दिक्शब्दा इति दिग्देशकालवाचकानां निर्द्देशः, ते च पूर्व्वपरादयः प्रागुदक्प्रत्यगादयश्च। किन्त्वत्र दिग्देशकालानां त्रयाणामेव ये वाचकास्तेषामेव ग्रहणं, तेन कालमात्रवाचकस्य मासादेर्न प्रसङ्गः। अन्यार्थैरारब्ध्यार्थैरारादाद्यैरष्टभिः दिग्वाचकशब्दैश्च योगे, हेतौ प्रयुज्यमानात् लिङ्गात्, यबन्तस्यार्थे गम्यमाने च, पञ्चमी स्यादित्यर्थः।

† प्रति परि अप आङ् चतुर्णामर्थविशेषेष्वेव ग्रहणमित्याह आङ् व्याप्तीत्यादि—अत्र आङ् व्याप्तिसीम्नोरर्थयोर्वर्त्तते, व्याप्तिरभिविधिः, सीमा अवधिः। प्रति प्रतिदाननिधौ वर्त्तते, दानञ्च निधिश्चेति समाहारे दाननिधिः, सूत्रत्वात् पुंस्त्वं, प्रतिदाननिधिः प्रतिदाननिधिस्तस्मिन्, प्रतिदाने प्रतिनिधौ चेत्यर्थः। प्रतिदानं विनिमयः, प्रतिनिधिस्तुल्यः। अन्यौ पर्य्यपौ त्यागे वर्जने वर्त्तेते। पाणिनिः १।४।८८,८९,९२।

‡ नेतर इति—विष्णुः ईशानात् शिवात् न इतरः न भिन्नः, न भीन्न इति केचित्। स विष्णुः भवात् प्रभृति जन्मन आरभ्य अर्च्यते। प्रातःकालं समारभ्य इत्यादिकन्तु, उप-

३०१ । वारादर्थैः । (वा ।१।, आरादर्थैः ३।॥) ।

दूरान्तिकार्थैः षी स्याद्वा ।

रामाद्रुद्रस्य यो दूरं पापाद्दुःखस्य सोऽन्तिकम् । *

३०२ । समार्थैनार्थ्यस्तस्ताद्वितसुखैर्निर्द्धारे सम्बन्धे ढे च षी ।

(समार्थ—सुखैः ३।॥, निर्द्धारे ७।, सम्बन्धे ७।, ढे ७।, च ।१।, षी ।१।) ।

एभिर्योगे एषु च षी स्यात् ।

पदविभक्तेः कारकविभक्तिर्गरीयसीति न्यायात् कर्म्मणि द्वितीया । स विष्णुः अस्मात् आरात् अस्माकं निकटे इत्यर्थः ; त्वत् वहिः तव वहिरित्यर्थः । वृषात् धर्म्मात् विना ऋते च शं सुखम् अर्थस्य न भवतीत्यर्थः । विना ऋते इति द्वाभ्यां योगे (२८६) द्वितीया च, विना शब्देन योगे (२८९) तृतीया च भवतीति बोध्यम् । शम्भोः भक्तेः शैति प्रतिदानम् अमृतं मोक्ष, यः शम्भौ भक्तिं करोति शम्भुस्तस्मै मुक्तिं ददातीत्यर्थः । प्रद्युम्नः कामदेवः केशवात् प्रति केशवस्य तुल्य इत्यर्थः । त्रयस्तापाः आध्यात्मिकाधिदैविकाधिभौतिक-संज्ञकाः अनन्तात् परि अनन्तेन वर्जिता इत्यर्थः । एवं अपानन्तात् त्रयस्तापा इत्यपि । आ मृत्योः मृत्युपर्य्यन्तं हरिः सेव्यताम् । आ सकलात् सकलं जगत् व्याप्य ब्रह्म परमेश्वरः अस्ति । रामो बलरामः कृष्णात् पूर्व्वः पूर्व्वकालीनः ज्येष्ठः इत्यर्थः । गदो गदनामको बालकः कृष्णात् अवरः पश्चिमकालीनः कनिष्ठः इत्यर्थः । ईश्वरः शिवः आनन्दात् हेतोः शैलात् शैलमारुह्य आसनात् आसने उपविश्य अलकां कुवेर-पुरीम् ईक्षते पश्यति ; अत्र आरुह्येति यबन्तस्यार्थे शैलादिति कर्म्मणि पञ्चमी, उपविश्येति यबन्तस्यार्थे आसनादिति अधिकरणे पञ्चमी । कर्म्माधिकरणाभ्यामन्यत्र यबर्थे पञ्चमी न स्यादिति प्राञ्चः । पाणिनिः २।३।१०,११,२५,२९,३२ ; वार्त्तिकञ्च । अत्र वक्तव्यम् "करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्वविषयस्य" (पाणिनिः २।३।३३) इति सूत्रेण "स्तोकान्मुक्तमुदन्वता" इत्यादौ पञ्चमी तृतीया च । एवमेव "स्तोकादि-धर्म्मवाचिनः करणात्" इति क्रमदीश्वरः ।

* आरात् इत्यव्ययस्य अर्थ इव अर्थो येषां ते आरादर्थास्तैः । आरात् दूरसमी-पयोरित्यमरः, अत आह दूरान्तिकार्थैरिति । यः रामात् रुद्रस्य च दूरं रामस्य रुद्रस्य च दूरे तिष्ठतीति शेषः, स पापात् दुःखस्य च अन्तिकं पापस्य दुःखस्य च अन्तिके तिष्ठती-त्यर्थः । अत्र दूरं अन्तिकञ्च सप्तम्यर्थे द्वितीया । पाणिनिः २।३।३५ ।

य: सर्व्वस्य समो यश्च दक्षिणेनोत्तरा स्थित:।
उपर्य्यध: पूर्व्वतश्च पश्चात्, यस्याखिलं हितम्।
सुखञ्च, तस्य देवानां वर्य्यस्य, पदयोर्भजे ॥ *

३०३। ज्ञोऽज्ञाने.धे। (स: ६।, अज्ञाने ७।, धे ७।)। +

शम्भोर्मुकुन्दे जानीते भक्त्या जानाति शङ्करम्।

---

* समोऽर्थो येषां ते समार्था:, समानसमतुल्यसदृशादय:। समार्थाश्च एनश्च आश्च रिश्च अस् च तस् च तात् च हितञ्च सुखञ्च तानि तै:। एन आ रि अस् तस् तात् षड़ेते तद्धिता:, तेषाञ्च केवलानामसम्भवात् तदन्तानां ग्रहणम्। एन इति (५१९) वैनोऽपीत्यनेन, आ इति (५२०) दक्षिणोत्तराद्वाहीत्यनेन, रि इति (५२४) निपातनात्, अस् इति (५२२) अतएव अस्, तस् इति (५११) तस् क्तेरित्यनेन, तात् इति (५१८) दिक्शब्दादित्यनेन। जातिगुणक्रियाणामुत्कर्षेणापकर्षेण वा सजातीयात पृथक्करणं निर्द्धार:। सम्बन्धश्च अवयवावयविभाव-जन्यजनकत्वादि-रनेकविध:। समार्थै:, एनादि-षट्तद्धितान्तै र्हितसुखाभ्याञ्च योगे, निर्द्धारणे, सम्बन्धे, कर्म्मणि च, षष्ठी स्यादित्यर्थ:। हिष्ठो यद्यपि सम्बन्ध: षष्ठ्युत्पत्तिस्तु भेदकादिति ज्ञेयम्। य: सर्व्वस्येत्यादि—तस्य पदयो-र्भजे इत्यन्वय:, य: सर्व्वस्य जगत: समस्तुल्य:, यश्च सर्व्वस्य दक्षिणेन स्थित:, स्थित इति वर्त्तमाने क्त:, दक्षिणे तिष्ठतीत्यर्थ: ; एवं उत्तरा उत्तरस्यां दिशि, उपरि ऊर्द्धभागे, अध: निम्नदेशे, पूर्व्वत: पूर्व्वकाले, पश्चादुत्तरकाले च, सर्व्वस्य इत्यनेन स्थित इत्यनेन च सर्व्वत्रान्वय:। यस्य अखिलं जगत् हितं मित्रं, सुखं सुखजनकञ्च, तस्य देवानां वर्य्यस्य श्रेष्ठस्य ईश्वरस्य पदयोर्भजे अहमिति शेष:। अत्र यथाक्रमं लक्षणसङ्गमो बोध्य:। सामान्यत: कर्म्मणि विहितापि षष्ठी धातुविशेषाणामिति बोध्यम्, अन्यथा सर्व्वत्र कर्म्मणि षष्ठ्यापत्ति:। तथाच, “अधीगर्थदयेशां कर्म्मणि” (पा. २।३।५२), “कृञ: प्रतियत्ने” (पा. २।३।५३), “रुजार्थानां भाववचनानामज्वरे:” (पा. २।३।५४), “आशिषि नाथ:” (पा. २।३।५५), “जासिनिप्रहणनाटक्राथपिषां हिंसायाम्” (पा. २।३।५६), “व्यवहृपणो: समर्थयो:” (पा. २।३।५७), “दिवस्तदर्थस्य” (पा. २।३।५८), इत्यादि। अतएव क्रमदीश्वर:—“कर्म्मादिविषयेऽप्यविवक्षिते कर्म्मादौ सम्बन्धविवक्षायां षष्ठ्येव”—इति सूत्रम्। “मासाणामश्नीयादिति भाष्यम्। न च सिद्ध्यति कस्यचिदिति भट्टि:। सा लक्ष्मीरुपकुरुते यया परेषामिति किरात:। नारायणस्यानुकरोतीत्यादि।” मूले पदयोर्भजे इत्यादौ तु विकल्प:। पाणिनि: २।३।३०,३१,४१,५०,७२।

+ ज्ञाधातोरज्ञानार्थे वर्त्तमानस्य जानाते र्धे करणे षष्ठी स्यादित्यर्थ:। पाणिनि: २।३।५१।

शम्भुना साधनेन मुकुन्दे प्रवर्त्तते इत्यर्थः, प्रवृत्त्यर्थश्च जानातिः।*

३०४। तृप्त्यर्थानां वा। (तृप्त्यर्थानां ६।॥, वा।१।)।

शृङ्गारस्य हरिस्तृप्तः, पूर्णः शान्तेन शङ्करः।†

३०५। ढ्वे कृत्यव्यक्युकक्तवतुखलर्थक्तोच्छ्रृ-चानवसुशीलार्थतृन्भव्यणार्थेणिनि। (ढ्वे ७।, कृति ७।, अ-व्य कि उक क्तवतु खलर्थ क्त उत् शतृ आन वसु शीलार्थतृन् भव्य-ऋणार्थ-णिनि ७।)।

व्यादिवर्जे कृति प्रयुज्यमाने ढे वे च षी स्यात्।‡

---

* शम्भोरिति। शम्भोः शम्भुना मुकुन्दे विष्णौ जानीते प्रवर्त्तते भक्त इति शेषः, शम्भौ तुष्टे सति मुकुन्दे प्रवृत्तिर्भवतीति शम्भोः साधनत्वम्। धातूनामनेकार्थत्वात् ज्ञाधातुरत्र प्रवृत्त्यर्थः। (८६७) अढादित्यात्मनेपदम्। अज्ञाने किं, भक्त्या शङ्करं जानाति, स्वरेण पुत्रं जानातीत्यादौ न करणे षष्ठी।

† तृप्तिरर्थो येषां ते तृप्त्यर्थाः तेषां, तृप्त्यर्थधातूनां करणे षष्ठी स्याद्वा इत्यर्थः। हरिः शृङ्गारस्य तृप्तः शृङ्गारेण सन्तुष्ट इत्यर्थः, तृप्त इति कर्त्तरि क्तः। पक्षे शङ्करः शान्तेन शान्त्या पूर्णः, पूरधातोः कर्त्तरि क्तः, पूर्त्तिरिह आप्यायनम् अतएव तृप्तिविशेषः। (नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः। नान्तकः सर्व्वभूतानां न पुंसां वाम-लोचना॥) "करणे पूस्तृप्त्यर्थयोः" इति कातन्त्रपरिशिष्टम्। "तृप्त्यर्थस्य च" इति क्रमदीश्वरः।

‡ ढश्च वश्च ढवं तस्मिन्। व्यं—ष्वतुम् क्त्वाच् चणम्। खलः अर्थ इव अर्थो यस्य स खलर्थः, (११६१) ईषद्दुःसोरित्यनेन खल्, (११६२) आतोऽन इत्यनेन अनः, इति द्वयं खलर्थः। उत उकारान्तप्रत्ययः—णुक् इष्णु स्नु क्नु आलु आरु ऊक इत्यादि। शतृ इत्यनेन उपलक्षणत्वात् तुल्यस्य ष्यतुरपि ग्रहणम्। एवं आन इत्यनेन शान कान ष्यमान इत्येषां ग्रहणम्। शीलमर्थो यस्य स शीलार्थः, स चासौ तृन् चेति शीलार्थतृन्; भव्यं भविष्यत्कालः, ऋणं प्रतिदेयतया गृहीतं, भव्यञ्च ऋणञ्च भव्यर्णे, ते अर्थौ यस्य स भव्य-र्णार्थः, स चासौ णिन् चेति भव्यर्णार्थणिन्। ततः व्यञ्च किश्च उकश्च क्तवतुश्च खलर्थश्च क्तश्च उच्च शतृश्च आनश्च वसुश्च शीलार्थतृन् च भव्यर्णार्थणिन् च ते, न विद्यन्ते ते यत्र कृति सः अव्यक्युकक्तवतुखलर्थक्तोच्छ्रृचानवसुशीलार्थतृन्भव्यर्णार्थणिन् तस्मिन्। अव्ययादिभिन्ने

जगतां कारकः कृष्णः कृतिर्मुररिपोरियम्।
ख्यादौ तु——स्रष्टा दधिं ग्रावकमेतदर्च्चकान्
उन्नीतवन्तं, यतिभिः सुदर्शनम्।
ज्ञातं, हरिं, जिष्णुरघानि संस्तुवन्
मुदं दधानोऽर्थितमीयिवान् न कः॥
शं दाता हृत् कदागामी दायी मोक्षमृणं शिवः। *

कृति प्रयुज्यमाने अनुक्ते कर्म्मणि कर्त्तरि च षष्ठी स्यात् न तु उक्ते, उक्ते तु (२८०) प्रथमा स्यादेव। पाणिनिः २।३।६५,६६,७०, वार्त्तिकञ्च।

* कृष्णः जगतां कारकः, करोतीति कृधातोः (६६०) तृन्-णकौ घे इति णकः, अस्य कर्म्मणि जगतामिति षष्ठी। इयं जगदित्यर्थः (विधेयप्राधान्यात् स्त्रीलिङ्गता) मुररिपोः कृतिः, क्रियते या सा इति (११४७) कर्म्मणि क्तिः, कृतेत्यर्थः, अस्य कर्त्तरि मुररिपो-रिति षष्ठी। ख्यादीनामुदाहरणानि स्रष्टेत्यादि—एतत् जगत् स्रष्टा निर्म्माय दधिं धारयन्तं ग्रावकं हिंसन्तञ्च, अर्च्चकान् उन्नीतवन्तम् ऊर्द्ध्वं प्रापितवन्तं, यतिभिर्योगिभिः सुदर्शनम् अनायासदृश्यमानं ज्ञातञ्च, हरिं संस्तुवन्, अघानि पापानि जिष्णुः, मुदं दधानः को जनः अर्थितं वाञ्छितं न ईयिवान् न प्राप्तवान् अपि तु सर्व्वएव ईयिवानि-त्यर्थः। अत्र (११६६) स्रष्टा इत्यव्ययस्य कर्म्मणि एतत् जगदित्यत्र न षष्ठी, एवं कृष्णं द्रष्टुं याति, कृष्णं स्मारं स्मारं नमति। (१११६) दधिं इति किप्रत्ययान्तस्य कर्म्म जगत्, अत्र न षष्ठी। (१११०) ग्रावकमित्यस्य कर्म्म जगत्, अत्र न षष्ठी। (१०५०) उन्नीतवन्तमित्यस्य कर्म्मणि अर्च्चकानित्यत्र न षष्ठी। (११६३) सुदर्शनमित्यस्य, (१०५०) ज्ञातमित्यस्य च कर्त्तरि यतिभिरित्यत्र न षष्ठी। (११०७) जिष्णुरित्यस्य कर्म्मणि अघानीत्यत्र न षष्ठी। एवं दुःखं सहिष्णुः, धनं गृहयालुः, चन्द्रं दिदृक्षुरित्यादि। (११००) संस्तुवन् इत्यस्य कर्म्मणि हरिमित्यत्र न षष्ठी। (१०६६,११००) दधान इत्यस्य कर्म्मणि मुदमित्यत्र न षष्ठी, एवं हरिं स्तोष्यमाण इति। (१०६६) ईयिवान् इत्यस्य कर्म्मणि अर्थितमित्यत्र न षष्ठी। शं कल्याणं दाता कल्याणदानशीलः, मोक्षं ऋणं दायी ऋणवदवश्यदेयमोक्षं दायी शिवः कदा हृत हृदयम् आगामी आगमिष्यतीत्यर्थः। अत्र शीलार्थतृनन्तस्य दाता इत्यस्य शमिति कर्म्मणि न षष्ठी, दायी इत्यस्य ऋणार्थणिनन्तस्य मोक्षमिति कर्म्मणि न षष्ठी, भव्यार्थणिनन्तस्य आगामीत्यस्य हृदिति कर्म्मणि न षष्ठी।

द्विकर्म्मकानु द्वयोरेव कर्म्मणोः षष्ठी, विष्णोर्म्मोक्षस्य याचको भक्त इत्यादि। केचित्तु गौणकर्म्मण्येव, यथा विष्णोर्म्मोक्षं याचको भक्त इत्यादि। तोमरास्तु कर्त्तरि कृति द्विक-

३०६। कामुकसङ्डार्थक्तेन। (कामुक सङ्डार्थ क्तेन ३।)।

कामुकशब्देन वर्त्तमानङयोर्विहितेन क्तेन च योगे ढे घे च षी स्यात्।

यो लक्ष्म्याः कामुको ज्ञातः सतां तस्येदमासितम्। *

३०७। ल्यभावक्तास्त्यणकसढ़े घे वा।

(ल्य—सढ़े ७।, घे ७।, वा।१।)।

ल्ये भावार्थ-क्ते स्त्रीविहितं अं णकञ्च हित्वा अन्यत्र सढ़े घे षी स्याद्वा।

त्वया मम च कृष्णोऽर्च्यः स्नातं स्तुत्र, स यस्य तु।

सृष्टेः कृति-हृति-र्येन, चिकीर्षा यस्य भेदिका॥ †

र्मणां मुख्ये एव षष्ठीं वदन्ति, यथा गां दुग्धस्य दोग्धा गोप इत्यादि, अत्र क्रमदीश्वर-सूत्रम्—'कर्म्मद्वयं दुहादीनामनुक्तं स्यात कृता यदि। कश्चित्तत्र समाचष्टे षष्ठीं प्रधानकर्म्मणि॥'' अत्र वक्तव्यं—क्वचिदव्ययादिकृत्प्रयोगेऽपि प्रयोगानुसारेण कर्त्तृकर्म्मणोः षष्ठी स्यादिति। परसूत्रे द्रष्टव्यौ।

* पूर्व्वसूत्रे उकक्तकृतोः ढे घे च षष्ठीनिषेधात् प्रतिप्रसवमाह परसूत्रद्वयेन। सन् वर्त्तमानकालः, ङम् अधिकरणं, तयोः ङश्च सङ्डे, तौ अर्थौ यस्य स सङ्डार्थः, स चासौ क्तश्चेति सङ्डार्थक्तः, कामुकश्च सङ्डार्थक्तश्च तत्तेन। यः श्रीकृष्णः लक्ष्म्याः कामुकः लक्ष्मीं कामयते, यः सतां ज्ञातः सद्भिर्ज्ञायते, तस्य इदम् आसितं तेनात्र उपविष्टम्। अत्र कामुक इति कमधातोः (१११०) कर्त्तरि उकः, अस्य कर्म्मणि लक्ष्म्या इति षष्ठी। ज्ञात इति (१०९५) वर्त्तमाने क्तः, अस्य कर्त्तरि सतामिति षष्ठी। आसितमिति (१०९४) अधिकरणे क्तः, अस्य कर्त्तरि तस्येति षष्ठी। इह सङ्डक्तेन इत्यनेनैवेष्टसिद्धौ अर्थशब्दग्रहणं ज्ञापयति शीलितादेर्वर्त्तमाने क्तान्तस्यापि (१०९५) कर्त्तरि षष्ठी न स्यात्, तेन शीलितोऽयमनेन, रक्षितोऽयमनेन इत्यादि। एतदेव क्रमदीश्वरेण ''क्वचिन्न स्यात्'' इति सूत्रं प्रकटीकृतम्। पाणिनिः २।३।६७,६८, वार्त्तिकञ्च।

† ल्यप्तव्यादिः, भावे क्तः भावक्तः। अञ्च णकश्च अणकौ, स्त्रियामणकौ स्त्र्यणकौ न विद्येते स्त्र्यणकौ यत्र सोऽस्त्र्यणकः। ढेन सह वर्त्तते योऽसौ सढ़ः, अस्त्र्यणकश्चासौ सढ़श्चेति अस्त्र्यणकसढ़ः। ल्यश्च भावक्तश्च अस्त्र्यणकसढ़श्चेति तस्मिन्। ल्ये प्रयुज्यमाने

३०८ । स्वामीश्वराधिपतिदायादसाक्षिप्रतिभू-प्रसूतकुशलायुक्तनिपुणसाधुसुजर्थैर्नादरे ष्णी च ।

(स्वामि—सुजर्थैः ३॥, नादरे ७।, ष्णी ।१।, च ।१।) ।

भावार्थ-क्ते प्रयुज्यमाने स्त्री-विहितौ अ-णकौ हित्वा अन्यस्मिन् स्त्रीविहिते सकर्म्मके कृति प्रयुज्यमाने च कर्त्तरि षष्ठी स्याद्वा इत्यर्थः। त्वयेत्यादि। हे साधो इत्यूह्यं, त्वया मम च स कृष्णोऽर्च्यः, अर्चधातोः कर्म्मणि वाच्य (९७१) घ्यण्, कर्त्तरि त्वयेति तृतीया, पक्षे ममेति षष्ठी। हि यस्मात् अत्र तीर्थे त्वया मम च स्नातं, स्नाधातो-र्भावे क्तः, त्वया मम च तृतीया-षष्ठ्यौ। यस्य कृष्णस्य सृष्टेः कृतिः करणं, येन सृष्टेः हृतिः हरणं, कृतिः हृतिश्च कृहृधातुभ्यां भावे (११४७) क्तिः, अस्य कर्त्तरि यस्येति षष्ठी, पक्षे येनेति तृतीया। उभयत्र सृष्टेरिति कर्म्मणि (३०५) षष्ठी। एवं (११४८) हानिः सुखानां दरिद्रस्य दरिद्रेण, (११५०) परिचर्य्या गुरोः शिष्यस्य शिष्येण, (११५८) वर्णना विष्णोः भक्तस्य भक्तेन इत्यादि। सट् इति किं, साधोर्वृद्धिरित्यादौ कर्त्तरि पूर्व्वेण (३०५) नित्यं षष्ठी। अस्त्र्यणक इति किं. यस्य कृष्णस्य सृष्टेश्चिकीर्षा कर्त्तुमिच्छा, भेदिका च भेदनं नाश इति यावत्। चिकीर्षेति सनन्तकृधातोः (११५३) स्त्रीविहितः अप्रत्ययः। भेदिकेति (९९०) स्त्रीविहितो णकप्रत्ययः। उभयत्र यस्येति कर्त्तरि (३०५) नित्यं षष्ठी। एवं (११५५) इच्छा मुक्तेस्तपस्विनः, (११५६) कथा कृष्णस्य भक्तानामित्यादि। पाणिनिः २।३।७१, वार्त्तिकद्वयञ्च। अत्र अस्त्र्यणकसट इत्यस्य व्याख्यान्तरे कृते (स्त्री-विहितौ अ-णकौ हित्वा अन्यस्मिन् स्त्रीविहिते अस्त्रीविहिते वा सकर्म्मके कृति प्रयुज्यमाने) "शेषे विभाषा" इति वार्त्तिकानुसारेण शब्दानामनुशासनमाचार्य्येण आचार्य्यस्य वा इति सिध्यति।

कर्म्मणि कर्त्तरि च षष्ठीविधाने वक्तव्यमेतत्—

> अस्त्रीविहित-कृद्भिस्तु योगे षष्ठी नियम्यते (कर्म्मणीति शेषः)।
> एकदा तूभयप्राप्तौ कर्म्मण्येव न कर्त्तरि (पाणिनिः २।३।६६)।
> तव्यादीनां प्रयोगे तु द्वयोरेव हि नेष्यते ॥
> कर्त्तुर्विभाषया केचित् (पाणिनिः २।३।७१) कर्म्मणोऽपि तथेष्यते।
> प्रधाने नियता षष्ठी गुणे तूभयथा भवेत् ॥

यथा वेदस्य पाठश्छात्रेण, ग्रामस्य गमनं पान्थेन इत्यादि। कर्म्मणोऽध्याहारेऽपि न कर्त्तरि, यथा भोजनमनेन इत्यादि। तव्यादौ तु याचितव्यः कृष्णो भोगं भक्तेन (भक्तस्य वा) इत्यादि। द्विकर्म्मकस्थले तु यत्र कृता द्वे कर्म्मणी अनुक्ते तत्र द्वयोरपि षष्ठी, केचित् मुख्ये एव, केचिच्च गौणे एव, अतः प्रयोगानुसारेणैव ज्ञेयमिति निष्कर्षः।

कां दिशं वा न गन्तव्यं, सभां वा न प्रवेष्टव्यं, इत्यादौ कर्म्मणि विद्यमानेऽपि भावे क्तप्रत्ययः स्यादिति भाष्यादीनां मतम्।

स्वामी मुकुन्दः सर्व्वेषां, साक्षी सर्व्वेष्वधोक्षजः ।
निश्यक्ष्णस्त्रिरगुर्गोप्योऽपत्ये मातृरुदत्यजम् ॥ *

३०६ । कालभावाधारं ङं भी ।

(काल-भाव आधारं १।, ङं १।, भी ।१।) ।

एते ङसंज्ञाः स्युः, तत्र भी । †

---

* सुचोऽर्थो वारः, सुचोऽर्थ इव अर्थो यस्य स सुजर्थः । वारार्थेनैवेष्टसिद्धौ सुजर्थ-ग्रहणं सुजर्थप्रत्ययान्तानां प्राप्त्यर्थम् । अन्यथा वारादिशब्दैरपि षष्ठीसप्तम्यापत्तिः । सुजर्थ-प्रत्ययश्च चक्त्वस् सुच् (४८४,४८५) इति द्वयम् । "धाच्प्रत्ययोऽपि क्त्वसर्थ." इति गोयी-चन्द्रः । स्वामी च ईश्वरश्च अधिपतिश्च दायादश्च साक्षी च प्रतिभूश्च प्रसूतश्च कुशलश्च आयु-क्तश्च निपुणश्च साधुश्च सुजर्थश्च ते तैः । न आदरो नादरस्तस्मिन् स्वाम्यादिभिरेकादशभिः शब्दैः चक्त्वस्-सुजन्ताभ्याञ्च योगे, षष्ठी-सप्तम्यौ स्यातां, अनादरे गम्यमाने च षष्ठी-सप्तम्यौ स्यातामित्यर्थः । मुकुन्दः सर्व्वेषां स्वामी, सर्व्वेष्विति च । अधोक्षजः (अधोगतम् अक्षजमिन्द्रियजन्यं ज्ञानं यस्मात् सः) सर्व्वेषु साक्षी, सर्व्वेषामिति च । एवं कृष्णः सर्व्वेषां सर्व्वेषु च ईश्वरः, सर्व्वेषां सर्व्वेषु च अधिपतिः । स्वामीश्वराधिपतीनामेकार्थत्वेऽपि पृथग्ग्रहणात् तत्पर्य्यायभूतशब्दान्तरेण योगे न स्यात्, तेन कृष्णः सर्व्वेषां पतिरित्यादौ सम्बन्धे षष्ठ्येव, न तु सप्तमी । एवं, कृष्णः यादवेषु यादवानां वा दायादः ज्ञातिरित्यर्थः । चैत्रो मैत्रे मैत्रस्य वा प्रतिभूः लग्नक इत्यर्थः । कृष्णो यादवे यादवस्य वा प्रसूतः जात इत्यर्थः । कुशलायुक्ताभ्यां योगे तत्परत्वे एव, (आसेवायामिति पाणिनिः, तात्पर्य्ये इति भट्टोजिदीक्षित-क्रमदीश्वरौ) यथा छात्रः पाठे पाठस्य वा कुशलः आयुक्तो वा तत्पर इत्यर्थः । अन्यत्र कलासु कुशलः सुशिक्षित इत्यर्थः, रथे आयुक्तः बद्ध इत्यर्थः, इत्यादिषु सप्तम्येव । एवं निपुणसाधुभ्यां प्रशंसायामेव । अत्र "अप्रत्यादिभिरिति वक्तव्यम्" —तेन साधुर्निपुणो वा मातरं प्रति, परि, अनु वा । सुजर्थैः कालाधिकरणादेव. (अतएव "क्त्वसर्थैः कालादधिकरणात्" इति क्रमदीश्वरसूत्रम्) । यथा—गोप्यः, अपत्ये रुदति, मातुः रुदत्याश्च, रुदत् अपत्यं रुदतीं मातरञ्च अनादृत्येति शेषः, निशि त्रिः अह्नः त्रिः त्रिवारामित्यर्थः, अजं कृष्णं अगुः प्रापुः । त्रिरिति (४८५) सुच्प्रत्ययः । अगुरिति इणधातोः ग्या अन् (६८२,६७५) । एवं दिने दिनस्य वा पञ्चकृत्वः पठतीत्यादि । कालाधिकरणात् किं, गृहे द्विर्भुङ्क्ते । पाणिनिः २।३।३८—४०,४३, भाष्यञ्च ।

† कालश्च भावश्च आधारश्च तेषां समाहारः । ङम् अधिकरणं, भी सप्तमी । कालः

सामीप्याश्लेषविषयैर्व्याप्त्याधारश्चतुर्व्विधः ।
रेमे शरदि गोविन्दो गोपीभिरुदिते विधौ ।
कालिन्द्यां, कानने, केलौ कुशलः, सकले स्थितः ॥ *

३१० । अधिकेशार्थोपाधिभ्याम् ।

(अधिक-ईश-अर्थ-उप-अधिभ्यां ३॥) ।

अधिकार्थेनोपेन स्वाम्यर्थेनाधिना च योगे सी स्यात् ।
गुणा उप परार्द्धे, स्युर्विष्णोरधि हरौ सुराः । †

षण्दण्डमुहूर्त्तादिः । भावो धात्वर्थः, यस्य क्रियानन्तरं क्रियान्तरं लक्ष्यते स इह भावः । "तद्वैपरीत्ये च" इति वार्त्तिकम् । पाणिनिः २।३।७ ३६,३७ ।

* आध्रियते पदार्थोऽस्मिन् इति आधारः, (आध्रियन्तेऽस्मिन् क्रियाः इति आधारः इति काशिका) । यदुक्तं—कर्त्तृकर्म्मव्यवहितामसाक्षात् धारयत् क्रियाम् । उपकुर्व्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम् ॥ इति हरिकारिका । स तु चतुर्व्विधः, यथा—सामीप्येति । समीपस्य भावः सामीप्यम्, आश्लेष एकदेशसम्बन्धः, विषयः प्रतिपाद्यादिः, व्याप्तिः सरकर्थेन सम्बन्धः । (सिद्धान्तकौमुद्यान्तु "औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा" इति लिखितम् ।) क्रमेणोदाहरति रेमे इति—गोविन्दः शरदि शरत्काले, विधौ चन्द्रे उदिते सति विधोरुदयक्रियानन्तरमित्यर्थः, विधौ इति भावे सप्तमी, उदिते इति तद्विशेषणत्वात् सप्तमी । यदुक्तं—विशेष्यस्य हि यल्लिङ्गं विभक्तिवचने च ये । तानि सर्व्वाणि योज्यानि विशेषणपदेऽपि चेति ॥ कालिन्द्यां कालिन्दीसमीपे लक्षणया तीरे इत्यर्थः, कानने काननैकदेशे, गोपीभिः (सह) रेमे क्रीड़ितवान् । गोविन्दः कीदृशः—केलौ क्रीड़ाविषये कुशलः समर्थः, सकले जगति स्थितः सकलं व्याप्य स्थित इत्यर्थः ।

† अधिकश्च ईशश्च तौ अर्थौ ययोः तौ अधिकेशार्थौ, उपश्च अधिश्च तौ उपाधी, अधिकेशार्थौ च तौ उपाधी चेति ताभ्याम् । स्वाम्यर्थेनेत्यस्य उभयार्थत्वं स्वस्वामित्वसम्बन्धस्य उभयनिष्ठत्वात्,—तथाच अधिना योगे यस्य परिवारस्तस्मात् यस्य स्वामी तस्माच्च सप्तमी स्यादित्यर्थः गुणा इति—विष्णोर्गुणाः परार्द्धे उप स्युः परार्द्धादधिका असङ्ख्या इत्यर्थः । परार्द्धं चरमसङ्ख्या,—तथाचोक्तम्, एकं दश शतञ्चैव सहस्रमयुतं तथा । लक्षञ्च नियुतञ्चैव कोटिरर्ब्बुदमेव च ॥ वृन्दः खर्व्वो निखर्व्वश्च शङ्खपद्मौ च सागरः । अन्त्यं मध्यं परार्द्धञ्च दशवृद्ध्या यथोत्तरमिति ॥ सुरा देवाः हरौ अधि हरेः परिवारा इत्यर्थः, एवम् अधि सुरेषु हरिरित्यपि, हरिः सुराणां स्वामीत्यर्थः । पाणिनिः १।४।९८ ।

३११। ढेनार्थात्। (ढेन ३।, अर्थात् ५।)।

ढेन योगे निमित्तात् मी स्यात्।

वस्त्रेषु रजकमवधीत् कृष्णः। *

३१२। क्तेना ढे। (क्तेना ३।, ढे ७।)।

क्तादिष्विह्नितेन इना योगे ढे मी स्यात्। वेदेऽधीती। †

३१३। निर्द्धारेऽधिकेन क्रियान्तःकालाध्वनोश्च पौ च। (निर्द्धारे ७।, अधिकेन ३।, क्रियान्त:कालाध्वनो: ७॥, च।१।, पौ।१।, च।१।)।

श्रेष्ठं कृपालुष्वकार्दिः रुद्रैकादशकेऽधिकम्।
मूर्त्यष्टकात्, शिवं ध्यायन्, भुञ्जीथा द्व्यह्नि वा त्र्यहात्॥
भूस्थो योजनलक्षेऽर्कं पश्येल्लक्षद्वयात् विधुम्। ‡

---

* अर्थो निमित्तम्। क्रियाया निमित्तं यदि कर्म्मणा संयुक्तं स्यात् तदा तस्मात् निमित्तात् सप्तमी स्यादित्यर्थः। अवधीदिति क्रियाया निमित्तस्य वस्त्रस्य हननक्रिया-कर्म्मणा रजकेन सह संयोगात् वस्त्रेषु इति सप्तमी। एवं, चर्म्मणि द्वीपिनं हन्ति, दन्तयोर्हन्ति कुञ्जरम्। केशेषु चमरीं हन्ति, सीम्नि पुष्पलको हतः॥ इति महानाटके। (सीमा अण्डकोषः, पुष्पलको गन्धमृगः)। कौशेये द्वीपिनं हन्ति इत्यादौ कर्म्मणा संयोगाभावात् न सप्तमी। मुक्ताफलाय करिणमित्यादौ तु, तादर्थ्ये चतुर्थी (२९४)। "निमित्तात् कर्म्मयोगे" इति वार्त्तिकम्।

† क्तादिम् क्तेन् तेन क्तेना। अधीतीति अधीतमध्ययनम् अस्यास्तीति अधीती, अस्य योगे वेदे इति कर्म्मणि सप्तमी। एव कृती श्रुतो व्रतमतेषु धीमानिति भट्टि.। क्तादव्यव-हितेन इना योगे एवायं विधिः, तेन कृतञ्च तत् पूर्व्वञ्चेति कृतपूर्व्वं तदस्यास्तीति कृत-पूर्व्वी, कटं कृतपूर्व्वी, वेदमधीतपूर्व्वी इत्यादौ न स्यात्। किञ्च मुख्ये कर्म्मण्येवायं विधिः, तेन मासमधीतीत्यादौ न स्यात्। "क्तस्येन् विषयस्य कर्म्मण्युपसंख्यानम्" इति वार्त्तिकम्।

‡ क्रिययोरन्तः क्रियान्तः (मध्यं), कालश्च अध्वा च तौ कालाध्वानौ, क्रियान्तश्च तौ कालाध्वानौ चेति तयोः। जातिगुणक्रियाणामुत्कर्षेणापकर्षेण वा सजातीयात् पृथक्-

३१४। सीमान्तमार्गात् प्री चान्ते।

(सीमान्तर-मार्गात् ५।, प्री ।१।, च ।१।, अन्ते ७।)।

सोमनाथाच्छतं क्रोशाः कृष्णः क्रोशेषु चायुते।
गङ्गायमुनयोर्मध्ये कति क्रोशाश्च जाह्नवी॥ *

करणं निर्द्धारः। कालः क्षणदण्डमुहूर्त्तप्रहरादिः। अध्वपरिमाणं नल्वक्रोशादिः निर्द्धारे गम्यमाने, एवम् अधिकशब्देन योगे, तथा क्रियाद्वयमध्यवर्त्तिनि काले अध्वनि च पञ्चमी-सप्तम्यौ स्यातामित्यर्थः। उदाहरणं—कृपालुषु अर्कादिषु श्रेष्ठं, रुद्रैकादशके मूर्त्त्यष्टकाच्च अधिकं शिवं ध्यायन् द्व्यह्नि त्र्यहाद्वा भुञ्जीथाः, हे साधो इति शेषः। अत्र निर्द्धारे कृपालुषु अर्कादिषु इति सप्तमी-पञ्चम्यौ, (३०२) षष्ठी च भविता। काकात् कोकिलः कृष्णः इत्यादि निर्द्धारणे पञ्चम्येव, नतु षष्ठी-सप्तम्यौ इति वक्तव्यम्। रुद्रैकादशके मूर्त्त्यष्टकाच्च इति अधिकशब्देन योगे सप्तमी-पञ्चम्यौ, द्व्यह्नि त्र्यहाद्वा इति ध्यानक्रिया भोजनक्रिययोर्मध्यवर्त्तिनः कालात् सप्तमी-पञ्चम्यौ। जन. भूस्थः सन् योजनलक्षे अर्कं पश्येत्, लक्षद्वयात् विधुं पश्येदिति, अत्र भूस्थितिक्रिया-दर्शनक्रिययोर्मध्यवर्त्तिनि अध्वनि योजनलक्षे लक्षद्वयादिति च सप्तमी-पञ्चम्यौ। (एकादशानां समूहः एकादशकं रुद्राणामेकादशकं रुद्रैकादशकं तस्मिन्। अष्टानां समूहोऽष्टकं मूर्त्तीनामष्टकं मूर्त्त्यष्टकं तस्मात्। द्वयोरह्नोर्भवः काल इति तद्धितार्थद्विगौ द्व्यह्नः, ततः सप्तमी विभक्तौ (११८) द्व्यह्नि। त्रयाणामह्नां समाहारः त्र्यहस्तस्मात्। भुवि तिष्ठतीति भूस्थः।) पाणि॰ २।३।७,२।३।४१,४२।

* सीम्नोरन्तः, स चासौ मार्गश्चेति सीमान्तमार्गस्तस्मात्। मार्गोऽध्वपरिमाणं क्रोशयोजनादिः। सीमाद्वयमध्यवर्त्तिमार्गपरिमाणवाचकात् शब्दात् अन्ते गम्यमाने प्रथमा, चकारात् सप्तमी च स्यादित्यर्थः। अन्तगम्यमानाभावे तु केवलं प्रथमा स्यादित्यर्थश्च वक्तव्यः। सोमनाथात् शतं क्रोशाः कृष्णः, शतक्रोशान्ते वर्त्तते इत्यर्थः; एवम् अयुते क्रोशेषु च, अयुत-क्रोशान्ते च वर्त्तते इत्यर्थः। अत्र सोमनाथकृष्णयोः सीम्नोर्मध्यवर्त्तिमार्गात् शतं क्रोशाः इत्यस्मात् अन्ते गम्यमाने प्रथमा, अयुते क्रोशेषु च इत्यस्मात् सप्तमी च। शतमिति अयुते इति च बहुवचनविशेषणेऽपि अभिधानादेकत्वं, विंशत्याद्याः सदैकत्वे सर्व्वाः सङ्ख्येयसङ्ख्ययोरित्यमरात्। अन्ते किं—गङ्गायमुनयोर्मध्ये जाह्नवी कति क्रोशाः, कति क्रोशान् व्याप्य तिष्ठतीत्यर्थः, अत्र केवलं प्रथमा। द्वितीयार्थाकरणे अत्र (२८३) द्वितीया भवितुमर्हति। हिमालयमारभ्य आ समुद्रात् गङ्गा यत्र च देशे जह्नुमुनिना पीतोज्झिता तत आरभ्य आ समुद्रात् जाह्नवीति गङ्गायाः नामान्तरम्। जाह्नव्या मध्यदेशे यमुना मिलितेति। वार्त्तिकं भाष्यञ्च।

३१५। त्र्यादयोऽर्थार्थैकक्तेः स्वेस्तु सर्व्वाः।

(त्री आदयः १।।।, अर्थार्थैकक्तेः ५।, स्वेः ५।, तु ।१।, सर्व्वाः १।।।)।

अर्थार्थैकक्ते लेः त्र्यादयः स्युः, स्वेस्तु सर्व्वाः।

भुक्त्यार्थेनार्थस्य मुक्तेः किं कार्य्यं नार्च्यतेऽच्युतः। *

३१६। संज्ञाः कं। (संज्ञाः १।।।, कं १।)।

ढ ध घ भ ज ड़ाः कसंज्ञाः स्युः। †

इति कपादः।

---

* त्री आदिर्यासां ताः, अर्थो निमित्तं, स एव अर्थोऽभिधेयो यस्य सोऽर्थार्थः, एका (अभिन्ना) क्तिर्यस्मात् स एकक्तिः, अर्थार्थेन सह एकक्तिः अर्थार्थैकक्तिस्तस्मात्। निमित्तार्थलिङ्गस्य विशेषणात् लिङ्गात् तृतीयादयः पञ्च विभक्तयः स्युः, तादृशात् सर्व्वनाम्नस्तु सर्व्वाः प्रथमादयः स्युरित्यर्थः। भुक्त्या अर्थेन मुक्तेरर्थस्य अच्युतोऽर्च्यते पूज्यते, किं कार्य्यं न अर्च्यते अपि तु सर्व्वस्मै कार्य्याय, जनैरिति शेषः। अत्र निमित्तार्थस्य अर्थशब्दस्य विशेषणात् भुक्त्या इति तृतीया, मुक्तेरिति षष्ठी, एवं मुक्त्यै अर्थाय, मुक्तेरर्थात, मुक्तौ अर्थे इत्यपि। किं कार्य्यमित्यत्र कार्य्यमित्यस्य निमित्तार्थस्य विशेषणात् किमित्यस्मात् सर्व्वनाम्नः प्रथमा, एवं द्वितीयादिकमपि। एवं हेतुकारणनिमित्तादिशब्द-विशेषणादपि—तथाच अल्पस्य हेतोर्बहु हातुमिच्छन्निति रघुः। भाष्यम्।

† अस्मिन् पादे या या संज्ञा उक्ता सा कसंज्ञा स्यात्। ताः संज्ञाः—ढ ध घ भ ज ड़ा इति। कर्म्मकरणकर्त्तृसम्प्रदानापादानाधिकरणानामेकतमं कारकमिति यावत्। करोति कर्त्तृत्वादिव्यपदेशानिति कारकमिति भाष्यम्। "क्रियानिमित्तं कारकम्" इति दुर्गसिंहः पद्मनाभश्च। क्रियान्वयित्वं कारकत्वमित्यपि कश्चित्। चैत्रस्य धनमित्यादौ धनादिकमेव आकाङ्क्षितं स्यात् न तु गच्छतीत्यादिकं, तेन सम्बन्धस्य क्रियानिमित्तत्वाभावान्न कारकत्वम्, एवं लिङ्गार्थसम्बोधनयोरपि। गृहे प्रविशतीत्यादौ गृहादेः कर्म्मतया द्वितीयाप्राप्तौ अधिकरणविवक्षया सप्तमी, विवक्षावशाद्धि कारकाणि भवन्तीति न्यायात्। एवं महाकविप्रयोगादयो विवक्षया समाधानीयाः, स्थितेर्गतिश्चिन्तनीयेति न्यायात्। तेन स्वेच्छया ग्रामे गच्छतीत्यादिप्रयोगो न कर्त्तव्य इति साम्प्रदायिकाः। उभयोर्युगपत् प्राप्तौ तु—कर्त्ता कर्म्माधिकरणं करणं सम्प्रदानकम्, अपादानञ्च सन्देहे परं पूर्व्वेण बाध्यते इति वचनात् व्यवस्था। यथा, पश्य मृगो धावतीत्यादि। एवं क्रम-

दीश्वरोऽपि—अपादान सम्प्रदान करणाधारकर्म्मणाम्। कर्त्तुश्चान्योन्यसन्देहे परमेकं प्रवर्त्तते॥ इति।

अत्र वक्तव्यानि सूत्राणि लिख्यन्ते—

१। "जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्" (पाणिनिः १।२।५८)। जातिप्रतिपादने एकोऽपि जातिरूपोऽर्थो बहुवद्वा स्यात्। यथा ब्राह्मणः पूज्यः, ब्राह्मणाः पूज्याः। अत्र असंख्याप्रयोगे इति वक्तव्यम्। यथा पद्मनाभः—"जात्यर्थे वैकस्मिन् बहुवचनमसंख्याप्रयोगे" (कारकप्रकरणे ३७ सूत्रम्)। क्रमदीश्वरोऽप्येवम्—"जात्युक्तावसंख्याविशिष्टस्यैकत्वे" (कारकपादे ४८ सूत्रम्)।

२। "अस्मदो द्वयोश्च" (पाणिनि. १।२।५९)। अस्मद एकत्वे द्वित्वे च बहुवद्वा स्यात्। यथा अहं ब्रवीमि, आवां ब्रूवः इत्यादौ वयं ब्रूमः। अविशेषणादिति वाच्यम्। यथा पद्मनाभः—"अस्मदो द्वयोश्चाविशेषणात्" (कारकप्रकरणे ३८ सूत्रम्)। एवं क्रमदीश्वरः यथा—"अस्मदोऽविशेषणस्य द्वित्वे च" (कारकपादे ४९ सूत्रम्)। यथा कविरहम्।

३। "युष्मदो गुरुविशेषणस्य" (संक्षिप्तसारे कारकपादे ५० सूत्रम्)। "युष्मदो गौरवे" (सुपद्मे कारकप्रकरणे ३९ सूत्रम्)। यथा त्वं मे गुरुः, यूयं मे गुरवः। एवमेव तयादित्यः, यथा, "युष्मदि गुरावेकेषाम्" इति।

४। "अन्यत्र च गौरवे" (संक्षिप्तसारे कारकपादे ५१ सूत्रम्)। यथा जीवत्सु तातपादेषु।

५। "विंशत्यादेरनावृत्तौ बहुत्वेऽप्येकवचनम्" (संक्षिप्तसारे कारकपादे ४४ सूत्रम्)। एवं सुपद्मेऽपि "विंशत्यादेरेकत्वमनावृत्तौ" (कारकप्रकरणे ३९ सूत्रम्)। यथा विंशतिः पुरुषाः। आवृत्तौ तु द्वे विंशती नराणाम्।

६। "दारादेर्नित्यम्" (सुपद्मे कारकप्रकरणे ४२ सूत्रम्)। "आपो दारा वर्षाः सिकता जलौकस इत्यादेरबहुत्वेऽपि बहुवचनम्" (संक्षिप्तसारे कारकपादे ४५ सूत्रम्)। "पुंसि गृहाश्च" "सुमनोऽप्सरोवल्लजादेर्वा" (पूर्व्वोक्ते ४६, ४७ सूत्रे)।

७। "फल्गुनी-प्रोष्ठपदानाञ्च नक्षत्रे" (पाणिनिः १।२।६०)। पूर्व्वफल्गुन्य इत्यत्र द्वित्वे बहुत्वम्। तिष्यपुनर्वसू इत्यत्र तु बहुत्वे द्वित्वम् (पाणिनिः १।२।६३)।

३१७। दैक्यं सोऽन्वये। (दैक्यं १।, सः १।, अन्वये ७।)।

द्वयोर्बहूनां वा दानामैक्यं स-संज्ञं स्यात्। तच्चान्वये सति कार्य्यम्। यथा—वन्द्यौ चरणौ कृष्णस्य इत्यर्थे, कृष्णचरणौ वन्द्यौ इति स्यात्, नतु कृष्णवन्द्यौ चरणाविति। *

३१८। भिन्नान्यैकार्थद्व्यादिसङ्ख्याव्यादीनां च-ह-य-ष-ग-वाः। (भिन्न—व्यादीनां ६।।।, च—वाः १।।।)।

भिन्नार्थानां दानां स-चसंज्ञः, अन्यार्थानां दानां हसंज्ञः,

---

* स्यादीनामर्थान् निरूप्य स्याद्यन्तानामेकपदीकरणार्थमाह—दैक्यमिति। दश्च दश्च ते दे, दश्च दश्च दश्च तानि दानि, दे च दानि च तानि दानि, दानामैक्यं दैक्यम्, ऐक्यम् एकता। दं पदं, तच्च स्याद्यन्तमेव। तथाच—"नाम्नां समासो युक्तार्थः, तत्स्था लोप्या विभक्तयः" इति सर्व्ववर्म्मा। नाम्नां स्याद्यन्तलिङ्गानामित्यर्थः। "समर्थः पदविधिः" इति पाणिनिः (२।१।१)। "समर्थानां समासः" इति पद्मनाभः। "समासोऽनेकपदस्यैकपदत्वता" इति क्रमदीश्वरवृत्तिः। प्रणमतीत्यादौ समासस्तु (५४८) व्यस्य ग्यनुकारेत्यादिविध्यन्तरात भवति। द्वयोः पदयोः बहूनां वा पदानाम् ऐक्यम् एकपदीकरणं ससंज्ञं स्यादित्यर्थः। सः समासः। तच्च ऐक्यम् अन्वये सति कर्त्तव्यमिति। अन्वयः अभिप्रेतसम्बन्धः, स च क्वचित् विशेष्यरूपेण, क्वचित् विशेषणरूपेण, द्वन्द्वे तु सर्व्वेषां विशेष्याणां साहित्यरूपेण अन्वयः। कृष्णचरणौ इत्यत्र अवयवावयविभावः सम्बन्धः। कृष्णस्य इत्यस्य वन्द्यौ इत्यनेन सम्बन्धाभावात् न कृष्णवन्द्यौ इति समासः। यदा तु कृष्णेन वन्द्यौ कस्यचित् चरणौ इत्यर्थो भवति, तदा कर्त्तृत्वसम्बन्धेन कृष्णवन्द्यौ इति स्यादेव।

किञ्च यत्र प्रतियोगिपद-कारकपद-भिन्नपदापेक्षा वर्त्तते तत्र समासो न स्यात्, यथा—ऋद्धस्य राज्ञो मातङ्गाः इत्यत्र ऋद्धस्य राजमातङ्गा इति न स्यात्। यत्र च प्रतियोगिपदकारकपदयोरपेक्षा वर्त्तते तत्र स्यादेव, यथा—रामस्य नाममहिमा, कृष्णमाश्रितमनाः, वाणेन निष्कृष्टय इत्यादिः स्यादेव। तथाच—प्रतियोगिपदादन्यत् यदन्यत् कारकादपि, वृत्तिशब्दैकदेशस्य सम्बन्धस्तेन नेष्यते इति, सापेक्षत्वेऽपि गमकत्वात् समास इति, समस्तस्यासमस्तेन नित्यापेक्षेण सङ्गतिरिति च प्राञ्चः। एवञ्च नित्योऽनित्यो

एकार्थानां दानां यसंज्ञः, द्व्यादिक्त्यन्तपूर्व्वदानां षसंज्ञः, सङ्ख्यापूर्व्वदानां गसंज्ञः, व्यपूर्व्वदानां वसंज्ञः, स्यात्। *

विकल्पश्च समासः कर्त्तुरिच्छयेति। समासः चतुर्विधः—"पूर्व्वपदार्थप्रधानोऽव्ययीभावः, उत्तरपदार्थप्रधानस्तत्पुरुषः, अन्यपदार्थप्रधानो बहुव्रीहिः, उभयपदार्थप्रधानो द्वन्द्वः। इति प्राचां प्रवादः।" "तत्पुरुषविशेषः कर्म्मधारयः, तद्विशेषो द्विगुः। अनेकपदत्वं द्वन्द्वबहुव्रीह्योरेव, तत्पुरुषस्य क्वचिदेव।" इति सिद्धान्तकौमुदी। हरिणा तु "सुपां सुपा तिङा नाम्ना धातुनाथ तिङां तिङा। सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः॥" इति सूत्रे षड्विधमेव समासमाचष्टे। पाणिनिः २।१।१।

* भिन्नश्च अन्यश्च एकश्च ते, ते अर्था येषां तानि भिन्नान्यैकार्थानि। द्वौ (द्वितीया) आदिर्यासां ता द्व्यादयः, तासाञ्च केवलानामसम्भवात् तदन्ता एव गृह्यन्ते। द्व्यादयश्च सङ्ख्या च व्यश्च द्व्यादिसङ्ख्याव्यानि, तानि आदयो येषां तानि। भिन्नान्यैकार्थानि च द्व्यादिसङ्ख्याव्यादीनि च तेषाम्। चश्च हश्च यश्च षश्च गश्च वश्च ते।

सञ्ज्ञि-सञ्ज्ञानां समसङ्ख्यात्वात् यथासङ्ख्यं दर्शयति भिन्नार्थानामित्यादि। भिन्नार्थानां पृथक्पृथगभिधेयानां पदानां समासः चसंज्ञः स्यात्। चो द्वन्द्वः। हरिहरावित्यादौ अभेदः शिवरामयोरित्यादिवचनात् वस्तुतः पदार्थयोरभेदेऽपि, भेदविवक्षया द्वन्द्वः। अत एव विनायके विघ्नराजद्वैमातुरगणाधिपा इत्यादिप्रयोगः। पदार्थतावच्छेदकभेदादित्येके। पदजन्यप्रतिपत्तिविषयभेदादिति च केचित्। एवमेव गोयीचन्द्रः—"शब्दप्रतिपाद्यसम्बन्धमात्रे एव परस्परापेक्षा गृहीतव्या" इति। किञ्च द्वन्द्वः सर्व्वपदार्थप्रधानोऽपि परपदस्यैव लिङ्गं भजतीति यथा—घटश्च फलञ्च घटफले, फलञ्च घटश्च फलघटौ, स्त्री च पुत्रौ च स्त्रीपुत्रा इत्यादि। सिद्धान्तकौमुद्यां "समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः" इति चकारार्थौ दर्शितः। "परस्परनिरपेक्षस्यानेकस्य एकस्मिन्नन्वयः समुच्चयः, अन्यतरस्यानुषङ्गिकत्वेऽन्वाचयः, मिलितानामन्वयः इतरेतरयोगः, समूहः समाहारः।" पाणिनिः २।२।२९।

अन्यार्थानां समस्यमानपदात् भिन्नार्थानां पदानां समासः हसंज्ञः, हो बहुव्रीहिः। स तु सर्व्वपदार्थाप्रधानः। स च द्विविधः—तद्गुणसंविज्ञानोऽतद्गुणसंविज्ञानश्च। यत्र समस्यमानपदार्थः समासवाच्ये वर्त्तते स तद्गुणसंविज्ञानः, यथा त्रिलोचनः शिवः। तदन्योऽतद्गुणसंविज्ञानः, यथा हतकंसः कृष्णः। अस्यापरौ भेदौ यथा—समानाधिकरणो भिन्नाधिकरणश्च; पीताम्बर इत्यादौ सामानाधिकरण्यम्, शस्त्रपाणिरित्यादौ भिन्नाधिकरणत्वम्। पाणिनिः २।२।२३,२४।

एकार्थानां समानाधिकरणानां विशेष्य-विशेषण-भावापन्नानामिति यावत् पदानां समासः यसंज्ञः, यः कर्म्मधारयः। पाणिनिः १।२।४२।

३१९। त्रोर्लुक् त्ये च। (त्रोः ६।, लुक् ।१।, त्ये ७।, च ।१।)।

से स्थितायाः त्रोर्लुक् स्यात्, त्ये च परे। *

द्वितीयादिविभक्त्यन्तपदपूर्व्वकाणां पदानां समासः षसंज्ञः, षस्तत्पुरुषः, स चोत्तरपदप्रधानः। पाणिनिः २।१।२२।

सङ्ख्यापूर्व्वपदानां तस्यार्थे इत्यादि वक्ष्यमाणनियमात् तद्धितार्थे समाहारे उत्तरपदे परे च सङ्ख्यावाचकपदपूर्व्वकाणां पदानां समासो गसंज्ञः, गो द्विगुः। तद्धितार्थे उत्तरपदे परे च द्विगुरुभयपदार्थप्रधानः, समाहारद्विगुरुत्तरपदप्रधानः। पाणिनिः २।१।५२।

व्यपूर्व्वदानां—वः कथामीप्येत्यादि नियमात् कारकाद्यर्थे अव्ययपदपूर्व्वकाणां पदानां समासो वसंज्ञः, वोऽव्ययीभावः, स च पूर्व्वपदप्रधानः। पाणिनिः २।१।५,६।

अत्र कातन्त्रोक्तं छन्दोबद्धं समासविवरणं प्रदर्श्यते—

पदे तुल्याधिकरणे विज्ञेयः कर्म्मधारयः।
संख्यापूर्व्वो द्विगुरिति ज्ञेयः, तत्पुरुषावुभौ॥
विभक्तयो द्वितीयाद्या नाम्ना परपदेन तु।
समस्यन्ते समासो हि ज्ञेयस्तत्पुरुषः स च॥
स्यातां यदि पदे द्वे तु यदि वा स्युर्बहून्यपि।
तान्यन्यस्य पदस्यार्थे बहुव्रीहिः—विदिक् तथा॥
द्वन्द्व. समुच्चयो नाम्नोर्बहूनां वापि यो भवेत्।
अल्पस्वरतरं तत्र पूर्व्वं यच्चार्चितं द्वयोः॥
पूर्व्वं वाच्यं भवेद्यस्य सोऽव्ययीभाव इष्यते।
स नपुंसकलिङ्गं स्यात् द्वन्द्वैकत्वं तथा द्विगोः॥

* सर्व्वसमासेषु स्थितायाः स्यादेः त्रोर्लुक् स्यात्, सर्व्वप्रत्ययेषु परेषु च स्यादेर्लुक् स्यादित्यर्थः। समासे यथा—हरिहरौ, पीताम्बरः, परमात्मा, कृष्णाश्रितः, पञ्चगुः, उपकृष्णम्। प्रत्यये यथा—श्रीमान्, पुत्रकाम्यति, वाचिकं, क्षत्रियः, माथुरः, ह्रैमः, ग्राम्यम्, इत्यादौ प्रथमादेर्लुक्। किञ्च तत्रत्यः सार्व्वत्रिकः इत्यादौ त्रादेशस्य लोपाभावस्तु स्यादिप्रकरणं हित्वा तद्धितप्रकरणे त्रादेशविधानसामर्थ्यात्। स्यादेरिति किं, पचतितरामित्यादौ तिबादेर्न लोपः। लुक्करणेन, त्यलोपे त्यलक्षणमिति न्यायात् प्राप्तव्यं विभक्तिनिमित्तकं कार्य्यं (६३) लुकि न तन्नेति निषेधान्न स्यादिति, तेन कस्य पुत्रः किंपुत्रः इत्यादौ (१३३) टेरकारो न स्यात्, धातारं गतः धातृगत इत्यादौ (१२८) न वृद्धिः, यज्वा चासौ विप्रश्चेति यज्वविप्र इत्यादौ (१६४) न दीर्घः। विरामे परे विहितस्तु स्यादेव, तेन ब्रह्माच्युतेशा इत्यादौ (११८) नस्य लुप्, पयोविकार इत्यादौ (१०९) सस्य विसर्गः। किञ्च त्वया कृतं त्वत्कृतमित्यादौ (२१५) एकत्वेऽर्थे त्वदादेशः स्यादेव, कृष्णो-

द्वन्द्व-समासः (च)।

इतरेतरयोगे च समाहारे च चो द्विधा।

हरिश्च हरश्च हरिहरौ। ब्रह्मा च अच्युतश्च ईशश्च ब्रह्माच्युतेशाः।*

३२०। पुंवत् स्वेः। (पुंवत् ।१।, स्वेः ६।)।

से स्थितायाः स्वेः पुंवत् स्यात्, त्ये च परे। पूर्व्वपश्चिमे।†

र्थस्यापि ग्रहणादित्युक्तेः। युवावादेशौ तु द्विवचने परे एव स्यातां, नतु द्वित्वेऽर्थे इति वक्तव्यम्, तेन युवाभ्यां कृतं (१९० पृष्ठं द्रष्टव्यं) युष्मत्कृतमित्यादि। पाणिनिः २।४।७१।

* चो द्वन्द्वः इतरेतरयोगे च समाहारे च भवन् द्विधा भवति। इतरेतरयोगोऽवयवप्रधानः, तेन अवयवकृते द्वित्वबहुत्वे भवतः। समाहारः संहतिप्रधानः, तेन संहतेरेकत्वादेकवचनमेव इति भेदः। हरिश्च हरश्च इति वाक्ये सि-द्वयस्य लुकि हरिहर इति समुदायस्य लिङ्गसंज्ञायाम् अवयवद्वयघटितत्वात् द्विवचनम्। राजरश्मिनावित्यादौ तु पूर्व्वपदस्य विभक्तेर्लुकि (११८) विरामे परे विहितनकारलोपः स्यात्, परपदस्य विभक्तिलोपेऽपि पुनर्लिङ्गसंज्ञायां विभक्त्युत्पत्तौ विरामविहितं नकारलोपादिकं न स्यादेव। ब्रह्माच्युतेशा इत्यत्र अवयवत्रयघटितत्वात् बहुवचनम्। एवं घटौ च घटौ च घटाः, अत्र अवयवचतुष्टयघटितत्वात् बहुवचनम्। समस्तपदलिङ्गन्तु परपदस्य यत् तदेव भवतीति।

† पुमानिव पुंवत्, त्ये च इति अनुवर्त्तते। किञ्च त्यशब्देनात्र विभक्तिभिन्नप्रत्ययो ग्राह्यः, किन्तु विभक्तिस्थाने तद्धितप्रत्ययं कृते तु पुंवत् स्यादेव, यथा सर्व्वस्या सर्व्वतः इत्यादि। सर्व्वसमासे सर्व्वप्रत्यये च परे सर्व्वनाम्नः पुंवद्भावः स्यादित्यर्थः। अत्र समासगतपूर्व्वपदस्यैव स्वेः पुंवत् स्यात् न तु परपदस्य, अतएव पश्चिमा च पूर्व्वा च पश्चिमापूर्व्वे इत्यत्र पूर्व्वा इति परपदस्य स्वेः न पुंवद्भावः। न च, (८७) न गौण्याख्येत्यनेन स्विसंज्ञानिषेधात् पूर्व्वपश्चिमे इत्यत्र कथं पुंवद्भाव इति वाच्यं, न गौण्याख्येत्यनेन द्वन्द्वसमासे कृते एव स्विसंज्ञा निषिध्यते, पुंवत् स्वेरित्यनेन समासे स्थितस्यैव पुंवद्भावो विधीयते, इत्यविरोधात्। सर्व्वा प्रिया यस्य स सर्व्वप्रियः इत्यादौ अनेन पुंवद्भावः। (३२९) पूरणीप्रियेत्यनेन तु (३२७) पुंवत् स्वाक्तेत्यादिना विहितस्यैव पुंवद्भावस्य निषेधः। एव सर्व्वासां पतिः सर्व्वपतिरित्यादि। प्रत्यये यथा—सर्व्वामिच्छति सर्व्वकाम्यतीत्यादि। "सर्व्वनाम्नो वृत्तिमात्रे पुंवद्भावः" इति भाष्यम्।

३२१। ऋतो ङा तत्पुत्रे सगोत्रविद्ये चे।

(ऋतः ६।, ङा ।१।, तत्पुत्रे ७।, सगोत्रविद्ये ७।, चे ७।)।

चे स्थितस्य ऋदन्तस्य ङा स्यात् ऋदन्ते पुत्रे च परे सगोत्रविद्ये। मातापितरौ पितापुत्रौ, होतापोतारौ। *

३२२। चगैक्यं क्लीवं। (चगैक्यं ।१।, क्लीवं १)।

चस्यैक्यं गस्यैक्यं वस्य क्लीवं स्यात्। †

३२३। चैक्याच्चुदषहोऽः। (चैक्यात् ५।, चुदषहः ५।, अः १।)।

चवर्गान्ताद्दषहान्तात् चैक्यात् अः स्यात्।

---

* स च पुत्रश्च तत्पुत्रं तस्मिन्। तत्शब्देनेह पूर्व्वस्थित-ऋदन्त एवोच्यते। गोत्रञ्च विद्या च ते, समाने गोत्रविद्ये यस्य तत् सगोत्रविद्यं तस्मिन्। द्वन्द्वसमासस्थपूर्व्ववर्त्ति-ऋदन्तशब्दस्य ङा स्यात् ऋदन्ते पुत्रे च परे, पूर्व्वोत्तरपदयोः समानगोत्रत्वे समान-विद्यत्वे च सतीत्यर्थः। मातापितरौ पितापुत्रौ इत्युभयत्र समानगोत्रत्वम्, होतापोतारौ इत्यत्र समानविद्यत्वम्। ऋदन्ते किं—पितृपितामहौ। सगोत्रविद्ये किं—जामातृपुत्रौ दातृभोक्तारौ इत्यादि। अत्र पुत्रशब्देन पुत्रार्थशब्द उच्यते इति क्रमदीश्वरः, तेन दुहितात्मजौ इत्यादि। पूर्व्वपदस्य समानगोत्रत्वे परपदस्य च समानविद्यत्वे न भवति, यथा पितृहोतारौ। किञ्चात्र द्विपदद्वन्द्वे एव ङा भवति, तेन होता च पोता च यष्टा च ते होतृपोतृयष्टार इत्यत्र न स्यात्। द्विपदवाक्ये तु स्यादेव, तेन होतापोतारौ च यष्टोद्गातारौ च ते होतापोतायष्टोद्गातार इति। होतापोतारौ च यष्टा चेति वाक्ये तु होतापोतायष्टार इति। अत्र मातापितरौ इत्युदाहरता प्रायेण द्वन्द्वे स्त्रीलिङ्गस्यैव पूर्व्वस्थितिरिति सूचितम् (पाणिनिः १।२।७०)। "मातरपितरावुदीच्याम्" (६।३।३२) इति पाणिनिसूत्रेण मातापितरौ इत्यस्य रूपान्तरम्। पाणिनिः ६।३।२५।

† चश्च गश्च तौ तयोरैक्यं, चगैक्यञ्च वश्च तत्। ऐक्यं समाहारः। अव्ययीभावस्य क्लीवत्वफलन्तु उपसंशं उपलक्ष्मि इत्यादौ (१६७) ह्रस्वः। गुरूपशं इत्यच्छायं रक्षःसभं नृपसभं दासीसभं स्त्रीसभं गोशालं (पाणिनिः २।४।२१—२५) इत्यादिकमपि क्लीवलिङ्गं भवत्येवेति वक्तव्यम्। पाणिनिः २।४।१,२,१७,१८।

वाक् च त्वक् च इयोः समाहारः वाक्त्वचं, श्रीस्रजं, शमीदृषदं, वाक्त्विषं, पीठच्छत्रोपानहं। *

३२४। ऊर्व्वष्ठीवं पदष्ठीवं धेन्वनडुहौ अहोरात्रः स्त्रीपुंसौ वाङ्मनसे ऋक्सामे दारगवं अक्षिभ्रुवं इत्यादयः साध्याः।

(ऊर्व्वष्ठीवं १।, पदष्ठीवं १।, धेन्वनडुहौ १॥, अहोरात्रः १।, स्त्रीपुंसौ १॥, वाङ्मनसे १॥, ऋक्सामे १॥, दारगवं १।, अक्षिभ्रुवं १।, इत्यादयः १॥, साध्याः १॥)। †

इति चः।

---

* चुश्च दश्च मूर्द्धन्य-षश्च ह चेति चुदषह तस्मात्। समाहारद्वन्द्वे स्थितात् चवर्गान्त-दान्त षान्त-हान्तात् अः स्यादित्यर्थः। (५२७) आदस्त इत्यनेन एतद्-अ प्रत्ययादीनां तद्धितत्वात्, (४३१) न दं तसावित्यनेन दान्तत्वनिषेधे वाक्त्वचमित्यादौ विरामसमाश्रित्य (२११) कुङादिकं न स्यात्। एवञ्च समासपादोक्तप्रत्यया अन्त्यपदादेव स्युरिति, तेन त्वक्पत्रं सखिपुत्रः इत्यादौ पूर्व्वपदात् न कश्चित् प्रत्ययः। चे किं, पञ्चानां वाचां समाहारः पञ्चवाक् इति द्विगौ न स्यात्। ऐक्यमिति किं, प्रावृट्शरदौ इति इतरेतरे न स्यात्, समाहारे तु प्रावृट्शरदमिति स्यादेव। पाणिनिः ५।४।१०६।

† ऊर्व्वष्ठीवमित्यादयः साध्याः निपात्या इत्यर्थः। ऊरू च अष्ठीवन्तौ च ऊर्व्वष्ठीवं, पादौ च अष्ठीवन्तौ च पदष्ठीवं, उभयत्र अप्रत्ययः, पादस्य पदादेशश्च। धेनुश्च अनड्वांश्च धेन्वनडुहौ, एतदादिभ्योऽपि अप्रत्ययः। अहश्च रात्रिश्च अहोरात्रः, समाहारेऽपि पुंस्त्वम्। सङ्ख्यापूर्व्वत्वे तु क्लीवत्वं यथा त्रिरात्रमित्यादि। स्त्री च पुमांश्च स्त्रीपुंसौ। वाक् च मनश्च वाङ्मनसे। ऋक् च साम च ऋक्सामे। दाराश्च गावश्च दारगवं। अक्षिणी च भ्रुवौ च अक्षिभ्रुवं। इत्यादयः इति आदिशब्देन षट्समासेषु अनुक्तानि उच्यन्ते। तत्र समासान्तरेऽनुक्तं तत्रैव वक्तव्यं, द्वन्द्वे अनुक्तानि तु अत्र उच्यन्ते। नक्तन्दिवं रात्रिन्दिवं अहर्दिवं ऋग्यजुषं; अग्नीषोमौ सूर्य्याचन्द्रमसौ मित्रावरुणौ; इत्यादिकः प्रयोगानुसारेण इतरेतरयोगः समाहारश्च ज्ञेयः। पाणिनिः ५।४।७७।

अत्र समाहारविषयकाणि कतिचित् पाणिनिसूत्राणि लिख्यन्ते—“द्वन्द्वश्च प्राणितूर्य्यसेनाङ्गानाम्” (२।४।२), यथा पाणिपादं मुखनासिकं, मार्द्दङ्गिकपाणविकम्, रथिकाश्वारोहम्। “जातिरप्राणिनाम्” (२।४।६), यथा धानाशष्कुलि। “विशिष्टलिङ्गो

बहुव्रीहि-समासः (ह्र)।

पीतमम्बरं यस्यासौ पीताम्बरो हरिः। नीलमुज्ज्वलं वपुर्यस्यासौ नीलोज्ज्वलवपुः कृष्णः।*

नदीदेशोऽग्रामाः" (२।४।७), यथा गङ्गाशोणं, कुरुकुरुक्षेत्रम्। "क्षुद्रजन्तवः" (२।४।८), यथा दंशमशकम्। आनकुलात् क्षुद्रजन्तवः। "येषाञ्च विरोधः शाश्वतिकः" (२।४।९), यथा, गोव्याघ्रम्। "गवाश्वप्रभृतीनि च" (२।४।११), यथा गवाश्वं, दासीदासं, पुत्र-पौत्रं, स्त्रीकुमारं मूत्रपुरीषं, मांसशोणितमित्यादि। "विभाषा वृक्षमृगतृणधान्यव्यञ्जन-पशुशकुन्यश्ववडवपूर्व्वापराधरोत्तराणाम्", (२।४।१२), यथा प्लक्षन्यग्रोधं प्लक्षन्यग्रोधाः, रुरु-पृषतं रुरुपृषताः, कुशकाशं कुशकाशाः, दधिघृतं दधिघृते, गोमहिषं गोमहिषाः, तित्तिरिकपिञ्जलं तित्तिरिकपिञ्जलाः, अश्ववडवम् अश्ववडवौ (२।४।२७), इत्यादि।

निपातनादेकशेषोऽपि द्वन्द्वो भवति। दिङ्मात्रं यथा—अश्वी च अश्वश्च अश्वौ, हंसी च हंसश्च हंसौ, युवती च युवा च युवानौ (पा. १।२।६७), स्वसा च भ्राता च भ्रातरौ, दुहिता च पुत्रश्च पुत्रौ (पा. १।२।६८), श्वश्रूश्च श्वशुरश्च श्वशुरौ (पा. १।२।७१), माता च पिता च पितरौ (पा. १।२।७०), जाया च पतिश्च दम्पती जम्पती च। रामश्च रामश्च रामौ, रामश्च रामश्च रामश्च रामाः (पा. १।२।६४) इत्यादि।

* पीताम्बर इत्यत्र समस्यमानाभ्यां 'पीतं' 'अम्बरं' इति पदाभ्याम् अन्यो हरिर्बुध्यते, एवं त्रिपदबहुव्रीहौ नीलोज्ज्वलवपुरित्यत्र समस्यमानेभ्यो 'नीलं' 'उज्ज्वलं' 'वपुः' इति पदेभ्योऽन्यः कृष्णो बुध्यते। एवं चतुःपदबहुव्रीहिरपि, यथा आरूढा वृद्धा बहवो वानरा यं स आरूढवृद्धबहुवानरो वृक्ष इत्यादि। प्रायशः समानाधिकरणानां पदानां अन्यार्थत्वे बहुव्रीहिः स्यादिति बोध्यम्। (२३३) अष्ट मात्रा वर्त्तते योऽसौ समाष्टकः इति उदाहरता ग्रन्थकारेण तु कदाचित् भिन्नाधिकरणानां पदानामपि बहुव्रीहिः स्यादिति सूचितम्, अतएव धर्म्मे वृत्तिर्यस्यासौ धर्म्मवृत्तिरित्यादि। (सिद्धान्तकौमुद्यान्तु "व्यधिकरणानामपि न पञ्चभिर्भुक्तमस्य"। एवमेव गोयीचन्द्रः।) अपिच पीताम्बर इत्युदाहरता विशेषणविशेष्ययोः समासे विशेषणमेव पूर्व्वं स्यादिति सूचितं, तेन पीता-म्बर इत्यत्र अम्बरपीत इति न स्यात्। (२६८) शङ्खभिन्नीत्यादि उदाहरता क्वचित् क्तान्तविशेषणं परमपि स्यादिति सूचितं, तेन अग्न्याहितः आहिताग्निः (पाणिनिः २।२।३७) इत्यादि। वस्तुतः पूर्व्वपदोत्तरपदव्यवस्था प्रयोगानुसारेण ज्ञेया। द्वितीया-दिविभक्त्यन्तान्यपदार्थो बहुव्रीहिरिति आचार्य्यैर्मन्यते यथा—आरूढो वानरो यं स आरूढवानरो वृक्षः। जितः कामो येन स जितकामस्तपस्वी। उपनीतं भोजनं यस्मै स उपनीतभोजनोऽतिथिः। निर्गतो जनो यस्मात् स निर्गतजनो देशः। पीताम्बर इति षष्ठ्यन्तान्यपदार्थः। उषितो विहगो यस्मिन् स उषितविहगो वृक्ष इत्यादि। "प्रथमार्थे तु न, यथा वृष्टे देवे गतः" इति सिद्धान्तकौमुदी। स्वमते तु प्रथमान्तान्यपदार्थोऽपि, यथा समाष्टक इत्यादि।

(१०७) षृ र्णोऽदान्ते न इति हरिभाविणी हरिभाविनी, श्रीभाविण श्रीभावेन। रम्यविणा श्रीकामेण। रम्यपक्केन रम्ययूना रम्याह्ना। *

३२५। नञोऽनौ वाज्झसोः।

(नञः ६।, अनौ १॥, वा ।१।, अच्-हसोः ७॥)।

नञोऽचि परे अन् हसे च अः स्यात् से वा।

नास्त्यन्तो यस्यासौ अनन्तः नान्तः। अच्युतः नच्युतः। †

---

* हरिं भावयितुं शीलमस्याः इति भूक् शुद्धिचिन्तयोरित्यस्मात् (९९३) णिनि कृते, (६४१) ञ्णेर्लोपे, (२५७) नान्तत्वादीपि, समासोत्तरविहितेन ईपा सहितस्य नस्य (१०७) वा णत्वम्। अत्र, (२९६) धात् क्रीतादिति ज्ञापकात् स्याद्युत्पत्तेः प्रागपि कारकाणां समासः, तथाच कृति कारकोपपदानां कृद्भिः समासवचनं प्राक् सुबुत्पत्तेरिति भाष्यम्। श्रियां भावो यस्यासौ श्रीभावः तेन श्रीभाविण श्रीभावेन, अत्र समासोत्तरविहितस्यादिसम्बन्धिनो नस्य वा णत्वम्। उभयत्र एकाच्कवर्गयुक्तशब्दसम्बन्धिभिन्नत्वात् विकल्पः। रम्यो विः पक्षी यत्र तेन रम्यविणा, श्रियां कामो यस्य तेन श्रीकामेण, उभयत्र एकाच्कवर्गयुक्तशब्दसम्बन्धित्वात् नित्यं णत्वम्। रम्यं पक्वं यस्मिन् तेन रम्यपक्केन, रम्यो युवा यस्मिन् तेन रम्ययूना, रम्यं अहर्यस्मिन् तेन रम्याह्ना, एतेषु पक्वयुवाह्ववर्जनात् न णत्वम्।

† अन् च अश्च अनौ। अच् च हस् च अज्झसौ तयोः। समासे स्थितस्य नञः स्थाने अचि परे अन् हसे च अः स्यात् वा। नास्ति अन्त इति अन्तो नाशः। नास्ति च्युतं नाशो यस्य स अच्युतः नच्युतः। च्युतमिति च्युधातोर्भावे क्तः। च्युतधातोः कर्त्तरि (९९६) कप्रत्यये च्युतो नश्वर इति केचित्, तन्मते न च्युतोऽच्युतः च्युतभिन्न इत्यर्थः। तथाच—तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।

अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः॥ इति प्राञ्चः।

उदाहरणं यथा—न ब्राह्मणोऽब्राह्मणः ब्राह्मणसदृश इत्यर्थः। पापस्याभावोऽपापम्। न घटोऽघटः घटभिन्न इत्यर्थः। अनुदरी अल्पोदरीत्यर्थः। अकेशी अप्रशस्तकेशीत्यर्थः। असुरः सुरविरोधीत्यर्थः। पाणिनिः ६।३।७३,७४।

अत्र वाशब्दस्य व्यवस्थावाचित्वात् नाकादिषु आदेशो न स्यात् यथा—

३२६। महत्तैकार्थे जातीयघासकरविशिष्टे तु तौ च। (महत् ।६।, त ।१।, आ ।१।, एकार्थे ७।, जातीय—विशिष्टे ७।, तु ।१।, तौ ।१।, च ।१।)।

महतस्त आ स्यात् एकार्थे, जातीयादौ तु तौ च।

महाबलः। *

३२७। पुंवत् स्त्र्युक्तपुंस्कः स्त्रियां ङ्यमानि-तत्वशसन्ततरादौ चाकृष्ये। (पुंवत् ।१।, स्त्री ।१।, उक्तपुंस्कः १।, स्त्रियां ७।, ङ्य—तरादौ ७।, च ।१।, अकृष्ये ७।)।

नाकी नवेदा नकुलश्च नक्रो नासत्य-नक्षत्र नपाच्च नभ्राट्।
नपुंसकं वै नमुचिर्नखञ्च नादेशमेतेषु वदन्ति धीराः॥ इति पाणिनिः ६।३।७५।

एषामर्थाः—न अकं (दुःखं) अस्मिन्निति नाकः। न वेत्तीति नवेदाः असुन्प्रत्ययान्तः। न कुलमस्येति नकुलः। न क्रामतीति नक्रः, क्रमेडः। न सत्यः असत्यः, न असत्यः नासत्यः। न चरतीति नक्षत्रम्, चीयतेः चरतेर्वा चत्रमिति निपातः। न पातीति नपात् शतृप्रत्ययान्तः। न भ्राजते इति नभ्राट् क्विबन्तः। न स्त्री पुमान् नपुंसकं, स्त्रीपुंसयोः पुंसकभावो निपातनात्। न मुञ्चतीति नमुचिः। न खमाकाशमस्येति नखम्।

* एकोऽर्थो यस्य स एकार्थस्तस्मिन्। जातीयश्च घासश्च करश्च विशिष्टश्च समाहारे तस्मिन्। महत्शब्दस्य तकारस्य आकारः स्यात् एकार्थे विशेष्यशब्दे परे, जातीयादौ परे तु महत्शब्दस्य (स्त्रीलिङ्ग) तौकारस्य आकारः स्यादित्यर्थः। जातीय इति (४८७) प्रत्ययः, घास कर विशिष्ट इति शब्दाः। महत् बलं यस्यासौ महाबलः। एवं महती कीर्त्तिर्यस्यासौ महाकीर्त्तिः। विशेष्यशब्दपरत्वं कर्म्मधारयेऽपि सम्भवति। तत्र महांश्चासौ देवश्चेति महादेवः, महती चासौ कीर्त्तिश्चेति—महाकीर्त्तिरिति। एकार्थे किं, महाश्च पण्डितश्च महत्पण्डितौ, महतः पुत्रः महत्पुत्र इत्यादौ न स्यात्। जातीयादौ तु महती महत्या वा प्रकार इत्यर्थे (४८७) महाजातीयः। महती महत्या वा घासो महाघासः। महती महत्या वा करो महाकरः। महती महत्या वा विशिष्टः महाविशिष्टः। अमहान् महान् भूतः महद्भूतश्चन्द्रः, अमहती महती भूता महद्भूता ब्राह्मणी, इत्यादावभूततद्भावे न स्यादिति वक्तव्यम्। पाणिनिः ६।३।४६, वार्त्तिकञ्च।

उक्तपुंस्कः स्त्रीलिङ्गः पुंवत् स्यात् एकार्थे स्त्रीलिङ्गे, ङ्यादौ च, न तु रूप्ये। *

३२८। नोपताककोङ्पूरण्याख्यायुम्नक्तविकारार्थणित्तं जातिस्वाङ्गेप् त्वमानिनि।

(न ।१।, ऊप्—णित्तं १।, जातिस्वाङ्गेप् ।१।, तु ।१।, अमानिनि ७।)।

---

* पुमानिव पुंवत्। उक्तः पुमान् येन स उक्तपुंस्कः, एकस्मिन्नर्थे यः स्त्रीपुंसयोर्वर्त्तते स उक्तपुंस्क इति यावत्। "भाषितः पुमान् येन समानायामाकृतावेकस्मिन् प्रवृत्तिनिमित्ते भाषितपुंस्कः शब्दः। तदेतदेव कथं भवति। भाषितः पुमान् यस्मिन्नर्थे प्रवृत्तिनिमित्ते स भाषितपुंस्कशब्देनाच्यते। तस्य प्रतिपादको यः शब्दः सोऽपि भाषितपुंस्कः।" इति काशिका। शस् अन्ते यस्य स शसन्तः, तर आदिर्यस्य स तरादिः, शसन्तश्चासौ तरादिश्चेति शसन्ततरादिः। ङ्याश्च मानिन् च तश्च त्वश्च शसन्ततरादिश्च तत् तस्मिन्। न रूप्योऽरूप्यस्तस्मिन्। एकार्थे इत्यनुवर्त्तते। उक्तपुंस्कः स्त्रीलिङ्गशब्दः पुंवत् स्यात् विशेष्यस्त्रीलिङ्गशब्दे परे, ङ्यादौ च परे, न तु रूप्ये इत्यर्थः। यथा—सुन्दरी भार्य्या यस्य स सुन्दरभार्य्यः, एवं सुन्दरी चासौ भार्य्या चेति सुन्दरभार्य्या। ङ्यादौ तु सुन्दरीवाचरति (८४८) सुन्दरायते। आत्मानं सुन्दरीं मन्यते या सा (९९३) सुन्दरमानिनी। सुन्दर्य्या भावः (४३८) सुन्दरता सुन्दरत्वम्। शसन्ततरादिस्तु (४६२—४८३)—तरस्तमश्च रूपश्च चतरां चतमां तथा। इष्ठेयसू इमन्कल्पौ देश्यो देशीय इत्यपि। वहुः पाशश्चरी रूप्यश्शस् चैव तरादय इति॥ यथा—(४६२) इयमनयोरतिशयेन शुभा शुभतरा, इयमासामतिशयेन शुभा शुभतमा। (४६४) अतिशयेन शुभा शुभरूपा। (४६५) अनयोरतिशयेन का किन्तराम्, आसामतिशयेन का किन्तमाम्। (४६६) अतिशयेन लघ्वी लघिष्ठा लघीयसी। (४७५) लघ्व्या भावो लघिमा। (४७७) ईषदूना शुभा शुभकल्पा शुभदेश्या शुभदेशीया। (४७८) ईषदूना शुभा वहुशुभा। अत्र वहोः परस्थित्यभावात् न पुंवद्भावः। वहोश्च शसन्ततरादावुपन्यासस्तु वक्ष्यमाणतद्धितप्रकरणे शसन्ततरादिविधायकसूत्रवर्गमध्यपातानुरोधात्। (४७९) कुत्सिता शुभा शुभपाशा। (४८०) भूतपूर्व्वा शुभा शुभचरी। (४८१) शुभाया भूतपूर्व्वो गौः शुभारूप्यः, अत्र रूप्यवर्जनात् न पुंवत्। (४८२) वह्वीर्देहि वहुशो देहि इति। उक्तपुंस्कः किं, गङ्गाभार्य्यः। तस्याः, ततः तस्यां, तत्र, तदा, तर्हि इत्यादौ तु (३२०) पुंवत् सेरिति पुंवत्। हस्तिनीनां नखः हास्तिकं, अग्नायी देवता अस्य आग्नेयः, कुक्कुट्या अण्डं कुक्कुटाण्डं, मृग्याः क्षीरं मृगक्षीरं, मृग्याः पदं मृगपदं, काक्याः शावकः काकशावकः इत्यादौ च पुंवद्भावो वक्तव्यः। पाणिनिः ६।३।३४,३५,३६,४२, वार्त्तिकानि च।

ऊबन्तं, तस्याकस्य वा केन ककारोङ्, पूरणीत्यान्तं, संज्ञाभूतम्, इम्-उम्-रक्तार्थ-विकारार्थ-वर्जं णित्तान्तञ्च, पुंवन्न स्यात्, जाति-स्वाङ्गविहितवन्तन्तु मानिन्वर्जे । *

३२९ । पूरणी प्रिया मनोज्ञा सुभगा दुर्भगा क्षान्ता कान्ता वामना वामा चपला बाला समा सचिवा तनया दुहितृ स्वा कल्याणी भक्तौ ।

(पूरणी—भक्तौ ७) ।

एषु परेषु पुंवन्न स्यात् । †

---

* तश्च अकश्च ताकौ, तयोः कः ताककः, स उङ् यस्य स ताककोङ् । इश्च उश्च ग्, ताभ्यां म् युम, (४१७) (मकारस्य प्रत्येकसम्बन्धेन इम् उम् इत्यर्थः), रक्तश्च विकारश्च तौ रक्तविकारौ, तौ अर्थौ येषां ते रक्तविकारार्थाः, युम च रक्तविकारार्थाश्च ते, न विद्यन्ते ते यत्र सोऽयुमक्तविकारार्थः, मूर्द्धन्य ण इत् यस्य स णित्, णिचासौ तश्चेति णित्तः, अयुमक्तविकारार्थश्चासौ णित्तश्चेति अयुमक्तविकारार्थणित्तः । पश्चात् ऊप् च ताककोङ् च पूरणी च आख्या च अयुमक्तविकारार्थणित्तश्च समाहारे तत् । जातिश्च स्वाङ्गञ्च जातिस्वाङ्गे, ताभ्यामीप् जातिस्वाङ्गेप् । न मानिन् अमानिन् तस्मिन् । ऊबन्तं पदं, तद्धितस्य केन अकप्रत्ययस्य वा केन ककारोङ् पदं, द्वितीयादि-पूरणीप्रत्ययान्तं पदं, दत्ताभद्रादि संज्ञारूपं पदं, इम-उम्-रक्तार्थ-विकारार्थ वर्ज-णकारेत् तद्धितप्रत्ययान्तं पदञ्च पुंवन्न स्यात् । जातिविहितेबन्तं स्वाङ्गविहितेबन्तञ्च मानिन्वर्जे शब्दे परे पुंवन्न स्यादित्यर्थः । पाणिनिः ६।३।३७—४१ ।

† पूरणी चेत्यादि द्वन्द्वे तस्मिन् । पूरणीति पूरणीप्रत्ययान्तः स्त्रीलिङ्गशब्दः द्वितीयादिः । भक्तिशब्दश्चात्र कर्म्मविहितक्तिप्रत्ययान्तो भज्यमानद्रव्यवाची बोध्यः, भावसाधिते तु पुंवत् स्यादेव । एषु अष्टादशसु परेषु पुंवत् न स्यादित्यर्थः । अत्र केचित् क्षान्तातनययोः स्थाने समातनयौ, स्वा इत्यत्र स्वसा इति, बाला इत्यत्र अचला इति च आहुः, बाला-वामा-शब्दौ च नाहुः । मेघदूते दृष्टभक्तिर्भवान्या इति, रघौ च दृढभक्तिरिति ज्येष्ठे इति, भावविहितत्वात् पुंवद्भावः । "स्त्रीत्वविवक्षायान्तु दृढाभक्तिः" इति सिद्धान्तकौमुदी । प्रसूततनया इति तु प्रसूतं तनयया यस्या इति व्यधिकरणबहुव्रीहिः । पाणिनिः ६।३।३४ ।

३३०। गवाबादेः स्वोऽन्ते गौण्येऽनीयसः।

(गवाबादेः ६।, स्वः १।, अन्ते ७।, गौण्ये ७।, अनीयसः ५।)।

अन्ते स्थितस्य गोः आप ईप ऊपश्च स्वः स्यात् अप्रधानत्वे सति, नत्वीयसः।

शीतगुः ध्वस्तमायः कालतनुः। ईयसस्तु बहुप्रेयसी। *

ऊबादेस्तु (३२८)—वामोरुभार्य्यः रसिकाभार्य्यः पाचिकाभार्य्यः षष्ठीजायः दत्ताजायः मैथिलीभार्य्यः। ब्राह्मणीभार्य्यः सुकेशीभार्य्यः। अमानिनि किं—ब्राह्मणमानिनी। युमादेस्तु वैयाकरणभार्य्यः सौवश्वभार्य्यः काषायकन्यः हैममुद्रिकः। †

---

* आप् आदिर्यस्य स आबादिः, गौश्च आबादिश्च तत्तस्य। गुणस्य भावो गौण्यं तस्मिन्। न ईयस् अनीयस् तस्मात्। ईयसः परस्य ईपः स्वो न स्यादित्यर्थः, एष निषेधः बहुव्रीहावेव, (ईयसो बहुव्रीहेर्नेति वाच्यमिति वार्त्तिकम्) तेन प्रेयसीमतिक्रान्तः अतिप्रयसिः खल इत्यादि। अर्द्धं पिप्पल्याः अर्द्धपिप्पली, एवं अर्द्धखारी अर्द्धनगरी इत्यादेः ह्रस्वनिषेधो वक्तव्यः। अत्र आबादिस्त्रीत्यानां ग्रहणात् न स्त्रीलिङ्गशब्दमात्रस्य ह्रस्वः, तेन अतिलक्ष्मीः, अतिश्रीरित्यादि। पुंवद्भावस्य विधिनिषेधौ निरूप्य उदाहरति शीतगुरित्यादि। शीता शीतला गौः किरणो यस्यासौ शीतगुश्चन्द्रः, ध्वस्ता माया यस्य स ध्वस्तमायः, उभयत्र पूर्व्वस्य पुंवद्भावः, परस्य ह्रस्वः। ईषन्तं बहुव्रीहौ (३३२) कप्रत्ययेन बाधितत्वान्नोदाहृतम्। काली तनूर्यस्यासौ कालतनुः, पूर्व्वस्य पुंवत्, परस्य ह्रस्वः। एवम् अन्यत्रापि गौणत्वे पञ्चगुः अतिमावः अतिस्त्रिरित्यादि। बह्व्यः प्रेयस्यो यस्य स बहुप्रेयसी कृष्णः, पूर्व्वस्य पुंवद्भावः, परस्य ईयसो वर्ज्जनात् न ह्रस्वः, (१४८) ईपः सेर्लोपः स्यादेव। समासान्तविधेरनित्यत्वादत्र न (३३२) कप्रत्ययः, (अत्र पाणिनिसूत्रं यथा "ईयसश्च" ५।४।१५६)। अत्र ह्रस्वनिषेधात् सुप्रेयसी कुलमित्यत्र (१६७) क्लीबे स्वः इत्यनेनापि ह्रस्वो न स्यादिति। एवं प्रयोगानुसारेणान्यत्रापि। अत्र पुंवद्भावप्रकरणे त्रिपदबहुव्रीहौ मतभेदो दृश्यते, यथा, चित्राजरतीगुः, जरतीचित्रागुर्वा ; एवं दीर्घातन्वीजङ्घः, तन्वीदीर्घाजङ्घः इति केचित्। अपरे तु चित्राजरद्गुरिति वदन्ति ; चित्राजरत्यौ गावौ यस्येति द्वन्द्वगर्भेऽपि चित्राजरद्गुरिति भाष्यम्। कर्म्मधारयपूर्व्वपदे तु द्वयोरपि पुंवत्, यथा जरच्चित्रगुः। पाणिनिः १।२।४८, वार्त्तिकञ्च।

† वामौ सुन्दरौ ऊरू यस्याः सा वामोरूः (२७८), वामोरूः भार्य्या यस्य सः। रसं वेत्तीति रसिका (४१९), रसिका भार्य्या यस्य सः। पचतीति (९९०) पाचिका,

पूरण्यादौ तु (३२८)—*

३३१। ह्रे पूरणीप्रमाण्योः ग्यः ।

(ह्रे ७।, पूरणी-प्रमाणीभ्यां ५॥, अः १।)।

आभ्याम् अः स्यात् ह्रे।

(२५८) ययोर्लोपोऽयुक्तौ पौ। कल्याणीपञ्चमा रात्रयः, कल्याणीप्रियः। मुख्यात्र पूरणी ग्राह्या, तेन—†

पाचिका भार्य्या यस्य सः। षष्ठां पूरणी (४५५) षष्ठी, षष्ठी जाया यस्य सः। दत्ता (इति संज्ञा) जाया यस्य सः। मिथिलायां भवा मैथिली (४२८), मैथिली भार्य्या यस्य सः। एषु पूर्व्वपदानामूङन्तादीनां पुंवद्भावनिषेधः। ब्राह्मणी (१६७) भार्य्या यस्य सः ब्राह्मणीभार्य्यः, सुकेशी (२६५) भार्य्या यस्य सः सुकेशीभार्य्यः, उभयत्र जाति-स्वाङ्ग-विहितेबन्तं न पुंवत्। आत्मानं ब्राह्मणीं मन्यते या सा ब्राह्मणमानिनी, मनधातोः (९९३,२५७) णिन्, ईप् च। अत्र मानिनि परे पुंवद्भावः। व्याकरणं वेत्ति अधीते वा या सा (४२८,४१७) वैयाकरणी, सा भार्य्या यस्य सः। सु सुन्दरः अश्वो यस्य सः स्वश्वः, स्वश्वस्येयं (४३७,४१७) सौवश्वी, सा भार्य्या यस्य सः। कषायेण रक्ता काषायी (४२८), काषायी कन्या यस्य सः। हेम्नो विकारः (४३७) हैमी, सा मुद्रिका यस्य सः। एतेषु इम्-उम्-रक्त विकारार्थ-वर्जनाब् पुंवद्भावः। सर्व्वत्र पर-पदानां ह्रस्वः। (६।३।४३) पाणिनिसूत्रेण ब्राह्मणिकल्पा, ब्राह्मणिब्रुवा, ब्राह्मणिहता इत्यादौ ङीबन्तस्यानेकाचो ह्रस्वः इति वक्तव्यम्।

* पूरण्यादौ परे (३२८) उदाहरिष्यन् सूत्रमाह।

† पूरणी द्वितीयादिः। प्रमीयतेऽनया इति प्रमाणी। पूरणी च प्रमाणी च ताभ्याम्। पूरणीवाचकात् प्रमाणीशब्दाच्च अः स्यात् बहुव्रीहौ इत्यर्थः। पञ्चानां पूरणी पञ्चमी (४५१)। कल्याणी प्रशस्ता पञ्चमी रात्रिर्यासु रात्रिषु ता रात्रयः कल्याणीपञ्चमाः, अत्र पञ्चमीशब्दे परे (३२८) पुंवद्भावो नाभूत्, पञ्चमीशब्दादनेन अप्रत्यये ययोर्लोप इति ईपो लोपे, (२४८) आप्। कल्याणी प्रिया यस्य स कल्याणी-प्रियः, (३२८,३३०)। एवं कल्याणीमनोज्ञः इत्यादि। मुख्यात्रेति अत्र पूरणी-परे पुंवद्भावनिषेधे पूरणीपरात् अप्रत्यये च उभयत्र मुख्या पूरणी ग्राह्या। मुख्यत्वञ्च समासवाच्यानामसाधारणधर्म्मत्वम्। कल्याणीपञ्चमा इत्यत्र समासवाच्यानां रात्रीणां

३३२ । दृत: क: । (दी-ऋत: ५।, क: १।) ।

दीसंज्ञकादृदन्ताच्च क: स्यात् हे । कल्याणपञ्चमीक: पक्ष: । रात्रि: पूरणी वाच्या चेति पूर्व्वस्य मुख्यत्वम् । स्त्रीप्रमाण: । *

३३३ । सह: सो वा । (सह: ६।, स: १।, वा ।१। ।

सहस्य हे स: स्याद्वा ।

सह मात्रा वर्त्तते योऽसौ समातृक: सहमातृक: । †

३३४ । सक्थ्यक्ष्ण: ष: स्वाङ्गे ।

(सक्थ्यक्ष्ण: ५।, ष: १।, स्वाङ्गे ७।) ।

आभ्यां हे ष: स्यात् स्वाङ्गे । दीर्घसक्थ:, पुण्डरीकवदक्षिणी

योऽसाधारणधर्म्म: रात्रित्वं तच्च तासु रात्रिषु पञ्चम्यां रात्रावपि वर्त्तते, अतो मुख्यत्वम् । तेन इति; परसूत्रोदाहरणे कल्याणपञ्चमीक: पक्ष: इत्यत्र न पुंवद्भावनिषेध:, नापि अप्रत्यय:, इत्यनेन सम्बन्ध: । पाणिनि: ५।४।११६ ।

* दी च ऋच्च दृत् तस्मात् । (८६) नदीसंज्ञकशब्दात् ऋदन्तशब्दाच्च बहुव्रीहौ क-प्रत्यय: स्यादित्यर्थ: । इति तूपलक्षणमात्रम्, अन्येभ्योऽपि उर:प्रभृतिभ्य: शब्देभ्यो बहुव्रीहौ प्रयोगानुसारेण कप्रत्ययो वक्तव्य: (पाणिनि: ५।४।१५१,५।४।१५४) । कल्याणी पञ्चमी यस्मिन् पक्षे स: कल्याणपञ्चमीक: पक्ष:, अत्र समासवाच्यस्य असाधारणधर्म्म: पक्षत्वं, तत्तु पञ्चम्यां रात्रौ न वर्त्तते, अतो मुख्यत्वाभावात् न पुंवद्भावनिषेध: (३२८), नापि अप्रत्यय: (३३१) । कल्याणीत्यत्र (३१७) पुंवद्भावे, पञ्चमीत्यस्मात् नदीसंज्ञकादनेन कप्रत्यय: । रात्रि: पूरणी वाच्या चेति पूर्व्वत्र कल्याणीपञ्चमा रात्रय: इत्यत्रोदाहरणे रात्रि: समासवाच्येत्यर्थ:, पूरणीवाच्या पञ्चमीवाच्या चेत्यर्थ:, अत: पञ्चमीशब्दस्य मुख्यत्वमिति । स्त्री प्रमाणी यस्य स स्त्रीप्रमाण:, स्त्रीशब्दस्य अनुक्तपुंस्कत्वात् न (३२७) पुंवद्भाव:, प्रमाणीशब्दात् (३३१) अप्रत्यय: । पाणिनि: ५।४।१५३ ।

† समातृक इति (३३२) क:, अनेन वा सह-स्थाने स: । केचित्तु मात्रा सहित: समातृक इति वाक्यं कृत्वा तृतीयातत्पुरुषं वदन्ति । एवं सह समानम् उदरं यस्य स: सोदर: सहोदर इत्यादि । हे किं, सहकृत्वा, सहयुध्वा । साग्नि: साङ्गम् साश्वत्थं सपलाशं सपिशाचम् इत्यादि नित्यं वक्तव्यमिति । पाणिनि: ६।३।८२ ।

यस्यासौ पुण्डरीकाक्षः। स्वाङ्गे किं, दीर्घसक्थि शकटं। *

३३५। दारुण्यङ्गुलेः। (दारुणि ७।, अङ्गुलेः ५।)।

पञ्चाङ्गुलं दारु। †

३३६। द्वित्रेर्मूर्द्ध्नः। (द्वित्रेः ५।, मूर्द्ध्नः ५।)। ‡

३३७। न्वोर्लोपौतौ तेऽच्ये।

(न्वोः ६॥, लोपौतौ १॥, ते ७।, अच्ये ७।)।

नस्य लोपः स्यात् उवर्णस्य औत् स्यादचि ये च ते। द्विमूर्द्धः। §

---

* सक्थि च अक्षि च तत् सक्थ्यक्षि तस्मात्। स्वस्य आत्मनः अङ्गं स्वाङ्गं तस्मिन्। स्वाङ्गलक्षणमुक्तं (२६५)। स्वाङ्गवाचिभ्यामाभ्यामित्यर्थः। ष-प्रत्ययस्य ष इत् (२५७) ईवर्थः, अकारस्थितिः। दीर्घे सक्थिनी (ऊरु) यस्य सः दीर्घसक्थः। पुण्डरीकवदिति, पुण्डरीकं सिताम्भोजं तदेव चक्षुर्न सम्भवति, अतो लक्षणया तत्तुल्यं अर्थः, अतएव वाक्ये पुण्डरीकवदित्युक्तं, एवं व्याघ्रश्वा (३५८) इति स्वयं वक्ष्यति। उभयत्र उदाहरणे अनेन षप्रत्यये, (२५८) इकारलोपः। षित्त्वात् स्त्रियां दीर्घसक्थी, सरोजाक्षी। दीर्घसक्थि इति शकटस्य प्राणित्वाभावादिति भावः। एवं स्थूलाक्षिरिक्षुः। हे किं, परमसक्थि, परमाक्षि। पाणिनिः ५।४।११३।

† अङ्गुलिशब्दात् षः स्यात् हे, दारुणि वाच्ये। दारु काष्ठं। पञ्च अङ्गुलयो यत्र तत् पञ्चाङ्गुलं दारु; "पञ्चाङ्गुलयो यस्मिन् तत् पञ्चाङ्गुलं दारु अङ्गुलिसदृशावयवं धान्यानां विक्षेपणकाष्ठमुच्यते" इति गोयीचन्द्रः। स्त्रियान्तु षित्त्वादीपि पञ्चाङ्गुली खनित्। दारुणि किं, पञ्चाङ्गुलिर्हस्तः। एवं पञ्चाङ्गुला शिला, इत्यत्र (३६७) सङ्ख्याव्यादिति अप्रत्यये, स्त्रियाम् आप्। पाणिनिः ५।४।११४।

‡ द्विश्च त्रिश्च तत् तस्मात्। द्वित्रिभ्यां परात् मूर्द्ध्नः षः स्यात् हे। पाणिनिः ५।४।११५।

§ न च उश्च न्‌ तयोः। लोपश्च औत् च लोपौतौ। अच् च यश्च अच्यं तस्मिन्, ते इत्यस्य विशेषणम्। द्वौ मूर्द्धानौ यस्य सः द्विमूर्द्धः, (३३६) षप्रत्यये, अनेन नलोपे, (२५८) अलोपः। एवं त्रयो मूर्द्धानो यस्य स त्रिमूर्द्धः। स्त्रियां द्विमूर्द्धी त्रिमूर्द्धी राक्षसी। द्वित्रेः किं, बहुमूर्द्धा। (४३१) न टं तसावित्यनेन टान्तत्वनिषेधात् (११८) नो लुप् फेऽधावित्यस्याप्राप्तौ नलोपार्थमिदम्। औत् यथा—बाहविः, बाभव्य इत्यादि। क्वचित् न स्यात् यथा—स्वायम्भुवं धाम। पाणिनिः ६।४।१४४,१४६।

३३८। सङ्ख्याया डोऽबहोः।

(सङ्ख्यायाः ५।, डः १।, अबहोः ५।)।

बहुवर्जायाः सङ्ख्याया डः स्यात् हे। पञ्च षट् परिमाणं येषां ते पञ्चषाः, उपगताः दश येषां ते उपदशाः। बहोस्तु उपबहवः। *

३३९। नाभेर्नाम्नि। (नाभेः ५।, नाम्नि ७।)।

पद्मनाभः। †

३४०। लोम्नोऽन्तर्वहिर्भ्यां।

(लोम्नः ५।, अन्तर्-वहिर्भ्यां ५॥)।

अन्तर्लोमः वहिर्लोमः। ‡

---

* नास्ति बहुर्यत्र सा अबहुस्तस्याः। बहुशब्दस्य (१०१) सङ्ख्यावदित्यनेन सङ्ख्यात्वातिदेशात् प्राप्तौ निषेधः। पञ्चषाः इति डप्रत्यये (१२६) टिलोपः। एवं द्विवाः चतुःपञ्चाः इत्यादि। उपगता विंशतिर्यस्य स उपविंशः, (१२६) डप्रत्यये विंशतेस्तिलोपः, (२५८) यर्योर्लोप इत्यकारलोपः। उपगता बहवो येषां ते उपबहवः। एवम् उपगणाः। बहुवर्जनात् सङ्ख्येयवृत्तिसङ्ख्याया एव ग्रहणं, तेन अष्टाभिः सह वर्त्तते या सा साष्टा पञ्चाशत् इत्यत्र सङ्ख्यावृत्तित्वात् न स्यात्। अतएव पाणिनौ संख्येये इत्युक्तम्। शोभनं प्रातर्यस्य तत् सुप्रातमित्यत्र "अव्ययादेरिति वक्तव्यम्" इति वार्त्तिकात् डप्रत्ययो वक्तव्यः। पाणिनिः ५।४।७३। अत्र "डच्प्रकरणे संख्यायास्तत्पुरुषस्योपसंख्यानम्" इति वार्त्तिकसूत्रात् निर्गतानि त्रिंशतो निस्त्रिंशानि वर्षाणि, निर्गतस्त्रिंशतोऽङ्गुलिभ्यः निस्त्रिंशः खड्गः इत्यपि वक्तव्यम्।

† नाभेः परो डः स्यात् हे संज्ञायाम्। पद्मं नाभौ यस्य, पद्मवत् नाभिर्यस्य इति वा, पद्मनाभो विष्णुः। एवं वज्रनाभः। ऊर्णा नाभौ यस्य स ऊर्णनाभः, ऊर्णनाभिरित्यन्ये, अत्र ऊर्णा इत्यस्य निपातनात् ह्रस्वः। नाम्नि किं, गभीरनाभिः। अरविन्दनाभिरिति तु समासान्तविधेरनित्यत्वात् असंज्ञात्वाद्वा। "अच् प्रत्यन्ववपूर्व्वात् सामलोम्नः" (पाणिनिः ५।४।७५) इति सूत्रे 'अजिति योगविभागादन्यत्रापि, पद्मनाभः' इति सिद्धान्तकौमुदी। क्वचिदन्यत्रापीति क्रमदीश्वरसूत्रम्, "एतदुपलक्षणम्, पद्मनाभिरपि भवति" इति गोयीचन्द्रः।

‡ पृथग्योगात् नाम्नीति नानुवर्त्तते। अन्तर्-वहिर्भ्यां परात् लोम्नो डः स्यात्

३४१। नञ्दुःसोः सक्थ्नो वा।

(नञ्दुःसोः ५।, सक्थ्नः ५।, वा ।१।)।

असक्थः असक्थिः। *

३४२। अस् प्रजायाः। (अस् ।१।, प्रजायाः ५।)।

अप्रजाः सुप्रजाः। †

३४३। मन्दाल्पाच्च तु मेधायाः।

(मन्दाल्पात् ५।, च ।१।, तु ।१।, मेधायाः ५।)।

अमेधाः सुमेधाः मन्दमेधाः। ‡

हे। अन्तर्गतानि लोमानि यस्य सः अन्तर्लोमः, एवं बहिर्लोमः। अन्तर्लोमा नासिका इति क्रमदीश्वरः। आभ्यां किं, दीर्घलोमा। पाणिनिः ५।४।११७।

* नञ् च दुश्च सुश्चेति तस्मात्। एभ्यः परात् सक्थ्नो डः स्याद्वा हे। नास्ति सक्थि यस्य सोऽसक्थः असक्थिः। एवं दुःसक्थः दुःसक्थिः, सुसक्थः सुसक्थिः। अत्र अस्वाङ्ग एव ग्रहणं, स्वाङ्गे तु (३३४) पूर्वेणैव षः। (अत्र सक्थिशब्दस्थाने शक्ति-रिति केचित् पठन्ति इति भट्टोजिदीक्षितः। क्रमदीश्वरस्तु शक्तिरिति पृथक् पदं स्वीकुरुते)। जयादित्यादिमतमवलम्ब्यैव वोपदेवेन लिखितम्। पाणिनिः ५।४।१२१।

† नञ्-दुः-सुभ्यः परस्याः प्रजाया अस् स्यात् हे। वेति नानुवर्त्तते पाणिनिसूत्रे नित्यमिति कथनात्। नास्ति प्रजा यस्यासौ अप्रजाः, असि कृते, (२५८) ययोर्लोप इत्याकारलोपे, (१८५) अत्वसोऽधोरिति दीर्घः। एवं दुष्प्रजाः, सुप्रजाः। इह नञादेर-व्यवहितोत्तरत्वमपेक्षितं, तेन सुगुणिप्रज इत्यादौ न स्यात्। पाणिनिः ५।४।१२२।

‡ मन्दश्च अल्पश्च तस्मात्। मन्दाल्पाभ्यां चकारात् नञ्दुःसुभ्यश्च परस्या मेधायाः अस् स्यात् हे। नास्ति मेधा यस्य सः अमेधाः, सुन्दरी मेधा यस्य सः सुमेधाः, मन्दा मेधा यस्य सः मन्दमेधाः। एवं दुर्मेधाः। अनेन अस्, (२५८) आलोपः, (१८५) दीर्घः। इहापि नञादेरव्यवहितोत्तरत्वमपेक्षितं, तेन मन्दबहुमेधः इत्यादौ न स्यात्। तन्त्रत्वात् मन्दादीनां परत्र नानुवृत्तिः। "नित्यमसिच् प्रजामेधयोः" (५।४।१२२) इति पाणिनिसूत्रे 'नित्यग्रहणं क्वचिदन्यत्रापि विधानार्थम्, अल्पमेधाः' इति तट्टीका। "मन्दाल्पाभ्यां मेधायाः" इति चन्द्रवर्द्धमानसूत्रम्। अतएव "अन्यतो-ऽपीत्येके" इति क्रमदीश्वरसूत्रम्। जयादित्येनापि शिष्टप्रयोगो दर्शितः, यथा "श्रोत्रि-यस्यैव ते राजन् मन्दकस्याल्पमेधसः। अनुवाकहता बुद्धिर्नैषा सूक्ष्मोपदर्शिनी॥"

३४४। धर्म्मादन्। (धर्म्मात् ५।, अन् ।१।)।

सुधर्म्मा।*

३४५। नञ्सुत्रिव्युपाच्चतुरोऽः।

(नञ्-सु-त्रि-वि-उपात् ५।, चतुरः ५।, अः १।)।

एभ्यश्चतुरः अः स्यात् हे। अचतुरः सुचतुरः।†

३४६। भान्नेतुः। (भात् ५।, नेतुः ५।)।

नक्षत्रात् नेतृशब्दात् अः स्यात् हे। मृगनेत्रा रात्रिः।‡

---

* पूर्व्वपदाभावे बहुव्रीहिरेव न स्यादित्यतः पूर्व्वपदात् परात् धर्म्मादन् स्यात् हे। सु धर्म्मो यस्य स सुधर्म्मा,—अनेन अन्, (२५८) अकारलोपः, (१६४) दीर्घः। एवं सधर्म्मा विधर्म्मा बहुधर्म्मा इत्यादि। अत्र मतभेदो दृश्यते यथा—"धर्म्मादनिच् केवलात्" (५।४।१२४) इति पाणिनिसूत्रस्य "केवलात् पूर्व्वपदात् परो यो धर्म्मशब्दः तस्मादनिच् भवति न पदसमुदायात् अतस्त्रिपदे बहुव्रीहौ न भवतीति" चन्द्रवर्द्धनाम-जयादित्यादिकृता व्याख्या। भट्टोजिदीक्षितोऽप्येवमाह। तन्मते परमः स्वो धर्म्मो यस्मात् त्रिपदे बहुव्रीहौ मा भूत्; किन्तु परमः स्वधर्म्मो यस्येत्यत्र अनिच् भवत्येव, स्वः स्वकीयो धर्म्मः स्वधर्म्म इति कर्म्मधारयेण स्वधर्म्मशब्दस्य धर्म्मान्तत्वात्। क्रमदीश्वरेण तु 'साक्षात्कृतो धर्म्म एतैः साक्षात्कृतधर्म्माणो वेदितव्याः' इति भाष्यदर्शनात् "अकृत-समासान्तराद्धर्म्मादन्" इत्येव सूत्रं कृतम्। तन्मते परमः सुधर्म्मो यस्येति परमसुधर्म्मः, अनुपालितकुलधर्म्मः इत्येव स्यात्, न तु अन्। 'परमः शोभनो धर्म्मोऽस्येति त्रिपदे बहुव्रीहौ तु परमसुधर्म्मा इत्येव भवतीति' गोयीचन्द्रः। वस्तुतस्तु पाणिनिसूत्रस्थकेवल-शब्दो धर्म्मादित्यस्य विशेषणं, केवलात् अकृतसमासान्तरादिति तस्यार्थश्चेति क्रमदीश्वरमतं प्रतिभाति। बोपदेवमतमपि तथेति निरुपपदधर्म्मपदप्रयोगादनुमीयते।

† नञ् च सुश्च त्रिश्च विश्च उपश्चेति तस्मात्। एभ्यः परात् चतुर्शब्दात् अः स्यात् हे। न सन्ति चत्वारि यस्यासौ अचतुरः, सुष्ठु चत्वारि यस्यासौ सुचतुरः। एवं त्रीणि चत्वारि वा परिमाणं येषां ते त्रिचतुराः। विगताश्चत्वारो यस्य स विचतुरः। उपगताश्चत्वारो यस्याः सा उपचतुरा। पाणिनिः ५।४।७७। "त्र्युपाभ्यामुपसंख्यानम्" इति वार्त्तिकञ्च।

‡ नक्षत्रात् नक्षत्रवाचकादित्यर्थः परात् नेतृशब्दात् अः स्यात् हे। मृगः मृगशिरो नक्षत्रं नेता प्रापको यस्याः सा रात्रिः मृगनेत्रा, अ-प्रत्यये (२४९) आप्। एवं पुष्यनेत्रा

३४७। सङ्ख्यासुपमानात् पात् पादोऽहस्त्यादेः।

(सङ्ख्या सु-उपमानात् ५।, पात् ।१।, पादः १।, अहस्त्यादेः ५।)।

एभ्यः पादस्य पात् स्यात् हे, न तु हस्त्यादेः।
द्विपात् सुपात् व्याघ्रपात्। हस्त्यादेस्तु हस्तिपादः। *

३४८। कुम्भादेरीपि।

(कुम्भादेः ५।, ईपि ७।)।

कुम्भादेः परस्य पादस्य पात् स्यात् हे ईपि परे।
(२२३) पात् पत् पौ। कुम्भपदी शतपदी। ईपि किं, कुम्भपादः। †

हस्तनेत्रा इत्यादि। यस्मिन् नक्षत्रे उदिते रात्रिः प्रवर्त्तते तत् तस्या नेत। "नेतुर्नक्षत्र उपसङ्ख्यानम्" इति वार्त्तिकम्।

* सङ्ख्या च सुश्च उपमानञ्च तस्मात्। न हस्त्यादिरहस्त्यादिस्तस्मात्। एभ्यः परस्य अकारान्त-पाद-शब्दस्य पाद् स्यात् हे, न तु हस्त्यादेः परस्य। उपमानतया प्राप्तौ हस्त्यादेर्निषेधः। द्वौ पादौ यस्य स द्विपात्। शोभनौ पादौ यस्य स सुपात्। व्याघ्रस्येव पादौ यस्य स व्याघ्रपात्। हस्तिन इव पादौ यस्य स हस्तिपादः। हस्त्यादिर्यथा—हस्ती कटोलः कण्डोली गण्डोली गणिका महान्। दासी कुसूल इत्यष्टौ हस्त्यादौ परिकीर्त्तिताः॥ कटोलश्चण्डालः, गण्डोली धान्याद्याधारविशेषः, डोल इति भाषा। पाणिनिमते—कुद्दाल अज अश्व गरुड़ कपोत—एतेऽपि हस्त्यादिगणपठिताः। अत्र गृढादपीति वक्तव्यं, तेन गृढपात् सर्पः। पाणिनिः ५।४।१३८,१४०।

† अत्र ईपीति विषयसप्तमी, ईपि कर्त्तव्ये इत्यर्थः। कुम्भाविव पादौ यस्याः सा कुम्भपदी, शतं पादा यस्याः सा शतपदी, अनेन पादस्य पाद, (२६५) ईप्, (२२३) पदादेशः। कुम्भादिर्यथा—कुम्भाष्टजालाः शतसूत्रगोधाः विष्णुः शितिर्द्रोण-कुणी च कृष्णः। निरार्द्रसूचीशकृदेकदास्यौ विः शूकरो वै कलसोऽपि वेति॥ "कुम्भाष्टजालशत-मुनिसूत्रकृष्णकुणिशितिकलसाः। विनिरर्द्रसकृत्सूचीशूकरदास्येकद्रोणगोधाश्च॥" इति गोयीचन्द्रः। अत्र आर्द्रशब्दस्थाने अर्द्रशब्दः विष्णुशब्दस्थाने मुनिशब्दश्च पठितः, सकृत्शब्दः दन्त्यादिश्च। अयं गणो-विंशतिसंख्यकः, पाणिनीये गणपाठे तु द्वात्रिंशत्-संख्यकः। पूर्व्वसूत्रेणैव पाद-आदेशसिद्धौ नियमार्थोऽयं, तेन ईपोऽभावपक्षे न पाद-आदेशः। पाणिनिः ५।४।१३९।

३४९। व्यतीहारे चिः पूर्व्वो घोऽनच्या वा।

(व्यतीहारे ७।, चिः १।, पूर्व्वः १।, घः १।, अनचि ७।, आ ।१।, वा ।१।)।

व्यतीहारे यो ह्रस्तस्मात् चिः स्यात्, पूर्व्वस्य च घः स्यात्, आ वा नत्वचि।

केशेषु केशेषु गृहीत्वा यत् युद्धं प्रवृत्तं—केशाकेशि।

दण्डैश्च दण्डैश्च प्रहृत्य यत् युद्धं प्रवृत्तं—दण्डादण्डि।

मुष्टामुष्टि मुष्टीमुष्टि, बाहाबाहवि बाहूबाहवि। अचि तु, अस्यसि।*

इति हः।

---

* परस्परमेकजातीयक्रियाकरणं व्यतीहारः, तत्र यो बहुव्रीहिस्तत्परपदात् चिः स्यात, चकारेत् अव्ययार्थं (९४), इकारस्थितिः। घौ कृते पूर्व्वपदस्य आकारः, पक्षे दीर्घश्च, अचि परे तु न आकारः, नापि दीर्घं इत्यर्थः। केशाकेशि दण्डादण्डि उभयत्र पूर्व्वपदस्याकारः, परपदात् चिः, (२५८) अकारलोपः, (२४६) लोर्लुक्। एवं मुष्टिभिर्मुष्टिभिः प्रहृत्य यद् युद्धं प्रवृत्तं मुष्टामुष्टि मुष्टीमुष्टि ; बाहुभिर्बाहुभिः प्रहृत्य यद् युद्धं प्रवृत्तं बाहाबाहवि बाहूबाहवि, उभयत्र पूर्व्वपदस्याकारः, पक्षे दीर्घः, परपदात् चिः, बाहुशब्दस्य तु विशेषसूत्रात् (३३७) उकारस्य ओकारः, (३५) ओकारस्य अव्। असिभिः असिभिः प्रहृत्य यद् युद्ध प्रवृत्तम् अस्यसि, अत्र परपदात् चिः पूर्व्वपदस्य तु न आकारः नापि दीर्घः अच्परत्वात्। उदाहरणज्ञापकात्, तत्र गृहीत्वा तेन प्रहृत्य युद्धे व्यतीहारे यो ह्रस्तत्रैवायं विधिरिति, तेन कायश्च कायश्च गृहीत्वा रथे च रथे च स्थित्वा इत्यादौ न स्यात्। अतएव "तत्र तेनेदमिति सरूपे" इति पाणिनिसूत्रम् (२।२।२७)। "कर्म्मव्यतिहारे युद्धएवायं समासः। तत्रापि सप्तम्यन्तस्य ग्रहणविषये ; तृतीयान्तस्य प्रहरणविषये। सरूपे किं, हलैश्च मुषलैश्चेदं युद्धं प्रवृत्तम्" इति टीका। पाणिनिः ५।४।१२७, ६।३।१३७।

बहुव्रीहौ, (पाणिनिः ५।४।१३४) जायाया जानिः, (पाणिनिः ५।४।१३२) धनुषो धन्वन्, (५।४।१३३) वा संज्ञायाम्, (पाणिनिः ५।४।१२९) प्रसंभ्यां जानुनो ज्ञुः, (५।४।१३०) ऊर्द्ध्वाद्विभाषा, इत्यादि प्रयोगानुसारात् वक्तव्यम। यथा—युवजानिः, अधिज्यधन्वा, शतधन्वा शतधनुः, पुष्पधन्वा पुष्पधनुः, प्रज्ञुः संज्ञुः, ऊर्द्ध्वज्ञुः ऊर्द्ध्वजानुरित्यादि।

कर्म्मधारय-समासः (य)।

परमश्चासावात्मा चेति—परमात्मा।

संश्चासौ चिश्चासा-वानन्दश्चेति—सच्चिदानन्दः। *

३५०। कोड़ादिः पुंवत् यजातीयदेशीये तत्वे त्वजात्याख्यः।

(कोड़ादि: १।, पुंवत् ।१।, य जातीय-देशीये ७।, तत्वे ७।, तु ।१।, अजात्याख्यः १।)।

कोङ्पूरण्यादिः पुंवत् स्यात् यादौ, तत्वयोस्तु जातिसंज्ञावर्ज्जं।

पाचकस्त्री पञ्चमभार्य्या। †

---

* उत्तरपदद्विगु-द्वन्द्व-बहुव्रीहि-वर्ज्जं पदबहुत्वे समासो नास्तीति दुर्गसिंह-क्रमदीश्वरौ। तन्मतमस्वीकुर्व्वन् त्रिभिः पदैरपि कर्म्मधारयमाह सच्चिदानन्द इति। आनन्दयतीति आनन्दः इति विशेष्यं पदं, त्रयाणां विशेषणत्वे समासानुपपत्तेः। कुब्जकुण्ठः पटुविस्पष्टः इत्यादावुभयस्य विशेषणत्वेऽपि विशेष्यविशेषणभावस्य कामचारत्वात् एकस्य विशेष्यत्वं कल्प्यते। विशेषणस्य तु पूर्व्वस्थितिरेव, तेन ब्राह्मणदीर्घः एवं न स्यात्। कडारादिशब्दास्तु वा पूर्व्वं प्रयोज्याः, (पाणिनिः २।२।३८) तेन कड़ारजैमिनिः जैमिनि-कडारः इत्यादि। कड़ारादिर्यथा—कड़ार जठर गडुल काण खोड़ खञ्जः कुब्ज कुण्ठ खलति गौर वृद्ध भिक्षुक पिङ्ग पिङ्गल तनु बधिर मठर वर्ब्बर इति।

मयूरव्यंसकाद्याः, (पाणिनिः २।१।७२) शाकपार्थिवाद्याश्च (शाकपार्थिवादीनां सिद्धये उत्तरपदलोपसंख्यानमिति वार्त्तिकम्) निपात्यन्ते। व्यंसयति छलयतीति व्यंसको धूर्त्तः, विपूर्व्वादंसधातोर्ण्वकः, मयूरश्चासौ व्यंसकश्चेति मयूरव्यंसकः। एवं उद्धर उत्सृज इति यस्यां क्रियायां सा उद्धरोत्सृजा, उद्धमविधमा, उत्पतनिपता, अश्नीतपिबता इत्यादि। शाकः शक्तिः वत्सरो वा प्रियो यस्य सः शाकप्रियः, शाकप्रियः पार्थिवः शाकपार्थिवः, निपातनात् मध्यपदलोपः। एवं श्रीहर्षनामा नृपतिः श्रीहर्ष-नृपतिः, मेरुनामा महीभृत् मेरुमहीभृत्, सुखयुक्ता नासिका सुखनासिका इत्यादि। मयूरव्यंसकादिः शाकपार्थिवादिश्च आकृतिगणः, प्रयोगानुसारेण बोद्धव्यः, तेन अन्यो राजा राजान्तरम्, अकिञ्चनः, अकुतोभयः, उच्चावचं, चिदेव चिन्मात्रमित्यादि मयूर-व्यंसकाद्यन्तर्गतम्।

† क उङ् यस्य स कोङ्, कोङ् आदिर्यस्य स कोङादिः। यश्च जातीयश्च देशीयश्च तस्मिन्। तश्च त्वश्च तत्वं तस्मिन्। जातिश्च आख्या च जात्याख्ये, न विद्यते

३५१। द्वित्र्यष्टाधिका द्वात्रयोऽष्टा-स्त्रिदशाद्येऽन्यषट्के त्वनशीतौ वा।

(द्वित्र्यष्टाधिकाः १।॥, द्वात्रयोऽष्टाः १।॥, त्रिदशाद्ये ७।, अन्यषट्के ७।, तु ।१।, अनशीतौ ७।, वा ।१।)।

एषामेते क्रमात् स्युः दशादित्रिके, चत्वारिंशदादिषट्के अशीति-वर्जे तु वा।

द्व्यधिका दश द्वादश, त्रयोदश, अष्टादश।

द्वाचत्वारिंशत् द्विचत्वारिंशत्। अनशीतौ किं द्व्यशीतिः।*

जात्याख्ये यत्र क्रोडादौ सोऽजात्याख्यः। (३२७) पुंवत् स्युरुक्तपुंस्केत्यनेन उक्तपुंस्कस्य क्रोडादेः पुंवद्भावप्रसक्तौ, (३२८) नोपाककोडित्यनेन निषेधे, कर्म्मधारयादौ पुनरनेन विधिः क्रियते, तेनायमर्थः—तद्धितस्य अकस्य वा केन कृतौ क्रोडादि, पूरणीप्रत्ययान्तस्, आख्याभूतम्, इम् उम्-रक्तार्थ-विकारार्थवर्जं णितद्धितान्तं, जाति-स्वाङ्ग-विहितेबन्तञ्च पदं यदि उक्तपुंस्कं भवति, तदा एकार्थे स्त्रीलिङ्गे परे कर्म्मधारयादौ पुंवत् स्यात्, जातीय-देशीय-प्रत्यये च परे पुंवत् स्यात्, तत्वयोः परयोस्तु जातिसंज्ञावर्जं उक्तपुंस्कः क्रोडादिः पुंवत् स्यादित्यर्थः। जातीयप्रत्यये पुंवद्भावप्रसङ्गाभावेऽपि अनेन विशेषविधानम्। यथा—रसिका चासौ भार्य्या चेति रसिकभार्य्या, पाचिका चासौ स्त्री चेति पाचकस्त्री, पञ्चमी चासौ भार्य्या चेति पञ्चमभार्य्या। एवं दत्तभार्य्या, मैथिलभार्य्या, ब्राह्मणभार्य्या, सुकेशभार्य्या, (४८७) रसिकजातीया, (४७७) रसिकदेशीया, (४३८) रसिकता रसिकत्वम्। क्रोडादिभिन्नस्य तु दीर्घाजातीया इत्यादीनां न पुंवत्। उक्तपुंस्क किं गङ्गिकाभार्य्या इत्यादि। अजात्याख्य इति किं, ब्राह्मणीत्वं दत्तात्वं ; गुणवाचकात्तु स्यादेव, यथा, शुक्लायाः भावः शुक्लत्वमित्यादि। केचित्तु क्रोडादिरित्यनेन येषां पुंवद्भावो निषिद्धस्ते गृह्यन्ते, तेन (३२९) पूरणीप्रियेत्यादौ निषेधेऽपि कर्म्मधारये पुंवद्भाव इत्याहुः, यथा—कल्याणपञ्चमी महाष्टमी महानवमी कल्याणप्रिया इत्यादि।

क्रोडादिः (३२८) नोपाककोड् इत्यादिसूत्रे ये पठिताः, पूरण्यादिः (३२९) पूरणी-प्रियेत्यादिसूत्रे ये पठिताः, ते पुंवत् स्युः ये जातीयदेशीये च परे, त-त्वे परे तु जातिवाचकस्य सञ्ज्ञावाचकस्य च न स्यादित्यर्थः इति रामतर्कवागीशः। पाणिनिः ६।३।४२। "त्वतलोर्गुणवचनस्य" इति वार्त्तिकम्।

* द्वौ च त्रयश्च अष्ट च ते द्वित्र्यष्ट, द्वित्र्यष्टभिः सहिता अधिकाः द्वित्र्यष्टाधिकाः, शाकपार्थिवादित्वात् सहितपदस्य लोपः, तस्मात् परस्याधिकशब्दस्य प्रत्येकेन सम्बन्धात्

३५२। वैकोनस्यैकाद्नैकान्नौ सङ्ख्यायां।

(वा ।१।, एकोनस्य ६।, एकाद्न-एकान्नौ १॥, सङ्ख्यायां ७।) ।

एकाद्नविंशतिः एकान्नविंशतिः एकोनविंशतिः। *

३५३। सख्यह्नोराज्ञः षः षगे च।

(सखि-अहन्-राज्ञः ५।, षः १।, ष-गे ७।, च ।१।) ।

एभ्यः षः स्यात् ये षे गे च। प्रियसखः परमाहः महाराजः। †

द्व्यधिक-त्र्यधिक अष्टाधिका इत्यर्थः। द्वाश्च त्रयश्च अष्टाश्च द्वात्रयोऽष्टाः, दश आद्यो येषां ते दशाद्याः, त्रयाणां दशाद्यानां समाहारः त्रिदशाद्यं तस्मिन्। षणां समूहः षट्कं, अन्त्यञ्च तत् षट्कञ्चेति तस्मिन्। न अशीतिरनशीतिस्तस्याम्। त्रिदशाद्यशब्देन दश-विंशति-त्रिंशत्-शब्दानामेव ग्रहणम्, अन्यथा अन्त्यषट्के अशीतिवर्जनमनर्थकं स्यात्। तेन द्व्यधिकत्र्यधिकाष्टाधिकानां स्थाने क्रमात् द्वा त्रयस् अष्टा इत्येते आदेशा भवन्ति दशशब्दे विंशतिशब्दे त्रिंशत्शब्दे च परे, प्रकरणात् कर्म्मधारये; चत्वारिंशत् पञ्चाशत् षष्टि सप्तति नवतीति पञ्चसु परेषु वा स्युरित्यर्थः। द्व्यधिकाश्च ते दश चेति द्वादश, त्र्यधिकाश्च ते दश चेति त्रयोदश, अष्टाधिकाश्च ते दश चेति अष्टादश, शाकपार्थिवादित्वात् अधिकपदलोपः। एवं द्वाविंशतिः त्रयोविंशतिः अष्टाविंशतिः, द्वात्रिंशत् त्रयस्त्रिंशत् अष्टात्रिंशत्। द्व्यधिका चासौ चत्वारिंशच्चेति द्वाचत्वारिंशत्, पक्षे द्विचत्वारिंशत्। एवं द्वापञ्चाशत् द्विपञ्चाशत्, द्वाषष्टिः द्विषष्टिः, द्वासप्ततिः द्विसप्ततिः, द्वानवतिः द्विनवतिरित्यादि। अशीतौ तु न आदेशः, तेन द्व्यशीतिः त्र्यशीतिः अष्टाशीतिः। कर्म्मधारये किं, द्व्यधिका दश यत्र स द्व्यधिकदश इत्यादौ न स्यात्। अन्त्यषट्के इति किं, द्विशतं, त्रिसहस्रमित्यादि। पाणिनिः ६।३।४७,४८,४९। प्राक् शतादिति वक्तव्यमिति वार्त्तिकञ्च।

* एकोनस्य स्थाने एकाद्न-एकान्नौ स्यातां सङ्ख्यावाचके परे ये। एकोना चासौ विंशतिश्चेति एकाद्नविंशतिरित्यादि। वाशब्दस्य व्यवस्थया सङ्ख्या इह विंशत्यादिरेव, तेन एकोनाश्च ते दश चेति एकोनदश इत्येव। "यद्यपि संख्यायामिति सामान्येनोक्तं तथापि विंशति त्रिंशत् चत्वारिंशत् पञ्चाशत् षष्टि सप्तति अशीति नवति शत सहस्रादावेव परेऽन्नाद्नावादेशौ भवतः, नत्वन्यस्मिन् संख्याशब्दे परेऽनभिधानात्" इति गोयीचन्द्रः। ये किं, एकोना विंशतिर्यत्र स. एकोनविंशतिरिति। पाणिनिः ६।३।७६।

† सखा च अहश्च राजा चेति तस्मात्। प्रियश्चासौ सखा चेति प्रियसखः, अनेन षः (२५८) इकारलोपः। स्त्रियां षित्वादीपि (२५७) प्रियसखी। परमञ्च तत् अहश्चेति

३५४। सर्व्वैकदेशसङ्ख्यातसङ्ख्याव्यान्नैकान्नैक्येऽह्नोऽह्नः।

(सर्व्व—व्यात् ५।, न ।१।, एकात् ५।, न ।१।, ऐक्ये ७।, अह्नः ६।, अह्नः १।)।

एभ्यः परस्य अहन् इत्यस्य स्थाने अह्नः स्यात् यादौ नत्वेकात् न चैक्ये। *

३५५। प्राग्वत् नो णोऽतोऽह्नस्य।

(प्राग्वत् ।१।, न. ६।, णः १।, अत. ५।, अह्नस्य ६।)।

सर्व्वाह्णः पूर्व्वाह्णः। एकात्तु एकाहः।

अत इति किं, त्रिभिरहोभिर्जातः त्र्यह्नः। †

परमाहः, षप्रत्यये, (३३७) नलोपे, (२५८) अकारलोपः, अहान्तानां पुंस्त्वमभिधानात्। महांश्चासौ राजा चेति महाराजः, (३२६) महतस्तस्य आकारः, षप्रत्यये, न-लोपे, अकारलोपः। स्त्रियां महाराज्ञी, "महाराज्ञी तु प्रायो नामग्रहणे स्त्रीलिङ्गस्यापि ग्रहणमित्यस्य प्रायिकत्वात्" इति क्रमदीश्वरः। "महती चासौ राज्ञी चेति" इति गोयीचन्द्रः। "लिङ्गविशिष्टपरिभाषया अनित्यत्वान्नेह मद्राणां राज्ञी मद्रराज्ञी" इति भट्टोजिदीक्षितः। एवं कृष्णस्य सखा कृष्णसखः, त्रयाणां सखीनां समाहारस्त्रिसखं। यादौ किं, कृष्णः सखा यस्य स कृष्णसखिः, कृष्णसखा इति तु भाष्यकारः (१२९ सूत्रटीका द्रष्टव्या)। अतएव "वायुः सखा यस्य स वायुसखा" इति गोयीचन्द्रः। पाणिनिः ५।४।९१।

* सर्व्वश्च एकदेशश्च सङ्ख्यातश्च सङ्ख्या च व्यश्च समाहारे तस्मात्, न एको नैकस्तस्मात्, न ऐक्यं नैक्यं तस्मिन्। अत्र एकैकभागे वर्त्तमानः पूर्व्वादिरेकदेशः। एभ्यः परस्य अहन्शब्दस्य अह्न इत्यकारान्त आदेशः स्यात्, नतु एकात्, न च समाहारे द्विगौ। पाणिनिः ५।४।८८।

† प्राग्वदित्यनेन (१०७) षृ्ः अवकुपुन्तरेऽपीति च प्राप्तं, तथाच—षकार-रेफ-ऋवर्ण-युक्तात् अदन्तात् परस्य अह्न इत्यकारान्तस्य नो णः स्यात् अव-कु-पु-अन्तरेऽपीत्यर्थः। सर्व्वञ्च तत् अहश्चेति सर्व्वाह्णः, पूर्व्वञ्च तत् अहश्चेति पूर्व्वाह्णः। एवं प्राह्णः अपराह्णः इत्यादि (३५३,३५४,३५५)। एकञ्च तदहश्चेति एकाहः (३५३, ३३७,२५८)। त्र्यह्न इति तद्धितार्थद्विगुः, प्रत्युदाहरणार्थमिहोक्तम्। अह्नस्येत्यकारान्त

३५६ । कौटग्रामात् तक्ष्ण: ।

(कौट-ग्रामात् ५।, तक्ष्ण ५।) ।

कौटतक्ष:, (ग्रामतक्ष:) । *

३५७ । जातमहद्वृद्धादुक्ष्ण: ।

(जात-महत्-वृद्धात् ५।, उक्ष्ण. ५।) ।

जातोक्ष:, महोक्ष:, वृद्धोक्ष: । †

३५८ । श्वनोऽत्यप्राण्युपमानात् ।

(श्वन: ५।, अति-अप्राण्युपमानात् ५।) ।

अते: प्राणिवर्जादुपमानाच्च श्वन: ष: स्यात् यादौ ।

आकर्ष इव श्वा आकर्षश्व: । प्राणिनस्तु, व्याघ्रइव श्वा व्याघ्रश्वा । ‡

इति किं, दीर्घाणि अह्नानि यस्यां सा दीर्घाह्नी शरत् । प्राग्वदिति कि, सङ्ख्याताह्न: व्यह्न: । पूर्व्वत्र नेक्ये इति किं, द्वयोरह्नो: समाचार: द्व्यह: । एतेषां पुंस्त्वमभिधानात् । पुण्याहमिति तु नपुंसकं "अपथपुण्याहे नपुंसके" इति लिङ्गानुशासन विशेष सूत्रात् । एवं सुदिनाहमिति । "पुण्यसुदिनाभ्यां क्लीवे" इति क्रमदीश्वरसूत्रम् । पाणिनि: ८।४।७ ।

* आभ्यां परात् तक्षन्शब्दात् ष स्यात् यादौ । कुट्यां भव: कौट. कौटश्चासौ तक्षा चेति कौटतक्ष: "स्वतन्त्रकर्म्मजीवी न कस्यचित् प्रतिबद्ध." इति गोयीचन्द्र: । ग्रामस्य तक्षा ग्रामतक्ष: "बहूना साधारण इत्यर्थ." इति गोयीचन्द्र: कौटग्रामात किं राजतक्षा । पाणिनि: ५।४।९५ ।

† एभ्य: परात् उक्षन्शब्दात् ष: स्यात् यादौ । जातश्चासौ उक्षा चेति जातोक्ष एवं महोक्ष:, वृद्धोक्ष: । यादौ किं, महान् उक्षा यस्य स महोक्षा शिव: । पाणिनि.५।४।७७ ।

‡ न प्राणी अप्राणी, अप्राणी चासौ उपमानश्चेति अप्राण्युमानं, अतिश्च अप्राण्युपमानञ्चेति तस्मात् । आकृष्यतेऽनेनेति आकर्ष:, आकुड़सी इति ख्यात: । आकर्षशब्देन लक्षणया आकर्षतुल्य उच्यते, तज्ज्ञापनार्थम् इवशब्द: । आकर्ष इति अप्राण्युपमानात् परात् श्वन्शब्दात् ष: । अतेस्तु, श्वानमतिक्रान्त. अतिश्व: वराह:, अतिश्वी सेवा । व्याघ्रशब्देन लक्षणया व्याघ्रतुल्य उच्यते, व्याघ्रश्चासौ श्वा चेति व्याघ्रश्वा, प्राण्युपमानात् न ष: । पाणिनि: ५।४।९६,९७ ।

३५९ । पूर्व्वोत्तरमृगाच्चानतेः सक्थ्नः ।

(पूर्व्व-उत्तर-मृगात् ५।, च ।१।, अनतेः ५।, सक्थ्नः ५।) ।

एभ्यः पूर्व्वोक्ताच्च अतिवर्ज्जात् सक्थ्नः षः स्यात् यादौ ।
पूर्व्वसक्थं । *

३६० । देशात् ब्रह्मणः कुमहद्भ्यान्तु वा ।

(देशात् ५।, ब्रह्मणः ५।, कु-महद्भ्यां ५॥, तु ।१।, वा ।१।) ।

कुत्सितो ब्रह्मा कुब्रह्मः कुब्रह्मा । †

३६१ । सरोऽनोऽयोऽश्मनः संज्ञाजात्योः ।

(सरस्-अनस् अयस्-अश्मनः ५।, संज्ञा-जात्योः ७॥) ।

महानसं उपानसं लोहितायसं पिण्डाश्मः अमृताश्मः । ‡

---

* पूर्व्वश्च उत्तरश्च मृगश्च तस्मात् । नास्ति अतिर्यत्र सोऽनतिस्तस्मात् । पूर्व्वोत्तरमृगेभ्यः अप्राण्युपमानाच्च सक्थ्नः षः स्यात् यादौ । पूर्व्वञ्च तत् सक्थि चेति पूर्व्वसक्थ । एवम् उत्तरसक्थं । पूर्व्वोत्तरशब्दौ अवयववाचिनौ । मृगस्य सक्थि मृगसक्थं । फलकमिव सक्थि फलकसक्थं, शिलासक्थं । प्राण्युपमानात्तु व्याघ्रसक्थि । अतेस्तु सक्थि अतिक्रान्तः अतिसक्थिः । पाणिनि. ५।४।९८ ।

† देशवाचकात् परात् ब्रह्मणः षः स्यात् यादौ, कुमहद्भ्यां परात्तु वा । अवन्तिषु ब्रह्मा अवन्तिब्रह्मः, सुराष्ट्रब्रह्मः । देशात् किं, देवब्रह्मा नारदः । महांश्चासौ ब्रह्मा चेति महाब्रह्मः महाब्रह्मा । ब्रह्मन्शब्दोऽत्र ब्राह्मणवाची । पाणिनिः ५।४।१०४,१०५ ।

‡ सरस् च अनस् च अयस् च अश्मन् चेति तस्मात् । संज्ञा च जातिश्च संज्ञाजाती तयोः । संज्ञालक्षणमाह गोयीचन्द्रः "यो योगवृत्तिमितरत्रापहाय विशेषे वर्त्तते स एव संज्ञाख्यां लभते ।" जातिलक्षणन्तु पूर्व्वमेवोक्तं स्त्रीत्वे २६३ सूत्रे । एभ्यः षः स्यात् यादौ संज्ञायां जातौ च । जलस्य सरः जलसरसं संज्ञा । जलसरसमिति तु भट्टोजिदीक्षितः । चन्द्रसरो हैतवनसरः अच्छोदसरः इत्यादौ तु न भवति । मण्डूकसरसं जातिः । महच्च तत् अनश्चेति महानसं संज्ञा । उपगतमनः उपानसं जातिः । लोहितमयः लोहितायसं संज्ञा । कालमयः कालायसं जातिः । पिण्ड इव अश्मा पिण्डाश्मः संज्ञा । अमृतं अश्मा अमृताश्मः जातिः । संज्ञाजात्योः किं, दीर्घसरः उदानः कृष्णायः भस्माश्मा । पाणिनिः ५।४।९४ ।

३६२ । सर्व्वैकदेशसङ्ख्यातपुण्यवर्षादीर्घाद्रात्रेः ।

(सर्व्व—दीर्घात् ५।, रात्रे: ५।) ।

रात्रेरेकैकदेशे वर्त्तमानः पूर्व्वादिरेकदेशः ।

पूर्व्वरात्रः अपररात्रः । *

३६३ । गोरतार्थे । (गो: ५।, अतार्थे ७।) ।

गोशब्दात् षः स्यात् यादौ, न तु तार्थे । परमगवः । †

३६४ । नावोऽर्द्धात् गे च ।

(नाव: ५।, अर्द्धात् ५।, गे ७।, च ।१।) ।

अर्द्धात् परात् नौशब्दात् षः स्यात्, अतार्थे गे च । अर्द्धनावं । ‡

३६५ । खार्य्या वा । (खार्य्या: ५।, वा ।१।) ।

अर्द्धखारं अर्द्धखारी । §

इति यः ।

---

* सर्व्वश्च एकदेशश्च सङ्ख्यातश्च पुण्यश्च वर्षाश्च दीर्घश्च तस्मात् । एभ्यः परस्याः रात्रेः षः स्यात् यादौ । सर्व्वा चासौ रात्रिश्चेति सर्व्वरात्रः । रात्रान्तानां पुंस्त्वमभिधानात् । पूर्व्वा चासौ रात्रिश्चेति पूर्व्वरात्रः रात्रेः पूर्व्वभाग इत्यर्थः, एवमपररात्रः, मध्यरात्रः, सङ्ख्यातरात्रः, पुण्यरात्रः, वर्षाणां रात्रिः वर्षारात्रः, दीर्घरात्रः । पाणिनिः ५।४।८७ ।

† परमश्चासौ गौश्चेति परमगवः । एवं पुमांश्चासौ गौश्चेति पुंगवः । राज्ञो गौः राजगवः । त्रयाणां गवां समाहारः त्रिगवं, षण्णां गवां समाहारः षड्गवं । पञ्च गावो धनमस्य पञ्चगवधनः । अतार्थे किं, पञ्चभिर्गोभिः क्रीतः पञ्चगुः । पाणिनिः ५।४।९२ ।

‡ अत्र सूत्रे परत्र च यादेरनुवृत्तावपि अभिधानात् अर्द्धात् परात् नौशब्दात् ये एव षः स्यात्, पुन. गे च इति कथनात् नौशब्दात् षः स्यात् अतार्थे गे च इत्यपरोऽर्थो बोद्धव्यः । अतएव पाणिनौ सूत्रद्वयम् । अर्द्धञ्च तत् नौश्चेति अर्द्धनावं क्लीवत्वमभिधानात् । अर्द्धात् किं, दीर्घनौः । एवं द्विनावं द्विनावधनः । तार्थे तु, पञ्चभिः नौभिः क्रीतः पञ्चनौः । पाणिनिः ५।४।९९,१०० ।

§ अर्द्धात् परात् खारीशब्दात् षः स्यात् वा ये । खारीशब्दात् षः स्यात् वा अतार्थे गे च इति च अर्थः । अर्द्धञ्च तत् खारी चेति अर्द्धखारं, क्लीवत्वमभिधानात् । पक्षे अर्द्ध-

तत्पुरुष-समासः (ष) ।

कृष्णमाश्रितः कृष्णाश्रितः । * .

३६६ । व्यं पूर्व्वं । (व्यं १।, पूर्व्वं १।) ।

परं व्यं पूर्व्वं स्यात् से सति ।

खारी । एवं त्रिखारं त्रिखारि, द्विखारधनः द्विखारीधनः । तार्थे तु, द्वाभ्यां खारीभ्यां क्रीतः द्विखारिः । पाणिनिः ५।४।१०१ ।

* द्वितीयादिविभक्त्यन्तपदपूर्व्वकाणां समासस्तत्पुरुष इत्युक्तं (३१८), कर्म्मणीदाहरति कृष्णमाश्रित इति । एवं क्रियाविशेषण द्वितीयान्तादेरपि यथा—नित्यभीरुः, मन्दगामी, मासं व्याप्य स्थितः मासस्थितः इत्यादि । पाणिनिमते तु क्रियाविशेषणस्थले सुप्सुपेति समासः, क्रियाविशेषणस्य कारकत्वेनानङ्गीकारात् ।

नञ् इत्यव्ययस्य स्याद्यन्तेन सह समासो नञ्तत्पुरुषः (पाणिनिः २।२।६), स च प्रथमान्तपदपूर्व्वक एव । यथा न ब्राह्मणः अब्राह्मणः । नञ् च द्विविधः पर्य्युदासः प्रसज्यप्रतिषेधश्च । तथाच—प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता । पर्य्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् ॥ अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता । प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ॥ अब्राह्मण इत्यादौ परपदार्थसदृशार्थकत्वात् विधेः प्राधान्यं, प्रतिषेधांशे तात्पर्य्याभावात् प्रतिषेधस्याप्राधान्यम्, अतएव पर्य्युदास-नञः परपदेन सह सापेक्षत्वात् समासः । किञ्चित् न कुर्व्वाण इत्यादौ विध्यंशे तात्पर्य्याभावात् विधेरप्राधान्यं प्रतिषेधस्य च प्राधान्यम्, अतएव प्रसज्यप्रतिषेध-नञः क्रियया सह सम्बन्धात् स्याद्यन्तेन सह सापेक्षत्वाभावात् न समास इति । "शशंस तुल्यसत्त्वानां सैन्यघोषेऽप्यसम्भ्रमम्" इत्यादौ कैश्चित्तु समास इष्यते । प्राञ्चस्तु नञर्थः षड्विधः—तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः ॥ यथा—अब्राह्मणः, अपापं, अघटः, अनुदरी कन्या, अकेशी, असुरः इत्यादि । अत्र वक्तव्यं—अब्राह्मण इत्यादौ नञ्तत्पुरुषः समासः, नातिशीतोष्ण इत्यादौ तु सुप्सुपेति समासः । अनतिशीतोष्ण इति कृते तु नञ्तत्पुरुष एव ।

एवञ्च कु-प्रादिभिः सह स्याद्यन्तस्य नित्यसमासः स्यात् (पाणिनिः २।२।१८, 'प्रादयः गताद्यर्थे प्रथमया', इति वार्त्तिकञ्च) । नित्यसमासे स्वपदविग्रहो नास्ति, पदान्तरेण अर्थकथनम् । कुत्सितः पुरुषः कुपुरुषः, ईषत् जलं काजलं, प्रकृष्टो गतः प्रगतः, दुष्टो जनः दुर्जनः, शोभनो जनः सुजनः इत्यादिः शिष्टप्रयोगानुसारेण नित्यसमासो ज्ञेयः ।

राजानमतिक्रान्ता अतिराज्ञी, अतिश्वी, अत्यह्नः, अतिस्त्रिः।*

३६७। सङ्ख्याव्याद्रात्र्यङ्गुलिभ्यामः।

(सङ्ख्या-व्यात् ५।, रात्रि-अङ्गुलिभ्यां ५॥, अः १।)।

सङ्ख्याया व्याच्च पराभ्यां रात्र्यङ्गुलिभ्या-मः स्यात् यादौ, न तु तार्थे। अतिरात्रः अत्यङ्गुलः।†

हरिणा त्रातो हरित्रातः। विष्णवे दत्तं विष्णुदत्तं। अच्युतात् जातं अच्युतजातं। कृष्णस्य सखा कृष्णसखः, महाघासः, ग्रामतक्षः, मृगसक्थं, जालसरसं, मण्डूकसरसं, राजगवः, वर्षारात्रः।‡

(५४८ सूत्रं द्रष्टव्यम्)। स्याद्युत्पत्तेः प्रागपि कृदन्तेन सह उपपदस्य नित्यं समासः, यथा—कुम्भं करोति इति कुम्भकारः, शक्तिग्रहः, धनक्रीतेत्यादि।

* समासान्तप्रत्ययानामेव निमित्तीभूतस्य यादेः इह पूर्व्वनिपाते अनुवृत्तिर्नास्ति, तेन समासमात्रेऽस्य विधानात् उपकृष्णम् इत्यव्ययीभावेऽपि पूर्व्वनिपातः। अतिराज्ञीति (३५३) ष-प्रत्यये, (३३७,२५८) नकार-अकार-लोपे, (२५७) षित्त्वादीप्। श्वानमतिक्रान्ता अतिश्वी (३५८) ष प्रत्ययः, शेषं पूर्व्ववत्। अहरतिक्रान्तः अत्यह्नः, (३५३) षः, (३५४) अह्नादेशः। स्त्रियमतिक्रान्तः अतिस्त्रिः, परपदार्थस्याप्राधान्यात् (३३०) ह्रस्वः, एवम् अतिमायः, अतिवामोरुः। राजानमतिक्रान्ता अतिराज्ञीत्युदाहरता अत्यादिभिर्द्वितीयान्तस्य समास इति सूचितं (अत्यादयः क्रान्ताद्यर्थे द्वितीयया इति वार्त्तिकम्), तेन वेलामुद्गतः उद्वेलः, ज्यामधिरूढं अधिज्यं, मुखमभिगतः अभिमुखः—इत्यादि बोध्यं। अत्र प्रयोगानुसारेण अव्ययभिन्नस्यापि पूर्व्वनिपातो वक्तव्यः, यथा—वनस्याग्रे अग्रेवनं, रात्रीणां गणः गणरात्रं, दन्तानां राजा राजदन्तः इत्यादि। पाणिनिः २।२।३०।

† सङ्ख्या च व्यश्च सङ्ख्याव्यं तस्मात्, एकवचनं यथासङ्ख्य-निरासार्थं। अत्र मण्डूकप्लुताधिकारात् यादेरनुवृत्तिः। रात्रिमतिक्रान्तोऽतिरात्रः, अङ्गुलिमतिक्रान्तोऽत्यङ्गुलः, उभयत्र अनेन अप्रत्यये (२५८) इकारलोपः। एवं तिसृणां रात्रीणां समाहारः त्रिरात्रं, द्वयोरङ्गुल्योः समाहारः द्व्यङ्गुलं। तार्थे किं, द्वे अङ्गुली परिमाणमस्य द्व्यङ्गुलि (क्षेत्रं)। द्व्यङ्गुलं क्षेत्रं, द्व्यङ्गुला भूमिरित्यादि तु यवोदरपरिमाणार्थकाङ्गुलशब्देन समासे सिद्धं, तथाच—अङ्गुलन्तु यवो मतः इत्यमरमाला। पाणिनिः ५।४।८६,८७।

‡ तृतीया-तत्पुरुषमाह—हरिणा त्रात इति। एवं खड्गच्छिन्नः, रथव्रज्या,

३६८। मुख्यार्थोरसः। (मुख्यार्थ-उरस: ष।)।

मुख्यार्था-दुरस्शब्दात् अः स्यात् षादौ। अश्वोरसं, मुख्योऽश्व इत्यर्थः।

पुरुषेषु उत्तमः पुरुषोत्तमः, अवन्तिषु ब्रह्मा अवन्तिब्रह्मः। *

इति षः।

मासपूर्व्वः, मासोनः, वर्षावरः, गुड़मिश्र इत्यादि। दध्ना मिश्रित-ओदनः दध्योदनः, गुड़ेन मिश्रिता धानाः गुड़धानाः, हस्तिना युक्तो रथः हस्तिरथः, एवं अश्वरथः इत्यादौ शाकपार्थिवादित्वात् मध्यपदलोपः। चतुर्थीमाह—विप्राय दत्तमिति। एवं गोभ्यो हितः गोहितः, यूपाय दारु यूपदारु, कुण्डलाय सुवर्णं कुण्डलसुवर्णं, इत्यादि। अत्र वक्तव्यं—केषाञ्चिन्मते प्रकृतिविकृतिभावस्थले एव चतुर्थीतत्पुरुषः, अन्यत्र तु षष्ठीसमासः। यथा अश्वस्य घासः अश्वघासः, न तु अश्वाय घासः। एवं रन्धनस्थाली इत्यादि। पञ्चमीमाह—अच्युतात् जातमिति। एवं व्याघ्रभीतः धर्मभीतः, अश्वपतितः, अर्जुन-पराजितः, सर्परक्षितः, घटभिन्न इत्यादि। षष्ठीमाह—कृष्णस्य सखा कृष्णसखः (२५२), महती देशस्य महत्या भूम्या वा घासः महाघासः (२२६), महतः सकारस्य तोकारस्य वा आकारः। ग्रामस्य तक्षा ग्रामतक्षः (२५६) ष-प्रत्ययः। मृगस्य सक्थि मृगसक्थं (३५८)। जालस्य सरः मण्डूकस्य सरः, जालसरस मण्डूकसरसं (३६१)। राज्ञो गौः राजगवः (३६२)। वर्षाणां रात्रिः वर्षारात्रः (३६२)। एवं मासस्य जातः मासजात इत्यादि। अत्र वक्तव्यम्—"कृद्योगा षष्ठी समस्यते इति वाच्यम्", "प्रति-पदविधाना षष्ठी न समस्यते इति वाच्यम्"—इति वार्त्तिकद्वयम्। यथा इध्मानो व्रश्चनः इध्मव्रश्चनः; सर्पिषो ज्ञानम्, मातुः स्मरणम्, एधोदकस्य उपस्करणम्, चौरस्य रुजा, सर्पिषो नाथनम्, चौरस्योज्जासनम्, व्रतस्य पणनमित्यादि।

* मुख्योऽर्थो यस्य तत् मुख्यार्थं, मुख्यार्थञ्च तत् उरश्चेति तस्मात्। अश्वस्य उरः प्रधानं अश्वोरसं। उरस्शब्दो हृदयवाचकः, अत्र तु लक्षणया प्रधानार्थः। "अश्वानामुर इव" इति भट्टोजिदीक्षितः। मुख्यार्थादिति किं, वृक्षस्य उरः वृक्षोरः वृक्षस्य वक्ष इत्यर्थः। सप्तमीतत्पुरुषमाह—पुरुषोत्तमः। अत्र उदाहरणज्ञापकात् पुरुषाणामुत्तम इति न षष्ठीसमासः "न निर्द्धारणे" (पाणिनिः २।२।१०) इति सूत्रेण निषेधात्। अवन्तिब्रह्म इत्यत्र (३६०) षप्रत्ययः। पाणिनिः ५।४।९२।

अत्र वक्तव्यं, बिलेशयादेर्विभक्तेरलुक् वनेचरादेस्तु वा, यथा—बिलेशयः, खलेशयः, उरसिलोमा, कण्ठेकालः। वनेचरः वनचरः, खेचरः खचरः, त्वचिसारः त्वक्सारः, सरसिजं सरोजमित्यादि। एवं परस्मैपदम्, आत्मनेपदम्, युधिष्ठिरः, कर्णेजपः, पश्यतोहरः, अन्तेवासी इत्यादौ नित्यम्। मातुःष्वसा मातुःस्वसा मातृष्वसा, पितुःष्वसा पितुःस्वसा पितृष्वसा इत्यादौ विकल्पः। पाणिनिः ६।३।१—६।३।२४, ८।३।८४,८५,९५।

द्विगु-समासः (ग)।

तस्यार्थे—विषये, वाच्ये अपत्यार्थणिकादिकं
प्रोज्भ्याजादेः, समाहारे, गस्त्रिधोत्तरदे परे।

पञ्चभिर्गोभिः क्रीतः पञ्चगुः। *

३६९। गैक्यादतोऽपात्रादेरीप्।

(गैक्यात् ५।, अतः ५।, अपात्रादेः ५।, ईप् ।१।)।

गैक्यादकारान्तादीप् स्यात्, न तु पात्रादेः।

त्रयाणां लोकानां समाहारः त्रिलोकी।

---

* गो द्विगुः—तस्य तद्धितस्य अर्थे, समाहारे, उत्तरपदे परे च भवन् त्रिधा भवति। तद्धितार्थेऽपि द्विधा भवति, यथा—तद्धितप्रत्ययमात्रस्य अर्थे विषये इत्येकः, अपत्यार्थ-णिकादिकं प्रोज्भ्य त्यक्त्वा अजादेस्तद्धितस्य अर्थे वाच्ये इत्यपरः। णिकादिकमिति णिरेव णिक इति छन्दोऽनुरोधात् स्वार्थे कः, णिप्रभृतिकमित्यर्थः। यत्र तस्यार्थविषये समासः क्रियते तत्र तद्धितप्रत्ययोत्पत्तेः पूर्व्वावस्थायां समासे कृते ततः प्रत्ययोत्पत्ती वृद्ध्यादिः, यथा द्वयोर्मात्रोरपत्यमित्यत्र प्राप्तव्यस्य णप्रत्ययस्य उत्पत्तेः पूर्व्वावस्थायां द्वयोः मात्रोः एतयोरेकपदीभावे द्विमातृपदात् (४१५) णप्रत्यये कृते, (४१६) द्वि इत्यस्य वृद्धौ, (४२५) उर् कृते द्वैमातुरः इति पदं। एवं पञ्चानां नापितानामपत्यं पाञ्चनापितिरित्यादि। वाच्ये यथा—पञ्चभिर्गोभिः क्रीतः पञ्चगुः इत्यत्र कर्म्मणि वाच्ये करण-कारकात् (४२९) ढवे कादित्यादिना प्राप्तव्यप्रत्ययस्य अर्थे वाच्ये, समासेनैव तद्धितस्य उक्तार्थत्वे, उक्तार्थानामप्रयोगः इति न्यायात् तद्धितप्रत्ययस्य अनुत्पत्तौ, (३३०) गवाचादेरिति ह्रस्वः। अजादेरिति किं—द्वयोर्मूर्द्ध्नोर्भवः द्विमूर्द्धन्यः, इत्यादौ तद्धितप्रत्ययात् पूर्व्वं समासे, द्विमूर्द्धन्शब्दात् (४३२) य-प्रत्ययः, अत्र विषये एव द्विगुः, न तु वाच्ये। समाहारे यथा—त्रिभुवनं। उत्तरपदे परे यथा पञ्चगवधनः। पाणिनिः २।१।५१।

पात्रादेस्तु, द्विपात्रं त्रिपात्रं, त्रिभुवनं, चतुर्युगं। *

३७०। वानापः। (वा ।१।, अन्-आपः ५।)।

अनन्तादापश्च ईप् स्यात् वा। पञ्चकर्म्मी पञ्चकर्म्म, त्रिखट्वी त्रिखट्वं। †

३७१। तार्थे मानात् काण्डात्त्वचेत्रे।

(तार्थे ७।, मानात् ५।, काण्डात् ५।, तु ।१।, अचेत्रे ७।)।

त्र्याढ़की, त्रिकाण्डी रज्जुः। चेत्रे तु, त्रिकाण्डा भूमिः। ‡

३७२। पुरुषाद्वा। (पुरुषात् ५।, वा ।१।)।

---

* गस्य ऐक्यं गैक्यं (समाहारद्विगुः) तस्मात्। पात्रमादिर्यस्य स पात्रादिः, न पात्रादिरपात्रादिः तस्मात्। समाहार-द्विगूनां (३२२) क्लीवत्वेऽपि ईपो विधानात् नित्यस्त्रीत्वं सूचितं। द्वयोः पात्रयोः समाहारः द्विपात्रं। आदिना त्रिगुणं चतुर्गुणं चतुःशतं चतुष्पथं चतुर्मुखं पञ्चगवं पञ्चनावं द्विखारं द्विचन्द्रम् इत्यादि प्रयोगतो ज्ञेयं। अत इति किं, त्रयाणां जगतां समाहारः त्रिजगत् इत्यादि। पाणिनिः ४।१।२१, २।४।१७, "पात्रादिभ्यः प्रतिषेध." इति वार्त्तिकञ्च।

† वाशब्दोऽत्र समुच्चयार्थः, तथाच—अनन्तात् आबन्ताच्च गैक्यात् ईप् स्यात्, समुच्चयेन (३६७) सङ्ख्याव्यादित्यतः मण्डूकगत्या अनुवृत्य अश्व स्यादित्यर्थः। समुच्चयाकृष्टं नोत्तरत्र इति न्यायात् परत्र अप्रत्ययस्य नानुवृत्तिरिति। पञ्चानां कर्म्मणां समाहारः, अनेन ईपि (३३७) न-लोपे, (२५८) अकार-लोपे, पञ्चकर्म्मी। पक्षे अनेनैव समुच्चय-लब्धोऽप्रत्ययः, (३२२) क्लीवत्वं। एवं त्रितक्षी त्रितक्षं इत्यादि। "वाबन्तः", "अनो नलोपश्च वा च स्त्रियाम्" इति वार्त्तिकद्वयम्।

‡ तद्धितार्थद्विगौ परिमाणवाचकात् ईप् स्यात्, काण्डशब्दात्तु चेत्रभिन्ने वाच्ये इत्यर्थः। त्रयः आढ़काः परिमाणमस्याः त्र्याढ़की धान्यसंहतिः। एवं द्वौ द्रोणौ परिमाण-मस्याः द्विद्रोणीत्यादि। त्रयः काण्डाः (नलाः) परिमाणमस्याः त्रिकाण्डी रज्जुः। चेत्रे तु त्रिकाण्डा भूमिः चेत्रैकदेशः। पाणिनि. ४।१।२२,२३।

द्विपुरुषी द्विपुरुषा । त्रिसखं त्रिगवं त्रिनावं, त्रिखारं त्रिखारि, त्र्यह्नः । *

३७३ । द्वित्रिभ्यामञ्जलेः ।

(द्वित्रेः ५।, वा ।१।, अञ्जलेः ५।, अः १।) ।

द्व्यञ्जलं द्व्यञ्जलि, द्व्यङ्गुलं, त्रिरात्रं । †

पञ्च गावो धनं यस्यासौ पञ्चगवधनः द्विनावधनः द्विखारधनः, द्व्यङ्गप्रियः । ‡

इति गः ।

---

* परिमाणवाचकात् पुरुषशब्दादीप् स्यात् वा तद्धितार्थे द्विगौ । द्वौ पुरुषौ परिमाणमस्याः द्विपुरुषी द्विपुरुषा भित्तिः । त्रयाणां सखीनां समाहारः त्रिसखं (३५३) । त्रयाणां गवां समाहारः त्रिगवं (३६३) । तिसृणां नावां समाहारः त्रिनावं (३६४) । तिसृणां खारीणां समाहारः त्रिखारं (३६५), पक्षे त्रिखारि (१६७) । त्रयाणामह्नां समाहारः त्र्यह्नः (३५३), अभिधानात् पुंस्त्वं । (३५४) सर्व्वैकदेशेत्यत्र समाहारवर्जनात् न अह्नादेशः । परिमाणभिन्ने तु द्वाभ्यां पुरुषाभ्यां क्रीता द्विपुरुषा इत्येव । पाणिनिः ४।१।२४ ।

† द्वित्रिभ्यां परादञ्जलेः अः स्यात् वा तद्धितार्थे द्विगौ । द्वावञ्जली परिमाणमस्य द्व्यञ्जलं जलं, पक्षे अप्रत्ययाभावे जलविशेषणत्वात् क्लीवत्वं । एवं त्र्यञ्जल त्र्यञ्जलि । त्रिलोचनस्तु तद्धितार्थभिन्ने द्विगौ द्वित्रिभ्यामञ्जलेरप्रत्ययं विदधाति, तन्मते द्वयोरञ्जल्योः समाहारः द्व्यञ्जलं द्व्यञ्जलि, एवं द्वावञ्जली प्रियौ यस्य स द्व्यञ्जलप्रियः द्व्यञ्जलिप्रियः इति समाहारोत्तरपदपरयोरुदाहरणं । तद्धितार्थे तु द्वाभ्यामञ्जलिभ्यां क्रीतः द्व्यञ्जलिरिति । अतएव 'अतद्धितलुकीत्येव' इति भट्टोजिदीक्षितः । द्वयोरङ्गुल्योः समाहारः द्व्यङ्गुलं, तिसृणां रात्रीणां समाहारः त्रिरात्रं, उभयत्र (३६७) सङ्ख्याव्यादिति अप्रत्ययः । पाणिनिः ५।४।१०२, "संख्यापूर्व्वं रात्रं क्लीवम्" इति वार्त्तिकञ्च ।

‡ उत्तरपदे परे उदाहरति—पञ्चगवधनः, अत्र धने उत्तरपदे परे द्विगौ, (३६२) अप्रत्ययः, द्वे नावौ धनमस्य द्विनावधनः (३६४) अप्रत्ययः । द्वे खार्य्यौ धनमस्य द्विखारधनः द्विखारीधनः (३६५) विकल्पेन अः । द्वे अह्नी प्रिये यस्यासौ द्व्यह्नप्रियः, (३५३।३५४) अः, अह्नादेशश्च ।

अव्ययीभाव-समासः (व)।

वः कसामीप्यसादृश्य-साकल्यानुक्रमर्द्धिषु।
वीप्सापर्य्यन्तयोग्यत्व-पश्चादर्थानतिक्रमे।
शब्दप्रादुर्भावाभाव-यौगपद्येष्वनेकधा॥ *

३७४। वात् क्रोर्मोऽतोऽप्याः।

(वात् ५।, क्रोः ६।, मः १।, अतः ५।, अप्याः ६।)।

अकारान्तात् वात् परस्याः क्रेर्मः स्यात्, नतु प्याः। †
कृष्णमधिकृत्य प्रवृत्ता कथा, अधिकृष्णम्।
अप्याः किं, कृष्णस्य समीपात् गतः, उपकृष्णात् गतः। ‡

३७५। चौम्रोर्वा। (चौ-म्रोः ६॥, वा।१।)।

उपकृष्णं उपकृष्णेन कार्य्यं। उपकृष्णं उपकृष्णे स्थितः। §

---

* वः अव्ययीभावः—कं कारकं, सामीप्यं, सादृश्यं, साकल्यं निःशेषत्वं, अनुक्रमः, ऋद्धिः समृद्धिः, वीप्सा युगपत् व्याप्तुमिच्छा, पर्य्यन्तः शेषसीमा, योग्यत्वं, पश्चादर्थः, अनतिक्रमः, शब्दप्रादुर्भावः शब्दोत्पत्तिः, अभावः, यौगपद्यम् एककालत्वं – एषु चतुर्द्दशसु अर्थेषु भवति, प्रयोगानुसारादनेकधा च भवतीत्यर्थः। स च अव्ययशब्दानां स्याद्यन्तैः सह नित्यसमासः स्यादिति। पाणिनिः २।१।६।

† अकारान्तशब्दस्य अव्ययीभावसमासे कृते, (३१९) क्रेर्लुक् त्ये चेत्यनेन क्रेर्लुकि, पुनर्लिङ्गसंज्ञायाम्, उत्पद्यमानविभक्तीनां स्थाने मः स्यात्, नतु पञ्चम्याः स्थाने इत्यर्थः।

‡ कृष्णमधिकृत्येति, यद्यपि क इति सामान्येनोक्तं, तथापि द्वितीयासप्तम्योरर्थएव ज्ञेयः। अत्र कृष्णमिति कर्म्मार्थे अधिशब्देन (२६६) व्यं पूर्व्वमिति अधेः पूर्व्वनिपातः, (३१९) कृष्णमिति द्वितीयाया लुकि, अधिकृष्ण इत्यस्य पुनर्लिङ्गसंज्ञायां जातस्य सेः स्थाने अनेन म्, एवं सर्व्वत्र। सप्तम्यर्थे तु स्त्रीष्वधिकृत्य प्रवृत्ता या कथा सा अधिस्त्रि इत्यादि। उपकृष्णादिति अप्याः इत्यस्य उदाहरणेनैव सामीप्योदाहरणं दर्शितं। एवं कुम्भस्य समीपम् उपकुम्भम् इत्यादि, अत्र उपशब्दस्य सामीप्यमर्थः। पाणिनिः २।४।८३।

§ अकारान्तादव्ययीभावात् परयोः तृतीया-सप्तम्योः मो वा स्यात्। कृष्णस्य समीपेन

३७६। लुक् परात्। (लुक् १।१, परात् ५।१)।

अकारान्तादन्यस्मात् वात् परस्याः क्तेर्लुक् स्यात्। *

३७७। सहः सोऽकाले।

(सहः ६।१, सः १।१, अकाले ७।१)।

सहस्य सः स्यात्, न तु काले। हरेः सदृशं सहरि। काले तु, सहपूर्व्वाह्णं। †

तृणेन सह सकलमत्ति सतृणं। ज्येष्ठमनुक्रम्य अनुज्येष्ठं। मद्राणां समृद्धिः सुमद्रं। विष्णुं विष्णुं प्रति प्रतिविष्णु। अग्निग्रन्थपर्य्यन्तमधीते साग्नि। रूपस्य योग्यं अनुरूपं। शिवस्य पश्चात् अनुशिवं। शक्तिमनतिक्रम्य यथाशक्ति। हरेः शब्दः प्रादुर्भूतः इतिहरि। पापस्याभावः अपापं। चक्रेण युगपद्देहि सचक्रं। यावन्तः श्लोकास्तावन्तोऽच्युतप्रणामाः यावच्छ्लोकं। ‡

कार्य्यं (शेष इति शेषः) इत्यर्थे उपकृष्णं उपकृष्णेन। सप्तम्यान्तु, कृष्णस्य समीपे स्थितः, साधुरिति शेषः, उपकृष्णं उपकृष्णे इति। एवं उपगङ्गं उपगङ्गेन (३२२,१६७) इत्यादि। पाणिनिः २।४।८४।

* अकारान्तादन्यस्मात् इजन्तात् हसन्ताच्च क्तेः सर्व्वासां विभक्तीनामित्यर्थ. नित्यं लुक् स्यात्। पाणिनिः २।४।८२।

† अव्ययीभावे पूर्व्ववर्त्तिनः सहशब्दस्य सः स्यात्, न तु कालवाचिशब्दे परे इत्यर्थः। सहरि इत्यत्र सहशब्दस्य सादृश्यं अर्थः, इकारान्तात् क्तेर्लुक्। सहपूर्व्वाह्णमित्यत्र कालवाचि-पूर्व्वाह्णे परे सहस्य न सः, पूर्व्वाह्णस्य सदृशमित्यर्थः। पाणिनिः ६।३।८१।

‡ साकल्यादौ क्रमेणोदाहरति—तृणेन सह सकलमत्ति तृणमपि न त्यजतीत्यर्थः सतृणं, अत्र सहशब्दस्य साकल्यम् अर्थः। ज्येष्ठ-मनुक्रम्य ज्येष्ठस्य हीनो भूत्वा गच्छतीत्यर्थः अनुज्येष्ठं, अत्र हीनार्थेन अनुना योगे (२८६) ज्येष्ठमिति द्वितीया, अनु-शब्दस्य अनुक्रमोऽर्थः। मद्राणां मद्रदेशानां समृद्धिः सुमद्रं वर्त्तते इत्यर्थः, एवं सुभिक्षं वर्त्तते, अत्र सुशब्दस्य समृद्धिरर्थः। विष्णुं विष्णुं प्रतीति (२८६) द्वितीया, प्रतिविष्णु इत्यत्र समासेन वीप्साया उक्तत्वात् न द्वित्वं। एवं परिविष्णु अनुविष्णु इत्यादि। साग्नि इत्यत्र पर्य्यन्तार्थेऽव्ययीभावः, सहशब्दस्य सः, अग्निग्रन्थात् परं किमपि नाधीते

३७८ । शरद्विपाड़यश्चेतोमनोविडुपान-ड्ढिमवद्विद्दिवनडुह्दिक्चतुर्यत्तदोऽः ।

(शरद्-विपाश्-अयस्-[? अनस्]-चेतस्-मनस्-विश्-उपानह्-हिमवत्-विद्-दिव्-अनडुह्-दिश्-चतुर्-यद्-तदः ५।, अः १।) ।

एभ्यः अः स्यात् वे । उपशरदं । *

३७९ । जराया जरस् च ।

(जरायाः ६।, जरस् ।१।, च ।१।) ।

उपजरसं । †

इत्यर्थः । योग्यत्वार्थे अनुरूपं ददातीत्यादि । अनुशिवमिति पश्चादर्थे, भक्ताः अनुशिवं तिष्ठन्तीत्यर्थः । एवं अनुरथं पादाताः इत्यादि । यथाशक्ति इति अनतिक्रमार्थे ददातीत्यर्थः । एवं यथाबलं धारयतीत्यादि । अत्रापि अतिशब्दयोगे द्वितीया (२८६) । इतिहरि इत्यत्र इतिशब्दस्य प्रादुर्भावोऽर्थः, हरिरिति शब्दो लोके प्रकाशित इत्यर्थः । अपापमित्यत्र नञर्थोऽभावः, स च संसर्गाभाव एव, न तु भेदः । (३२५) नञः स्थाने अः । एवं निर्मक्षिकमित्यादि । चक्रेण युगपत् धेहि—हे विष्णो चक्रेण सह युगपदेककाले गदां धारय इत्यर्थः, सहस्य सः । अनेकधा इत्यस्य एकमुदाहरणमाह—यावच्छ्लोकं अच्युतप्रणामाः श्लोकानाम् इयत्तया प्रणामानां इयत्ता अवधारिता इत्यर्थः । एवं यावद्-भोजनपात्रं ब्राह्मणान् निमन्त्रयस्व इत्यादि । ये ये तथाभूताः यथातथं, ये ये यथाभूताः यथायथं । तिष्ठन्ति वहन्ति आयान्ति गावो यस्मिन् काले, यथाक्रमं तिष्ठद्गु वहद्गु आयतीगवम्—इत्यादयो ज्ञेयाः (पाणिनिः २।१।१७) ।

* शरच्च विपाट् च अयश्च चेतश्च मनश्च विट् च उपानच्च हिमवांश्च विद् च द्यौश्च अनड्वांश्च दिक् च चतुश्च यच्च तच्च तत् तस्मात् । शरदः समीपं उपशरदं, एवं उपविपाशं, उपायस, उपचेतसं, उपमनसं, उपविशं, उपोपानहं, उपहिमवतं, उपविदं, उपदिवं, प्रत्यनडुहं, प्रतिदिशं ('चतुर्दिशमित्यसाधु' इति क्रमदीश्वरः), उपचतुरं, उपयदं, उपतदं इति । पाणिनिः ५।४।१०७ । अत्र पाणिनिसूत्रे 'शरत्प्रभृतिभ्यः' इत्युक्तगणे अयस् इति स्थाने अनस् इति पठितम्, हिमक् सद् दृश् त्यद् कियत् एतानि चातिरिक्तानि दृश्यन्ते । क्रमदीश्वरोऽपि अनस् इत्येव पठति, न त्वयस् इत्यनुसन्धेयम् ।

† जरायाः अः स्यात् वे, तस्मिन् जरसादेशश्च । जरायाः समीपम् उपजरसं । पाणिनिः ५।४।१०७ । शरत्प्रभृतिगणान्तर्गतं सूत्रमेतत् ।

३८० । सरजसोपशुने । (सरजस-उपशुने १॥)

निपात्ये । *

३८१ । सम्परःप्रत्यनुभ्योऽक्ष्णः ।

(सम्-परस्-प्रति-अनुभ्यः ५॥, अक्ष्णः ५।) ।

समक्षं । †

३८२ । अनः । (अनः ५।) ।

अनन्तात् अः स्यात् वे । अध्यात्मं । ‡

३८३ । क्लीवाद्वा । (क्लीवात् ५।, वा ।१।) ।

उपचर्म्मं उपचर्म्म । §

---

* रजसा सह सकलमस्ति सरजसं, निपातनात् अः । शुनः समीपं उपशुनं निपातनात् श्वन्शब्दस्य वस्य उ, अप्रत्ययश्च । "सरजसं पद्ममित्यसाधु" इति क्रमदीश्वरः, सरजः पद्ममित्येव साधु । अतएव "सरजसतामवनेरपां निपातः" इति किराते चिन्त्यम् । पाणिनि: ५।४।७७ ।

† सम् च परश्च प्रतिश्च अनुश्च तेभ्यः । एभ्यः परात् अक्ष्णः अः स्यात् वे । अक्ष्णोः समीपं समक्षं, अक्ष्णोः परः परोक्षं, परशब्दात् निपातनात् अस्-कृते परस् इत्यव्ययं । "प्रतिपरसमनुभ्योऽक्ष्णः" इति सूत्रे अक्ष्णः परमिति विग्रहे निपातनात् परस्य ओकारादेशः इति भट्टोजिदीक्षितः । क्रमदीश्वरस्तु "परेः परस् च" इति सूत्रं विन्यस्य परिशब्दात् परसादेशं वदति । अक्ष्णोरभिमुखं प्रत्यक्षं अन्वक्षञ्च । एषु अक्षिशब्दात् अप्रत्यये (२५८) इकारलोपः । प्रत्यक्षः परोक्षः इति तु इन्द्रियवाचिना अकारान्तेन अक्षशब्देन, अक्षाणां प्रति प्रत्यक्षः, अक्षाणां परः परोक्षः इति षष्ठीसमासे (२६६) द्वयं पूर्व्वमिति पूर्व्वनिपातः । अथवा अर्शआदित्वादच् इति भट्टोजिदीक्षितः । पाणिनि: ५।४।१०७ । शरत्प्रभृतिगणान्तर्गतं सूत्रमेतत् ।

‡ पृथक् योगात् समादेर्नानुवृत्तिः । आत्मानमधिकृत्य अध्यात्मं (३३७,२५८) । एवम् अधिराजम् अधिपुषमित्यादि । 'अनव्ययीभावे तु परमात्मा' इति क्रमदीश्वरः । पाणिनि: ५।४।१०८ ।

§ क्लीवलिङ्गादनन्तात् अः स्याद्वा अव्ययीभावे । चर्म्मणः समीपं उपचर्म्मं उपचर्म्म । एवम् अहरहः प्रति प्रत्यहं प्रत्यहः इत्यादि । पाणिनि: ५।४।१०९ ।

३८४ । झपनदीपौर्णमास्याग्रहायणीगिरेर्व्वा ।

(झप्—गिरेः ५।, वा ।१।) ।

उपसमिधं उपसमित्, उपनदं उपनदि । *

इति वः ।

षट् समासाः ।

३८५ । पथ्यप्पुरः से । (पथिन्-अप्-पुरः ५।, से ७।) ।

एभ्यः अः स्यात् से सति । सखिपथौ,रम्यपथो देशः, महापथः, दक्षिणापथः, चतुष्पथं, उपपथं, विमलापं सरः, विष्णुपुरं । †

३८६ । द्व्यन्तर्गेर्योऽपोऽनात् ।

(द्वि-अन्तर्-गेः ५।, ई ।१।, अः १।, अपः ६।, अनात् ५।) ।

एभ्योऽनवर्णान्तेभ्योऽपोऽकार ईः स्यात् ।

---

* झप् प्रत्याहारश्चदन्तात्, नदी-पौर्णमासी-आग्रहायणी-गिरिभ्यश्च अः स्यात् वे वा । अत्र वा-ग्रहणं परत्र निवृत्त्यर्थम् । समिधः समीपं उपसमिधं उपसमित, एवं उपतड़ितं उपतड़ित् । नद्याः समीप उपनदं उपनदि । एवं उपपौर्णमास उपपौर्णमासि । उपाग्रहायणं उपाग्रहायणि । उपगिरं उपगिरि । अप्रत्ययाभावपक्षे दीर्घान्तानां क्लीबे ह्रः (१६७) ; पाणिनिः ५।४।११०—११२ ।

† पन्थाश्च आपश्च पूश्च तत् तस्मात् । से इति सर्व्वसमासप्रापणार्थं । षट् सूदाहरति— सखा च पन्थाश्च तौ (चः) । रम्यः पन्थाः यत्र सः (हः) । महांश्चासौ पन्थाश्चेति (यः) । दक्षिणस्यां दिशि दक्षिणे देशे वा पन्थाः (षः), दक्षिणा इति तु (५२०) सप्तम्याः स्थाने आ, तद्धितादेशत्वात् (३१९) न आकारलोपः। एवं उत्तरापथः । चतुर्णां पथां समाहारः (गः) । पथः समीपे (वः) । एषु पथिन्शब्दस्य अप्रत्यये (३३७) न-लोपे, (२५८) इकार-लोपः । विमला आपो यस्मिन् तत् । विष्णोः पूः विष्णुपुरमिति अभिधानात् क्लीवत्वं । यद्यपि अदन्तपुरशब्दोऽप्यस्ति तथापि पुर्शब्देनानिष्टवारणार्थमिदं । पाणिनिः ५।४।७४ । ‘ पथः संख्याव्ययादेः” इति वार्त्तिकञ्च ।

द्वीपं अन्तरीपं समीपं । अनात् किं, प्रापं । *

३८७ । समापानूपौ । (समाप-अनूपौ १॥) ।

निपात्यौ । समापो देवयजनं, अनूपो देशः । †

३८८ । सम् तुम् मनः-कामे ऽवश्यम् ल्ये ऽन्त्यलोपं सम्-मांसौ तु हित-तते पाक-पचने वा ।

(सम् ।१।, तुम् ।१।, मनः-कामे ७।, अवश्यम् ।१।, ल्ये ७।, अन्त्यलोपं २।, सम्-मांसौ १॥, तु ।१।, हित तते ७।, पाक-पचने ७।, वा ।१।) ।

सम् तुम् च मनः-कामयोः, अवश्यम् ल्ये, अन्त्यलोपं याति ; सम् हित-ततयोः, मांसः पाक-पचनयोर्वा ।

समनाः सकामः, रन्तुमनाः रन्तुकामः, अवश्यसेव्यः, सहितः संहितः, सततः सन्ततः, मांस्पाकः मांसपाकः, मांस्पचनं मांसपचनं । ‡

---

* द्वौ च अन्तश्च गिश्च तत् तस्मात् । न अः अनस्तस्मात् । द्विशब्दात् अन्तर्शब्दात् अवर्णान्तभिन्न-गेश्च अपशब्दस्य अकारः ईः स्यात् इत्यर्थः । द्वयोर्दिशोरापो यत्र तत् ("द्विर्गता आपोऽस्मिन्निति द्वीपः" इति क्रमदीश्वरः ; द्वीपमिति भट्टोजिदीक्षितः), अन्तर्गता आपो यत्र, सम्यक् आपो यत्र इति वाक्यानि । एवं अतीपं प्रतीपं इत्यादि । प्रगता आपो यत्र तत् प्रापं । पाणिनिः ६।३।९७। "ईत्वमनवर्णादिति वक्तव्यम्" इति वार्त्तिकञ्च ।

† समीचीनाः (समा इति भट्टोजिदीक्षितः) आपो यत्र स समापः देवयजनं (यज्ञः)। ("समापं नाम देवयजनम्" इति तु क्रमदीश्वरः ।) अनुगता आपो यत्र सः अनूपः देशः । एतयोरेवार्थयोर्निपातनं, अन्यत्र समीपं अन्वीपमिति । पाणिनिः ६।३।९८ । "समाप ईत्वप्रतिषेधः" इति वार्त्तिकञ्च ।

‡ सम् तुम् इति पदभेदः मनः-कामाभ्यां यथासङ्ख्यनिरासार्थः । मनश्च कामश्च तस्मिन् । सम् च मांसश्च तौ, हितश्च ततश्च तस्मिन्, पाकश्च पचनश्च तस्मिन् । सम् मनः-कामयोः, तुम् मनः-कामयोः, अवश्यम् ल्ये अन्त्यलोपं याति से सति । सम्

३८९। धुरोऽनक्षस्याः।

(धुरः ५।, अनक्षस्य ६।, अः १।)।

राजधुरा। अक्षस्य तु अक्षधूः। *

३९०। ऋचः। (ऋचः ५।)।

ऋचः परः अः स्यात् से। अर्द्धर्चं। †

३९१। नञ्बह्वोर्माणवक-चरणे।

(नञ्-बह्वोः ५।, माणवक-चरणे ७।)।

अनृचो माणवकः, बह्वृचः चरणः। अन्यत्र अनृक् साम, बह्वृक् सूक्तं। ‡

हित-ततयोः मांसः पाक-पचनयोः अन्त्यलोपं याति वा से सतीत्यर्थः। सम्यक् मनो यस्य, सम्यक् कामो यस्य, इति वाक्यं। तुम् इति (११६४) चतुम्। रन्तु मनो यस्य, रन्तुं कामो यस्य। त्यस्तव्यादिः (९८९)। अवश्यं सेव्यः अवश्यसेव्यः, एवं अवश्यकरणीय इत्यादि। सम्यक् हितं यस्य, सम्यक् ततं यस्य। मांसस्य पाकः, मांसस्य पचनं। सर्व्वत्र अन्त्यलोपः। असमासे तु नान्त्यलोपः। अवश्यम्—गि-प्रादु-रादिव्यवधानेऽपि, यथा—अवश्यप्रवाच्यः, अवश्याङ्गीकरणीय इत्यादि। "समो हित-ततयोर्वा लोपः।" "संतुमुनोः कामे लोपो वक्तव्यः।" "मनसि च वक्तव्यम्।" "अवश्यमः कृत्ये लोपो वक्तव्यः।" एतानि वार्त्तिकानि। काशिकावृत्तिश्च यथा—"लुम्पे-दवश्यमः कृत्ये तुम् काममनसोरपि, समो वा हिततयोर्मांसस्य पचि युड्घञोः॥"

* धूर्भारः। धुरः अः स्यात् समासे, न तु अक्षसम्बन्धिन्याः। अक्षो रथचक्रं। राज्ञो धूः राजधुरा, एवं महाधुरा इत्यादि स्त्रीत्वादाप् (२५०)। अक्षस्य धूः अक्षधूरित्यत्र न अप्रत्ययः। पाणिनिः ५।४।७४।

† अर्द्धञ्च तत् ऋक् चेति, ऋचोऽर्द्धमिति वा अर्द्धर्चं, (अर्द्धर्चौ वा पाणिनिः २।४।३१); एवं सप्त ऋचो यस्मिन् स सप्तर्चो मन्त्रः। पाणिनिः ५।४।७४।

‡ नञ् च बहुश्च तत् तस्मात्, पुंस्त्वं सौत्वात्। माणवकश्च चरणश्च तस्मिन्। नञ्-बहुभ्यां परस्याः ऋचः अः स्यात् क्रमात् माणवक-चरणयोर्वाच्ययोः। नास्ति ऋक् यस्य सोऽनृचो माणवकः शिष्यः। बह्व्यः ऋचो यत्र स बह्वृचः चरणः वेदैकदेशः। न ऋक् अनृक्। साम, बह्वृक् इति पूर्व्ववत्, सूक्तं, साम सूक्तञ्च वेदांशविशेषौ। पाणिनिः ५।४।७४—काशिका "अनृचो माणवके ज्ञेयो बह्वृचश्चरणाख्यायाम्।"

३९२। प्रत्यन्ववात् सामलोम्नः।

(प्रति-अनु-अवात् ५।, साम-लोम्नः ५।)।

प्रतिसामं प्रतिलोमं। *

३९३। अक्ष्णोऽचक्षुषि। (अक्ष्णः ५।, अचक्षुषि ७।)।

गवामक्षीव गवाक्षः। चक्षुषि तु, विप्राक्षि। †

३९४। ब्रह्महस्तिराजपण्यात् वर्च्चसः।

(ब्रह्म—पण्यात् [? पल्यात्] ५।, वर्च्चसः ५।)।

ब्रह्मवर्च्चसं हस्तिवर्च्चसं राजवर्च्चसं पण्यवर्च्चसं। ‡

३९५। समवान्धात् तमसः।

(सम्-अव-अन्धात् ५।, तमसः ५।)।

सन्तमसं। §

---

* प्रतिश्च अनुश्च अवश्च तस्मात्। एभ्यः पराभ्यां सामन् लोमन् इत्येताभ्यां अः स्यात् से सति। साम साम प्रति, लोम लोम प्रति, वीप्सायां वः। एवं अनुलोमं अनुसामं। पाणिनिः ५।४।७५।

† न चक्षुः अचक्षुस्तस्मिन्। अक्षिशब्दात् अः स्यात् समासे, अचक्षुषि वाच्ये। गवाक्षो वातायनं। विप्रस्य अक्षि। विशालाक्षः पद्माक्षः इति बहुव्रीहौ चक्षुर्भिन्ने वाच्ये अः। लवणाक्षं पुष्कराक्षं गवाक्ष इति क्रमदीश्वरः उदाहरति। पाणिनिः ५।४।७६। अत्र "अप्राण्यङ्गादिति वक्तव्यम्" इति वार्त्तिकम् भट्टोजिदीक्षितेन न गृहीतम्।

‡ ब्रह्मा च हस्ती च राजा च पण्यश्च तस्मात्। एभ्यः परात् वर्च्चसः अः स्यात् से। तेजःपुरीषयोर्वर्च्च इत्यमरः। ब्रह्मणो वर्च्चः, हस्तिनो वर्च्चः, राज्ञो वर्च्चः, पण्यस्य तत् वर्च्चश्चेति वाक्यानि। अत्र, वार्त्तिके संक्षिप्तसारे च पण्यस्थाने पल्य इति पाठो दृश्यते। गोयीचन्द्रश्च "यत्र पलालरज्ज्वा व्रीहिं वेष्टयित्वा स्थापयन्ति तत् किल पल्यमुच्यते इति धातुपारायणम्" इति वदति। पाणिनि. ५।४।७८। "पल्यराजभ्याञ्चेति वक्तव्यम्" इति वार्त्तिकञ्च।

§ एभ्यः परात् तमसः अः स्यात् से। सन्ततं विस्तीर्णं तमः सन्तमसं। अवहीनं तमः अवतमसं, अन्धयतीति पचादित्वात् अन्, अन्धं तमः अन्धतमसं। पाणिनिः ५।४।७९।

३९६ । श्वोवसीयस-श्वःश्रेयस-निःश्रेयसं ।

(श्वोवसीयस—निःश्रेयसं १।) ।

एते निपात्याः । *

३९७ । तप्तान्ववाद्रहसः ।

(तप्त-अनु-अवात् ५।, रहसः ५।) ।

तप्तरहसं । †

३९८ । प्रत्युरसानुगवे । (प्रत्युरस अनुगवे १॥) ।

एते निपात्ये । ‡

३९९ । गेरध्वनः । (गेः ५।, अध्वनः ५।) ।

प्राध्वो रथः । §

---

* अव्ययानामनेकार्थत्वात् (श्वःशब्दः आशीर्द्योतकः) श्वः शोभनं वसीयः शुभं (वसुमत-ईयस) (वसुशब्द प्रशमावाची) श्वोवसीयसं कल्याणं, श्वः शोभनं श्रेयः श्वःश्रेयसं कल्याणं, निर्निश्चितं श्रेयो निःश्रेयसं निर्व्वाणं। अत्र वसीय इत्यत्र अवसीय इति केषाञ्चितम् । पाणिनिः ५।४।७७,८० ।

† एभ्यः परात् रहसः अः स्यात् से । तप-धातोः कर्त्तरि क्तः तप्तं, तप्तञ्च तत् रहश्चेति, अकथ्यं यत् भवेत् वाक्यं तत् तप्तरहस विदुः ; अथवा "परेणानधिगम्यं हि यद्रहो वञ्चितप्तवत् । तप्तञ्च तद्रहश्चेति तत्तप्तरहस विदुः ॥" इति । रहोरहः अनुरहसं, अवगतं रहः अवरहसं । पाणिनिः ५।४।८१ ।

‡ उरसि प्रतिवर्त्तते प्रत्युरसं, अधिकरणार्थे अव्ययीभावः । गवां अनु आगतं अनुगवं शकटं । अन्यत्र प्रतिगतमुरः प्रत्युरः, गवां पश्चात् अनुगु इति । पाणिनिः ५।४।८२,८३ ।

§ गेः परात् अध्वनः अः स्यात् से । प्रगतः अध्वानं, प्रगतोऽध्वा येन इति वा, प्राध्वः रथः । एवं प्रत्यध्वं शकटं । गेः किं, उत्तमाध्वा । पाणिनिः ५।४।८५ ।

४०० । पाण्डूदक्कृष्टात् भूमः ।

(पाण्डु उदक्-कृष्टात् ५।, भूमेः ५।) ।

पाण्डुभूमो देशः । *

४०१ । सङ्ख्याया नदीगोदावरीभ्याञ्च ।

(सङ्ख्यायाः ५।, नदी-गोदावरीभ्यां ५॥, च ।१।) ।

पञ्चनदं, सप्तगोदावरं, द्विभूमः प्रासादः । †

४०२ । निसः शतो डः । (निसः ५।, शतः ५।, डः १।) ।

निस्त्रिंशः, निश्चत्वारिंशः । ‡

४०३ । सूत्सुरभिपूतेर्गन्धादिर्वातूपमानात् ।

(सु-उत् सुरभि-पूतेः ५।, गन्धात् ५।, इः १।, वा ।१।, तु ।१।, उपमानात् ५।) ।

सुगन्धिः, पद्मगन्धिः पद्मगन्धः । §

---

* उदक् इति उत्पूर्व्वात् अञ्चधातोः कर्त्तरि क्विप्, कृष्ट इति कृषधातोः क्तः । एभ्यः परात् भूमेः अः स्यात् से । पाण्डुर्भूमिर्यस्मिन् स पाण्डुभूमो देशः । उदीची उदगता भूमिर्यस्मिन् स उदग्भूमो देशः, पुंवद्भावादुदक्स्थितिः । अत्र उदक्स्थाने उदकमिति भाष्यकारः । कृष्टा भूमिर्यस्मिन् स कृष्टभूमो देशः । कृष्टस्थाने कृष्ण इति केचित् । पाणिनीये ५।४।७५ सूत्रे "कृष्णोदकपाण्डुसंख्यापूर्व्वाया भूमेरजिष्यते" इति इष्टिः ।

† सङ्ख्यायाः पराभ्यां नदी-गोदावरीभ्यां भूमेश्च अः स्यात् से । पञ्चानां नदीनां समाहारः, सप्तानां गोदावरीणां समाहारः, द्वे भूमी यत्र सः इति वाक्यानि । अत्र नदीशब्देन (८६) सूत्रोक्तपारिभाषिकनदीसंज्ञको न बोध्यते, नापि च स्वरूपग्रहणं किन्तु नदीपर्य्यायवचनम् ; अतः सप्तगङ्ग द्वियामुनमित्यादि । पञ्चनदमित्यादौ संज्ञायाम् अव्ययीभावसमासः इति पाणिनिः । पाणिनिः २।१।२० ।

‡ निसः परात् शत् इत्यन्तात् डः स्यात् से । निर्गता त्रिंशत् यस्य स निस्त्रिंशः, एवं निश्चत्वारिंशः निष्पञ्चाशः । "निर्गतानि त्रिंशतो निस्त्रिंशानि वर्षाणि चैत्रस्य । निर्गतस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः खड्गः ।" इति भट्टोजिदीक्षितः । निसः किं, दुस्त्रिंशत् इत्यादि । "डच्प्रकरणे संख्यायास्तत्पुरुषस्योपसंख्यानं निस्त्रिंशाद्यर्थम्" इति वार्त्तिकम् ।

§ सुश्च उच्च सुरभिश्च पूतिश्च तस्मात् । एभ्यः परात् गन्धात् इः स्यात् से, उपमान

४०४ । नार्च्चायां स्वतेः सख्यादेरः ।

(न ।१।, अर्च्चायां ७।, सु-अतेः ५।, सख्यादेः ५।, अः ।१।) ।

स्वतिभ्यां परात् सख्यादेरो न स्यात् पूजायां ।
शोभनो राजा सुराजा, अतिशयेन राजा अतिराजा ।
अर्च्चायां किं, गामतिक्रान्तः अतिगवः । *

४०५ । किमः क्षेपे । (किमः ५।, क्षेपे ७।) ।

किंराजा । †

४०६ । नञोऽह्वे । (नञः ५।, अ-ह्-वे ७।) ।

नञः परात् सख्यादेरो न स्यात्, न तु ह्-वयोः ।

वाचकात् परात्तु वा इत्यर्थः । शोभनो गन्धो यस्य स सुगन्धिः, एवं उद्गन्धिः सुरभिगन्धिः पूतिगन्धिः । पद्मस्येव गन्धो यस्य सः पद्मगन्धिः पद्मगन्धः । अत्र समवायसम्बन्धेन वर्त्तमानात् गन्धात् इः स्यादिति सम्प्रदायः, तेन सुगन्धो वायुरिति, वस्तुतः शिष्टप्रयोगानुसारेणैव । किञ्च गुणवाचिनो गन्धादेव इः, तेन शोभनानि गन्धद्रव्याणि यस्यां सा सुगन्धा विपणिरिति । पाणिनिः ५।४।१३५,१३७ । "गन्धस्येत्त्वे तदेकान्तग्रहणम्" इति वार्त्तिकम् । तदर्थश्च "तदवयव इवाविभागेन लक्ष्यमाणो यो गुणस्तद्वाची गन्धशब्दो गृह्यते, न तु द्रव्यवाची ।"

* सुश्च अतिश्च तस्मात् स्वतेः । प्रशंसार्थे वर्त्तमानाभ्यां सु-अतिभ्यां परात्, (३५३) सख्यहोराज्ञ इत्यारभ्य (३९९) गेरध्वन इत्यन्तेषु येभ्योऽप्रत्ययो विहितः स न स्यादित्यर्थः । सुराजा अतिराजा उभयत्र प्रशंसार्थौ स्वती । अतएव "सुराज्ञि देशे राजन्वान्" इत्यमरलिखनम् । एवम् अतिशयेन श्वा अतिश्वा, सुगौः सुरात्रिः सुपन्थाः इत्यादि । अतिगव इत्यत्र न प्रशंसार्थोऽतिः, एवं अतिसख इत्यादि । परमराजः उत्तमराजः इत्यादौ अर्च्चार्थेऽपि स्वत्यभावात् भवत्येव । पाणिनिः ५।४।६९ ।

† निन्दायां वर्त्तमानात् किमः परात् सख्यादेरो न स्यात् । कुत्सितो राजा किंराजा, यो न रक्षति प्रजाः । एवं किंगौः, यो न वहति भारम् । निन्दायां किं, केषां राजा किंराजः, केषां गौः किंगवः इत्यादि । "स किंसखा साधु न शास्ति योऽधिपम्" इति किराते । पाणिनिः ५।४।७०, २।१।६४ ।

असखा । ह-वे तु—अनपं सरः, अधुरं । *

४०७ । पथो वा । (पथः ५।, वा ।१।) ।

अपथं अपन्थाः । ह-वे तु—अपथो देशः, अपथं । †

४०८ । कत् क्वचित्रथवदे ।

(कत् ।१।, कु ।१।, अच्-त्रि-रथ-वदे ७।)

कोः स्थाने कत् स्यात् से अजादौ परे । कदन्नं कत्त्रयः । ‡

४०९ । का च्चे । (का ।१।, अच्चे ७।) ।

काच्चं । §

---

* हस्य वस्य हवं, न हवं अहवं तस्मिन् । ह-व-भिन्न-समासे नञः परात् सख्यादेरो न स्यात् । असखा इति नञ् तत्पुरुषः । न सन्ति आपो यत्र तत् अनपं सरः, अत्र (३८५) अ-प्रत्ययः । धुरोऽभावः अधुरं, अत्रापि (३८९) अ-प्रत्ययः । पाणिनिः ५।४।७१ ।

† ह-व-भिन्न-समासे नञः परात् पथः अः स्याद्वा । न पन्थाः इति तत्पुरुषे अपथं अपन्थाः । नास्ति पन्था यस्मिन्निति अपथो देशः, पथोऽभावः इति अपथं, उभयत्र (३८५) नित्यम् अ-प्रत्ययः । पाणिनिः ५।४।७२ ।

‡ अच्च त्रिश्च रथश्च वदश्च तस्मिन् । अत्र कु इति शब्दः कुत्सितवाची, तेन कोः (पृथिव्याः) उत्थितः कूत्थितः इत्यादौ न स्यात् । कुत्सितमन्नं कदन्नं, एवं कदाकारः कदौषधम् । कुत्सितास्त्रयः कत्त्रयः, एवं कद्रथः कद्वदः । अस्य सूत्रस्य कर्मधारय एवाभिधानात् कुत्सितो रथो यस्येत्यादौ न स्यात्, यतः पाणिनिसूत्रे "तत्पुरुषे" इत्युक्तम् । अत्र वक्तव्यम् "तृणे च जातौ" इति (पाणिनिः ६।३।१०३) सूत्रेण कत्तृणमिति । पाणिनिः ६।३।१०१,१०२ । "कद्भावे त्रावुपसंख्यानम्" इति वार्त्तिकञ्च ।

§ अक्षशब्दे परे कोः का स्यात् से । कुत्सितमक्षं (इन्द्रियं) काक्षं । अक्ष इति सामान्यतो ग्रहणात् कुत्सिते अक्षिणी यस्य स काक्षो विप्रः इत्यत्र अक्षिशब्दात् (३३४) षे कृतेऽपि स्यात । "अक्षशब्देन तत्पुरुषः, अक्षिशब्देन बहुव्रीहिर्वा" इति भट्टोजिदीक्षितः । पाणिनिः ६।३।१०४ ।

४१० । पथिपुरुषे वा । (पथि पुरुषे ७।, वा ।१।) ।

कापथः कुपथः, कापुरुषः कुपुरुषः । *

४११ । कोरीषदर्थे । (कोः ६।, ईषदर्थ ७।) ।

ईषज्जलं काजलं । †

४१२ । कत्कवौ चाग्नुष्णे । (कत्-कवौ १॥, च ।१।, अग्नि-उष्णे ७।) ।

कदग्निः कवाग्निः काग्निः, कदुष्णं कवोष्णं कोष्णं । ‡

---

* कोः का स्यात् वा पथि-पुरुषयोः परयोः। कुत्सितः पन्थाः, कुत्सितः पुरुषः, इति वाक्यद्वयं। अत्र द्रष्टव्यम्— "का पथ्यक्षयोः" इति पाणिनिसूत्रे (६।३।१०४) पथिन्-शब्दात् नित्यं कापथः इति पदम्; पश्चात् "पथि च च्छन्दसि" इति सूत्रे (६।३।१०८) वेदे कवपथः कापथः कुपथः इति पदत्रयं दर्शितम्। वोपदेवेन तु लौकिकालौकिकमतं लौकिकत्वेन प्रयुक्तम्। विचार्यश्चान्यत्—कापथः इत्यत्र पुंस्त्वं वार्त्तिकमतेनासङ्गतं, "पथः संख्याव्ययादेः" इत्यत्र क्लीवत्वमुक्तम् (३८५ सूत्रं द्रष्टव्यम्)। अतएव क्रमदीश्वरः— "कुत्सितः पन्थाः कापथम्। कुपथमित्यसाधु।" इति। "पथिशब्देन समासे नित्यं कादेशः। पथिशब्दसमानार्थेन पथशब्देनापि क्लीवत्वाभावः" इति गोयीचन्द्रः। एतच्च द्रष्टव्यं—तर्कवाचस्पतिप्रकाशितायां सिद्धान्तकौमुद्यां कापथः इति पाठो दृश्यते; शिवरामशर्म्मणा शोधितायान्तु तस्यां कापथम् इति पाठः। बोधलिङ्गप्रकटीकृते अष्टके पाणिनीये च कापथः इति पुंलिङ्गमेवास्ति। सुपद्मे तु समासप्रकरणस्य "पथः संख्याव्ययात् क्लीबे" इति ८८ सूत्रे कापथमित्युक्तं, अलुक्प्रकरणे तु ६८ सूत्रे कापथः इत्युक्तम् इति स्वोक्तविरोधः। शेषोक्तसूत्रटीकायान्तु "वार्त्तिकभाष्ययोर्न मतमेतत्, अदन्तपक्षे तु कुपथ." इति लिखितम्। पाणिनिः ६।३।१०६।

† ईषदर्थे वर्त्तमानस्य कोः का स्यात् से। कोर्ग्रहणं पथिपुरुषयोरननुवर्त्तनार्थम्। प्रयोगानुसारेण यस्मिन् कस्मिन्नपि परे इत्यर्थः। एवं ईषदन्नं कान्नमित्यादि। भारवौ च "दिवाकानिनि कावार्द—काकारे भभरे" इत्यादि। पाणिनिः ६।३।१०५।

‡ ईषदर्थे कोः स्थाने कत्-कवौ, चकारात् का च स्यात् अग्नि-उष्णयोः परयोः। ईषदग्निः, ईषदुष्णमिति वाक्यद्वयं। पाणिनिः ६।३।१०७।

४१३ । ज्योति र्जनपद रात्रि नाभि बन्धु गन्ध पिण्ड लोहित कुक्षि वेणी ब्रह्मचारि तीर्थ्य पत्नी पक्षे समानः सः ।

(ज्योतिः—पक्षे ७।, समानः १।, सः १।) ।

समानं ज्योतिर्यस्यासौ—सज्योतिः । *

४१४ । रूप नाम गोत्र स्थान वर्ण वयो वचन धर्म्म जातीयोदर्य्ये वा ।

(रूप—उदर्य्ये ७।, वा ।१।) ।

सरूपः समानरूपः । †

इति स-पादः ।

---

* एषु चतुर्द्दशसु परेषु समानः सः स्यात् से सति । एवं सजनपदः, जनपदपर्य्याय-ग्रहणात् समानो देशः सदेशः । सरात्रिः सनाभिः सबन्धुः सगन्धः सपिण्डः सलोहितः सकुक्षिः सवेणीकः । ब्रह्मचार्य्यादिसम्बन्धेन समानशब्दः एकार्थ एव न तु तुल्यार्थः, समानं एकं ब्रह्म वेदं चरतीति वाक्ये (९९३) ग्रहादित्वात् णिनि, ब्रह्मचारिन् शब्दे परे समानः सः, एकब्रह्मव्रताचारा मिथः सब्रह्मचारिण इत्यमरः । समाने एकस्मिन् तीर्थे गुरौ वसतीति (४२९) ण्यप्रत्यये तीर्थ्यशब्दे परे समानः सः; निर्यकारपक्षे (णप्रत्यये) समानं तीर्थं यस्य इति बहुब्रीहिः । तीर्थ-ऋषिजुष्टजले गुरौ इति, सतीर्थ्यास्त्वेक-गुरव इति चामरः । पाणिनौ संक्षिप्तसारे च सयकार-तीर्थ्यशब्द एव दृश्यते । समान-एकः पतिरस्या इति वाक्ये निपातनात् पत्युः पत्नादेशे ईपि समानस्य सः सपत्नी (पाणिनिः ४।१।३५) । एवं समानः पक्षः (सहाय) सपक्षः । पाणिनिः ६।३।८५,८६,८७ । एषु सूत्रेषु परसूत्रे च गन्ध पिण्ड लोहित कुक्षि वेणी पत्नी पक्ष शब्दा न दृश्यन्ते "वामनस्तु पुनः पक्षधर्म्मजातीयान्यपि पठति" इति क्रमदीश्वरः । सेतुशब्दोऽपि संक्षिप्तसारे दृश्यते ।

† एषु दशसु परेषु समानः सः स्यात् वा । समानं रूपं यस्यासौ सरूपः । समानमेकं नाम यस्य स सनामा । एवं सगोत्रः सस्थानः सवर्णः सवयाः सवचनः सधर्म्मा (३४४) । समानस्य प्रकारः इति (४८७) सजातीयः । समाने एकस्मिन् उदरे भवतीति (४२९) उदरशब्दात् ण्यप्रत्यये सोदर्य्यः । सोदर-सहोदरशब्दौ तु उदरेण सह वर्त्तते योऽसौ इति (३३३) सूत्रेण सिद्धौ । एषु विकल्पपक्षे समानस्थितिः । पाणिनिः ६।३।८५,८८ । उदर्य्यं वर्जयित्वा सर्व्वं पाणिनिमते नित्यम्, चान्द्रमते तु विकल्पः ।

४१५। बाह्वाद्यतोऽचत्राबादेर्गर्गादेर्नड़ादेः पितृष्वस्रादे रेवत्यादेः शेषशिवादेः ष्णि-ष्णेय-ष्णात्र-ष्णायन-णीय-ष्णिक-ष्णा अपत्ये।

(बाह्वाद्यतः ५।, अचत्राबादेः ५।, गर्गादेः ५।, नड़ादेः ५।, पितृष्वस्रादेः ५।, रेवत्यादेः ५।, शेषशिवादेः ५।, ष्णि—ष्णाः १।।।, अपत्ये ७।)।

एभ्यः परा एते क्रमात् स्युरपत्यार्थे।*

---

* बाहुरादिर्यस्य सः, बाह्वादिश्च अच्च स तस्मात्। अचिश्च आप् च तौ आदी यस्य सः अचत्राबादिस्तस्मात्, अचत्रादेः आबादेश्चेत्यर्थः। गर्ग आदिर्यस्य तस्मात्। नड़ आदिर्यस्य तस्मात्। पितृष्वसा आदिर्यस्य तस्मात्। रेवती आदिर्यस्य तस्मात्। उक्तादन्यः शेषः, शिव आदिर्यस्य सः शिवादिः, शेषश्च शिवादिश्च तत् तस्मात्। सूत्रत्वात् शेषशिवादिवर्जं सर्व्वत्र पुंस्त्वम्। ष्णिश्च ष्णेयश्च ष्णात्रश्च ष्णायनश्च णीयश्च ष्णिकश्च ष्णाश्च ते। एतेभ्यः सप्तगणेभ्यः एते सप्त प्रत्ययाः क्रमात् स्युः अपत्यार्थे। न पतति वंशो येन तदपत्यं, पुत्र-पौत्र-प्रपौत्रादिः (कन्या च) उच्यते (पाणिनिः ४।१।१६२)। क्रमश्च—बाह्वादेः अकारान्ताच्च ष्णिः, अचत्रादेः आबादेश्च ष्णेयः, गर्गादेः ष्णात्रः, नड़ादेः ष्णायनः, पितृष्वस्रादेः णीयः, रेवत्यादेः ष्णिकः, शेषात् शिवादेश्च ष्णः इति। एतेषां ष इत् वृद्ध्यर्थः, ण इत् वृद्ध्यर्थः। पाणिनिः ४।१।९५,९६,९९,१०५,११०,११२,१२०,१२१,१२२,१२३,१३२,१३४,१४६ ; ४।२।९२। ष्णि = इञ् इति पाणिनिः, इण् इति क्रमदीश्वरः। ष्णेय = ढक्, ढञ् इति पाणिनिः, एयण् इति क्रमदीश्वरः। ष्णात्र = यञ् इति पाणिनिः, ण्य इति क्रमदीश्वरः। ष्णायन = फक्, फञ् इति पाणिनिः, णायन इति क्रमदीश्वरः। णीय = छण् इति पाणिनिः, ईय इति क्रमदीश्वरः। ष्णिक = ठक् इति पाणिनिः, णिक इति क्रमदीश्वरः। ष्ण = अण् इति पाणिनिः, णट् इति क्रमदीश्वरः।

४१६। णित्ते त्रिराद्यचः सुभग-सुपञ्चाला-द्योस्तु द्व्यन्त्यदानां।

(णित्ले ७।, त्रिः १।, आद्यच. ६।, सुभग-सुपञ्चालाद्योः ६॥, तु ।१।, द्व्यन्त्यदानां६॥) ।

अचां मध्ये आद्यचो त्रिः स्यात्, णिति ते परे, सुभगादेस्तु द्वयोर्द्वयोः, सुपञ्चालादेस्तु अन्त्यस्य दस्य । *

(३३७) न्वोर्लोपौतौ तेऽच्ये। बाह्वोरपत्यं बाह्वविः, उप-विन्दोरपत्यं औपविन्दविः, उडुलोम्नोऽपत्यं औडुलोमिः, अग्नि-शर्म्मणोऽपत्यं आग्निशर्म्मिः । कृष्णस्यापत्यं कार्ष्णिः । †

४१७। य्वोर्युम् दान्तेऽस्वङ्ग व्यङ्ग व्यड़ व्यव-हार व्यायाम स्वागत स्वध्वर णनः।

(य्वोः ६॥, युम् ।१॥, दान्ते ७।, अस्वङ्ग—णनः ६।) ।

---

* मूर्द्धन्य ण इत् यस्य स णित्, णिच्चासौ तश्चेति णित्तः तस्मिन् । आदिश्चासौ अच् चेति आद्यच् तस्य। सुभगश्च सुपञ्चालश्च सुभगसुपञ्चालौ, तौ आदी ययोस्तौ सुभगसुपञ्चालादी तयोः । द्वे च अन्त्यश्च द्व्यन्त्यानि, द्व्यन्त्यानि च तानि दानि चेति द्व्यन्त्य-दानि तेषां । पूर्व्वं (६) अच एव वृद्धिस्थानित्वेन निर्द्दिष्टेऽपि अत्र अचो ग्रहणं परसूत्रे आद्यचोऽनुवृत्त्यर्थं । सामान्यतः सर्व्वेषां शब्दानां अचां मध्ये आद्यचो वृद्धिः, सुभगादे-र्द्वयोः पदयोराद्यचो वृद्धिः, सुपञ्चालादेस्तु केवलम् अन्त्यपदस्याद्यचो वृद्धिः स्यात्, णिति तद्धिते परे इत्यर्थः । पाणिनिः ७।३।११७, ४।१।१२६ ।

† बाह्वादीनाह—बाहुनामकस्य कस्यचिदपत्यं इत्यर्थे, बाह्वोरिति पदात् णिः, ण इत्, इकारस्थितिः, (३१६,३३७, २५)बाह्वि इति भागस्य पुर्नालिङ्गसंज्ञायां स्याद्युत्-पत्तिः, एवं सर्व्वत्र । यया विभक्त्या वाक्यं तद्विभक्त्यन्तात् प्रत्ययः । एवम् औपविन्दविः । औडुलोमिरित्यत्र णिप्रत्यये, (३३७,२५८) नलोपः अकारलोपश्च । एवम् आग्निशर्म्मिः । कार्ष्णिरिति (२५८) अकारलोपः । बाह्वादिस्तु—बाहु उपबाहु उपविन्दु उडुलोमन् अग्निशर्म्मन् सुशर्म्मन् कृष्ण युधिष्ठिर अर्जुन शाम्ब गद प्रद्युम्न राम सत्यक प्रभृतिः ।

आद्यच: स्थाने जातयोर्दान्ते स्थितयोर्यवयो: स्थाने क्रमादिमुमौ स्तो णिति ते परे, न तु स्वङ्गादे:। *

४१८। द्वार स्वर स्व: स्वस्ति स्वादुम्दु व्यल्कस श्व: श्वन् स्फ्यक्ृत स्व स्वाध्याय स्वग्रामैकन्यग्रोधानां श्वापदन्यङ्क्वोस्तु वा नत्विति श्वादे:।

द्वार—न्यग्रोधानां ६॥, श्वापद-न्यङ्क्वो: ६।, तु ।१।, वा ।१।, न ।१।, तु ।१।, इति ७।, श्वादे: ६।)।

द्वारादेरद्वितीयस्य न्यग्रोधस्य च य्वोर्युम् स्यात्, श्वापदन्यङ्क्वोस्तु वा, न तु श्वादेरिकारादौ ते। †

---

* य्व वच य्वौ तयो:। इश्च उश्च यू ताभ्यां म युम् इति लुप्तप्रथमा द्विवचनं यथाक्रमार्थं। स्वङ्गश्च व्यङ्गश्च व्यड़श्च व्यवहारश्च व्यायामश्च स्वागतश्च स्वध्वरश्च णन् च तत्, पश्चान्नञ्योगे तस्य। स्वङ्गादय: अम शब्दा, णन् इति (११४१) कृत्प्रत्यय:, तेन तदन्तस्य ग्रहणम्। आद्यच इति णिते इति च अनुवर्तते। इमुमौमित्वादादौ। णिति ते परे आदौ इमुमि कृते पश्चात् वृद्धि:। पाणिनि: ७।३।३,७,८,९। अत्र द्रष्टव्यम्—पाणिनीये स्वागतादिगणे व्यायामशब्दो नास्ति, स्वपतिशब्दस्तु दृश्यते।

† एकोऽद्वितीयश्चासौ न्यग्रोधश्चेति एकन्यग्रोध:। एकेति किं, न्यग्रोधमूले भवा: न्याग्रोधमूला: शालय: इति भट्टोजिदीक्षित:। न्याग्रोधमूलिकमिति (४३२) सूत्रे स्वयं वक्ष्यति। द्वारश्च स्वरश्च स्वरिति रेफान्तमव्ययञ्च स्वस्तीत्यव्ययञ्च स्वादुम्दुश्च व्यल्कसश्च श्वस् इति सान्तमव्ययञ्च श्वा च स्फ्यकृतश्च स्वश्च स्वाध्यायश्च स्वग्रामश्च एकन्यग्रोधश्च ते तेषां। श्वापदश्च न्यङ्कुश्चेति तस्य। श्वा आदिर्यस्य स श्वादिस्तस्य। द्वारादीनां यवयोरदान्तत्वात् आद्यच: स्थाने अजातत्वाच्च पूर्व्वेणाप्राप्तौ वचनमिदं। द्वारादेर्यवयोरिमुमौ स्यातां णिति तद्धिते परे, श्वापदन्यङ्क्वोस्तु वा, श्वन्प्रभृतीनां (वार्त्तिकोक्त—श्वदंष्ट्र-श्वगणयोश्च) इकारादौ तद्धिते परे तु न स्यादित्यर्थ:। अत्र स्व: अध्याय: स्वाध्याय: इति व्युत्पत्ति:, न तु (सु) शोभन: आध्याय: स्वाध्याय इति काशिका। स्वादुम्दु इति पदं केषाञ्चित् मते पृथक् पदद्वयम्। स्वग्रामशब्दश्च द्वारादिगणे न दृश्यते। पाणिनि. ७।३।४,५,८,९।

वैयश्वि: सौवश्वि: । स्वङ्गादेस्तु स्वाङ्गि: व्याङ्गि: व्याड़ि: । *

४१९ । व्यासादेरिक् ष्णौ ।

(व्यासादे: ६।, इक् ।१।, ष्णौ ७।) ।

वैयासकि: सौधातकि: । †

आत्रेय: शौभ्रेय: । गाङ्गेय: माहेय: यौवतेय: । ‡

४२० । ओर्लोपोऽकद्रुपाण्डोरेये ।

(ओ: ६।, लोप: १।, अकद्रु-पाण्डो: ६॥, एये ७।) ।

---

* पूर्व्वसूत्रोदाहरणमाह—विगतोऽश्वो यस्य स: व्यश्व: तस्यापत्यं वैयश्वि:, अदन्तत्वात् ष्णिप्रत्यये यकारस्य इमि कृते तस्यैव वृद्धि: । एवं शोभनोऽश्वो यस्य स: स्वश्व: तस्यापत्यं सौवश्वि:, वकारस्य उमि तस्यैव वृद्धि: ।

आद्यच: स्थाने जातयो: किं, दधिप्रिय: अश्वो यस्य स दध्यश्व:, मधुप्रियोऽश्वो यस्य स मध्वश्व:, तस्य तस्य अपत्यं दध्यश्वि: मध्वश्वि: इत्यादौ इम् उम् न स्यात् । दान्ते स्थितयो: किं, द्वयोर्वर्षयोर्भवं द्वैवार्षिकं इत्यादौ इम् उम् न स्यात् ।

स्वङ्गादेस्तु शोभनं अङ्गं यस्य स स्वङ्ग: स्वङ्गस्यापत्यं स्वाङ्गि:, विगतं अङ्गं यस्य स: व्यङ्ग: व्यङ्गस्यापत्यं व्याङ्गि:, व्यड़स्यापत्यं व्याड़ि: इत्यादौ यवयोर्दान्तत्वादाद्यच: स्थाने जातत्वाच्च प्राप्तो निषेध: । अनन्तस्य तु व्यावक्रोशी, व्यव-क्रुशधातो: (११४१) अन्प्रत्यये, व्यवक्रोश-शब्दात् स्वार्थे ष्णे ईपि सिद्धम् । पाणिनि: ७।३।६ ।

† व्यासादिशब्दस्य स्थाने इक् स्यात् ष्णिप्रत्यये परे, ङित्त्वादन्त्यस्य स्थाने । अक्-स्थिति: । व्यासस्यापत्यं वैयासकि:, व्यासशब्दात् ष्णि: यकारस्य (४१७) इम्, (४१६) इकारस्य वृद्धिरैकार:, अनेन इक् । एवं सुधातुरपत्यं सौधातकि:, सुधातृशब्दात् ष्णि:, आद्यचो वृद्धि:, ऋस्थाने इक् । व्यासादिस्तु—व्यास वरुड़ निषाद चण्डाल विम्ब सुधातृ प्रभृति: । पाणिनि: ४।१।९७, वार्त्तिकञ्च ।

‡ अत्र्यादीनाह—अत्रेरपत्यं, शुभ्रस्यापत्यं । आबादीन् आह गङ्गाया अपत्यं, मह्या अपत्यं, युवत्या अपत्यं, सर्व्वत्र ष्णेयप्रत्यये यथायोग्य (२५८) इवर्णावर्णयोर्लोप: । अत्र्यादिस्तु—अत्रि शुभ्र पूरु मकण्डु पाण्डु कद्रू भ्रूणा कुमारिका रोहिणी विमातृ विधवा अम्बिका रुक्मिणी गोधा शुक नटी प्रभृति: । पाणिनि: ४।१।१२२ ।

उवर्णस्य एये परे लोपः स्यात् नत्वनयोः। कामण्डलेयः। तयोस्तु काद्रवेयः पाण्डवेयः। *

४२१। कल्याणी सुभगा दुर्भगा बन्धकी रजकी बलीवर्दी ज्येष्ठा कनिष्ठा मध्यमा परस्त्य-नसूय्यनुदृष्टि कुलटाभ्य इनेयः।

(कल्याणी—कुलटाभ्यः ५॥, इनेयः १।)।

सौभागिनेयः दौर्भागिनेयः। †

४२२। क्षुद्रागोधाभ्यो वैरारौ।

(क्षुद्रा-गोधाभ्यः ५॥, वा ।१।, एरारौ १॥)।

नाटेरः नाटेयः, गौधेरः गौधारः गौधेयः। ‡

---

* कमण्डलोः कमण्डल्वा वा अपत्यं कामण्डलेयः, णेये अनेन उवर्णलोपः। कद्र्वा अपत्यं, पाण्डोरपत्यं—उभयत्र उवर्णलोपाभावे, (३३७) उवर्णस्य ओकारः, (३५) ओस्थाने अव्। कमण्डलुः चतुष्पाज्जातिविशेषः। पाणिनिः ४।१।१३५ ; ६।४।१४७।

† अर्थवशात् विभक्तिविपरिणामः इति न्यायात् एये इति सप्तम्यन्तं पदं षष्ठ्यन्तं भूत्वा अनुवर्त्तते। कल्याणीति त्रयोदशभ्यः परस्य णेयस्य स्थाने इनेयः स्यात्, स्थानि-वत्त्वात् वृद्धिः, स्त्रियामीप् च। कुलटा इह कुलत्यक्ता सती भिक्षुकी, असतीवाच्ये तु (४२२) परसूत्रप्राप्तिः। कल्याण्या अपत्यं काल्याणिनेयः, स्त्रियां काल्याणिनेयीत्यादि। सुभगाया अपत्यं सौभागिनेयः, दुर्भगाया अपत्यं दौर्भागिनेयः, उभयत्र (४१६) सुभगादित्वादुभयपदवृद्धिः। एवं परस्त्रिया अपत्यं पारस्त्रैणेयः इत्यत्र (२५८) ईवर्ण-लोपप्रसक्तावपि, सुभगादिपाठ-सामर्थ्यात् (२५८) ईकारलोपाभावे, प्रथमः सन्धौ, पश्चात् तस्यैव वृद्धिः। सुभगादिश्च—सुभगा दुर्भगा सुहृद् शक्तसिन्धु अनुशतिक अनुसंवत्सर कुरुपञ्चाल उदकशुद्ध इहलोक परलोक सर्व्वलोक सर्व्वपुरुष सर्व्वभूमि परस्त्री राजपुरुष अधिभूत अधिदेव चतुर्विद्या अग्निमरुत् अग्निवरुण सुह्मनगर कुरुजङ्गल विश्वधेनु अर्द्धक्रोश इत्यादिः। प्रवाहण अशौच अनैश्वर्य्य अचैत्रश अकुशल अनिपुण अयथातथ्य इत्यादौ विकल्पः। यथा, अशौचं आशौचमित्यादि। पाणिनिः ४।१।१२६, १२७। अत्र पाणिनीये कल्याण्यादिगणे रजकीशब्दस्थाने जरतीशब्दो दृश्यते।

‡ क्षुद्राश्च गोधा च ताभ्यः ; (पाणिनौ "गोधाया ढ्रक्" इति एकवचननिर्द्देशात् "क्षुद्राभ्यो वा" इति बहुवचननिर्द्देशाच्च)। एरश्च आरश्च एरारौ। क्षुद्राः कुलशीलहीनाः

गार्ग्य: वात्स्य: जामदग्न्य: पाराशर्य्य:। *

४२३। ओदौतोऽच्वत् तक्रद्य-क्यङ्गा:।

(ओत्-औत: ५।, अच्वत्।१।, तक्रद्य क्य-ङ्या: १।।।)।

ओदौद्भ्यां पर-स्तसंज्ञ: क्रत्संज्ञकस्य य: क्यङौ च अच्वत् स्यात्। †

बाभ्रव्य:। ‡

नाड़ायन: गार्ग्यायण: दाक्षायणी। पैतृष्वस्रीय: मातृष्वस्रीय:। रैवतिक: आश्वपालिक:। यादव: आङ्गिरस:। §

अङ्गहीनाश्च। "का: क्षुद्रा नाम? अनियतपुंस्का अङ्गहीना वा" इति भाष्यम्। "व्यङ्गादुःशीलाभ्याश्च" इति क्रमदीश्वर:। गोधाशब्द: शुभ्रादिगणान्तर्गत:। अत्र वाशब्दस्य व्यवस्थावाचित्वात् क्षुद्राभ्य: परस्य णेयस्य एर: स्याद्वा, गोधाया: परस्य णेयस्य एरारौ स्यातां वा इत्यर्थ:। कुलशीलहीना यथा—नट्या अपत्यं नाटेर:, पक्षे नाटेय:। एवं कुलटाया अपत्यं कौलटेर: कौलटेय:। सतीवाच्ये तु पूर्व्वसूत्रादिनेये कौलटिनेय इति। एवं दास्या अपत्यं दासेर: दासेय: इत्यादि। अङ्गहीना यथा—काणाया: अपत्यं काणेर: काणेय इत्यादि। गोधाया अपत्यं गौधेर: गौधार: गौधेय इत्यादि। पाणिनि. ४।१।१२९,१३०,१३१।

* गर्गादीनाह—गर्गस्यापत्यं, वत्सस्यापत्यं, जमदग्नेरपत्यं, पराशरस्यापत्यं, सर्व्वत्र गर्गादित्वात् ण्यप्रत्यये, आद्यचो वृद्धौ, (२५८) यथासम्भवमिवर्णावर्णयोर्लोप:। स्त्रियां (२५९) यलोपे गार्गीत्यादि। गर्गादिश्च—गर्ग वत्स अज अगस्ति पुलस्ति चमस रेभ अग्निवेश शङ्ख शक धनञ्जय लोहित बभ्रु मण्डु मन्तु वतण्ड कण्व यज्ञवल्क्य शण्डिल चणक मुद्गल जमदग्नि पराशर उलूक दण्ड प्रभृति:। पाणिनि: ४।१।१०५।

† ओच्च औच्च तस्मात्। अच इव अच्वत्। तश्च क्रश्च तौ, तयोर्य: तक्रद्य:, तक्रद्यश्च क्यश्च ङ्यश्च ते। पाणिनि: ६।१।७९,८०।

‡ बभ्रोरपत्यं बाभ्रव्य:, अत्र बभ्रुशब्दात् ण्ये कृते, (३३७) उकारस्य ओकारे, अनेन यस्य अच्वद्भावे, (३५) ओकारस्य अव्। (पाणिनि: ४।१।१०६)। एवं नावा तार्य्यं नाव्यं, (४२९) ण्यप्रत्यये, अनेन अच्तुल्यत्वे, औस्थाने आव्। क्रतो यकारे, लव्यं भाव्यमित्यादि। गामिच्छति गव्यति, नावमिच्छति नाव्यति (८४३) क्यप्रत्यये अच्वत्। गौरिवाचरति गव्यते, नौरिवाचरति नाव्यते, उभयत्र (८४८) ङ्यप्रत्यये, अच्वत्।

§ नडादि-चतुष्टयमाह—नडस्यापत्यं नाडायन:, गार्ग्यस्यापत्यं गार्ग्यायण:, दक्षस्यापत्यं स्त्री दाक्षायणी, सर्व्वत्र नडादित्वात् णायन:। नड़ादिश्च (पाणिनि:

४२४। मन्वर्ज्जान्वर्म्मोच्चस्येनोऽनोऽध्वात्मनो-ऽपत्यण्योऽविकारण्याभावकर्म्मय ईने न न-लोपः।

(मन्वर्ज्जान्-वर्म्मोच्चस्येनः ६।, अनः ६।, अध्वात्मनः ६।, अपत्यणि ७।, अविकारण्या-भावकर्म्मये ७।, ईने ७।, न।१।, न-लोपः १।)। *

मन्वर्जस्यानो वर्म्मण: उच्चण: स्यात् परस्येनश्च अपत्यार्थ-णे, अनो विकारार्थवर्जे ण्ये भावकर्म्मार्थवर्जे ये च, अध्वात्मनोरीने, न-लोपो न स्यात्।

याज्वन: भाद्रवर्म्मण: औच्चण: चाक्रिण:। †

४।१।९९,१००,१०१) नड़ नर द्वीप काश्य दण्डिन् हस्तिन् बदर अश्मल दण्ड्र प्रभृति:। पितृष्वसुरपत्यं पैतृष्वसीय:, मातृष्वसुरपत्यं मातृष्वसीय:, उभयत्र पितृष्वस्रादित्वात् णीय:। (पाणिनि: ४।१।१३२,१३४)। रेवत्या अपत्यं रैवतिक:, अश्वपालस्यापत्यम् आश्वपालिक:, उभयत्र रेवत्यादित्वात् णिक:। एवं द्वारपालिक इत्यादि। रेवत्या-दिश्च—रेवती अश्वपाली मणिपाली द्वारपाली वृकबन्धु वृकग्राह कर्णग्राह दण्डग्राह चामरग्राह प्रभृति:। यदोरपत्यं यादव:, अङ्गिरसोऽपत्यं आङ्गिरस:, एवं रघोरपत्यं राघव: इत्यादिषु शेषत्वात् ण:। (पाणिनि: ४।२।९२) सूत्रे शेष:—अपत्यादिचतुरर्थ्य-न्तादन्योऽर्थ:। अत्र तु बाह्वाद्यादिगणान्तर्गतभिन्न इत्यर्थ:।

* मनं वर्जयतीति मन्वर्ज: (१००९), मन्वर्जश्चासौ अन् चेति मन्वर्जान्। स्य: संयोग:, स्यादिन् स्येन्। मन्वर्जान् च वर्म्म च उच्चा च स्येन् च मन्वर्जान्वर्म्मोच्चस्येन् तस्य। अध्वा च आत्मा च तस्य। अपत्ये ण: अपत्यणस्तस्मिन्। न विकारोऽविकार:, अविकारे ण्य: अविकारण्य:, भावश्च कर्म्म च भावकर्म्मणी न भावकर्म्मणी अभावकर्म्मणी, अभावकर्म्मणोर्य: अभावकर्म्मय:, अविकारण्यश्च अभावकर्म्मयश्च अविकारण्याभावकर्म्मयं तस्मिन्।

† अत्र (४२३) विकारार्थवर्जे-णे परे सर्व्वेषां-मनन्तानां न-लोपनिषेधे, अपत्यार्थ-णे परे मनन्तस्य न-लोपार्थमाह मन्वर्जानिति, अपत्यणे परे मन्-वर्जस्यैव अनन्तस्य न-लोप-निषेध:, मनन्तस्य तु न-लोप: स्यादेव, अपत्यार्थभिन्नणे परे तु मनन्तस्यापि न-लोपनिषेध:। मनन्तवर्जनात् वर्म्मणोऽपि न-लोपप्राप्तौ तस्य न-लोपनिषेधार्थं पुनर्वर्म्मणोग्रहणम्। उच्चणस्तु इह ग्रहणं नियमार्थमेव, तेन उच्चण: अपत्यणे एव न-लोपनिषेध:, अन्यणे तु न-लोप: स्यादेवेति। यज्वनोऽपत्यं याज्वन:, भद्रवर्म्मणोऽपत्यं भाद्रवर्म्मण:, उभयत्र

शैवः वाशिष्ठः । *

४२५ । सङ्ख्यासंभद्रान्मातुरुङ्र् णे ।

(सङ्ख्या-सं भद्रात् ५।, मातुः ६।, उर् ।१।, णे ७।) ।

द्वैमातुरः । †

४२६ । नन् पुंस्त्रियोः । (नन् ।१।, पुंस्त्रियोः ६॥)।

पौंस्नः स्त्रैणः । ‡

षत्वात् णः, अनेन न-लोपनिषेधः । मनन्तस्य तु सुमान्नोऽपत्यं मौसामः इत्यादि ।
अपत्यणे इति किं, चर्म्मणा परिवृतो रथः चार्म्मणः । उक्ष्णोऽपत्यं औक्ष्णः (४३५) उङ्-
लोपः, अपत्यार्थभिन्नणे तु उक्ष्ण इदं औक्षं चर्म्म । चक्रिणोऽपत्यं चाक्रिणः, एवं शाङ्गिनः
शाण्डिनः शाखिनः इत्यादि संयोगा-दिनो न-लोपनिषेधः । अनोऽविकारणे यथा—ब्रह्म
सामाति ब्राह्मणः । साम्न इदं सामनमित्यादि । तर्हि कथं ब्रह्मणोऽपत्यं ब्राह्मणः, ब्रह्मण-
इदं ब्राह्मं धर इत्यादिप्रयोगः । उच्यते—"ब्राह्मोऽजातौ" (६।४।१७१) इति पाणिनि-
सूत्रेण निपातः । "योगविभागोऽत्र कर्त्तव्यः । ब्राह्म इति निपात्यते अनपत्येऽणि ।
ब्राह्मं हविः । ततोऽजातौ । अपत्ये जातावणि ब्रह्मणष्टिलोपो न स्यात् । ब्रह्मणोऽपत्यं
ब्राह्मणः । अपत्ये किं, ब्राह्मी औषधिः ।" इति भट्टोजिदीक्षितः । अभावकर्म्मणे
यथा—मूर्द्धनि भवः मूर्द्धन्यः, ब्रह्मणि साधुः ब्रह्मण्यः इत्यादि । पाणिनिः ६।४।१६४—
१७३ । "अश्मनोविकार इति उपसंख्यानं कर्त्तव्यम्" "मपूर्व्वात् प्रतिषेधे वा हितनाम्न-
इति वक्तव्यम्" इति वार्त्तिकद्वयस्य ।

* शिवादीनाह । शिवस्यापत्यं शैवः, वशिष्ठस्यापत्यं वाशिष्ठः । शिवादिस्तु—शिव
वशिष्ठ गोतम मनु विश्रवण यस्क ककुत्स्थ इक्ष्वाकु कुरु पृथा भूमि सपत्नी ऊर्णनाभ
प्रभृतिः । पाणिनिः ४।१।११२ ।

† सङ्ख्या च सम् च भद्रश्च तस्मात् । सङ्ख्यावाचकात् समो भद्राच्च मातृशब्दस्य उर्
स्यात् णे परे, ङित्त्वादन्त्यस्य स्थाने । द्वयोर्मात्रोरपत्यं द्वैमातुरः, अत्र तद्धितार्थे विषये
द्विगौ, शेषत्वात् णे कृते एकपदीभावात् द्वै-इकारस्य (४१६) वृद्धिः । एवं तिसृणां
मातॄणामपत्यं त्रैमातुरः, षण्णां मातॄणामपत्यं षाण्मातुरः । संमातुरपत्यं सांमातुरः,
एवं भाद्रमातुरः । पाणिनिः ४।१।११५ ।

‡ पुम्स-स्त्री-शब्दयोः नन् स्यात् णे, नित्त्वादन्ते, अदन्तनकारस्थितिः । पुंसोऽपत्यं
पौंस्नः, स्त्रिया अपत्यं स्त्रैणः, णे ननि च कृते (२५८) सकारलोपः । एवं इदमाद्यर्थे

४२७ । कुञ्जादेर्णायन्योऽस्त्रीत्वेऽपत्ये ।

(कुञ्जादेः ५।, णायन्यः १।, अस्त्रीत्वे ७।, अपत्ये ७।) ।

कुञ्जादेरपत्यार्थे णायन्यः स्यात्, नतु स्त्रियां नच त्वे ।
कौञ्जायन्यः ब्राध्नायन्यः । स्त्रीत्वे तु कौञ्जायनी कौञ्जायनाः ।*

४२८ । गर्गयस्कविदादि-भृग्वत्रि-कुत्सा-ङ्गिरो-वशिष्ठ-गोतम-रूढात् लुक् त्वेऽस्त्रियां ।

(गर्ग—रूढात् ५।, लुक् ।१।, त्वे ७।, अस्त्रियां ७।) ।

देशतुल्याख्यः क्षत्रियो रूढ़ः । एभ्यः परेषामुक्तानां त्यानां त्वे विहितानां लुक् स्यात् नतु स्त्रियां । †

गर्गाः वत्साः, यस्काः लह्याः, विदाः उर्व्वाः, भृगवः अत्रयः कुत्साः अङ्गिरसः वशिष्ठाः गोतमाः, अङ्गाः वङ्गाः कलिङ्गाः । स्त्रियान्तु भार्गव्यः । ‡

णे कृतेऽपि यथा—पुंस इदं पौंस्नं, स्त्रीणां समूहः स्त्रैणं, स्त्री देवता अस्य स्त्रैणः । पाणिनिः ४।१।८७ ।

* स्त्री च त्वश्च स्त्रीत्वं, न स्त्रीत्वं अस्त्रीत्वं तस्मात् । णायन्येन णायनो बाध्यते । कुञ्जस्यापत्यं, ब्रध्नस्यापत्यं, णित्त्वात् आद्यचो वृद्धिः । कुञ्जस्यापत्यं स्त्री, कुञ्जस्यापत्यानि पुमांसः, इत्युभयत्र नड़ादित्वात् णायन एव । कुञ्जादिस्तु—कुञ्ज ब्रध्न शङ्ख लोम भस्म शुभ विपाश् प्रभृतिः । पाणिनिः ४।१।९८ ; ५।३।११३ ।

† गर्गश्च यस्कश्च विदश्च ते आदयो येषां ते गर्गयस्कविदादयः, आदिशब्दस्य प्रत्येकेन सम्बन्धात् गर्गादि-यस्कादि-विदादय इत्यर्थः । ते च भृगुश्च अत्रिश्च कुत्सश्च अङ्गिराश्च वशिष्ठश्च गोतमश्च रूढश्च तस्मात् । देशेन तुल्या आख्या यस्य सः देशतुल्याख्यः, यथा वङ्गो देशविशेषः, वङ्गं पातीति (४२९) णप्रत्यये वङ्गोराजा इत्यादि । "जनपदवचन-क्षत्रियः" इति पाणिनिः । उक्तानां त्यानामिति अपत्यार्थप्रत्ययानामित्यर्थः । लुक्-करणात् (९३) त्यलोपे त्यलक्षणमिति न्यायेन वृद्ध्यादिर्न स्यात् ।

‡ गर्गस्यापत्यानि वत्सस्यापत्यानि, उभयत्र गर्गादित्वात् ण्यस्य लुक् । यस्कस्याप-त्यानि लह्यस्यापत्यानि यस्कादित्वात्, विदस्यापत्यानि उर्व्वस्यापत्यानि विदादित्वात्,

४२६। ढघे कात् षणीककणणीनेयाश्चानितश्च।

(ढ-घे ७।, कात् ५।, षणीक कण् षीन-इयाः १।।।, च ।१।, अनितः १।।।, च ।१।) ।

कात् परा एते पूर्व्वे च सेतोऽनितश्च स्युः ढे घे च वाच्ये । *

तर्कं वेत्ति अधीते वा तार्किकः ; पदकः, क्रमकः ; वैयाकरणः ; वाचा कृतं वाचिकं ; पाणिनीयं ; शक्त्या युध्यतेऽसौ शाक्तीकः, याष्टीकः ; तिष्येण युक्ता रात्रिः तैषी, पौषी ; क्षत्राय साधुः क्षत्रियः ; यज्ञाय हितं यज्ञियं ; मथुराया आगतः

एवं भृगोरपत्यानि एतेषु षास्य लुक् । यस्कादिर्यथा—यस्क पुष्करसद् यर्भुक मन्यक लह्य (लुह्य वा) रघोमुख क्रोष्टुपाद प्रभृतिः । विदादिश्च—विद पुत्र उर्व्व कश्यप कुशिक भरद्वाज उपमन्यु आपस्तम्ब शरद्वत् रथन्तर विश्वानर प्रभृतिः । अत्रेरपत्यानि अत्र णेयस्य लुक् । कुत्सस्यापत्यानि अङ्गिरसोऽपत्यानि वशिष्ठस्यापत्यानि गोतमस्यापत्यानि एतेषु षास्य लुक् । अङ्गस्य राज्ञोऽपत्यानि, एवं वङ्गस्यापत्यानि कलिङ्गस्यापत्यानि इत्यादिषु षास्य लुक् । क्वचित् प्रसिद्धत्तियोऽपि रूढौ वक्तव्यः यथा—रघूणामन्वयं वक्ष्ये, इक्ष्वाकूणामिदं हि कुलव्रतम् इति च रघुः । नाथो यदूनामिति उद्भटः। अस्त्रियामिति किं, भृगोरपत्यानि स्त्रियः इत्यत्र षालोपाभावे भार्गवीशब्दात् जस्विभक्तौ भार्गव्यः इति । अपत्यार्थप्रत्ययानामिति किं, भृगोरिमे भार्गवाः मन्त्राः इत्यादौ न षालोपः । एव प्रिया गार्ग्या यस्य स प्रियगार्गः इत्यत्र समुदायस्य एकत्वेऽपि गार्ग्यशब्दस्य बहुत्वे प्रयुक्तत्वात् षालोप स्यादेव । एव प्रियो गार्ग्यो येषा ते प्रियगार्ग्याः अत्र समुदायस्य बहुत्वेऽपि गार्ग्यशब्दस्य एकत्वे प्रयुक्तत्वात् षालोपो न स्यात् । एवं प्रिययस्क, प्रिययास्काः इत्यादयः । पाणिनिः २।४।६२—६६ । अत्र वक्तव्यम्—"न गोपवनादिभ्यः" इति पाणिनिसूत्रेण (२।४।६७) विदादिगणान्तर्गत-गोपवनादिभ्यो लुक्निषेधः ।

* ढश्च घश्च ढघं तस्मिन् । षणीकश्च कण् च षीनश्च इयश्च ते । नास्ति इत् येषां ते अनितः । षीनेयाश्चेति चकारेण पूर्व्वोक्ताः ष्णिप्रभृतयः प्रत्ययाः समुच्चीयन्ते । अनितश्चेति चकारेण सेतः इति विशेषणान्तरं समुच्चीयते । ततश्च—इह चत्वारः पूर्व्वोक्ताश्च सप्त इति एकादश प्रत्ययाः सर्व्वकारकेभ्य. कर्म्मणि कर्त्तरि च वाच्ये स्युः, ते च प्रयोगानुसारेण क्वचित् इद्रहिताः स्युरित्यर्थः । इत्-रहिता इति कथनात् (४१६) णिति ते परे वृद्धिर्न भविष्यतीति । अर्थविशेषे प्रत्ययविशेषस्तु अभिधानादेव ज्ञेयइति ।

माथुर: ; इह भवं ऐहिकं ; कादाचित्कं ; ग्रामीण:, ग्राम्य: ; मूर्द्धन्य: ; नादेय: ; शालीय: ; नागर: ; अग्र्य: । *

४३० । व्यटेर्लोपोऽनाराच्छ्वतोऽच्येऽयौ ।

(व्य टे: ६।, लोप: १।, अनारात्-श्वत: ६।, अच्-ये ७।, अयौ ७।)।

---

* तर्कम् वेत्ति अधीते वा इत्यर्थे एव तर्कम् इत्यस्मात् कर्म्मकारकात् कर्त्तरि वाच्ये णिक: । (पाणिनि: ४।२।६५) । एवं—पदं वेत्ति अधीते वा पदक:, क्रमं वेत्ति अधीते वा क्रमक:, उभयत्र अनित् कण् । (पाणिनि: ४।२।६१) । व्याकरणं वेत्ति अधीते वा वैयाकरण:, व्याकरणशब्दात् णप्रत्यये (४१७) यस्थाने इम्, तस्य वृद्धि: । (पाणिनि: ४।२।५९) । वाचा कृतं वाचिकम्, अत्र वाचा इत्यस्मात् करणकारकात् कर्म्मणि वाच्ये णिक:, (४३१) न टं तसावित्यनेन टान्तत्वनिषेधात् (२११) विरामाभावे कुङादि नं स्यात् । (पाणिनि: ५।४।३४) । पाणिनिना प्रोक्तं पाणिनीयम्, अत्र पाणिनिना इति कर्त्तृकारकात् कर्म्मणि वाच्ये णीय: । (पाणिनि: ४।३।१०१) । एवं शर्व्ववर्म्मणा प्रोक्तं शार्व्ववर्म्मिकमित्यादि । शाक्तीक इत्यत्र करणकारकात् कर्त्तरि वाच्ये णीक: ; यष्ट्या युध्यते असौ याष्टीक: । (पाणिनि. ४।४।५९) । पाणिनिमते तु शक्ति: प्रहरणमस्य, यष्टि: प्रहरणमस्य इत्याकारं वाक्यम् । तिष्येण नक्षत्रेण युक्ता रात्रि: तैषी, एवं पुष्येण नक्षत्रेण युक्ता रात्रि: पौषी, उभयत्र तिष्येण पुष्येण इति कर्त्तृकारकात् कर्म्मणि वाच्ये णे कृते वृद्धौ, (२६०) यकारलोपे, (२५७) षिखादीप् । (पाणिनि: ४।२।३) । क्षत्रिय:, यज्ञियम् इत्युभयत्र तादर्थ्ये हितशब्दयोगे च चतुर्थ्यन्तादकारकादपि इयप्रत्यय:, सूत्रे कारकादिति तु प्रधानेन व्यपदेशा भवन्तीति न्यायादुक्तं । (३०८) स्वामीश्वराधिपतीत्यनेन सम्बन्धविवक्षायामेव षष्ठीसप्तमीविधानात्, क्षत्राय साधुरित्यत्र निमित्तार्थे चतुर्थी । (पाणिनि: ४।१।१३८—अत्र सूत्रे जातौ घ: न तु साध्वर्थे । पाणिनि: ५।१।५) । माथुर इति मथुराया: इति अपादानकारकात् कर्त्तरि वाच्ये णा: । (पाणिनि: ४।३।७४) । इह इति अधिकरणात् कर्त्तरि वाच्य णिके ऐहिकं, एवं कदाचित् भव कादाचित्कं, अत्र कण् । (पाणिनि: ४।३।५३) । ग्रामे भव: ग्रामीण, अत्र णीन:, एवं ग्राम्य इत्यत्र ण्य: । (पाणिनि: ४।२।९४ ; ४।३।२५) । मूर्द्धनि भवो मूर्द्धन्य:, अत्र ण्ये कृते (४२४) न-लोपनिषेध: । (पाणिनि: ४।३।५५) । नद्यां भवो नादेय, अत्र णेय:, (पाणिनि. ४।२।९७) । शालायां भव: शालीय: अत्र णीय: । (पाणिनि: ४।२।११४) । नगरे भवो नागर:, अत्र ण: (पाणिनि: ४।२।१२८) । अग्रे भव: अग्र्य:, अत्र ण्य:, (पाणिनि: ४।४।११६) । एतेषु उदाहरणेषु (२५८) यथासम्भवम् इवर्णावर्णलोप: प्रत्ययाश्च ऐतेऽनितश्च ज्ञेया: । एवं प्रयोगानुसारेण कारकात् कर्म्मणि कर्त्तरि च वाच्ये प्रत्यया-भवन्तीति ।

पौनःपुनिकः, वाह्यः वाहीकः। *

४३१। न दं तसौ त्वस्त्वर्थे च।

(न ।१।, दं १।, त-सौ १॥, तु ।१।, अस्त्यर्थे ७।, च ।१।)।

अयावचि ये च ते पूर्व्वं दसंज्ञं न स्यात् तान्त-सान्तौ तु अस्त्यर्थे च।

आरातीयः शाश्वतिकः। †

---

* व्यस्य टिः व्यटिस्तस्य। आराच्च शश्वच्च तत्, न तत् अनाराच्छश्वत् तस्य। अच्च यश्च अच्यं तस्मिन्। नास्ति युर्यस्मिन् अयुस्तस्मिन्। आरात्-शश्वत्-वर्जितस्य अव्ययस्य टिलोपः स्यात् प्रकरणबलात् तद्धितसंज्ञके अचि युभिन्ने ये च परे इत्यर्थः। पुनःपुनर्भवः इति वाक्ये (४२९) ष्णिके (४१६) वृद्धौ, अनेन टिलोपे पौनःपुनिकः। वहिर्भवः इति वाक्ये ष्णे ष्णीके च वृद्धौ, टिलोपे वाह्यः वाहीक इति। एवं सायंप्रातर्भवः सायंप्रातिक इत्यादि। अयौ किं, शंयुः अहंयुः। आरात्शश्वतोरुदाहरणं परसूत्रे दर्शितम्। अत्र आरात्-शश्वत्-वर्जनादेव अव्ययप्राप्तौ पुनर्व्ययग्रहणं क्वचिदव्ययस्य टिलोपाभावज्ञापनार्थं, तेन सुष्ठु भावः सौष्ठवं, शं विद्यतेऽस्य शंयः, एवं कंय इति। "अव्ययानां भमात्रे टिलोपः। अनित्योऽयम्"। इति सिद्धान्तकौमुदी।

† तश्च सश्च तसौ। अस्ति अर्थो यस्य तस्मिन्। तस्मिन्निर्द्दिष्टे पूर्व्वस्येति न्यायादाह—पूर्व्वं दसंज्ञं न स्यादिति। अच्येऽयौ इत्यनुवर्त्तते। (३१९) प्रत्यये परे लुकि लुप्तविभक्तिमाश्रित्य पदत्वे अनेन निषिध्यते। आरातीय इति आरात् भव इति वाक्ये (४२९) ईये, अनेन पदत्वनिषेधात् न (५८) चपोऽवे जश्। एवं शश्वत् भव इति वाक्ये ष्णिके शाश्वतिक इति। ये परे यथा—त्वच इदं त्वाच्यं, दिशि भवं दिश्यमित्यादौ अनेन दान्तत्वाभावात् (२११) विरामे परे न कुङादिः। एवं आनडुह्यं मधुलिह्यं गौदुह्यं औपानहमित्यादौ क्रमेण न, दङ् ढ घ धङ् (१८३,१७५,१७६,२३७)। तान्त-सान्तौ यथा—तडितो भावः ताडित्यं, अस्त्यर्थे तडित्वान् इत्यादौ न (५८) तस्य द। एवं पयसो विकारः पायस्यं घृतादि, पायसं परमान्नं, अस्त्यर्थे पयस्वान् पयस्वी तेजस्वी इत्यादौ अदान्तत्वात्, स्वादीयहस्परत्वाभावादिति केचित्, न सस्य (१०२) विसर्गः। अयौ किं, शंयुः अहंयुः अत्र दान्तत्वात् (५३) मस्यानुस्वारः। अच्ये किं, वाग्र्यं दिश्याच्चम् इत्यादौ दान्तत्वात् (६४) विरामविहितं कार्य्यं स्यादेव। किञ्च नञा निर्द्दिष्टमनित्यमिति न्यायात् भवदीयमित्यादौ दान्तत्वात् (५८) जश्, शंय इत्यादौ (५३) मस्यानुस्वारः। पाणिनिः १।४।१८,१९। "अव्ययतीरव्योत्तरपदोदीच्यग्रामकोपधविधेर्वृद्धाच्छो विप्रतिषेधेन" इति वार्त्तिकञ्च।

४३२। अह्नोऽह्नोऽनीने।

(अह्नः ६।, अह्नः १।, अनीने ७।)।

आह्निकं। ईने तु द्व्यहीनः।*

सुपाञ्चालकः अर्द्धपाञ्चालकः।†

दौवारिकः सौवरं सौवं सौवस्तिकः सौवादुमृदवं वैयल्कसं श्वौवं श्वौवनं स्वैयकृतं सौवं सौवाध्यायिकं सौवग्रामिकं नैयग्रोधं। एकेति किं, न्याग्रोधमूलिकं। श्वौवापदं श्वापदं, नैयङ्कवं न्याङ्कवं। श्वागणिकं।‡

---

* न ईनोऽनीनस्त्विन्। अहन्-शब्दस्य अह्नः स्यात् अचि ये च तद्धिते, न तु ईने अयौ चं। त्वन्तत्वात् अत्यर्थे इत्यस्य नानुवृत्तिः। अह्नि भवं आह्निकं (४२६) ष्णिके, अनेन अह्नादेशे, (४१६) वृद्धिः। ईने तु, द्वयोरह्नोर्भवः इति तद्धितार्थविषयद्विगौ (४२६) ईने कृते, अह्नादेशनिषेधात् (२३७,२५८) द्व्यहीनः। पाणिनिः ५।१।७६, ८६, ८७; ६।४।१४५।

† (४१६) सुपञ्चालादीनुदाहरति—सुपञ्चाले (देशे) भवः, अर्द्धपञ्चाले भवः, उभयत्र (४२६) कण्, परपदस्य वृद्धिः। सुपञ्चालादिस्तु—सुपञ्चाल सर्व्वपञ्चाल अर्द्धपञ्चाल पूर्व्वपञ्चाल दक्षिणपञ्चाल उत्तरपञ्चाल गुरुलघु पितृपितामह वातपित्त वातश्लेष्म एकपुरुष पूर्व्वपुरुष पूर्व्वहायन अपरहायन द्विसंवत्सर द्विवर्ष त्रिसप्तति द्विनिष्क द्विसुवर्ण प्रोष्ठपद भद्रपद इत्यादि। अत्र द्रष्टव्यम्—पाणिनेः ७।३।१०—१८ सूत्राणि उत्तरपदवृद्ध्यर्थकानि; ७।३।१९—२१ सूत्राणि उभयपदवृद्ध्यर्थकानि। तत्र प्रथमोक्तानि सूत्राणि वोपदेवमते सुपञ्चालादिगणघटकानि; शेषोक्तानि तु तन्मते सुभगादिगणप्रयोजकानि (४१६ सूत्रं द्रष्टव्यम्)।

‡ (४१८) द्वारादीनुदाहरति—द्वारि नियुक्तः दौवारिकः, (४२६) ष्णिकः, वस्य उम्, तस्य वृद्धिः। द्वार इति अजन्तस्य ग्रहणात् रेफान्तस्य न स्यात्, तेन द्वारि नियुक्तः द्वारिक इति। (पाणिनिः ४।४।६९)। स्वरे भवं सौवरं, स्वरमधिकृत्य कृतो ग्रन्थः सौवरः इति वा, ष्णः, उम्, तस्य वृद्धिः। (पाणिनिः ४।३।८७)। एवं सर्व्वत्र। स्वः (स्वर्गे) भवं, सौवं, अत्र स्वर्शब्दात् ष्णः, (४३०) टेर्लोपः। (पाणिनिः ४।३।२५,५३) स्वस्तीति वक्ति सौवस्तिकः, स्वस्ति यथा स्यात्तथा वक्ति, वक्ष्यति इति वा—ष्णिके,

४३३ । विकारसङ्घभावेदंहितस्वार्थादौ ।

(विकार—स्वार्थादौ ७।) ।

एष्वर्थेषु च ते त्याः स्युः ।

हेम्नो विकारः हैमः आप्यः आप्येयः, भिक्षाणां समूहः भैक्षं आङ्गं गाणिक्यं राजकं, गुरोर्भावः गौरवं यौवनं साम्यं वैरूप्यं राज्यं सौहार्द्दं, विष्णोरिदं वैष्णवं त्वदीयं माधवनं शौवनं । *

टेर्लोपः । स्वादु-मृदुना कृतं, स्वादुमृदुनि संस्कृतं वा, (भक्तं) सौवादुमृदवं । व्यल्कशो-ऽव्युत्पन्नः, व्यल्कशे भवं वैयल्कशं । केचित्तु व्यल्कशशब्दं द्वारादौ न पठन्ति, ते पुनः, विगतोऽर्कः व्यर्कः तं स्यति व्यर्कसः, कपिलिकादित्वात् रस्य लः, तत्र भवः वैयल्कस इति आद्यचः स्थानजातत्वात् (४१७) यस्य इम् तस्य वृद्धिरिति वदन्ति । श्वः (परदिने) भवं शौवं, ष्णे टेर्लोपः । शौवस्तिकत्वमिति भट्टिकाव्ये—श्वः परदिनं तिकते गच्छतीति श्वस्तिकः (९९६) कप्रत्ययः, श्वस्तिक एव शौवस्तिकस्तस्य भाव इति व्याख्या, अत्र श्वस्शब्दस्य वस्य उम् । शुनि भवं शौवनं, (४२४) अविकारर्णे परे न-लोपनिषेधः । (१९४) श्युवमघोनामिति तद्धितपरे वर्जनात् न वस्य उः । स्फाकृते भवं स्फैयकृतं, स्फाः खादिरः खड्गः, तेन कृतमिति तृतीयातत्पुरुषः । स्वे (धने आत्मनि वा) भवं सौवं । स्वाध्याये वेदे भवं सौवाध्यायिकं वेदाध्ययनं । स्वग्रामे भवं सौवग्रामिकं । स्व-ग्रहणेनैवेष्टसिद्धौ स्वाध्याय-स्वग्रामयो-र्ग्रहणं अन्यशब्दादिस्थितस्वशब्दस्य निषेधार्थं, तेन स्वशब्दस्यद स्वाशब्दं, स्वोदरं पूरयतीति स्वौदरिक इत्यादि । न्यग्रोधे भवं नैयग्रोधं, न्यग्रोधो वटवृक्षः । एकाकि किं, न्यग्रोधमूले भवं न्याग्रोधमूलिकम् । श्वापदे भवं शौवापदं श्वापदं, न्यङ्कौ (मृगे) भवं नैयङ्कवं न्याङ्कवं, उभयत्र विकल्पेन वस्य उम् । शुनां गणः श्वगणः श्वगणे भवं श्वागणिकं, (पाणिनौ तु श्वगणेन चरतीति श्वागणिकः श्वगणिक इति ४।४।११) अत्र (४१८) आदेरिकारादौ तद्धिते परे निषेधात् न वस्य उम । इकारे किं, श्वदंष्ट्रायां भवः शौवादंष्ट्रः इत्यादौ उम् स्यादेव । अत्र (३४) मनीषादित्वात् (पाणिनि: ७।३।९—"पदान्तस्यान्यतरस्याम्") अकारदीर्घ. ।

* स्वस्य आत्मनोऽर्थः अभिधेयः स्वार्थः, स्वार्थ आदिर्यस्य स स्वार्थादिः । विकारश्च सङ्घश्च भावश्च इदम् च हितश्च स्वार्थादिश्च समाहारे तस्मिन् । प्रकृतेरवस्थान्तर विकारः, (पाणिनि: ४।३।१३४), सङ्घः समूहः, (पाणिनि: ४।२।३७), भावोऽसाधारणधर्म्मः, (शब्दप्रवृत्तिनिमित्तं भावः, प्रकृतिजन्यबोधे प्रकारी भाव इति वा) (पाणिनि: ५।१।११९), इदमिति सम्बन्धोपलक्षणं, (पाणिनि: ४।३।१२०), हितमिष्टसाधनं, (पाणिनि. ५।१।५)

४३४। ऋद्रो ये। (ऋत् ।१।, रः १।, ये ७।)।

पित्र्यं। *

४३५। हन्षन्धृतराज्ञामुङ्लोपः ष्णे।

(हन्-षन्-धृतराज्ञां ६॥, उङ्लोपः १।, ष्णे ७।)।

वार्त्तघ्नं पौष्णं धार्त्तराज्ञं। एषां किं, सामनं। †

स्वार्थः प्रकृतार्थानतिरिक्तः ("स्वार्थे 'उपसंख्यानम्'" इति वार्त्तिकम्)। एषु अर्थेषु ते पूर्व्वोक्ताः (४१५) ष्णि ष्णेय ष्ण्य ष्णायन ष्णीय ष्णिक ष्ण, (४२६) ष्णीक कण् ष्णीन इय, एते एकादश प्रत्ययाः सेतः अनितश्च स्युरित्यर्थः। अत्रापि यस्मात् शब्दात् यस्मिन्नर्थे यः प्रत्ययः सेत् अनित्, वा स्यात्, एतत् सर्व्वं प्रयोगानुसारेणैव ज्ञेयं। आदिपदेन "सास्य देवता" (पा. ४।२।२४), "तदस्य पण्यम्" (पा. ४।४।५१), "शिल्पम्" (पा. ४।४।५५), "प्रहरणम्" (पा. ४।४।५७), "शीलम्" (पा. ४।४।६१), "तत्र नियुक्तः" (पा. ४।४।६९), "तस्येश्वरः" (पा. ५।१।४२) इत्यादयो बहवोऽर्था बोध्याः। हैम इति अनेन ष्णप्रत्यये, (४१६) वृद्धिः (३३७,२५८) नस्य अकारस्य च लोपः। एवं अपां विकारः आप्यः अत्र ष्ण्यः। अग्नेर्विकारः आग्नेयः, अत्र ष्णेयः। भिक्षाणां समूहः भैक्षं (पाणिनिः ४।२।३८), अङ्गानां समूहः आङ्गं, (वार्त्तिकम्), अत्र ष्णे (४३२) अङ्गादेशः। गणिकानां समूहः गाणिक्यं, अत्र ष्ण्यः। राज्ञां समूहः राजकं, अत्र कण्। यूनां भावः यौवनं, (४२४) अविकार-ष्णे परे न-लोपाभावः, (१९४) तद्धितवर्ज्जनात् न वस्य उः। (पाणिनिः ५।१।१३०)। समस्य भावः साम्यं, विरूपस्य भावो वैरूप्यं, उभयत्र ष्ण्यः। (पुरोहितादिगणान्तर्गतस्य) राज्ञो भावः (पाणिनिमते भावः कर्म्म वा) राज्यं (सम्राड्वचनं), ष्ण्यप्रत्यये, (३३७, २५८) नस्य अकारस्य च लोपः। सुहृदो भावः सौहार्द्दं ष्णः, (४१६) सुभगादित्वात् उभयपदवृद्धिः। वैष्णवमित्यत्र ष्णे, (३३७) उवर्णस्य ओकारे, (३५) अव्। तव इदं त्वदीयं, अत्र ष्णीयः, (२१५) त्वदादेशः। मघवत इदं माघवनं, (१९१) तृङ्पक्षे माघवतं, शुन इदं शौवनं, उभयत्र ष्णे, (१९४) न वस्य उः, (४२४) अविकारष्णे न-लोपनिषेधश्च।

* ऋकारो रः स्यात तद्धित-यकारे परे। पितुरिदं पित्र्यं, (४३२) अनित् ष्ण्यः। (पितुरागत इति तु पाणिनिः ४।३।७९)। ये किं, पैतृकं, सेत् कण्।

† हन् च षन् च धृतराजन् च तेषां। षन् इति षन्-भागान्तः, तेन उक्षन्-पूषन्-प्रभृतीनां ग्रहणं। (११७) सदालोऽल्लोप इत्यनेनैव अल्लोपे सिद्धे इदं नियमार्थं, तेन

४३६। युष्मदस्मद्त्वन्मदां युष्माकास्माक-तवकममकाः ष्णाणीने।

(युष्मद्—मदां ६।।।, युष्माक—ममकाः १।।।, ष्णणीने ७।)।

यौष्माकं यौष्माकीणं, आस्माकं आस्माकीनं, तावकं तावकीनं मामकं मामकीनं। *

सूर्य्याय हितं सौरीयं आगस्तीयं आत्मनीनं। चोर एव चौरः त्रैलोक्यं रामकः। †

ष्णे परे एषामेव उङ्लोपः स्यात् नान्यस्य इत्यर्थः। वृत्रघ्न इदं इति वाक्ये (४३३) ष्णे कृते वृत्रहन् इत्यस्य उङ्लोपे, (१८६) हस्थाने घ्नः, (४१६) आद्यचो वृद्धिः, वार्त्तघ्नं। एवं पूष्ण इदं पौष्णं, धृतराज्ञ इदं धार्त्तराज्ञं। उष्णस्तु अपत्यार्थे ष्णे, पौष्ण इति (४२४) पूर्व्वमुदाहृतम्। एषां किं, साम्न इदं सामनं, अत्र पूर्व्वेणापि (११७), उङ्लोपो न स्यात्। सर्व्वत्र अविकार-ष्णे न-लोपाभावः (४२४)। पाणिनिः ६।४।१३५।

* युष्मद् अस्मद् त्वद् मद् एषां स्थाने क्रमात् युष्माक अस्माक तवक ममक एते आदेशाः स्युः ष्णे णीने च परे। युष्माकमिदं इति वाक्ये ष्णे णीने च कृते युष्माकादेशे वृद्धौ यौष्माकं यौष्माकीणं। एवं आस्माकं आस्माकीनं। तव इदं इति वाक्ये ष्णे णीने च युष्मद् एकत्वात् (२१५) त्वदादेशे, अनेन तवकादेशे वृद्धौ तावकं तावकीनं, एवं मामकं मामकीनं। स्त्रियां मामकी (छन्दसि), मामिका (लोके)। पाणिनिः ४।३।१,२,३।

† (४३३) हितार्थे उदाहरति सौरीयमित्यादि। सूर्य्याय इत्यस्मात् णीये विभक्ति-लोपे, (२६०) यलोपः। एवं आगस्तीयं। आत्मने हितं आत्मनीनं, अत्र णीने (४२४) न-लोपनिषेधः। (पाणिनिः ५।१।६ ; ६।४।१६९)। स्वार्थे उदाहरति, चौर इति। एवं त्रिलोकी एव त्रैलोक्यं, अत्र ष्ण्यं वृद्धौ (२५८) ईकारलोपः। स्वार्थप्रत्ययान्ताः पूर्व्वलिङ्गा एवेति नियमेऽपि अस्य क्लीवत्वमभिधानात्; अतएवोक्तं क्वचित् स्वार्थिकाः प्रत्यया लिङ्गवचनान्यतिवर्त्तन्ते। राम एव रामकः, अत्र कण्। कप्रत्ययोऽन्यार्थेऽपि भवति, यथा—अज्ञाने कुत्सिते चैव संज्ञायामनुकम्पने। तद्युक्तनीतावप्यल्पे वाच्ये ह्रस्वे च कः स्मृतः॥ इति प्राञ्चः। तद्युक्तनीतौ अनुकम्पायुक्तनीताविव्यर्थः। पाणिनिः "अज्ञाते" (५।३।७३), "कुत्सिते" (७४), "संज्ञायां कन्" (७५), "अनुकम्पायाम्" (७६), "नीतौ च तद्युक्तात्" (७७), "अल्पे" (८५), "ह्रस्वे" (८६)।

४३७ । केऽकः स्वो हे तु वा ।

(के ७।, अकः ६।, स्वः १।, हे ७।, तु ।१।, वा ।१।) ।

कन्यका, सुकन्यकः सुकन्याकः । *

शिवो देवता यस्यासौ शैवः, शाक्तेयः । †

४३८ । त्वतौ भावे । (त्व-तौ १॥, भावे ७।) ।

साधुत्वं जड़ता, पाचकत्वं, ब्राह्मणीत्वं । ‡

---

* अकः प्रत्याहारस्य स्वः स्यात् कणि परे, बहुव्रीहौ तु वा । कन्या एव कन्यका, अत्र अनित-कणि कृते, अनेन ह्रस्वे, स्वार्थप्रत्ययान्तास्तल्लिङ्गा एवेति (२४६) आप् । एवं मृणालिका रामोरुका, सेनानिका इत्यादि । शोभना कन्या यस्येति बहुव्रीहौ सुकन्यकः सुकन्याकः, अत्र वा ह्रस्वः । अक इति किं, नौरेव नौका इत्यादि । पाणिनिः ७।४।१३,१४,१५ ।

ङसे परेऽपि क्वचित् ह्रस्वो वक्तव्यः यथा—कालिदासः, वेदेहिबन्धुः, केतकिदन्तुरितं, नाड़िनचत्रमित्यादयः प्रयोगानुसारात् ।

† (४३३) आदिपदस्य उदाहरणमाह शैवः, अत्र णः । (पाणिनिः ४।२।२४) । एवं शक्तिर्देवता यस्यासौ शाक्तेयः, अत्र णेयः । एवं शाक्त वैष्णवः गाणपत्य इत्यादि । प्रयोगानुसारेण अर्थविशेषे तद्धितप्रत्यया भविष्यन्तीत्यादिपदेन सूचितमिति ।

‡ स्याद्यन्तात् त्व त इति द्वयं स्यात् भावेऽर्थे । अभिधानात् त्वान्तस्य क्लीवत्वं, तान्तस्य च स्त्रीत्वं स्यात् । भावस्तु प्रवृत्तिनिमित्तं, येन धर्म्मेण अयं गौरिति प्रतीतिः स धर्म्मो गोशब्दस्य भाव इत्यर्थः । साध्व्या भावः साधुत्वं, जड़ाया भावः जडता, उभयत्र (३२७) पुंवद्भावः । पाचिकाया भावः पाचकत्वं, अत्र (३२८) पुंवद्भावनिषेधेऽपि, (३५०) विशेषविधानात् पुंवद्भावः । एवं पश्व्या भावः पश्वत्वं, मैथिल्या भावः मैथिलत्वमित्यादि । ब्राह्मण्या भावः ब्राह्मणीत्वं (३५०) अजात्याख्य इत्युक्तेः न पुंवद्भावः, एवं दत्तात्व-मित्यादि । त्व त इत्युभयस्य भावविहित-ण्यादिप्रत्ययस्य च सामान्यविशेषभावाभावात् बाध्यबाधकत्वाभावे जड़स्य भावः जड़त्वं जड़ता जाड्यं, गुरोर्भावः गुरुत्वं गुरुता गौरवमित्यादि स्यादेव । अत्र वक्तव्यम्—"देवात् तल्" (५।४।२७) इति पाणिनि-सूत्रेण देव एव देवता इति स्वार्थे तल्प्रत्ययः । पाणिनिः ५।१।११९ ।

४३९। लीकोऽघात् सः ष-स्ति।

(लि-इकः ५।, अ-घात् ५।, सः ६।, षः १।, ति ७।)।

अ-घात् लीकः सः षः स्यात् तद्धिते ते। यजुष्ट्वं, घात्तु गीस्त्वं। *

४४०। च्वत् साम्ये।

(च्वत् ।१।, साम्ये ७)।

उपमानार्थे च्वत् स्यात्। कृष्ण इव कृष्णवत् †

४४१। मतुरस्त्यर्थे।

(मतुः १।, अस्ति-अर्थे ७।)।

श्रीरस्ति यस्यासौ श्रीमान्, विदुष्मान् दोष्मान्। ‡

---

* लिरिक् लीक् तस्मात्। नास्ति घो यत्र सोऽघस्तस्मात्। दीर्घवर्ज्जात् लिङ्गस्य इकः परस्य सस्य षः स्यात् तद्धित-तकारे परे। यजुषो भावः यजुष्ट्वं, एवं हविष्ट्वं। गिरो भावः गीस्त्वं, एवं धूस्त्वं, अत्र (२२८) दीर्घे, रेफस्य (१०२) विसर्गे, (६५) विसर्गस्य सकारे, षत्वप्राप्तौ दीर्घपरत्वान्निषेधः। लीकः किं, वभुस्तरां। पाणिनिः ८।३।१०१।

† समस्य भावः साम्यं तस्मिन्। स्याद्यन्तात् च्वत् स्यात् उपमानेऽर्थे। चकारोऽव्ययार्थः (९४)। कृष्ण इव कृष्णवत् शिवो भातीति शेषः, एवं कृष्णमिव कृष्णवत् शिवं मन्ये इति शेषः। एवं सर्व्वविभक्त्यन्तात् च्वत्प्रत्यये [illegible]। उपमानं क्रियाविशेषणीयमेव, तेन पुत्रेण तुल्यः स्थूल इत्यादौ क्रियाभिन्नसाम्ये न स्यात्। पाणिनिः ५।१।११५, ११६,११७। एषु सूत्रेषु द्वितीयातृतीयाषष्ठीसप्तमीविभक्त्यन्तादेव वतिः स्यादित्युक्तम्।

‡ अस्ति अर्थो यस्य यस्मिन् वा सः अस्त्यर्थो विद्यमानसम्बन्धस्तस्मिन्। प्रथमान्तपदात्, अस्ति अस्य अस्मिन् वा इत्यर्थे, (अस्य अस्मिन्निति पाणिनिसूत्रे धृतत्वात्), मतुः स्यात्, उकार इत् (१९२) नुमर्थः, (१८५) दीर्घार्थः, स्त्रियां (२५७) ईबर्थश्च। तेन श्रीमान् श्रीमती। एवं श्रीरस्ति यस्मिन्निति वाक्येऽपि श्रीमान्। विद्वान् अस्ति यस्य यस्मिन् वा इति वाक्ये विदुष्मान्, अत्र (२२९) मतौ परे वसोर्वकारस्य उकारविधानसामर्थ्यादेव, (४४२) अकारोङ्त्वेन प्राप्तव्यं वतुं बाधित्वा, मतुः स्यात्। ततश्च वस्य उत्वे, (४३१) न दं तसावित्यनेन दान्तत्वनिषेधात् विरामाभावे, (१८३) दत्वोऽप्राप्तौ, (१११) षत्वं। एवं दोरस्ति यस्य स दोष्मान्। अत्र इवादेर्मतुर्वक्तव्यः, यवादिश्च—यव ऊर्मि भूमि कृमि द्राक्षा हरित् ककुत् गरुत् प्रभृतिः। पाणिनिः ५।२।९४,९५।

४४२ । मोङ्म-झपात् वतुः ।

(म्-अ-उङ्-म-अ-झपात् ५।, वतुः १।) ।

मकारोङोऽवर्णोङो मकारान्ता दवर्णान्तात्, झपान्ताश्च, वतुः स्यादस्त्यर्थे । लक्ष्मीवान्, यशस्वान् भास्वान्, किंवान्, ज्ञानवान् विद्यावान्, विद्युत्वान् । *

४४३ । स्रङ्मेधास्मायात् विन् वा ।

(स्रज्-मेधा-अस्-मायात् ५।, विन् ।१।, वा ।१।) ।

स्रग्वी मेधावी तेजस्वी मायावी । पक्षे स्रग्वान् इत्यादि । †

"न कर्म्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेदर्थप्रतिपत्तिकरः" इति प्राञ्चः, तेन, शोभना बुद्धिरिति कर्म्मधारये सुबुद्धिरस्त्यस्येति सुबुद्धिमान् जन इति न स्यात्, शोभना बुद्धिर्यस्यासौ सुबुद्धिरिति बहुव्रीहिणैव तदर्थप्रतिपादनात् । मत्वादीनां स्थानमाह दुर्गसिंहः, भूम-निन्दा-प्रशंसासु नित्ययोगेऽतिशायने । संसर्गेऽस्तिविवक्षायामभी मत्वादयो मताः ॥ यथा—भूम्नि गोमान् । निन्दायां पापी । प्रशंसायां रूपवान् । नित्ययोगे क्षीरिणो वृक्षाः । अतिशायने उदरवती कन्या । संसर्गे दण्डी पान्थः ।

* मश्च अश्च मौ, मौ उङौ ययोस्तौ मोङौ, मोङौ च मश्च अश्च झप् चेति तस्मात् । झप् प्रत्याहारः । लक्ष्मीरस्त्यस्य, यशोऽस्त्यस्य, भा अस्त्यस्य, किम् अस्त्यस्य, ज्ञानमस्त्यस्य, विद्या अस्त्यस्य, विद्युत् अस्त्यस्य, सर्व्वत्र अस्मिन् वा, इति क्रमेण वाक्यानि । यशस्वान् भास्वान् विद्युत्वान् एतेषु (४३१) दान्तत्वनिषेधात् न सस्य विसर्गः, न च (५८) तस्याने द । पदसाधनन्तु पूर्व्ववत् । पाणिनि. ८।२।९,१० ।

कुमुद-वेतस-नड़ादीनाम् मकारलोपो निपात्यः, तेन कुमुद्वान् वेतस्वान् नड्वान् इत्यादि । (पाणिनिः ४।२।८७ । एतन्मते ड्मतुप्) । राजन्वान् इत्यत्र न-लोपाभावो निपात्यः । (पाणिनिः ८।२।१४) । उदन्वानुदधौ अर्थे निपात्यः । (पाणिनिः ८।२।१३) । अष्ठीवत्-चक्रीवत्-चर्म्मण्वदादयश्च निपात्याः (पाणिनिः ८।२।१२) ।

† स्रक् च मेधा च अस् च माया चेति समाहारे तस्मात् । एभ्योऽस्त्यर्थे विन् वा स्यात् । पक्षे पूर्व्वेण वतुः । स्रक् अस्त्यस्य स्रग्वी, अत्र दान्तत्वनिषेधाभावात् विरामे परे (२११) कुङ्, ततः (१८८) दीर्घः, (११८) न लुप् । एवं मेधा अस्त्यस्येत्यादि । आमयोऽस्त्यस्य आमयावीति निपातनात् अकारस्य आकारः । पाणिनिः ५।२।१२१ । "आमयस्योपसंख्यानं दीर्घश्च" इति वार्त्तिकञ्च ।

४४४। नैकाजादिन् वा।

(नैकाजात् ५।, इन् ।१।, वा ।१।)।

अनेकाचोऽवर्णान्तादिन् वा स्यादस्त्यर्थे। ज्ञानी शिखी। *

४४५। शं-कंभ्यां य-यु-त-तु-ति-व-भाः।

(शं-कं भ्या ५॥, य—भाः १॥)।

शंयः शंयुः शन्तः शन्तुः शन्तिः शंवः शंभः। †

४४६। गो तृण मेधा दन्त काण्ड द्यु बल बलि पर्व्व चूड़ा फेन लोम पाम प्रज्ञा मध केश रजः फलोर्णा शृङ्ग निद्राशी वातादे—र्मिन् सेरोरेर मोलेभ तलेल श न ण र व वलेन यारकाल्वंकिन् वा।

(गो—वातादेः ५।, मिन्—किन् ।१।, वा ।१।)।

---

* न एको नैकः, नैकोऽच् यस्य स नैकाच्, नैकाचासौ अश्चेति नैकाजः तस्मात्। ज्ञानम् अस्त्यस्य ज्ञानी, शिखा अस्त्यस्य शिखी, एवं माली दण्डी इत्यादि। पक्षे ज्ञानवानित्यादि। नैकाचः किं, स्वं धनम् अस्त्यस्येति न स्वी, परन्तु स्ववान्, स्वामीति स्वयं वक्ष्यति। पाणिनिः ५।२।११५। "इनिठनोरेकाचरात् प्रतिषेधः" इति वार्त्तिकञ्च।

† शम् कम् इति मान्ताव्ययाभ्याम् एते सप्त प्रत्ययाः स्युः अस्त्यर्थे। शं कल्याणं विद्यतेऽस्य शंयः, अत्र टिलोपाभाववीजं (४३०) द्रष्टव्यम्। एवं (४३१) नञा निर्द्दिष्टमनित्यमिति न्यायात् दान्तत्वनिषेधाभावे (५०) मस्यानुस्वारः। एवं शंयुरित्यादि। कं वारिणि च मूर्द्धनीत्यमरः। पाणिनिः ५।२।१३८। अत्र द्रष्टव्यम्—बोधलिङ्गप्रकाशिते अष्टके पाणिनीये शिवरामप्रकाशितायाञ्च वैयाकरणसिद्धान्तकौमुद्यां बप्रत्ययो वर्ग्यत्वेन लिखितः, तारानाथतर्कवाचस्पतिप्रकाशितायान्तु सिद्धान्तकौमुद्याम् अन्तःस्थत्वेनेति प्रभेदः। "यो वः प्रत्ययसन्धिजः" इति नियमात्तु अन्तःस्थएव भवितुमर्हति।

एभ्य एते क्रमात् स्युः अस्त्यर्थे वा। गोमी।*

४४७। नाम्न्यस्त्यर्थेऽचो र्घः।

(नाम्नि ७।, अस्त्यर्थे ७।, अचः ६।, र्घः १।)।†

स्वामी, तृणसः, मेधिरः रथिरः, दन्तुरः, काण्डीरः अण्डीरः, द्युमः द्रुमः, बलूलः वातूलः, बलिभः तुन्दिभः, पर्व्वतः मरुत्तः, चूडालः मांसलः, फेनिलः पिच्छिलः, लोमशः रोमशः, पामनः अङ्गना, प्राज्ञः श्राद्धः, मधुरः कुञ्जरः, केशवः मानवः, रजस्वला कृषीवलः, फलिनः वर्हिणः, ऊर्णायुः अहंयुः, शृङ्गारकः वृन्दारकः, निद्रालुः दयालुः, अर्शसः वैजयन्तः, वातकी अतिसारकी।‡

---

* क्रमो यथा—

गो	तृण	मेधा	दन्त	काण्ड	द्यु	बल	बलि	पर्व्व	चूडा	फेन	लोम
मिन्	स	इर	उर	ईर	म	ऊल	इभ	त	ल	इल	श

पाम	प्रज्ञा	मधु	केश	रजस्	फल	ऊर्णा	शृङ्ग	निद्रा	अर्शस्	वात
न	ण	र	व	वल	इन	यु	आरक	आलु	अ	किन्

वातादेरित्यादिपदं सर्व्वत्र योज्यं। अत्र यद्यपि सामान्येनोक्तं तथापि अर्थविशेषे ज्ञातव्यः। गावो विद्यन्तेऽस्य गोमी, पक्षे गोमान्। पाणिनिः ५।२।११४ ; ४।२।८० ; "मेधारथाभ्यामिरन्निरचौ वक्तव्यौ" इति वार्त्तिकम ; ५।२।१०६ ; १११ ; १०८ ; "बलाच्चोलः" इति वार्त्तिकम् ; ५।२।१३९ ; "पर्व्वमरुद्भ्यां तप्" इति वार्त्तिकम् ; ५।२।९६ ; ९९ ; १०० ; १०१ ; १०७ ; १०९ ; ११२ ; "फलबर्हाभ्यामिनच्" इति वार्त्तिकम् ; ५।२।१२३,१४० ; "शृङ्गवृन्दाभ्यामारकन्" इति वार्त्तिकम् ; निद्रालुः दयालुरिति निपूर्व्वद्राधातोः दयधातोश्च आलुच्प्रत्ययेन सिद्धं (पा. ३।२।१५८) न तु तद्धितप्रत्ययेन ; ५।२।१२७ ; १२९।

† अचो दीर्घः स्यात् अस्त्यर्थप्रत्ययेषु, नाम्नि वाच्ये। पाणिनिः ६।३।१२०।

‡ स्वोऽस्यास्तीति स्वमस्तीति वा स्व इत्यस्मात् मिन्, अनेन दीर्घः, स्वामी ईश्वरः। तृणम् अस्त्यस्य तृणसः, एवं मेधा अस्त्यस्य मेधिरः इत्यादि वाक्यं। यथासम्भवं (२५८) इवर्णावर्णलोपः। सर्व्वत्र अभिधानात् स्त्रीपुंलिङ्ग-व्यवस्था।

४४८ । वाग्मि वाचाट वाचालाः ।

(वाग्मि—वाचालाः १॥) ।

वाचोऽस्त्यर्थे एते निपात्यन्ते । *

४४९ । जन-खलादि-गो-रथ-वातात् तेन्-चकड्योलं सङ्घे ।

(जन—वातात् ५।, त-इन्-त्र-कड्य-ऊलं १।, सङ्घे ७।) ।

जनता बन्धुता, खलिनी हलिनी, गोत्रा, रथकड्या, वातूलः ।†

एतद्भिन्नानि—चूड़ादित्वात्—("सिध्मादिभ्यश्च" इति तु पाणिनिः ५।२।९७) मांसलः अंसलः पांशुलः श्यामलः पिङ्गलः कपिलः कण्डूलः पृथुलः पक्ष्मलः मञ्जुलः मृदुलः चटुलः पेशलः शुक्लः तुन्दिलः शीलः कुशलः धारालः शीतलः पुष्कलः श्लेष्मलः । रोमादित्वात्—कपिशः कर्कशः गिरिशः । पामादित्वात्—वामनः दद्रुणः लक्ष्मणः । प्रज्ञादित्वात्—वार्त्तः शार्करः सैकतः वैद्यः बाभवः । मध्वादित्वात्—शुषिरः ऊषरः पुष्करः मुखरः खरः नखरः पाण्डुरः बन्धुरः कुञ्जरः नगरं । केशादित्वात्—विषुवः राजीवः गाण्डीवः अर्णवः मणिवः हिरण्यवः । रजआदित्वात्—दन्तावलः शिखावलः पर्षद्वलः ऊर्जस्वलः भ्रातृवलः पुत्रवलः उत्साहवलः । फलादित्वात्—मलिनः । ऊर्णादित्वात्—शुभंयुः । निद्रादित्वात्—तन्द्रालुः लज्जालुः श्रद्धालुः कृपालुः हृदयालुः, शीतालुः उष्णालुः हिमेलुः—इत्यादीनि प्रयोगानुसारात् ज्ञेयानि ।

* वाच्शब्दस्य स्थाने एते निपात्यन्ते अस्त्यर्थे । निपातो ह्यर्थविशेषे इति वाग्मीति प्रशंसायां, वाचाटवाचालौ निन्दायां, बहुभाषित्वादस्त्यर्थे इति । "यो हि सम्यग्बहु भाषते स वाग्मी" । यौ तु कुत्सितं बहु भाषेते तौ वाचाटवाचालौ । अतएव पाणिनौ (५।२।१२४,१२५) सूत्रद्वयं, परसूत्रे च "कुत्सित इति वक्तव्यम्" इति वार्त्तिकम् ।

† जनश्च खलश्च तौ आदी यस्य स जनखलादिः, सच गौश्च रथश्च वातश्च तत्तस्मात् । तश्च इन्च त्रश्च कड्यश्च ऊलश्च सत् । समूहार्थे जनादेस्तः खलादेरिन् गोशब्दात् त्रः रथात् कड्यः वातादूलः स्यादित्यर्थः । जनानां समूहः जनता, एवं बन्धुता गजता । खलानां समूहः खलिनी, एवं हलिनी विसिनी पद्मिनी कुमुदिनी । जनादिः खलादिश्च प्रयोगतो ज्ञेयः । गवां समूहः गोत्रा, रथानां समूहः रथकड्या, वातानां समूहः वातूलः । ऊलप्रत्ययान्तस्य पुंस्त्वम् अन्येषां स्त्रीत्वञ्च अभिधानात् । पाणिनिः ४।२।४३, ५०,५१ ; "वातात् समूहे च" इति "खलादिभ्यः इनिः" इति च वार्त्तिकम् । अत्र रथकट्या इत्यपि पाठान्तरं दृश्यते ।

४५० । सङ्ख्याया डट् पूरणे ।

(सङ्ख्याया: ५।, डट् ।१।, पूरणे ७।) ॥

एकादशानां पूरण: एकादश: । *

४५१ । नोऽसङ्ख्यादेर्मट् ।

(न: ५।, असङ्ख्यादे: ५।, मट् ।१।) ।

असङ्ख्यादेर्नान्तसङ्ख्याया मट् स्यात् पूरणे । पञ्चम: । †

४५२ । तमट् षष्ट्यादे: । (तमट् ।१।, षष्ट्यादे: ५।) ॥

असङ्ख्यादे: षष्ट्यादे: पूरणे तमट् स्यात् ।

षष्टितम: सप्ततितम: । सङ्ख्यादेस्तु एकषष्ट: । ‡

४५३ । शतादि-मास-संवत्सरात् । (५।) ।

एभ्यस्तमट् स्यात् पूरणे । शततम: एकशततम:, मासतम: संवत्सरतम: । §

---

* सङ्ख्यावाचकेभ्यो डट् स्यात् पूरणे । डटावितौ, अकारस्थिति:, डित्त्वात् (१२६) टिलोप:, टित्त्वात् (२५७) ईप् । पूर्य्यते सम्पद्यते अनेनेति पूरण: करणेऽनट् । दशपर्य्यन्तानां विंशतप्रत्ययेन बाधितत्वात् तान् विहाय उदाहरति, एकादशानां पूरण: एकादश: इति, एकादश सङ्ख्या येन करणेन पूर्णा भवति स एकादश: पुत्र:, दशपुत्रेभ्य: पर इत्यर्थ: । एवं द्वादश इत्यादि । स्त्रियाम् एकादशी इत्यादि । पाणिनि: ५।२।४८ ।

† सङ्ख्या आदिर्यस्य स सङ्ख्यादि:, न सङ्ख्यादिरसङ्ख्यादिस्तस्मात्, न इत्यस्य विशेषणं । पञ्चाना पूरण: पञ्चम: (११८) नस्य लुप् । टित्त्वात् (२५७) पञ्चमीत्यादि । एवं सप्तम: अष्टम: नवम: दशम: । असङ्ख्यादे: किं एकादश: द्वादश इत्यादि । एषां मुख्यानामेव ग्रहणं, तेन अतिपञ्चानां पूरण इत्यादौ न स्यात् । पाणिनि: ५।२।४९ ।

‡ षष्टिरादिर्यस्य स षष्ट्यादिस्तस्मात् । षष्टे: पूरण:, सप्तते: पूरण: । एवं ऊनषष्टितम:, अशीतितम इत्यादि । एकषष्ट इति (४५०) डट् । पाणिनि: ५।२।५८ ।

§ शतादेश्च मासस्य संवत्सरस्य तत्तस्मात् । पृथक् योगात् असङ्ख्यादेरिति

४५४ । विंशत्यादेर्वा । (विंशत्यादे: ५।, वा ।१।) ।

विंशतितम: विंश:, त्रिंशत्तम: त्रिंश: । *

४५५ । चतु:-षड्-डति-कतिपयात् थट् ।

(चतु:—कतिपयात् ५।, थट् ।१।) ।

चतुर्थ: षष्ठ: कतिथ: कतिपयथ: । †

४५६। बहु-गण-पूग-सङ्घातोस्तिथट् तलोपश्च।

(बहु—अतो: ५।, तिथट् ।१।, तलोप: १।, च ।१।) ।

बहुतिथ: यावतिथ: । ‡

नानुवर्त्तते, तेन सङ्ख्यादिभ्योऽसङ्ख्यादिभ्यो वा एभ्य इत्यर्थ: । शतस्य पूरण:, एकशतस्य पूरण:, मासस्य पूरण:, संवत्सरस्य पूरण: । एवं एकमासतम: एकवत्सरतम इत्यादि । पाणिनि: ५।२।५७ ।

* विंशतिरादिर्यस्य स तस्मात् । आदिपदेन नवतिपर्य्यन्तं व्यवस्थीयते । सङ्ख्यादेरसङ्ख्यादेर्वा विंशत्यादेस्तमट् स्याद्वा पूरणे । विंशते: पूरण: विंशतितम:, पक्षे (४५०) डट्, (१२६) तेर्लोप:, (२५८) अकारलोप:, विंश: । एवं त्रिंशत्तम: त्रिंश: इत्यादि । सङ्ख्यादेस्तु एकविंशतितम: एकविंश इत्यादि । पूर्व्वेण (४५२) सङ्ख्यादिवर्जनेऽपि, अनेन सङ्ख्यादे: षष्ट्यादे: पूरणे तमट् वा वक्तव्य:, तेन एकषष्टितम: एकषष्ट इत्यादि । पाणिनि: ५।२।५६ ।

† चतुर् च षष् च डतिश्च कतिपयश्च तत्तस्मात् । डतिरिति प्रत्यय: (५०८), तेन तदन्तानां कति-यति-ततीनां ग्रहणं । एभ्य: पूरणे थट् स्यादित्यर्थ: । चतुर्णां पूरण: चतुर्थ:, एवं षष्ठ इत्यादि । विद्यमानविभक्तिकानां पदत्वं स्वाभाविकं, लुप्तविभक्तिकानान्तु पदत्वं आतिदेशिकमेव, ततश्च आतिदेशिकमनित्यमिति न्यायात्, चतुर्थ: षष्ठ इत्युभयत्र पदत्वाभावेन विरामाभावात् (१०२) रस्य न विसर्ग:, (१५५) षस्य च न ड इति । पाणिनि: ५।२।५१ ।

‡ बहुश्च गणश्च पूगश्च सङ्घश्च अतुश्च तत्तस्मात् । अतुरिति प्रत्यय: (५०८), तेन यावत् तावत् एतावत् कियत् इयत् इत्येतेषां ग्रहणं । एभ्य: पूरणे तिथट् स्यात्, तिथट् परे अव्यवहितपूर्ववर्त्ति-तकारस्य लोपश्च इत्यर्थ: । बहूनां पूरण: इत्यादि वाक्य । पाणिनि: ५।२।५२,५३ ।

४५७। द्वितीय तृतीय तुर्य्य तुरीयाः। (१॥)।

एते निपात्याः। *

४५८। सङ्ख्याया धाच् प्रकारे।

(सङ्ख्यायाः ५।, धाच् ।१।, प्रकारे ७।)।

चतुःप्रकारं चतुर्द्धा। †

४५९। द्वैधं द्वेधा त्रैधं त्रेधा षोढ़ैकध्यं वा।

(द्वैध—ऐकध्यं ।१॥, वा ।१।)।

एते निपात्यन्ते वा प्रकारे। पक्षे द्विधा त्रिधा षड्धा एकधा। ‡

४६०। सङ्ख्याया अवयवे तयट्।

(सङ्ख्यायाः ५।, अवयवे ७।, तयट् ।१।)।

चतुरवयवं चतुष्टयं। §

---

* द्वयोः पूरणः, त्रयाणां पूरणः, चतुर्णां पूरणः, इति वाक्येषु क्रमेण एते निपात्याः। तुर्य्य इत्यत्र (२२८) तद्धितयकारवर्जनात् न दीर्घः। पाणिनिः ५।२।५४,५५; तुर्य्यतुरीयेत्यत्र "चतुरश्छयतावाद्यक्षरलोपश्च" इति वार्त्तिकस्य।

† सङ्ख्यायाः इत्यनेन (१०१) सङ्ख्यातुल्यानामपि ग्रहणं, तेन सङ्ख्यावाचकेभ्यः डत्यतुबहुगणेभ्यश्च धाच् स्यात् प्रकारे। चकारोऽव्ययार्थः। प्रकारो भेदसादृश्ये इत्यमरः। चतुःप्रकारमिति चत्वारः प्रकारा यस्य तत्। एवं कतिधा इत्यादि। सर्व्वविभक्त्यर्थे एवायं प्रत्ययः, तेन चतुःप्रकारान् भुङ्क्ते, चतुःप्रकारैः भुङ्क्ते इत्यादौ चतुर्द्धा भुङ्क्ते इति। पाणिनिः ५।३।४२। अपिच (५।४।२०) इति पाणिनिसूत्रेण बहोः क्रियाभ्यावृत्तिगणने वर्त्तमानात् स्वार्थे धाप्रत्ययो वा स्यात्; यथा, बहुधा दिवसस्य भुङ्क्ते, बहुवारानित्यर्थः। अतएव वारार्थेऽपि धा इति जौमराः। यथा, तद्धितपरिशिष्टे "बहोरविप्रकर्षे धा वा" इति सूत्रकृता गोयीचन्द्रेण "बहुशब्दादविप्रकर्षे वारे वाच्ये धा वा स्यात्" इति वृत्तिर्लिखिता।

‡ द्विप्रकारं, त्रिप्रकारं, षट्प्रकारं, एकप्रकारमिति यथाक्रमं वाक्यानि। षड्धेति (१५५) डे कृते, दान्तटवर्गपरत्वात् न (४७) धस्य ढः। पाणिनिः ५।३।४४,४५,४६; षोढ़ेत्यत्र "धासु वा" इति वार्त्तिकस्य।

§ पुनः सङ्ख्याग्रहणं डत्यतुबहुगणानामप्राप्त्यर्थं। अवयववृत्तेः सङ्ख्यायाः तयट् स्यात्,

४६१। द्वित्रिभ्यां तयस्यायज्वा। (द्वित्रिः ५।, वा ।१।, अयट् ।१।)।

द्वयं द्वितयं, त्रयं त्रितयं। *

४६२। तरतमौ द्विबहूनामेकोत्कर्षे।

(तर-तमौ १॥, द्वि-बहूनां ६॥, एकोत्कर्षे ७।)।

द्वयोरेकस्यातिशये तरो बहूनां तमः स्यात्।

अयमनयोरतिशयेन विद्वान् विद्वत्तरः, अयमेषामतिशयेन विद्वान् विद्वत्तमः। शुभ्रतरा शुभ्रतमा। †

४६३। रूपकल्पे चेबूप् स्वं वा त्रित्तु पुंवच्च।

(रूप-कल्पे ७।, च ।१।, ईप्-ऊप् ।१।, स्वं १।, वा ।१।, त्रित् ।१।, तु ।१।, पुंवत् ।१।, च ।१।)।

ट इत्। द्वयोर्विभाषयोर्मध्ये विधिर्नित्यः। चत्वारोऽवयवा यस्य तत् (कुलं) चतुरवयवं इति वाक्ये चतुष्टयं, (१०२,६५,४३८,४७)। स्त्रियां चतुष्टयी। पाणिनिः ५।२।४२।

* द्वौ च त्रयश्च तत् तस्मात् द्वित्रेः। आभ्यां अयट् स्याद्वा अवयवे। द्व्यवयवं त्र्यवयवं इति वाक्यद्वयं, द्वि-त्रि-शब्दाभ्यां अयट्, (२५८) इकार-लोपः। पक्षे पूर्व्वेण तयट्। स्त्रियां द्वयी, त्रयी। पाणिनिः ५।२।४३।

† तरश्च तमश्च तौ। द्वौ च बहवश्च द्विबहवस्तेषां, (३१३) निर्द्धारणे षष्ठी। द्विबहूनामिति बहुवचनान्तत्वेऽपि शब्दसाम्यात् तरतमाभ्यां क्रमो ज्ञेयः। उत्कर्षोऽतिशयः। एवम् उत्कर्षार्थ-प्रत्ययान्ताः पूर्व्वलिङ्गा एव। विद्वत्तरः विद्वत्तमः, उभयत्र विद्याया उत्कर्षो गम्यते, (१८३) दङ्, (६४) दस्य त। इयमनयोरतिशयेन शुभ्रा शुभ्रतरा, आसामतिशयेन शुभ्रा शुभ्रतमा, (३२७) पुंवद्भावः। एवं अतिशयेन साध्वी साधुतरा इत्यादि। अत्र द्रष्टव्यम्—सूत्रे उत्कर्षशब्दं प्रयुज्य वृत्तौ अतिशयशब्दः प्रयुक्तः। अस्यायमभिप्रायः—विद्वत्तरः विद्वत्तमः इतिवत् मूर्खतरः मूर्खतमः इत्यपि भवति। नहि प्रकर्षमात्रे एव तरतमौ, परन्तु अपकर्षस्य अतिशयेऽपि। गुणानामुत्कृष्टापकृष्टत्वेऽपि तदतिशय एव तरतमप्रयोजकः। अतएव तद्धितपरिशिष्टे श्रीमता गोयीचन्द्रेण "द्विबहुभ्योऽत्यर्थे तरतमौ" इति सूत्र विन्यस्य "अतिशयश्च समानरूपापेक्ष एव भवति" इति उक्तम्। पाणिनिः ५।३।५५,५७।

चकारात् तर-तम-रूप-कल्पेषु ईबन्तमूबन्तञ्च ह्रस्वं स्याद्वा उदृदित्तु पुंवच्च। स्त्रितरा स्त्रीतरा, वामोरुतरा वामोरूतरा। विदुषितरा विदुषीतरा विद्वत्तरा, सतितरा सतीतरा सत्तरा।*

४६४। त्यादेश्च रूपः।

(त्यादेः ५।, च ।१।, रूपः १।)।

त्स्त्यादेर्यौत्कर्षे रूपः स्यात्। पटुरूपः, पचतिरूपं।†

४६५। किमेव्याच्चाद्रव्ये चतरां चतमां।

(किम्-ए-व्यात् ५।, च ।१।, अद्रव्ये ७।, चतरां-चतमां ।१॥)।

किम एदन्तात् व्यात् त्याद्यन्ताच्च द्विबह्वनामेकोत्कर्षे चतरां चतमां स्तः नतु द्रव्ये। किन्तरां प्राह्णेतरां उच्चैस्तरां, पचतितरां। एवं चतमां। द्रव्ये तु उच्चैस्तरस्तरुः।‡

---

* रूपश्च कल्पश्च रूपकल्पं तस्मिन्। ईप् च ऊप् च ईबूप्। उश्च ऋश्च ऌ, ऌ इत यस्य त्रित्। ईबन्तं ऊबन्तञ्च पदं ह्रस्वं वा स्यात् तरतमरूपकल्पेषु परेषु, उकारेत् ऋकारेत्तु पुंवच्च वा इत्यर्थः। (३२७) पुंवतस्तृक्षेत्यनेन नित्ये प्राप्ते अनेन विकल्पविधानं। इयमनयोरतिशयेन स्त्री, इयमनयोरतिशयेन वामोरुः, इति वाक्यद्वयं। उभयत्र स्त्रियाः सौन्दर्य्यगत उत्कर्षो गम्यते। अनेन वा ह्रस्वः। विदधातोः शतृ (११०३) तस्य स्थाने क्वसु प्रत्यये, (२५७) ईपि, (२१९) वस्य उः विदुषी इति, ततः इयमनयोरतिशयेन विदुषी, एवं अस धातोः (११००) शतृप्रत्यये ईपि सती, ततः इयमनयोरतिशयेन सती इति तरप्रत्यये, अनेन वा ह्रस्वः, पक्षे पुंवच्च। पाणिनिः६।३।३५।

† येन विधिस्तदन्तस्येति न्यायात् त्यादेः त्याद्यन्तात् चकारात् लिङ्गाच्च रूपः स्यात्। अत्र एकप्रत्ययस्य अर्थद्वयेन क्रमान्वयासम्भवात् केवलम् उत्कर्षे इत्येव अनुवर्त्तते। अतिशयेन पटुः पटुरूपः, अतिशयेन पट्वी पटुरूपा, (३२७) पुंवद्भावः। अतिशयेन पचति पचतिरूपं, अत्र क्रियाया उत्कर्षः। एवं अतिशयेन पचन्ति पचन्तिरूपं इत्यादिषु कर्तृवचनानुसारेण तिबादयः प्रयुज्यन्ते, परन्तु क्रियायाः पुंस्त्वाद्यभावेन रूपान्त-क्रियापदस्य लिङ्गनिर्णयाभावे सामान्यत्वान्नपुंसकं, एवं क्रियायाः सङ्ख्याभावेन च प्रथमोपस्थितमेकवचनमेव। पाणिनिः ५।३।६६ ; १।१।३८।

‡ किम् च एश्च व्यश्च किमेव्यं तस्मात्। न द्रव्यमद्रव्यं तस्मिन्। चतरां च चतमां च तौ। मण्डूकगत्या द्विबह्वनामेकोत्कर्षे इति अनुवर्त्तते। चकारात् त्याद्यन्ताच्च।

४६६। गुणादिष्ठेयसू।

(गुणात् ५।, वा ।१।, इष्ठ-ईयसू १॥)।

गुणवाचिनो द्विबहूनामेकोत्कर्षे क्रमादिष्ठेयसू ईयस्विष्ठौ वा स्तः।*

४६७। त्रौमंश्च डिन्नैकाचः।

(त्रि-इमन् ।१।, च ।१।, डित् ।१।, नैकाचः ५।)।

त्रि-रिमन् इष्ठ ईयसुश्च अनेकाचो लेः परो डित् स्यात्। लघिष्ठः, लघीयान्।†

किन्तु चानुकृष्टं नोत्तरत्र इति न्यायात् त्यादन्तस्य न पश्चादनुवृत्तिः। द्रव्याणि यथा—क्षित्यप्तेजोमरुद्व्योम-काला दिग्देहिनौ मन इति नव। द्वयोरेकोत्कर्षे चतरां, बहूनामेकोत्कर्षे चतमामिति क्रमः। चकारेत् अव्ययार्थं। अत्र किमादीनां मध्ये ये गुणादिवाचिनो द्रव्यवाचिनश्च तेभ्यो गुणादौ वाच्ये एतौ प्रत्ययौ स्तः, द्रव्यवाच्ये तु न स्त इत्यर्थः। इदमनयोरतिशयेन किम् किन्तरां, किम्शब्दोऽत्र कुत्सितार्थः। द्वयोरतिशयेन प्राह्णे प्राह्णेतरां, एकारान्तात् प्रत्ययविधानसामर्थ्यात् सप्तमीविभक्तेरलुक्। अयमनयोरतिशयेन उच्चैः उच्चैस्तरां (शब्दः), एवं नीचैस्तरां, सुतरां नितरामित्यादि। इदमनयोरतिशयेन पचति पचतितरां, अत्र पचनक्रियाया उत्कर्षः। उच्चैस्तर इति, यद्यपि द्रव्ये (जातौ च) प्रकर्षाभावस्तथापि गुणक्रियाप्रकर्षो यदा द्रव्ये आरोप्यते तदैवायं प्रतिषेधः, पूर्व्वेण (४६२) तरतमाविति। एवमेव गोयीचन्द्रस्तद्धितपरिशिष्टे—"जातिद्रव्ययोः प्रकर्षाभावात् गोतरो डित्थतम इति न भवति। यदात्रापि क्रियागुणप्रकर्षो विवक्ष्यते तदा तरतमाभ्यां भवितव्यमेव।" पाणिनिः १।१।२२ ; ५।४।११।

* गुणवाचिन इति गुणवद्वाचिन एव ग्रहणं, नतु गुणमात्रवाचिनः, तेन शुक्लीयान् घटः इति स्यात्, नतु घटस्य शुक्लीयानिति। अतएव "गुणवचनेभ्यो मतुपो लुगिष्टः" इति भाष्यलिखनम्। "शुक्लोगुणोऽस्यास्तीति शुक्लः पटः" सिद्धान्तकौमुदी। द्विबहूनामेकोत्कर्षे इति अनुवर्त्तते। यद्यपि पाणिन्यादिव्याकरणेषु (पाणिनिः ५।३।५५, ५७,५८) द्विबहूनामित्यनेन ईयस्विष्ठयोः क्रमो दृश्यते, तथापि, वोपदेवेन क्रमविपरीतप्रयोगदर्शनात्, इष्ठेयसू ईयस्विष्ठौ वा स्त इति वृत्तौ क्रमाभावः कथितः।

† त्रिश्च इमन् च तत् त्रौमन्। चकारादिष्ठेयसू च। नास्ति एकोऽच् यस्य स नैकाच् तस्मात्। इमन्साहचर्यात् त्रिरत्र लेः पर एव, तेन जागरयतीत्यादौ न प्रसङ्गः। अयमनयोरेषां वा अतिशयेन लघुः लघिष्ठः, इष्ठे, अनेन तस्य डित्त्वे,

४६८। लुङ्मद्वद्विनां । (लुक् ।१।, मत्-वत्-विनां ६।॥)।

मतिष्ठः। मेधिष्ठः। *

४६९। ठन् लोप्यः। (ठन् ।१।, लोप्यः १।)।

करिष्ठः। †

४७०। वाढान्तिक स्थूल दूर युव क्षिप्र क्षुद्र प्रिय स्थिर स्फिरोरु गुरु बहुल तृप्र दीर्घ ह्रस्व वृद्ध वृन्दारकाः—साध नेद स्थव दव यव क्षेप क्षोद प्र स्थ स्फ वर गर बंह त्रप द्राघ ह्रस वर्ष वृन्दाः।

(वाढ—वृन्दारकाः १।॥, साध—वृन्दाः १।॥)।

एषां स्थाने क्रमादेते स्युः आदिषु।

साधिष्ठः नेदिष्ठः स्थविष्ठः दविष्ठः यविष्ठः क्षेपिष्ठः क्षोदिष्ठः

---

(१२६) टिलोपः। एवं लघीयानिति वा। पक्षे लघुतरः लघुतम इति। पाणिनिः ६।४।१५५।

* मत्र वत्र विन् च तेषां। अर्थवशात् विभक्तिर्विपरिणाम इति न्यायात् आदेः सप्तम्यन्तत्वेनानुवृत्तिः। तेन—जि इमन् इष्ठ ईयसु एषु परेषु मत्-वत्-विनां लुक् स्यात्। अतिशयेन मतिमान् मतिष्ठः, अनेन मतोर्लुकि, डित्वात् टि-लोपः। अतिशयेन मेधावान् मेधावी वा इति वाक्यद्वये वतु-विनोर्लुकि डित्वात् टिलोपे मेधिष्ठ-इति। एवं मतीयसी मेधीयसीत्यादि। पाणिनिः ५।३।६५।

† ठन् लोप्यः स्यात् आदिषु। अतिशयेन कर्त्ता करिष्ठः, अत्र ठनो लोपे, त्यलोपे त्यलक्षणमिति न्यायात्, (५४२) गुणे एकाच्त्वात् न डित्त्वभावः। एवं करीयान्। कर्त्तुर्भावः करिमा। कर्त्तारमाचष्टे कारयति, अत्र ठनो लोपे, तदन्त्यगुणस्य णिवृत्तौ, ञौ परे पुनः (५७७) वृद्धिः। पाणिनिः ६।४।१५४।

प्रेष्ठः स्थेष्ठः स्फेष्ठः वरिष्ठः गरिष्ठः बंहिष्ठः त्रपिष्ठः द्राघिष्ठः ह्रसिष्ठः वर्षिष्ठः वृन्दिष्ठः । *

४७१ । प्रशस्यः श्रः । (प्रशस्यः १।, श्रः १।) ।

श्रेष्ठः । †

४७२ । ज्यो वृद्धश्चेयस्त्राः ।

(ज्यः १।, वृद्धः १।, च ।१।, ईयस्त्री ।१।, आः १।) ।

वृद्धः प्रशस्यस्य आदौ ज्यः स्यात्, तस्मादीयसोरी आः स्यात् । ज्येष्ठः ज्यायान् । ‡

---

* वाढस्य अन्तिकस्य इत्यादि, साधस्य नेदस्येत्यादि च द्वन्द्वः । स्फिरो बह्वर्थे, उरुर्महार्थः, तृप्नोतीति तृप्रः औणादिको रेफः । वृन्दारको देवो मुख्यो वा । क्रमो यथा—

वाढ	अन्तिक	स्थूल	दूर	युवन्	क्षिप्र	क्षुद्र	प्रिय	स्थिर
साध	नेद	स्थव	दव	यव	क्षेप	क्षोद	प्र	स्थ
स्फिर	उरु	गुरु	बहुल	तृप्र	दीर्घ	ह्रस्व	वृद्ध	वृन्दारक
स्फ	वर	गर	बंह	त्रप	द्राघ	ह्रस	वर्ष	वृन्द

एषां मध्ये ये गुणवाचका न भवन्ति तेभ्योऽपि इष्ठादयो भवन्ति, इष्ठादिषु परेषु आदेशविधान-सामर्थ्यात् । अयमनयोरेषां वा अतिशयेन वाढः साधिष्ठः, एवं सर्व्वत्र प्रथमान्तेन वाक्यं । इष्ठप्रत्यये अनेन साधादि-आदेशे (४६७) डित्त्व (१२६) टिलोपः । प्रेष्ठः स्थेष्ठः स्फेष्ठः एतेषु एकाच्त्वात् न डित्त्वं । एकाच्-वर्जनसामर्थ्यादेव (२५८) यवोरिति न अकारलोपः । रामतर्कवागीशस्तु प्र स्थ स्फान् विना सर्व्वे हसन्तादेशाः, एकाच्त्वात् आदीनां न डित्त्वमिति वदति । एतन्मतञ्च पाणिनिसम्मतम्, वर् गर् बंहि वर्षि द्राघि त्रप् इत्यादि-हसन्तादेशप्रयोगात् । पाणिनिः ५।३।६३,६।४।१५६, १५७ ।

† प्रशस्यः श्रः स्यात् आदौ । अयमनयोरेषां वा अतिशयेन प्रशस्यः श्रेष्ठः । एवं श्रेयान् । प्रशस्यस्य भावः श्रेमा । पाणिनिः ५।३।६० ।

‡ ईयसोरी ईयस्त्री इति लुप्तप्रथमैकम् । अयमनयोरेषां वा अतिशयेन वृद्धः प्रशस्यो वा ज्येष्ठः । एवं ज्यायान्, अत्र ज्यादेशात् परस्य ईयसोरीकारस्य आः । पूर्व्वेण (४७०) वर्षिष्ठः वर्षीयानिति च भवति । पाणिनिः ५।३।६१,६२ ।

४७३। पृथु मृदु कृश भृश दृढ परिवृढस्यर्।

(पृथु—परिवृढस्य ६।, ऋत् ।१।, र: १।)।

एषामृकारस्य आदौ र: स्यात्। प्रथिष्ठ:। *

४७४। युवाल्पौ कन् वा।

(युवाल्पौ १॥, कन् ।१।, वा ।१।)।

कनिष्ठ:, यविष्ठ: अल्पिष्ठ:। एवमीयसु:। †

४७५। गुणादिमन् भावे।

(गुणात् ५।, इमन् ।१।, भावे ७।)।

गुणवाचिन इमन् स्यात् भावे। लघिमा। ‡

४७६। भूयोभूमभूयिष्ठा:।

(भूयस्-भूमन्-भूयिष्ठा: १॥)।

---

* पृथुश्च मृदुश्चेत्यादि द्वन्द्वे तस्य। अयमनयोरेषां वा अतिशयेन पृथु: प्रथिष्ठ:। एवं म्रदिष्ठ: क्रशिष्ठ: भ्रशिष्ठ: द्रढिष्ठ: परिव्रढिष्ठ:, प्रथीयान्, प्रथिमा इत्यादि च। पाणिनि: ६।४।१६१।

† युवा अल्पश्च कन् स्याद्वा आदौ। अयमनयोरेषां वा अतिशयेन युवा अल्पो वा कनिष्ठ: इति युवाल्पयोरुदाहरणं, पक्षे युवन्शब्दस्य (४७०) यविष्ठ:, अल्पशब्दस्य अल्पिष्ठ:। एवं कनीयान्, पक्षे यवीयान् अल्पीयान्। पाणिनि: ५।३।६४।

‡ गुणवाचिन इति गुणवद्वाचिन इत्यर्थ:। तेन रूपस्य भाव: रूपत्वं, रसस्य भाव: रसत्वमित्यादि, न तु रूपिमा रसिमा इत्यादि। शुक्लिमा कालिमा नीलिमा इत्यादि तु शुक्लादिगुणवतो घटादेरेव धर्म्म:। लघोर्भाव:, लघ्व्या भाव:, लघुनो भाव इति वाक्यत्रयेऽपि लघिमा, (३२७) पुंवद्भाव:, (४६७) डित्त्वं, (१२६) टिलोपश्च। इमन्-प्रत्ययान्त: पुंलिङ्गएव अभिधानात्, केवलं प्रियस्य भाव: प्रेमा प्रेम इति पुंलिङ्ग: क्लीवलिङ्गश्च। प्रेमा ना प्रियता हार्द्दं प्रेम स्नेह इत्यमर:। पाणिनि: ५।१।१२२।

बह्वी-रीयस्त्रिमन्निष्ठान्तस्य भ्रमादेते निपात्यन्ते। *

४७७। त्यादेश्चोने कल्पदेश्यदेशीयाः।

(त्यादेः ५।, च ।१।, ऊने ७।, कल्प-देश्य-देशीयाः १।।)।

लेस्त्याद्यन्ताच्च ईषदूनेऽर्थे एते स्युः।

ईषदूनो विद्वान्—विद्वत्कल्पः विद्वद्देश्यः विद्वद्देशीयः। तार्किकदेशीया। पचतिकल्पं। †

४७८। लेर्वहुः प्राक्। (लेः ५।, बहुः १।, प्राक् ।१।)।

ईषदूनः पटुः बहुपटुः। ‡

४७९। पाशः कुत्सायां। (पाशः १।, कुत्सायां ७।)।

कुत्सितो भिषक् भिषक्पाशः। §

---

* अतिशयेन बहुरिति बहुशब्दादीयसुप्रत्यये भूयः, इष्ठप्रत्यये भूयिष्ठः। बहोर्भाव-इति इमनप्रत्यये भूमा इति। पाणिनिः ६।४।१५८ १५९।

† ति आदिर्यस्य स त्यादिस्तस्मात्। आ (ईषत्) ऊनः ओनस्तस्मिन्, (२६) अकारलोपः। कल्पश्च देश्यश्च देशीयश्च ते। विद्वत्कल्प इति (१८३) विरामे परे दङ्। एवं विद्वद्देश्यः विद्वद्देशीयः। एषां पूर्व्वलिङ्गतैव। ईषदूना दीर्घा दीर्घकल्पा दीर्घदेश्या दीर्घदेशीया, एषु (३२७) प्रसन्नतरादित्वात् पुंवद्भावः। ईषदूना तार्किकी तार्किकदेशीया, (३५०) पुंवद्भावः। ईषदूनं यथा स्यात्तथा पचति पचतिकल्पं, एवं पचतःकल्पं, पचन्तिकल्पमित्यादि। पाणिनिः ५।३।६७।

‡ लेः पुनरुपादानं त्यादिनिवृत्त्यर्थं। स्याद्यन्तात् बहुः स्यात्, सच बहुः परत्र जातः सन् पूर्व्वः स्यादित्यर्थः। बहुपटुरिति विभक्तेर्लुकि कृते, पुनर्लिङ्गसंज्ञायां विभक्तिः। ईषदूना विदुषी बहुविदुषी, अत्र बहुप्रत्ययस्य प्रसन्नतरादित्वेऽपि परस्थायित्वाभावात् न (३२७) पुंवत्। पाणिनिः ५।३।६८। अत्र द्रष्टव्यम्—बोधलिङ्गशिवराममते बहुप्रत्ययो वर्ग्यबकारादिः, तर्कवाचस्पतिमते तु अन्तःस्थादिः; प्रत्ययत्वेन अन्तःस्थादिरेवात्र लिखितः। ४४५ सूत्रटीका द्रष्टव्या।

§ स्याद्यन्तात् पाशः स्यात् कुत्सायां। कुत्सिता विदुषी विद्वत्पाशा, प्रसन्नतरादित्वात् पुंवद्भावः। पाणिनिः ५।३।४७।

४८० । चरट् भूतपूर्व्वे । (चरट् ।१।, भूतपूर्व्वे ७) ।

भूतपूर्व्वेऽर्थे चरट् स्यात् । भूतपूर्व्व आढ्यः आढ्यचरः । *

४८१ । ष्या रूप्यश्च । (ष्याः ५।, रूप्यः ११, च ।१।) ।

ष्यन्तात् रूप्यः चरट् च स्यात् भूतपूर्व्वेऽर्थे ।

कृष्णस्य भूतपूर्व्वो गौः—कृष्णरूप्यः कृष्णचरः । शुभ्रारूप्यः शुभ्रचरः । †

४८२ । बह्वल्पार्थात् काच्चशस् वा ।

(बह्वल्पार्थात् ५।, कात् ५।, चशस् ।१।, वा ।१।) ।

बह्वर्थादल्पार्थाच्च कात् परश्शस् स्याद्वा ।

बहुशो देहि भूरिशः, अल्पशः स्तोकशः । ‡

---

* भूतपूर्व्वः प्रागभूतः, तस्मिन्नर्थे स्याद्यन्तात् चरट् स्यात्, ट ईबर्थः । भूतपूर्व्वः आढ्यः (न तु सम्प्रति वर्त्तते), भूतपूर्व्वा आढ्या आढ्यचरी, भूतपूर्व्वा विदुषी विद्वच्चरी, प्रशस्ततरादित्वात् (३२७) पुंवद्भावः, टित्वात् (२५७) ईप् । पूर्व्वग्रहणात् यत्र वर्त्तमानता प्रतीयते तत्र न स्यात्, यथा ईश्वरो भूत इति । पाणिनिः ५।३।५३ ।

† ष्यन्तात् षष्ठ्यन्तात् । शुभ्रायाः (गोः) भूतपूर्व्वो गौः शुभ्रारूप्यः, अत्र (३२७) रूप्यवर्ज्जनात् न पुंवद्भावः, शुभ्रचरः अत्र पुंवत् स्यादेव । पाणिनिः ५।३।५४ ।

‡ बहुश्च अल्पश्च बह्वल्पौ, तौ अर्थौ यस्य स तस्मात्, कात् इत्यस्य विशेषणं । चकारेत् अव्ययार्थम् । पृथक् योगात् भूतपूर्व्वे इत्यस्य, ष्या इत्यस्य च नानुवृत्तिः । बहुश इति बहून् बह्वीः बहूनि वा देहीत्यर्थे कर्म्मकारकात् चशस् । भूरिशः इति भूरि अव्ययं बह्वर्थः । एवं सहस्रशः पूगशः वृन्दश इत्यादि । बहुभिर्नेत्रैः पश्यति, बहुभ्यो देहि, बहुषु तीर्थेषु स्नातः इत्यादौ बहुशः । अल्पं देहि अल्पशः, एवं स्तोकशः । क्रमश इति तु वक्तव्यं । कात् किं, बहूनां स्वामीत्यत्र न स्यात् । पाणिनिः ५।४।४२ । अत्र पाणिनिसूत्रे स्वार्थे शस् स्यात्, परसूत्रे च वीप्सायाम् । चशसो वारार्थस्तु टीकाकृद्भिः प्रयुज्यते, यथा, "कुसुमास्तरणे सहायतां बहुशः सौम्य गतस्त्वमावयोः" इति कुमारे बहुशो बहुवारमिति मल्लिनाथव्याख्यानम् । भट्टिकाव्ये "अनेकशोऽसौ शपथानशप्त" इत्यत्र अनेकश इति पदे जयमङ्गलादयोऽप्येवम् ।

४८३। सङ्ख्यैकार्थात् वीप्सायां।

(सङ्ख्या-एकार्थात् ५।, वीप्सायां ७।)।

कति कति कतिशः गणशः यावच्छः तावच्छः, द्विशः, पादशः।*

४८४। चकृत्वस् वारे। (चकृत्वस् ।१।, वारे ७।)।

कति वारान् भुङ्क्ते कतिकृत्वः, गणकृत्वः पञ्चकृत्वः। †

४८५। सुच् चतुर्द्वित्रेः।

(सुच् ।१।, चतुर-द्वि-त्रेः ५।)।

एभ्यः सुच् स्यात् वारे। चतुः द्विः त्रिः। ‡

४८६। मयट् तद्रूपे। (मयट् ।१।, तद्रूपे ७।)।

---

* एकः एकभागः, एकः अर्थो यस्य स एकार्थः,सङ्ख्या च एकार्थश्च समाहारे तस्मात्। सङ्ख्यावाचक-कारकात् एकभागार्थाच्च कारकात् चशस् स्यात् वीप्सायां। कति कति देहि कतिशः, एवं गणं गणं देहि गणशः, यावन्तं यावन्तं यावच्छः, तावन्तं तावन्तं तावच्छः, (१०१) सङ्ख्यातुल्यत्वात् चशस्। द्वौ द्वौ द्विशः, एवं त्रिशः इत्यादि। एकभागार्थात्तु पादं पादं पादशः, एवं पणं पणं पणशः इत्यादि। प्रत्ययेन वीप्साया उक्तत्वात्, अनुक्तवीप्सायां द्वित्वस्य नियमादत्र न द्विः। पाणिनिः ५।४।४३।

† सङ्ख्याभिन्नस्य वारोऽर्थो न सम्भवतीत्याह कतिवारानिति। चित्त्वादव्ययं। एवं गणकृत्वः। (१०१) सङ्ख्यावत्त्वं। पञ्च वारान् पञ्चकृत्वः, एवं दशकृत्व इत्यादि। (२४६) विभक्तेर्लुकि, (१८५) न दीर्घः। पाणिनिः ५।४।१७।

‡ चतुश्च द्विश्च त्रिश्च तत्तस्मात्, पुंस्त्वं सूत्रत्वात्। सुचा चकृत्वस् बाध्यते। सुच-उकार उच्चारणार्थः, चकारोऽव्ययार्थः। वारः क्रियाभ्यावृत्तिगणनम्। चतुरिति, चतुरो वारान् इत्यर्थे सुच्, (१०२) रस्य विसर्गः, (६७) विसर्गस्य सः, (२१२) सस्य लोपः, ततः सुचः सस्य विसर्गः। एवं द्वौ वारौ द्विः, त्रीन् वारान् त्रिः। पाणिनिः ५।४।१८।

तदात्मकेऽर्थे मयट् स्यात्। विष्णात्मकं विष्णुमयं। वाङ्मयं। *

४८७। प्रकारे जातीयः। (प्रकारे ७।, जातीयः १।)।

तार्किकजातीया। †

४८८। वित्ते चुञ्चुचणौ।

(वित्ते ७।, चुञ्चु चणौ १॥)।

विद्याचुञ्चुः विद्याचणः। ‡

४८९। निर्वृत्ते भावादिमः।

(निर्वृत्ते ७।, भावात् ५।, इमः १।)।

पाकिमः। §

---

* तदेव रूपं आत्मा यस्य तत् तद्रूपं तस्मिन्। पृथग्योगात् किमपि नानुवर्त्तते, प्रकरणबलात् स्याद्यन्तादेव। विष्ण्वात्मकमिति विष्णुरात्मा यस्य तत् विष्णुमयं जगत्, एवं वागात्मकं वाङ्मयं शास्त्रं। "एकाचो नित्यम्" इति वार्त्तिकेन वाङ्मयमिति। हिरण्यात्मकं हिरण्मयमिति निपातनात् यलोपः। टित्त्वादीपि तेजोमयी। पाणिनौ बहुभ्योऽर्थेभ्यो मयट् दृश्यते। यथा, आगतार्थे—४।३।८२ ; विकारार्थे अवयवार्थे च—४।३।१४३,१४४,१४९ ; इदमर्थे गोशब्दात् पुरीषे—४।३।१४५ ; विकारार्थे—४।३।१४६, १४८ ; षष्ठ्यर्थे—५।२।४७ ; प्रकृतवचने स्वार्थे—५।४।२१,२२ ; विकारार्थे निपातः—६।४।१७४।

† स्याद्यन्तात् जातीयः स्यात् प्रकारे। प्रकारशब्दः सादृश्यवाची पुंलिङ्गः, तद्युक्तार्थे इत्यर्थः। "सामान्यस्य भेदको विशेषः प्रकारः" इति पाणिनिटीका। तार्किक्याः प्रकारः तार्किकजातीया, (३५०) पुंवद्भावः, तार्किकतुल्या स्त्रीत्यर्थः। एवं पटुजातीयो जनः, मृदुजातीयं फलं। किञ्च विदुष्याः प्रकारः विदुषीजातीया, अत्र जातीयस्य मसन्ततरादिभिन्नत्वात् (३२७) न पुंवद्भावः। पाणिनिः ५।३।६९।

‡ स्याद्यन्तात् ("तृतीयान्तात्" इति तु पाणिनिः) चुञ्चु-चणौ स्यातां वित्ते (तेन ख्याते) अर्थे। चुञ्चुः पञ्चमस्वरद्वयवान्, चणो मूर्द्धन्यवान्। विद्यया ख्यातः इति वाक्यं। पाणिनिः ५।२।२६।

§ भावविहितकृदन्तात् इमः स्यात् निर्वृत्ते (तेन निष्पन्ने) अर्थे। पाकेन निष्पन्नः पाकिमः, (२५८) अकारलोपः। पचनमिति भाववाच्ये (११३४) घञ्, पाकः। "बर्मेम

४९०। पशुभ्यः स्थानद्विषट्के गोष्ठगोयुग-षड्गवं।

(पशुभ्यः ५।॥, स्थान द्वि षट्के ७।, गोष्ठ-गोयुग-षड्गवं १।)।

गोगोष्ठं गोगोयुगं गोषड्गवं। *

४९१। शुण्डोच्चभ्योऽपकर्षे रष्टरौ।

(शुण्डोच्चभ्यः ५।॥, अपकर्षे ७।, र-ष्टरौ १॥)।

अपकृष्टा शुण्डा शुण्डारः शमीरः कुटीरः, उच्चतरी। †

४९२। पीलुतिलोमाकर्णादेः कुणतैलकट-जाहं पाकस्नेहरजोमूले।

(पीलु—कर्णादेः ५।, कुण—जाहं १।, पाक—मूले ७।)।

पीलुकुणः, तिलतैलं, उमाकटः, कर्णजाहं। ‡

नित्यम्" इति पाणिनिसूत्रे (४।४।२०) "एवं तर्हि भाव इति प्रकृत्य इमब्वक्तव्यः" इति वार्त्तिकम्।

* स्थानञ्च द्वौ च षट्कञ्च तस्मिन्। गोष्ठञ्च गोयुगञ्च षड्गवञ्च तत्। पशुवाचकेभ्यः— स्थाने वाच्ये गोष्ठः, द्विकमित्यर्थे गोयुगः, षट्कमित्यर्थे षड्गवः स्यात्। गवां स्थानं गोगोष्ठं, एवं महिषगोष्ठं। गोद्विकं गोगोयुगं, एवं हरिणगोयुगं। गवां षट्कं गोषड्गवं, एवं हरिणषड्गवं। एषां क्लीवत्वं स्वभावात्। "गोष्ठजादयः स्थानादिषु पशुनामभ्यः" "द्वित्वे गोयुगच्" "षट्त्वे षड्गवच्" इति वार्त्तिकत्रयम्।

† शुण्डाश्च उच्चाश्च ते तेभ्यः। उभयत्र बहुवचनं गणार्थं। रश्च ष्टरश्च तौ। शुण्डादेः रः, उच्चादेः ष्टरः स्यात् अपकर्षेऽर्थे (ह्रस्वत्वे, तनुत्वे इति पाणिनिः)। शुण्डा मदिरास्थानं। अपकृष्टा शुण्डा शुण्डारः, एवं अल्पा शमी शमीरः, अल्पा कुटी कुटीरः। सर्व्वत्र पुंस्त्वमभिधानात्। अपकृष्टा (गतयौवना) उच्चा उच्चतरी, एवं अपकृष्टा (बालिका) वत्सा वत्सतरी इत्यादि। पाणिनिः ५।३।८८,९१।

‡ पीलुश्च तिलश्च उमा च कर्णश्च ते आदयो यस्य तस्मात्। कुणश्च तैलञ्च कटश्च जाहञ्च तत्। पाकश्च स्नेहश्च रजश्च मूलञ्च तत्तस्मिन्। पील्वादेः कुणः पाके, तिलादेस्तैलः

४९३ । स्नेहे शाकटशाकिनौ ।

(स्नेहे ७।, शाकट-शाकिनौ १॥) ।

इक्षुशाकटं इक्षुशाकिनं । *

४९४ । इतोऽस्य जाते ।

(इत: १।, अस्य ६।, जाते ७।) ।

फलितं । †

स्नेहे, उमादे: कटो रजसि, कर्णादेर्जाहो मूले स्यादित्यर्थ: । पीलो: पाक:, तिलस्य स्नेह:, उमाया (मसिना) रज: कर्णस्य मूलं इति क्रमेण वाक्यानि। कुणकटान्तयो: पुंस्त्वं, तिलजाहान्तयो: क्लीवत्वञ्चाभिधानात् । पाणिनि. ५।२।२४ । "स्नेहे तैलच्" "कटच्प्रकरणे अलाबूतिलोमाभ्यो रजस्युपसंख्यानम्" इति वार्त्तिकद्वयञ्च ।

* स्याद्यन्तादेतौ स: तस्य क्षेत्रमित्यर्थे । इक्षो: क्षेत्रमिति वाक्यं । यद्यपि सामान्येनोक्तं, तथापि इक्षोरेवेति केचित्, इक्षुमूलकाभ्यामिति परे, "संभवने क्षेत्र शाकटशब्दश्च प्रत्ययो वक्तव्य:" "शाकिनशब्दश्च प्रत्ययोवक्तव्य." इति वार्त्तिकद्वये तु न तथा नियम: ; यथा, इक्षुशाकटं, मूलशाकटं, जीरशाकटं, वास्तुशाकटमित्यादि । एवं इक्षुशाकिनमित्यादि ।

† स्याद्यन्तादित: स्यात् अस्य जातमित्यर्थे । फलमस्य जातं फलितं वनं, फलितो वृक्ष:, फलिता लता । फलादेरेवायं विधि: । फलादिस्तु (पाणिनिमते तारकादि:, कौमारमतेऽपि तथा)—

फल पुष्पाङ्कुरपल्लव गर्व्व कण्टक मुन्दर शर कल्लोलं ।
हर्ष कुतूहल किसलय गर्व्वं हस्तक कञ्चुक सुख सीमन्तं ।
तन्द्रा तिलकं शैवल रोगं कज्जल कुड्मल कोरक वेगं ।
निद्रा मुद्रा मद गल रोषं कर्द्दम कन्दर कुसुम तरङ्गं ।
संज्ञा तारक मूत्र पुरीषं पुलक विचारं व्रण शृङ्गारं ।
स्तवक पिपासा लज्जा द्रोहं निष्क्रमण ज्वर दुःख द्रोहं ।
श्रम दीक्षा वर्म्म मूर्च्छा रण पक्ष्म तृषा क्षुधा: ।
ऋजीषाङ्गार रोमाञ्च प्रवाल व्याधि चन्द्रका: ।
पिण्डीतृकर्ष बुभुक्षा च स्वरीतकण्ठे च मञ्जरी ।

एतद्व्यतिरिक्ता अन्येऽपि गर्भादय: शब्दा: सन्ति । बुभुक्षित-पिपासित-शब्दौ न क्तान्तौ सकर्म्मकत्वात् । पाणिनि: ५।२।३६ ।

४९५। च्विः कृभ्वस्स्वभूततद्भावेऽस्वावीर्घा-व्यस्य।

(च्वि १।, कृ-भू-असमु ७॥, अभूततद्भावे ७।, अ-स्वौ १॥, ईर्घौ १॥, अव्यस्य ६।)।

अभूततद्भावेऽर्थे कृभ्वस्तिषु परेषु च्विः स्यात्, तस्मिंश्चावर्ण-स्वयोरीकार-घौँ स्तः न तु व्यस्य। *

४९६। त्यो वमात्रो लोप्यः।

(त्यः १।, वमात्रः १।, लोप्यः १।)।

वकारमात्रस्त्यो लोप्यः स्यात्।

अकृष्णं कृष्णं करोति कृष्णीकरोति, कृष्णीभवति कृष्णीस्यात्। †

---

* कृश्च भूश्च अस् च ते तेषु। अभूतस्य अजातस्य तद्रूपेण भाव उत्पत्तिरभूततद्भावः। "प्रागवस्थावर्तोऽवस्थान्तरेणाभूतस्याजातस्यानन्तरं तदात्मनोलाभोऽवस्थान्तरेण जन्म अभूततद्भावः" इति तद्धितपरिशिष्टे गोयीचन्द्रः। काष्ठं भस्म करोति इति तु न अभूततद्भावः, किन्तु अभस्म भस्म करोति इत्येव। ("अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्त्तरि च्विः" इति पाणिनिः।) कृधातौ भूधातौ असधातौ वा परे अभूततद्भावेऽर्थे स्याद्यन्तात् च्विः स्यात्, च्वौ परे प्रकृतेरन्तस्थितयोः अवर्ण ह्रस्वयोः क्रमेण ईकार-दीर्घौ स्तः, नतु अव्ययस्य ईकार-दीर्घौ, अव्ययात् च्विप्रत्ययस्तु स्यादेव अव्यस्येति षष्ठ्यन्त निर्देशात्। च्विप्रत्ययस्य इकारश्चिह्नार्थः, चकारस्तु अव्ययार्थः। पाणिनिः ५।४।५०; ७।४।३२।

† व चासौ मात्रश्चेति वमात्रः। वकारमात्रावशिष्टप्रत्ययो लोप्यः स्यात्। तेन च्वि, (१०२८) विण्, (१०३०) विट्, (१०३२) विच् क्विप् इति पञ्चानां लोपः। अकृष्णं कृष्णं करोतीति वाक्ये कृष्ण-शब्दात् च्विः अनेन अवशिष्टस्य वकारस्य लोपे, पूर्ववर्त्तिनः अकारस्य ईकारः। एवं कृष्णीभवति कृष्णीस्यात्। अत्र अस्तीति पदं हित्वा स्यादिति कथनात् स्वौविभक्त्यन्ते असधातौ परे च्विः स्यादिति सूचितं। अतएव, "अस्तेर्लिङन्तस्यैव प्रयोगेऽभूततद्भावस्य प्रतीतिः शब्दशक्तिस्वभावात्" इति तद्धितपरिशिष्टे गोयीचन्द्रः। वक्ष्यमाणसूत्रेष्वपि अस्तेः प्रयोगे एवं व्याख्येयं। एवं अमालां मालां करोति, मालीकरोति—आकारस्य ईकारः। अशान्तिं शान्तिं करोति शान्तीकरोति—इकारस्य दीर्घः। अवर्णह्रस्वभिन्नस्थले तु अमहान्तं महान्तं करोति महत्करोति इत्यादि। अकार्षं कार्षं

४९७। यङ्ङ्र्‍यक्ये चऋ्री।

(यङ्-ङ्र-क्ये ७।, च ।१।, ऋत् ।१।, री ।१।)।

ऋकारो री स्यात् यङि ङ्रे क्ये च्वौ च। मात्रीकरोति। *

४९८। मनश्चक्षुश्चेतोऽरूरजोरहोऽन्तलोपश्च्वौ।

(मनः—रहः ६।, अन्तलोपः ।१।, च्वौ ७।)।

मनीकरोति। †

४९९। कार्त्स्न्यायत्तयोः सम्पद्यक्रादौ चसाद्वा।

(कार्त्स्न्यायत्तयोः ७।, सम्पद्य-क्रादौ ७।, चसात् ।१।, वा ।१।)।

साकल्ये अधीनत्वे च सम्पद्यति कृभ्वस्तिषु परेषु च चसात् स्याद्वा। कृत्स्नं लवणं जलं सम्पद्यते—जलसात् सम्पद्यते। राजायत्तं सम्पद्यते—राजसात् सम्पद्यते। ‡

करोति कर्म्मीकरोति, अज्ञानिनं ज्ञानिनं करोति ज्ञानीकरोति, इत्यादौ (११८) नस्य लुपि, नञोऽल्पार्थत्वात् तदादिविधिनिषेधाभावे, अकारस्येरीकारघौ स्याताम्। अव्ययस्य तु अवृथा वृथा कृत्वा इति वाक्ये वृथाकृत्य इत्यादौ च्विप्रत्ययान्तस्य (५४८) समासे, (११७६) क्राचो यबादेशः। साचीकृत इति तु नञा निर्द्दिष्टमनित्यमिति न्यायात् दीर्घः। पाणिनि: ५।४।५० ; ७।४।२६,३२, "अव्ययस्य च्वावीत्वं नेति वाच्यम्" इति वार्त्तिकञ्च।

* अमातरं मातरं करोति—मातृशब्दात् च्विप्रत्यये ऋकारस्य री। यङि—चेक्रीयते। ङ्रे क्ये, (८४८) मातेवाचरति मात्रीयते, पितरमिवाचरति (८४७) पित्रीयति। पाणिनि: ७।४।२७।

† मनश्च चक्षुश्च चेतश्च अरुश्च रजश्च रहश्च तत्तस्य। एषाम् अन्तस्य लोपः स्यात् च्वौ परे। अमनो मनः करोति मनीकरोति, स-लोपे अकारस्य ई। एवं चक्षूकरोति, ष-लोपे दीर्घः। चेतीकरोति, अरूकरोति, रजीकरोति, रहीकरोति। पाणिनि. ५।४।५१।

‡ कृत्स्नं सकलं तस्य भावः कार्त्स्न्यं। आयत्तिरधीनत्वं। कार्त्स्न्यञ्च आयत्तिश्च कार्त्स्न्यायत्ती तयोः। संपद्य: संपूर्व्वक-देवादिक-पदधातुः, सम्पद्यश्च क्रादिश्च तत्

५०० । देये त्राच । (देये ७।, त्राच् ।१।, च ।१।) ।

देयेऽर्थे त्राच् चसाच स्यात् सम्पद्यादौ ।

देवाय देयं करोति—देवत्रा करोति देवसात् करोति । *

५०१ । नैकाचोऽव्यक्तानुकरणात् डाच् वानितौ द्विश्च । (नैकाचः ५।, अव्यक्तानुकरणात् ५।, डाच् ।१।, वा ।१।, अनितौ ७।, द्विः १।, च ।१।) ।

अनेकाचोऽव्यक्तानुकरणात् सम्पद्यादौ डाच् स्याद्वा, नत्वितौ, तस्मिंश्च द्विर्भावः । †

५०२ । त लोप्योऽतष्टिस्त्वितौ द्वेस्त्वन्तो वा ।

(त ।१।, लोप्यः १।, अतः ६।, टिः १।, तु ।१।, इतौ ७।, द्वेः ६।, तु ।१।, अन्तः १।, वा ।१।) ।

तस्मिन् । सम्पद्ये च इत्यनेनैवेष्टसिद्धौ पुनः क्रादिग्रहणं परत्र अनुवर्त्तनार्थं, चानुकृष्टं नोत्तरत्र इति न्यायेन अनुवर्त्तनबाधात् । चसात्प्रत्ययस्य चकारोऽव्ययार्थः । कृत्स्नं लवणं जलं करोति जलसात् करोति, एवं जलसात् भवति, जलसात् स्यात् । पत्रे तद्रूपेण स्थितिः । पाणिनि: ५।४।५२,५३,५४ ।

* दानार्थ-दाधातोः कर्मणि वाच्ये यप्रत्यये देयं तस्मिन् अर्थे । त्रकारोऽव्ययार्थः । देवत्रा सम्पद्यते देवसात् सम्पद्यते इति च । सम्पद्यादीनां परस्थित्यन्वयेऽपि स्यात्, तेन "अकरोदचिरेश्वरः क्षितौ द्विषदारम्भफलानि भस्मसात्" इति । पाणिनि: ५।४।५५ ।

† एकोऽच् यस्य स एकाच्, न एकाच् नैकाच् तस्मात् । अव्यक्तो ध्वन्यात्मकशब्दः, तस्य अनुकरणम् अव्यक्तानुकरणं तस्मात् । न इति अनिति तस्मिन् । इतौ—तस्मिंश्चेति डाचि सति पूर्वस्य द्वित्वञ्च स्यादित्यर्थः । वाशब्दस्य व्यवस्थया इतौ परेऽपि तस्य द्विर्भावो वाच्यः । पाणिनि: ५।४।५७ ; ६।१।९९ ।

तस्यादन्तस्य त लोप्यो डाचि, इतौ तु टिर्लोप्यः, द्वेस्तु अन्तो लोप्यो वा ।*

पटपटाकरोति । एकाचस्तु—स्रक् करोति ।

इतौ तु पटदिति करोति—पटिति, पटत्पटेति पटत्पटदिति ।†

५०३ । तीय सम्ब वीज सङ्ख्यादिगुणात् कृञि कर्षे । (तीय—गुणात् ५।, कृञि ७।, कर्षे ७।) ।

एभ्यः करोतौ डाच् स्यात् कर्षे ।

द्वितीयं कर्षणं करोति द्वितीयाकरोति सम्बाकरोति, वीजेन सह कर्षणं करोति वीजाकरोति, द्विगुणाकरोति ।‡

५०४ । समय निष्कुल दुःख शूल सत्यात्—यापन निष्कोष प्रातिकूल्य पाकाशपथे ।

(समय—सत्यात् ५।, यापन—अशपथे ७।) ।

---

* तस्यादन्तस्येति तस्य अनेकाचोऽव्यक्तानुकरणस्य, अदन्तस्य अत-भागान्तस्य पटत् झनत् इत्यादेस्तकारो लोप्यः स्यात् डाचि परे, इतिशब्दे परे तु तादृशस्यैव शब्दस्य टिर्लोप्यः स्यात्, एवं इतौ द्विर्भूतस्य तस्यैव शब्दस्य अन्तवर्णो लोप्यो वा स्यादित्यर्थः । पाणिनिः ६।१।९८ ।

† पटत्शब्दात् डाचि, अनेन तकारलोपे पट इत्यस्य द्वित्वे पटपटाकरोति । अनेन टिलोपे पटिति, स्थानिवत्त्वात् न (५८) चपो जम् । द्वेस्तु अन्तो वा लोप्यः पटत्पटेति पटत्पटदिति । पाणिनिः ६।१।१०० ।

‡ तीयः प्रत्ययः, तेन द्वितीयः तृतीयश्च । सङ्ख्या आदिर्यस्य स सङ्ख्यादिः, स चासौ गुणश्चेति सङ्ख्यादिगुणः । तीयश्च सम्बश्च वीजश्च सङ्ख्यादिगुणश्च तस्मात् । कृञि परे एभ्यो डाच् स्यात् कर्षणेऽर्थे । द्वितीयाकरोति द्विवारं क्षेत्रं कर्षतीत्यर्थः, एवं सम्बाकर्षणं करोति । द्वौ एकार्थौ । द्विगुणं कर्षणं करोति द्विगुणाकरोति, एवं त्रिगुणाकरोतीत्यादि । पाणिनिः ५।४।५८,५९ ।

एभ्य: क्रमादेतेष्वर्थेषु डाच् स्यात् कृञि परे। समयाकरोति निष्कुलाकरोति दु:खाकरोति शूलाकरोति सत्याकरोति । *

५०५ । सपत्रनिष्पत्रात् प्रियसुखात् मद्रभद्रात् पीड़ानुकूल्यवपने ।

(सपत्र-निष्पत्रात् ५।, प्रियसुखात् ५।, मद्रभद्रात् ५।, पीडानुकूल्यवपने ७।) ।

एभ्य: क्रमादेतेष्वर्थेषु डाच् स्यात् कृञि। सपत्राकरोति निष्पत्राकरोति मृगं। प्रियाकरोति सुखाकरोति। मद्राकरोति भद्राकरोति । †

---

* समयश्च निष्कुलश्च दु:खश्च शूलश्च सत्यश्च तस्मात। यापनञ्च निष्कोषश्च प्रातिकूल्यञ्च पाकश्च अशपथश्च तस्मिन्। समयात् यापने, निष्कुलात् निष्कोषे, दुःखात् प्रातिकूल्ये, शूलात् पाके, सत्यात् अशपथे अर्थ डाच् स्यात् कृञि परे। समयाकरोति समयं यापयतीत्यर्थ:। निष्कुलाकरोति, दाडिमं निष्कोषयतीत्यर्थ:। अन्तरवयवस्य वहिष्करणं निष्कोष:। निष्कोषभिन्नार्थे शत्रुं निष्कुलं करोति। दु:खाकरोति, शत्रुं पीड़यतीत्यर्थ:, अत्र प्रातिकूल्यं। शूलाकरोति मांसं शूलेन पचतीत्यर्थ.। सत्याकरोति मुनि: सत्यं कथयतीत्यर्थ:, अत्र न शपथ:। शपथे तु सत्यं दिव्यं करोति। पाणिनि: ५।४।६०,६२,६४,६५,६६ ।

† सपत्र निष्पत्राभ्यां पीडायां, प्रियसुखाभ्यां आनुकूल्ये (चित्ताराधने), मद्रभद्राभ्यां वपने (मुण्डने) डाच् स्यात् कृञि। सपत्राकरोति मृगं, व्याध: सपत्रं शरं मृगशरीरे प्रवेशयतीत्यर्थ: ; निष्पत्राकरोति मृगं, मृगशरीरात् शरमपरपार्श्वे निष्क्रामयतीत्यर्थ:। "सपुङ्खशरप्रवेशनेन सपत्रं करोतीत्यर्थ:। सपुङ्खस्य शरस्य अपरपार्श्वे निर्गमनात् निष्पत्रं करोतीत्यर्थ." इतिभट्टोजिदीक्षित:। अन्यत्र सपत्रं (पत्रयुक्तं) करोति प्रावृट, निष्पत्रं (पत्ररहितं) करोति ग्रीष्म, उभयत्र वृक्षमिति शेष:। प्रियाकरोति सुखाकरोति सखायं, सख्युरानुकूल्यं करोतीत्यर्थ:। मद्र भद्रौ मङ्गलार्थौ, मद्राकरोति भद्राकरोति बालं नापित:, मङ्गलपूर्वं वपतीत्यर्थ:। पाणिनि: ५।४.६१,६३,६७, "भद्राच्चेति वक्तव्यम्" इति वार्त्तिकञ्च ।

५०६। दघ्नमात्रट्द्वयसट् माने।

(दघ्न-मात्र-द्वयसट् ।१।, माने ७।)।

परिमाणार्थे एते स्युः।

गजपरिमाणः—गजदघ्नः गजमात्रः गजद्वयसः। *

५०७। सङ्ख्याशन्शतो डिन्।

(सङ्ख्या—शन्-शतः ५।, डिन् ।१।)।

दशी, त्रिंशी। †

५०८। कति यति तति यावत्तावदेतावत्-कियदियन्तः।

(कति—इयन्तः १॥)।

किं-यत्-तदां डत्यन्तानां यत्-तत्-एतत्-किम्-इदमां वत्वन्तानां एते क्रमात् निपात्यन्ते माने। ‡

५०९। दशादेर्डो युते शतादौ।

(दशादेः ५।, डः १।, युते ७।, शतादौ ७।)।

---

* दघ्नश्च मात्रश्च द्वयसश्च समाहारे, तस्मात् ट। टकारस्य प्रत्येकेन सम्बन्धः, दघ्नट् मात्रट् द्वयसट्। परिमाणमिह ऊर्द्धपरिमाणं। गजः ऊर्द्धपरिमाणमस्य गजपरिमाणः—एवमर्थे एते प्रत्ययाः। टित्त्वाद्दीप् च। पाणिनिः ५।२।३७।

† शन् च शत् च, शन्शत्, सङ्ख्या चासौ शन्शत् चेति तस्मात्। शन्शतोः केवलयोरसम्भवात् तदन्तयोर्ग्रहणम्। सङ्ख्यावाचकात् शन्नन्तात् (दशन् आदेः) शत्-अन्ताच्च (त्रिंशत् आदेः) डिन् स्यात् परिमाणार्थे, ड इत्। दश परिमाणमस्य दशी, एवं त्रिंशी (मासः), डिन् (१२६) टिलोपः। "शन्शतोर्डिनिर्वक्तव्यः" इति वार्त्तिकम्।

‡ किं परिमाणमेषां कति, (का संख्या परिमाणमेषामिति तु पाणिनिः), एवं सर्व्वेषां वाक्यानि। पाणिनिः ५।२।४१।

एकादशं शतं, विंशं शतं। *

५१०। किंयत्तदेकान्यात् द्विबहूनामेकनिर्द्धारे डतरडतमौ।

(किं—अन्यात् ५।, द्वि-बहूनां ६।।।, एकनिर्द्धारे ७।, डतरडतमौ १।।)।

अनयो: कतरो वैष्णव:, एषां कतम: शैव:। †

५११। तस् क्ते:। (तस् ।१।, क्ते: ६।)।

क्ते: स्थाने तस् स्यात्। कृष्णत: सर्व्वत: अमुत:। ‡

---

* दश आदिर्यस्य स दशादिस्तस्मात्। अत्र अतद्गुणसंविज्ञानबहुव्रीहिणा दश हित्वा एकादशादीनां ग्रहणं। (अतएव पाणिनौ दशान्तादित्युक्तम्)। एवं उभयत्र आदिशब्दयोर्व्यवस्थावाचित्वात् दशादेरिति षष्टिपर्य्यन्तानामेव, शतादाविति शतसहस्रयोरेव ग्रहणं। तेन, एकादशादे: षष्टिपर्य्यन्तात् ड: स्यात् युते (अधिके इति पाणिनि:) अर्थे, शते सहस्रे च वाच्ये इत्यर्थ:। एकादशभिर्युतं एकादशं शतं, (एकादशाधिका अस्मिन् शते इति पाणिनि:), डित्वात् (१२६) टिलोप:। एवं विंशत्या युतं विंशं शतं, अत्र (१२६) विंशतेस्तिलोपे, (२५८) अकारलोप:। पाणिनि: ५।२।४५,४६।

† कश्च यश्च सच एकश्च अन्यश्च तत्तस्मात्, द्वौ च बहवश्च ते तेषां। जातिगुणक्रियादिभिर्व्यवच्छेदो निर्द्धार:, एकस्य निर्द्धार एकनिर्द्धार: तस्मिन्। डतरश्च डतमश्च तौ। एभ्यो द्वयोर्म्मध्ये एकस्य निर्द्धारणे डतर:, बहूनां मध्ये एकस्य निर्द्धारणे डतम: स्यात्, डिति टिलोप:। अनयोर्म्मध्ये क: कतर:, एषां मध्ये क: कतम:। एवं यतर: यतम इत्यादि। पाणिनि: ५।३।९२,९३,९४।

‡ पृथग्योगात् पूर्व्वात् किमपि नानुवर्त्तते। सर्व्वस्मात् लिङ्गात् सर्व्वविभक्ते: स्थाने तस् आदेश: स्यात्, इति सामान्येन उक्तेऽपि शिष्टप्रयोगानुसारेण प्रयोक्तव्यमेव। अतएव "सार्व्वविभक्तिकस्तसि:" इति भाष्ये। कृष्ण इति, कृष्णमिति, कृष्णेन इति, कृष्णाय इति, कृष्णादिति, कृष्णस्येति, कृष्णे इति वा कृष्णत:। एवं सर्व्वत:। अमुतइति तसो विभक्तिस्थानजातत्वात् सर्व्वं सामान्यविभक्तिनिमित्तं कार्य्यं स्यादेव, तेन (१२२) टे: स्थाने अ:, (२०४) दस्थाने म:, (२३५) अस्थाने उ:। विभक्तिविशेषविहितन्तु साक्षात् विभक्तावेव, तेन असादे: स्थाने तसि कृते हरित इत्यादौ (१२२) गुणादिर्न स्यात्। एवञ्च विभक्तिस्थाने तसादयो ये आदेशास्तदन्तानामव्ययत्वमिति प्राञ्च:।

५१२ । देवादेर्द्वीप्तोस्त्राच् ।

(देवादेः ५।, द्वीप्तोः ६॥, त्राच् ।१।) ।

देवत्रा वन्दे रमे वा । *

५१३ । किंबह्वोस्त्रोऽद्व्यादेः प्त्राः ।

(किं-बह्वोः ५॥, त्रः १।, अद्व्यादेः ५।, प्त्राः ६।) ।

किंबह्वोश्च परस्याः प्त्रास्त्रः स्यात्, नतु द्व्यस्मद्युष्मदः ।
सर्वस्मिन् सर्वत्र, तत्र बहुत्र । †

५१४ । सर्वैकात् काले दा ।

(सर्वैकात् ५।, काले ७।, दा ।१।) ।

सर्वस्मिन् काले सर्वदा । ‡

(पाणिनिः "तद्धितश्चासर्व्वविभक्तिः" १।१।३८) ।) त्राच् थाच् भिन्नान्तानामव्ययत्वं नास्तीत्येके । पाणिनिः ५।३।७,१४ ।

* देवादेः परयोर्द्वितीया-सप्तम्योस्त्राच् स्यात् । देवं देवौ देवान् वा वन्दे देवत्रा वन्दे । देवे देवयोः देवेषु वा रमे देवत्रा रमे । देवादिर्यथा—देवो मनुः पुरुमर्त्यो मनुष्यः पुरुषश्च षट् । पाणिनिः ५।४।५५,५६ ।

† किंश्च बहवश्च तत्तस्मात् । बह्वर्थबहुशब्दस्य ग्रहणं । द्वित्वादिर्यस्य स द्व्यादिः न द्व्यादिरद्व्यादिस्तस्मात् । द्व्यादिश्च (८६) त्यदादिगणसमाप्तिपर्य्यन्त स्यात् त्यद् द्वि-अस्मद् युष्मदः । सर्वस्मिन् सर्व्वयोः सर्व्वेषु वा सर्व्वत्र । सर्व्वस्यां सर्व्वयोः सर्व्वासु इत्यत्रापि सर्व्वत्र, (२२०) प्रत्यये परे पुंवद्भावः । तस्मिन् तयोः तेषु, तस्यां तयोः तासु इति वा तत्र, (१२२) टेः स्थाने अः । बहुषु बहुत्र । "इतराभ्योऽपि दृश्यन्ते" इति पाणिनिसूत्रात् (५।३।१४) स भवान्, ततो भवान्, तत्र भवान् ; अयं भवान् [illegible] भवान् । पाणिनि. ५।३।१० ।

‡ सर्वश्च एकश्च तस्मात् । काले वर्त्तमानाभ्यामाभ्यां परस्याः सप्तम्या दा स्यात् । एकस्मिन् काले एकदा । पाणिनिः ५।३।१५ ।

५१५ । किमन्ययत्तदोर्हिंश्च ।

(किमन्ययत्तदः ५।, र्हिः १।, च ।१।) ।

एभ्यः स्था र्हिं दा च स्यात् । कस्मिन् काले कर्हि कदा । *

५१६ । तदो दानीं वा ।

(तदः ५।, दानीं ।१।, वा ।१।) ।

तदानीं तर्हि तदा । †

५१७ । पूर्व्वान्यान्यतरेतरापराधरोत्तरोभया-देद्युसङ्हि ।

(पूर्व्व—उभयात् ५।, एद्युस् ।१।, अह्नि ७।) ।

पूर्व्वस्मिन्नह्नि पूर्व्वेद्युः । ‡

५१८ । दिक्शब्दाद्दिग्देशकाले स्तात् प्रोपौष्मरौ ऽश्चो लुक् ।

(दिक्-शब्दात् ५।, दिग्-देश-काले ७।, स्तात् ।१।, प्रो-पौ-ष्मरः १।।।, अचः ५।, लुक् ।१।) ।

---

* कस्य अन्यस्य यस्य तस्य तत्स्यात् । अन्यस्मिन् काले अन्यर्हि अन्यदा, यर्हि यदा, तर्हि तदा । पाणिनिः ५।३।२१ ।

† काले वर्त्तमानात् तदशब्दात् सप्तम्या दानीं वा स्यात् । पाणिनिः ५।३।१९ ।

‡ पूर्व्वस्य अन्यस्य अन्यतरस्य इतरस्य अपरस्य अधरस्य उत्तरस्य उभयस्य तत्स्यात् । एभ्योऽष्टभ्यः परस्याः सप्तम्या एद्युस् स्यात् अह्नि वाच्ये । पूर्व्वेद्युरिति अत्र, (५१७) आदिस्त्र इत्यनेन तद्धितप्रकरणोक्तादेशानामपि तद्धितसंज्ञा-विधानात (२५८) अकार-लोपः । पाणिनिः ५।३।२२, "पूर्व्वान्यान्यतरेतरापराधरोभयोत्तरेभ्य एद्युसच्" इति "द्युश्चोभयात्" इति उभयद्युः इति च वार्त्तिकम् ।

परस्तात्, प्राक् । *

५१९ । वैनोऽपी । (वा ।१।, एन: १।, अ-पी ।१।) ।

पूर्व्वेण । †

५२० । दक्षिणोत्तरादाहौ ।

(दक्षिणोत्तरात् ५।, आ-आहौ ।१॥) ।

दक्षिणा दक्षिणाहि । उत्तरा उत्तराहि । ‡

५२१ । वाधराच्चात्ता: ।

(वा ।१।, अधरात् ५।, च ।१।, आत् ।१।, ता: १॥) ।

अधरात् अधरस्मात्, दक्षिणात् दक्षिणस्मात् । §

---

* दिशि वर्त्तमान: शब्दो दिक्शब्द:, सच पूर्व्वादि: प्रागादिश्च । दिशि देशे काले च वाच्ये दिग्वाचकशब्दात् परासां प्रथमा-पञ्चमी सप्तमीनां स्थाने स्तात् स्यात्, अन्च धातो: क्विप्प्रत्ययेन साधितात् अध: परस्य स्तातो लुक् स्यादित्यर्थ: । ग्रन्थकारेण तिसृणां विभक्तीनामेकमुदाहरणं प्रयुक्तं परस्तादिति, परा दिक् परो देश: पर: काल:, परस्या दिश: परस्मात् देशात् परस्मात् कालात्, परस्यां दिशि परस्मिन् देशे परस्मिन् काले, इति वाक्यानि । प्राक् इति प्राची दिक्, प्राक् देश:, प्राक् कालो वा इति प्रथमा स्थाने स्तात् तस्य लुक् । मनीषादित्वात् पुंवत् । एवं पञ्चमीसप्तम्योरपि बोध्यं । पाणिनि: ५।३।२७,३० ।

† दिग्देशकाले वर्त्तमानेभ्यो दिक्शब्देभ्य: प्रोक्तोरेन: स्याद्वा । पूर्व्वेणेति पूर्व्व: पूर्व्वस्मिन् वा इत्यर्थ: । पाणिनि: ५।३।३५ ।

‡ आश्च आहिश्च तौ आहौ, द्विवचनं यथासङ्ख्यनिरासार्थं । दिग्देशकाले वर्त्तमानाभ्यां दक्षिणोत्तराभ्यां प्रथमा-सप्तम्यो: स्थाने आ आहिश्च स्यात् । विशेषत्वात् स्तातो बाधकावेतौ । दक्षिण: दक्षिणस्मिन् वा, उत्तर: उत्तरस्मिन् वा इति वाक्यं । पाणिनि: ५।३।३६,३७,३८ ।

§ ता: प्रोक्ता: । अधरशब्दात् चकारात् दक्षिणोत्तरशब्दाभ्यां दिग्देशकाले प्रथमा-पञ्चमी-सप्तमीस्थाने आत् स्यात् वा । अधर: अधरस्मात् अधरस्मिन् वा अधरात् ।

५२२। पूर्व्वाधरावरा: पुराधावा: स्तादसो:।

(पूर्व्वाधरावरा: १।।।, पुराधावा: १।।।, स्तादसो: ७।।)।

पुरस्तात् पुर:, अधस्तात् अध:, अवस्तात् अव:। अतएव अस्।*

५२३। चवत् थाच् प्रकारे।

(चवत् ।१।, थाच् ।१।, प्रकारे ७।)।

येभ्यस्त्र उक्तास्तेभ्य: प्रकारे थाच् स्यात्, सच तद्वत्। सर्व्व-प्रकारं सर्व्वथा।†

५२४। कुत:क्व कुह कुत्रेतोऽत्रोऽत्रेह सदै-तर्ह्यधुनेदानीं पश्चादुपर्य्युपरिष्टात् परेद्यवि सद्योऽ-द्यैषम: परुत्परारीत्थं कथम्। (कुत:—कथम् ।१।।।)।

दक्षिण: दक्षिणस्मात् दक्षिणस्मिन् वा दक्षिणात् एवं उत्तरात्। विकल्पपक्षे अधरस्मात् दक्षिणस्मादिति। पञ्चम्यन्तोदाहरणं बहुलप्रयोगदर्शनात्। पाणिनि: ५।३।३४।

* पूर्व्वस्य अधरस्य अवरस्य ते। पुरस्य अधस्य अवस्य ते। स्तात्र अस् च तौ तयो:। पूर्व्वस्य पुर: अधरस्य अध: अवरस्य अव: स्यात् स्तादसो: परयो:। पुरस्तादिति पूर्व्व-शब्दात् (५१८) प्रथमादे: स्तात्, आदेशे, अनेन पुर आदेश:। अस् परे पुर आदेशे, (२५८) अकारलोपे पुर:। एवं अधरशब्दात् अधस्तात् अध:, अवरशब्दात् अवस्तात् अव:, अतएव, अस्विधायकसूत्राभावेऽपि अनेन अस् परे आदेशविधानादेव, एतेभ्य: प्रथमादे: स्थाने अस् स्यादिति वक्तव्यं। पाणिनि: ५।३।३९,४०।

† चन्द्रवत् मुखमित्युक्ते यथा चन्द्रस्य आह्लादकत्वेन साम्यं गृह्यते न तु धावल्या-दिना, तथापि चवदित्युक्ते (५१३) अद्र्यादिस्त्रिवज्जनन्तरजातत्वेनैव साम्यं ग्राह्यं, न तु केवलं सप्तमीस्थानजातत्वेन। अतएव—अद्र्यादिस्त्रिवद्भ्यां परासां (उदाहरण-ज्ञापकात्) द्वितीयादिविभक्तीनां स्थाने थाच् स्यात् प्रकारे। प्रकार: सादृश्यं। चकार: अव्ययार्थ:। सच तद्वदित्यनेन, (१२०) प्रत्यये परे पुंवद्भावादिकं स्यादिति सूचितं। सर्व्वं प्रकारं, सर्व्वेण प्रकारेण, सर्व्वस्मै प्रकाराय, सर्व्वस्मात् प्रकारात्, सर्व्वस्य प्रकारस्य, सर्व्वस्मिन् प्रकारे—सर्व्वथा इति। तृतीयाया एव थाच् इति पाणिनि: ५।३।२३।

एते निपात्यन्ते ।

कस्मात्—कुतः, कस्मिन्—क्व कुह कुत्र, अस्मात्—इतः, एतस्मात्—अतः, एतस्मिन्—अत्र, अस्मिन्—इह, सर्व्वदा—सदा, अस्मिन् काले—एतर्हि अधुना इदानीं, अपरस्मिन्—पश्चात्, ऊर्द्ध्वं—उपरि उपरिष्टात्, परस्मिन् अह्नि—परेद्यवि, समानेऽह्नि—सद्यः, अस्मिन्नह्नि—अद्य, अस्मिन् वर्षे—ऐषमः, पूर्व्वस्मिन् वर्षे—परुत्, पूर्व्वतरस्मिन् वर्षे—परारि, इदम्प्रकारं—इत्थं, किम्प्रकारं—कथम् । *

५२५ । त्यत्राद्य चिर दक्षिणाद्यादे—त्य-टन-त्न-त्यण्-मा भवादौ । (त्यत्र—आद्यादेः ५।, त्य—माः १॥, भवादौ ७।) ।

एभ्य एते क्रमात् स्युः भवाद्यर्थे । त्यत्रत्यः तत्रत्यः, अद्यतनी ह्यस्तनी; चिरत्नः परुत्नः, दाक्षिणात्यः पाश्चात्यः, आदिमः मध्यमः । †

---

* कस्मादिति । एषा तावत् टीका, सर्व्वेष्वेव पुस्तकेषु तु मूलमध्ये सन्निविष्टा दृश्यते। पाणिनिः ५।३।५,७,१२,१३,१०,२,५,११,६,१६,१७,१८,२२,२१,२२,२४,२५—७।२।१०४,१०५ ।

† त्यत्रस्य अद्यस्य चिरस्य दक्षिणस्य आदिस्य ते आदयोः यस्य स तस्मात् । त्यश्च टनश्च त्नश्च त्यण् च मश्च ते । अत्र विभक्तिमनाहृत्य शब्दैरेव क्रमग्रहणं, त्यटनत्नत्यणमं इति पाठो वा । त्यत्रादेः त्यः, अद्यादेः टनः (तनट् इति कौमराः), चिरादेः त्नः, दक्षिणादेः त्यण्, आद्यादेः मः स्यात्, तत्र भव इत्याद्यर्थे । त्यत्र भवः त्यत्र वसति वा इत्यर्थे त्यत्रत्यः, एवं तत्रत्यः । अद्यभवा अद्यतनी, (२५७) विभ्यादीप्, एवं ह्यः (पूर्व्वदिने) भवा ह्यस्तनी । अद्यादित्वात्—श्वस्तनः, चिरन्तनः, दिवातनः, दोषातनः, सायन्तनः, सदातनः, सनातनः, पुरातन इत्यादि । ("पुराश्चट्टाश्चट्" इति क्रमदीश्वरः । पुराणः ।) चिरे भवः चिरत्नः, परुत् भवः परुत्नः (अत्र तकार-लोपः), एवं परारित्नः, दक्षिणा भवः

५२६। किमः क्वान्तात् चिच्चनौ।

(किमः ५।, क्वान्तात् ५।, चित्-चनौ १॥)।

कस्यचित् कदाचित्, कस्यचन कदाचन। *

५२७। आदिस्तः। (आदिः १।, तः १।)।

(३२३) चैक्याद्युदप्रष्टोऽः इत्येतमकारमारभ्य यस्य उक्ताः स तसंज्ञः स्यात्। †

इति तपादः।

इति स्याद्यन्ताध्यायः।

स्याद्यन्ताधिकारः समाप्तः।

दाक्षिणात्यः, दक्षिणा इति (५२०) आः। णित्त्वात् (४१६) वृद्धिः। एवं पश्चात् भवः पाश्चात्यः। आदिना पौरस्त्य इत्यादि। आदौ भवः आदिमः, मध्ये भवः मध्यमः। "मध्यान्तपश्चातो डिमः" इति क्रमदीश्वरः। तेन अग्रिमः, अन्तिमः, पश्चिमः। "अग्रादि-पश्चात् डिमच्" "अन्ताच्च" इति वार्त्तिकद्वयम्। पाणिनिः ४।२।९८,१०४, ४।३।८,२३।

* 'असाकल्ये तु चिच्चन' इत्यमरोक्तयोः चित्-चन-इत्यव्ययशब्दयोर्योगेन कश्चित् कोऽपि किञ्चित् काचित् किञ्चिदित्यादिपदे सिद्धेऽपि एतत्सूत्रकरणं कस्यचित् कदाचिदित्यादेरेकपदत्वनिर्व्वाहार्थं, तेन कादाचित्कमित्यादौ (४१६) पूर्व्वपदस्य वृद्ध्यादि स्यादिति।

† अ आदिर्यस्य स आदिः। प्रधानेन व्यपदेशा भवन्तीति न्यायात्, तद्धित-प्रकरणोक्त-विभक्तिस्थानजातानामादेशानामपि तद्धित-संज्ञा स्यादिति, तेन (५१९) पूर्व्वेण इत्यादौ (२५८) णौ परं अकारलोपादि सिद्धं।

त्याद्यन्ताधिकारः।

५म। त्याद्यध्यायः।

१म पादः—संज्ञा।

५२८। घोः—

तिप् तस् अन्ति सिप् थस् थ मिप् वस् मस्—
ते आते अन्ते से आथे ध्वे ए वहे महे (की)

यात् यातांम् युस् यास् यातम् यात याम् याव याम—
ईत ईयाताम् ईरन् ईथास् ईयाथाम् ईध्वम् ईय ईवहि ईमहि(खी)

तुप् ताम् अन्तु हि तम् त आनिप् आवप् आमप्—
ताम् आताम् अन्ताम् स्व आथाम् ध्वम् ऐप् आवहैप् आमहैप्(गी)

दिप् ताम् अन् सिप् तम् त अम्प् व म—
त आताम् अन्त थास् आथाम् ध्वम् इ वहि महि (घी)

दि ताम् अन् सि तम् त अम् व म—
तन् आताम् अन्त थास् आथाम् ध्वम् इ वहि महि (टी)

णप् अतुस् उस् थप् अथुस् अ णप् व म—
ए आते इरे से आथे ध्वे ए वहे महे (ठी)

ता तारौ तारस् तासि तास्थस् तास्थ तास्मि तास्वस् तास्मस्—
ता तारौ तारस् तासे तासाथे ताध्वे ताहे तास्वहे तास्महे(डी)

यात् यास्ताम् यासुस् यास् यास्तम् यास्त यासम् यास्व यास्म—
सीष्ट सीयास्ताम् सीरन् सीष्ठास् सीयास्थाम् सीध्वम् सीय सीवहि
सीमहि (ढी)

स्यति स्यतस् स्यन्ति स्यसि स्यथस् स्यथ स्यामि स्यावस् स्यामस्—
स्यते स्येते स्यन्ते स्यसे स्येथे स्यध्वे स्ये स्यावहे स्यामहे(ती)

स्यत् स्यताम् स्यन् स्यस् स्यतम् स्यत स्यम् स्याव स्याम—
स्यत स्येताम् स्यन्त स्यथास् स्येथाम् स्यध्वम् स्ये स्यावहि स्यामहि
(धो: ५।, तिप्—स्यामहि ।१॥)। (थी) *

एतानि साशीतिशतसङ्ख्यकानि धो: पराणि प्रयुज्यन्ते । †

५२९ । कौ खौ गौ घौ टौ ठौ डौ ढौ तौ थ्यो ऽष्टादशश: । (कौ—थ्य: १॥, अष्टादशश: ।१॥)।

तान्यष्टादशाष्टादश क्रमादेतत्संज्ञानि स्यु: । ‡

---

* "प-न-णा दिस्यौ ति काश्चैत:" इति वार्त्तिकसूत्रम् । पाणिनि: ३।४।७८। अत्र सूत्रे अष्टादशानामेव विभक्तीनामुल्लेख: । पश्चात् लकारस्थाने आदेशा भवन्ति । यथा, २।४।८५, ३।४।८२, १०२, १०८ इत्यादि ।

† धोरिति पञ्चम्यन्तं तिबादीनां प्रत्ययत्वज्ञापनार्थं । सह अशीत्या वर्त्तते यत् तत् साशीति, तच्च तत् शतञ्चेति साशीतिशतं, तत् सङ्ख्या येषां तानि साशीतिशतसङ्ख्यकानि वचनानीत्यर्थ: ।

‡ अष्टादश अष्टादश इति वीप्सायां (४८३) शस्, अष्टादशश: । तानि तिबादीनि अष्टादश अष्टादश भूत्वा, क्रमात् कौ-आदिसंज्ञकानि स्युरित्यर्थ: । भगवता पाणिनिना तु यथाक्रमं लट् (३।२।१२३), विधिलिङ् (३।३।१६१), लोट् (३।३।१६२), लङ् (३।२।१११), लुङ् (३।२।११०), लिट् (३।२।११५), लुट् (३।३।१५), आशीर्लिङ् (३।४।११६), लृट् (३।३।१३), लृङ् (३।३।१३९), एतत्संज्ञकानि कृतानि ।

५३० । पञ्च रः शिच्च ।

(पञ्च १॥, रः १।, शित् ।१।, च ।१।) ।

ताः पञ्च रसंज्ञाः स्युः, शिच्च । *

५३१ । नवशः पमे ञितोऽन्यङिद्भ्यां धे ।

(नवशः ।१।॥, पमे १॥, ञितः ५।, अन्य ङिद्भ्यां ५॥, धे ७।) ।

तानि नव नव क्रमात् प-म-संज्ञानि स्युः, ते च ञितो धोः परे स्तः, तदन्य-ङिद्भ्यान्तु क्रमेण स्तो धे । †

५३२ । ङिदपिद्रः । (ङित् ।१।, अपित् ।१।, रः १।) ।

अपित् रो ङित् स्यात् । ‡

५३३ । कित् ठौ ढीपं । (कित् ।१।, ठौ ।१।, ढीपं १।)

अपित् ठौ क्याः प ञ्च कित्संज्ञं स्यात् । §

---

* ताः पञ्च क्तौ ख्तौ गौ घौ टौ इति पञ्च, प्रथमोपस्थितपरित्यागे प्रमाणाभावात् । व्या र-संज्ञाफलन्तु अभूदित्यादौ (५५४) वसोऽरस्येत्यनेन न इम्, अपित्त्वेन ङित्त्वात् (५३२) न गुणश्च (५४२) । शकारेत्प्रत्ययस्य रसंज्ञया (तदौ अ श व्यथे) तुदतीत्यादौ न गुणः, भवन् दीव्यन् इत्यादिषु शतृप्रत्यये परे शपश्यनादिश्च । पाणिनिः ३।४।११३, ११४ । रः = सार्व्वधातुकम्, अरः = आर्द्धधातुकम् ।

† नव नव इति (४८१) नवशः । पञ्च मञ्च पमे, पं परस्मैपदं, परोद्देश्यकफल-बोधनस्वरूपयोग्य, मं आत्मनेपदं आत्मोद्देश्यकफलबोधनस्वरूपयोग्यं । ञ इत् यस्य स ञित् तस्मात् ञितः । ङ इत् यस्य स ङित्, अन्यश्च ङिच्च अन्यङितौ ताभ्यां । तानि तिवादीनि । ते च पमे आनुबन्धधातोः स्तः, तदन्यस्मात् आनुबन्धभिन्नात् धातोः पं स्यात्, ङानुबन्धात्तु मं स्यात्, कर्त्तरि वाच्ये इति सर्व्वत्रान्वयः । ङानुबन्धात् ममिति विशेषाभिधानात् अन्य इह आनुबन्ध-ङानुबन्धाभ्याम् अन्यो बोध्यः । पाणिनिः १।४।९९,१०० ।

‡ ङ इत् यस्य स ङित, प इत् यस्य स पित्, न पित् अपित् । अपिदिति भिन्नं पदं परत्र अनुवृत्त्यर्थं । पाणिनिः १।२।४ ।

§ क्याः पं ढीपं, यात् यास्तामित्यादि नव । पाणिनिः ३।४।१०४, वार्त्तिकञ्च ।

५३४। दा-धा दा। (दा धा ।१।, दा ।१।)।

अपित् दा धा च दासंज्ञः स्यात्। *

५३५। यलोऽचेक् जिः।

(यल: ६।, अचा ३।, इक् ।१।, जि: १।)।

अचा युक्तस्य यलस्य स्थाने इक् क्रमात् जिसंज्ञः स्यात्। †

५३६। सकृत्, द्विस्तु वा।

(सकृत् ।१।, द्वि: १।, तु ।१।, वा १।)।

जिः पुनर्न स्यात्, द्विस्तु वा स्यात्। ‡

---

* दा धा इत्युभयं स्वरूपं, तेन—दा ल लुनौ, दा त दाने, डु दा ञ् लि च, डु धा ञ् लि च इति चतुर्णां. एव देङ पालने, दो य छेदे, धे ट पाने इति त्रयाणा एचोऽश्वित्या (६०८) इति आकारे कृते दा-संज्ञा, शिति परे आकाराभावात् दासंज्ञा नाप्नोति। अपिदित्यनेन दै प शोधने इत्यस्य दासंज्ञा निषेधः। दासंज्ञाफलन्तु (५४९, ५५२,६१२,८११) एतेषु सूत्रेषु द्रष्टव्य। पाणिनि: १।१।२०। अत्र दा—घु:।

† अचा स्वरवर्णेन युक्तानां य व र ल इत्येषां स्थाने क्रमेण इ उ ऋ ऌ इत्यादेशाः जिसंज्ञाः स्युरित्यर्थः। फलन्तु (६५१,६६१) इत्यादिषु द्रष्टव्य। लकारस्य जिर्न सम्भवति, यल्संज्ञानुरोधादन्तःपतनं। पाणिनि. १।१।४५। अत्र जि: - सम्प्रसारणम्।

‡ सकृत एकवारं, जिरित्यनुवर्त्तते। यावत् सम्भवस्तावद्विधिरिति न्यायात् पुनः सामग्रीसमाधानेऽपि, जि: पुनर्न स्यात्। तेन, व्यय व्यध व्यच व्य इत्यादि धातूना एकवारं य स्थाने इ कृते पुन: वि इत्यस्य स्थाने उर्न स्यादिति। द्विस्तु वा इति वाशब्द: समुच्चयार्थः, द्वित्वञ्च पुनर्न स्यादित्यर्थः। तेन, कितप्रभृति-धातो: सनि कृते द्वित्वे चिकित्स धातो:,चिकित्सितुमिच्छतीति पुन: सनि कृते चिकित्सिषतीत्यादौ पुनर्द्वित्वं न स्यादिति। एवं क्रुधातोर्यङि द्वित्वे चेक्रीयधातो: सनि चेक्रीयिषते इत्यादावपि पुनर्न द्वित्वमिति दुर्गादास:। वस्तुतस्तु (पाणिनौ "अनभ्यासस्य" इति लिखनात) द्विस्तु वेति वाशब्दस्य व्यवस्थितविभाषा अर्थ:, तेन कृतद्वित्वानां पुनर्द्विर्न स्यात, अभ्यादेस्तु (१७४) द्वित्वसंज्ञायां सत्यामपि पुनर्द्वि: स्यादित्यर्थं। पाणिनि: ६।१।३७—६।१।८,९।

५३७। प्रागच्कार्य्यादचि द्विः।

(प्राक् ।१।, अच्कार्य्यात् ५।, अचि ७।, द्विः १।)।

अचि परे अच्-कार्य्यात् प्राक् द्विः स्यात्। *

५३८। द्विः पूर्व्वः खिः। (द्विः ५।, पूर्व्वः १।, खिः १।)।

द्विर्धोः पूर्व्वो भागः खिसंज्ञः स्यात्। †

५३९। स्वघौ घुरू। (स्व-घौ १॥, घु-रू १॥)।

स्वौ घुसंज्ञो घौ रुसंज्ञः स्यात्। ‡

५४०। स्वः स्थे रुः। (स्वः १।, स्थे ७।, रुः १।)।

स्थे परे स्वो रुसंज्ञः स्यात्। §

इति संज्ञा-पादः।

---

* अचः कार्य्यं अच्कार्य्यं तस्मात्, प्राक्शब्दयोगे (३००) पञ्चमी। यत्र स्वरवर्णे परे स्वरवर्णस्थाने कश्चित् आदेशः सम्भविष्यति, द्वित्वञ्च सम्भविष्यति, तत्र प्रथमं द्वित्वं स्यात्, पश्चात् स्वरकार्य्यं स्यादित्यर्थः। यथा—निनाय जुहाव इत्यादौ आदौ द्वित्वं पश्चात् वृद्धिसन्धी। यत्र एकदा अच्कार्य्यद्वित्वयोः प्रसक्तिस्तत्रैवायं नियमः। नियमश्चायं प्रायिकएव, तेन अरिरिषतीत्यादौ आदौ गुणे सन्धौ पश्चात् द्वित्वमिति। पाणिनिः १।१।५९।

† द्विरिति धोरित्यस्य विशेषणं, धोरिति अधिकारप्राप्तम्। स्मारं स्मारं नमतीत्यादौ धातुत्वाभावात् पूर्व्वभागस्य न खित्वं। पाणिनिः ६।१।४। अत्र खिः=अभ्यासः।

‡ लघुगुरुसंज्ञयोः फलं (५८२,६३९) इत्यादौ द्रष्टव्यं। पाणिनिः १।४।१०,१२।

§ स्थे रुरित्यनेनैवेष्टसिद्धौ स्व इति कथनं कदाचित् छन्दसि संयोगे परे गुरुर्न [illegible]दिति सूचनार्थं, अतएव प्रह्रेवेति पिङ्गलसूत्रम्। पाणिनिः १।४।११।

२य पादः—पवत्।

(१) भू सत्तायाम्।

भू-तिप् इति स्थिते—

५४१। घे शप् रे। (घे ७।, शप् ।१।, रे ७।)।

रे परे धोः शप् स्यात् घेऽर्थे।*

५४२। णुर्घुङ्श्चाकङिति।

(णुः १।, घुङः ६।, च ।१।, अ-कङिति ७।)।

अन्त्यस्य घुसंज्ञोङश्च णुः स्यात्, नतु किति ङिति।

भवति भवतः।†

---

* घे अर्थे कर्त्तरि वाच्ये। शपः शप् इत्, अकारः स्थितिः। शित्त्वात् (५९७) स्यादानित्यादिना तिङाद्यादेशः। (६२१) ढ-भावयो र्यका बाधितावशिष्टे सुतरां कर्त्तर्य्येव शप् स्यात्, तेनात्र घे इति व्यर्थमिति चेत् उच्यते,—कर्म्मकर्त्तरि वाच्ये (६२७) ढवद्ढघ इत्यनेन यगाद्यतिदेशात् शबादेर्बाधे, चिकीर्षते इत्यादौ (६३१) सन्श्रन्थेत्यादिना पुनर्यगादिनिषेधे, श्रौतिककर्त्तृवाच्यत्वात् शबादयः स्युरिति। नच शबादेर्बाधकस्य यगादेर्निषेधे सुतरां शबादिना भाव्यमिति वाच्यं, सकृद्गतौ विप्रतिषेधो यद्बाधितं तद्बाधितमेवेति न्यायात् पुनः शप्प्रसङ्गाभावात्। अतएव अगूढ इत्यत्र (६५७) सर्कोऽप्राप्तिपक्षे सेर्निषेधे शबपि न स्यादिति। पाणिनिः ३।१।६८।

† णुर्गुणः, घुश्चासौ उङ्चेति घुङ् तस्य। क च ङ च कङौ, कङौ इतौ यस्य स कङित्, न कङित् अकङित् तस्मिन्। लघोरङः (६१) चकारात् (८) अन्त्यस्य इङश्च गुणः, यादृग्जातीयस्य विप्रतिषेधो विधिरपि तादृग्जातीयस्येति न्यायात् कित्ङित्प्रत्ययाभ्यां भिन्ने अन्यस्मिन् प्रत्यये परे इत्यर्थः। निमित्ताव्यवहित पूर्व्ववर्त्ति-धातूना, धातूत्तरजातयोः सुशुपोश्च गुणः स्यात्। एवं (८४२) काम्यकप्रत्ययस्य कित्त्वकरणात् कदाचित् लिङ्गस्यापि गुणः स्यादिति, यथा मुदमाचष्टे मोदयतीत्यादि। भू तिप् इति स्थिते, शप्, ऊकारस्य गुण ओकारः, (३५) अव्। एवं भवतः इत्यादि। पाणिनिः ७।३।८४,८६—१।१।५।

५४३ । लोपोऽतोऽदेचोः ।

(लोपः १।, अतः ६।, अत्-एचोः ७॥) ।

अकारस्य लोपः स्यात् अकारे एचि च परे ।

भवन्ति, भवसि भवथः भवथ ।

(१०८) आ क्तिमभवि । भवामि भवावः भवामः । *

५४४ । भुवः प्राप्तौ वा मं ।

(भुवः ५।, प्राप्तौ ७।, वा ।१।, मं १।) ।

प्राप्तौ भुवो मं स्याद्वा घे । भवते । †

५४५ । याथातोऽतः ।

(ई ।१।, आ ।१।, आथ-आतः ६।, अतः ५।) ।

अकारात् परयोराथातोराकार ईः स्यात् ।

भवेते भवन्ते, भवसे भवेथे भवध्वे, भवे भवावहे भवामहे । ‡

---

* अत्र अदेचोरिति प्रकरणबलात् धोः परत्र जातयोरेव ग्रहणं, यथा भवन्ति भवे भवन् बुभूर्षतीत्यादि, मुरारिः कृष्णैकत्वमित्यादौ न प्रसङ्गः । लोपोऽतोऽदेतोरित्येव पाठः साधुः, एकारभिन्नानामनावश्यकत्वात्, अदेचोरिति तु लिपिकरप्रमादागत इति । भवन्ति इत्यत्र अपोऽकारलोपः । पाणिनिः ६।१।९७ ।

† भू सत्तायामिति गणपाठात् भूधातोः सत्ता एव अर्थः, सत्ता च उत्पत्तिर्विद्यमानता च । अस्मिन्नर्थे (५३१) परस्मैपदमेव । यदा तु प्राप्तिरर्थः तदा आत्मनेपदमपि भवतीत्येतत्कथनार्थम् एतत् सूत्रं । "प्राप्तिसम्पन्नजन्मसु" इति भट्टमल्लः । आत्मनेपदमेवेति केचित् । घं कर्त्तरि वाच्ये इति मण्डूकप्लुताधिकारात् अनुवर्त्तते । आत्मनेपदप्रकरणं हित्वा अत्रैतत्सूत्रकरणं नित्यप्रचारज्ञापनार्थं प्रथमप्रयुक्तभूधातोः पदसमुदायप्रदर्शनार्थञ्च । पाणिनिमते भूधातुः परस्मैपदी सत्तार्थश्च ।

‡ ई आ इति भिन्न पदं । आथ च आत चेति तस्य । आथ आत इति केवलयोरसम्भवात् तदादि विभक्तीनां ग्रहणं, तेन आथे आते आथां आतां इत्येतेषां ग्रहणं । भवेते भवेथे—उभयत्र अनेन आत-आथयोराकार ई, (२३) गुणः । अत्र

५४६। ख्या या-युस्-यामा-मीयुसीयम्।

(ख्याः ६।, या-युस् यामाम् ६।।।, ई-ईयुस्-ईयम् ।१।।।)।

अकारात् परेषां ख्याः या युस् याम् एषां स्थाने—
ई ईयुस् ईयम् एते क्रमात् स्युः। *

भवेत् भवेतां भवेयुः, भवेः भवेतं भवेत, भवेयं भवेव भवेम।
भवेत भवेयातां भवेरन्, भवेथाः भवेयाथां भवेध्वं, भवेय भवेवहि भवेमहि। भवतु भवतां भवन्तु।

५४७। हेर्लोपोऽस्योप्नोश्च।

(हेः ६।, लोपः १।, अस्योप्नोः ५।, च ।१।)।

अकारा-दस्याभ्या-मुप्नुभ्याञ्च हेर्लोपः स्यात्। †
भव भवतं भवत, भवानि।

५४८। व्यस्य ग्यनुकार डाच् च्वि कणोऽलं सन्मनोऽदोऽन्तःपुरो ऽस्तं तिरः कारिकोर्य्यादे र्धौ सः।

(व्यस्य ६।, गि—उर्य्यादेः ६।, धौ ७।, सः १।)।

एषां व्यानां धौ परदे सः स्यात्। ‡

इकारकरणेनापि पदसिद्धौ (५सूत्रे) द्विमात्रवर्णेन सह एकमात्रवर्णस्य साम्यमयुक्तमिति कृत्वा द्विमात्रकरणं ; एवं परत्रापि बोध्यम्। पाणिनिः ७।१।८१। अत्र इय् इति ह्रस्वः।

* ख्या इति ग्रहणं अदन्तधातोर्ख्या प्राप्त्यर्थं। पाणिनिः ७।२।८०।

† स्यः संयोगः, नास्ति स्यो यत्र सोऽस्यः, उप् च नुश्चेति उप्नुः, अस्यश्चासावुप्नुश्चेति अस्योप्नुस्तस्मात्। चकारादकाराच्च। उप्नुभ्यां यथा—तनु हिनु। अस्याभ्यां किं, आप्नुहि। पाणिनिः ६।४।१०५,१०६।

‡ अनुकारो अनत्पटदित्याद्यनुकरणशब्दः। गिश्च अनुकारश्च डाच् च च्विश्च कणे च अलम् च सत् च मनस् च अदस् च अन्तर् च पुरस् च अस्तम् च तिरस् च

५४८। प्राग्वन्नो णो ऽन्तरदुर्गेः णादि हन मीना हिन्वानिप् शान्तनशो,-गद नद पत पद दा मा सो हन वा या द्रा प्सा वप वह शम चि दिहान्तने,-र्वा त्वन निंस निन्द निक्ष भवान्त-हनो,-ऽकखाद्यषान्तान्त-नेः।

(प्राग्वत् ।१।, नः ६।, णः १।, अन्तर्-अदुर्गेः ५।, णादि—नशः ६।, गद—नेः ६।, वा ।१।, तु ।१।, भन—हनः ६।, अक—नेः ६।)।

णादे र्धो हन्ते र्मीनाते र्हिनोते रानिपः शान्त-नशो गदाद्यन्त-नेश्च नस्य अन्तरो दुर्वर्जगेश्च परस्य णविधिहेतौ सति णः स्यात्, अनादे र्भवान्त-हन्तेः कादि-खादि-षान्तवर्ज-ध्वन्त-नेश्च वा स्यात्। अन्तर्भवाणि प्रभवाणि। दुरस्तु दुर्भवानि। भवाव भवाम। भवतां भवेतां भवन्तां, भवस्व भवेथां भवध्वं, भवै भवावहै भवामहै। *

कारिका च उर्यादिश्चेति तस्य। डाच् च्वि इति द्वौ प्रत्ययौ (५०१,४८५), अत्र तदन्तानां ग्रहणं। अव्ययानामेषां शब्दानां धातौ परपदे सति समासः स्यादित्यर्थः। यथा— प्रणम्य, भनत्कृत्य, पटपटाकृत्य, कृष्णीभूय। कणे मनस्-शब्दौ तृप्तार्थौ, कणेकृत्य मनःकृत्य, पयः पिबतीति शेषः। अलङ्कृत्य। सत आदरे, सत्कृत्य। नञ्पूर्व्व-त्वेऽपि असत्कृत्य। अदः अनुपदेशे—अदःकृत्य, अन्तर्गत्य पुरस्कृत्य। अस्तमित्युपलब्धौ, अस्तङ्गत्य। तिरोभूय। कारिका मर्य्यादा यत्न पीडासु, कारिकाकृत्य। उरीकृत्य, आदिना उररी ऊरी प्रभृतीनां ग्रहणं। एषु समासात् (११७६) क्त्वो यप्। अत्र समासः एकपदीभावमात्रं, द्वन्द्वादिसंज्ञा तु स्याद्यन्तानामेव, अतः समासप्रकरणे एतत् सूत्रं न कृतं। धातुप्रकरणघटित-णत्वविधेः पूर्व्वं समासकरणात् समासाभावे णत्व न स्यादिति सूचितम्। पाणिनिः १।४।६१,६२,६३,६४,६५,६६,६७,६८,७०,७१।

* नास्ति दुर् यत्र सोऽदुः, अदुश्चासौ गिश्चेति अदुर्गिः। अन्तर् च अदुर्गिश्चेति तस्मात्। मूर्द्धन्य णादिश्च हन च मीनाश्च हिनुश्च आनिप् च तालव्य-शान्त-नश चेति तस्य,

५५०। धीटीधीष्वम् धोरमा।

(धी-टी-धीष ७॥, षम् ।१।, धोः ६।, अमा ।३।)।

आसु परासु धोरम् स्यात् न तु मा योगे।

अभवत् अभवतां अभवन्, अभवः अभवतं अभवत, अभवं अभ-वाव अभवाम। अभवत अभवेतां अभवन्त, अभवथाः अभवेथां अभवध्वं, अभवे अभवावहि अभवामहि। *

मूर्द्धन्यणादिरिति (५७०) णोपदेशं ज्ञात्वा शेषः। (५६६) पुनर्दन्त्यत्वप्राप्तिः स्यादिति। गदश्च नदश्चेत्यादिद्वन्द्वे गद—दिहाः, ते अन्ते यस्य स गद—दिहान्तः, सचासौ निश्चेति गद—दिहान्तनिस्तस्य। मवौ अन्ते यस्य स मवान्तः, सचासौ इन चेति मवान्तइन, अनच निंसच निन्दच निवच मवान्तइन चेति तस्य। कखौ आद्यौ येषां ते कखाद्याः, मूर्द्धन्यषोऽन्ते येषां ते षान्ताः, कखाद्याश्च षान्ताश्च कखाद्यषान्ताः, न कखाद्यषान्ताः अकखाद्यषान्ताः, ते अन्ते यस्य सः अकखाद्यषान्तान्तः सचासौ निश्चेति तस्य।—

यथा—प्रणयति प्रहणिष्यति इत्यादि। मीना इति आयुक्तस्य मीधातोः, हिनु इति अयुक्तस्य हिधातोर्ग्रहणं। आनिप् इति विभक्तिः। प्रणश्यति इति शान्तत्वात् णत्वं, प्रनष्ट इति न णत्वं। गदाद्यन्तनेर्यथा—प्रणिगदतीत्यादि। दाऽइति दासंज्ञकस्य ग्रहणं, तेन—प्रणियच्छति प्रणिददाति प्रणिदधाति। देङ् दो घेट इति त्रयाणां (६०८) आकारे प्रणिदास्यते इत्यादौ णत्वं स्यात्, शिति परे तु आकाराभावात् दासंज्ञाभावे न णत्वं। दीङ् इत्यस्य (७४३) ङादेशे णत्वं स्यादेव। मा इति स्वरूपग्रहणं— तेन माङ्मि, मा त्त, माङ्य, इत्येतेषां णत्वं स्यात्, मीञ् मीङ्य मीङ्ग इत्येषां (७४५) ङादेशे, एवं मेङ् इत्यस्य (६०८) आकारे च स्यादेवेति। अनादेस्तु वा— यथा—प्राणिति प्रानितीत्यादि। प्रनिकरोति प्रनिखादति प्रनिप्रेषति इत्यादौ कादि-खादि-षान्तान्त-नित्वात् न णत्वं। तद्भिन्ननित्वात् प्रणिपचति प्रनिपचतीत्यादौ विकल्पः। अन्तर्भवाणीत्यादौ आनिपो नस्य णत्वं। पाणिनिः ८।४।१४,१५,१६,१७, १८,१९,२२,२३,२४।

* णादिइनमीनादीनामनुवृत्तिमाशङ्क्याह धोरिति। मा इत्यनेन माङ्-शब्दस्यापि ग्रहणं। योगस्तु अर्थेन, न तु अव्यवहितत्वेन। अम् इत्यागमः, म इत् (१७) आदौ स्यादिति। अभवदिति भू-ध्या दिप्, अनेन अम्, (५४१,५४२,३५,६४) शप्, गुणः, ओस्थाने अव्, दस्थाने त्। एवं सर्व्वत्र। पाणिनिः ६।४।७१,७४।

५५१। ञ्यां सिः। (ञ्यां ७, सिः १।)।

धोः सिः स्यात् ञ्यां। *

५५२। भूस्थापिबदेनो लुक् पे।

(भू-स्था-पिब दा-इनः ५।, लुक् ।१।, पे ७।)।

एभ्यः सेर्लुक् स्यात् पे। अभूत् अभूतां। †

५५३। भुवो वन् टीञ्चि।

(भुवः ६।, वन् ।१।, टीञ्चि ७।)।

भुवो वन् स्यात् टीञ्चोरचि परे। अभूवन्। ‡

अभूः अभूतं अभूत, अभूवं अभूव अभूम।

५५४। वसोऽरस्येमनौदितः।

(वसः ६।, अरस्य ६।, इम् ।१।, अनौदितः ५।)।

अनौदितो धोः परस्य अरस्य वसस्य इम् स्यात्। §

अभविष्ट अभविषातां।

---

* अर्थगतविशेषात् निमित्तगतविशेषस्य बलवत्त्वात्, अय अप्स्मनादीनां यकोऽपि बाधकः। तेन कर्त्तरि अभविष्ट, कर्म्मणि अभाविषातामित्यादि। पाणिनिः ३।१।४३,४४।

† भूश्च स्थाश्च पिबश्च दाश्च इन् चेति तस्मात्। पिब इति निर्देशात् पा ल रक्षणे पै शोषे इत्येतयोः अपासीत्। दा इति दासंज्ञकः, तेन दै प शोधने इत्यस्य अदासीदिति। अभूदिति ञ्या रत्वात् (५५४) वसोऽरस्येति न इम्। ङित्त्वात् (५४२) न गुणः। लुक्करणात् (५७४) न वृद्धिः। पाणिनिः २।४।७७।

‡ भुव इति षष्ठ्यन्तस्य भूधातोर्वन्करणं धात्ववयवत्वात् तस्मिन् परे भूधातोः (५४२) गुणनिषेधार्थम्। वनोऽकार उच्चारणार्थः, न इत् (१७) अन्ते। भू-अन् (५५०,५५१, ५५२,५५३) अभूवन्। पाणिनिः ६।४।८८।

§ न रोऽरस्तस्य। नास्ति औत् इत् यस्य सः अनौदित् तस्मात्। वस इति अन्तःस्थवकारादिः प्रत्याहारः, अरस्येति (५२०) पञ्च रः श्रियेति सूत्रोक्तमिदम्।

५५५। मान्तोऽदनतः।

(मान्तः ६।, अत् ।१।, अनत. ५।)।

मस्यान्त इत्यस्य अत् स्यात् नत्वकारात् परस्य। *
अभविषत, अभविष्ठाः अभविषाथां।

५५६। धे स-लोपो वा। (धे ७।, स लोपः १।, वा।१।)।

धे परे सस्य लोपो वा स्यात्। †

५५७। टी ठी ढीं धो ढिचः सेमस्तु हलो वा।

(टी-ठी-ढी-धः ६।, ढ ।१।, इच. ५।, सेमः ५।, तु ।१।, हलः ५।, वा ।१।)।

इचः परस्यासां धस्य ढः स्यात्, सेमहलात् परस्य तु वा स्यात्।
अभविढ्ं अभविध्वं, (६४) झप्झसोरिति सस्य दः—अभविद्ध्वं, ‡ अभविषि अभविष्वहि अभविष्महि।

म इत् (१७) आदौ। इमो वर्गस्थानजातत्वेन तत्तुल्यत्वात् वर्गो गुणित्वागुणित्वेन इमोऽपि गुणित्वागुणित्वं, तेन विनरिथ इत्यादौ गुणः, दुद्रुविथ इत्यादौ न गुण। औदितस्तु कविकल्पद्रुमात् ज्ञेयाः। पाणिनिः ७।२।३५—७.२।१०। अत्र औदित्-स्थाने अनुदात्तेत्कथनम्।

* मस्य आत्मनेपदस्य अन्त् मान्त् तस्य। अन्त् इति छमन्तस्य ग्रहणं, तेन अन्त अन्ते अन्तां इत्येषामपि। अनत इति किं, एधन्ते, (५४२) लोपोऽतोऽद्वेचोरित्यकार-लोपस्य स्थानिवत्त्वाङ्गीकारात्। पाणिनिः ७।१।५।

† पाणिनिः ८।२।२५।

‡ टी-ठी ढीनां ध टीठीढीध तस्य। सह इमा तर्त्ततेऽसौ सेम् तस्मात्। आसां टी ठी-ढीनां। हल् प्रत्याहारः। भू—ध्वं (५५०, ५५१, ५५४, ५४२, ३५, ५५६), ततः अनेन धस्य वा ढ, अभविढ्ं अभविध्वं। सलोपाभावपक्षे सस्य द अभविद्ध्वमिति। पाणिनिः ८।३।७८।

५५८ । धुर्द्विष्ठ्यङि । (धुः १।, द्विः १।, व्यङि ७।) ।

व्यां अङि च धुर्द्विः स्यात् । *

५५९ । झभ् खथ् ह र्घं कृणां जब् चप् ज स्व च्वाः खेः । (झभ्—कु-ऋणां ६।।।, जब्—चु-वाः १।।।, खेः ६।) ।

खे झभ् खथ् हकार र्घं कवर्ग ऋवर्णानां क्रमात् जब् चप् जकार स्व चवर्गाकाराः स्युः । †

५६० । भुवोऽङ् व्यां ढ-भावे तु वा ।

(भुवः ६।, अङ् ।१।, व्यां ७।, ढ-भावे ७।, तु ।१।, वा ।१।) ।

भुवः खे-रङ् स्यात् व्यां ढ-भावयोस्तु वा । ‡

बभूव बभूवतुः बभूवुः, बभूविथ बभूवथुः बभूव, बभूव बभूविव बभूविम ; बभूवे बभूवाते बभूविरे, बभूविषे बभूवाथे बभूविढ्वे बभूविध्वे, बभूवे बभूविवहे बभूविमहे । ढे भावे च—बभूवे बुभूवे इति प्रयोगौ ।

---

* ठौ च अङ् च व्यङ् तस्मिन् । प्रकरणादेव धोः प्राप्तौ पुनरुपादानं, व्या अव्यवहितपूर्व्वधातोरेव द्वित्वं स्यादिति ज्ञापनार्थं, तेन इन्दाम्बभूव इत्यादौ इन्दादेर्न द्वित्वमिति । वीप्साद्यर्थे पदानां द्वित्वमपि वक्तव्यम् (सिद्धान्तकौमुदी-द्विरुक्तप्रकरणं द्रष्टव्यम् ।) पाणिनिः ६।१।८,११ ।

† झभ् च खथ् च हश्च र्घश्च कुश्च ऋश्च ते तेषां । जब् च चप् च जश्च स्वश्च चुश्च अश्च ते । क्रमश्च——झभ् खथ् ह र्घं कु ऋवर्ण

जब् चप् ज स्व चु अ

पाणिनिः ८।४।५४,—७।४।५९,६२,६६ ।

‡ पाणिनिः ७ ४।७३ । वार्त्तिकञ्च ।

भविता भवितारौ भवितारः, भवितासि भवितास्थः भवितास्थ, भवितास्मि भवितास्वः भवितास्मः ; भविता भवितारौ भवितारः, भवितासे भवितासाथे भविताध्वे, भविताहे भवितास्वहे भवितास्महे ।

भूयात् भूयास्तां भूयासुः, भूयाः भूयास्तं भूयास्त, भूयासं भूयास्व भूयास्म ; भविषीष्ट भविषीयास्तां भविषीरन्, भविषीष्ठाः भविषीयास्थां भविषीढ्वं भविषीध्वं, भविषीय भविषीवहि भविषीमहि ।

भविष्यति भविष्यतः भविष्यन्ति, भविष्यसि भविष्यथः भविष्यथ, भविष्यामि भविष्यावः भविष्यामः ; भविष्यते भविष्येते भविष्यन्ते, भविष्यसे भविष्येथे भविष्यध्वे, भविष्ये भविष्यावहे भविष्यामहे ।

अभविष्यत् अभविष्यतां अभविष्यन्, अभविष्यः अभविष्यतं अभविष्यत, अभविष्यं अभविष्याव अभविष्याम ; अभविष्यत अभविष्येतां अभविष्यन्त, अभविष्यथाः अभविष्येथां अभविष्यध्वं, अभविष्ये अभविष्यावहि अभविष्यामहि ।

भवतकि भवतकः । प्रणिभवति प्रनिभवति । *

एवं चेततीत्यादयः । †

---

* बभूव इत्यादि, द्वित्वे, खेर्भस्य ब, अनेन अक् । भविता इत्यादि (५५४, ५४१, २५) । भूयादित्यादि किस्वात् न गुणः । भविषीढ्वमिति आसां धस्य ढः स्यादिति कथनेन व्यवधानेऽपि ढः । भविष्यतीत्यादीनि सुगमानि । भवतकीत्यादौ (२०८) टेः पूर्व्वं अक् । प्रणिभवतीत्यादि (५४६) अकखाद्यषान्तान्नेर्वा णत्वं ।

† एवं चेततीत्यादय इत्यनेन येषु विशेषकार्य्याणि न सन्ति ते एवमित्यर्थः । विशेषकार्य्यार्थं सूत्राण्याह ददाद्यस्तीत्यादि ।

(२) चिती संज्ञाने। *

* चित धातुः, ई अनुबन्धः, संज्ञाने प्रकृष्टज्ञाने (अर्थे) वर्त्तते इति।

प्रसङ्गात् गणपाठोक्ता अनुबन्धास्तत्प्रयोजनानि च लिख्यन्ते।

अ—सुखोच्चारणार्थः। (४)
आ—निष्ठाभावादिकर्म्म वेट्।
(१०७७, भावे क्रियारम्भे च वाच्ये क्त-क्तवत्-स्थाने वा इट्)।
इ—नुणवान्। (५६८)
इर्—वा अङ्वान्।
(५६५, ङ इति स्मृते)।
ई—अनिड्निष्ठः।
(१०७१, क्त-क्तवतुस्थाने न इट्)।
उ—क्त्वा वेट्। (११७२)
ऊ—वेट्। (५७३) वेम्।
ऋ—चङि अह्रस्वः। (६३८)
ॠ—चङि वा ह्रस्वः। (७७९)
ऌ—अङ्वान्। (५६५, ङ)।
ए—ञिचि अवृद्धिः। (५७६)
ऐ—यजादिः। (६५१)
ओ—निष्ठा त न।
(१०५२, क्त-क्तवत्वोः त-स्थाने न)।
औ—अनिट्। (५५४) अनिम्।
क—चुरादिः। (७७३)
कि—वा चुरादिः। (७७३)
ग—क्र्यादिः। (७३८)
गि—प्रादिरपि (७६९)।
पूधातुभिन्नश्चेत् ल्वादिश्च। (१०५२)
घ—कटादिः। (५६१,६६५)
ङ—तङ्वान्।
(५२१, कर्त्तरि वाच्ये आत्मनेपदी)।
ज—ज्वलादिः। (१०००)
ञ—उभयपदी। (५२१)
ञि—अद्य-क्तः।
(१०६५, वर्त्तमानकाले क्तः)।
ट्—साणुः। (११४२)
डु—त्रिमक्युतः। (११४३)
ण—फणादिः। (५७९)
त—अदन्तः। अत्-अन्त। (७७५)
द—तनादिः। (६८८)
ध—रुधादिः। (७३८)
न—स्वादिः। (७३८)
प—मुचादिः। (७४१)
भ—शमादिः। (७४०)
म—घटादिः। (७९८)
मि—णिचि इण्-अमोः वा ह्रस्व। (७९९)
य—दिवादिः। (७३८)
र—वैदिकः। (वेदोक्त धातुः।)
ल—अदादिः। (६७०)
लि—ह्वादिः। (७२६)
लु—स्वपादिः। (६६१)
व—वृतादिः। (६४८)
श—तुदादिः। (७३८)
श्चि—कुटादिः। (७५५)
ष—ऌदङ्वान्।
(११५६, ऌदन्त ङ)।
स—जपादिः। (१७४)

५६१। रुदाद्यस्तिसे-र्दिस्योरीम्।

(रुदादि अस्ति-सेः ५।, दि-स्योः ६॥, ईम् ।१।)।

एभ्यो दि-स्योरीम् स्यात्। *

५६२। झस-स्वात् झसीम ईमि सेर्लोपः।

(झस स्वात् ५।, झसि ७।, इमः ५।, ईमि ७।, सेः ६।, लोपः १।)।

झसात् स्वाच्च परस्य झसि, इमः परस्य ईमि, सेर्लोपः स्यात्। अचेतीत् अचेतिष्टां। †

५६३। अनुस् सिद्वेरभुवः।

(अन् ।१।, उस् ।१।, सि-द्वेः ५।, अभुवः ५।)।

सेर्द्वेश्च परस्य अन उस् स्यात् नतु भुवः। अचेतिषुः, अचेतीः। ‡

---

* रुदादिश्च अस्तिश्च सिश्चेति तस्मात्। दिश्च सिश्च तयोः। रुद स्वप श्वस प्र-अन जक्ष इति पञ्च रुदादिः। अस्तिरिति असधातुः, स्वरूपकथने तिप्। सिरिति (५५१) ज्यां सिः। एतेभ्यः परस्य दे' सेश्च ईम् स्यादित्यर्थः। रुदाद्यस्तिभ्यां घ्या दि-स्योरेव, रुदादेर्भ्यां सि-व्यवधानेन अस्तेर्भू इति आदेशेन च ज्या दिस्योरसम्भवात्। सेस्तु ज्या दिस्योरेव, घ्या असम्भवात्। पाणिनिः ७।३।९६,९८।

† झस् च स्वश्चेति तस्मात्। झस् प्रत्याहारः। अचेतीत्—चित—ज्या दि (५५०, ५५१, ५५४, ५४२, ५६१, ५६२)। अचेतिष्टां—अत्र इमः परस्य ईम्येवेति विशेषनियमात् झस्वात् परस्यापि सेर्न लोपः। अचेष्ट असोष्ट इत्यादौ लोपस्वरादेशयोस्तु स्वरादेशविधिर्बलीति न्यायात् आदौ गुणे सिलोपो न स्यादिति। पाणिनिः ८।२।२६,२७,२८।

‡ सिश्च द्विश्च सिद्विस्तस्मात्। सेः परस्य ज्या अन् उस्, द्वेस्तु घ्याएव। यथा अचेतिषुः। अस्थुः अपुः अदुः अगुः एषु (५५२) सेर्लुकि, तल्लोपे तल्लक्षणमिति न्यायात् सेः परत्वात् अन् उस्। द्वेस्तु अजक्षुरित्यादि। पाणिनिः ३।४।१०९।

५६४। खेराद्यचो लोप्योऽनु शसखपाद्यन्तान्यस्याद्यन्तौ।

(खि: ६।, आद्यचः ५।, लोप्यः १।, अनु ।१।, शस्—अन्तौ १॥)।

खेराद्यचः परो भागो लोप्यः स्यात्, पश्चात् शसादि-खपान्तो यदि स्थोऽवशिष्टस्तस्यादिर्लोप्यः, यद्यन्यादृशस्तस्यान्तो लोप्यः। चिचेत चिचिततुः चिचितुः। *

(२) च्युतिर् क्षरणे।

५६५। शासुलिद्द्युतपुषादे ङ्टीपे—जृ श्वि स्तनभु विषु म्नुचु म्लुचु ग्रुचु ग्लुञ्चुरितस्तु वा।

(शासु—पुषादेः ५।, ङः १।, टीपे ७।, जृ—इरितः ५।, तु ।१।, वा ।१।)।

शासो लृकारेतो द्युतादेः पुषादेश्च ङः स्यात् टीपे, आदेस्तु वा। अच्युतत् अच्योतीत्। चुच्योत। †

---

* आदिश्चासौ अच् चेति आद्यच् तस्मात्। आदिरत्र अचां मध्ये इत्यर्थः। शस् च खप् च शसखपौ, आदिश्च अन्तश्च आद्यन्तौ, शसखपौ आद्यन्तौ यस्य स शसखपाद्यन्तः, सच अन्यश्च तौ शसखपाद्यन्तान्यौ, तौ च तौ स्थौ चेति शसखपाद्यन्तान्यस्थौ, तयोराद्यन्तौ शसखपाद्यन्तान्यस्थाद्यन्तौ। अनु पश्चादर्थः। पश्चात् आद्यचः परभागाभावे इत्यर्थः। तेन यस्य खेः आद्यचः परभागो वर्त्तते तस्य तल्लोपानन्तरं, यस्य तु न वर्त्तते तस्य प्रथमतएव, शसादि-खपान्त-संयोगस्य आदिवर्णो लोप्यः, अन्यविधसंयोगस्य अन्तवर्णो लोप्यः स्यादिति। चिचेत इति चित—णप् (५५८) द्वित्वं, अनेन खेः तलोपः, (५४२) गुणः। पाणिनिः ७।४।६०,६१।

† लृ इत् यस्य स लित्। द्युत् च पुष् च द्युतपुषौ, तौ आदी ययोस्तौ द्युतपुषादी। शासुश्च लिच्च द्युतपुषादी चेति तस्मात्। स्वमते लिदित्त्वेनैव सिद्धे द्युतपुषाद्योर्ग्रहणं प्राचामनुरोधात्। इर् इत यस्य स इरित। जृश्च श्विश्च स्तनभुश्च विषुश्च म्नुचुश्च म्लुचुश्च ग्रुचुश्च ग्लुचुश्च इरिश्चेति तस्मात्। शासुप्रभृतीनां उकारित् चिह्नार्थः। द्युतादय आत्मनेपदिनः, अत्र तु टी-पे ङविधानसामर्थ्यात् त्या उभयपदिनः स्युरिति।

(४) मन्थ विलोड़ने ।

५६६ । स्यात् ख्यपित् किद्वा ।

(स्यात् ५।, ठी ।१।, अपित् ।१।, कित् ।१।, वा ।१।) । *

५६७ । हसुङ्नो लोपोऽणौ ।

(हसुङ्नः ६।, लोपः १।, अणौ ७।) ।

धोर्हस उङो नस्य लोपः स्यादणौ ।

ममथतुः ममन्थतुः । मथ्यात् । †

द्युतादयश्च द्युत ह्रत श्रध स्यन्द क्रप श्वित मिद ष्विद क्ष्विद रुच घुट रुट लुट लुठ शुभ क्षुभ नभ तुभ स्रन्भ ध्वन्स भ्रन्स भ्रन्श स्रन्भ इति त्रयोविंशतिः । पुषादयश्च पुष शुष तुष दुष श्लिष शक क्रुध क्षुध शुध सिध रधादि (= रध नश तृप दृप द्रुह मुह स्नुह ष्णिह) शमादि (= श्रम तम दम श्रम भ्रम क्षम क्लम मद) असु जसु यस तस दस वस बस व्युस व्युष प्लुष वुस मुष विस कुस मुस मस सम उच भृश ह्रश क्लश तृष हृष रुष रिष डिप कुप गुप युप रुप लुप लुभ क्षुभ नभ तुभ क्लिद इति । वोपदेवेन तु गणपाठे सर्व्वे इरित्त्वेन निर्द्दिष्टा इति । अच्युतदिति इरित्त्वेन वा ङः । ङस्तु सेर्बाधकः, तेन पक्षे ख्यां सिरेव । ख्या अपि सुच्योत इति । पाणिनिः ३।१।५५,५६,५७,५८ । ङ = अङ् ।

* संयोगात् परा अपित् ठी कित् स्याद्वा । परसूत्रे हसुङ्नो लोपोऽणौ ख्यान्तु वा इति कृते, अपितख्यां नलोपविकल्पे सिद्धे पृथक् एतत्सूत्रकरणं भ्रस्जधातोः (७५१) भ्रस्जोऽरे णौ भर्ज वेत्यनेन बभर्ज्ज इत्यत्र भर्जादेशार्थं । असंयोगात्तु नित्यम् यथा— पाणिनिः १।२।५ ।

† उङ् आसौ न चेति उङ्न, हसो हसन्तधातोरुङ्न हसुङ्न तस्य । नास्ति णर्यस्मिन् (परे) सोऽणस्तस्मिन् । मन्थधातोः अतुस् पूर्व्वेण कित्, अनेन न-लोपः । पक्षे कित्त्वाभावात् अगुणत्वाभावे न न-लोपः । मथ्यादिति (५३३) नित्यकित्त्वे नित्यं न-लोपः । पाणिनिः ६।४।२४ ।

(५) कुथि हिंसा-संक्लेशयोः ।

५६८। नेदित्पूजार्थाञ्चोः ।

(न ।१।, इदित्-पूजार्थाञ्चोः ६॥) ।

इदितो धोः पूजार्थस्याञ्चतेश्च न-लोपो न स्यादृणौ ।

अतएवेदितो नुण् । प्रनिकुन्थ्यात् । (५४९) कादित्वात्र णः। *

(६) षिधु गत्यां ।

५६९। भ्वाद्यादिष्णः स्नो ऽष्ठ्यैष्वष्कष्ठिवां ।

(भ्वाद्यादिष्णः ६।, स्नः १।, अ-ष्ठ्यै-ष्वष्क-ष्ठिवां ६॥) ।

भ्वादेरादौ स्थितयोः ष-णयोः स-नौ स्तः, नतु ष्ठ्यै-ष्वष्कष्ठिवां ।†

५७०। सेक सौक सृप सृ सृज

स्तृ स्त्यान्ये दन्त्याजन्तसादयः

षोपदेशा धवः, स्वष्क

स्वित् स्वत् स्वञ्ज स्वप स्मिङश्च ।

णोपदेशा स्वनृन्नर्द

नाथ नाध नन्द नक्क नृ नटः ।

---

* इत् इकारः इत् यस्य स इदित्, पूजार्थश्चासौ अञ्च चेति पूजार्थाञ्च, इदिच्च पूजार्थाञ्च च तयोः । इकारानुबन्धधातोर्नकार एव नास्ति कथं तस्य लोपो निषिध्यते अतआह अतएवेत्यादि, (पाणिनिः ७।१।५८) अतएव न-लोपनिषेधादेव । पाणिनिः ६।४।२४,३० ।

† भूः आदिर्यस्य स भ्वादिः, भ्वादेरादिः भ्वाद्यादिः, षश्च णश्च ष्णं, भ्वाद्यादौ ष्णं भ्वाद्यादिष्णं तस्य । भ्वादिरिति भू सत्तायामित्यादिदशगणात्मकः, तथाच—भ्वाद्यदादी जुहोत्यादि र्दिवादिः स्वादि-रेव च, तुदादिश्च रुधादिश्च तनक्र्यादिचुरादय इति । धोरधिकारेऽपि भ्वादिग्रहणं नामधातुनिरासार्थं । पाणिनिः ६।१।६४,६५ । वार्त्तिकञ्च ।

(सेक—अन्ये १॥, दन्त्यान्तसादय: १॥, षोपदेशा: १॥, षष्ठ: १॥, स्तन—स्मिङ: १॥, च ।१।, षोपदेशा: १॥, तु ।१।, अ-वृत—नट: १॥) ।

सेधति । *

५७१ । व्याच्छस्य गत्यर्थवदे स: ।

(व्याच्छस्य ६।, गत्यर्थवदे ७।, स: १।) ।

गत्यर्थे वदे च धौ परे व्यस्याच्छस्य स: स्यात् । अच्छ-सेधति । †

५७२ । गौक: सुस्तुभ सो सुवास्वान्त-सुब्जा स्था सेनि सनज स्वनजा ऽप्रतिसेधा ऽप्रतिसदा

---

* षोपदेश-षोपदेशौ दर्शयति वाक्यद्वयम् आर्यया ।

सेक च सीक च सृप च सृज स्तृ च सृम स्त्यास्ते, तेभ्योऽन्ये । स्था इति स्थेधातु: (६०८) ऐ स्थाने आ । दन्त्यश्च अश्च दन्त्याचौ, तौ अन्ते यस्य स दन्त्यान्त:, स चासौ स चेति दन्त्यान्तस:, स आदिर्येषां ते दन्त्यान्तसादय: । दन्त्यवर्णान्ता: अजन्ता वा ये सकारा-सदादिका धातव: षोपदेशा:, षस्य उपदेशो येषु, धातुसंज्ञाकाले मूर्द्धन्यषादित्वेन पठिता: इत्यर्थ: । सेकादीना मजन्तसादित्वात् स्तृ स्त्यै इत्येतयो दन्त्यान्तसादित्वाच्च प्राप्तो निषेध: । स्वक्कादीना मृतधात्वात् पृथगुपादानं । उद्दूटौ यत्र विधेते यो व: प्रत्ययसन्धिज:, अन्त:स्थं तं विजानीयात् तदन्यो वर्ग्य उच्यते इति वचनात् स्वपधात्वे-र्वकारस्य दन्त्यत्वेऽपि पृथक् ग्रहणं क्वचित् षोपदेशाभावज्ञापनार्थं, यथा सान्त्व क सान्त्वने इत्यादय: । षोपदेशफलन्तु तुष्टाव इत्यादौ कृतसकारत्वात् (११२) षत्वम् । पाणिनि: ६।१।६४ सूत्रे वार्त्तिकम् ।

वृत्त नर्द्द च इत्यादि द्वन्द्व:, न सन्ति वृत नर्द्द नाथ नाध नन्द नक्क नृ नट: येषु धातुषु ते । वृत्प्रभृतिवर्जिता नादयो धातव: णोपदेशा:, धातुसंज्ञाकाले मूर्द्धन्यादित्वेन पठिता इत्यर्थ: । णोपदेशफलन्तु (५४९) इत्यनेन णत्वं । पाणिनि: ६।१।६५ सूत्रे वार्त्तिकम् ।

सेधतीति षिधधातु: षोपदेश:, (५६९) षस्य स: ।

† व्यस्य तत् अच्छ: चेति व्याच्छसस्य । गत्यर्थश्च वदश्च तस्मिन् । अच्छ इति अभि-मुखार्थो निपात: । अच्छ-सेधति अभिमुखं गच्छतीत्यर्थ: । एवं अच्छ वदति अभिमुखं वदति । (५४८) व्यस्य ग्यनुकारित्वस्य विशेषोऽयं । पाणिनि: १।४।६९ ।

ऽयङ्सिचा ऽनङ्स्तम्भा ऽन्नव्यवस्वन परि नि वि सेव सुम ऽनङ्सिवा ऽनोऽङ्सहां सः षो ऽप्यपि दश स्यादेस्तु द्वेश्च। *

(गि-इकः ५।, स्तु—सुञां ६॥, स्था—सहां ६॥, सः १।, षः १।, अमि ७।, अपि ।१।, दश-स्यादेः ६।, तु ।१।, द्वेः ६।, च ।१।) ।

स्वादे-रस्यान्तसुञः स्थादे-रगत्यर्थ-सेधो ऽप्रतिपूर्व्व-सदो यङ्वर्ज-सिचो ऽङ्वर्जस्तम्भो ऽन्नार्थव्यवपूर्व्व-स्वनः पर्य्यादिपूर्व्व-सेव-सुम ऽङ्वर्ज-सिव ओऽङ्वर्ज-सहाञ्च गेरिकः परः सः षः स्यात् अम्यन्तरेऽपि, दशानां स्यादीनान्तु द्विरुक्तानाञ्च।

निषेधति न्यषेधत्। गतौ तु—गङ्गां व्यसेधत्। †

---

* गेरिक् गीक् तस्मात्। स्वः स्वरूपः (नतु संयोगः), स्वोऽन्ते यस्य स स्वान्तः, न स्वान्तो ऽस्वान्तः, स चासौ सुञ चेति अस्वान्तसुञ्। स्तुश्च स्तुभश्च सोश्च सुवश्च अस्वान्त-सुञ् च तेषां। अगतौ सेधः अगतिसेधः, नास्ति प्रति यस्मिन् सोऽप्रतिः, स चासौ सदश्चेति अप्रतिसदः, नास्ति यङ् यस्मात् सोऽयङ्, स चासौ सिचश्चेति अयङ् सिचः, नास्ति अङ् यस्मात् सो ऽनङ्, सचासौ स्तम्भश्चेति अनङ्स्तम्भः, वि-अवाभ्यां स्वनः व्यवस्वनः, अन्ने (भक्षणे) व्यवस्वनः अन्नव्यवस्वनः; नास्ति अङ् यस्मात् सोऽनङ् स चासौ सिवश्चेति अनङ्सिवः, ओश्च अङ्च ओऽङौ, न विद्येते ओऽङौ यस्य सः अनोऽङ्, स चासौ सह चेति अनोऽङ् सह; सेवश्च सुमश्च अनङ्सिवश्च अनोऽङ्सहश्च ते सेव-सुमऽनङ्सिवाऽनोऽङ्सहः; परिश्च निश्च विश्च परिनिवयः, तेभ्यः सेवसुमऽनङ्सिवा-ऽनोऽङ्सहः परिनिविसेवसुमऽनङ्सिवाऽनोऽङ्सहः; पश्चात् स्थाश्च सेनिश्च सन्जश्च स्वन्जश्च अगतिसेधश्च अप्रतिसदश्च अयङ्सिचश्च अनङ्स्तम्भश्च अन्नव्यवस्वनश्च परिनिवि-सेवसुमऽनङ्सिवाऽनोऽङ्सहश्च ते तेषां। दशानां स्यादीनां समाहारस्तस्य, तेन षिव-सहोर्न ग्रहणं।

† अत्र सुव इति तौदादिकस्य षू श्च क्षेपे इत्यस्य ग्रहणं, नतु षू ङल षूयीङ इत्येतयोः। सेनिरिति नामधातुः सेना-शब्दात् (८५८) ञिः। निषेधतीत्यत्र अगत्यर्थत्वात् षत्वं, व्या दिपि न्यषेधदित्यत्र अम्व्यवधानेऽपि षत्वं। गत्यर्थे तु व्यसेधदिति न षत्वं। सेध इति निर्द्देशात् दैवादिकस्य निसिध्यतीत्यादौ न षत्वं। अवष्वणतीत्यत्र व्यवस्वन-

(७) षिधू शास्त्रे माङ्गल्ये च।

५७३। वेमूदित् स्वर चाय स्फाय प्याय सूति सूय धूञ रधादि निष्कुषोऽरवसो रुदुसुनोस्त्वक्त्याः।

(वा ।१।, इम् ।१।, ऊदित्—निष्कुष: ५।, अरवस: ६।, रुदुसुनो: ५।, तु ।१।, अक्त्या: ६।)।

एभ्यो वसस्यारस्य इम् स्यात्, वा, रौत्यादेस्तु ठीवर्जं। *

असेधीत्।

५७४। व्रजवदरंलजनिमोऽञ्जिश्विजागु त्रिः सौ पे।

(व्रज-वद-अर्-अल्-अच्-अनिम: ६।, अञ्जिश्विजागु: ६।, त्रि: १।, सौ ७।, पे ७।)।

इत्युक्तेः गौकभिन्नादपि षत्वं। सुम् इति सुम्-आगम: (७५३, ७६६)। (१११) कितादित्यनेन प्राप्तं उपसर्गनिमित्तकमेव षत्वं अनेन नियम्यते, तेन विस्नौति प्रतिस्नाति इत्यादौ न षत्वं; तोष्टूयते इत्यादौ खि-निमित्तकं षत्वं स्यादेव। कितादित्यत्र यथा, तथा इहापि विसर्गव्यवधानेऽपि षत्वं स्यात्, यथा नि:ष्टौतीत्यादि। पाणिनि: ८।३।६५, ६६,६७,६८,६९, ७०,११२, वार्त्तिकानि च।

* ऊत् इत् यस्य स ऊदित्, रध आदिर्यस्य स रधादि:, निस: कुष निष्कुष; ऊदिच्च स्वरश्च चायश्च स्फायश्च प्यायश्च सूतिश्च सूयश्च धूञ्च रधादिश्च निष्कुष चेति तस्मात्। रुश्च दुश्च सुश्च नुश्च तस्मात्। स्वर इति स्वृ ऊ शब्दोपतापयो:, सजातीय-धात्वन्तराभावात् स्वृग्रहणेनैवेष्टसिद्धौ स्वरग्रहणं क्वचित् निषेधं बाधित्वा विकल्पोऽयं प्रवर्त्तते इति ज्ञापनार्थं,अतएव (६१६) नेमृतस्थप इत्यनेन इम्निषेधेऽपि सस्वरिथ सस्वर्थ इति अनेन वा इम्। सूति सूय इति अदादि-दिवाद्योर्ग्रहणात् षू श चेपे इत्यस्य असावीदिति नित्यमिम्। रधादिस्तु रध तृप दृप मुह द्रुह स्नुह स्निह नश इति अष्ट। स्वमते ऊदित्त्वेनैव सिद्धौ स्वृ-रधाद्योरिह पाठ: प्राचीनमतानुवादार्थ:। रुदुसनु इत्येतेषां क्त्वां विकल्पस्यैव वर्जनं, (५८४) नेमसुम इति नियमात् नित्यं इम् स्यादेव। पाणिनि: ७।२।४४,४५, वार्त्तिकं "क्विति तु नित्य: प्रतिषेध:। स्तृत्वा। सूत्वा। धूत्वा।" इति।

व्रजि वदे-ररन्तस्यालन्तस्याजन्तस्यानिमश्च सौ पे ञिः स्यात्, न तु ञि-श्वि-जागृणां। असैत्सीत्, असेधिष्टां। *

५७५। ढभात् तथोर्धोऽधः।

(ढभात् ५।, त-थोः ६॥, धः १।, अधः ५।)।

ढभात् परयोस्तथयोर्धः स्यात् नतु धाञः। असैद्धां। †

(८) खद स्थैर्य्ये वधे च।

५७६। ह्रसादेः सेमोऽह्मये दित्क्षणश्वस-वधो वोऽन्तः सौ पे ञिः।

(ह्रसादेः ६।, सेमः ६।, अ-ह-म-य-एदित्-क्षण श्वस वधः ६।, वा ।१।, अङन्तः ६।, सौ ७।, पे ७।, ञिः १।)। ‡

ह्मयान्तादेकारेतः क्षणादेश्चान्यस्य सेमो ह्रसादेरुङोऽकारस्य ञिः स्यात् वा सौ पे। अत्यखादीत्, खादित्वान्न णः (५४८), अखदीत्। ‡

---

* नास्ति इम् यस्मात् सोऽनिम्। व्रजश्च वदश्च अर्‌च अल्‌च अच्‌च अनिम् चेति तस्य। ञिश्च श्विश्च जागृश्चेति तत, न तत् अञिश्विजागृ तस्य। अर् अल्— एतदन्तयोर्ग्रहणं। अच् इति स्वरवर्णाः। व्रजेर्वदेरिति, धातोः स्वरूपकथने इप्रत्ययो वक्तव्यः। अनिम् इति यदा इम् न स्यात् तदेव, तेन असैत्सीदिति, इमो विकल्पपक्षे अनिम्त्वात् षिध इकारस्य वृद्धिः ऐकारः(९) अचश्चारालैज् ञिरिति नियमात्। व्रजसाहचर्य्यात् वद इति दन्त्यवकारादिः। (६९९) जागृोऽणञिति गुणप्राप्तावपि इह जागृवर्जनं विशेषविधानात् प्राप्तया वृद्धेर्निषेधार्थं। पाणिनिः ७।२।१,२,३,४। निषेधस्तु ५म सूत्रे प्रदत्तः।

† ढभ इति प्रत्याहारः ढ ध घ भ इति। असैद्धामिति विकल्पपक्षे अनिम्त्वात् वृद्धौ, (५६२) षि-लोपे, अनेन तस्य धः। धाञस्तु धत्त इति। पाणिनिः ८।२।४०।

‡ ह्रस् आदिर्यस्य स तस्य। सह इमा वर्त्तते यः स सेम् तस्य। एत् इत् यस्य स एदित्, ह्च मच यच एदिच्च क्षणश्च श्वसश्च वधश्च तत्, न तत् अह्मयेदित्क्षणश्वसवध

५७७। अणित्यन्त्येऽजुङ्गतोः।

(अणिति ७।, अन्त्येऽजुङ्गतोः ६॥)।

धोरन्त्यस्यैव उङ्गोऽकारस्य च ञ्रिः स्यात् ञिति णिति च। चखाद।*

५७८। णप्यन्त्ये वा। (णपि ७।, अन्त्ये ७।, वा ।१।)।

चखाद चखद। †

(९) गद भाषे।

प्रणिगदति। ‡

(१०) वद स्थैर्य्ये।

५७९। तृ फल भज त्रप श्रथ ग्रथ दभाद्यन्तास्यहसां क्याः कित्-सेमथप्यदेः खिलोपश्चा-भ्य

तस्य। उङ् चासौ अश्चेति उङत् तस्य। हान्तादिस्तु अचहीत् अक्रमीत् अहयीत् अकटीत् अघणीत् अश्वसीत् अवधीत् एतेषु न वृद्धिः। अखादीत् अखदीत् अनेन वा वृद्धिः। पाणिनिः ७।२।५,७।

* अच णच अणौ, अणौ इतौ यस्य स अणित् तस्मिन्। अन्त्यश्चासौ इश्चेति अन्त्येच्, उङ् चासावश्चेति उङत, अन्त्येश्च उङश्च तौ तयोः। अत्र पुनः उङतो ग्रहणात् हसादेरिति नानुवर्त्तते। तेन धातुमात्रस्य अन्त्येच उङतश्च ञ्रिः स्यादिति। उङत इति येन केनापि उङतो ग्रहणं, तेन अभाजि अलाभि इत्यादौ (९२६) न-लोपे ततः उङतो वृद्धिः। अत्र वृत्तौ धोरिति ग्रहणात् त्वचयतीत्यादौ ञिसमेतस्य (६३१) धातुसंज्ञायामपि त्वच-शब्दस्य धातुत्वाभावात् उङतो न वृद्धिरिति। जागरयतीत्यादौ (६९९) गुणे, एकनिमित्तकं कार्य्यं कार्य्यान्तरस्य बाधकमिति न्यायात् पुनर्न वृद्धिरिति। चखाद इत्यत्र उङतो वृद्धिः। पाणिनिः ७।२।११५,११६।

† अन्त्ये (उत्तमपुरुषैकवचने) णपि परे धोरन्त्यस्येच उङोऽकारस्य च ञ्रिः स्याद्वा इत्यर्थः। पाणिनिः ७।१।९१।

‡ प्रणिगदतीत्यत्र (५४९) गदाद्यन्तर्णत्वं।

दद वाद्यन्यथा-खि णु नलोपिनां जॄ वम भ्रम त्रस फणादि वधार्थ-राधान्तु वा।

(तॄ—हसां ६।।।, त्या: ६।, कित्-सेमथपि ७।, अत् ।१।, ए: १।, खि-लोप: १।, च ।१।, न-अश—नलोपिनां ६।।।, जॄ—राधां ६।।।, तु ।१।, वा ।१।)।

त्रादीनामाद्यन्तस्थितास्यहसानाञ्च अकार: त्या: किति सेमथपि च ए: स्यात् खिलोपश्च, न तु शशे ददे वकारादे रन्यथाभूतखे णुमतो नलोपिनश्च, जॄवमभ्रमत्रसफणादीनां हिंसार्थस्य राधेश्च वा स्यात्। बेदतु: बेदु: बेदिथ। अन्यथाभूतखेस्तु चखदतु:।*

(११) णद शब्दे।

(५६८) भ्वाद्यादीति णो न:। नदति। प्रणिनदति।†

---

* स्य: संयोग:, न स्योऽस्य:, अस्यश्चासौ हस चेति अस्यहस्, आद्यन्तयो: अस्यहस् येषां ते आद्यन्तास्यहस:। तॄश्च फलश्च भजश्च त्रपश्च श्रथश्च ग्रथश्च दभश्च आद्यन्तास्यहसश्च तेषां। सह इमा वर्त्तते य: स सेम्, सेम्चासौ थप् चेति सेम्थप्, किच्च सेम्थप्च तस्मिन्। अन्त:स्थ-वकार आदि र्यस्य स वादि:, अन्यथा अन्यप्रकारो जात: खिर्यस्य सोऽन्यथाखि:, णुश्च नलोपश्च तौ णुनलोपौ, तौ विद्येते ययोस्तौ णुनलोपिनौ; शशश्च (पाणिनिमते तु दन्त्यान्त:) ददश्च वादिश्च अन्यथाखिश्च णुनलोपिनौ च ते, पश्चात् नञ् समासे तेषां। वधार्थश्चासौ राधचेति वधार्थराध, जॄश्च वमश्च भ्रमश्च त्रसश्च फणादिश्च वधार्थराध च ते तेषां।

तॄधातोर्गुमत्त्वात् फलभजोरन्यथाखित्वात् त्रप: संयोगादित्वात् श्रथग्रथो: संयोगादित्वात् नलोपित्वाच्च दभो नलोपित्वात् अप्राप्तौ पृथगुक्ति:। फणादिश्च फण राज भ्राज भ्राश भ्लाश स्यम स्वम इति। अत्र फणादिपाठसामर्थ्यादेव आकारस्यापि एत्वं, एवं वधार्थराधोऽपि।

बेदतुरित्यादि वर्ग्यबकारादित्वात् न निषेध:। दन्त्यादेस्तु ववजतु: ववनतुरित्यादि। चखदतुरिति (५५८) खस्थाने च-करणादन्यथाखित्वं। पाणिनि: ६।४।१२०,१२१,१२२, १२३,१२४,१२५,१२६, वार्त्तिकानि च।

† प्रणिनदति (५४८) गदाद्यन्तनेर्णत्वं।

(१२) अर्द्द पीड़ायां।

५८०। स्यान्तादादृदाद्यश्नोः खेरान् व्यां वा त्वाञ्छेः।

(स्यान्तादादि-ऋदादि-अश्नोः ६।, खेः ६।, आन् ।१।, व्यां ७।, वा ।१।, तु ।१।, आञ्छेः ६।)।

स्यान्तो योऽकारादिस्तस्य ऋकारादेः अश्नोतेश्च खेरान् स्यात् व्यां आञ्छतेस्तु वा।　　आनर्द्द।*

(१३) इदि परमैश्वर्य्ये।

५८१। भूयोऽमजादेः। (भूयः ।१।, अम् ।१।, अजादेः ६।)।

अजादेरमि कृते पुनरम् स्यात्।　ऐन्दत्।†

५८२। विजादि-दयायासत्यानेकाचोऽनृच्छूर्णोः व्यामाम्।

(विजादि—अनेकाचः, ५।, अनृच्छूर्णोः ५।, व्यां ७।, आम् ।१।)।

---

* स्यः संयोगोऽन्ते यस्य स स्यान्तः। अत् आदिर्यस्य सः अदादिः। स्यान्तश्चासौ अदादिश्चेति स्यान्तादादिः। ऋत् आदिर्यस्य स ऋदादिः। स्यान्तादादिश्च ऋदादिश्च अश्नुश्चेति तस्य। अत्र ऋदादिरिति अन्तवर्त्ति-वर्णान्तरसहित-ऋकारादिरेव, तेन ऋधातो-र्न ग्रहणं। आनर्द्द इति अर्द्द-णप्, द्वित्वं, खेः स्थाने आन्। पाणिनिः ७।४।७१,७२, वार्त्तिकञ्च।

† अच् (स्वरवर्णः) आदिर्यस्य सोऽजादिस्तस्य। अमि कृते इति (५५०) घोटीथौ-ष्वम् इत्यनेन। ऐन्दत् इद अतएवेदितो नुण् इन्द, ध्यादिप् (५५०) अमि, अयं धातोरिकारेण सन्धौ, पश्चात् अनेन पुनरम्, ततः पुनः सन्धिः। अयं अमद्वयस्य सन्धौ पुनरमकरणस्य वैयर्थ्यात्। (५०५) घोटीथौष्वम् धोरमा अजादेर्व्रिश्च, इति कृते सिद्धौ पुनरेतत्सूत्रकरणं आदिष्टस्यापि अजादेः पुनरमविधानार्थं, तेन यजधातोः ऐज्यत, वमधातोः औष्टामित्यादि सिद्धं। पाणिनिः ६।४।७२।

कसंज्ञेजादेर्दय अय आस एभ्यस्त्यान्तादनेकाचश्च आम् स्यात्, नतु ऋच्छूर्णोः। *

५८३। भ्वसक्रन्वामः। (भू-अस-कृ ।१॥, अनु ।१।, आमः ५।)।

भू अस् कृ एते आमन्तादनु प्रयुज्यन्ते।

इन्दाम्बभूव इन्दामास इन्दाञ्चकार। †

५८४। नेम ऽसुमुक्त स्तृ हृ भृ स्तु द्रु श्रु स्रो-रेव व्याः। (न ।१।, इम ।१।, असुमुक्त—स्रोः ५।, एव ।१।, व्याः ६।)।

एभ्यएव व्या इम् न स्यात्, अन्यस्मादनिमोऽपि स्यात्।

---

* कर्गुरु। कश्चासौ इच् चेति किच्, किच् आदिर्यस्य स किजादिः, किजादिश्च दयश्च अयश्च आसश्च त्यश्च अनेकाच्चेति तस्मात्। ऋच्छ्च ऊर्णुश्च ऋच्छूर्णू, न ऋच्छूर्णुः तस्मात्। त्यः प्रत्ययान्तः। त्यान्तानामनेकाचत्वेनैव प्राप्तौ पृथक् ग्रहणं स्वामास (८४८) इत्याद्यर्थम्। पाणिनिः ३।१।३५,३६,३७।

† भूश्च असश्च कृश्चेति भूसकृ। आन इति पञ्चम्या एव परतः प्रयोगे सिद्धे अनुग्रहणं क्रियाविशेषणोपसर्गव्यवधानेऽपि प्रयोगार्थं। तेन तं पातयाम्प्रथममास इति, उचाम्प्रचक्रुरिति च रघुभट्टौ। (इदन्तु न पाणिनिसम्मतम्)। पूर्व्वतोऽनुवृत्तावपि पुनरामो ग्रहणं सामान्यामप्राप्त्यर्थं, तेन (६०७) दरिद्राकाशेति, (७२८) पशाम् वेति आमोऽपि भ्वादेरनुप्रयोगः। अत्र आत्मनेपदिधातुभ्योऽसभुवो-रनुप्रयोगे कर्त्तरि क्तस्य आत्मनेपदस्य स्थाने परस्मैपदादेशो वक्तव्यः, करोते-रनुप्रयोगे तु (कर्तृगेऽपि क्रियाफले) मूलधातोरिव परस्मैपदात्मनेपदे निश्चतः (पा. १।३।६३)। इन्दामासेति, असेः अनुप्रयोगविधानसामर्थ्यादेव (६८२) न भू-आदेशः। पाणिनिः ३।१।४०, अत्र सूत्रे "प्रयुज्यते इत्यनेनैव प्रयोगे लब्धे अनुपदोपादानं विपर्य्यासनिवृत्त्यर्थं व्यवहितनिवृत्त्यर्थञ्च इति वार्त्तिककाराशय:; तेन तं पातयां प्रथममासेत्यादिकमपाणिनीयमिति मल्लिनाथः।" "तं पातयां प्रथममास पपात पश्चाद्भिन्नसाधु" इति क्रमदीश्वरः। उचां प्रचक्रुरित्यत्र उचान् प्रचक्रुरिति केचित् समादधिरे इति गोयीचन्द्रः। "आमः कृञनुप्रयुज्यते" इति कातन्त्रसूत्रम्। "व्यवधानेऽपि दृश्यते, तं पातयाम्प्रथममास पपात पश्चात्" इति पद्मनाभः।

इन्दाश्वकर्थ । *

(१४) णिदि कुत्सायां ।

प्रणिन्दति प्रनिन्दति । †

(१५) उख गतौ ।

५८५ । खे यो रियुवर्णे ।

(खे: ६।, यो: ६।, इयुव् ।१।, अर्णे ७।) ।

खेरिवर्णोवर्णयो: क्रमादियुवौ स्यातां अर्णे परे ।

उवोख । अर्णे किं, ऊखतु: । ‡

(१६) अन्चु गतिपूजनयो: ।

(५६८) नेद्दितपूजार्थाञ्चोरिति, अञ्चात् । गतौ तु अच्यात् । §

(१७) म्रुचु इर् गत्यां ।

(५६५) शासुलिदृद्युदिति ङौ वा, अम्रुचत् अम्रोचीत् । ¶

---

* नास्ति सुम् यस्य स: असुम्, असुम् चासौ क्रश्चेति असुमक्र:. असुमक्रश्च स्तृश्च द्रुश्च भृश्च स्तुश्च द्रुश्च श्रुश्च सुश्चेति तस्मात् । (५८७) नेमेकाजादित्यत्र द्वर्जनात् प्राप्तस्य इमो निषेधार्थमिह थ-ग्रहणं । अन्येषां समानां एकाच्त्वेन अनिमामपि इह ग्रहणं नियमार्थं । नियमश्च अनिम्धातुमध्ये केवलं एभ्यएव थ्या इम् न स्यात्. सुतरां एव-कारेण अन्यस्मादनिमोऽपि धातो: थ्या इम् स्यादिति । इन्दाश्वकर्थ इत्यत्र असुमक्रत्वा-दिम्निषेध: । पाणिनि: ७।२।१३, "क्रसोऽसुट." इति वार्त्तिकञ्च ।

† प्रणिन्दति प्रनिन्दतीत्यत्र (५४९) वा णत्वं ।

‡ इश्च उश्च यु तस्य यो: । इयश्च उवश्च तत् । अर्णे असमानवर्णे परे । उवोख इति उख णप्. द्वित्वं, खलोप:, मूलस्य उकारस्य गुण ओकार:, (वर्णादाङ्गं बलीय इति न्यायात् आदौ न (२२) दीर्घ: ।) तत: अनेन खे. उस्थाने उव् । ऊखतुरित्यत्र किति गुणाभावे समानवर्णत्वात् न उव्, सन्धि: । पाणिनि ६।४।७८ ।

§ अच्यात् अनच ढी-यात्, पूजार्थत्वात् न नलोप: । गत्यर्थे अच्यादिति न लोप: ।

¶ अमुचदिति मुच टी-दि, चादित्वात् ङ,ङिति गुणाभाव. । पक्षे थ्यां सिरित्यादि ।

एवं (१८) ग्लुचु, गुचु, ग्लुञ्चु।

(१९) आछि आयामे।

आनाञ्छ आञ्छ।

(२०) वज गतौ।

ववजतुः, ववजिथ। (५७९) वादित्वान्न एः। *

(२१) व्रज गतौ।

(५७४) व्रजवदेति व्रिः। अव्राजीत्।

(२२) अज गतौ क्षेपणे च।

५८६। व्यजोऽरे वा त्वनवस्यघञलक्यपि।

(वी।१।, अजः ६।, अरे ७।, वा।१।, तु।१।, अन-वसि ७।, न घञ्-अल्-क्यपि ७।)।

अजते-ररे वी स्यात्, अन-त्ये वसि च वा स्यात्, न तु घञादौ।†

५८७। नेमेकाजाद्धुदृतोऽश्वि स्त्रि डौ णौ यु रु णु स्नु क्नु क्णु वुः।

(न।१।, इम।१।, एकाच्-आत्-इ-उत्-ऋतः ५।, अश्वि—वुः ५।)।

---

* ग्लुचुप्रभृतयोऽपि उरनुबन्धाः गत्यर्थाः। आनाञ्छ आञ्छ इति आञ्छ-णप् (५८०) वा खेरात्। वजधातुर्दन्त्यवकारादिः, अतएव न खेर्लोपः नच अकार एकारः।

† अनश्च वस् च तस्मिन्। घञ् च अल् च क्यप् च घञल्क्यप् न घञल्क्यप् तस्मिन्। अन इति (११३४) प्रत्ययः। वस् प्रत्याहारः। घञ् अल् क्यप् एते च (११३४,११५०) प्रत्ययाः। 'वी' इति दीर्घोच्चारणं किं—प्रवीतः, वीत्वा, वीतिः इत्याद्यर्थम्। पाणिनिः २।४।५६,५७।

स्वरादेरन्येभ्य एकाज्भ्य आदन्तेवर्णान्तोदन्त-ऋदन्तेभ्य इम् न स्यात्। अवैषीत् आजीत्। विवाय। *

५८८। अुध्वोरणचीयुवयो व्यौ त्वस्यान्नैकाचो व्योः।

(अु-ध्वोः ६॥, अणचि ७, इयुव् ।१।, योः ६।, व्यौ १॥, तु ।१।, अस्यात् ५।, नैकाचोः ६॥, व्योः ६॥)।

ओर्धोश्च इवर्णोवर्णयोरणावचि इयुवौ स्तः, अनेकाचोस्तु अस्यात् परयोः क्रमादुवर्णेवर्णयो वँ-यौ स्तः। विव्यतुः विव्युः।†

---

* एकोऽच् यस्य स एकाच्। आत्च इश्च उत्च ऋत् चेति आदुदृत्, एकाच्चासौ आदुदृच्चेति एकाजादुदृत् तस्मात्। श्विश्च श्रिश्च डीश्च शीश्च युश्च रुश्च णुश्च स्नुश्च क्षुश्च क्ष्णुश्च वृश्च ते, न विद्यन्ते ते यत्र तत् अ-श्वि श्रि डी शी यु रु णु स्नु क्षु क्ष्णु वृ तस्मात्। सामान्यविधिप्राप्तस्य इमो निषेधकोऽयं, विशेषविधिना तु स्यादेव, यथा (५९८) यमरमेति अयासीत्, (६२३) सुस्तुधोरिति अस्तावीत्, (६१७) स्वस्र्डेन इति करिष्यतीत्यादि। यु इति यु ल मिश्रणे युङ ग बन्धे इत्युभयोः, एवं वृ इति स्वादीयक्र्यादीययोः उभयोरेव प्रतिप्रसवः। अत्र रु णु इति द्वयोर्ग्रहणं निष्प्रयोजनमिति केचित्। अवैषीदिति अज-टी दि, पूर्वेण वसे परे वी आदेशे, एकाजिवर्णान्तत्वात् इम्निषेधः, (५७४) अनिमत्वात् वृद्धिः। पक्षे आजीदिति न इम्निषेधः। विवाय इति णप्, अरे परे नित्यं वी-आदेशः, द्वित्वं, (५५९) ह्रस्वः, (५७७) वृद्धिः, सन्धिः। कारिका।

† अुश्च धुश्च अुध् तयोः। नास्ति णर्यस्मिन् सोऽणुः, अणुश्चासावच्चेति अणच् तस्मिन्। इय् च उव् च तत् इयुव्। इश्च उश्च यु तस्य। वश्च यश्च तौ व्यौ। न स्तोऽस्यस्तस्मात्। न एको नैकः, नैकोऽच् ययोस्तौ तयोः नैकाचोरिति अुध्वोरित्यस्य विशेषणं। उश्च इश्च वौ तयोः व्योः। योरित्येकवचनान्तस्य इयुव इत्यनेनैव क्रमः, न तु अुध्वोरिति द्विवचनान्तेन, ओरिवर्णस्यासम्भवात्। तेनायं नियमः—अणावचि परे ओरुवर्णस्य उव् स्यात्, धातोरिवर्णोवर्णयोः क्रमेण इयुवौ स्त इति। एवं व्योरिति द्विवचनान्तस्य अुध्वोरिति द्विवचनान्तेन क्रमः, तेनायं नियमः—अनेकाचः ओरसंयोगात् परस्य उवर्णस्य वकारः, अनेकाचो धातोश्च असंयोगात् परस्य केवलं इवर्णस्य यकार इति। (३५) यत्नायवायावः इत्यस्य, धातुप्रकरणे अयं विशेषनियमः। पाणिनिः ६।४।७७,८२।

विव्यतुः विव्युः उभयत्र अनेन इस्थाने यः। एवं विव्यिव विव्यिम।

५८९ । सृजदृशाच्पाठात्वतो नित्यानिमतु-स्थपो वेमनृव्येऽदः ।

(सृज दृश अच्-पाठ-अत्वत: ५।, नित्य-अनिम-तु: ५।, थप: ६।, वा ।१।, इम।१।, अन् ऋ व्ये ऽद: ५।) ।

सृजेर्दृशेरजन्तात् भ्वादिपाठे अकारवतो नित्यमिम्रहितहत्यात् थप इम् वा स्यात्, नतु ऋ व्येञ अद एभ्य: ।

विवयिथ विवेथ । *

(२३) चि चये ।

५९० । चौऽजय्यरे । (घं: १।, अच् ।१।, यि ७।, अरे ७।)।

अजन्तस्य घं: स्यात् अरे ये परे । चीयात् । †

---

* अत्-अस्त्यस्य अत्वान्, पाठे (दशविधगणपाठे) अत्वान् पाठात्वान् । सृजश्च दृश च अच्च पाठात्वांश्चेति तस्मात् । नित्यम् अनिम ट(प्रत्ययो) यस्मात् स नित्यानिमता तस्मात् । नित्यानिमतुरिति अजन्तस्य पाठात्वतश्च विशेषणं । ऋश्च व्येश्च अद चेति ऋव्येऽद, न ऋव्येऽद अनृव्येऽद तस्मात् । पाठकाले अकारवतो यथा पच—पेचिथ पपक्थ, वच—उवचिथ उवक्थ इत्यादि । पाठग्रहणं विना केवलं अत्वत इति कृते कृष धातोरपि (६०४) ऋकारस्य रेफे क्रष इति अकारवत्त्वात् चकर्षिथ चक्रष्ठ इत्याद्य-निष्टं स्यात् । नित्यानिमतु: किं—शिश्रयिथ पेठिथ इत्यादौ नित्यमिम् । नतु ऋव्येऽद इत्यत्र ऋशब्दस्य ऋवर्णान्तवाचित्वेऽपि, दीर्घऋदन्तानां ट इत्यस्य च समत्वात प्रसङ्गा-भावे, (६१६) नेमृतस्थपोऽवृस्कुरित्यनेन ट ऋ स्क भिन्न-ऋदन्तात् थप इम्निषेधे, ऋ स्क इति द्वयोरेव नित्यानिमत्वात् अनेन विशेषविधानात् वेमप्राप्तौ निषेध:, (५८४) नेमसुभ इति नियमात् (५५४) वसोऽरस्येति नित्यमिम् स्यादेव । अजधातो: थप्, वी आदेशे, अजन्तत्वादनेन वा इम्, गुणादिश्च । पाणिनि: ७।२।६१,६२,६३, ६५,६६, कारिका च ।

† न र: अरस्तस्मिन् अरे, यि इत्यस्य विशेषणं । अत्र सामान्याजन्तनिर्देशात् शिवइवाचरति, हरिरिवाचरति शिवायते हरीयते इत्यादौ लिङ्गान्तस्यापि दीर्घ: । धातो-रन्तस्थितस्य प्रकृतेर्विकृतेरपि अचो दीर्घ:, यथा, ह्वे—हूयात, श्वि—शूयादित्यादौ कौ कृतेऽपि दीर्घ: । स्त्रियात् क्रियादित्यादौ तु (६२०) ऋस्थाने ह्रस्वान्त-रि आदेशसामर्थ्यात् न दीर्घ: । चि—ची-यात्, दीर्घ:, चीयात् । पाणिनि: ७।४।२५ ।

(२४) कटे वर्षावरणयोः ।

अकटीत्, एदित्त्वान्न वृद्धिः (५७६) । *

(२५) गुपू रक्षणे ।

५९१ । कम ऋतो गुपू धूप पण पनो ञि-ङीयङायाः धुः ।

(कमः ५।, ऋतः ५।, गुपू-धूप-पण पनः ५।, ञिङ्-ईयङ्-आयाः १।।।, धुः १।) ।

कमो ञिङ्, ऋतेरीयङ्, गुपादेरायः स्यात् स्वार्थे, तदन्तश्च धुसंज्ञः । गोपायति । †

५९२ । वारे । (वा ।१।, अरे ७।) ।

एभ्य एते वा स्युः अरे विषये ।

अगोपायीत् अगोपीत् अगौप्सीत् । गोपायामास जुगोप । ‡

---

* कट—ए इत् सिचि अवृद्धिः, वर्षणे आवरणे च वर्त्तते । अकटीत् टी-दि, (५७६) एदित्त्वात् न वृद्धिः ।

† गुपूश्च धूपश्च पणश्च पन चेति तस्मात् । ञिङ् च ईयङ् च आयश्च ते । ञिङो ञकारो वृद्ध्यर्थः, ङकार आत्मनेपदार्थः । ईयङो ङकार आत्मनेपदार्थः अगुणार्थश्च । अर्थविशेषानभिधानात् स्वार्थे एव स्युः । गुपधातोः आयप्रत्यये, गुणे, धुसंज्ञायां, गोपाय-धातोस्तिप् । आय इति अदन्तनिर्द्देशात्, गोपायधातोर्ञौ कृते, (७७५) अकारलोपे, गोपायि-धातोः ञ्या दि, अजुगोपायदिति अग्लोपित्वात् (६३८) न ह्रस्वः । पाणिनिः ३।१।२८,२९,३० ।

‡ अरे इति विषयसप्तमी, तेन, ञ्यामिव सिप्रभृतिप्रत्ययः सम्भाव्यते इति टीप्रभृत्युत्पत्तेः प्रागेव आदेशाः, ततो धातुसंज्ञायां टीप्रभृतिविभक्त्युत्पत्तिः । अगोपायीदिति आयान्तत्वेन धातुसंज्ञायां धात्वन्तरत्वात् (५५४) नित्यमिम् । पक्षे ऊदित्त्वात् (५७३) वा इम् अगोपीत्, अगौप्सीदिति अनिमत्वात् (५७४) वृद्धिः । गोपायामास इति (५८२) प्रत्ययान्तत्वादनेकाच्त्वाद्वा आम् । पाणिनिः ३।१।३१ ।

एवं (२६) धूप तापे । *

(२७) तपौ सन्तापे ।

(५५४) औदित्त्वात् नेम् । अताप्सीत् ।

(२८) चमु अदने । †

५९३ । ष्ठिवुक्लमाचमोऽपि घं: ।

(ष्ठिवु-क्लम-आचम: ६।, अपि ७।, घं: १।) ।

एषां घं: स्यादपि । आचामति । आङ: किं, चमति विचमति । (५७६) मान्तत्वात् न त्रि:, अचमीत् । ‡

(२९) क्रमु पादविक्षेपे ।

५९४ । क्रम क्लम भ्रम भ्रास भ्लास त्रस त्रुट लष यंस संयस: श्यन् वा रे घे ।

(क्रम—संयस: ५।, श्यन् ।१।, वा ।१।, रे ७।, घे ७।) ।

एभ्यो घेऽर्थे श्यन् स्यात् वा रे परे । क्रम्यति । §

---

* धूपधातोरुदित्त्वाभावात् टौ दि अधूपायीत् अधूपीदिति (५५४) नित्यमिम् ।

† चम-धातु: उकारानुबन्ध: क्त्वा-वेट् (११७२) ।

‡ ष्ठिवुश्च क्लमश्च आ-चमश्च तस्य । अपि इति (५४१) शप् परे । आङ्पूर्व्वस्यैव चमो दीर्घ:, नतु केवलस्य अन्योपसर्गपूर्व्वस्य च । पाणिनि: ७।३।७५, "दीर्घत्वे आङि चम इति वक्तव्यम्" इति वार्त्तिकञ्च ।

§ क्रमश्च क्लमश्चेत्यादि द्वन्द्व तस्मात् । अत्र भ्रास भ्लासौ दन्त्यान्तौ तालव्यान्तौ च । तालव्यान्तौ इति क्रमदीश्वर: । पाणिनिस्तु भ्राश भ्लाश इति पठति । संयसो ग्रहणं अन्योपसर्गनिरासार्थं । श्यन: श न इतौ यकारस्थिति: । शपो बाधकोऽयं । शित्त्वात् (५३०) र-संज्ञायां, (५३२) ङित्त्वात्, त्रुट्यतीत्यत्र न (५४२) गुण: । नकारस्तु त्रुट्यन्ती इत्यादौ (२४५) नुमर्थ: । श्यनि परेऽपि दीर्घ इति गोविन्दभट्ट:, तन्मते क्राम्यतीत्यादि । श्यनो विकल्पपक्षे तत्तद्गणीय: प्रत्यय इति । पाणिनि: ३।१।७०,७१,७२ ।

५९५ । क्रमः पेऽपि घं ।

(क्रमः ६।, पे ७।, अपि ७।, घं: १।) ।

क्रामति । *

५९६ । स्नु-क्रमोऽमे ऽरवस इम् ।

(स्नु·क्रमः ५।, अमे ७।, अरवसः ६।, इम् ।१।) ।

आभ्यां वसस्यारस्य इम् स्यान्तु मे । अक्रमीत् । †

(३०) औ यमु उपरमे ।

५९७ । स्था दान पा घ्रा ध्मा म्ना-र्त्ति दृश ग्रत् सद् गमिष् यम जनां—तिष्ठ यच्छ पिब जा जिघ्र धम मनर्च्छ पश्य शीय सीद गच्छेच्छ यच्छ जाः शिति ।

(स्था—जनां ६।।।, तिष्ठ—जाः १।।।, शिति ७।) ।

एषामेते क्रमात् स्युः शिति परे । यच्छति । ‡

---

* क्रमो घं: स्यात् पे अपि परे । पे किं, विक्रमते, अपि किं, क्रमिष्यति । पाणिनिः ७।३।७६ ।

† स्नुक्रमाभ्यामिम् (५५४) सिद्धेऽपि पुनरिम्विधानं, सिद्धे सत्यारम्भो नियमाय इति न्यायात् आत्मनेपदे न स्यादिति नियमार्थं, तेन कर्म्मणि वाच्ये क्रमधातोस्तनि अक्रामि इत्यत्र, सेमत्वाभावात् (७४४) न ह्रस्वः । यादृग्जातीयस्य विप्रतिषेधो विधिरपि तादृग्जातीयस्येति न्यायात् स्नुधातोः परस्मैपदे एव अनेन इमि सिद्धे, पुनः (५८७) नेमिकाभित्यत्र स्नुधातोः प्रतिप्रसवः स्नुविता स्नुवितवानित्यादौ इम्प्राप्त्यर्थः । पाणिनिः ७।२।३६ ।

‡ स्था च दा-न चेत्यादि द्वन्द्वे तेषां । तिष्ठच यच्छचेत्यादि द्वन्द्वे ते । दान इति नकारेत्-दाधातुग्रहणं अन्य-दाधातूनां प्रत्यानयोर्यच्छादेशनिवृत्त्यर्थं । पा इति पानार्थना·ग्रहणं । ऋर्च्छतीति ऋ गतौ ऋ लिं गत्यामित्युभयोः । इष इति तौदादिकस्यैव ।

५९८। यम-रम-नमातः पे सेरिम् सन् चैषां।

(यम—आतः ५।, पे ७।, सेः ६।, इम् ।१।, सन् ।१।, च ।१।, एषां ६॥)।

यमादेरादन्ताच्च सेरिम् स्यात् पे, तेषाञ्च सन्।

अयंसीत् अयंसिष्टां। *

(५८९) सृजदृशेति वेम्, येमिथ ययन्थ।

एवं (३१) णमौ शब्दनत्योः।

(३२) ह्य गतौ।

अह्यीत् (५७६) यान्तत्वान्न वृः।

(३३) दल मि भेदे।

(५७४) व्रजवदेति वृः, अदालीत्।

(३४) ञि फला विसरणे।

फेलतुः फेलुः फेलिथ। †

मन इति दैवादिकस्यैव। ऋच्छ रै इति नोक्ता ऋच्छतीति कथं, इयर्त्तीत्यत्र (६७०) अपोन्नुकि, रै परे ऋच्छादेशनिवृत्त्यर्थं। क्रमस्तु—

स्था	दाण	पा	ज्ञा	घ्रा	ध्मा	म्ना	ऋ
तिष्ठ	यच्छ	पिब	जा	जिघ्र	धम	मन	ऋच्छ
दृश	शद	सद	गम	इष	यम	जन	
पश्य	शीय	सीद	गच्छ	इच्छ	यच्छ	जा	

पाणिनिः ७।३।७७,७८,७९।

* यम च रम च नम च आत् च तस्मात्। तेषां यमादीनां स्थाने सन् स्यात्, अ इत् सनि। पे किं, अयंस्त अदास्त इत्यादि। पाणिनिः ७।२।७३।

† फल धातुः, ञिः प्रयोगः (१०९५), आ निष्ठाभावादिकर्म्मं वेट् (१०७१), विसरणं उत्पादनं। फेलतुरित्यादि (५७९) खिलोपः, अकारस्य एकारः।

(३५) त्सर छद्मगतौ।

अत्सारीत्।

(३६) ष्ठिवु निरसने।

(५९३) ष्ठिवुक्लमेति दीर्घः, ष्ठीवति।

५९९। ष्ठिवजाद्योः खेष्ठक्छोस्त वा।

(ष्ठिव्-चजाद्योः ६।, खे: ६।, ठ-छोः ६॥, त ।१।, वा ।१।)।

तिष्ठेव टिष्ठेव, ष्ठीव्यात्। *

(३७) जि जये।

६००। जेर्गिः सन्-ल्योः।

(जेः ६।, गिः १।, सन्-ल्योः ७।)।

जिगाय। †

(३८) रक्ष पालने।

प्रनिरक्षति, षान्तत्वान्न णः (५४८)।

(३९) अक्ष् व्याप्तौ।

६०१। वाक्ष-क्रमार्थतक्षः श्नुर्घे रे।

(वा ।१।, अक्ष-क्रमार्थतक्षः ५।, श्नुः १।, घे ७।, रे ७।)।

---

* ष्ठिव च चजादिश्च तयोः। ठ च छ च तयोः। ष्ठिवधातोः खेः ठकारस्य चजादिधातोः खेः छकारस्य च तकारः स्याद्वा। यथा तिष्ठेव टिष्ठेव, उतिच्छिषति उचिच्छिषति। ष्ठीव्यादिति (२१८) दीर्घः। "अस्य द्वितीयस्यकारष्ठकारौवेति" वृत्तिः। "उच्छेः तुक्" इति च सिद्धान्तकौमुदी।

† जेर्गिः स्यात् सनि ल्याश्च। वा-द्वयमध्यवर्तित्वादस्य नित्यता। यथा जिगाय, जिगीषतीत्यादि। जेस्तुषन्त्वोस्तिबन्तीति वक्तव्य। जिधातोः तुप् स्थाने तिप्, अन्तु स्थाने च अन्ति भवतीत्यर्थः। पाणिनिः ७।३।५७।

आभ्यां रे परे नुः स्यात् वा चेऽर्थे । अक्ष्णोति अक्षति । *

(५८८) नुष्णोरित्युव्, अक्ष्णुवन्ति ।

(५७३) ऊदित्वादिम् वा, आक्षीत् । (२१३) स्यादेः सो लोपः ।

६०२ । षढोः कः से । (ष-ढोः ६॥, कः १।, से ७।) ।

षस्य ढस्य च कः स्यात् सकारे परे । आक्षीत्, आक्षिष्टां आष्टां, आक्षिषुः आक्षुः । †

एवं (४०) तक्षू कार्श्ये ।

कृशार्थः किं, निर्भर्त्सने सन्तक्षति ।

(४१) णिक्ष चुम्बने ।

(५४९) प्रणिक्षति प्रनिक्षति ।

(४२) कृषी विलेखने ।

६०३ । कृष मृश स्पृश तृप दृप सृपः सिर्ज्यां वा ।

(कृष—सृपः ५।, सिः १।, ज्यां ७।, वा ।१।) ।

एभ्यः सिर्वा स्यात् ज्यां । ‡

---

* कृशार्थश्चासौ तक्ष चेति कृशार्थतक्ष, अक्षश्च कृशार्थतक्ष चेति तस्मात् । यथा तक्ष्णोति तक्षति काष्ठं तथा, तनूकरोतीत्यर्थः । कृशार्थः किं, सन्तक्षति चौरं साधुः, निर्भर्त्सयतीत्यर्थः । अक्ष्णोति अत्र नुप्रत्ययस्य उकारस्य गुणः । ज्यां आक्षीदिति (५७३) इम्पक्षे, अनिम्पक्षेऽपि आक्षीदिति वक्ष्यति । पाणिनिः ३।१।७५,७६ ।

† आक्षीदिति अनिम्पक्षे, ज्यां सिः, (५६१) ईम्, (२१३) कलोपे, अनेन षस्य कः, (१११) षत्वं । आष्टामिति अनिम्पक्षे, (५६२) सि-लोपे, (२१३) कलोपे, (४७) तस्य ट । आक्षुरिति अनिम्पक्षे कलोपे, षस्य कः, सेः सस्य षत्वे, (५६३) अन् स्थाने उम् । पाणिनिः ८।२।४१ ।

‡ कृष च मृश चेत्यादि तस्मात् । पक्षे कृष मृश स्पृशां (६०५) सक्-प्राप्तिः,

६०४। वर्द्धोऽक्किज्झसे इग्रहृजोस्तु नित्यं।

(वा ।१।, ऋत् ।१।, रः १।, अकित्-झसे ७।, इग्रहृजोः ६॥, तु ।१।, नित्यं १।) ।

क्षषादीनाम् ऋकारो रः स्यात् वा अकित्झसे, इग्रहृजोस्तु नित्यं। अक्राचीत् अकार्चीत्। *

६०५। हग्रषो ऽनिमिजुङो ऽइग्रः सक् ष्यां श्लिषस्त्वालिङ्गने।

(ह-ग्र-षः ५।, अनिम्-इजुङः ५।, अ-इग्रः ५।, सक् ।१।, ष्यां ७।, श्लिषः ५।, तु ।१।, आलिङ्गने ७।) ।

अनिमिजुङो ह-ग्र-षान्तात् इग्र-वर्जात् सक् स्यात् ष्यां, श्लिषतेस्त्वालिङ्गनेऽर्थे। अक्रुक्षत्। †

(४३) क्रुष हिंसायां।

६०६। वेम् सह लुभ भृ स्तु शुच वस त्वग कृष रिषिषो स्तोऽरस्य।

(वा ।१।, इम् ।१।, सह—इषोः ५।, तः ६।, अरस्य ६।) ।

तृप दृप सृपां (५६५), ङ-प्राप्तिः। "सृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्य." इति वार्त्तिकम्। अत्र सृप् न दृश्यते।

* नास्ति कित् यस्मिन् सोऽकित्, स चासौ झस् चेति तस्मिन्। क्षषादयोऽनुवर्त्तन्ते। वाग्रहणं परत्रानुवृत्तिनिवृत्त्यर्थं। अकित्-झसे इत्यनेन गुणिनि झसे इत्यर्थः, तेन दिदृक्षते सिसृक्षति इत्यत्र अनिम्-सनि (८०४) अगुणत्वे, न ऋकारस्य रः। केचित्तु अकित्कथनं ङित्झसप्राप्त्यर्थं, तेन इग्र-यङ्लुकि दरीदृष्ट इत्यादि। अक्राचीदिति क्षष-टीदि, सिः, इम्, अनेन प्रथमं ऋस्थाने रः, ततः (५७४) अकारस्य वृद्धिः, पक्षे ऋकारस्यैव वृद्धिः, अकार्चीदिति। उभयत्र (६०२) षस्य कः, षत्वं। पाणिनिः ६।१। ५८,५९।

† हश्च तालव्य-शश्च मूर्द्धन्य-ष चेति तस्मात्। नास्ति इम् यस्मात् सोऽनिम्, इत् उङ् यस्य स इजुङ्, अनिम् चासौ इजुङ्चेति तस्मात्। अनिमिजुङ इति हग्रषो

एभ्यस्तस्यारस्य इम् स्याद्वा। रोषिता रोष्टा। *

एवं (४४) रिष हिंसायां।

(४५) उष दाहे।

६०७। दरिद्रा काश कास जागृषो वाम् ञ्यां।

(दरिद्रा—ऋषः ५।, वा।१।, आम्।१।, ञ्यां ७।)।

एभ्य आम् वा स्यात् ञ्यां। (५८३) ञ्वसंज्ञन्वाम इति। ओषा-ञ्चभूव उवोष। †

(४६) ग्रग्र प्लुतगतौ।

(ग्रग्राग्र) ग्रग्रग्रतुः ग्रग्रग्रिथ। ‡

(४७) मिह्ो सेचने।

(६०५) ह्यशोऽनिमिति सक्। (१७५) ह्रोढोभो। अमिक्षत्। (७७) ढ्रोढ्रिर्घश्चानुरिति, मेढ़ा। §

विशेषणं। नास्ति ह्श् यत्र मोऽह्श् तस्मात्। अयं (५५१) सेर्वाधकः। अक्रुक्षदिति (६०१) सेर्विकल्प-पक्षे अनेन सक्, षस्य कः, षत्वं। पाणिनिः ३।१।४५,४६,४७।

* सहश्च लुभश्च भृश्च क्षुश्च मुचश्च वसश्च तुश्च श्रमश्च रुषश्च रिषश्च इषुश्च तस्मात्। एषु केषाञ्चित् अप्राप्तौ केषाञ्चित् नित्ये प्राप्ते अयं वैकल्पिकविधिः। एभ्यो रभिन्नस्य तकारस्य इम् वा स्यादित्यर्थः। इषु-ग्रहणात् इषु श वाञ्छे इत्यस्यैव विकल्पः। इष गाभीक्ष्ण्ये इष्य सर्पणे इत्येतयोर्नित्यमेव। पाणिनि ७।२।४८।

† दरिद्रा जागृधात्वोः (५८२) नित्ये प्राप्ते, अत्र विकल्पार्थं ग्रहणं। आम्-विकल्प-पक्षे उवोष इति (५८५) खेः स्थाने उव्। पाणिनिः ३।१।३८।

‡ ग्रग्रग्रतुरित्यादौ (५८६) ग्रग्रवर्जनात् न खेर्लोपादि। अत्र ग्रग्राग्र इति पदं निरर्थकं पूर्वसूत्रेरेव तत्सिद्धिः।

§ अमिक्षदिति (६०२) ढस्य कः, षत्वं। मेढ़ा इति (५४२) गुणः, (१७५) हस्य ढ, (५७५) तस्य धः, (४७) धस्य ढः, (७७) ढे परे ढलोपः। असंयुक्तत्वादादौ गुणे, पूर्वस्य ह्रस्वत्वाभावात् न दीर्घः।

(४८) दहौ भस्मीकरणे।

(१७६) दादेर्घः। (१७७) झभान्तस्येति दस्य धः। अधाक्षीत्।

(४९) चह कल्कने।

अचहीत्, (५७६) ह्रान्तत्वात् न वृः।

(५०) शुच शोके।

(६०६) शोचिता शोक्ता।

(५१) ग्लै हर्षक्षये।

६०८। एचोऽशित्याः।

(एचः ६।, अशिति ७।, आः १।)।

धोरेच आः स्यात् अशिति। *

(५९८) यमरमेतीम्सनौ। अग्लासीत्।

६०९। णवातो डौ। (णप् ।१।, आतः ५।, डौः १।)।

आदन्तात् परो णप् डौः स्यात्। जग्लौ। †

---

* एच इति धातोरन्त्यावयवस्यैव, तेन अढौकीदित्यादौ न स्यात्। एवं अकृतस्यैव एच इति, तेन लोष्यतीत्यादौ न स्यात्। अशिति इति विषयसप्तमी, तेन आदौ आः, पश्चात् प्रत्ययोत्पत्तिः, अतएव सामग इत्यत्र आदन्तात् (९९७) ड प्रत्ययः। अत्र अरे इति गोक्ता अशितीति कथनं धे-धातोः ध्यादि अधादियत्र लोपविधेर्बलवत्त्वाद्दादौ सेर्लुकि रे परेऽपि आ-प्राप्त्यर्थं। ग्लेधातोः यङ्लुकि ख्यो-यात् जाग्लायादित्यादौ च रे परेऽपि आ-प्राप्त्यर्थं। (६६५) व्येधातोस्तु ध्यां न स्यात्। पाणिनिः ६।१।४५।

† डौ इत्यस्य ड इत् (१२६) टि-लोपार्थं। औ इति न कृत्वा डौ-करणं क्वचिदेक-पदेऽपि सन्धिर्न स्यादिति सूचनार्थं, तेन तितउः (चालनी) असुमुईषो अदमुईचो इत्यादि सिद्धं। जग्लौ इति ग्लै-ध्या-णप्। पाणिनिः ७।१।३४।

६१० । उस्येचीम्यणूराचि लोपः ।

(उसि ७, एचि ७, इमि ७, अखराचि ७, लोपः १) ।

उसि एचि इमि अणोररस्याचि धोराती लोपः स्यात् ।
जग्लतुः जग्लुः जग्लिथ जग्लाथ । *

६११ । स्यादेर्ङःस्थो वा क्यणौ ।

(स्यादेः ६, ङः ।१।, अस्थः ६, वा ।१।, क्यणौ ७) ।

स्यादेराद्न्तस्य स्थावर्जस्य ङः स्यात् वा क्यणौ ।
ग्लेयात् ग्लायात् । †

(५२) गै शब्दे ।

६१२ । दा मा गै हाक पिब सो स्थोऽरहसे त्वयपि ङी ।

(दा—स्थः ६, अरहसे ७, तु ।१।, अयपि ७, ङी ।१।) ।

एषां क्यणौ ङः स्यात्, अरहसे त्वणौ यप्वर्जे ङी स्यात् । गेयात् ‡

---

* न रोऽरः, नास्ति णुर्यस्मिन् सोऽणुः, अणुश्चासावरश्चेति अणुरः, तस्य अच् अणुराच् तस्मिन् । पृथक्पदकरणात् उस्यादौ अणानांन्वयः । उसि यथा अगुः, एचि—ददे दधे, इमि—जग्लिथ, अणुराचि—जग्लतुः, अन्तर्डिः (११४५) । ग्लै-थप् (५८६) वा इम् । पाणिनिः ६।४।६४ ।

† स्य आदिर्यस्य स स्यादिस्तस्य । क्या अण् क्याणस्तस्मिन् । ङः इत्यस्य ङ इत् (१७) अन्त्यस्य स्थाने । परसूत्रे स्थाग्रहणेनैव अत्र स्थाधातोरप्राप्तौ पुनरत्र स्थावर्जनं, परसूत्रे अरहसे त्वयपि ङीति शेषभागेनैव स्थाग्रहणस्य सार्थकत्वे, संयोगाद्याद्न्तत्वात् अनेन क्यणौ स्थाधातोः विकल्पापत्तिनिवारणार्थं । ग्लेयात् ग्लायादिति क्या यात् । पाणिनिः ६।४।६८ ।

‡ दाश्च माश्चेत्यादि द्वन्द्वे तस्य । अरश्चासौ हसश्चेति तस्मिन् । क्यणौ इत्यनुवर्त्तते, ततश्च विधिद्वयं । यप्वर्जनादेव अरहसे इत्यस्य अणौ इति विशेषणं लब्धं, यादृग्-जातीयस्येति न्यायात् । दा इति दासंज्ञकः । मा इति मास्वरूपं, तेन मा ल माने,

(५३) ध्यै संहतौ ध्वनौ।

ध्यायति। *

(५४) दै-प शोधने।

(५३४) पित्त्वान्न दासंज्ञा। अदासीत्। दायात्। †

(५५) धे-ट पाने।

(२५७) ट ईबर्थः। ‡

६१३। ञि श्रि स्नु द्रु कमोऽङ् घे ष्यां श्विधेट ध्वन्येल्यर्हूनेस्तु वा। (ञि—कमः ५।, अङ् ।१।, घे ७।, ष्यां ७।, श्वि-धेट-ध्वनि-एलि-अर्हि-ऊनेः ५।, तु ।१।, वा ।१।)।

ञ्यन्तादिभ्यष्ष्यां अङ् स्यात् घेऽर्थे, श्व्यादेस्तु वा। (५५८) धुर्द्विश्चऽङीति, अदधत्। §

मा ङलि शब्दे, मा ङ् य च, मे ङ प्रतिदाने एषां ग्रहणं। गै—ढी-यात् गेयात्। पाणिनि, ६।४।६७,६९।

* ध्यायतीति (५६९) ध्यै वर्जनात् न षस्य सः।

† अदासीदिति (५९८) यमरमेति इम्सनौ। दायादिति दासंज्ञाभावात् न ङे।

‡ ट ईबर्थ इति, तेन मुञ्जन्धयी, स्तनन्धयीत्यादि (१०१७)।

§ ञिश्च श्रिश्च स्नुश्च द्रुश्च कम चेति तस्मात्। श्विश्च धेटश्च ध्वनिश्च एलिश्च अर्हिश्च ऊनिश्चेति तस्मात्, सूत्रत्वात् पुंस्त्वं। स्नुरिति दन्त्यादिः। ध्वन्यादिर्ञ्यन्तः, ध्वनिरिति घटादित्वात् (७९८) ह्रस्वः, अदन्तचुरादिश्च। अदधदिति धे-धातोः ष्या-दि, अनेन अङ्, (६०८) ए-स्थाने आ, (५५८) द्वित्वं, (६१०) आ-लोपः। घे किं, अकारयिषातां कटौ देवदत्तेन। (५४१) घं ष्यप् रे इति सूत्रे उक्तत्वेऽपि अत्र घे इति पुनः कथनं प्राचीनानुवादार्थं, "णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ्" इति पाणिनिशासनात्। एवं (६१८) सूत्रेऽपि। पाणिनिः ३।१।४८,४९,५१।

६१४। धेघ्राच्छासाघः सेः पे लुग्वा।

धि—घः ५।, सेः ६।, पे ७।, लुक् ।१।, वा ।१।)।

अधात् अधासीत्। *

(५६) पा पाने।

(५९७) स्थादानेति पिब। पिबति। (५५२) भूस्थापिवेति सेर्लुक्। अपात्, पेयात्। †

(५७) घ्रा गन्धोपादाने।

जिघ्रति। अघ्रात् अघ्रासीत्। ‡

(५८) ध्मा शब्दाग्निसंयोगयोः।

धमति। अध्मासीत्।

(५९) ष्ठा गतिनिवृत्तौ।

तिष्ठति। न्यष्ठात्। नितष्ठौ। स्थेयात्। §

(६०) म्ना अभ्यासे।

मनति।

---

* धे श्री छो सो घ्रा इत्येतेभ्यः सेर्लुक् स्याद्वा पे। धे ग्रहणं (५५२) सेर्लुकि प्राप्ते विकल्पार्थं। अधादिति अङौ विकल्पपक्षे स्यां सिः, अनेन सेर्लुक्, पक्षे (५९८) इमसनौ, अधासीदिति। पाणिनिः २।४।७८।

† पिबतीति पिबादेशस्य अदन्तत्वात् न गुणः। पेयात् (६१२) ङे।

‡ अघ्रादिति अनेन वा सेर्लुक्।

§ न्यष्ठादिति (५७२) अमागमव्यवधानेऽपि षत्वं। नितष्ठौ इति विकृतस्यापि षत्वं। स्थेयादिति (६१२) ङे।

(६१) दा-न दाने ।

प्रणियच्छति । प्रण्यदात् । देयात् ।*

(६२) ह्वृ कौटिल्ये ।

६१५ । स्याद्यर्त्तृतो गु यङ्-यक्-ठीत्र्याणौ स्कुस्तु त्र्यां ।

(स्यादि अर्त्ति-ऋत: ६।, गु: १।, यङ्-यक्-ठीत्र्याणौ ७।, स्कु: ६।, तु ।१।, त्र्यां ७।) ।

स्यादेरर्त्तेः ऋकारस्य गुः स्यात् यङि यकि ठीत्र्योरणौ च, स्कुस्तु त्र्यामेव । जह्वरतुः ।†

६१६ । नेम्हतस्थपो ऽह्वृस्कुः ।

(न ।१।, इम् ।१।, ऋत: ५।, थप: ६।, अ-ह्वृ-ऋ-स्कु: ५।) ।

ह्वृ-ऋ-स्कृ-वर्जात् ऋकारान्तात् थप इम् न स्यात् । जह्वर्थ ।‡

---

* प्रणियच्छति प्रण्यदादिति (५४९) गदाद्यमनेर्णत्वं ।

† स्य: संयोग आदिर्यस्य स स्यादि:, स्यादिश्च अर्त्तिश्च स्याद्यर्त्ती, तयो: ऋत् स्याद्यर्त्तृत् तस्य । संयोगादिधातो: ऋ-धातोश्च ऋकारस्य इत्यर्थ: । ऋसाहचर्य्यात् स्यादेरिति ऋदन्तस्यैव, तेन स्तृञ्प्रभृतीनां न प्राप्ति: । नास्ति णुर्यस्मिन् सोऽणु: ठीत्र्योरणु: ठीत्र्यणु:, यङ्च यक्च ठीत्र्यणुश्चेति तस्मिन् । त्र्यणुरिति ठी-परस्मैपदस्यैव ग्रहणं, तेन स्तृषीष्ट इत्यादौ आत्मनेपदे (६५९) कित्त्वेऽपि अनेन न गुण: । स्कुरिति (७६६) सुमृयुक्त-कृञ इत्यर्थ: । पाणिनि: ७।४।१०,११,२९,३०, वार्त्तिकञ्च ।

‡ ह्वृश्च ऋश्च स्कृश्च ते, न विद्यन्ते ते यत्र स: अह्वृस्कु तस्मात् । (५८४) नेमसुमित्यनेन वृधातोष्ठीभावस्य इमनिषेधेऽपि अत्र वृग्रहणात् थप इम्, तेन ववरिथ इति, अन्यत्र तु ववव इत्यादि । स्वृधातोरूदित्त्वेऽपि (५७३) वेमूदिदित्यत्र स्वरग्रहणात् सस्वरिथ सस्वर्थ इति वा इम् स्यादेव । अत्र ह्वृ ऋ स्कृवर्जनादेकाच एव निषेधो मन्तव्य:, तेन जजागरिथ इति । जह्वर्थ इत्यत्र (५८४) नेमसुमित्यनेन अत्यानिमत्वादिम्प्राप्तौ अनेन निषेध: । पाणिनि: ७।२।६३ ।

६१७ । स्यस्यर्द्धनः । (स्यस्य ६।, ऋत्-हनः ५।) ।

ऋदन्त-हन्तिभ्यां स्यस्य इम् स्यात् । हरिष्यति । *

(६३) स्वृ ञ शब्दोपतापयोः ।

(५७३) वेमूदितीम् वा । अस्वारीत् अस्वार्षीत् । † सस्वरिथ सस्वर्थ ।

(६४) स्तृ गतौ ।

६१८ । वक्त्यस्य ख्या लिप सिच ह्वो ङः घे ध्यां स्रस्तु वा लिब्भ्यस्तु मे ।

(वक्ति—ह्वः ५।, ङः १।, घे ७।, ध्यां ७।, स्रः ५।, तु ।१।, वा ।१।, लिब्भ्यः ५॥, तु ।१।, मे ७।) ।

वक्त्यादेर्घेऽर्थे ङः स्यात् ध्यां, स्रऋभ्यान्तु वा, लिपादेस्तु मे वा स्यात् । ‡

---

* ऋच्च हनच तस्मात् । स्यस्य इति स्यस्वरूपस्य ग्रहणं, तेन स्यति स्यतम् स्यन्तीत्यादेरेव । इमः केवलस्य अनुवृत्तिः, नतु नञ्विशेषणस्य, स्वाभाविकानिम्-हन-धातोरिम्-निषेधवैफल्यात् । स्वृधातो-रुदित्त्वात् वेमत्वेऽपि, विशेषविधानादनेन नित्यमिम्, तेन स्वरिष्यतीत्येव । पाणिनिः ७।२।७० ।

† अस्वारीत् अस्वार्षीत् (५७४) अजन्तत्वादुभयत्र ऋ इत्यस्य वृद्धिः आर्, (१११) इलात् परस्य सस्य षत्वं ।

‡ वक्तिश्च असश्च ख्याश्च लिपश्च सिचश्च ह्वाश्च तत् तस्मात् । स्रश्च ऋश्च सृ तस्मात् स्रः । वक्तिरिति अदादिगणीय-वच-धातुः (ब्रुवो वचादेशेऽपीति केचित्) । अस इति दिवादीयोऽसधातुः । लिब्भ्यः इति बहुवचनं गणार्थं, लिप सिच ह्वे इति । असधातोः इरित्त्वात् परस्मैपदे ङः (५६५) सिद्ध एव, इह तु आत्मनेपदार्थः । तेन (८७६) आत्मनेपदे निरास्यत इति । पाणिनिः ३।१।५२,५३,५४ ।

६१९। दृशोर्णुः। (दृशोः ६॥, णुः १।)।

दृशेर्ऋवर्णान्तस्य च णुः स्यात् ङे। असरत् असार्षीत्। *

६२०। ऋद्रिः शयक्ढीपे।

(ऋत् ।१।, रिः १।, श यक्-ढीपे ७।)।

स्रियात्। †

(६५) ऋ गतौ।

ऋच्छति। आरत् आर्षीत्। आर, आरतुः, आरिथ। अर्यात्। ‡

(६६) श्रु श्रवणे।

६२१। श्रोः शृर्णे रे जिश्च।

(श्रोः ५।, शृ: १।, र्णे ७।, रे ७।, जिः १।; च ।१।)।

श्रुवो र्णेऽर्थे शृः स्यात् रे, श्रुवश्च जिः।

शृणोति शृणुतः शृखन्ति। §

---

* दृशश्च ऋश्च तौ तयोः। अर्थवशात् ङे इति सप्तम्यन्तत्वेनानुवृत्तिः। असरदिति ङ-पक्षे गुणः, ङाभावपक्षे असार्षीदिति (५७४) वृद्धिः। पाणिनिः ७।४।१६।

† शश्च यक् च ढीपश्च तस्मिन्। ह्रस्व-ऋकारो रिः स्यात् शे यकि ढी-पे च परे। स्रियादिति ह्रस्वान्त-रि-निर्द्देशादेव (५९०) न दीर्घः। पाणिनिः ७।४।२८।

‡ आरतः अर्यादित्युभयत्र (६१५) णुः। आरिथेति (५८९) ऋवर्जनात् न वेम्।

§ श्रु-धातोः श्नौ कृते शृ इत्यस्य (५३५) जिः उकारयुक्त रेफस्य ऋः। शृः शपो बाधकः। श इत्, नुस्थितिः। श्रुधातुं स्वादिगणीयमकृत्वा भ्वादिषु पाठात् क्वचित् श्रवतीत्यपि। शृणोतीत्यत्र श्नोरुकारस्य गुणः। शृखन्तीत्यत्र (५८८) श्नुभ्वोरिति व, (१०७) णत्वं। पाणिनिः ३।१।७४।

६२२। नृपोऽस्यस्योल्लोपो व्मि वा।

(नृपः ६।, अस्यस्य ६।, उल्लोपः १।, व्मि ७।, वा ।१।)।

अस्यस्य नो-रुपस्य उकारस्य वा लोपः स्यात् वमयोः परयोः।
शृण्वः शृणुवः शृण्मः शृणुमः। (५४७) हेर्लोपोऽस्येति, शृणु।
शुश्रुव।*

(६७) सु गतौ।

६२३। सुस्तुधोः सेरिम् पे।

(सु-स्तु-धोः ५।, सेः ६।, इम् ।१।, पे ७।)।

असावीत्। सुषविथ, सुषुविव। सविता सोता।†

(६८) स्रु गतौ।

(६१३) श्रिस्रीत्यङ्। असुस्रुवत्। सुस्रोथ, सुस्रुव।‡

(६९) द्रु गतौ।

अद्रावीत् अद्रौषीत्, दुद्रुविव।§

---

* नुश्च उप् चेति नस्य। न स्योऽस्यन्तस्य। उतो लोपः उल्लोपः। व च म च वम तस्मिन्। नुरत्र श्नुः, उप् तनादिभ्य क्तः (६८८) श्रुप्। शृणोमि तनी-मीत्यादौ, लोपस्वरादेशयोस्तु स्वरादेशविधिर्बलीति न्यायात् आदौ गुण एव। शुश्रुव इति व्या व, (५८४) नेमसुम इति नियमात् न इम्। पाणिनिः ६।४।८७।

† सुश्च स्तुश्च धुश्च तस्मात्। सु स्तु धु धातुभ्यः सेरिम् स्यात् पे। सु धातोः (५७३) विकल्पे प्राप्ते नित्यार्थं ग्रहणं। स्तु धु इत्येतयोः (५८७) एकाजुदन्तत्वेन निषेधे ग्रहणं। पे किं, असविष्ट असोष्ट, अस्तोष्ट अधोषातां। (५७३) रुदुसुनो-स्वव्या इति नियमेन सुषविथ सुषुविव इत्यादौ नित्यमिम्। सविता सोता इति (५७३) वा इम्। पाणिनिः ७।२।७२।

‡ असुस्रुवदिति (५८८) उव। एवं अदुद्रुवत्। सुस्रोथेति नेमसुमिति नियमेन (५८९) सृजदृशेत्यस्य बाधितत्वात् न इम्।

§ अद्रावीत् अद्रौषीदिति (५७३) रुदुसुनोस्वव्या इत्युक्तेः वा इम्। दुद्रुविवेति नेमसुमिति नियमात अन्यत्र नित्यमिम्।

(७०) द्रु गतौ।

अदुद्रुवत्। दुद्रुव।

(७१) गम्लृ गतौ।

गच्छति। (५६५) लिदित्वात् ङः, अगमत्। जगाम। (२३०) हनगमेत्युङ्लोपः, जग्मतुः जग्मुः। जगमिथ जगन्थ।*

६२४। गमोऽमे स इम् मार्हात्तु वा।

(गमः ५।, अमे ७।, सः ६।, इम् ।१।, मार्हात् ५।, तु ।१।, वा ।१।)।

गमः परस्य सस्य इम् स्यात् न तु मे, मयोग्यात्तु वा। गमिष्यति।†

(७२) सृप्लृ गतौ।

असाप्सीत् असार्प्सीत् असृपत्।‡

(७३) स्कन्दिर् गति-शोषणयोः।

६२५। विस्कभ्ना निर्व-वि-सु-निर्दुःस्वपः सः षोः,-निनिर्विस्फुर-स्फुल परिविस्कन्दाऽप्राणिष-निपरिनिर्व्यभ्यनु-स्यन्दस्तु वा।

(विस्कभ्ना—स्वपः ६।, सः १।, षः १।, निनिर्—स्यन्दः ६।, तु ।१।, वा ।१।)।

---

* दुद्रुवेति नेमस्तुमिति नियमात् न इम्। जगमिथ जगन्थ इति (५८६) वा इम्।

† मं आत्मनेपदं अर्हतीति मार्हस्तस्मात्। (८७५) समोगमृच्छेत्यनेन आत्मनेपद-विधानात् समगंस्त संगंस्यते इत्यादौ न इम्। आत्मनेपदयोग्यस्थले तु संजिगमिषुः संजिगंसुरित्यादौ वा इम्। पाणिनिः ७।२।५८।

‡ (६०३) क्रषमृष इति, (६०४) वर्द्धेति असाप्सीत् असार्प्सीत्, सि-विकल्पपक्षे (५६५) लिदित्वात् ङः असृपत्।

विस्कभ्नाति वे-वर्ज-न्यादिपूर्व्वस्य स्वपश्च सः षः स्यात्, न्यादि-पूर्व्व-स्फुर-स्फुलोः परिवि-स्कन्दतेः अप्राणिघ-न्यादिपूर्व्वस्य स्यन्द-तेश्च स्याद्वा । परिष्कन्दति परिस्कन्दति । *

(७४) तॄ प्लवन-तरणयोः ।

६२६ । ऋृतो णुः कित्थ्यां ।

(ऋृतः ६।, णुः १।, कित्-थ्यां ७।) ।

तेरतुः । †

६२७ । वृतो वेमोघौंऽठीढीपसेः ।

(वृ-ऋृतः ५।, वा ।१।, इमः ६।, घँ: १।, अ-ठी-ढी-पसेः ६।) ।

वृङो वृञ ऋृदन्ताच्च इमो घः स्यात् वा, न तु थ्याः ढ्याः पसेश्च । तरीता तरिता । ठो ढी पसेस्तु तेरिथ, तरिषीष्ट, अतारिष्टां । ‡

---

* वेः स्कभ्नाः विस्कभ्नाः, विश्च सुश्च निर्‌च दुर्‌च तेभ्यः स्वप, निर्गतो वः यस्मात् स निर्वः, निर्वश्चासौ विसुनिर्दुःस्वप् चेति, पश्चात् विस्कभ्नाश्च निर्व्विसुनिर्दुःस्वप् च तस्य । निश्च निर्‌च विश्च ते, तेभ्यः स्फुर स्फुलौ, परि विभ्यां स्कन्दः परिविस्कन्दः, निश्च परिश्च निर्‌च विश्च अभिश्च अनुश्च ते, तेभ्यः स्यन्द निपरिनिर्व्यभ्यनुस्यन्द, अप्राणी घः (कर्त्ता) यस्य सः अप्राणिघः, सचासौ निपरिनिर्व्यभ्यनुस्यन्द चेति अप्राणिघनिपरिनिर्व्यभ्यन्तस्यन्द, पश्चात् निनिर्वि-स्फुरस्फुलौ च परिविस्कन्दश्च अप्राणिघनिपरिनिर्व्यभ्यनुस्यन्द चेति तस्य । स्कभ्ना इति श्नान्तनिर्द्देशात् विस्कभ्नीतोत्यत्र षत्वं न स्यात् । निर्व इति यदा स्वपधातोः ञि स्यादित्यर्थः । अप्राणिघ इति स्यन्दविशेषणात् निस्यन्दते (मदं मुञ्चति) हस्तीत्यत्र न षत्वं । पाणिनि: ८।३।७२.७३,७४,७५,७६,७७,८८ ।

† किच्चासौ ठीचेति कित्ठी तस्यां । तेरतुरिति अनेन गुणे, (५७९) अकारः एकारः णिलोपश्च । दीर्घं ऋृत इति किं, चक्रतुः । पाणिनि: ७।४।११ ।

‡ वृश्च ऋृश्च तस्मात् । पे सिः पसिः, ठीच ढीच पसिश्चेति, न ठीढीपसिः अठीढीपसिस्तस्य । वृ इति वृङ वृञोर्ग्रहणं । तॄ-ता (५५४) इम्, (५४२) गुणः, अनेन इमो वा दीर्घः । तेरिथ इत्यत्र गुणादनन्तरं (५७९) अकार एकारः, णिलोपश्च । अतारिष्टामिति (५७४) अजन्तत्वात् वृद्धि । व्युत्क्रमोदाहरणन्तु सूत्रोक्तनिषेधक्रमानु-सारेण । पाणिनि: ७।२।३८,३९,४० ।

६२८ । ॠदिरणावुर्त्वोष्ठ्यात् ।

(ॠत् ।१, इर् ।१, अणौ ७, उर् ।१, तु ।१, ओष्ठ्यात् ५।) ।

ॠकार इर् स्यादणौ, ओष्ठ्यात् परस्तु उर् । तीर्य्यात् । *

(७५) षन्जौ ञि सङ्गे ।

६२९ । षन्ज दन्श ष्वन्जोऽपि नलोपः ।

(षन्ज-दन्श-ष्वन्जः ६।, अपि ७।, न-लोपः १।) ।

निषजति । न्यषाङ्क्षीत् । निषषञ्ज, ससजतुः ससञ्जतुः ।†

(७६) दृशिरौ प्रेक्षणे ।

पश्यति । अदर्शत् । (६०४) वर्द्धोऽकिदिति, अद्राक्षीत् । ‡ (५८९) सृजदृशेतीम् वा, ददर्शिथ दद्रष्ठ ।

---

* अत्र पोः इति नोक्ता ओष्ठ्यादिति कथनं दन्त्यवकारस्यापि प्राप्त्यर्थं, तेन वृधातोः सनि वुवूर्षतीति (८०५) दीर्घं, अनेन ओष्ठ्यपरत्वादुर् । ओष्ठ्यादिति धात्ववयवादेव, तेन समपूर्वकस्य ॠधातोः समीर्य्यादित्येव । लाक्षणिकस्याप्यत्र ग्रहणं तेन मुच्चिकीर्षति (८०५) सूत्रं द्रष्टव्यम् । तीर्य्यादिति तॄधातोः ढौ-यात् अनेन इर्, (२२८) दीर्घः । पाणिनिः ७।१।१००,१०२ ।

† षन्जश्च दन्शश्च ष्वन्जश्च तस्य । एषां नस्य लोपः स्यादपि । एभ्यः शप् कित् इति न कृत्वा नलोपविधानं, दशि कङ् दर्शे इति इदनुबन्ध-चुरादीय-दशधातोः ञि-विकल्पपक्षे दशते इत्यत्र (५६८) नलोपनिषेधेऽपि, अनेन नलोपार्थं । निषजतीति (५७२) षत्वं । न्यषाङ्क्षीदिति (५७४) वृद्धिः, (२११) कुङ्, (५०,५१) नस्थाने अनुस्वारस्तस्य च ङ । (१११) कवर्गात् सः षत्वं । (५७२) अम्व्यवधानेऽपि षत्वं । निषषञ्ज इति द्वित्वेऽपि द्वयोः षत्वं । ससजतुः ससञ्जतुः (५६६) वा किद्भावः, (५६७) कित्पक्षे न-लोपः । पाणिनिः ६।४।२५ ।

‡ पश्यति (५९७) दृशस्थाने पश्य । अदर्शत् (५६५) ङः, (६१९) गुणः । ङ-विकल्पपक्षे अद्राक्षीदिति अनिमत्वात् (५७४) वृद्धिः, (१५४) षङ्, (६०२) षस्य कः, (१११) षत्वं ।

(७७) दन्शौ दंशने।

अदाङ्क्षीत्। *

(७८) कित निवासे रोगापनयने संशये च।

६३०। कित्तिजगुपः सन्नेम् मान शान दान बधस्तु खेङौ च। (कित—गुपः ५।, सन् ।१।, न ।१।, इम् ।१।, मान—बधः ५।, तु ।१।, खेः ६।, ङौ ।१।, च ।१।)।

कितादेः सन् स्यात्, इम् न स्यात्, मानादेस्तु खेङौ च।

क्रमादितोऽत्र सन्देहे क्षान्ति-निन्दा-विचारणे।
निशानार्जवनिन्दासु रुग्जयेऽपि कितो मतः॥ †

६३१। सनन्ताद्ये धुः। (सन् आदिः ११, धुः ११)।

सनन्ता आद्यन्तश्च धुसंज्ञः स्यात्। ‡

---

* अदाङ्क्षीदिति दन्श-धातोः टौ-दि, वृद्धिः षडादिकश्च।

† कित्‌च तिज्‌च गुप्‌च तस्मात्। मानश्च शानश्च दानश्च बधश्च तस्मात्। अनिर्द्दिष्टार्थत्वात् स्वार्थे एव सन् भवति। एतेषां सप्तानां धातूनामर्थान् निर्द्दिशति। क्रमादिति। अत्र सन्‌विधाने एते कितादयः सप्त क्रमात् सन्देहादिषु सप्तसु अर्थेषु मताः, कितः रुग्जयेऽपि मतः। तेन कित—सन्देह-रुग्जययोः, तिज ङ क्षान्तौ, गुप ङ निन्दायां, मान ङ विचारणे, शान ङ निशाने, दान ङ आर्जवे, बध ङ निन्दायामित्यर्थः। सन्देहः विरुद्धानेककोटिविषयकं ज्ञानं, अस्मिन्नर्थे अकर्म्मकः यथा—शास्त्रे चिकित्सति। रुग्जयो रोगप्रतीकारः। क्षान्तिः सहनं। निन्दा दोषवत्तयाख्यानं। विचारणं इदमित्थं न वेति प्रमाणानुसन्धानं। निशानं तीक्ष्णीकरणं। आर्जवं अकुटिलीभावः। एष्वर्थेषु सकर्म्मका एव। पाणिनिः ३।१।५,६।

‡ आदिश्च—ञि (७७७) सन् (८०३) यङ् (८२०) काम्यक् (८४२) क्य (८४३) क्ष्य (८४८) क्वि (८४८) इति सप्त। सनन्ताद्यन्तानां धुसंज्ञाकरणं (५२८) तिबादिभवनार्थं। पाणिनिः ३।१।३२।

६३२। सन्यङन्तो द्विः। (सन्-यङ् अन्तः १।, द्विः १।)।

चिकित्सति। अचिकित्सीत्। चिकित्सामास। *

इति पवत्-पादः। †

३य पादः—भवत्।

(७९) एध ङ वृद्धौ।

एधते। ऐधिष्ट। एधाञ्चक्रे। ‡

(८०) दद ङ दाने।

(५७९) अ-श्रद्ददेत्युक्तेः, ददद।

(८१) ष्वक्क ङ सर्पणे।

(५६९) अ-ष्वैष्वक्केत्युक्तेः, ष्वक्कते। षष्वक्के।

---

* सन् च यङ् च सन्यङौ, तौ अन्ते यस्य स सन्यङन्तः। तद्गुणसंविज्ञान-बहुव्रीहिणा सन् यङ् समेतो द्विः स्यादित्यर्थः। कदाचिदतद्गुणसंविज्ञान-बहुव्रीहौ केवलो धातुरपि द्विः, तेन मीमते इत्यत्र सनं हित्वा मुचधातोर्द्वित्वे, (८१५) मोचा-देशः। चिकित्सतीत्यादि, कितः सन्, इमनिषेधे, (८०४) गुर्नानिमोति वक्ष्यमाणात् गुणनिषेधे, द्वित्वे चिकित्स इति भागस्य धातुसंज्ञायां तिबादिकं। त्यान्तत्वादाम, ततः (५८३) असप्रयोगः। पाणिनिः ६।१।९।

† पवतां परस्मैपदवतां धातूनां पादः एकार्थावच्छिन्नसूत्रसमूहः इत्यर्थः।

---

‡ एध-ते (५४१) शप्। एध तन् (५५०,२३,५५१,५५४,१११,४७) ऐधिष्ट। एध-ए (५८२,५८३)। आत्मनेपदित्वात् केवलं कृप्रयोगः।

(८२) ऋज ङ आर्जवे।

आनृजे। *

(८३) तिज ङ क्षमा-निशानयोः।

तितिक्षते। †

(८४) ष्वन्जौ ङ सङ्गे।

निष्वजते। ‡

६३३। नि वि परि ष्वन्ज स्तु सुमादेः सः षो ऽमि वा।

(नि—सुमादेः ६।, सः ६।, षः १।, अमि ७।, वा।१।)।

न्यष्वङ्क्त न्यस्वङ्क्त। सस्वजे सस्वञ्जे। §

६३४। सत्स्वञ्जोष्ठ्यां नाखेः।

(सद्-स्वञ्जोः ६॥, ठ्यां ७।, न।१।, अखेः ६।)।

खिवर्जस्यानयोः सः षो न स्यात् ठ्यां। विषस्वजे विषस्वञ्जे।¶

---

* आनृजे इति ऋज-ए (५८०) ऋकारादित्वात् खेरान्।

† तितिक्षते इति तिज-(६३०,६३२,२११,६३१,) तितिक्ष इति धातुः। (६३६) आत्मनेपदं।

‡ निष्वजते (५६९,६२९,५७२)।

§ सुम् आदिर्यस्य स सुमादिः, ष्वन्जश्च स्तुश्च सुमादिश्चेति। निश्च विश्च परिश्च ते, तेभ्यः ष्वन्जस्तुसुमादिः तस्य। सुमादिः (५७२) सुम, अनङ् सिव, अनोङ् सह इति। निविपरिभ्यः परेषामेषां सः षः स्यात् वा अमि सति। न्यष्वङ्क्त इति नि-स्वन्ज-तन् (५५०,५५१,५६२) सेर्लोपः, (२११,५०,५१) अनेन वा षत्वं। सेः स्थानिवत्त्वात् (५६७) न नलोपः। सस्वजे सस्वञ्जे इति (५६६) वा कित्संज्ञायां, (५६७) नलोप-तदभावौ। पाणिनिः ८।३।७०।

¶ सदश्च स्वञ्जश्च तौ तयोः। न खिः अखिस्तस्य अखेः। विषस्वजे विषस्वञ्जे

(८५) त्रपू षङ् लज्जायां।

अत्रपिष्ट अत्रस्त। त्रेपे।*

(८६) जभ ङ् जम्भने।

६३५। नुण् जभोऽचि।

(नुण् ।१।, जभ: ६।, अचि ७।)।

अजम्भिष्ट।†

(८७) ष्टुभ ङ स्तम्भे।

विष्टोभते। व्यष्टोभिष्ट।‡

(८८) पण ङ व्यवहारे स्तुतौ च।

(५८१) कमऋतेत्यायः। पणायते।

६३६। सनः पमे धो वा त्वायात्।

(सन: ५।, प-मे १॥, धो: ६।, वा ।१।, तु ।१।, आयात् ५।)।

पणायति। अपणायिष्ट अपणिष्ट। पणायाञ्चक्रे पेणे। §

इति अनेन निषेधात् मूलस्य न षत्वं खिलु (५७२) षत्वमेव। ण्यामिति किं, विषाष्व-ज्यते इत्यत्र उभयोरेव षत्वं। पाणिनि: ८।३।११८, काशिका वार्त्तिकानि च।

* अत्रपिष्ट इति (५७३) वा इम, पक्षे (५६२) सिलोप: अत्रस्त। त्रेपे इति (५७६) खिलोप:, अकार एकारश्च।

† जभो नुण् स्यादचि परे। णित्त्वादन्त्याच: पर:। प्रकरणबलादात्मनेपदिन-एवेति बोध्यं, जभ जभने इत्यस्य तु जभतीत्यादि। अजम्भिष्ट इति इमि, अचि परं नुण्। एवं जम्भनमित्यादि। पाणिनि: ७।१।६१।

‡ विष्टोभते, ष्टुभधातो: (५७२) षत्वं। व्यष्टोभिष्ट इति अभ्यपि षत्वं।

§ धो: मूलधातुसम्बन्धिनी प-मे सन: सनन्तात् स:, आयान्तात्तु वा। तथाच परस्मैपदिधातो: सनन्तात् पं, आत्मनेपदिधातो: सनन्तात् मं, उभयपदिन: सनन्ता-

६३७ । विच्छास्तुतिपणो वायः ।

(विच्छ-अस्तुतिपणः ५।, वा ।१।, आयः १।) ।

पणायते पणते । *

एवं (८९) पन ङीड़े ।†

(९०) कमु ङ कान्तौ ।

कामयते । (६१३) आन्तत्वादङ् । ‡

६३८ । आङ्युङः स्वो ऽनग्लोपिशास्वृदितः ।

(आङि ७।, उङः ६।, स्व. १।, अनग्लोपि-शासु ऋदितः ६।) ।

अग्लोपिनः शासो ऋकारेतश्चान्यस्य उङः स्वः स्यात् ञेः परे अङि परे । §

उभयपदमिति । आयात्तु वेति वा शब्दो व्यवस्थितविकल्पार्थः, तेन आत्मनेपदिन-आयान्तात् पणे स्तः, परस्मैपदिनस्तु पणेव । अतो गुपधातोः गोपायतीत्येव । पणायतीति आयात्तु वेत्यस्य विकल्पपक्षे उदाहरणं । अपणायिष्ट अपणिष्ट (५९२) वारेत्यस्योदाहरणं । पाणिनिः १।३।६२ ।

* न स्तुतिरस्तुतिः, अस्तुतौ पण अस्तुतिपण, विच्छश्च अस्तुतिपण चेति समासः । विच्छधातोः अस्तुत्यर्थात् पणश्च आयः स्याद्वा । स्तुतिवर्जनात् व्यवहारार्थे भवतीत्यर्थः । व्यवहारश्च क्रयविक्रयस्वरूपः । पाणिनिः ३।१।२८,३१ ।

† एवं पन इत्यनेन (५९१) आयप्रत्यये पनायते पनायति इत्यादि ।

‡ कामयते इति (५९१) ञिङ् कृते, (५७७) वृद्धौ, कामि-धातोस्ते विभक्तिः ।

§ ञेः परो ऽङ् आङ् तस्मिन् । अको लोपः अग्लोपः, सोऽस्यास्तीति अग्लोपी । ऋत् इत् यस्य स ऋदित् । अग्लोपी च शासश्च ऋदिच्चेति, पश्चात् नञ्योगे तस्य । ञेः परे अङि परे इति कथनात् ञेः पूर्व्ववर्त्तिभागस्यैव उङः स्वः स्यादिति । अग्लोपि-शास-ऋदितान्तु—अचुकूटत् अशशासत् अडुढौकदित्यादि । पाणिनिः ७।४।१,२ ।

६३९ । खेः सन्वद्‌घौ, घोर्हसादे र्घश्च, ल्यनेकाचोस्त्वकलिहले र्वा ।

(खेः ६।, सन्वत् ।१।, घौ ७।, घोः ६।, हसादेः ६।, र्घः १।, च ।१।, ल्यनेकाचोः ६॥, तु ।१।, अकलिहलः ६।, वा ।१।) ।

अनग्लोपिनः खेः घौ ध्वचरे परे सन्वत् कार्य्यं स्यात् ञाङि, घोश्च खेर्हसादेः र्घः स्यात्, कलि-हलि-वर्जस्य लेः अनेकाचश्च सन्वद्वा स्यात् । *

६४० । ख्यस्येत् सनि । (ख्यस्य ६।, इत् ।१।, सनि ७।) ।

खेरवर्णस्य इत् स्यात् सनि परे । †

६४१ । ञेर्लोपोऽनाल्विष्ण्वाय्यान्तेत्न्वामिम्शिति ।

(ञेः ६।, लोपः १।, अनाल्वि—शिति ७।) ।

आलु इष्णु आय्य अन्त इत्नु आम् इम् शित् एभ्योऽन्यत्र ञेर्लोपः स्यात् । ‡

---

* सन्इव सन्वत्, लिश्च अनेकाच्च तौ तयोः, कलिश्च हलिश्चेति कलि-हलि, न कलिहलिः अकलिहलिस्तस्य । अनग्लोपि-शास्वृदितामनुवर्त्तनेऽपि शास्वृदिता लघु-स्वरयुक्तधात्वचरपरत्वाभावादप्राप्तौ, चकास्ट च ऌ दीप्तौ इत्यस्य ऋदित्तोऽपि अनेकाच्-त्वात् विशेषेण बाधितत्वात्, केवल-मनग्लोपिनः इति व्याख्यातं । अनग्लोपिधातोः खेः सन्वत् कार्य्यं स्यात् ञाङि, लघुधात्वचरे परे । तत्रैव हसादेर्धातोः खिर्यदि लघु-र्भवति तदा तस्य दीर्घः स्यात् । कलि-हलि-भिन्न लिङ्गस्य अनेकाच-धातोश्च खेः सन्वत् वा स्यादित्यर्थः । पाणिनि. ७।४।९३,९४, वार्त्तिकानि च ।

† खेः अः ख्यस्तस्य । पाणिनि: ७।४।७९ ।

‡ आलुश्च इष्णुश्च आय्यश्च अन्तश्च इत्नुश्च आम्च इम्च शिच्च ते, न विद्यन्ते ते यत्र स तस्मिन् । आल्वादौ तु—स्पृहयालुः, कारयिष्णुः, स्पृहयाय्यः, मण्डयन्तः, स्तनयित्नुः, कारयामास, कारयिष्यति, कारयतीत्यादि । (१०७०) सूत्रे सेमक्तादौ परे तु ञेर्लोपः । पाणिनि: ६।४।५१,५२,५३,५४,५५ ।

अचीकमत अचकमत । कामयाञ्चक्रे चकमे । *

(८१) अय ङ गतौ ।

आयिढ्वं आयिध्वं आयिद्ध्वं । अयाञ्चक्रे ।

(८२) एवं, दय ङ गतौ ।

(८३) स्फायी ङ वृद्धौ ।

अस्फायिष्ट । †

६४२ । य्वोर्लोपो ह्स्यये ।

(य्वोः ६।।, लोपः १।, ह्सि ७।, अये ७।) ।

अस्फास्त । ‡

(८४) ओ प्यायी ङ वृद्धौ ।

६४३ । पदस्तनीण् घे प्याय ताय दीप पूर जन बुधस्तु वा ।

(पद. ५।, तनि ७।, इण् ।१।, घे ७।, प्याय—बुधः ५।, तु ।१।, वा ।१।) ।

---

* अचीकमत इति कम धातोः (५९२) ञिङ्, (५७७) वृद्धिः, कामि इत्यस्य (६३१) धातुसंज्ञा, ततः तन्, (६१३) चङ्, (६३८) ह्रस्वः, कमि इत्यस्य द्वित्वे मि इत्यस्य लोपे, कस्य चकारे, खेः सन्वत्त्वात् (६४०) अकारस्य इकारे, लघुखदीर्घे, अनेन ञेर्लोपः । ञिङो विकल्पपक्षे, अङ् द्वित्वादिकञ्च । कामयाञ्चक्रे इति कामि धातोः (५८२) त्यान्तत्वादाम्, ततः क्नप्रयोगः । ञिङोऽभावे चकमे ।

† आयिढ्वमिति (५५६,५५७) सलोपः, धस्य ढ. । अस्फायिष्टेति (५७३) वा इम्।

‡ यच वच य्वौ तयोः । वकारो दन्त्यः । यवयोर्लोपः स्यात् अ-ये ह्सि परे । अस्फास्तेति अनिमपक्षे य-लोपः । एवं स्फाता प्याता । दिवो यङ्लुकि ऊटोऽप्राप्ति-पक्षे देदेति अत्र वलोपः । ह्सि किं, स्फायते सेवते । अये किं, दीव्यति । वार्त्तिकम् ।

पट्टो घेऽर्थे इण् स्यात् तनि, प्यायादेसु वा। *

६४४। इणस्तन् लोप्यः।

(इणः ५।, तन् ।१।, लोप्यः १।)।

अप्यायि अप्यायिष्ट अप्यास्त। †

६४५। प्यायः पी यङ्ञ्योः।

(प्यायः ६।, पीः १।, यङ्ञ्योः ७॥)।

पिप्ये। ‡

(८५) तायृ ङ सन्तानपालनयोः।

अतायि अतायिष्ट। §

(८६) म्रल ङ चलने।

अम्रलिढ्ढं अम्रलिध्वं अम्रलिड्वं। ¶

---

* इणो ण इत् वृद्ध्यर्थः। सेर्बाधकोऽयं। पाणिनिः ३।१।६०,६१।

† इणः परः तन् लोप्यः स्यात्। इणः इति सामान्यार्थं, तेन (८२१) रतनो-र्यंगिणावित्यनेन कृतादिणोऽपि तनो लोपः। पट्टस्तनोण् घे इत्यत्र तनः स्थाने इण् कृते लाघवेऽपि, ञ्यां सेरापत्तिः, तन्स्थानजातत्वेन इणो ङित्त्वात् अबोधीत्यत्र गुणाभावश्च स्यात्। अप्यायिष्ट इति इणो विकल्पपक्षे (५७३) वा इम्। अप्यास्तेति इमोऽभावपक्षे यलोपः। पाणिनिः ६।४।१०४।

‡ प्याय-स्थाने पीः स्यात् यङि ञ्याञ्च। पिप्ये इति (५८८) यः। पाणिनिः ६।१।२८।

§ अतायीति तायधातोः तनि (६४३) इण्। पक्षे (५५४) अतायिष्ट।

¶ अम्रलिढ्ढमिति (५५६,५५७) वा-द्वयेन पदत्रयं।

(९७) षेवृ ङ सेवने।

परिषेवते, न्यषेविष्ट, विषिषेवे। प्रतिसेवते।*

(९८) काशृ ङ दीप्तौ।

काशामास चकाशे।†

एवं (९९) काशृ ङ कुशब्दे।

(१००) ईहृ ङ चेष्टायां।

ऐहिढ्वं ऐहिध्वं ऐहिड्ढं।‡

(१०१) रु ङ वधे गत्यां।

अरविष्ट अरोष्ट। रुरुविषे।§

(१०२) दे ङ पालने।

६४६। द्वे देङो दिगिष्ठ्यां।

(द्वे: ६।, देङ: ६।, दिगि: १।, ष्ठ्यां ७।)।

द्विरुक्तस्य देङो दिगिः स्यात् ष्ठ्यां। दिग्ये।¶

---

* (५७२) परिषेवते, न्यषेविष्ट इति अभ्यपि, विषिषेवे इति द्वेश्च षत्वं। परि-नि-वि-पूर्व्वत्वाभावात् प्रतिसेवते इति न षत्वं।

† काशामास इति (६०७) वा आम्।

‡ ऐहिढ्वं (५५६,५५७)।

§ अरविष्ट अरोष्ट (५७३) वा इम्। रुरुविषे इति ठीवर्जनात् (५८४) नेमसुमिति इम्। (५८८) उव्।

¶ दिग्ये इति द्विरुक्तस्य देधातोः दिगि-आदेशः, (५८८) इ-स्थाने यः। पाणिनिः ७।४।९।

(१०३) ओ डी ङ नभोगतौ।

अडयिष्ट। *

(१०४) गुप ङ गोपन-कुत्सनयोः।

जुगुप्सते।

(१०५) मान ङ विचारे।

मीमांसते।

(१०६) बध ङ निन्दायां।

बीभत्सते। †

(१०७) द्युत ङ ऌ दीप्तौ।

(५६५) शासुलिद्द्युदिति ङः। तेनैव पं। अद्युतत्, अद्योतिष्ट। ‡

६४७। द्युत्-स्वाप्योः खेर्जिः।

(द्युत-स्वाप्योः ६॥, खेः ६।, जिः १।)।

दिद्युते। §

(१०८) वृत ङ वृ, लृट वर्त्तने।

६४८। वृद्भ्यो नेम् पे स्यसनो र्वा त्वमे।

(वृद्भ्यः ५॥।, न ।१।, इम् ।१।, पे ७।, स्य-सनोः ६॥, वा ।१।, तु ।१।, अमे ७।)।

---

* अडयिष्ट इति (५८७) डी-वर्जनात् न इम्निषेधः।

† जुगुप्सते, मीमांसते, बीभत्सते, इति (६३०) सन्, मान-बधोः खेर्डी च। गुपधातोः (८०४) आनिमसनि न गु। (१७७) बध-धातोर्बस्य भः।

‡ तेनैव पं (५६५) टीपरस्मैपदे ङ-विधानसामर्थ्यात् द्युतधातोः व्यासुभयपद-मित्यर्थः।

§ द्युश्च स्वापिश्च तयोः। द्युतो आत्मस्वपश्च खेर्जिः स्यात्। दिद्युते इति खेः (५३५) यस्य इः। पाणिनिः ७।४।६७।

वृतादेः स्य-सनोरिम् न स्यात् पे, मादन्यत्र तु वा ।
अतएव पं । वर्त्स्यति । मे तु वर्त्तिष्यते । *

(१०९) स्यन्दू ङ वृ चरणे ।

निष्यन्दते निस्यन्दते घृतं । निस्यन्दते हस्तीति प्राणिषत्वान्न षः । †

(११०) क्लृपू ङ वृ कल्पने ।

६४९ । क्लपः क्लृपो ऽक्लपादौ ।

(क्लपः ६।, क्लृपः १।, अक्लपादौ ७।) ।

क्लपः स्थाने क्लृपः स्यात् न तु क्लपादौ । कल्पते । ‡

६५० । नेम् पे ड्याः । (न ।१।, इम् ।१।, पे ७।, ड्याः ६।) ।

क्लृपो ड्या इम् न स्यात् पे । अतएव पं । कल्प्ता ।
पे किं, कल्पिता कल्प्ता । कल्प्स्यति, मे तु कल्पिष्यते कल्प्स्यते । §

---

* वृद्भ्यः इति बहुवचनं गणार्थं । अतएव पमिति वृतादेरात्मनेपदिनः परस्मैपदे स्य-सनोरिम्निषेधादेव स्य-सनोरुभयपदित्वमित्यर्थः । यथा वर्त्स्यति । सनि विवृत्सति । मे तु वर्त्तिष्यते, सनि विवर्त्तिषते । मादन्यत्र तु विवर्त्तिषा विवृत्सा इत्यादि । वृतादिश्च—वृतुर्वृधुः शृधुः स्यन्दूः क्लृपूः पञ्च वृतादयः । पाणिनिः ७।२।५९. १।३।९२ ।

† घृतं निष्यन्दते द्रवीभवतीत्यर्थः, (६२५) अप्राणिषत्वात् वा षत्वं । हस्ती निस्यन्दते चीर्णो भवतीत्यर्थः, अत्र प्राणिषत्वात् न षत्वं ।

‡ क्लपा आदिः यस्य स क्लपादिः, नञ्योगे तस्मिन् । क्लपः स्थाने क्लृपः स्यात् न तु क्लपा-प्रभृतिषु । क्लपादिर्यथा—क्लपा क्लपाणः क्लपथः क्लपीटश्च (कर्पटश्च) क्लपः क्लपो ड्रात । कल्पते इति क्लृप आदेशे अपि लृकारस्य गुणः अल् । पाणिनिः ८।२।१८ । "क्लपणादीनां प्रतिषेधः" इति वार्त्तिकञ्च ।

§ अत्रापि अतएव पं । ततश्च—द्युतादेः ड्यामुभयपदित्वं । वृतादेः द्युताद्यन्त-

(१११) व्यथ षङ् पीड़ायां।

६५१। व्यथ ग्रह ज्या वय व्यध वश व्यच प्रच्छ वृश्च भ्रस्ज स्वप वच यजादेः खेर्जिष्ठ्यां।

(व्यथ—यजादेः ६।, खेः ६।, जिः १।, ष्ठ्यां ७।)।

एषां खेर्जिः स्यात् ष्ठ्यां। विव्यथे।*

(११२) ञि त्वरा षङ् स्वरे।

अत्वरिढ्वं अत्वरिध्वं अत्वरिड्ढं।†

इति मवत्-पादः।

र्गणत्वात् ष्ठ्यां स्य-सनोश्च उभयपदित्वं। क्रपस्तु द्युतादित्वात् वृतादित्वात् नेम् पे ङ्वा-इत्यनेन च, ष्ठ्यां स्यसनोः ङाश्च उभयपदित्वमिति, अन्यत्र सर्व्वं एवात्मनेपदिनः। कल्प्ता परस्मैपदे अनेन इम्निषेधः। कल्प्स्यतीति वृद्भ्यो नेम् पे इत्यनेन निषेधः। आत्मनेपदे तु (५७३) वा इम। पाणिनिः ७।२।६०,१।३।९३।

* व्यथश्चेत्यादि—यजादिश्चेति द्वन्द्वे तस्य। वय इह वेञ स्थाने (६६३) वयादेशः। तस्य च वेञस्थानजातत्वेनैव यजादित्वात् जौ सिद्धे पुनरिह ग्रहणं (६६२) ष्ठ्यां न वेप्रश्नाभिति जिनिषेधस्य बाधनार्थं। ग्रह प्रच्छ व्रश्च भ्रस्ज इति चतुर्णां खेर्जौ कृते, (५५९) ऋकारस्य अकारे, जेः फलाभावेऽपीह ग्रहणं ग्रहादिगणार्थं, तेन गृह्यते पृच्छति इत्यादौ (६६१) ग्रहादित्वात् जिः। यजादिस्तु—यजि र्वपि र्वहिश्चैव वेञ् व्येञौ ह्वयतिस्तथा, वदि र्वसिश्च श्वयतिश्चैते नव यजादयः। विव्यथे इति त्रिधिमलात्, खे-रादचोलोपात् पश्चात् न स्यान्तलोपः। व्य इत्यस्य जौ कृते, सकृत् द्विस्तु वेत्यनेन विइत्यस्य पुनर्न जिः। पाणिनिः ७।४।६८,६।१।१७।

† अत्वरिढ्वमित्यादि (५५६,५५७) विकल्पद्वयं।

४र्थ पादः—मिश्रः।

---

(११३) पत ऌ ज गत्यैश्वर्य्ययोः।

६५२। वच्यस्य-श्वि-पतां वोचस्थ-श्व-पप्ता ङे।

(वचि-अस्य-श्वि-पतां ६।।।, वोच-अस्थ-श्व पप्ताः १।।।, ङे ७।)।

एषामेते क्रमात् स्यु ङे। प्रण्यपप्तत्।*

(११४) ण ज टु वम उद्गिरणे।

वेमतुः ववमतुः, वेमिथ ववमिथ।

(११५) भ्रमु ज ण चलने।

(५९४) क्रम क्लमेति श्यन् वा। भ्रम्यति भ्रमति। भ्रेमतुः बभ्रमतुः।

(११६) सह ज ङ शक्तौ।

व्यषहत व्यसहत। (६०६) वेमसहेतीम् वा। परिषहिता।†

६५३। सह-वहोऽदो ढि।

(सह-वहः ६।, अत् ।१।, ओ ।१।, ढि ७।)।

---

* वचिश्च अस्यश्च श्विश्च पतश्च ते तेषां—
वोच च अस्थश्च श्वश्च पप्तश्च ते स्युः। वचिरिति अदादिक एव, भौवादिकात् ङप्राप्त्यभावात्। अस इति दिवादिक एव, अन्यस्मात् ङप्राप्त्यभावात्। पाणिनिमते असधातोः थुक् आगमः। प्रण्यपप्तदिति प्र-नि-पत—दीदि, (५६५) ऌदित्वात् ङः, अनेन पप्तादेशः। (५४६) गदाद्यन्तने णत्वं। पाणिनिः ७।४।१७,१८,१९,२०।

† वेमतुरित्यादि (५७६) जृवमभ्रमेति वा खिलोपः अकारस्य एकारश्च। व्यषहतेति वि-सह—धी·त, (६३२) वा षत्वं। परिषहिता (५७२) नित्यं षत्वं।

सहवहोः अकार ओ स्यात् ढे परे। निसोढ़ा, (५७२) ओत्वान्न षः।*

(११७) षद् ऌ जौ विषादे गतौ।

निषीदति। न्यषदत्। निषसाद। प्रतेस्तु प्रतिसीदति।†

(११८) शद् ऌ जौ शाते।

६५४। शदोऽपि मं। (शदः ५।, अपि ७।, मं १।)।

शीयते। अशदत्।‡

(११९) फण मि ण गतौ।

फेणतुः पफणतुः, फेणिथ पफणिथ।

(१२०) राजृ ञ ण दीप्तौ।

रेजतुः रराजतुः, रेजे रराजे। (५७९) विधिबलादातोऽप्येत्वं।§

---

* निसोढा इति नि-सह—डौ-ता, इमोऽभावपक्षे (१७५) हस्य ढः, अनेन अकारस्य ओकारः, (५७५) तस्य धः, (४७) धस्य ढः, (७७) ढलोपः। एवं सोढव्यः। वोढा, वोढव्यः। पाणिनिः ६।३।११२।

† निषीदति, नि-सद-तिप्, (५९७) सीदादेशः। (५७२) षत्वं। न्यषदत्—टीदि, (५६५) ऌदित्त्वात् ङः। अमव्यवधानेऽपि षत्वं। निषसाद—ठौ णप्, द्वित्वादिकं, (६३४) खिभिन्नस्य षत्वनिषेधः, खेस्तु षत्वं। (५७१) प्रतिवर्जनात् प्रतिसीदतीति न षत्वं।

‡ अपविषये शदो मं स्यात्, यत्र यत्र शप् तत्र तत्रात्मनेपदमित्यर्थः। शीयते (५९५) शीयादेशः। अपि किं, अशदत्, अत्र टी-दि (५६५) ङः। पाणिनिः १।३।६०।

§ फेणतुरित्यादि (५७९) फणादित्वात् वा एत्वं, खिलोपश्च। विधिबलात् राजृ-प्रभृतीनां फणादिपाठबलादाकारस्यापि एत्वं खिलोपश्च।

एवं (१२१) टु भ्राशृ ङ ण दीप्तौ।

भ्राश्यते भ्राशते। भ्रेशे बभ्राशे।

एवं (१२२) टु भ्लाशृ ङ ण भासि। *

(१२३) ष्वन ण शब्दे।

विष्वणति अवष्वणति मांसं, व्यष्वणत्, विष्वेणतुः विषष्वणतुः। विस्वनति वीणा, निस्वनति अन्नं, (५७२) अन्नव्यवेत्युक्ते न षः। †

(१२४) खनु ञ विदारे।

(२३०) हनगमेत्युङ्लोपः, चख्नतुः चख्ने।

६५५। खन-सन-जनां ङा झसे, ये तु वा।

(खन-सन-जनां ६।।।, ङा ।१।, झसे ७।,ये ७।, तु ।१।, वा ।१।)।

खायात् खन्यात्। ‡

---

* भ्राश्यते इति (५६४) श्यन् वा। भ्रेशे इति फणादित्वात् आतोऽप्येत्वं। भ्राश-भ्लाशौ दन्त्यसान्तौ च।

† सशब्दं मांसं भुङ्क्ते इत्यर्थः, अवष्वणतीति विधामत्वात् षकारात् परस्यापि षत्वं। व्यष्वणदिति घी-दिप्, अमव्यवधानेऽपि षत्वं। विष्वेणतुरिति फणादित्वात् वा एत्वं, खिलोपश्च, द्विरुक्तस्यापि षत्वं। वीणा विस्वनति शब्दायते, अन्नार्थभिन्नत्वात्; अन्नं निस्वनति भुङ्क्ते, वि-अवभिन्नपूर्व्वत्वात्, न षत्व।

‡ एषां ङा स्यात् झसे परे, ये तु वा, ङित्त्वादन्त्यस्य स्थाने। अत्र पिति झसे परे न स्यादिति बोध्यं, तेन यङ्लुकि चंखन्ति चंखंसीत्यादि। (अतएव किति ङिति झलादौ परे इति पाणिनिः)। एवं घ्यण्भिन्ने ये परे बोध्यं, तेन जन्यमित्यादि। पाणिनिः ६।४।४२,४३।

(१२५) चायृ ञ निशाने अर्च्चे ।

अचायीत्, (६४२) य्वोर्लोप इति, अचासीत् ।*

(१२६) लष ञ स्पृहायां ।

लष्यति लषति । *

(१२७) गुहू ञ संवरणे ।

६५६ । गुहो णोरूः । (गुहः ६।, णोः ६।, ऊः १।) ।

गुहो णोरूः स्यात् । गूहति गूहते । अगूहीत् अघुक्षत् । †

६५७ । गुहदुहदिहलिहां टीमदन्त्ये न सिः सक् वा ।

(गुह-दुह-दिह-लिहां ६।।।, टीमदन्त्ये ७।, न ।१।, सिः १।, सक् ।१।, वा ।१।) ।

एषां टीमदन्त्ये परे सिर्न स्यात्, सक् च वा स्यात् ।

अगूढ़ अघुक्षत । ‡

---

* अचायीदिति (५७३) मा इम् । लष्यतीति (५९४) श्यन् वा ।

† क्तीति (९८३) गुह्यं गोह्यमित्युदाहरता अचि परे एवायं विधिरिति सूचितं, तेन गूहित्वा गोढ़ा, गूहिष्यति घोक्ष्यतीत्यादि । अगूहीदिति (५७३) वा इम् । पक्षे अनिम्त्वात् (६०५) सक्, (१७५,१७७,६०२,१११) अघुक्षदिति । पाणिनिः ६।४।८९ ।

‡ व्या मं टीमं, टीमे दन्त्यः टीमदन्त्यस्तस्मिन् । एषां सि र्न स्यादिति पञ्चमीं हित्वा षष्ठी-निर्द्देशेन, गुहधातोः सेम्पक्षे जातः सिः टीमदन्त्येऽचरे परे न तिष्ठेत्, सेर्जातत्वेन ञपो न प्रसङ्गः । अनिम्पक्षे (६०५) हश्चष इत्यनेन जातः सक् च वा तिष्ठेदित्यर्थः, अतः सकोऽभावपक्षेऽपि ञपो न प्रसङ्गः । तथा दुह-दिह-लिहां अनिमि-जुङ्हान्तत्वात् सिप्राप्तिरेव नास्ति, सक् तु वा स्यादेव, सकोऽभावपक्षे ञपो न प्रसङ्गः, सकृद्गतो विप्रतिषेधो यद्बाधितं तद्बाधितमेवेति न्यायादित्यर्थः । अगूढ़ इति गुह-

६५८। सकोऽल्लोपो ऽच्यव्वे।

(सकः ६।, अत्-लोपः १।, अचि ७।, अव्वे ७।)।

सकोऽकारस्य लोपः स्यादव्वे अचि परे।

अगूहिषि अघुक्षि। अघुक्षहि अघुक्षावहि। दन्त्ये किं, अगूहिष्महि अघुक्षामहि। अव्वे किं, अगूहिषत अघुक्षन्त। *

(१२८) गुह ञ हृत्यां।

६५९। इगुङ्‌स्मढीस्यनिम् किद्गमस्तु वा।

(इगुङः ५।, स-ढीसि ।१।, अनिम् ।१।, कित् ।१।, गमः ५।, तु ।१।, वा ।१।)।

टीतन्, अनेन सेरभावे, (१७५) हस्य ढः, (५७५) तस्थाने धः, (४७) धस्य ढः, (७७) ढलोपः पूर्व्वस्य च दीर्घः। अघुक्षत इति सक्, (१७५, १७७, ६०२, १११)। सको विकल्पपक्षे तु अगूढ इत्येव। मे किं, अघुक्षत्। (दन्त्योष्ठ्योऽपि वकारो दन्त्यग्रहणेन गृह्यते, तेन अघुक्षहि अघुक्षावहि इति सिद्धान्तकौमुदी)। पाणिनिः ७।३।७३।

* अतो लोपः अल्लोपः। न व्वं अव्वं तस्मिन्। बहुवचनभिन्ने अचि विषये इत्यर्थः। अगूहिषि—टी इ, (५७३) इम्। इम्-विकल्पपक्षे अघुक्षि (६०५) सक्, अनेन सकः अकारलोपः, (१७५) हस्य ढः, (१७७) गस्य घः, (६०२) ढस्य कः, (१११) षत्वं। वहि—अघुक्षहि सेर्निषेधः, वकारस्य दन्त्यत्वेन झमत्वाभावात् ढोढ़ोभावित्यस्याप्राप्तिः। सक्पक्षे (१०८) अकारस्य आकारः। अगूहिष्महीति मकारस्य दन्त्यत्वाभावात् न सिनिषेधः। इमो विकल्पपक्षे सक्। अगूहिषत इत (५५५) मान्तोऽदनत इति अन्तस्थाने अत्। अघुक्षन्त इति इम्विकल्पपक्षे सक्, अत्र व्व-वर्जनादनेन न अकारलोपः, परन्तु (५४३) लोपोऽतोऽदेचोरित्यकारलोपः, तस्य स्थानिवत्त्वात न अन्तस्थाने अत्। अकारलोपे अवश्यम्भाविन्यपि अव्वे इति कथनं ज्ञापयति—(२६) लोपोऽस्योमाङोरिति, (५४३) लोपोऽतोऽदेचोरिति, (७७५) इसाल्लोपोऽस्त्यदयोरित्येतेभ्योऽन्यसूत्रेण अकार-लोपस्य स्थानिवत्त्वं नाप्नोति। तेन (६७०) लुगदभ्योऽप इत्यादिना अकारलोपे स्थानि-वत्त्वानङ्गीकारात्, (५५५) मान्तोऽदनत इत्यस्य प्रवृत्तौ दुहते दिहते लिहते इत्यादि सिद्धं। पाणिनि: ७।३।७२।

इगुङ ऋवर्णान्ताच्च परा मे स्यिता अनिम् ढी सिश्च कित् स्यात्, गमस्तु वा । अहृत अहृषातां । हृषीष्ट । *

(१२८) टु डु भृ ञ भृतिपुष्ट्योः ।

बभूव । †

(१३०) दान ञ आर्जवे छिदि ।

दीदांसति, दीदांसते । ‡

एवं (१३१) शान ञ तेजे ।

शीशांसति ।

(१३२) भजी ञ भागसेवयोः ।

भेजे, भेजिथ बभक्थ ।

(१३३) श्रि ञ सेवायां ।

(६१३) णिश्रीत्यङ्, अशिश्रियत् । श्रयिता । §

---

* इक् उङ् यस्य स इगुङ्—भिद बुध सृज प्रभृतिः । इगुङ् च ऋश्च इगुङृ तस्मात् । ढी च सिश्चेति, सं (आत्मनेपदे) ढौभि, मढीसि । नास्ति इम् यस्य सोऽनिम् इति मढीसेर्विशेषणं । गमस्तु आत्मनेपदे (८७५) समगत समगंस्त । अहृत इति तन्, सिः, अनेन कित्, (५६२) सेर्लोपः । पाणिनिः १।२।११,१२,१३ ।

† बभूव इति (५८४) नेमसुम इति इमनिषेधः ।

‡ दीदांसतीत्यादि (६३०) सन, खेडौ च ।

§ भेजे इति (५७८) अः एः, खिलोपश्च । भेजिथ इति (५८६) वा इम् । पक्षे बभक्थ (२११) कुङ् । अशिश्रियदिति अङ् द्वित्वादिकं, (५८८) इयः । श्रयिता (५८७) श्रिवर्जनात् इम् ।

(१३४) रन्जौ ञ रागे ।

६६०। रन्जो ऽपषकानास्घिणनौ न-लोपो ञौ तु मृगरमणे। (रन्जः ६।, अप्-षक-अन-अम्-घिणनौ ७।, न-लोपः १।, ञौ ७।, तु ।१।, मृगरमणे ७।) ।

रजति रजते । ररजतुः ररञ्जतुः । *

(१३५) त्विषी ञ कान्तौ ।

अत्विक्षत् । त्विक्षीष्ट । †

(१३६) यजँ ञौ देवार्चा-दान-सङ्गतौ ।

(६५१) व्यथग्रहेति जिः, इयाज ।

६६१। ग्रहस्वपाद्योः कङित्-कितो र्जिः ।

(ग्रह-स्वपाद्योः ६॥, कङित् कितोः ७॥, जिः १।) ।

ग्रहादेः किति ङिति, स्वपादेः किति, जिः स्यात् ।

ईजतुः ईजुः, इयजिथ इयष्ठ । ‡

---

* अप् च षकश्च अनश्च अम् च घिणनिश्चेति तस्मिन् । एतेषु प्रत्ययेषु परेषु रन्जः न-लोपः स्यात्, ञौ परे तु मृगरमणेऽर्थे । घिणनिरिति क्तृप्रत्ययो वक्तव्यः, तस्मिन् रागीति । रञ्जनमिति तु ञान्तस्यैव । रजति रजते इति अपि नलोपः । ररजतुः ररञ्जतुरिति (५६६) वा कित्संज्ञायां, (५६७) किति नलोपः । पाणिनिः ६।४।२६, ३।२।१४२, "रजकरजनरजःसूपसंख्यानं कर्त्तव्यम्", "घिनुणि च रञ्जेरुपसंख्यानं कर्त्तव्यम्", "रञ्जेर्णौ मृगरमण उपसंख्यानं कर्त्तव्यम्" इति वार्त्तिकानि च ।

† अत्विक्षदिति (६०५) सक् । त्विक्षीष्ट (६५८) कित्त्वात् न गुणः ।

‡ ग्रहश्च स्वपश्च ग्रहस्वपौ, तौ आदी ययोस्तौ तयोः । कङौ इतौ यस्य स कङित्, कङिच्च किच्च कङित्कितौ तयोः । (६५१) व्यथग्रहेति सूत्रे पठिताः ग्रहादयः स्वपादयश्च ज्ञेयाः । यज—अतुस् द्वित्वादि, व्यथग्रहेति खेर्जिः, अनेन मूलस्य जिः । एवं ईजुः । इयजिथ (५८६) वा इम् । पक्षे (२५४) षड्, (४७) थस्य ठः । पाणिनिः ६।१।१५,१६ ।

(१३७) डु वपी ञ मुण्ड-बीजोत्सर्गेः।

प्रण्युवाप।*

(१३८) वहे ञी प्रापणे।

प्रण्यवाक्षीत्, अवोढ़। उवाह, ऊहे।

(१३९) वे ञे स्यूतौ।

६६२। ण्यां न वे-प्रच्छां।

(ण्यां ७।, न ।१।, वे-प्रच्छां ६।॥)।

वेञ प्रच्छि व्रश्चि भ्रस्जीनां जिर्न स्यात् ण्यां। ववौ, ववतुः।†

६६३। वेञो वय् वा। (वेञः ६।, वय् ।१।, वा ।१।)।

वेञो वय् स्याद्वा ण्यां। उवाय ऊयतुः।‡

---

* प्रण्युवाप प्र-नि-वप-णप्, द्वित्वादिकं, (६५१) खेर्जिः। (५४९) गदाद्यन्तनेर्णत्वं। प्रण्यवाक्षीत् प्र-नि-वह-टीदि, (१७५) हस्य ढः, (६०२) ढस्य कः, (५७४) अनिमत्वात् वृद्धिः, गदाद्यन्तनेर्णत्वं। अवोढ़ वह-टीतन, (५६२) सिलोपः, हस्य ढः, (६५३) अकार ओकारः, (५७५) तस्य धः, (४७) धस्य ढः, (७७) ढलोपः। उवाह वह-टी-णप्, द्वित्वादिकं, (६५१) खेर्जिः। ऊहे खेर्जिः, (६६१) मूलस्य जिः।

† प्रच्छां इति बहुवचनं गणार्थं। वेञो जिनिषेधेऽपि तदादेशस्य वयो न जिनिषेधः, अन्यथा तत्र (६५१) वयोग्रहणस्य वैयर्थ्यात्। वे-ठीणप् (६०८) एकार आकारः, द्वित्वादि, (६०९) णप् डौः, ववौ, अत्र खेर्न जिः। एवं ववतुः, अत्र खेर्मूलस्य च जिनिषेधः। पाणिनिः ६।१।४०, वार्त्तिकञ्च।

‡ उवाय इति अनेन वयादेशे, (६५१) खेर्जिः। ऊयतुरिति खेर्मूलस्य च जिः। पाणिनिः २।४।४१,६।१।३८।

६६४ । य वः किति । (य ।१।, वः १।, किति ७।) ।

वेञो यस्य वः स्याद्वा ञ्यां किति । ऊवतुः । *

(१४०) व्ये ञे वृतौ ।

६६५ । ना व्येष्ठ्यां । (न ।१।, षा ।१।, व्येः ६।, ञ्यां ७।) ।

वेञ आ न स्यात् ञ्यां । विव्याय । †

६६६ । जिं वान्त्यः किति ।

(जिं २।, वा ।१।, अन्त्यः १।, किति ७।) ।

द्विर्व्येञोऽन्त्यो भागो जिं वा प्राप्नोति ञ्यां किति ।
विव्यतुः, विव्ययतुः, विव्ययिथ । ‡

---

* वेञो यस्य असम्भवात् तदादेशस्य वयएव यकारस्येत्यर्थः । ऊवतुरिति ऊयतुरितिवत् साध्यं, केवलमनेन यकारस्य वकारः । पाणिनिः ६।१।३९ ।

† व्येञै वृतावित्यस्य ञ्यां विभक्तौ (६०८) षा न स्यात् । अनुवृत्तावपि ञ्यामित्युपादानं, कितीत्यस्य वा इत्यस्य च निवृत्त्यर्थं । विव्याय इति षा-निषेधे (६५१) यजादित्वात् खेर्जिः, (५७७) वृद्धिः, (३५) ऐ स्थाने आय् । पाणिनिः ६।१।४६ ।

‡ (६६१) ग्रहस्वपाद्योरित्यनेन प्राप्तस्य जेर्विकल्पविधानं । जिं वा कितीति कृते आदौ जि-विधाने पश्चात् वि इत्यस्य द्वित्वे,, यजादित्वात् (६५१) खेर्जि-विधाने उव्यतुरित्यनिष्टरूपं स्यात्, (५३६) जिः पुनर्न स्यादित्यस्य नात्र विषयः द्विर्भूतस्य वेः प्रकृत्यन्तरत्वात् । विव्यतुरिति व्ये व्ये इति द्वित्वे, (६५१) खेर्जिः, अनेन मूलस्य जिः, (५८८) इस्थाने य । विव्ययतुरिति अनेन मूलस्य जेर्विकल्पपक्षे (३५) ए-स्थाने अय् । विव्ययिथ इति (५८९) व्यंञ-वर्जनात्, (५५४) नित्यमिम् सर्व्वत्र (५३६) पुनर्जिविधाननिषेधात् वि इत्यस्य न उ. । "उभयेषां ग्रहणसामर्थ्यात् इत्यादिः शेषं बाधित्वा सम्प्रसारणम्" इति वृत्तिः ।

(१४१) ह्वे ञे स्पर्धायां शब्दे च।

अह्वत्, अह्वत अह्वास्त। *

६६७। ह्वो ह्वेर्जिः। (ह्वः ६।, ह्वे. ६।, जिः १।)।

ह्वेर्ह्वो जिः स्यात्। जुहाव जुहुवतुः। †

(१४२) ए वसौ निवासे।

६६८। स त् स्वरे। (स ।६।, त् ।१।, सि ७।, स्वरे ७।)।

सस्य त स्याद्रे से परे। अवात्सीत् अवात्तां, उवास ऊषतुः। ‡

(१४३) वदे वाचि।

अच्छ-वदति। (५७४) व्रजवदेति त्रिः। अवादीत्। उवाद ऊदतुः। §

---

* अह्वदिति ह्वि-टी-दि, (६१८) ङः, (६१०) आ-लोपः। अह्वत अह्वास्त इति, (६१८) लिब्भ्यस्तु मे वा इत्यनेन वा ङः।

† जेः पुनरुपादानात् ठ्यां, किति, वा, इति त्रयाणां नानुवृत्तिः। ह्वे धातौ यत्र द्वित्वं तत्र खेर्मूलस्य च जिः स्यादित्यर्थः। यथा अजूहवत् जुहूषति इत्यादि। जुहाव इति अनेन उभयत्र जिः, (५७७) वृद्धिः, (३५) औस्थाने आव्। जुहुवतुरिति (५८८) उस्थाने उव्। पाणिनिः ६।१।३३।

‡ अवात्सीत, अनिमत्वात् वृद्धिः, अनेन सस्य त। आवात्तामिति अन्तरङ्गत्वात् निरवकाशत्वाच्च आदौ सस्य तकारे पश्चात् सिलोपः। उवास ऊषतुः (६५१) यमादित्वात् खेर्जिः। (६६१) किति परे मूलस्य जिः। पाणिनिः ७।४।४९।

§ अच्छ-वदति (५८१) समासः, सम्मुखे वदतीत्यर्थः। उवाद ऊदतुः, यजादित्वात् जिः।

(१४४) टु ओ श्वि इर् गति-वृद्ध्योः।

(५६५) श्वासुलिट्द्युदिति ङः वा। अश्वत्।

(६१३) ञिश्रीत्यङ् वा। अशिश्वियत् अश्वयीत्। *

६६६। श्वेर्जि वा यङ्-ठ्योः अङ्सनोः।

(श्वेः ६।, जिः १।, वा ।१।, यङ्ठ्योः ७॥, आङ्सनोः ७॥)।

श्वेर्जि वा स्यात् यङि ठ्यां ञेः परे अङि सनि च।

शुशाव शिश्वाय, शुशुवतुः शिश्वियतुः। श्वयिता। शूयात्। †

इति मिश्रपादः।

इति भ्वाद्यध्यायः।

---

* अश्वत् श्वि टीदि, ङः, (६५२) श्विस्थाने श्व। ङ-विकल्पपक्षे चङ्, द्वित्वादि, (५८८) य्ब्बोरिति इय् अशिश्वियत्। चङ्-विकल्पपक्षे ध्यां सिः, (५५४) इम, गुणः, (३५) एस्थाने अय् अश्वयीत्।

† यङ् च ठी च तौ तयोः। अङ् च सन् च अङ्सनौ, ञेः परौ अङ्सनौ, तयोः। शुशाव इति आदौ जिः पश्चात् द्वित्वादिकं। पक्षे शिश्वाय। एवं अतुसि (५८८) यथा-योग्यं उव् इय्। शूयादिति (६६१) जिः। (५६०) दीर्घः। पाणिनिः ६।१।३०,३१।

⟡

६ष्ठः । १म-चतुर्गणाध्यायः ।

१म पादः—अदादिः ।

(१४५) अद लौ भक्षणे ।

६७० । लुगद्भ्यो ऽपः । (लुक् ।१, अद्भ्यः ५॥, अपः ६।)।

अदादेः परस्यापो लुक् स्यात् । अत्ति । *

६७१ । झभसो हे धिः । (हु-झभसः ५।, हेः ६।, धिः १।) ।

ह्वो र्भसाच्च परस्य हे र्धिः स्यात् । अद्धि । †

६७२ । हसाद्भ्यां दिसे लौंपामौ ।

(हस-अद्भ्यां ५॥, दि-सेः ६।, लौंपामौ १॥) ।

हसात् परयो र्दिसो र्लौंपः स्यात् अदः परयोरम् स्यात् । ‡

आदत् आदः ।

---

* अद्भ्य इति बहुवचनं गणार्थं । घे शप् रे इत्यत्र अदादिवर्जनं न कृत्वा अत्र लुक्-करणं कदाचित् शपः स्थित्यर्थं, तेन अहनदित्यादि । अपिच, (१०६९) अप्-विशिष्ट-धातोर्गुणविकल्पे, अदादिगणीयरुदधातोः रोदितं रुदितमित्यादि सिद्धं । लुक्कर-णात् युतः युवन्तीत्यादौ (९३) लुकि न तत्रेति निषेधात् न गुणः । पाणिनिः २।४।७२ ।

† हु—जुहुधि । अद—अद्धि । रुध—रुन्धि । वश—उड्ढि । चकास—चकाद्धि इत्यादि । (५५६) विशेषविधानात् तातङादेशस्थले न स्यात्, तेन त्वं अत्तं अत्तात् अद्धि वा । पाणिनिः ६।४।१०१ ।

‡ दि-सेरित्येकवचनं क्रमनिरासार्थं । दि-सेरिति व्या एव, व्यानु सि-व्यव-धानादसम्भवः । पाणिनिः ६।१।६८,७।३।१०० ।

६७३ । घस्लृदः सन्ध्यल्घञि ।

(घस्लृ ।१।, अदः ६।, सन्-टौ अल् घञि ७।) ।

अदो घस्लृ स्यात् सनि ध्यामलि घञि च । (५६५) लित्वात् ङः । अघसत् । *

६७४ । ध्यां वा । (ध्यां ७।, वा ।१।) ।

जघास आद । (२३०) हनगमेत्युङ्लोपः । जक्षतुः आदतुः, जघसिथ आदिथ । †

(१८६) प्सा ल भक्षणे ।

प्रणिप्साति । ‡

६७५ । द्विषविदातोऽनुस् वा ।

(द्विष विद-आतः ५।, अन् ।१।, उस् ।१।, वा ।१।) ।

द्विषे वेत्तेरादन्ताच्च परोऽन् उस् स्याद्वा । अप्सुः अप्सान् । §

---

* सन् च टौ च अल् च घञ् चेति तस्मिन् । सनि जिघत्सति । ध्यां अघसत्, (२३०) ङ-वर्जनात् न उङ्-लोपः । अलि घञि च प्रघसः घासः । (पाणिनिः ३।३।६०) न्याद इत्यादौ तु न घसादेशः । पाणिनिः २।४।३७,३८ ।

† अदो घस स्यात् वा ध्यां । जक्षतुः उङ्लोपे (६४) घस्य कः, (१११) शासवसघसेति षत्वं । अद घस इति द्वाभ्यां धातुभ्यां आद जघास इत्यादि सिद्धावपि एतत्सूत्रकरणं घसधातोस्थपि अदतुल्यत्वज्ञापनार्थं, तेन (५८६) अदवर्जनादेव घसवर्जने सिद्धे, घसधातोः जघसिथ इत्यत्र (५८४) नित्यमिम् । पाणिनिः २।४।४० ।

‡ (५४६) गदनदेति णत्वं ।

§ अत्र अन् इति ध्या एव, ध्यान्तु द्विषः सक्व्यवधानात् न प्रसङ्गः, तेन ध्यां अद्विक्षन् । विदाऽतोस्तु सिव्यवधानात् अनेनाप्राप्तौ, (५६३) नित्यमुस् अवेदिषुः, अप्सासिषुः । पाणिनिः ३।४।१०९,११०,११२ ।

(१४७) वश ल कान्तौ। *

वष्टि। (६६१) ग्रहस्वपाद्योरिति जि:। उष्ट: उशन्ति। अवट्। उवाश। †

(१४८) हन लौ हिंसा-गत्यो:।

६७६। वनतनाद्यनिमां अम्लोपो झस्-यप्यतिक्यणौ।

(वन-तनाद्यनिमां ६॥, अम्-लोप: १।, झस्-यपि ७।, अतिकि ७।, अणौ ७।)।

एषां अम्लोप: स्यात्, अणौ झसे यपि च, नतु तिकि।

प्रणिहत:। (१८८) हनो क्ङो घ्न:। घ्नन्ति। प्रहण्व: प्रहन्व:, प्रहण्म: प्रहन्म:। ‡

६७७। जह्येधि-शाधि हन्यस्ति-शास्ति हिना।

(जहि-एधि-शाधि ।१।, हनि अस्ति-शास्ति ।६।, हिना ३।)।

एषां हियुक्तानां क्रमादेते स्यु:। जहि। §

---

* कान्ति: कामना, इच्छेति यावत्।

† वश-तिप्, (१५४,४७) षङ्, तस्य ट:। अवट् इति घौ-दिप् (६७२,१५४,६४)। ठौ-णप् उवाश (६५१) खि-जि:।

‡ तन आदिर्यस्य स तनादि:। नास्ति इम् यस्मात् स:। वनश्च तनादिश्च अनिम् चेति तेषां। अम् झस् च प्रत्याहारौ। यप् इति (११७६) क्त्वा-स्थानजात:। तिक् (१००७) प्रत्यय:। नास्ति णुर्यस्मिन्, स तस्मिन्, अणौ इति झसो विशेषणं। एषा-मिति वनधातोस्तनादेरनिमाञ्च। प्रणि हत इति अनेन म-लोप: ; (५४८) गदाद्यन्तने-र्णत्वं। एवं प्रहण्व इत्यादि म-वान्तहनो वा णत्वं। पाणिनि: ६।४।३७,३८,३९।

§ जहिश्च एधिश्च शाधिश्च तत्। हनिश्च अस्तिश्च शास्तिश्च तस्य। पाणिनि: ६।४।३५,३६,११९।

६७८। हनो वधष्टीक्यलि टीमे तु वा।

(हन: ६।, वध: १।, टीक्यलि ७।, टीमे ७।, तु ।१।, वा ।१।)।

हनो वध: स्यात् क्यां क्यामलि च, टी-मे तु वा। अवधीत्। *

६७९। खे र्हो घो ञ्णिति च।

(खे: ५।, ह: ६।, घ: १।, ञ्णिति ७।, च ।१।)।

खे: परस्य हनो हस्य घ: स्यात्, ञिति णिति च।
जघान, जघ्नतु:। हन्ता। वध्यात्। प्रहणिष्यति। †

(१४९) द्यु लभिसर्पणे।

६८०। रपिद्व्युतो ऽद्वेर्व्रि:।

(र-पित्-हसि ७।, उत: ६।, अद्वे: ६।, व्रि: १।)

अद्वे र्धो रुकारस्य व्रि: स्यात् पिति हसे रे।
द्यौति द्युत: द्युवन्ति। ‡

---

* टी च ढी च अल् चेति तस्मिन्। अल् इति (११३४) प्रत्यय:। क्यादौ हन्ते: प्रयोगं निषिध्य भौवादिक-वधधातु: प्रयुज्यते इति तात्पर्य्यम्। अवधीदिति हनो वधादेशे वधधातोरनीदित्त्वात् (५५४) इम्, सत: (५६१,५६२) ईम, सिलोपश्च। एवं वध्यात्, (अल्) वध:। टीमे तु—आवधिष्ट आहत इत्यादि। (पाणिनि: २।३।८४) परिघ इत्यादौ तु न वधादेश:। पाणिनि: २।४।४२,४३,४४।

† चकारादर्थद्वयं, खे: परस्य हनो हस्य घ: स्यादिति, ञिति णिति च परेऽपि घ: स्यादिति च। खे: परत्वात् जघनिथ जिघांसतीत्यादि। ञिति घातयति, णिति घातक इत्यादि। जघ्नतुरिति (२३०,१८९) उङ्लोपौ घादेशश्च। प्रहणिष्यतीति (६१७) इम्। (५४९) नादिहनमीनेति णत्वं। पाणिनि: ७।३।५४,५५।

‡ रश्चासौ पिच्चासौ हस् चेति तस्मिन्। न द्विरद्विस्तस्य। यथा द्यौति यौति रौति। अद्वे: किं, जुहोति। द्युवन्ति (५८८) उव्। पाणिनि. ७।३।८९।

(१५०) यु ल मिश्रणे अमिश्रणे च ।

यौति । यविता । *

(१५१) णु ल स्तुतौ ।

अनावीत् अनौषीत् । नुनुविव । *

(१५२) क्ष्णु ल तेजने ।

क्ष्णविता ।

(१५३) ष्णु ल प्रस्नुत्यां । *

(५८६) स्नुक्रमोऽमे इति इम् । अस्नावीत् ।

(१५४) इ-न ल गतौ । †

६८१ । यिनोऽच्यणौ । (य ।१।, इन: ६।, अचि ७।, अणौ ७।) ।

इनो यः स्यादणावचि । ‡ यन्ति ।

६८२ । गा ण्यां । (गा ।१।, ण्यां ७।) ।

इनो गा स्यात् ण्यां । अगात् । इयाय । §

---

* यविता, क्ष्णविता इति (५८७) प्रतिप्रसवात् (५५४) इम । अनावीदिति (५७३) वा इम् । अजन्तत्वात् (५७४) ञिः । नुनुविव, (५७३) अथ्या इत्युक्तेः, नेमसुमिति (५८४) नियमात्, नित्यमिम् । गणपाठे ष्णु इति षोपदेशनिर्द्देशः । (५६९) स्वाद्यादीति षस्थाने सः, स्नु इति धातुः ।

† इ-न धातौ नकारः (५५२) भूस्थापिवेत्यादिषु विशेषज्ञापनार्थः ।

‡ (५८८) श्नुभ्वोरिति प्राप्तव्यस्य इयो बाधकः । पाणिनिः ६।४।८१ ।

§ इ-णप्, द्वित्वं, (५७७) मूलस्य वृद्धिः । (५८५) ङि. स्थाने इय । पाणिनिः २।४।४५ ।

६८३ । खेः क्ङिति घः । (खेः ६।, क्ङिति ७।, घः १।) ।

इनः खेः घः स्यात् क्ङिति ञ्यां । ईयतुः । *

६८४ । अगे ञ्यां । (अगेः ६।, ञ्यां ७।) ।

अगेरिनो घः स्यात् क्ङिति ञ्यां । ईयात् । अगेः किं, अन्वियात् । †

(१५५) अधीक ल स्मरणे । ‡

६८५ । इनवदिकः । (इनवत् ।१।, इकः ६।) ।

इन इव इकः कार्य्यं स्यात्, रूपञ्च तद्वत् । §

(१५६) या ल गतौ ।

प्रणियाति । ¶

एवं (१५७) वा ल गमन-हिंसयोः ।

---

* द्विर्भूतस्य इन धातोः ञ्या अन्यत्र क्ङितोऽसम्भवात् वृत्तौ ञ्यामिति व्याख्यातम् । ईयतुरिति, (६८१) यकारे, अनेन दीर्घः । पाणिनिः ७।४।६९ ।

† (५९०) घौऽजय्ये इत्यनेन दीर्घे सिद्धेऽपि, अयं नियमार्थः, तेन ञ्यां क्ङिति अगेरिन एव दीर्घः न तु सगेरिति । पाणिनिः ७।४।२४ ।

‡ इ-कः ककारश्चिह्नार्थः । अधिग्रहणं अन्यपूर्व्वस्य केवलस्य च प्रयोगनिरासार्थं ।

§ इनधातोरिव इकधातोः कार्य्यं स्यात्, रूपञ्च तद्वदित्यनेन सर्व्वत्रैव स्यादिति स्पष्टं, तेन (८०६) गमीनिङोरित्यत्रापि ग्रहणं, अतएव इक-धातोरपि अधिजिगमिषतीति । समीतयो राघवयोरधीयन्निति भट्टौ, आतिदेशिकस्यानित्यत्वेन इनतुल्यत्वाभावात् (६८१) य आदेशं बाधित्वा, (५८८) इय आदेशः । "इणवदिक इति वक्तव्यम्" इति वार्त्तिकम् ।

¶ प्रणियाति (५४९) गदनदेति णत्वं ।

(१५८) द्रा ल स्वप्ने पलायने च ।

(१५९) ख्या ल ख्यातौ कथने ।

अख्यत् । *

(१६०) मा ल च माने ।

प्रणिमाति । मेयात् । *

(१६१) विद ल ज्ञाने ।

६८६ । वेत्तेः कौपं ठीपं वा ।

(वेत्तेः ५।, कौपं १।, ठीपं १।, वा ।१।) ।

विदः परस्य क्याः पस्य ठ्याः पं स्याद्वा ।

वेद विदतुः विदुः, वेत्थ विदथुः विद, वेद विद्व विद्म । पत्ते सुगमं । †

६८७ । ङाम् वा ठ्यां ग्यान्तु क्रनु ।

(ङाम् ।१।, वा ।१।, ठ्यां ७।, ग्यां ७।, तु ।१।, क्र ।१।, अनु ।१।) ।

वेत्तेष्ठ्यां ङाम् वा स्यात्, ग्यान्तु क्रञ एवानुप्रयोगः । ‡

---

* अख्यदिति (६१८) ङः, (६१०) आलोपः । प्रणिमाति (५४९) गदनदेति णत्वं । मेयादिति (६१२) ङे ।

† स्थानिवदादेश इति न्यायात् ठीपस्य कौप-तुल्यत्वात् न द्वित्वं, (६८७) न ङाम्, नवा वेत्थ इत्यादाविम् । केवलं कौपरस्मैपदविभक्तीनामाकारभेद इति । पाणिनिः १।४।८३ ।

‡ ग्यान्तु इत्यनेन गौपरेऽपि ङाम् वा स्यात्, तस्मात् क्रञ एवानुप्रयोगः नतु अस्भुवोरिति । ङइत् अगुणः । पाणिनिः ३।१।४१ ।

६८८। तनभ्यः शुप् रे घे।

(तनभ्यः ५॥, शुप् ।१।, रे ७।, घे ७।)।

विदाङ्करोतु वेत्तु। *

६८९। क्रञो ऽद्गणौ रे।

(क्रञः ६।, अत् ।१।, उ ।१।, अणौ ७।, रे ७।)।

क्रञो ऽकार उः स्यात् अणौ रे। विदाङ्कुरुतां वित्तां। अविदुः अविदन्। †

६९०। घ्यां सौ र वा दधोः।

(घ्यां ७।, सौ ७।, र ।१।, वा ।१।, द-धोः ६॥)।

दधो रेफः स्याद्वा सौ घ्यां। अवेः अवेत्, अवित्तं अवित्त। विदाम्बभूव विवेद। ‡

---

* तनभ्य इति बहुवचनं गणार्थं, तनादिभ्य इत्यर्थः। शुपः शपावितौ उकारस्थितिः, शपो बाधकोयं। विदाङ्करोतु इति क्र-प्रयोगे, क्रञस्तनादित्वात् शुप्, शुपि परे (५४२) क्रञो गुणः, पुनः तुप् परे शुप उकारस्य गुणः। पाणिनिः ३।१।७९।

† नास्ति णुः (णुणी प्रत्ययः) यस्मात् सोऽणुस्तस्मिन्, अणौ इति रे इत्यस्य विशेषणं। अणुणिप्रत्ययपूर्ब्ववर्त्तिनि रे परे इत्यर्थः। विदाङ्कुरुतामिति शुपि परे क्र इत्यस्य गुणे, विदाङ्कर् इति स्थिते, अनेन अकार उकारः। अविदुरिति घ्या अन्, (६७५) द्विष-विदेति उस् वा। पाणिनिः ६।४।११०।

‡ अवेरिति विद-घो-सिप्, (६७२) सिपो लोपः, त्यलोपे त्यलक्षणमिति न्याया-दनेन दस्य रेफः, (१०२) रस्य विसर्गः। विदाम्बभूव (६८७) विकल्पेन ङाम् (५८३) भू-प्रयोगः। एवं विदामास, विदाञ्चकार। पक्षे विवेद। पाणिनिः ८।२।७५।

(१६२) अस ल भुवि ।

६९१ । लोपो ऽस्त्यसो ङिद्रसो रध्यां ।

(लोपः १।, अस्ति-अ-सोः ६॥, ङित्-र-सोः ७॥, अध्यां ७।) ।

अस्तेरकारस्य ङिति रे, सस्य च से, लोपः स्यात्, नतु ध्यां । स्तः सन्ति, असि, एधि, आसीत् आस्तां । *

६९२ । भूररे । (भूः १।, अरे ७।) ।

अस्ते र्भूः स्यादरे । अभूत् । †

६९३ । प्रादुर्गीकः सः षो ऽच्ये ।

(प्रादुर्-गि-इकः ५।, सः ६।, षः १।, अच्-ये ७।) ।

प्रादुःषन्ति, प्रादुःष्यात् । निषन्ति । ‡

---

* अश्च सश्च असौ, अस्तेरसौ अस्त्यसौ तयोः । ङिच्चासौ रश्चेति ङिद्रः ङिद्रश्च सश्च तौ तयोः । स इत्यनकारान्तग्रहणात् सि से स्व इति त्रयाणां ग्रहणं । अरे परे (६९२) भू-आदेशेन अस-स्थित्यसम्भवात्, केवलं ङित्ग्रहणेन सिद्धे, रग्रहणं अरे परे "लावण्य उत्पाद्य इवास यत्नः" इत्यादौ कदाचि-दसधातोर्भू-आदेशनिषेधार्थं । स्तः सन्ति उभयत्र ङिति रे परे अ-लोपः । असि इति से परे स-लोपः । ध्या हि (६७७) एधि । ध्या दिप् (५६१) ईम । पाणिनिः ६।४।१११,७।४।५० ।

† अरविषये असधातुस्थाने भूधातुरादिश्यते, तेन भूधातु-निमित्तं सर्व्वं कार्य्यं स्यादिति । पाणिनिः २।४।५२ ।

‡ गेरिक् गीक्, प्रादुश्च गीक्च तस्मात् । प्रादुर्शब्दात् गेरिकश्च परस्य अस-धातोः सस्य षः स्यात् अचि ये च परे । अचि ये च किं, प्रादुःस्तः इत्यादौ न षत्वं । पाणिनिः ८।३।८७ ।

(१६३) मृजू ल म शुद्धौ ।

६६४ । मृजो ऽकङिति ञि र्वा त्वच्यणौ ।

(मृज: ६।, अकङिति ७।, ञि: १।, वा ।१।, तु ।१।, अचि ७।, अणौ ७।) ।

अकङिति मृजो ञि: स्यात् अणावचि तु वा । मार्ष्टि मृष्ट:, मार्जन्ति मृजन्ति । *

(१६४) वच लौ वाचि । †

(६५२) वच्यस्खिपतामिति वोच । अवोचत् । उवाच ऊचतु: । ‡

(१६५) रुदिर् ल घ रोदने ।

६६५ । रुद्भ्यो ऽयो हसस्येम् ।

(रुद्भ्य: ५।।।, अय: ६।, हस् रस्य ६।, इम् ।१।) ।

रुदादे: परस्य अयस्य हसस्य रस्य इम् स्यात् । §
रोदिति रुदित: । अय: किं, रुद्यात् ।

---

* क-ङौ इतौ यस्य स कङित्, न कङित् अकङित् तस्मिन् । मृज इति अदादीय-चुरादीययो र्द्वयो र्ग्रहणं । मृजो णौ ञिरित्युक्ते णिङौ अकङितीति कथनं मिमार्जतीत्यत्र अनिमि सनि (८०४) अगुणेऽपि वृद्धिप्राप्त्यर्थं । मार्ष्टि अनेन वृद्धि:, (१५४) षड् । पाणिनि: ७।२।११४ । वार्त्तिकञ्च ।

† एतस्मात् धातो: अन्ति-अन्तु-प्रयोगो नास्ति ।

‡ अवोचदिति (६१८) ङ: । उवाच (६५१) ञि: । ऊचतु: (६५१,६६१) ञि: ।

§ रुद्भ्य इति रुदादिगणेभ्य इत्यर्थ:, गणस्तु (५६१) सूत्रे उक्त: । हस् चासौ रश्चेति हसरस्तस्य । रविषये अप्राप्तौ विधिरयं, तेन रोदिष्यतीत्यादौ (५५४) इम् स्यादेव । पाणिनि: ७।२।७६ ।

९९६ । दिस्योरम् वा । (दि-स्योः ६॥, अम् ।१।, वा ।१।) ।

रुदादेः परयो र्दिस्योरम् स्याद्वा । अरोदत् अरोदीत्, अरोदः अरोदीः । *

(१६६) ञि ष्वपौ ष लु स्वप्ने ।

विस्वपिति, (६२५) सवत्वान्न षः । विसुष्वाप, दुःषुषुपतुः, (६२५) निर्व्वत्वात् षः । †

(१६७) अन ष लु प्राणने ।

प्राणिति प्रानिति । ‡

(१६८) श्वस ष लु प्राणने ।

श्वसिति । अश्वसीत् (५७६) षणादित्वान्न वृः ।

(१६९) जक्ष क्ष लु ष भक्ष-हासयोः ।

जक्षिति ।

९९७ । अन्तोऽद्ढः । (अन्तः ६।, अत् ।१।, ढेः ५।) ।

---

* दिस्योरिति ध्या एव, थ्यान्तु क्षि-व्यवधानादसम्भवः । अमो म इत् आदौ । अरोददिति अम्, पक्षे (५६१) ईम् अरोदीत् । एवं ध्याः सिपि । थ्यान्तु, (५६५) वा ङे अरुदत् अरोदीदिति । पाणिनिः ७।३।९९ ।

† विसुष्वाप इत्यत्र (५७२) दधस्यादेरिति नियमात्, अत्र खे न षत्वं, खिनिमित्तकं मूलस्य षत्वं (१११) क्विलादित्यनेन स्यादेव । दुःषुषुपतुरित्यत्र बलवत्त्वादादौ (६६१) णौ कृते, षत्वे च कृते, पश्चात् द्वित्वमिति ।

‡ प्राणितीति (५४९) अमनिसेति वा णत्वं ।

ह्वेः परस्यान्तोऽत् स्यात्। जह्वति।*

(५६३) अनुस्सिद्ह्वेरिति। अजह्वुः।

(१७०) जागृ च लु जागरणे।

६९८। णुरुस्व्यां।

(णुः ।१, उसि ७।, अव्यां ७।)।

ह्वेरुसि परे णुः स्यात्, न तु व्यां। अजागरुः, अजागः। अजागरीत्। जागरामास जजागार।†

६९९। जाग्रो ऽणब्वीण्ङिति कसुकाने तु वा।

(जाग्रः ६।, अ-णप्-वि-इण्-ङिति ७।, कसु-काने ७।, तु ।१।, वा ।१।)।

जागर्त्तेर्णुः स्यात्, न तु णपि वौ इणि ङिति च, कसौ काने तु वा। जजागरतुः।‡

---

* अन्त् इति हसन्तनिर्देशात् अन्ति अन्तु अन्तामित्यादीनां ग्रहणं। ह्वेरिति (१७४) सूत्रे कथितात्। जह्व-अन्ति जह्वति, एवं ददति। चिकीर्षन्तीत्यादौ, (५४३) अपो लोपे स्थानिवत्त्वान्न अन्तोऽत्। पाणिनिः ७।१।४।

† अजागरुरिति जागृ-द्या अन्, (५६३) अन उस्, अनेन गुणः। व्यान्तु जुहुवुः। अजागः—द्याः सिप्, (५४२) गुणः, (६७२) सिपो लोपः, र विसर्गः। अजागरीत् (५७४) न वृद्धिः। जागरामास (६०७) वा आम्। पाणिनिः ७।३।८३।

‡ जाग्र इति सूत्रत्वात् न ङः (१४१)। णप् च विश्च इण्च ङिच्चेति तत्, पश्चात् नञ्योगे तस्मिन्। णप्प्रभृतिषु गुणनिषेधात् अन्यत्र सर्व्वत्रैव गुणः स्यादित्यर्थः। ञौ जागरयति, घञि जागरः, यकि जागर्य्यते, यपि प्रजागर्य्य, ढी-यात् जागर्य्यादित्यादि। णबादौ तु जजागार, जागृविः (११३१), अजागारि, जागृतः जाग्रतीत्यादि। कसुकाने (घि) जजागर्व्वान् जजागृवान्, (ढे) जजागराणः जजाग्राणः। पाणिनिः ७।३।८५।

(१७१) दरिद्रा च लु दुर्गत्यां ।

७०० । दरिद्रो ङिः हसे ऽणौ हागभ्योस्तु वा ।

(दरिद्रः ६।, ङिः १।, हस्-रे ७, अणौ ७, हाकभ्योः ६॥, तु ।१।, वा ।१।) ।

दरिद्रातेः ङिः स्यात् अणौ हसे रे परे, हागभ्योस्तु वा । दरिद्रितः ।*

७०१ । आद्वयोरा लोप्यो ऽणौ हसे त्वदः ।

(आ-द्व्योः ६॥, आ ।१।, लोप्यः १।, अणौ ७।, हसे ७।, तु ।१।, ई ।१।, अदः ६।)।

आ इत्यस्य द्विस्य आ लोप्यः स्यात्, अणौ हसे तु दावर्ज-मी स्यात् । दरिद्रति । †

७०२ । दरिद्र आलोपोऽसनकानेऽरे ह्यान्तु वा ।

(दरिद्रः ६।, आलोपः १।, अ-सन्-अक-अने ७।, अरे ७।, ह्यां ७।, तु ।१।, वा ।१।)।

दरिद्र आलोपः स्यादरे, नतु सनि अके अने च, ह्यान्तु वा । अदरिद्रीत् अदरिद्रासीत् । दरिद्रामास ददरिद्र । दरिद्र्यात् ।‡

---

* हाक् च भीश्च तयोः । ङ इत् (१७) अन्त्यस्य आकारस्य स्थाने । पाणिनिः ६।४।११४,११५,११६ ।

† आश्च द्विश्च तौ तयोः । अत्र अणौ रे इति वक्तव्यं, तेन व्याधातो यङि चाख्या-यते इत्यादौ न प्रसङ्गः । अणौ हसे तु क्रीणीते जहीते इत्यादि । दा-धा-धात्वोस्तु दत्ते, धत्ते । दरिद्रति (६९७) अन्त् अत्, अनेन आलोपः । पाणिनिः ६।४।११२,११३ ।

‡ सन् च अकश्च अनश्च तत्, न तत् असनकानं तस्मिन् । यथा दिदरिद्रासति, दरिद्रायकः, दरिद्राणं । णपि दरिद्रामास (६०७) वा आम्, पक्षे अन्तरङ्गत्वादादौ आ-लोपे ददरिद्र, पाणिन्यादयस्तु डौ आदेशं बलवन्तं मत्वा ददरिद्रौ इत्युदाहरन्ति । "यत्तु णलि ददरिद्रेति तन्निर्मूलमेव" इति सिद्धान्तकौमुदी । वार्त्तिकद्वयम् ।

(१७२) चकास्ट च लु दीप्तौ।

(६७१) हुझसो हेर्धिः। चकाधि। (६४) झप्झसोरिति सस्य दः। चकाद्धि। *

७०३। घ्यां दौ त सः। (घ्यां ७।, दौ ७।, त ।१।, सः ६।)।

घ्यां दौ परे सस्य त स्यात्। अचकात्। †

७०४। सौ वा। (सौ ७।, वा ।१।)।

अचकात् अचकाः। ‡

(१७३) शास च लु शासने।

७०५। शासुङिङ्हसङेऽणौ क्वौ त्वाशासश्च।

(शास-उङ् ।१।, इत् ।१।, हस्-ङे ७।, अणौ ७।, क्वौ ७।, तु ।१।, आशास ६।, च ।१।)।

शास्ते रुङ इत् स्यात् अणौ हसे ङे च, क्वौ तु आशासश्च। शिष्टः। शाधि। अशिषत्। §

---

* चकाधि (५५६) सलोपः, पक्षे चकाद्धि।

† विभाषाद्वयमध्यवर्त्तित्वान्नित्यं। अचकात् (६७२) दिपो लोपः। अनेन सस्य त्। पाणिनिः ८।२।७३। तन्मते सस्य दः।

‡ सस्य त स्याद्वा घ्यां सौ परे। अचकात् अचकाः (६७२) सिपो लोपः। पाणिनिः ८।२।७४।

§ शास उङ् शासुङ् तत्। हस् च ङश्च तस्मिन्। अणौ इति सुतरां हसो विशेषणं। शास इति शास च लु शासने इत्यस्यैव। क्वौ तु आशासश्च इति आपूर्व्वक-शास ङ ल आशिषि इत्यस्य क्विपि एव, अणौ हसे तु आशास्ते इत्यादौ आत्मनेपदीयस्य इत् न स्यात्। क्विपि यथा, मित्रं शास्तीति मित्रशीः, आशास्ते इति आशीः (१०३३)। शिष्ट इति आकारस्य इः, (१११) शासवसेति षत्वं। शाधि (६७७)। ध्या दि, (५६५) अशिषत्। पाणिनिः ६।४।३४। वार्त्तिकानि च।

(१७४) चक्ष ङ ल वदे।

चष्टे। *

७०६। चक्षः क्साञ् ख्याञ् ऽरेऽत्यागोसमने।

(चक्षः ६।, क्साञ्-ख्याञ् ।१।, अरे ७।, अत्यागोसमने ७।)।

चक्षः क्साञ् ख्याञ् स्यादरे, नतु वर्जने उसि असि अने च। अक्सासीत् अक्सास्त, अख्यत् अख्यत। त्यागे तु समचक्षिष्ट। †

७०७। ठ्रां वा। (ठ्रां ७।, वा ।१।)।

चक्सौ चक्से, चख्यौ चख्ये, चचक्षे। ‡

(१७५) ईड़ ङ ल स्तुतौ।

ईट्टे। §

७०८। सध्वो रस्येम् जनीड़ीशः। (स-ध्वः ६।, रस्य ६।, इम् ।१।, जन-ईड़-ईशः ५।)।

---

* वदः कथनं। चष्टे इति चक्ष् ते (२१३) क-लोपः।

† क्साञ् च ख्याञ् च तत्। न रोऽरस्तस्मिन्। त्यागश्च उसश्च असश्च अनश्च तत्, तत्प्रयोगे तस्मिन्। क्साञ् ख्याञ् इत्युभयो ञानुबन्धादुभयपदं, अरे इति विषय-सप्तमी, तेन विभक्त्युत्पत्तेः पूर्व्वं एतौ स्यातामिति। वर्जनेऽर्थे उसादौ प्रत्यये च न स्यात्। क्साञ् इति तालव्यमध्य इति पाणिनि-क्रमदीश्वरौ। मतान्तरानुरोधात् ओपदेवेन दन्त्यमध्यः कथितः। दन्त्यपदादेशविधानसामर्थ्यात् षत्वं न स्यादिति। अक्सासीदिति (५६८) इमसनौ। अक्सास्त (५८७) एकाजादन्तत्वान्नेम। अख्यत् अख्यत इति (६१८) ङः, (६१०) आलोपः। समचक्षिष्ट त्यक्तवानित्यर्थः। उसादौ तु नृचक्षुः, नृचक्षाः, विचक्षणः। पाणिनिः २।४।५४। वार्त्तिकानि च।

‡ चक्षः क्साञ् ख्याञ् च स्याद्वा ठ्रां। विषयसप्तमीयं, तेन आदावादेशे ञानु-बन्धादुभयपदं। पाणिनिः २।४।५५।

§ ईड़ ते, (४७) तस्य टः, (६४) ड़स्य टः।

एभ्य: परस्य सस्य ध्वस्य च रस्य इम् स्यात् । ईड़िषे ईड़िध्वे । *

(१७६) आस ङ ल उपवेशने ।

आस्ते । (५८२) व्विंजादीत्याम् आसाञ्चक्रे ।

(१७७) वस ङ ल आच्छादने ।

वसिता वस्ता । †

(१७८) निसि ङ ल चुम्बने ।

प्रणिंस्ते प्रनिंस्ते । ‡

(१७९) सू ङ ल प्रसवे ।

सूते ।

७०९ । सूते र्न गु ग्यां । (सूते: ६।, न ।१।, गु: १।, ग्यां ७।) ।

सुवे । § (५७३) वेमूदितीम् वा । असविष्ट असोष्ट ।

(१८०) शी ङ ल शयने ।

७१० । शीङो रे गु: । (शीङ: ६।, रे ७।, गु: १।) ।

---

* जन इति १९९संख्यकस्य जुहोत्यादेरेव, न तु २३४संख्यकस्य दैवादिकस्य, तस्य श्यना व्यवधानात् । अप्राप्तौ विधिरयं न तु नियम:, तेन जनिता ईड़िता इत्यादौ (५५४) वर्मोऽरस्थतीम स्यादेव । ईड़िषे ईड़िध्वे इति क्या: से ध्वे अनेन इम् । एवं ईशङ ऐश्वर्य्ये, ईष्टे इत्यादि । पाणिनि. ७।२।७७,७८ । तन्मते ध्या: ध्वमि ऐड़िध्वम् ऐड़्ध्वम् इत्युभयम् । इति सिद्धान्तकौमुदी ।

† वसिता वस्ता इति (६०६) वा इम् ।

‡ प्रणिंस्ते प्रनिंस्ते इति (५४९) अन निंस निन्देति वा णत्वं ।

§ सूङ ल धातो र्गु र्न स्यात् ग्यां । सुवे सू-ऐप् अनेन अगुणत्वे (५८८) उव् । पाणिनि: ७।३।८८ ।

शेते शयाते। *

७११। मान्तो रम् विदस्तु वा।

(मान्तः ६।, रम् ।१।, विदः ५।, तु ।१।, वा ।१।)।

शीङः परस्य मस्यान्तो रम् स्यात्, वेत्तेस्तु वा। शेरते। अशयिष्ट। †

(१८१) अधी ङ् ल अध्ययने। ‡

अधीते।

७१२। गीङः टीप्यो र्वा।

(गी ।१।, इङः ६।, टी-प्योः ७॥, वा ।१।)।

इङो गी स्यात् वा टी-प्योः परयोः। घंत्वान्न णः। अध्यगीष्ट अध्यैष्ट। §

७१३। ठ्यां गा आङ्सनोस्तु वा।

(ठ्यां ७।, गा ।१।, आङ्-सनोः ७॥, तु ।१।, वा ।१।)।

---

* शीङो णः स्यात् रे परे, गुणनिमित्ते अगुणनिमित्ते चेत्यर्थः। पाणिनिः ७।४।२१।

† मस्यान्त् मान्त तस्य। विद इति शीङ-साहचर्य्यात् अदादिपठितस्यैव ग्रहणं। शेरते इति शी-अन्ते, अनेन अन्तस्थाने रम्, मित्त्वादादौ, एकदेशविकृतमनन्यवत् भवतीति न्यायात् पूर्व्वेण गुणः। विदस्तु संविद्रते संविदते, (८७५) आत्मनेपदं। अशयिष्ट शी-टी-तन् (५८७) सूत्रस्य प्रतिप्रसवात् (५५४) इम्। पाणिनिः ७।१।६,७।

‡ गणपाठे अधिपूर्व्वकस्य इङ-धातो र्निर्द्देशात् अधिपूर्व्वकस्यैव प्रयोगः न तु केवलस्य। आते अधीयाते (५८८) इय।

§ घंत्वान्न णः, गी इति दीर्घनिर्देशान्न गुण इत्यर्थः। अध्यगीष्ट, अधि-इ-टी-तन्, गी-आदेशः, एकाजिवर्णान्तत्वात् न इम्। गी-आदेशस्य विकल्पपक्षे (५८१) पुनरमागमे अध्यैष्ट। पाणिनिः २।४।५०।

इङो गा स्यात् ण्यां, ञेः परे अङि सनि च वा । अधिजगे । अध्यगीष्यत अध्यैष्यत । *

(१८२) दीधी ङ च लु देवने दीप्तौ ।

७१४ । दीधीवेव्यो न गुः । (दीधी-वेव्यः ६।,न ।१।,गुः १।) ।

दीध्ये । †

७१५ । लोप्यो ऽन्तो य्योः । (लोप्यः १।,अन्तः १।,य्योः ७॥)।

दीधी-वेव्यो-रन्तो लोप्यः स्यात् यकारेवर्णयोः । अदीधिष्ट । ‡

(१८३) एवं वेवी ङ च लु ई-ल-वत् ।

(१८४) द्विषी ञ ल वैरे ।

(६७५) द्विषविदातो ऽनुस् वा । अद्विषुः अद्विषन् । अद्विष्ट । अद्विक्षत् । §

---

* अङ् च सन् च अङ्सनौ, ञेः अङ्-सनौ ञ्यङ्-सनौ तयोः । अधिजगे अधि इ-ण्या ए, गा-आदेशे द्वित्वादौ, (६१०) आलोपः । यौ-स्यत, (७१२) गौ-आदेशे अध्यगीष्यत, विकल्पपक्षे अध्यैष्यत । ञ्यङ्-सनोस्तु अध्यजीगपत् अध्यापिपत् अधिजिगापयिषति अध्यापिपयिषति । पाणिनिः २।४।४६,५१ ।

† दीधी च वेवी च समाहारे तस्य, द्विवचनान्तत्वे परसूत्रे अनुवर्त्तमानयो र्यथासङ्ख्यत्वप्रसङ्गः स्यात् । एतयो र्गु र्न स्यात् सर्व्वत्र । गौ-ऐप् (५८८) दीध्ये, एवं दीध्यनीयमित्यादि । पाणिनिः १।१।६ ।

‡ य च इश्च तौ यौ तयोः य्योः । ण्या-स्तनि सेटिम्, अनेन ईलोप अदीधिष्ट । पाणिनिः ७।४।५३ ।

§ अद्विषुरिति ण्या अन्, उस्विकल्पपक्षे अद्विषन् । अद्विष्ट ण्या-स्त । अद्विक्षदिति द्या दि, (६०५) सक्, (६०२,१११) ।

(१८५) दुहौ ञ ल दोहने।

अधुक्षत्, अधुक्षत अदुग्ध। *

(१८६) एवं दिहौ ञ ल लेपने।

प्रणिदेग्धि। † अधिक्षत्।

(१८७) ऊर्णु ञ ल आच्छादने।

७१६। वोर्णोः पिड्हसे णुः।

(वा।१, ऊर्णोः ६।, पित्-हस् रे ७।, णु' १।)।

ऊर्णो र्णुः स्याद्वा पिति हसे रे। ‡ ऊर्णोति, ऊर्णौति।
(६८०) रपिड्स्युत इति वृिः।

७१७। घ्यां। (घ्यां ७।)।

ऊर्णो र्णुः स्यात् पिति हसे घ्यां। और्णोत्। §

७१८। णुवत्रि ष्यां। (णु-उव् त्रिः १।, ष्यां ७।)

---

* अधुक्षत् दुह-टौ दि, (६०५) सक्, (१७५) हस्य ढः, (१७७) दस्य धः, (६०२, १११) ढस्य कः, षत्वञ्च। टाखन् अधुक्षत अदुग्ध (६५७) गुहदुहेति न क्षिः सक् वा।

† प्रणिदेग्धि (५४९) गदाद्यन्त-नेर्णत्वं।

‡ पित्त्वाभावे हसत्वाभावे रश्चेति तस्मिन्। (६८०) रपिड्स्युत इति प्राप्तवृद्धेर्विशेषोऽयं, विकल्पपक्षे वृद्धिरेव। पाणिनिः ७।३।९०।

§ नित्यार्थं पृथक् विधानं। पाणिनि. ७।३।९१।

ऊर्णोः णुः उव् त्रिः एते स्यु-र्ध्यां । और्णवीत् और्णुवीत् और्णावीत् । *

७१९ । नाजन्तादेरादि द्विः ।

(न ।१।, अजन्तादेः ६।, आदिः १।, द्विः १।) ।

अन्तादिस्थिताचो धो-रादि द्विर्न स्यात् । †

७२० । स्यादौ नवद्राऽये ।

(स्यादौ ७।, न-व-द रः १।।।, अये ७।) ।

स्यादौ स्थिता न व द रा द्वि र्न स्यु र्न तु ये । ऊर्णुनाव । ‡

७२१ । ङिदिम् वोर्णोः ।

(ङित् ।१।, इम ।१।, वा ।१।, ऊर्णोः ५।) ।

ऊर्णोः पर इम् ङित् स्याद्वा । ऊर्णुविता ऊर्णविता । §

---

* णुश्च उवच्च त्रिश्च, समाहारे पुंस्त्वं क्लीवात् । गुणे और्णवीत्, उवि और्णुवीत, वृद्धौ और्णावीत् । पाणिनिः १।२।३,७।२।६ ।

† अन्तश्च आदिश्च तौ अन्तादी, अचौ अन्तादी यस्य स तस्य । यस्य धातोरादौ अन्ते च स्वरवर्णः, तस्य आदिवर्णं हित्वा द्वित्वं स्यादित्यर्थः । पाणिनिः ६।१।२ ।

‡ स्यः संयोगस्तस्यादिस्तस्मिन् । न च व च द च र च ते । अये इति परस्थित-यकारेण संयुक्ताः पूर्ववर्त्तिनो न व द राः द्विः स्युरेवेत्यर्थः । अत्रापि अजन्तादेर्धो-रित्यनुवर्त्तते, अन्यथा दुद्राव दद्रौ इत्यादौ दकारस्य द्वित्वनिषेधापत्तिः । ऊर्णुनाव इति ऊर्णुधातोः, सूत्रद्वयेन ऊकारं रकारञ्च हित्वा, नु इत्यस्य द्वित्वं । पाणिनिः ६।१।३ । वार्त्तिकद्वयञ्च ।

§ ऊर्णुविता इति अनेन इमो ङित्त्वे (५८८) उव् । पक्षे गुणः । पाणिनिः १।२।३ ।

(१८८) ष्टु ञ ल स्तुतौ ।

७२२। पिद्धस्वस्येम् ब्रुवो यङ्लुग्रुतुस्तोस्तु वा।

(पित्-हस्-रस्य ६।, ईम ।१।, ब्रुवः ५।, यङ्लुक्-रु-तु-स्तोः ५।, तु ।१।, वा ।१।)।

ब्रुवः परस्य पितो हसो रस्य ईम् स्यात् यङ्लुगादेस्तु वा ।
स्तवीति स्तौति, अभिष्टौति । न्यष्टावीत् न्यस्तावीत् । अस्तोष्ट।
तुष्टुव । स्तविता स्तोता । *

(१८९) टु क्षु ल क्षुते ।

क्षविता । †

(१९०) रु ल ध्वनौ ।

रवीति रौति ।　रविता रोता । †

(१९१) तु ल वृत्ति-हिंसा-पूर्त्तिषु ।

तवीति तौति ।　तविता तोता । †

---

* पिश्चासौ हस्चासौ रश्चेति पिद्धस्रस्य। यङ् लुक् यस्मात् स यङ्लुक्, सच रुश्च तुश्च स्तुश्चेति तस्मात्। स्तवीति स्तु-तिप्, शप्, तस्य लुक्, अनेन ईम्, उकारस्य गुणः, आ-स्थाने अव्। पक्षे (६८०) वृद्धिः स्तौति। अभिष्टौति (५७२) षत्वं। न्यष्टावीदिति (६२३) इम्, अजन्तत्वात् (५७४) वृद्धि, (६२३) निविपरीति वा षत्वं। अस्तोष्ट इति आत्मनेपदे (६२१) न इम्, आदौ गुणे, ऊस्वपरत्वाभावात् न (५६२) सिलोपः। तुष्टुव इति थ्वा व, (५८४) नेमसुमिति न इम्। स्तविता स्तोता (६०६) वा इम। पाणिनिः ७।१।९३,९४,९५। एतन्मते पुनः सार्व्वधातुकग्रहणात् अपित्स्वपि वा भवति। तेन रवीतः रुतः इत्यादि।

† क्षविता इति (५८७) प्रतिप्रसवात् (५५४) इम। रविता रोता (५७२) रुदुसुनो-ष्ठ्याः इति वा इम्। तविता तोता इति (६०६) वा इम्।

(१८२) ब्रू ञ ल उक्तौ।

ब्रवीति।

७२३। पञ्च तिप् पञ्च णबवाहश्च।

(पञ्च ।१।॥, तिप् ।१।॥, पञ्च ।१।॥, णप् ।१।॥, वा ।१।, आह: १।, च ।१।)।

ब्रुव: परेषां पञ्चानां तिबादीनां पञ्च णबादयो वा स्यु:, ब्रुव आह: स्यात्। आह आहतु: आहु:। *

७२४। हस्त थि। (ह: ६।, त ।१।, थि ७।)।

आहो हस्य त: स्यात् थे परे। आत्थ आहथु:। पक्षे सुगमं। †

७२५। वचोऽरे। (वच: १।, अरे ७।)।

ब्रुवो वच: स्यादरे। अवोचत्। उवाच, ऊचे। ‡

---

* तिप्, णप् च एतयो र्बहुवचनान्तत्वं गणार्थं, तिबादय: पञ्च, णबादय: पञ्च इत्यर्थ:। आहादेशो णबाद्यादेशपक्षे एव। तिबादि-स्थाने णबादिकरणात् न द्वित्वं, न इम, नापि अतीतकालप्रतीति:। (कविभिस्तु "किमिच्छसीति स्फुटमाह वासव:" इत्यादौ वामनमतेन आहादिकं भूते प्रयुज्यते।) तिपो णप्, तसोऽतुस्, अन्ते: उस्, सिपस्थप्, थसोऽथुस् इति क्रम:। आह इति ब्रू-तिप्, णप् आहश्च आदेशौ, एवं आहतुरित्यादि। पाणिनि: ३।४।८४।

† आह इत्यस्य विभक्तिव्यत्ययेन अनुवृत्ति:। आत्थ इति सिप: स्थाने थप्, आह आदेश:, अनेन हस्य त। (७२२) पिद्धसस्येमित्यत्र ब्रुव: स्वरूपग्रहणात् अत्र न ईम्। पाणिनि: ८।२।३५।

‡ विभक्तिव्यत्ययेन ब्रू इत्यस्यानुवृत्ति:। अरे इति विषयसप्तमी, तेन वाच्यं इत्यत्र ब्रूधातो: वच्-आदेशं सम्भाव्य (९७१) हसन्तत्वात् घ्यण्। एवं ड्यां (६१८) वक्ष्यस्व्येति ङप्रत्ययो भविष्यतीति सम्भाव्य ङप्रत्ययात् पूर्व्वमेव वचादेश:। एवं सर्व्वत्र अरसम्भावनायामेव वचादेश:। तत: सर्व्वत्र ब्रूञो ञानुबन्धात् उभयपदं, तेन अवोचत अवोचत इत्यादि, (६१८) ङप्रत्यये, (६५२) वोचादेश:। उवाच इति णप्, (६५१) खेर्ञि:। ऊचे इति (६५१) खि:, (६६१) मूलस्यापि ञि:। पाणिनि: ३।४।५३।

(१८३) हु लि होमे।

७२६। ह्वादौ रे द्विः। (ह्वादिः ११, रे ७।, द्विः ११)।

ह्वादि द्विः स्यात् रे परे। जुहोति। *

७२७। ह्वो वच्यणौ। (ह्वः६।, व् ।१।, अचि ७।, अणौ ७।)।

ह्वोरुकारस्य व् स्यात् अणावचि रे। जुह्वति। जुहुधि। †

७२८। पश्राम् वा भी-ह्री-भृ-हो ञ्यां।

(पश्राम् ।१।, वा ।१।, भी-ह्री-भृ-ह्वो: ५।, ञ्यां ७।)।

एभ्यः पश्राम् वा स्यात् ञ्यां। जुहवामास जुहाव। ‡

---

* हुः (धातुः) आदिर्यस्य स ह्वादिः। गणपाठे लि-इतां धातूनां अदादित्वं ह्वादित्वञ्च। जुहोति हु-तिप्, (५४१) शप्, (६७०) तस्य लुक्, द्वित्वं, (५५६) खे हस्य जः, (५४२) मूलस्य गुणः। (६८०) रपिद्वस्युत इत्यत्र द्वित्ववर्जनात् न वृद्धिः। पाणिनिः २।४।७५,६।१।१०।

† ह्वोरु हुः तस्य ह्वः। (५८८) भ्रुर्ध्वोरिति उवप्राप्तेर्बाधकोऽयं। जुह्वति, अन्ति (६६७) अन्तीऽत्, अनेन व्। अणौ किं, जुहवानि। रे किं, जुहवतुः। जुहुधि (६७१) हे धिः। पाणिनिः ६।४।८७।

‡ पश्रामः पित्वात् गुणः, शित्वात् रसंज्ञायां (७२६) द्वित्वं, आम-स्थिति.। जुहवामास इति हु-णप्, पश्राम्, द्वित्वादि, (५८३) असप्रयोगः। एवं भू कृ प्रयोगेऽपि। आमो विकल्पपक्षे जुहाव। पाणिनिः ३।१।३९।

(१९४) ञि भी लि भीत्यां।

बिभेति। (७००) दरिद्रो ङिरिति, बिभितः बिभीतः, बिभ्यति।
बिभयामास बिभाय। *

(१९५) ह्री लि लज्जायां।

जिह्रयामास जिह्राय। *

(१९६) पृ लि पालने।

७२९। पृभ्रादे ङिः खे रे।

(पृ ऋ-भृ-आदेः ६।, ङिः १।, खेः ६।, रे ७।)।

पृ-ऋ-भृ-माङ्-हाङां खे ङिः स्यात् रे। पिपर्त्ति। †

७३०। पुर्वौ वा। (पुः ६।, र्वः १।, वा।१।)।

पिपूर्त्तः पिपृतः; पपरतुः पप्रतुः, (५७९) गुणत्त्वान्न एः। ‡

---

* बिभेति भी तिप्, द्वित्वादिकं। तस् बिभितः, ङौ कृते ङित्त्वादन्त्यस्य ईकारस्य स्थाने इः, पक्षे बिभीतः। अन्ति बिभ्यति (६९७) अन्त अत्, (५८८) ईस्थाने य। णप् बिभयामास, पक्षाम् असप्रयोगश्च, पक्षे बिभाय। एवं ह्री-णप् जिह्रयामास जिह्राय।

† पृ लि पूर्त्तौ इति पाठस्तु कविकल्पद्रुमविरोधित्वात् न गृहीतः। पृश्च ऋश्च भादिश्च तत्तस्य। भादिस्तु २०५-२०७ संख्यक भृ-प्रभृति ह्वादिगणसमाप्तिपर्य्यन्तः इत्यतः आह भृ माङ् हाङामिति। यथा—पिपर्त्ति इयर्त्ति बिभर्त्ति मिमीते जिहीते इति। रे किं, पपार बभार इत्यादि। पिपर्त्तीति द्वित्वे खेः स्थाने ङिः, ङ इत् खेरन्त्यस्य स्थाने इः। पाणिनिः ७।४।७६,७७।

‡ पृधातो र्दीर्घः स्याद्वा। अनिष्टत्वात् खेः रे इति च नानुवर्त्तते। ञि पॄ लि तु पालने इति दीर्घान्त पॄ धातौ स्थितेऽपि एतत्सूत्रकरणं ह्रस्वान्तस्यापि दीर्घान्तवत् पदसाधनार्थं। पिपूर्त्त इति दीर्घे कृते (६२८) उर्, (२२८) दीर्घः। अतुस् पपरतुरिति दीर्घपक्षे(६२६) गुणः। (५७९) गुणवत्त्वात् न द्विलोपः अकारस्थाने एश्च। पाणिनौ दीर्घान्तग्रहणात् नास्य सूत्रस्यावसरः। "ह्रस्वान्तोऽयमिति केचित्" इति तु सिद्धान्तकौमुदी।

(१९७) ओ हा-क लि त्यागे।

जहाति, जहितः जहीतः, जहति। *

७३१। हाकोऽन्तलोपः ख्यां।

(हाकः ६।, अन्तलोपः १।, ख्यां ७।)।

जह्यात्। †

७३२। हौ ङा वा। (हौ ७।, ङा।१।, वा।१।)।

हाको ङा स्यात् वा हौ। जहाहि जहिहि जहीहि। हेयात्। ‡

(१९८) ऋ लिं गत्यां।

इयर्त्ति। §

(१९९) जन म लि ङ जनी।

जज्ञिषे, जज्ञिध्वे। ¶

---

* जहितः हा-तस् (७००) दरिद्रीङिरिति वा ङिः, पक्षे (७०१) आद्यीरिति ई। अन्ति जहति, आद्यीरिति आ-लोपः, (६९७) अन्त अत्।

† हाक-धातोरालोपः स्यात् ख्यां। हाको ह् ख्यामिति कृते सिद्धावपि, आदौ द्वित्वं पश्चादन्तलोप इति ज्ञापनार्थं अन्तलोपः इति कथितं, तेन जह्यादिति आदौ द्वित्वे पश्चात मूलस्य आलोपः, अन्यथा (५३७) प्रागच्कार्य्यादचि द्विरिति नियमेन ह्मे परे पश्चात् द्वित्वे खेरदन्तत्वव्याघातः स्यात्। एवं जहित इत्यादौ आदावेव द्वित्वं। पाणिनिः ६।४।११८।

‡ जहाहि इत्यादि आदौ द्विः पश्चात् ङा, ङिः, ईश्च। ख्या-यात् हेयात् (६१२) ङे। पाणिनिः ६।४।११७।

§ इयर्त्ति, (७२९) पृभादेरिति खे ङिः, (५८५) इयः, मूलधातो गुणः। एवं इयृतः इयृति। ख्या दिप् तां अन्, ऐयः ऐयृतां ऐयरु इत्यादि।

¶ जज्ञिषे जन क्याः से, (७०८) इम्, (२३०) उङ्लोपः, (४६) नस्य ञ। ध्वे जज्ञिध्वे।

(२००) निजिरौ ञ लि पोषणे शोधने च।

७३३। निजां खे रे णुः। (निजां ६॥, खे ७।, रे ७।, णुः १।)।

निज-विज-विषां खे णुः स्यात् रे। नेनेक्ति नेनिक्तः। *

७३४। न ह्युङोऽचि। (न ।१।, हुङः ६।, अचि ७।)।

हेरुङो णु र्न स्यादचि परे। नेनिजानि। †

एवं (२०१) विजिरौ ञ लि विवेके।

(२०२) विषि लिँ ञौ व्याप्तौ।

अविषत् अविक्षत्। ‡

(२०३) डु दा ञ लि दाने।

प्रणिददाति। अद इत्युक्ते-रालोपः। दत्ते। §

---

* निजामिति बहुत्वं गणार्थं, गणश्च गणपाठे ह्वाद्युभयपदिसमापकपर्य्यन्तः इत्यत-आह निज-विज-विषामिति। निज-तिप् नेनेक्ति (२११) कुङ्। एवं विज वेवेक्ति, विष वेवेष्टि इत्यादि। अत्र विच-धातोरपि स्वेर्णुरिति वक्तव्यं। पाणिनिः ७।४।७५।

† हेरुङ् हुाङ् तस्य। अत्र अचि इति र विषये एव। निज आनिप् द्वित्वादिकं, अनेन मूलस्य गुणनिषेधे नेनिजानि, एवं वेविजानि। यङ्लुकि लेलिहीति मोमुचीति इत्यादि। रुङः किं, जुहवानि। रे किं, निनेज। अचि किं, नेनेक्ति। पाणिनिः ७।३।८७।

‡ विष-टौदि, (५६५) इरित्त्वात् वा ङः। पक्षे (६०५) सक्, अविषत् अविक्षत्।

§ प्र-नि-दा-तिप्, (५४६) गदाद्यन्त-नेर्णत्वं। ते दत्ते (७०१) आ-लोपः दा-वर्जनात् न ई।

७३५ । द्यो दा-धो दे-धे ह्वौ ।

(द्योः ६॥, दा-धोः ६॥, दे-धे ।१॥, ह्वौ ७।) ।

दे दाञो देधाञो दे धे च स्यात् ह्वौ । देहि । *

७३६ । स्यादो ङिः ष्टीमे न गुः ।

(स्यादोः ६॥, ङिः १।, टीमे ७।, न ।१।, गुः १।) ।

स्या-दो ङिः स्यात् टीमे, तस्य च न गुः । अदित अदिषातां ।†

(२०४) डु धा ञ लि धारणे ।

प्रणिदधाति ।

७३७ । धो द धो ऽन्तलोपे तथि ।

(धः ६।, द ।१।, धः १।, अन्तलोपे ७।, त-थि ७।) ।

धाञो दस्य धः स्यात् तथयोः परयोः, अन्तलोपे सति ।

धत्ते । धेहि । अधित । ‡

---

* दाश्च धाश्च तौ तयोः दाधोः । देश्च धेश्च इति लुप्तप्रथमा-द्विवचनं क्रमार्थं । अत्र डु दा ञ् लि, डु धा ञ् लि इति द्वयोरेव ग्रहणं, अन्येषां दासंज्ञकानां ह्वौ परे द्वित्वासम्भवात् । दा-हि द्वित्व, द्विरुक्तस्यैव दे-आदेशः देहि, एवं धेहि । पाणिनिः ६।४।११९ ।

† स्याश्च दाश्च तौ तयोः । ङ इत् अन्त्यस्य स्थाने । अत्र दा इति दासंज्ञकः । दा-टीतन् अदित (५६२) ह्रस्वात् झसि सि-लोप. । आतां अदिषातां झसपरत्वाभावात् सिलोपाभावः । पाणिनिः १।२।१७ ।

‡ धाञो दकारसम्भावना खेरेव । अन्तलोपे (७०१) आलोपे सति । धत्ते इति धा-ते द्वित्वं (५५९) खधंस्य दः, (७०१) मूलस्य आलोपः, अनेन खे दस्य धः । एवं धत्तः धत्थ इत्यादि । धत्स्व धद्ध्वे इत्यादौ तु (१७७) झभान्तस्येति दस्य धः । अत्र अणौ तथि इति कृते सिद्धावपि अन्तलोपे इति कथनं, यङ्लुकि क्तक्तवत्वोः दाधीतः दाधीतवान् इत्यत्र (६१२) डी आदेशे दस्य धकारापत्तिवारणार्थं । पाणिनिः ८।२।३८ ।

(२०५) टु डु भृ ञ लि भृति-पुष्योः।

बिभृतः, बिभ्रति। बिभरामास बभार। *

(२०६) मा ङ लि शब्दे।

प्रणिमिमीते मिमाते मिमते। *

एवं (२०७) ओ हा-ङ लि गतौ। *

इति ह्वादि-पादः।

२य पादः—दिवादिः।

(२०८) दिव्‌ु क्रीड़ायां

७३८। दिव-सु-तुद-रुध-क्र्यादे र्यन्‌ श्नु श नण्‌ श्नाः ञित्‌ षे रे। (दिव-क्र्यादेः ५।, यन्—नाः १।।।, ञित्‌ ।१।।।, षे ७।, रे ७।)।

एभ्यो षेऽर्थे यन्‌ नु अ नण्‌ ना एते रे परे क्रमात्‌ स्युः, ते च ञितः। दीव्यति। *

---

* बिभर्ति भृ-अन्ति (६९७) अन्त अत्। णप्‌ बिभरामास, (७२८) वा पश्राम, (७१९) खेर्डिः। माङ्‌-ते मिमीते खेर्डिः, (७०१) ईः, आते अन्ते (७०१) आलोपः मिमाते मिमते इति। एवं हा-ङ—जिहीते जिहाते जिहते।

---

* दिवश्च सुश्च तुदश्च रुधश्च क्रीश्चेति, ते आदयो यस्य तस्मात्। आदि शब्दस्य प्रत्येकेन सम्बन्धः। यन्‌ च नुश्च अश्च नण्‌ च नाश्च ते। ञ इत्‌ येषां ते ञित्‌ इति बहुवचनान्तं। ते च ञितः इत्यनेन दिवादेः श्यन्‌, स्वादेः श्नुः, तुदादेः शः, रुधादेः श्नण्‌, क्र्यादेः श्ना इति। ञित्‌करणात्‌ (५३०) रसंज्ञायां, अपिद्‌त्वात्‌ (५३२)

(२०९) षिव्यु तन्तुसन्तती।

निषीव्यति। न्यषेवीत् न्यसेवीत्। *

(२१०) नृती य नर्त्तने।

७३९। नृत् छृत् चृत् छृत् तृदो ऽरसो ऽसेरिम् वा। (नृत—तृदः ५।, अरसः ६।, असेः ६।, इम् ।१।, वा ।१।)।

एभ्यः परस्यारस्य सिवर्जस्य सस्य इम् स्याद्वा। नर्त्तिष्यति नर्त्स्यति। सौ तु अनर्त्तीत्। †

(२११) त्रसी य भये।

(५९४) क्रमक्लमेति श्यन् वा। त्रस्यति त्रसति। तत्रास त्रेसतुः तत्रसतुः। ‡

ङित्वे, श्यनादौ परे (५४२) न गुणः। एते शपो बाधकाः। श्नण् इति णकारानुबन्धात् (१७) रुधादेरन्त्याचः परो भवन्नपि शपं बाधते। अपिच रुधादेरिति षष्ठ्यन्तत्वेन अर्थो बोध्यः, विरुद्धधर्म्मसमवाये भूयसां स्यात् सधर्म्मकत्वमिति न्यायेन च पञ्चम्यन्तत्वेन प्रयुक्तः। दीव्यति दिव-तिप्, श्यन्, (२२८) दीर्घः। पाणिनिः ३।१।६९, ७३,७७,७८,८१।

* निषीव्यति (५७२) षत्वं। न्यषेवीत् (६२३) वा षत्वं।

† नृत इत्यादि द्वन्द्वः। अरश्चासौ सश्चेति तस्य अरसः। नृत्-स्यति वा इम्। अनर्त्तीदिति टीदि, (५५४) नित्यमिम्। पाणिनिः ७।२।५७।

‡ त्रसति श्यन्विकल्पपक्षे शप्। त्रस-अतुस् (५७९) वा खिल्लोपः, अकार एकारस्य। पक्षे तत्रसतुः।

(२१२) जॄ इर्ष जरायां ।

जीर्य्यति । अजरत् अजारीत् । जेरतुः जजरतुः । जरीता जरिता । *

(२१३) शो य निशाने ।

७४० । यन्योश्शमादिमिदो लोपर्घ्णु ।

(यनि ७।, श्चो शमादि मिदः ६।, लोप-र्घ णु १।) ।

ओकारस्य लोपः शमादे र्घो मिदे र्णुः स्यात् यनि । †

श्यति । अशात् अशासीत् । ‡

एवं (२१४) छो य लूनौ ।

(२१५) षो य नाशे ।

प्रणिष्यति । न्यषात् न्यषासीत् । सेयात् । §

---

* जीर्य्यतीति जॄ-तिप्, श्यन्, (६२८) इर्, (२२८) दीर्घः । अजरत्, टी-दि, (५६५) वा ङः, (६१६) गुणः । पक्षे अजारीत् सौ पे (५७४) वृद्धिः । जेरतुः जजरतुः, (६२६) गुणः, (५७६) वा णिलोपः अ एश्च । जरीता इति (६२७) इमो वा दीर्घः ।

† श्चोश्च शमादिश्च मिद् च तस्य । लोपश्च र्घश्च णुश्च तत् । उभयत्र समाहारे क्रमान्वयः । गणपाठे भ इत् शमादिः, सच—शम श्रम दम चम तम भ्रम मद क्लम इति अष्ट । पाणिनिः ७।३।७१,७४,८२ ।

‡ श्यति, शो-तिप्, श्यन्, ओलोपः । अशात् टी दि, (६०८) घौस्थाने आ, (६१४) वा सेर्लुक् । पक्षे (५६८) इम्सनौ अशासीत् ।

§ प्रणिष्यति प्र-नि षो तिप् (५४६) गदाद्यन्त-ने णत्वं । न्यषात् न्यषासीत् (५७२) अभ्यपि षत्वं । सेयात् ढी-यात् (६१२) ए ।

(२१६) दो य च्छेदे ।

प्रणिदात् । देयात् । *

(२१७) राध्यौ ण हिंसे ।

रेधतुः रराधतुः । वधार्थः किं, आरराधतुः । *

(२१८) व्यध्यौ ताड़े ।

विध्यति । विव्याध, विविधतुः । †

(२१९) पुष्यौ ऌ पोषणे ।

(५६५) ग्रासुलिद्यादिति ङः । अपुषत् । †

(२२०) श्लिष्यौ ञि ऌ श्लेषे ।

अश्लिषत् । आलिङ्गने तु अश्लिक्षत् । †

(२२१) रध्यू ऌ पाकहिंसयोः ।

७४१ । नुण् रधो मुचां नश्मस्जो रभलभो ऽनठीमच्ये झस्यरव्यचि । (नुण् ।१।, रधः ६।, मुचां ६।।।, नश् मस्जः ६।, रभ-लभः ६।, अनठीमचि ७।, ए ७।, झसि ७।, अरव्यचि ७।) ।

---

* प्रणिदात्, प-नि दो-टो दि, (६०८) घोस्थाने आ, (५५२) से ल्ंक् दामंज्ञकत्वात्, (५४६) गदाद्यन्त-ने णत्वं । देयात, (६१२) ङे । रेधतः, राध (वधार्थे) ठी अतुस, द्वित्वं, (५७६) विधिबलात् वा खिलोपः आ एश्च । पक्षे रराधतुः । आराधनार्थे तु आरराधतुः अत्र न एः ।

† विध्यति, व्यध-तिप् (६६१) जिः । णप् विव्याध (६५१) खेर्जिः । अतुस् विविधतु. खे. मूलस्य च जिः । अश्लिषत, पुषादित्वात् (५६५) ङः । अश्लिक्षत (६०५) सक् ।

रधष्ठीवर्जेम्नर्जेऽचि, मुचादेरत्ये, नश्-मस्जो झसे, रभ-लभो रठीवर्जेऽचि, नुण् स्यात्। अरन्धत्। रधिता रद्धा। व्यान्तु ररन्धिव रेध्व, ररन्धिम रेध्म। *

(२२२) तृप्यू ञि ल्ट प्रीणने।

अतर्पीत् अत्राप्सीत् अताप्र्सीत् अतृपत्। †

एवं (२२३) दृप्यु इञि हर्षाहङ्कारयोः।

(२२४) मुह्यू ञि ल्ट वैचित्ते।

मोहिता। (१७८) मुहां घङ्गिति, मोग्धा मोढ़ा। ‡

---

* न ठी अठी, अव्या इम् अठीम्, नास्ति अठीम् यत्र सः अनठीम्, अनठीम् चासौ अच्चेति अनठीमच् तस्मिन्। रश्च ठी च रठ्यौ, न रठ्यौ अरठ्यौ, तयोरच् अरठ्यच् तस्मिन्। रधधातोः व्या इमि सामान्ये अचि च परे नुण् स्यात्, व्या इम्भिन्ने अन्यस्मिन् इमि न स्यादिति तात्पर्य्यम्। ठीमचि इति कृते तु ररन्धतुरित्यादौ व्या अचि नुणोऽप्राप्तिरूपमनिष्टं स्यात्। मुचामिति बहुवचनं गणार्थं, तेन मुचादेरिति, मुचादिश्च—षकारानुबन्धा धातवः—मुच सिच लिप लुप कृत विदादयः। अत्ये इति तुदादित्वाज्जाते अप्रत्यये परे इत्यर्थः, तेन धजि मोक इति। झसे इति झस्-प्रत्याहारे। रठीवर्जेऽचीति रभिन्ने ठीभिन्ने अचि परे इत्यर्थः। अरन्धदिति, रध-टौदि पुषादित्वात् (५६५) ङः, तस्मिन् अचि परे अनेन नुण्, णित्त्वात् (१७) अन्त्याचः परे, न-स्थितिः, उकारः स्थित्यर्थः। नुण्करणादेव (५६७) इमुङ् न इत्यनेनं न नलोपः। रधिता इति रध-डीता, (५७३) रधादित्वात् वा इम। ठी-व ररन्धिव, अत्र व्या इमि नुण्। इमो विकल्पपक्षे (५७९) खिलोपः, अकारस्य एकारः। एवं ठी म। पाणिनिः ७।१।५९, ६०,६१,६२,६३,६४।

† तृप-टौदि, (६०३) वा सिः (५७३) वा इम्, अतर्पीत्। इमोऽभावपक्षे (६०४) ऋस्थाने वा रः, अनिमत्वात् (५७४) अकारस्य वृद्धिः अत्राप्सीत्। रस्य विकल्पपक्षे, ऋकारस्य वृद्धिः अताप्र्सीत्। सेर्विकल्पपक्षे (५६५) ङः अतृपत्।

‡ मोहिता, मुह-डी-ता, (५७३) वा इम्। इमो विकल्पपक्षे मोग्धा, घङ् विकल्पपक्षे मोढ़ा, अन्तरङ्गत्वादादौ गुणे, (१७५) हस्य ढ, (५७५) तस्य धः, (४७ धस्य ढः, (७७) ढलोपः।

(२२५) णश ष्ट यू नाशे ।

७४२। नश नेश वा ङे। (नश ।१।, नेश ।१।, वा ।१।, ङि ७।)।

प्राणेशत् प्राणशत् । नशिता प्रनंग्धा प्रनंष्टा, अशान्तत्वात् (५४८) न णः । *

(२२६) शमु श्य इर् उपशमे ।

प्रणिशाम्यति । †

(२२७) क्लमु भिर् ग्लानौ ।

क्लाम्यति क्लामति । †

(२२८) असु इर् क्षेपे ।

आस्थत् । †

(२२९) यसु इर् यत्ने ।

यस्यति यसति, संयस्यति संयसति । अन्यत्र प्रयस्यति । ‡

(२३०) लुभ्य इर् गार्द्धे ।

लोभिता लोब्धा । ‡

(२३१) जीर् मिद्या स्नेहे ।

मेद्यति । ‡

(२३२) सू यो ङ सूतौ ।

असविष्ट असोष्ट । ‡

---

* नश धातो र्नेश स्यात् वा ङे । नश-टीदि (५६५) ङः, वा नेश-आदेशः । (५४८) शान्तत्वात् नस्य णत्वं । डी-ता (५७३) वा इम् नशिता । इमो विकल्पपक्षे प्रपूर्ब्ब नश-डी-ता (७४१) नुण्, (१७८) घङ् । घङो विकल्पपक्षे (१५४) षङ्, (४७) तस्थाने टः । "नशिमन्योरलिड्येत्वं वक्तव्यम्" इति काशिका ।

† प्रणिशाम्यति, (७४०) शमादित्वात् दीर्घः, (५४८) गदाद्यन्त-ने णत्वं । क्लाम्यति (५६४) वा श्यन्, शमादित्वात् दीर्घः । विकल्पपक्षे शप् (५६३) ष्ठिवुक्लमेति दीर्घः, क्लामति । आस्थत् अस-टीदि, (५६५) ङः, (६५२) थस्यादेशः । पक्षे आसीदिति ।

‡ यस—संपूर्ब्बक यस धातोः (५६४) श्यन् वा, संपूर्ब्बकादन्यत्र (७३८) नित्यं श्यन् प्रयस्यति । लुभ डी-ता, (६०६) वा इम् लोभिता लोब्धा । मिद-तिप् श्यन् (७४०) मिदेर्गुणः मेद्यति । सू—तन्, (५७३) वा इम्, असविष्ट असोष्ट ।

(२३३) णो दी ङ य क्षये ।

७४३। दीङश्च्यां यन् यब्णौ ङा सनि तु वा।

(दीङ: ६।, च्यां ७।, यन् ।१।, यप्-णौ ७।, ङा ।१।, सनि ७।, तु ।१।, वा ।१।)।

दीङ श्च्यां यन्, यपि णौ च ङा, सनि तु वा स्यात्।

अदास्त। दिदीये। *

(२३४) जनी स्य ङं प्रादुर्भावे।

जायते। †

७४४। जनवधः सेममो ऽकमवमाचमो ञ्णित्-कृदिणि स्वो ऽमयमविश्रमस्तु वा।

(जन-वध: ६।, सेमम ६।, अ-कमवमाचम: ६।, ञ्णित्-कृदिणि ७।, स्व: १।, अम-यम विश्रम: ६।, तु ।१।, वा ।१।)।

जनो वधः सेमोऽमन्तस्य च कमवमाचम-वर्जस्य स्वः स्यात् ञ्णिति कृति इणि च, अम-यम विश्रमस्तु वा। अजनि अजनिष्ट। जज्ञे। ‡

---

* यप् च णश्च समाहारे तस्मिन्। यप् इह (११७६) क्त्वाचस्थाने जात: प्रत्यय.। णिरिह गुणप्राप्तियोग्य इत्यर्थ:। सनि तु ङा वा स्यादिति। अदास्त इति दी-टीतन्, सि:, अनेन गुणिनि परे ङा, ङिस्वादन्त्यस्य स्थाने। च्या ए, द्वित्वं, अनेन यन् नित्वा-दन्ते। णौ (गुणयोग्ये) दापयति। यपि प्रदाय। णौ किं, दीयते। सनि दिदासते दिदीषते। पाणिनि: ६।४।६३, ६।१।५०।

† जायते, जन-ते, श्यन्, (५९७) जादेश:।

‡ जनश्च वधश्च तत्तस्य। इमा सह वर्त्तमान: सेम्, सेम् चासौ मम् चेति तस्य। कमश्च वमश्च आ-चमश्च ते, न सन्ति ते यत्र स तस्य। ञश्च णश्च ञ्णौ, तौ इतौ यस्य स ञ्णित्. ञ्णिच्चासौ कृच्चेति ञ्णित्कृत्, ञ्णित्कृच्च इण् च तत्तस्मिन्। अमश्च यमश्च विश्रम च तत्तस्य। अकमवमाचम इति सेमम इत्यस्य विशेषणं। ञ्णिति कृति, ञ-इत् ण-इत् कृत्प्रत्यये परे इत्यर्थ:। यथा—घ्यण्, जन्यं वध्यं। णक, जनक:

(२३५) दीपी ङ्य ऋ दीपने ।

अदीपि अदीपिष्ट । *

एवं (२३६) पूरी ङ्य प्यायने ।

(२३७) पद्यौ ङ गतौ ।

(६४३) पदस्तनीण् चे इति । प्रण्यपादि, अपत्साताः । *

(२३८) बुध्यौ ङ अवगमने ।

अबोधि अबुद्ध । *

(२३९) नहौं ञ बन्धे ।

(२३७) नहो धङ् भौ । अनात्सीत्, अनद्ध । *

इति दिवादि-पादः ।

३य पादः—स्वादिः ।

(२४०) षु ञ न बन्धे ।

सुनोति, अभिषुणोति, सुनुतः सुन्वन्ति ।

(६२३)सुस्तुधोरितीम् । व्यषावीत् । असविष्ट असोष्ट । सुषुविव ।

विसविष्यति विसोष्यति, (५७२) स्यान्तत्वान्न षः । †

वधक इत्यादि । अजनि, जन् टीतन्, (६४७) इण्, (६४४) तन्लोपः, (५७७) वृद्धिः, अनेन ह्रस्वः । पक्षे ठ्यां सिः, अजनिष्ट । ठौ ए, जङ्गि द्वित्वं, (२३०) छङ्लोपः, (४६) नस्थाने ज । पाणिनि: ७।३।३४;३५ । वार्त्तिकं भाष्यञ्च ।

* दीप-टीतन् (६४३) इण् वा, (६४४) तन्लोपः, अदीपि । इणो विकल्पपक्षे अदीपिष्ट । प्रण्यपादीति (५४९) णत्वं । अबुद्ध इति बुध-तन्, इणो विकल्पपक्षे सिः, (५६२) सिलोपः । अनात्सीदिति अनिम्त्वात् (५७४) वृद्धिः ।

† सु-तिप्, (७३८) स्वादेः श्नु, (५४२) गुणः, सुनोति । अभिषुणोति, (५७२) षत्वं, (१०७) णत्वं । सुनुतः ङित्त्वान्न गुः । सुन्वन्ति, (५८८) उकारस्य वः । व्यषावीत, वि-सु टौ ष्टि (५७२) अभ्यपि षत्वं । टी-तन् (५७३) वा इम्, असविष्ट असोष्ट । ठौ-व सुषुविव, (५७३) वृदुसुनोस्त्वठा। इति इम् विकल्प निषेधात् (५८४) नेमसुमिति नियमेन नित्यमिम्, (५८८) उव्. (१११) षत्वं ।

(२४१) डु मि ञ न क्षेपे ।

७४५। मिग्मो र्यबणौ ङाऽखलति लियस्तु वा।

(मिग्मोः ६॥, यप्-णौ ७, ङा ।१।, अ-खल्-अलि ७।, लियः ६।,तु ।१।, वा ।१।)।

अमासीत्। प्रणमास्त। *

(२४२) चि ञ न चित्यां ।

७४६। चेः कि र्वा सन्ठ्योः।

(चेः ६।, किः १।, वा ।१।, सन्-ठ्योः ७॥)।

चिकाय चिचाय। चिक्ये चिच्ये। †

(२४३) स्तृ ञ न स्तृतौ।

७४७। स्यादृदृदु-रस्कु र्वेम् सनमढीसेः।

(स्यादि-ऋत्-ॠत्-वुः ५।, अस्कुः ५।, वा ।१।, इम् ।१।, सन्-मढीसेः ६।)।

स्कुवर्ज-स्यादृदन्ता-ॠदन्ताच्च वृञो वृङश्च सनो मे स्थितयो-ढींस्योश्च इम् स्याद्वा। अस्तरिष्ट अस्तृत। स्तरिषीष्ट स्तृषीष्ट।‡

---

* मि ञ न, मी ङ य, मी ञ ग, मी कि, एषां ङा स्यात् यपि गुणसाधन-योर्णौ च, नतु खलि अलि च, लीधातोस्तु वा, ङ इत् अन्त्यस्य स्थाने। अमासीत्, टीदि, सि, अनेन ङा, आऽन्तत्वात् (५९८) इमसनौ। प्रणमास्त, मदाद्यन्त-ने णत्वं। पाणिनिः ६।१।५०,५१। वार्त्तिकञ्च।

† सनि—चिकीषति चिचीषति। पाणिनिः ७।३।५८।

‡ स्य आदि र्यस्य स स्यादिः, स्यादिश्चासौ ऋच्चेति स्यादृत्, स्यादृच्च ॠच्च वुश्चेति तस्मात्। नास्ति स्कु र्यस्मिन् सोऽस्कुस्तस्मात्। ढी च सिश्च ढीसिः, मे (आत्मनेपदे) ढीसिः मढीसिः, सन्च मढीसिश्च तस्य। स्कुवर्ज-संयोगादि-ऋदन्तात्, दीर्घ-ॠदन्ताच्च, उभयपदि-वृञः, आत्मनेपदि-वृङश्च इत्यर्थः। अस्तरिष्ट इति स्तृ-टीतन्, अनेन सेरिम्, पश्चात् गुणः। इमो विकल्पपक्षे अस्तृत, (६५९) सेः कित्वात् न गुणः, (५६२) सिलोपः। एवं ढो सीष्ट। पाणिनिः ७।२।४१,४२,४३।

(२४४) वृ ञ न वृतौ।

अवारीत्। अवरीष्ट अवरिष्ट अवृत। ववरिथ, ववृव। वरिषीष्ट वृषीष्ट। *

(२४५) धु ञ न कम्पे।

(६२३) सुसुधोरितीम्, अधावीत्।

(२४६) हि न वर्द्धने गतौ।

प्रहिणोति। †

७४८। हेः खेरनङि घिः।

(हेः ६।, खेः ५।, अनङि ७।, घिः १।)।

खेः परस्य हे र्घिः स्यान्न तु अङि। जिघाय। ‡

(२४७) क्रवि न कृतौ हिंसे।

७४९। क्रविधिव्योः क्रधी श्नौ।

(क्रवि-धिव्योः ६॥, क्र-धी १॥, श्नौ ७।)।

क्रणोति। अक्रणवीत् (५६८) अतएवेदितो नुण्। चक्रण्व। क्रण्विता। क्रण्व्यात्। §

---

* अवारीत्, वृ-टीदि, (५८७) वृ इत्यस्य प्रतिप्रसवात् (५५४) इम्। अवरीष्ट, वृ-टीतन्, सिः, अनेन वा इम्, (६२७) इमो वा दीर्घः, दीर्घ-विकल्पपक्षे अवरिष्ट, इमो विकल्पपक्षे अवृत, (६५९) सेः कित्वात् न गुणः, (५६२) सिलोपः। ववरिथ, वृ-ठी-थप् (६१६) प्रतिप्रसवात् (५५४) इम्। ववृव ठी-व, (५८४) इमनिषेधः। ढौ-सीष्ट वरिषीष्ट वृषीष्ट, अनेन वा इम्। इमोऽभावपक्षे (६५९) कित्संज्ञा।

† (५४९) हनमीनाहिन्वानिविति णत्वं।

‡ अङि तु, अजीहयत्। पाणिनिः ७।३।५६।

§ क्रवि-धिव्योरिकारानुबन्धात् विभक्त्युत्पत्तेः पूर्व्वं नुण् कृते क्रन्व धिन्व इत्येतयोः श्नौ परे क्र धि आदेशौ स्यातामित्यर्थः। अक्रण्वीदित्यादौ वकारस्य दन्त्यत्वेन झसत्वा-भावात् तस्मिन् परे (५०) न नस्यानुस्वारः।

(२४८) दन्भु न दम्भे।

देभतुः ददम्भतुः। *

७५०। श्रन्थ-ग्रन्थ-दन्भां थपि न-लोपो वा। †

(श्रन्थ-ग्रन्थ-दन्भां ६।॥, थपि ७।, नलोपः १।, वा ।१।)।

देभिथ ददम्भिथ।

(२४९) धिवि न प्रीतौ।

धिनोति।

(२५०) अशू ङ न व्याप्ति-संहत्योः।

(५८०) स्यान्तादिति खेरान्। आनशे।

इति स्वादि-पादः।

४र्थ पादः—तुदादिः।

(२५१) तुदौ ञ श व्यथे।

तुदति तुदते।

(२५२) भ्रस्जौ ञ श पाके।

भृज्जति। अभ्राचीत्। ‡

७५१। भ्रस्जो ऽरे णौ भर्ज वा।

(भ्रस्जः ६।, अरे ७।, णौ ७।, भर्ज ।१।, वा ।१।)

---

* देभतुरिति (५६६) वा कित्संज्ञायां, (५६७) नलोपे, (५७९) दभग्रहणात् खिलोपः, अकार एकारश्च।

† अत्र थप् किद्वा इति कृते, दभि ग्रथि इत्येतयोरिदनुबन्धयोः थप्विभक्तौ (५६८) नलोपनिषेधापत्तिः स्यात्। "श्रन्थिग्रन्थिदम्भिसञ्जीनां लिटः कित्त्वं वेति व्याकरणान्तरम्" इति भट्टोजिदीक्षितः।

‡ तुदतीत्यादि (७३८) श प्रत्ययः, तस्य ङित्त्वात् न गुणः। भृज्जति (६६१) जिः, अर्थात् रस्य ऋः। अभ्राक्षीत्, भ्रस्ज-टौदि अनिम्त्वात् (५७४) वृद्धिः, (२१३) स्यादेः सलोपः, (१५४) षङ्, (६०२) षस्य कः, (१११) सेः सस्य षत्वं।

बभर्ज बभ्रज्ज, बभ्रज्जे बभर्ज्जे। *

(२५३) मुच लृ ञ श प मोक्षे।

(७४१) नुण् रध इति नुण्। मुञ्चति। अमुचत्, अमुक्त। †

(२५४)। ञि लिपौ ञ श प लेपने।

अलिपत्। अलिपत अलिप्त। ‡

(२५५) षिचौ ञ श प उक्षणे।

निषिञ्चति। न्यषिचत्। न्यषिचत न्यषिक्त। निषिषेच। ‡

(२५६) कृतीं श प च्छिदि।

(७३९) नृतकृदितीम् वा। कर्त्तिष्यति कर्त्स्यति।

(२५७) षू श क्षेपे।

विषुवति। व्यषावीत्। §

---

* नास्ति री यस्मात् सः अरस्तस्मिन्। भस्जो भर्ज वा स्यात् अरे णौ गुणसाधनयोग्ये इत्यर्थः। अरं इति कथनात् अभाक्षीदित्यत्र सिरूप गुणिनि परेऽपि तदुत्तरं टीदिरूप-रस्य विद्यमानत्वात् न भर्जादेश। बभर्ज बभ्रज्ज इति ठौ णप्, वा भर्जादेशः, (६४) सस्य दः, (४६) दस्य जः। बभ्रज्जे, ठौ ए (५६६) किच्चेऽपि (६६२) ञ्यां न वेप्रच्छामिति ञिनिषेधः। 'कित्त्वाभावपक्षे गुणसाधनयोग्यत्वे सति भर्जादेशः। पाणिनिः ६।४।४७।

† अमुचत्, मुच-टीदि (५६५) लिदित्त्वात् ङः। अमुक्त इति आत्मनेपदे ङस्याप्राप्तौ सिः, औदित्त्वादिमोऽभावे (६५९) सेः कित्त्वात् न गुणः, ततः (५६२) सेर्लोप.।

‡ लिप-टीदि, (६१८) ङः, अलिपत्। टीतन्, आत्मनेपदे तेनैव वा ङः। पक्षे सिः (६५९) कित्संज्ञा, (५६२) सेर्लोपः। निषिञ्चति, नि-षिच-तिप् (७४१) नुण्, (५७२) षत्वं। टीदि, टीतन्, लिपवत् साध्यं, अम्व्यवधानेऽपि षत्वं। ठौणप् निषिषेच, (५७२) द्विरुक्तस्यापि षत्वं।

§ विषुवति, वि-सू तिप् (५८८) उव्, (५७२) षत्वं। व्यषावीत् (५७३) वेसूदिति सूत्रे सूति सूय ग्रहणात् अस्मात् (५५४) नित्यमिम्, (५७४) अजन्तत्वात् वृद्धिः, अम्यपि षत्वं।

(२५८) व्रश्च श छेदे।

वृश्चति। अव्रश्चीत् अव्राक्षीत्। वव्रश्च वव्रश्चतुः।*

(२५९) ऋच्छ श गमनमोहकाठिन्येषु।

७५२। ऋच्छो णुष्ठ्यां। (ऋच्छः ६।, णुः १।, ष्ठ्यां ७।)

आनर्च्छ।†

(२६०) कॄ श विक्षेपे।

(६२८) ऋदिरणाविति इर्। किरति। चकरतुः। करीता करिता।‡

७५३। प्रत्युपोपात् कॄः सुम् हिंसाच्छेदे।

(प्रति-उप-उपात् ५।, कः ६।, सुम् ।१।, हिंसा-च्छेदे ७।)।

प्रत्युपाद्धिंसायां उपाच्छेदे किरतेः सुम् स्यात्। प्रतिस्किरति उपस्किरति।§

(२६१) तृन्प श प्रीणने।

---

* व्रश्च-तिप् (६६१) शिः, वृश्चति। टीदि (५७३) ऊदित्त्वात् वा इम्। पक्षे (५७४) अनिमत्वात् वृद्धिः, (१५४) षङ्, निमित्तस्यापाये नैमित्तिकस्याप्यपाय इति न्यायेन षकारनिमित्तकस्य शस्य पुनर्दन्त्यत्वे (२१३) स्याद्येः स-लोपः; (६०२) षस्य कः, (१११) कवर्गात् षत्वं। वव्रश्चतुः (६६२) ञिनिषेधः।

† ऋच्छो णुः स्यात् ष्ठ्यां। ऋच्छ-धातौ लघूङोऽभावात्, अतुसादिविभक्तौ च कित्त्वात् गुणाप्राप्तौ विधिरयं सामान्यष्ठीविषयः। तेन आनर्च्छ आनर्च्छतुरित्यादि, (५८०) खेः स्थाने आन्। पाणिनिः ७।४।११।

‡ चकरतुः (६२६) गुणः। करीता करिता (५५४) इम, (६२७) इमो वा दीर्घः।

§ प्रतिश्च उपश्च प्रत्युपं, प्रत्युपश्च उपश्च प्रत्युपोपं तस्मात्। हिंसा च छेदश्च हिंसाच्छेदं तस्मिन्। प्रतिस्किरति हिनस्ति, उपस्किरति हिनस्ति छिनत्ति वा इत्यर्थः। (५७२) परि नि वि सेव सुमित्युक्तेः अत्र प्रतिपूर्वस्य न षत्वम्। पाणिनिः ६।१।१४०,१४१।

७५४ । तृन्पां न-लुक् वा श-णौ ।

(तृन्पां ६।।।, न ।१।, लुक् ।१।, वा ।१।, श-णौ ७।) ।

तृन्प तुन्प तृन्फ तुन्फ रिन्फ गुन्फ दृन्भ उन्भ शुन्भां नकारस्य लुक् वा स्यात् शे णौ च । तृपति तृम्पति । *

(२६२) चृती श प हिंसे ।

चर्त्तिष्यति चर्त्स्यति । † ·

(२६३) प्रच्छी श ज्ञीप्से ।

पृच्छति । अप्राचीत् । पप्रच्छ पप्रच्छतुः । ‡

(२६४) सृजो श विसर्गे ।

अस्राचीत् । ससर्जिथ सस्रष्ठ । §

(२६५) टु मस्जो श स्नाने ।

मज्जति । अमाङ्चीत् । ¶

(२६६) स्पृशी श स्पृशि ।

अस्प्राचीत् अस्पार्चीत् अस्पृचत् । ‖

---

* बहुवचनं गणार्थम् । गणश्च वृत्तौ नवमदाकः स्वयं स्पष्टीकृतः । णौ इति गुण-साधनयोग्यप्रत्यये इत्यर्थः । यथा, तर्पयति तृम्पयतीत्यादि । तृपतीति शे परे न-लुक् । विकल्पपक्षे (५०) नस्यानुस्वारः, (५१) अनुस्वारस्य मः । वार्त्तिकम्, नात्र तृन्पः ।

† (७३६) वा इम् ।

‡ पृच्छतीति (६६१) जिः । अप्राचीदिति (१५४) षङ्, (६०२) षस्य कः, (५७४) अनिम्त्वात् वृद्धिः, (१११) षत्वम् । पप्रच्छतुरित्यत्र (६६२) न जिः ।

§ सृज-टीदि, सिः, (५६१) सिस्थाने ईम, (६०४) नित्यं ऋस्थाने रः, (५७४) भकारस्य वृद्धिः, (१५४) षङ्, (६०२) षस्य कः, (१११) षत्वं । ठी-थप्, (५८६) वा इम । इमविकल्पपक्षे षङ्, (४७) थस्य ठः ।

¶ मस्ज-तिप् (६४) सस्थाने द, (४६) दस्थाने ज । टीदि, (७४१) गुण्, (२१३) सलोपः, (५०) नस्यानुस्वारः, (५१) अनुस्वारस्य ङः ।

‖ स्पृश-टीदि, (६०३) सिः, (६०४) ऋ रः, ततः वृद्धिः, षङ्, सस्य कः, षत्वं । र-विकल्पपक्षे ऋकारस्य वृद्धिः । सि-विकल्पपक्षे (६०५) सक् ।

(२६७) विच्छ श गतौ।

विच्छायति विच्छति। अविच्छायीत् अविच्छीत्। *

(२६८) मृशी श मृशि।

अम्राक्षीत् अमार्क्षीत् अमृक्षत्। †

(२६९) इषु श वाञ्छे।

इच्छति। (६०६) वेमसहेतीम् वा, एषिता एष्टा। †

(२७०) कुट शि कौटिल्ये।

७५५। कुटां गुव्री ञ्णिति।

(कुटां ६॥, गु-व्री १॥, ञ्णिति ७।)।

कुटादे र्गुव्री च स्यात् ञिति णिति च, नान्यत्र। अकुटीत्। चुकोट। ‡

(२७१) व्यच शि व्याजे।

विचति। विव्याच, विविचतुः। §

---

* विच्छ-तिप् (६३७) आयः, (६३१) धातुसंज्ञा, ततः भ्वादित्वात् तिप्शपौ। आय-विकल्पपक्षे तुदादित्वात् शः। टौदि स्पष्टं।

† मृश टौदि, स्पृशवत्। इष-ति (५६७) इच्छ-आदेशः।

‡ ञ च ण च ञ्णौ, तौ इतौ यस्य स ञ्णित् तस्मिन्। ञित्-णितोः परयोः गुणवृद्ध्योः सिद्धौ पुनर्विधानं नियमार्थं, तेन कुटादीनां ञिण्णिद्भ्यामन्यत्र गुणवृद्धी न स्तः इति नियमः। ञित्-णितोस्तु गुणसामग्र्यां गुणः, वृद्धिसामग्र्यां वृद्धिरित्यर्थः। अतएव, अकुटीत् कुटिष्यति कुटनमित्यादौ न गुणः। नू शि स्तवने इत्यादीनां अनुवीदित्यादौ न गुणो नच वृद्धिः, अगुणत्वादुव् च। एवं नुविष्यतीत्यादि। कुटादिश्च— कुट पुट कुच गुज गुड डिप कुर स्फुट मुट त्रुट तुट चुट छुट लुड कड लुट क्रुड कुड पुड घुट तुड थुड स्थुड खुड कुड स्फुर (फुल) स्फुल (स्फर) स्फुड चुड व्रुड क्रुड भुड गुर नू धू गु ध्रु (ध्रुव) कु (कू)। लिख मिल इति द्वौ विकल्पेन कुटादिमध्यगतौ भवत इति प्राचीनाः। पाणिनिः १।२।१।

§ विचति (६६१) ञिः।

७५६। व्यचो ञि-रञ्णिदसि।

(व्यच: ६।, ञि: १।, अञ्णिदसि ७।)।

विचिता। *

(२७२) त्रुट श्रि च्छेदे।

त्रुट्यति त्रुटति। †

(२७३) स्फुर श्रि स्फूर्त्तौ।

निष्फुरति निस्फुरति। ‡

एवं (२७४) स्फुल श्रि स्फूर्त्ति-चलनयो:।

(२७५) नू श्रि स्तवने।

अनुवीत्। नुनाव। §

(२७६) मृ ङ श्र मृतौ।

७५७। मृङ ष्टीढ्ये मं। (मृङ: ५।, टीढ्ये ७।, मं १।)।

त्यां ढ्या-मत्ये च मृङो मं स्यात्। ¶ (६२०) ऋद्रि: श्रयक्ढीगे।

---

* अच णच ञ्णौ, तौ इतौ यस्य स ञ्णित, ञ्णित् अस् च ञ्णिदस्, तत्योगे तस्मिन्। व्यचो ञि: स्यात् न तु ञिति णिति असि च। यथा विचिता विचिष्यति विच्यते विव्याच विविचतुरित्यादि। ञिति णिति असि तु व्याचयति व्याचक: उरु-व्यचा: (१०३२)। (पाणिनिमते तु किति ङिति परे एव ञि: नान्यत्र)।

† (५६४) क्रमक्लमेति श्यन् वा।

‡ (६२५) विस्कभेति वा षत्वं।

§ अनुवीदिति कुटादित्वात गुणवृद्धी निषिद्धे, (५८८) भ्वीरित्युव्।

¶ टीच ढीच अस्य टीढ्यं तस्मिन् विषयसप्तमी। मृङो ङित्त्वेऽपि त्यां ढ्याम् अप्रत्यये च विषये म स्यादिति नियम:, अन्यत्र तु परस्मैपदमेव। आत्मनेपदनिमित्तानि परस्मैपदिनां क्वचिदिति न्यायेन कदाचिदत्रान्यत्रापि स्यादिति केचित्। पाणिनि: १।३।६१।

म्रियते, अमृत, मृषीष्ट। एषु किं, ममार, मरिष्यति। *

(२७७) ओ विजी ङ श्न भी-कम्पे।

७५८। विजेर्णु र्नेमि। (विजेः ६।, णुः १।, न।१।, इमि ७।)।

विजे र्णु र्न स्यादिमि। अविजिष्ट। †

इति तुदादि-पादः।

१म चतुर्गणाध्यायः।

७मः। २य-चतुर्गणाध्यायः।

१म पादः—रुधादिः।

(२७८) रुधिरौ ध ञि आवरणे।

रुणद्धि। *

७५९। नणो न्रे ऽणौ। (नणः ६।, न्।१।, रे ७।, अणौ ७।)।

नणो नकारः स्याद्णौ रे। रुन्धः रुन्धन्ति। †

---

* म्रियते (५८८) इस्थाने इय। अमृत मृषीष्ट, उभयत्र (६५९) कित्संज्ञा।

† विजेः किदिम् इति कृते सिद्धावपि स्पष्टार्थमेवं कृतं। पाणिनिः १।२।२।

---

* रुध-ति (७३८) श्नण्, णकारित्वात् (१७) अन्त्याचः परे, अदन्तनकार-स्थितिः; (१०७) णत्वं, (५७५) तस्थाने धः, (६४) धस्य दः।

† अरे नणो ऽसम्भवात् अत्र र इति स्पष्टार्थं। एवं परसूत्रेऽपि। अदन्त-न-स्थाने न् स्यादित्यर्थः। रुन्ध इत्यादौ, त्रयो यत्रैकवर्गीया मध्यमस्तत्र लुप्यते इति प्रमाणात् मध्यवर्त्ति-धकारस्य लोपः। तवर्गयुक्त-नकारस्य णत्वाभावः। पाणिनिः ६।४।१११।

अरुणत्, अरुणः अरुणत्। अरुधत् अरौत्सीत्। *

(२७९) क्षुदु ञ धिर् देवने।

(७३९) छर्दिष्यति छर्त्स्यति।

एवं (२८०) तृदु ञ धिर्नादरे।

(२८१) तृह ध हिंसे।

७६०। तृह इण् पिटि हसे। (तृह: ६।, इण् ।१।, पित्-हस्-रे ७।)।

तृहो नण इण् स्यात् पिति हसे रे। तृणेढि तृण्ढः तृंहन्ति। अतर्हीत् अतृक्षत्। †

(२८२) हिंसि ध कि हिंसे।

७६१। नणो न लोप्यः। (नणः ५।, न ।१।, लोप्य: १।)।

हिनस्ति। ‡

(२८३) अन्जू ध जि व्यक्ति-गति-म्रक्षणे।

अनक्ति। ‡

---

* अरुणदिति घ्या दिप्, (६७२) दलोपः, (६४) धस्य त (द वा)। घ्या: सिप्, (६९०) धस्य रेफे, रस्य विसर्ग.; रेफविकल्पे (६४) धस्य त्। घ्या-दि, (५६५) इरित्त्वात् ङः। ङविकल्पे अनिमत्वात् (५७४) वृद्धिः, अरौत्सीत्।

† पिश्चासौ हसचासौ रश्चेति तस्मिन्। इणो णित्त्वात् नणः अन्त्याचः परे स्थितिः। तृह-तिप्, (७३८) नण्, तृनह्, अनेन इण्, तृनेह इति स्थिते, (१७५) हस्य ढः, (५७५) तस्य धः, (४७) धस्य ढः, (७७) ढलोपः, (१०७) णत्वं, तृणेढि। तृह-तस् तृण्ढः, (७५९) नणो नकारे (४७) नस्य णकारः, अन्यत् पूर्ववत्। अन्ति तृंहन्ति, (५०) नस्यानुस्वारः। टीदि, (५७२) ऊदित्त्वात् इम् अतर्हीत्, इमो विकल्पपक्षे (६०५) अनिमत्वात् सक्, (१७५) हस्य ढः, (६०२) ढस्य कः, (१११) षत्वं। तृहधातो- स्तुदादिगणीयस्यैव ऊदित्त्वमिति कातन्त्राः। पाणिनि: ७।३।९२।

‡ नणो नः परो नकारो लोप्यः स्यात्। हिंस-तिप्, अतएवेदितो नुण् हिन्स्, ततः रुधादित्वात् नण् हिननस् इत्यस्य अनेन नणः परो न लोप्य, हिनस्ति। एवं अन्ज अनक्ति, भन्ज भनक्ति। पाणिनि. ६।४।२३।

७६२। अनजः से रिम् पे।

(अनजः ५।, सेः ६।, इम् ।१।, पे ७।)।

अनजः परस्य सेरिम् स्यात् पे। आञ्जीत्, आनञ्ज। *

(२८४) ञि इन्धी ङ ध दीप्तौ।

इन्धाञ्चक्रे। †

इति रुधादि-पादः।

२य पादः—तनादिः।

(२८५) तनु ञ द विस्तृतौ।

तनोति तनुतः तन्वन्ति, तन्वः तनुवः तन्मः तनुमः। *

७६३। से लुक् त-थासो स्तनभ्यो ऽकुर्व्वा।

(सेः ६।, लुक् ।१।, त-थासोः ७॥, तनभ्यः ५॥, अकुः ५।, वा ।१।)।

कुवर्जात् तनादेः सेर्लुक् स्याद्वा त-थासोः परयोः।
अतत अतनिष्ट, अतथाः अतनिष्ठाः। †

---

* अनजधातोरुदित्त्वादिमत्वे नित्यार्थं विधानं। सेरन्यत्र, अञ्जिता अङ्क्ता, अञ्जिष्यति अङ्क्ष्यति इत्यादि। आनञ्जेति (५८०) स्यान्तादिति स्वरान्। पाणिनिः ७।२।७१।

† (५८२) ञ्विंजादीत्याम्, (५८३) कृप्रयोगः।

---

* तनोति (६८८) गुप्, (५४२) गुप उकारस्य गुण। तन्वन्तीत्यादौ (३५) उस्थाने व। तन्व इत्यादौ (६२२) उकारलोपो वा।

† तश्च थास् च तौ तयोः। थास्साहचर्य्यात् त इति आत्मनेपदस्यैव। अन्यथा परस्मैपदस्य तां तं त एषु अतानिष्टां अतानिष्टं अतानिष्ट एष्वपि प्रसक्तिः। तयोरित्युक्ते द्वित्वावपि थास्ग्रहणं स्पष्टार्थं। अतत अतथाः इति, अनेन सेर्लुकि, लुक्

(२८६) षनु ञ द दाने ।

सनोति । असात असनिष्ट, असाथाः असनिष्ठाः । सायात् सन्यात् । *

(२८७) चणु ञ द वधे ।

अचणीत् । †

(२८८) चिणु ञ द हिंसायां ।

७६४ । नोप्युङो णु र्वा त्वृतः ।

(न ।१।, उपि ७।, उङः ६।, णुः १।, वा ।१।, तु ।१।, ऋतः ६।) ।

चिणोति । ‡

(२८९) ऋणु ञ द गतौ ।

ऋणोति अर्णोति । ‡

(२९०) डु कृ ञ द करणे ।

करोति । ‡

७६५ । कुरुब्लोपो वम्ये । (कुः ५।, उब्-लोपः १।, वम्ये ७।) ।

कुर्वः कुर्मः, कुर्य्यात् । चकृव । §

करणात् (९३) त्यलोपे त्यलक्षणमिति न्यायेन गुणि-सौ परे कार्य्यनिषेधे, अगुणिनोः तथामीः परयोः (६७६) अम्लोपः । अकृः किं, अकृत अकृथाः उभयत्र (६५९) सेः किन्वात् गुणाभावे, (५६२) नित्यं सिलोपः । पाणिनिः २।४।७९ ।

* असातेत्यादि अनेन सेर्लुकि, (६५५) खनसनेति ङा, पचे (५५४) सेरिम् । सायात् सन्यादिति विकल्पेन ङा ।

† अचणीदिति (५७६) चणवर्जनात् न वृद्धिः ।

‡ उपि उङो णु र्न स्यात्, उङ ऋकारस्य तु वा । चिणुति, (६८८) उप्, तस्मिन् परे चिणु उङ इकारस्य न गुणः, तिपि परे उप उकारस्य (५४२) गुणः । ऋणोति अर्णोति इत्यत्र उङ ऋकारस्य वा गुणनिषेधः, एवं तृणोति तर्णोति इत्यादि । उङः किं, कृ-तिप् करोति, अत्र अन्त्य-ऋकारस्य नित्यं गुणः । पाणिनौ मतभेदः ।

§ वच मच यच वम्यं तस्मिन् । कृञः परस्य उपो लोपः स्यात् वे मे ये च परे । कुर्व्वः इत्यादि व म य परेषु उपो लोपः, (२२८) व्यंनच्तयोक इत्यत्र कुर्वर्जनात् न

७६६। समपरेः सुमुपात्तु भूषा-सङ्घ-प्रतियत्न-विकृताध्याहारे।

(सम्-परेः ५।, सुम् ।१।, उपात् ५।, तु ।१।, भूषा-सङ्घ-प्रतियत्न-विकृताध्याहारे ७।)।

आभ्यां कृञः सुम् स्यात् उपात्तु भूषादावर्थे। संस्करोति, समस्कृषातां, सञ्चस्करिथ, सञ्चस्करिव, संस्क्रियात्, संस्कृषीष्ट। परिष्करोति, पर्य्यष्कार्षीत् पर्य्यस्कार्षीत्, उपस्करोति।*

७६७। हस्ते पाणौ प्राध्वं जीविकोपनिषदो व्यस्य कृञि स-स्तिरो मध्ये पदे निवचने मनस्युरस्युपाजेऽन्वाजे साक्षादादेस्तु वा।†

(हस्ते—उपनिषदः ६।, व्यस्य ६।, कृञि ७।, सः १।, तिरस्—साक्षादादेः ६।, तु ।१।, वा ।१।)।

हस्तेकरोति, तिरस्करोति करोति-तिरः।

इति तनादि पादः।

दीर्घः। करोमीत्यत्र, लोपस्वरादेशयोस्तु स्वरादेश-विधि र्बलीति न्यायेन गुणएव। ठी व चकृव (५८४) नेमसुमिति निषेधात् न इम्। पाणिनिः ६।४।१०८,१०९।

* सम्-परिभ्यां कृञः सुम् स्यात्, सुम उकारेत् चिह्नार्थः, मकारेत् (१७) कृधातोरादौ सकारस्थितिः। अर्थानभिधानेऽपि पाणिनिमतैकवाक्यत्वात् भूषासङ्घयोरेव; "सम्पूर्वस्य क्वचिदभूषणेऽपि सुट्" इति सिद्धान्तकौमुदी। उपात्तु भूषादावर्थे। भूषा अलङ्करणं। सङ्घ समूहः। प्रतियत्नो गुणान्तराधानं। विकृतं स्वरूपस्यान्यथाभावः। अध्याहारो वाक्यस्य अश्रुताकाङ्क्षित-शब्दोपादानं। समस्कृषातां टी-आतां, (७४७) स्कृवर्जनात् न इम्। (६५९) कित्‌संज्ञायां न गुणः। सञ्चस्करिथ ठी-थप्, (६१६) स्कृवर्जनात् इम्। सञ्चस्करिव ठी-व, (५८४) असुमिति कथनादिम्। संस्क्रियादिति टी-यात् (६१५) स्कुम्स्तु व्यामेवेति उक्तः गुणनिषेधः। (६२०) ऋस्थाने रिः। संस्कृषीष्ट (६५९) कित्‌संज्ञायां न गुणः। परिष्करोति (५७२) षत्वं। टी-दि (६३३) विकल्पेन षत्वं। पाणिनिः ६।१।१३७,१३८,१३९।

† हस्ते इत्यादेः उपनिषदन्तस्य अव्ययस्य कृञ धातौ परपदे नित्यं समासः स्यात्

३य पादः—क्र्यादिः।

(२९१) डु क्री ञ ग द्रव्यविपर्य्यये।

क्रीणाति। (७०१) श्नाद्योरिति, क्रीणन्ति।

(२९२) स्कु ञ ग न उद्धृतौ।

७६८। स्कु स्कन्भु स्कुन्भु स्तन्भु स्तुन्भुभ्यः श्नुश्नौ वे रे। (स्कु—स्तुन्भुभ्यः ५॥, श्नु-श्नौ १॥, वे ७।, रे ७।)।

एभ्यो वेऽर्थे श्नुः श्ना च स्यात् रे परे।*

स्कुनोति स्कुनाति, विस्कभ्नोति (६२५) विस्कभ्नेति षः—विष्कभ्नाति। एवं विस्कुभ्नोति विस्कुभ्नाति, विष्टभ्नोति विष्टभ्नाति, व्यष्टभत् व्यष्टभ्नीत्, वितष्टम्भ। स्तुभ्नोति स्तुभ्नाति।†

(२९३) मी ञ ग वधे।

(७४५) मिस्योरिति ङा, अमासीत् अमास्त।

तिरःप्रभृतिस्तु वा। एष समासः एकपदीभावमात्रं नतु द्वन्द्वादेरेकतमः। समासकरणस्य (३६६) पूर्व्वनिपात-नियमार्थं क्वाधौ यवर्थस्य। हस्ते पाणौ स्वीकारे। प्राध्वं बन्धनानुकूल्ये। जीविकोपनिषदौ उपमायां। तिरोऽन्तर्धाने। मध्ये पदे निवचने मनसि उरसि इति पञ्च अनुपश्लेष एव, उपश्लेषे तु उरसि कृत्वा हस्तं शेते, पदे कृत्वा मस्तकं शेते श्वा, इत्यादौ न समासः। उपाजे अन्वाजे बलाधानार्थे। साक्षादादेरभूततद्भावे। आदिना—मिथ्या अद्धा नमस् आविस् प्रादुस् बहिस् वशे इत्यादि। पाणिनिः १।४।७१—७९, वार्त्तिकञ्च।

* स्कन्भ स्कुन्भ स्तन्भ स्तुन्भ स्तु रोधने इति चत्वारः सौत्रा धातवः। पूर्व्वधातुपाठे ये न दृश्यन्ते पदविशेषसाधनार्थं सूत्रे तु दृश्यन्ते ते सौत्राः। स्कु आदयः पञ्च स्वादिगणीयाः क्र्यादिगणीयाश्च। पाणिनि ३।१।८२।

† विस्कभ्नाति सूत्रे श्ना-प्रत्ययस्य ग्रहणात् विस्कभ्नोतीत्यत्र न षत्वं। विष्टभ्नोति विष्टभ्नाति उभयत्र (५७२) णीक इति षत्वं। व्यष्टभदित्यादि (५६५) डौ वा, उभयत्र अभ्यपीति षत्वं। वितष्टम्भेति व्यवधानेऽपि षत्वं।

(२९४) पूञ गि शोधने ।

७६९ । प्वादेः स्वो ने व्यादेस्तु वा ।

(पू-आदेः ६।, स्वः १।, ने ७।, व्री-आदेः ६।, तु ।१।, वा ।१।) ।

प्वादीनां स्वः स्यात् ना-त्ये परे व्यादेस्तु वा । पुनाति ।*

(२९५) कॄञ गि हिंसे ।

अकरीष्ट अकरिष्ट अकीर्ष्ट । करिषीष्ट कीर्षीष्ट ।†

(२९६) धूञ गि कम्पे ।

धुनाति । अधावीत् अधोषीत् ।‡

(२९७) ग्रह ञ गादाने ।

गृह्णाति ।‡

७७० । हसान्नानो हौ ।

(हसात् ५।, ना ।१।, आनः १।, हौ ७।) ।

हसात् परो ना आनः स्यात् हो परे । गृहाण । अग्रहीत् ।
जग्राह जगृहतुः जग्रहिथ ।§

---

* ने श्नाप्रत्यये परे इत्यर्थः । प्वादिस्तु—पू लू धू कॄ स्तॄ वॄ शॄ स्वॄ मॄ पॄ बॄ दॄ धॄ नॄ भॄ मॄ गॄ जॄ ऋ ज्या री ली ल्वी (ली) व्री ल्वी (ची) भ्री इति । ज्या गि जरायामित्यस्य प्वादिफलन्तु—जीन, जीनवानित्यत्र ल्वादित्वात् (१०५२) तस्थाने न । पाणिनिः ७।३।८० ।

† अकरीष्टेत्यादि (७४७) इम, (६२७) वा इमो दीर्घः, इमो विकल्पपक्षे (६५९) कित्सञ्ज्ञायां, (६२८) ऋकारस्य इर्, (२२८) दीर्घः । एवं ढी-सीष्ट वा इम, पक्षे ऋ इर्, तस्य दीर्घः ।

‡ (५७३) वेमूदिति वा इम्, पक्षे (५७४) अनिम्त्वात् वृद्धिः । गृह्णाति (६६१) जिः, रस्थाने ऋ ।

§ ग्रह-गी-हि (६६१) जिः, अनेन ना स्थाने आन, (५४७) अकारात् हेर्लोपः । एवं बधान पुषाण मुषाण इत्यादि । हसात् किं, जानीहि । अग्रहीदिति (५७६) हान्तत्वात् न त्रि. । जगृहतुः (६६१) जिः । पाणिनिः ३।१।८३ ।

७७१ । ग्रहेरिमो घेऽथ्यां ।

(ग्रहेः ५।, इमः ६।, घेः १।, अथ्या ७।) ।

ग्रहेः परस्य इमो घेः स्यात्, न तु थ्यां । ग्रहीता ।*

(२९८) गॄ ञ गि हिंसे ।

७७२ । शॄपॄद्रां ख्रो वा किट्थ्यां ।

(शॄ-पॄ-द्रां ६।।।, ख्रः १।, वा ।१।, कित-थ्यां ७।) ।

एषां ख्रः स्यात् किति थ्यां वा । शश्रतुः शशरतुः ।†

एवं (२९९,३००) ञि पॄ गि पालने, दॄ गि विदारे ।

(३०१) ज्या गि जरायां ।

जिनाति, जिज्यौ ।‡

(३०२) व्री गि वृत्यां ।

व्रिणाति व्रीणाति ।‡

(३०३) ज्ञा ग बोधे ।

जानाति ।‡

(३०४) ग्रन्थ ग मोचे ।

ग्रथ्नाति । ग्रेथतुः जग्रन्थतुः, ग्रेथिथ जग्रन्थिथ ।‡

---

* एवं ग्रहीतुं ग्रहीष्यति इत्यादि । ठान्तु जग्रहिथ जग्रहिव । पाणिनिः ७।२।३७।

† शशरतुरिति ह्रस्वाभावपक्षे (६२६) गुणः । एवं पप्रतुः पपरतुः, दद्रतुः ददरतुः । पाणिनि. ७।४।१२ ।

‡ जिनातीत्यादि (६६१) जिः या स्थाने इः । व्रिणातीत्यादि (७६९) वा ह्रस्वः । जानातीति (५९०) जा-आदेशः । ग्रथ्नातीति (५९७) न-लोपः । ग्रेथतुरित्यादि (५६६) कित्पक्षे न-लोपः, (५७९) खिलोपादिश्च । थप् (७५०) जग्रन्थेति न-लोपः पक्षे खिलोपादि ।

एवं (३०५) ग्रन्थ ग दर्भे।

(३०६) कुष ग निष्कोषे।

(५७३) वेमूदितीम् वा। निरकोषीत् निरकुक्षत्।*

(३०७) अश ग भोजने।

अशिता अष्टा।†

(३०८) वृ ञ ग वरणे।

अवरीष्ट अवरिष्ट अवृत। ववृषे। वरिषीष्ट वृषीष्ट।‡

इति क्र्यादि-पादः।

४र्थ पादः—चुरादिः।

(३०९) चुर कि स्तेये।

७७३। चुर्भ्यो ञि र्वा। (चुर्भ्यः ५।।।, ञिः १।, वा।१।)।

चुरादे र्ञिः स्याद्वा स्वार्थे। चोरयति चोरयते। अचूचुरत्। चोरयामास। चोर्य्यात्। पक्षे चोरतीत्यादि।*

---

* निरकुक्षदिति अनिम्पक्षे (६०५) सक्, (६०२) षस्य कः, (१११) षत्वं।

† अशिता अष्टा (६०६) वेमसहतीम् वा, (१५४) षङ्, (४७) तस्थाने ट।

‡ अवरीष्टेत्यादि (७४७) वा इम्, (६२७) इमो वा दीर्घः, अनिम्-पक्षे (६५९) सेः कित्त्वं, (५६२) मिलोपः। ठौ से ववृषे, (५८४) नेमसुमिति इम्-निषेधः। वरिषीष्टेत्यादि (७४७) इम्, पक्षे (६५९) कित्संज्ञायां न गुणः।

---

* वा शब्दस्य व्यवस्थावाचित्वात् चुरादिभ्यो ञिर्नित्यः, चुराद्यन्तर्गणात् (किकारानुबन्धात्) युजादेर्ञिर्वा स्यादित्यर्थः। पक्षे गणान्तरनियमाभावात् सामान्यगणो भ्वादिरित्यर्थः। यत्तु चुरधातोः कि-कारानुबन्धकरणं पक्षे चोरतीत्युदाहरणञ्च तत् कदाचित् चुरादेर्ञेरनित्यत्वज्ञापनार्थं। अनिर्द्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति न्यायात् चुरादेः

(३१०) कॄत क संशब्दे ।

७७४ । कीर्त्त: कत: । (कीर्त्त: ११, कॄत: ६१) ।

कॄत: कीर्त्त: स्यात् ञौ । कीर्त्तयति । *

(३११) गण त् क सङ्ख्याने ।

७७५ । हसाल्लोपोऽशित्यद्योः । .

(हसात् ५१, लोप: ११, अशिति ७१, अत्-यो: ६॥) ।

हसात् परयो: अकार-यकारयोर्लोप: स्यादशिति । गणयति । †

७७६ । वेङ् गणकथ: खेञ्ञाङि ।

(वा ।११, ईङ् ।११, गण-कथ: ६१, खे: ६१, ञाङि ७१) ।

स्वार्थे ञि: । चुरादिभ्यो ञे ञित्वेऽपि उभयपदं न स्यात्, अन्यथा अम ञ क् वितर्के इत्यादेर्ञानुबन्धो व्यर्थ: स्यात्, तेन ङितश्चुरादे-रात्मनेपदं, ञितश्चुरादेरुभयपदं, उभय-भिन्नचुरादे: परस्मैपदमिति । यत्तु अत्र उभयपदोदाहरणं तत् कदाचिदात्मनेपदसिद्ध्यर्थं। चोरयतीत्यादि चुर-ञि:, (५४२) गुण:, चोरि इति (६३१) धातुसंज्ञायां, तिप् शप् गुणा: । चोरि-टोदि, (५५०) अमागम:, (६१३) ञिश्रीत्यङ्, (५५८) चोरि इत्यस्य द्वित्वे, (५६४) खेराद्यच: परभागस्य रि इत्यस्य लोप:, (५५९) खे: ओकारस्य उकारे, (६३८) ञाङ्ङाङ: स्व इति मूलधातोरोकारस्य ह्रस्वे, (६३९) खे: सन्वदिति खेरुकारस्य दीर्घे, (६४१) ञेर्लोप:, अचूचुरदिति । ठौ-णप्, (५८२,५८३) आम्, अस्-प्रयोगश्च । ढौ-यात्, ञेर्लोपे, त्यलोपे त्यलक्षणमिति न्यायात् गुणस्थितौ चोर्य्यादिति । पाणिनि: ३।१।२५ । तन्मते आधृषीयगणात् विभाषा ।

* सर्व्वत्र कीर्त्तादेशे, गणपाठे कॄतधातुकरणं कदाचित् कीर्त्तादेशो न स्यादिति ज्ञापनार्थं, तेन अचीकृतदित्यपि । पाणिनि: ७।१।१०१,८।२।७८ ।

† अत् च यश्च तौ तयो: । प्रकरणबलात् धातुसंज्ञकस्यैव अकार-यकारयो र्लोप:, तेन हसतीत्यादौ न स्यात् । हसात् किं, बोभूयिता । अशिति किं, ईर्ष्यति । परे इति नोक्त्वा अशितीति कथनं, मव्य बन्धे इति धातोर्यङ्लुकि खौ यात् मंमव्यात् इत्यत्र यकारलोपार्थम् । गणयतीति ञौ अनेन अकारलोपे, लोपोऽप्यादेश उच्यते इति न्यायेन स्थानिवत्त्वात् न वृद्धि:, एवं कुण त् कामाप-मन्त्रयोरित्यादीनां कुण-यतीत्यादौ न गुण: । पाणिनि: ६।४,४८,४९ ।

गण-कथयोः खेरीङ् स्यात् वा ञडि। अजीगणत् अजगणत्, (६३८) अग्लोपित्वान्न इः। *

(३१२) कथ त् क वाक्यप्रबन्धे।

अचीकथत् अचकथत्। *

इति चुरादि-पादः।

२य-चतुर्गणाध्यायः।

८मः। ३य-चतुर्गणाध्यायः।

१म पादः—ञान्तः।

७७७। ञिः प्रेरणे। (ञिः ११, प्रेरणे ७)।

धो ञिः स्यात् प्रेरणेऽर्थे। *

---

* ईङः ङानुबन्धात् अन्त्यवर्णस्थाने भवति। अजीगणदित्यादि गण ञिः पूर्व्वसूत्रेण अकारलोपे गणिधातोः टी-दि, (६१३) अङ्, ततः द्वित्वादि, अनेन खेः स्थाने ईङ, ततो (६४१) ञे लोपः। ईङो विकल्पपक्षे अजगणदिति। (६३८) खेः अन्वदिति सूत्रे अग्लोपि-वर्जनात् खेः स्थाने न इः। एवं अचीकथत् अचकथदित्यादि। पाणिनिः ७।४।९७। अत्र सूत्रे गणधातुरेव पठितः नतु कथधातुः।

---

* त्वयैतत् क्रियतामित्यादि क्रियासु नियोजनं प्रेरणं। यथा भृत्यं कर्म्म कारयतीत्यादि। अचेतने तूपचारः। यथा परिश्रमः क्षुधां वर्द्धयतीत्यादि। धोरिति व्याख्यानं सर्व्वप्रकारधातुप्राप्त्यर्थं, तेन भवन्तं प्रेरयति भावयति, कामयमानं प्रेरयति कामयति, चिकित्सन्तं प्रेरयति चिकित्सयति, चोरयन्तं प्रेरयति चोरयति, चिकीर्षन्तं प्रेरयति चिकीर्षयति, चेक्रीयमाणं प्रेरयति चेक्रीययति, चरीकुर्व्वन्तं प्रेरयति चरीकारयति, पुत्रकाम्यन्तं प्रेरयति पुत्रकाम्ययतीत्यादि। प्रेरणार्थञेः परोऽपि ञिः, यथा पिता पुत्रेण शिष्यं वेदं पाठयतीत्यादि, अत्र पुत्रः पाठयतेरेव कर्त्ता नतु पठतेः, तेन (२८४) पुत्रस्य कर्म्मत्वं न स्यात्। ञे ञित्वात् ञान्तधातोरुभयपदप्राप्तिः। पाणिनिः ३।१।२६।

कुर्व्वन्तं प्रेरयति कारयति। अचीकरत्। *
अशशासत् अडुढौकत्। अशूशवत् अशिश्वयत्।
व्यतस्तम्भत्, पर्य्यसीसिवत्, व्यसीसहत्। (५७२) साङ्त्वान्न षः। †
अचीचकासत् अचचकासत्। औन्दिदत् औज्जिजत् आड्डिडत् आर्च्चिचत्। अररम्भत् अललम्भत्। अजीहयत्, (७४८) अनङीत्यक्तो न घिः। अदिध्मनत् अध्मनयीत्, ऐलिलत् ऐलयीत् आर्द्दिदत् आर्द्दयीत्, औनिनत् औनयीत्। ‡

---

* कारयतीत्यादि, कृ ञि (५७७) अन्त्येचो वृद्धिः, कारि इति (६३१) धातुसंज्ञा, ततस्तिप् शपादि। कुर्व्वन्तं प्रैरिरत् अचीकरत्, (५३७) प्रागच्कार्य्यादचि द्विरिति सूत्रात् (८१६) अतएव ञौ द्वित्वे द्विरिति वक्ष्यमाणनियमेन, कृङ् इति धातुसंज्ञायां, टी दि, (५५०) अमागमः, (६१३) ञिश्रीत्यङ्, (५५८) कृङ् इत्यस्य द्वित्वे, (५६४) खेराद्यच इति खेरिकारस्य लोपे, (५५९) ऋकारस्य अकारे ककारस्य च चकारे, ततः (५७७) वृद्धिः, अचकारि इति स्थिते, (६३८) आकारस्य ह्रस्वे, (६३९) सन्वत्त्वे, (६४०) खेरकारस्य इकारे, पुनः (६३९) लघुत्वे दीर्घे, (६४१) ञे लोपः। एवं सर्व्वत्र साधनप्रकारः।

† शासतं प्रैरिरत् अशशासदित्यत्र (६३८) शासवर्जनात् न ह्रस्वः। ढौकमानं प्रैरिरत् अडुढौकदित्यत्र (६३८) ऋदिद्वर्जनात् न ह्रस्वः। श्वयन्तं प्रैरिरत् अशूशवदित्यत्र श्वि ञि, (५३७) प्रागच्कार्य्यादिति नियमात् श्वादौ द्वित्वे, (६६९) श्वर्जिर्वेति वा-शब्दस्य व्यवस्थया खेर्मूलस्य च ञिः इयुक्-वस्थाने उः, ततो वृद्ध्यादिकं। ञि विकल्प पक्षे अशिश्वयदिति। विष्टम्भमानं प्रैरिरत् व्यतस्तम्भत्, परिषीव्यन्तं प्रैरिरत् पर्य्यसीषिवत्, विषहमानं प्रैरिरत् व्यसीसहत्, एषु (५७२) साङ्त्वात् न षः। पर्य्यादिनिमित्तकं खेः षत्वं न स्यात्, खिनिमित्तकन्तु मूलधातोः षत्वं (१११) क्विलादित्यनेन स्यादेवेति श्रीपतिदत्तः।

‡ चकासतं प्रैरिरत् अचीचकासत् अचचकासत्, ऋदित्त्वात् (६३८) उङो न ह्रस्वः, अनेकाच्त्वात् (६३९) वा सन्वद्भावः। उन्द घी क्लेदे, उब्ज आर्ज्जवे, अड्ड अभियोगे, अर्च्च ज् पूजे—इति चतुर्णां धातूनां—उन्दन्तं, उब्जन्तं, अड्डन्तं, अर्च्चन्तञ्च प्रैरिरदिति वाक्ये, ञौ उन्दि उब्जि अड्डि अर्च्चि इति स्थिते, (७१९) नाजन्तादेरिति आद्यचरं द्वित्वा, (७२०) स्यादौ नवद्र इति न व द रांश्च द्वित्वा दि जि डि चि एषां द्वित्वं,

७७८। स्मृदृत्वरप्रथम्रदस्तृस्पशोऽङ् खे ञ्राङि चेष्टवेष्टोस्तु वा ।

(स्मृ—स्पशः ६।, अङ् ।१।, खे ७।, ञ्राङि ७।, चेष्टवेष्टोः ६॥, तु ।१।, वा ।१।)

एषां खेरङ् स्यात् ञ्राङि चेष्ट-वेष्टोस्तु वा ।

असस्मरत् अददरत् अतत्वरत् अपप्रथत् अमम्रदत् अतस्तरत् अपस्पशत्, अचचेष्टत् अचिचेष्टत्, अववेष्टत् अविवेष्टत् । *

७७९। भ्राज भ्रास भास भाष दीप जीव मील पीड कण वण भण श्रण लप लुप लुट ह्वेठां वोङः स्वः । (भ्राज—ह्वेठां ६॥, वा ।१।, उङः ६।, स्वः १।) ।

---

(५८१) पुनरमागमश्च, औन्दिदत् औज्जिजत् आड्डिडत् आर्जिंधदिति । रम्भमाणं लम्भमानञ्च प्रैरिरत् अररम्भत् अललम्भत्, (६३९) गुरुधात्वन्तरपरत्वात् न सन्वद्भावः । ह्विन्नं प्रैरिरत् अजीह्वयत् ; मि ध्वन रवे, इल श शये, अर्द्द पीडायां, ऊन तक् परिहाणे—इति चतुर्णां—ध्वनन्तं, इलन्तं, अर्द्दन्तं ऊनयन्तं प्रैरिरदिति वाक्ये ञौ कृते ध्वनि एलि अर्द्दि ऊनि इति चतुर्भ्यः (६१३) वा अङ्, एलि ऊनि इति द्वयोः (७१९) आद्यच हित्वा द्वित्वं, अर्द्दि इत्यस्य (७१९,७२०) आद्यचं रञ्च हित्वा दि इत्यस्य द्वित्वं । अङोऽभावपक्षे (५५१) द्यां सिः, इमादिकं, इमि परे न ञिलोपः, (५७४) निषेधात् न वृद्धिः । ध्वनि इत्यत्र (५७७) वृद्धौ, (७९८) घटादित्वात् ह्रस्वः ।

† स्मृ इत्यनेन स्मृ स्मृतौ, स्मृ म आैत्के इति द्वयं ; दृ य गि विदारे ; ञि त्वर सङ् स्यदे ; प्रथ म षङ् ख्यातौ ; म्रद म षङ् चोर्दे ; स्तृ ञ गि छादने ; स्पश उ ग्रन्थ-बाधयोः ; एषां समानां खेरङ्विधानात् (६४०) ख्यथेत् समीति इ नं स्यात् (६३९) घीय खि हंसादि धश्चेत्यपि न स्यादित्यर्थः । चेष्ट-वेष्टोस्तु खेरङोऽप्राप्तिपक्षे गुर्वच्चरपरत्वात् (६३९) सन्वद्भावस्याप्राप्तौ खे दीर्घो न स्यात् । असस्मरदित्यादि—स्मरन्तं, दीर्यन्तं, त्वरमाणं, प्रथमानं, म्रदमानं, स्तृणन्तं, स्पशन्तं स्पशमानं वा, चेष्टमानं, वेष्टमानं प्रैरिरदिति वाक्यानि । अत्र दृ ङ श आदरे इति ह्रस्वान्त-दृधातोर्ग्रहणमिति कश्चित्, द्रियमाणं प्रैरिरदिति वाक्यं । स्तृ ञ न स्तृतौ इति ह्रस्वान्त स्तृधातुरत्र न गृहीतः, तस्य तु अतिस्तरदित्येव पदं । पाणिनिः ७।४।९५,९६ ।

एषामुङ: स्व: स्यात् वा ञाङि । अबिभ्रजत् अबभ्राजत् । *

७८० । वर्द्दुङो धु: । (वा ।१।, ऋदुङ: ६।, धु: १।) ।

ऋदुङो धो धुरेव स्यात् वा ञाङि । अवीवृतत् अववर्त्तत् । †

७८१ । स्वपो जि: । (स्वप: ६।, जि: १।) ।

स्वपो जि: स्यात् ञाङि । असूषुपत् । ‡

७८२ । शा च्छा सा ह्वा व्ये वे पां ञौ यन् ।

(शा—पां ६।।।, ञौ ७।, यन् ।१।) ।

एषां ञौ परे यन् स्यात् । शाययति पाययति । §

---

* टु भ्राजृङ ण भासि, टु भ्रासृ ङ ण भासि, भामृ ङ दीप्तौ, भाषृ ङ वाचि, दीपी ङ ऋ दीपने, जीव ऋ प्राणने, मील्ह निमेषे, पीड़्क बाधे, कणृ आर्त्तस्वरे, ऋ वण शब्दे, ऋ भण शब्दे, श्रण क दाने, ऋ लप भाषे, लुप ऋ श प ल ञौ छेदे, लुण्ठ ऋ विलोड़ने, हेठृ ञ बाधे, धीड़श्चेति । टु भ्राशृ ङ ण भासि इति तालव्यान्तोऽपि अत्र गृहीत: । इह द्विधातुमपि न्यासकार: पठति । अत्र वाग्रहणं वाद्वयमध्यवर्त्तित्वेन नित्यत्वनिवारणार्थम् । एतेषु गणपाठे भासधातोर्ऋत्वऋदनुबन्ध: श्रणधातोश्च ऋदनुबन्धा-भाव: कस्यचिदनुरोधादिति दुर्गादास:, वस्तुतस्तु प्रामादिक-एवेति । अबिभ्रजदित्यादि, भ्राजमानं प्रैरिरदित्यादि वाक्यं । पाणिनि: ७।४।३, वार्त्तिकञ्च । अत्र भासधातुर्न दृश्यते, भाष्ये च रणधातुरधिकोऽस्ति।

† ऋत् उङ् यस्य स ऋदुङ् तस्य । ञान्तस्य वृतप्रभृति ऋदुङधातो: टीविभक्तौ, गुणनिवृत्ति र्व्वा स्यादित्यर्थ: । कृपधातो: (६४६) कृपादेशेऽपि ऋदुङ्प्रकृतिकत्वात् अचीकृपत् अचकल्पदिति द्वयमेव स्यात् । अत्र वाग्रहणं परत्रानुवृत्तिनिवृत्त्यर्थम् । अवी-वृतदिति वर्त्तमानं प्रैरिरत् । पाणिनि: ७।४।७ ।

‡ असूषुपदिति स्वपन्तं प्रैरिरत्, स्वप-ञि: स्वापि धातु:, टीदि षङ् अनेन जि:, सुपि इत्यस्य द्वित्वं, (६३६) धीश्च खेर्हसादे र्घ:, (१११) षत्वं । पाणिनि: ६।१।१८ ।

§ शो य निशाने, छो य लूनौ, षो य नाशे, ह्वे ञै स्पर्द्धे, व्ये ञै वृतौ, वे ञै स्यूतौ, पा पाने पै शोषे इति द्वयं । यनो न इत् अन्ते । श्यन्तं प्रेरयति शाययति, पिबन्तं पायन्तं वा प्रेरयति पाययति । पाणिनि: ७।३।३७ ।

७८३। द्वेः पिबः पीप्यो ञ्ङि।

(द्वेः ६।, पिबः ६।, पीप्यः १।, ञ्ङि ७)।

अपीप्यत्। *

७८४। ह्री व्ली री क्नूय्य क्ष्माय्यातां पण् णश्च औ।

(ह्री – आतां ६॥, पण् ।१।, णः १।, च ।१।, औ ७)।

ह्रेपयति व्लेपयति रेपयति क्नोपयति अर्पयति क्ष्मापयति स्थापयति। †

७८५। स्थोङो ञ्ङीः। (स्थोङः ६।, ञ्ङि ७, इः १)।

तिष्ठतेरुङ इः स्यात् ञ्ङि। अतिष्ठिपत्। ‡

७८६। घ्रो वा। (घ्रः ६।, वा ।१)।

अजिघ्रिपत् अजिघ्रपत्। §

---

* द्विरुक्तस्य पा पाने इत्यस्य पीप्यः स्यात् ञ्ङि। पिबन्तं प्रैरिरत् अपीप्यत्। पिबः किं, पै अपीपयत्, पा ल रक्षणे अपीपलत्। पाणिनिः ७।४।४।

† ह्री लि लज्जे, व्ली गि गत्यां, री ङ य स्रवणे री गि रवे इति द्वयं, क्नूयी ङ दुर्गन्धे, ऋ नं हिंसे ऋ लिं गत्यां ऋ प्रापे च इति त्रयं, क्ष्मायी ङ विधूनने इति षण्णां आदन्तानाञ्च औ पण् स्यात्, ण इत् अन्त्याचः परः, यथासम्भवं गुणश्च। ह्रेपयतीत्यादौ पणि कृते, पकारस्यापि धात्ववयवत्वात् लघुङीऽभावात् (५४२) अप्राप्तौ गुण-विधानं। क्नोपयति क्ष्मापयतीत्युभयत्र अन्त्याचः परं पकारस्थित्या तस्मात् परतया (७७५) हसात् ओप इति य-लोपः। आदिष्टा आदन्ता अपि, तेन दै ङ पालने (६०८) दापयति, ङ क्री ञ ग द्रव्यविपर्य्यये क्रापयतीत्यादि, (७९३) ईस्थाने आ। जिह्रियतं, व्लीनन्तं, रीयमाणं रीणन्तं वा, क्नूयमानं, ऋण्वन्त इयृतं ऋच्छन्तं वा, क्ष्मायमाणं, तिष्ठन्तञ्च प्रेरयतीति वाक्यानि। पाणिनिः ७।३।३६।

‡ स्था इत्यस्य उङ् स्थोङ् तस्य। पणि कृते स्थाप इत्यस्य उङः इः स्यात् ञ्ङीत्यर्थः। अतिष्ठिपदिति स्थाप इत्यस्य आकार इकारे स्थिपि इत्यस्य द्वित्वादि, (१११) षत्वं। पाणिनिः ७।४।५।

§ घ्रा धातोः पणि कृते घ्राप-भागस्य उङ इः स्याद्वा ञ्ङि। अजिघ्रिपदिति

७८७। पाति-स्फायोर्लन्-वङौ ञौ।

(पाति स्फायोः ६॥, लन् वङौ १॥, ञौ ७।)।

पालयति स्फावयति। *

७८८। प्री-धूञोर्नन् वा। (प्री धूञो. ६॥, नन् ।१।, वा ।१।)।

प्रीणयति प्राययति, धूनयति धावयति। †

७८९। रुहः पङ् वा। (रुहः ६।, पङ् ।१।, वा ।१।)।

रोपयति रोहयति। ‡

७९०। शदोऽगतौ तङ्। (शदः ६।, अ गतौ ७।, तङ् ।१।)।

शातयति। गतौ तु, गाः शादयति गोपः। §

जिघ्रन्तं प्रेरितवानिति वाक्ये ञौ परे घ्राप इत्यस्य आ इः, ततः घ्रिपि इत्यस्य द्वित्वादि। इकाराभावपक्षे घ्रापि इत्यस्य द्वित्वादौ, (६३८) उङो ह्रस्वे, (६३९) सन्वद्भावे, (६४०) खेरित्वे, खर्गुरुत्वात् (६३९) दीर्घाभावे, (६४१) ञेर्लोपे, अजिघ्रपदिति। पाणिनिः ७।४।६।

* पा ल रक्षणे इत्यस्य लन्, स्फायी ङ वृद्धौ इत्यस्य वङ् स्यात् ञौ। लनौ नित्त्वादन्ते, वङौ ङित्त्वादन्त्यस्य स्थाने। पान्तं प्रेरयति, स्फायमानं प्रेरयतीति वाक्यद्वयं। पाणिनिः ७।३।४१, "पातेर्लुग्वचनम्" इति वार्त्तिकञ्च।

† प्रीश्च धूञ् प्रीधवौ, तौ च तौ ञौ (ञानुबन्धौ) चेति तयोः। प्री ञ तर्पणे प्री ग ञ कान्तौ इति द्वयोः, धू ञ गि कम्पे इत्यस्य च नन् स्याद्वा ञौ। नित्त्वादन्ते। धूञ इति ञानुबन्धग्रहणात् नान्येषामित्यर्थः। प्रीणन्तं प्रीणन्तं वा प्रेरयति, धूनन्तं प्रेरयति इति वाक्यद्वयं। ननोऽभावपक्षे (५७७) अन्त्यचो वृद्धिः। "णिच्प्रकरणे धूञ्-प्रीञोर्नुग्वचनम्" इति वार्त्तिकम्।

‡ जि ञ रुहौ जन्या-मित्यस्य पङ् स्याद्वा ञौ ङित्त्वादन्त्यस्य स्थाने। अत्र वा-ग्रहणं परत्रानुवृत्तिनिवृत्त्यर्थं। रूप-धातोः रोपयतीति सिद्धावपि, रोपयतीत्यस्य उत्पादनार्थबोधनार्थं रुहः पङ्-विधानम्। रोहन्तं प्रेरयतीति वाक्यम्। पाणिनिः ७।३।४३।

§ शद् लृ ञौ शाते इत्यस्य तङ् स्यात् ञौ, न तु गतौ। शीयमानं प्रेरयति शातयति, पातयतीत्यर्थः। गत्यर्थस्य तु शादयति गमयतीत्यर्थः। पाणिनि. ७।३।४२।

७९१। लाल्यो र्लन्ननौ स्नेहद्रवे वा।

(ला-ल्योः ६॥, लन्-ननौ १॥, स्नेहद्रवे ७।, वा ।१।)।

लाते र्लन् लियो नन् स्यात् स्नेहद्रवेऽर्थे ञौ वा। विलालयति विलापयति। विलीनयति, (७४५) मिम्योरिति ङा वा, विलापयति विलाययति घृतं। स्नेहद्रवे किं, लौहं विलापयति विलाययति। *

७९२। वो जन् धृतौ। (वः ६।, जन् ।१।, धूतौ ७।)।

वाते र्जन् स्यात् कम्पने ञौ। वाजयति। धूतौ किं, केशान् वापयति। †

७९३। क्रीजीङो ऽजा चि स्फुर प्रजनार्थवीनान्तु वा।

(क्री-जि-इङः ६।, अच् ।१।, आ ।१।, चि स्फुर-प्रजनार्थवीनां ६॥, तु ।१।,वा ।१।)।

एषामच आ स्यात् ञौ, च्यादेस्तु वा। क्रापयति जापयति अध्यापयति। ‡

---

* स्नेहस्य घृतादेर्द्रवीकरणं स्नेहद्रवः। "स्नेहविपातने" इति पाणिनिः। "स्नेहद्रव्यद्रावणे" इति क्रमदीश्वरः। ला ल च ग्रहे, लीं कि द्रावणे इत्येतयोर्ग्रहणं। "लीलोर्ङीः" इति क्रमदीश्वरः (तिङन्तपादे ४५० सूत्रे)। विलान्तं प्रेरयति विलालयति, पचे (७८४) आदन्तत्वात् पण् विलापयति। विलाययन्तं प्रेरयति विलीनयति। उभयत्र घृतं द्रावयतीत्यर्थः। पाणिनिः ७।३।३९।

† वा ल गमन-हिंसयोरित्यस्य वान्तं प्रेरयतीति वाक्ये वाजयति कम्पयतीत्यर्थः। केशान् वापयति परिष्करोतीत्यर्थः। पाणिनिः ७।३।३८। अत्र वैधातुग्रहणं न तु वाधातुः, यतो वजधातोर्वाजयतीत्यादिसिद्धौ वै इत्यस्य पुक् (पण्) मा भूत्, इति पाणिनिटीका।

‡ क्रीश्च जिश्च इङ् च समाहारे तस्य। प्रजनो गर्भग्रहणम् अर्थो यस्य सः प्रजनार्थः, सचासौ वीश्चेति प्रजनार्थवीः, चिश्च स्फुरश्च प्रजनार्थवीश्च तेषां। वीनामिति (११०) नुमागमः सूत्रत्वात्। डु क्री ञ ग द्रव्यविपर्य्यये, जि जये, अधी ङ न अध्ययने, एषामित्यर्थः। क्रापयतीत्यादि—क्रीणन्तं जयन्तम् अधीयानञ्च प्रेरयतीति वाक्यानि। अनेन अचः स्थाने आ, ततः (७८४) आदन्तत्वात् पण्। पाणिनिः ६।१।४८,५४,५५।

अध्यजीगपत् अध्यापिपत्। चापयति चाययति। चपयति चययति (७६८) मित्त्वात् ह्रस्व इति प्रक्रियारत्ने दृष्टं। स्फारयति स्फोरयति। वापयति वाययति, गाः पुरोवातो गर्भं ग्राहयतीत्यर्थः। *

८६४। स्मिभ्यो घात् ध्वर्थे मञ्च।

(स्मिभ्योः ६॥, घात् ५।, ध्वर्थे ७।, मं १।, च।१।)

अनयोरच आ स्यात् घात् ध्वर्थे ञौ मञ्च। विस्मापयते भापयते मुण्डः। घात् किं, कुञ्चिकयैनं विस्माययति भाययति। †

७६५। भी भीष् वा। (भीः १।, भीष्।१।, वा।१।)।

भियो घ-भये भीष् स्याद्वा ञौ मञ्च। भीषयते मुण्डः। ‡

---

* अध्यजीगपदिति अधि-इ-टी दि, (७१३) गा-आदेशे, पण्, ततः गापि इत्यस्य द्वित्वादि। गा आदेशस्य विकल्पपक्षे अनेन इ स्थाने आ, ततः पणि आपि इति स्थिते (७१६) पि इत्यस्य द्वित्वे अध्यापिपदिति। चापयतीत्यादि चिन्वन्तं प्रेरयति, चि-ञि, अनेन इस्थाने आ, ततः पण्; पक्षे (५७७,३५) वृद्ध्यादि। प्रक्रियारत्नं वैयाकरण-ग्रन्थविशेषः। स्फुरन्तं प्रेरयति अनेन वा उकारस्य आ। वीनन्तं वियन्तं वा प्रेरयति वापयति, अनेन आ, ततः पण्। पक्षे वृद्ध्यादि। पुरोवातः पूर्व्वदिग्वायुः। वर्षासु पूर्व्ववायौ वाति गावो गर्भं गृह्णन्तीति प्रसिद्धिः।

† ष्मि ङ स्मिते, ञि भी ञि भीत्यां, अनयोरर्थौ यदि जात्मकर्त्तृतः प्रतीयते तदा अच आ, आत्मनेपदञ्च स्यादित्यर्थ', अन्यत्र आ न स्यात् आत्मनेपदञ्च न स्यादिति। विस्मयमानं बिभ्यतञ्च प्रेरयति अनेन आ, ततः पण्, आत्मनेपदमेव। मुण्डः मुण्डित-मस्तको जन इति दुर्गादासः। एवं विस्मापयते भापयते व्याघ्रः इत्यादिषु कर्त्तृत एव धात्वर्थप्रतीतिः। अन्यत्र कुञ्चिकया मत्स्य-विशेषेण करणेन एनं जनं कश्चित् विस्माययति भाययति, एवं खड्गादिना विस्माययति भाययति इत्यादिषु करणकारकात् धात्वर्थनिष्पत्तिः नतु कर्त्तृतः, अतएव अचः स्थाने आ न स्यात्, आत्मनेपदञ्च न स्यात्। पाणिनिः ६।१।५६,५७, १।३।६८।

‡ घभये कर्त्तृतोभये निष्पन्न इत्यर्थः। पक्षे पूर्व्वसूत्रेण भापयते इति। एवं भीषयते भापयते व्याघ्रः। घात् किं, खड्गेन तं भाययति। पाणिनि. ७।३।४०।

७९६। दुषेरोदूः। (दुषे: ६।, ओत् ।१।, ऊः १।)।

दुषेरोकार ऊ: स्यात् ञौ। दूषयति।*

७९७। चिद्विकारे वा। (चिद्विकारे ७।, वा ।१।)।

दूषयति दोषयति चित्तं।†

७९८। घटादि जनी जॄष क्नस रञ्जाम मारतोषनिशान निशामार्थ-ज्ञां स्वो ऽकमामचमो ञौणमोस्तु घंश्च जागुश्च।

(घटादि—ज्ञां ६।।।, स्व:१।, अकमामचम: ६।, ञौणमौ: ७।।, तु ।१।, घं: १।, च ।१।, जागु: ६।, च ।१।।

घटाद्यादेरमन्तस्य माराद्यर्थ-ज्ञस्य ञौ स्व: स्यात् नतु कमामचमां, ञे: परयो रिणमोस्तु घंस्य जागुश्च स्वो घं:।‡

---

* इर्दुध्यौ वैकृते इत्यस्य ञि-निमित्तके गुणे कृते दोषि इत्यस्य ओकारस्य ऊ: स्यादित्यर्थ:। दुषे घं: इति कृते तु, दोष: दोषणं इत्यादि पदं न सिध्यति। दूषण-मिति तु ञ्यन्तस्यैव। दुष्यन्तं प्रेरयतीति वाक्यं। पाणिनि: ६।४।९०।

† चित् मन: तस्य विकारश्चिद्विकार:, तस्मिन्नर्थे दुषे ञौ कृते ओकार ऊ: स्याद्वा इत्यर्थ:। दूषयति दोषयति चित्तं, क्रोध इति शेष:। पाणिनि: ६।४।९१।

‡ मारस्य तोषस्य निशानस्य निशामस्य ते अर्था यस्य स मारतोषनिशाननिशामार्थ:, स चासौ ज्ञश्चेति मारतोषनिशाननिशामार्थज्ञा:। घटादिश्च जनीश्च जॄषश्च क्नसश्च रञ्जश्च अमश्च मारतोषनिशाननिशामार्थज्ञाश्च ते तेषां। कम च अम च चम च कमामचम, न कमामचम अकमामचम तस्य। इण् (९२१) च णम् (११८३) च इणमौ, ञे: परौ इणमौ ञौणमौ तयो:। गणपाठे मकारानुबन्धो घटादि:, अतएव घट म ङ चेष्टे इत्यस्य ग्रहणं, नतु घट क हिंसे इत्यस्य। आदिना यावतीयानां मानुबन्धानां ग्रहणं। जनीग्रहणेन जनी य्यङ प्रादुर्भावे इत्यस्य प्राप्ति:, जन म लि च इत्यस्य मानुबन्धत्वेऽपि न प्राप्ति:। जॄष ग्रहणात् जॄ गि कि जराने इत्यस्याप्राप्ति:। अम: इत्यनेन अमन्त-मात्रस्य ग्रहणं, कम अम चम इति त्रयाणां तदन्तर्गतत्वात् वर्जनं। मारा मारणं, तोष:

घटयति व्यथयति प्रथयति, जनयति जरयति क्नसयति, रज-यति मृगान् रमयति, ज्ञपयति। कमादेस्तु, कामयति श्राम-यति चामयति। *

७९९। ज्वल ह्वल ह्मल ग्ला स्ना वन रम नमो ऽगे र्वा।

(ज्वल—नमः ६।, अ गेः ६।, वा ।१।)।

एषामगीनां स्वः स्याद्वा ञौ। ज्वलयति ज्वालयति, ग्लपयति ग्लापयति।

अगेः किं प्रज्वलयति प्रग्लापयति। †

८००। वा श्रम यम फण गिस्वदां।

(वा ।१।, श्रम यम फण गि-स्वदां ६।।।)।

परितोषणं, निशानं तीक्ष्णीकरणं, निशामो दर्शनप्रेरणं। क्रमेण यथा—ज्ञपयति शत्रुं वीरः, ज्ञपयति पुत्रं पिता, ज्ञपयति खड्गं कर्म्मकारः, ज्ञपयति रूपं कामिनी। निशामो ज्ञानप्रेरणमिति क्रमदीश्वरादयः, अतएव विज्ञापनार्थे विज्ञप्तिरित्यपि प्रयोगः। एतद्भिन्नेऽर्थे ज्ञापयति। पाणिनिः ६।४।९२,९३, ७।३।३४, वार्त्तिकञ्च।

* घटमानं, व्यथमानं, प्रथमानं, जायमानं, जीर्य्यन्तं, क्नस्यन्तं, रजन्तं, रममाणं, जानन्तं, कामयमानं, श्रमन्तं, चमन्तञ्च, प्रत्येकं प्रेरयतीति वाक्यानि। रजयतीत्यस्य मृगान् रमयतीत्यर्थः, तेन (६६०) मृगरमणार्थे न-लोपः। रमयतीत्यनेन अमन्तोदाहरणञ्च दर्शितं। ञौञमीस्तु अघटि अघाटि, घटं घटं घाटं घाटमित्यादि। जागुस्तु—अजागरि अजागारि, जागरं जागरं जागारं जागारं।

† ज्वल ज म बल-त्विषोः, ह्वल ह्मल म च चाले, ग्लै क्षमे, ष्णा ल शोधने, वनु म व्यापृतौ, रमु ङ जौ क्रीडे, नमौ शब्द नत्योः। पूर्व्वसूत्रे ग्ला-स्नोरप्राप्तौ अन्येषाञ्च नित्यप्राप्तौ विकल्पः। अतएव प्रज्वलयतीत्यादौ घटादित्वात् नित्यं ह्रस्वः, प्रग्लापयति प्रस्नापयतीत्युभयत्र न ह्रस्वः। ज्वलन्तं ग्लायन्तञ्च प्रेरयतीति वाक्यद्वयं। रम इत्यत्र वम इति क्वचित् पाठः। भाष्यम्।

एषां स्वः स्याद्वा ञौ। शमयति शामयति, यमयति याम-यति, फणयति फाणयति, परिस्खदयति परिस्खादयति । *

८०१ । हनस्तङ्-ऽणबिणि ञ्णिति ।

(हन: ६।, तङ् ।१।, अ-णप्-इणि ७।, ञ्णिति ७।) ।

ञिति णिति च परे हन्तेस्तङ् स्यात् नतु णपि इणि च। घातयति । †

८०२ । यिः सन् वेर्ष्यो द्विः ।

(यिः १।, सन् ।१।, वा ।१।, ईर्ष्य: ६।, द्विः १।) ।

ऐर्ष्यियत् । ‡

इति आन्त-पादः ।

---

* गे: स्खद गिस्खद, शम च यम च फण च गिस्खद् च तेषां । अत्र वाशब्दस्य व्यवस्थया शमुभिर्थ शमे इत्यस्य नित्यं ह्रस्वः, शम ङ कालोचे इत्यस्य नित्यं ह्रस्वाभावः । ञौ यम् उपरमे इत्यस्य नित्यं ह्रस्वः, यम क भि परिवेशने इत्यस्य तु विकल्पेन । एवं अव परि पूर्वकस्यैव स्खदस्य वा ह्रस्व इति कातन्त्राद्याः, अन्यपूर्वकस्य केवलस्य च घटादित्वात् नित्यमेव ह्रस्व इति । शाम्यन्तं शामयमानं वा, यमयन्तं, फणन्तं, परिस्खद-मानञ्च प्रेरयतीति वाक्यानि । भाष्यम् ।

† णप् च इण् च णबिण्, न णबिण् अनबिण् तस्मिन् । ञ च ण च ञ्णौ, तौ इतौ यस्य स ञ्णित् तस्मिन् । तङो ङ इत् अन्त्यस्य स्थाने । घ्नन्तं प्रेरयतीति वाक्ये हन-ञि, अनेन हनो नस्थाने त, (६७९) ह-स्थाने घ, (५७७) वृद्धिः, घाति इति (६३१) धातुः । णबिणोस्तु जघान, अघानि । पाणिनिः ७।३।३२ ।

‡ ञौ कृते द्वित्वहेतौ सति ईर्ष्यधातोः यिरेव द्विः स्यादित्येकोऽर्थः । सनि कृते तु यि र्वा द्विः स्यात्, सन् च वा द्विः स्यादित्यपरोऽर्थः । ईर्ष्यन्तं प्रेरिरदिति वाक्ये ईर्ष्य-ञि, (७७५) य लोपस्य नित्यत्वेऽपि येर्द्वित्वविधानज्ञापकात् यलोपाभावे ईर्ष्यि इत्यस्य (६३१) धातुसंज्ञायां टौ दि, (६१३) अङ्, ततः अनेन केवलं यि इत्यस्य द्वित्वे, (६४१) ञे लोपे ऐर्ष्यियदिति । सनि तु (५५४) इमि, यि इत्यस्य द्वित्वे ईर्ष्यियिषति, सनो द्वित्वे ईर्ष्यिषिषति । "ईर्ष्यतेस्तृतीयस्येति वक्तव्यम्" इति वार्त्तिकम् ।

८०३ । सन्निच्छायां । (सन् ।१।, इच्छायां ७।) ।

धोः परः सन् स्यादिच्छार्थे । अत्तुमिच्छति जिघत्सति । दिदासते दिदीषते, दिद्योतिषते, उतिच्छिषति उचिच्छिषति, अधिजिगापयिषति अध्यापिपयिषति, शुशावयिषति शिश्वाययिषति, जुहावयिषति । *

---

* यस्य धातो र्यो ऽर्थस्तद्विषयाया-मिच्छायां तस्मात् धातोः सन् स्यादित्यर्थः । अत्तुमिच्छतीति वाक्येन, इच्छायां तुमुगर्भायामेव, नतु अदनमिच्छतीत्यादिरूपायां । "तुंगर्भादिच्छायां" सन्निति कौमाराश्च । इच्छासनन्तात् पुन र्न सन्, इच्छाया इच्छान्तरासम्भवात् । स्वार्थसनन्तात्तु स्यादेव, चिकित्सिषतीत्यादि । अचेतनस्य इच्छाया असम्भवेऽपि नदीकूलं पिपतिषतीत्यादौ विवक्षायां सन् । सन्प्रत्ययश्च वक्तुरिच्छया वैकल्पिक एव, पक्षे वाक्यस्यैव स्थितिरिति । सनो न इत् चिह्नार्थः, अदन्त-स-स्थितिः । जिघत्सतीत्यादि—अद-सन्, (६७३) घस-आदेशः, (६६८) सस्य त्, घत्स इति, ततः (६३२) द्वित्वादि, जिघत्स इति (६३१) धातुसंज्ञा, ततः तिप्, शप्, (५४३) सनो ऽकार-लोपः । सनन्तधातोः (६३६) सनः पर्म इत्यनेन परस्मैपदादिनियमः । दातुमिच्छति दा-सन् (७४३) ङा वा, दास इत्यस्य द्वित्वादि, पक्षे दीस इत्यस्य द्वित्वादि । द्योतितुमिच्छति द्युत-सन्, (५५४) इम्, द्वित्वं, (६४७) खेर्जिः । उच्छितुमिच्छति उच्छ-सन्, इम् उच्छिष इति स्थिते, (७१९) उकारं हित्वा च्छिष इत्यस्य द्वित्वे, (५९९) खेश्छस्य वा त । अध्यापयितुमिच्छति अधि-इ-जि-सन्, (७१३) इङो वा गा-आदेशः, (७८४) आदन्तत्वात् पण्, गापि-धातुः, ततः (५५४) इम्, गुणः, एस्थाने अय्, गापयिष इत्यस्य द्वित्वं जिगापयिष धातुः ततः तिबादि । पक्षे (७९३) इ स्थाने आ, पण्, आपयिष इति स्थिते (७१९) आकारं हित्वा, पयिष इत्यस्य द्वित्वादि । श्वाययितुमिच्छति श्वि-जि-सन्, (६६९) श्विधातो र्विकल्पेन जिः, (५३७) प्रागच्कार्य्यादिति नियमेन शु इ स इत्यस्य द्वित्वे, ततः (५७७) वृद्ध्यादि, इमादि च । जि-विकल्पपक्षे श्वि इस इत्यस्य द्वित्वादि । ह्वाययितुमिच्छति ह्वे-जि-सन् (६०८) ए स्थाने आ, ह्वा इ स इत्यस्य द्वित्वे (६६७) द्वित्वान्त-ह्वे-धातो र्जिः, ह्वा-भागस्याभावात् (७८२) यनोऽभावे, वृद्ध्यादि, इमादि च । पाणिनिः ३।१।७ । अत्र सूत्रे विकल्पः ।

८०४। णुर्नानिमि। (णु:१।, न ।१।, अनिमि ७।)।

अनिमि सनि णु र्न स्यात्। विवृत्सति विवर्त्तिषते, निनृत्सति निनर्त्तिषति, तितरीषति तितरिषति तितीर्षति। *

८०५। घीं ऽज्झनिङ्गमां। (घीं: १।, अज्झनिङ्गमां ६।।)

अजन्तस्य हन्ते-रिङः स्थाने जातस्य गमश्च घीं: स्यात् अनिमि सनि। दुध्वूर्षति दिध्वरिषति, वुवूर्षति विवरीषति विवरिषति सञ्चिस्कीर्षति, जिगीषति, चिकीर्षति चिचीषति, जिघांसति।†

८०६। गमोनिङो:। (गमि ।१।, इन्-इङो: ६।।)।

---

* नास्ति इम् यस्य स: अनिम् तस्मिन्, सनि इत्यस्य विशेषणं। सन् इत्य विभक्तिव्यत्ययेन अनुवृत्तिः। यत्र गुणस्थानं सम्भवति तत्रैव सनोऽगुणित्वं, जिघांसतीत्यादौ (६७६) न अम्लोपः। वर्त्तितुमिच्छति विवृत्सति (६४८) अत पम् इत्यनेन भाविपरस्मैपदे, (६४८) वृद्भ्यो नेम् पे इति इमनिषेधे गुणनिषेधः, वृ इत्यस्य द्वित्वादि। आत्मनेपदे तु इमि, गुणः। नर्त्तितुमिच्छति निनृत्सति निनर्त्तिषा (७३९) इमोऽभावपक्षे गुणाभावः, इम्पक्षे गुणएव। तरीतुमिच्छतीति पद तृ-सन् (७४७) वा इम्, (६२७) इमो वा दीर्घः। अनिम्पक्षे अगुणत्वात् (६ ऋस्थाने इर, (२२८) तस्य दीर्घः। पाणिनिः १।२।१०।

† इङो गम इङ्गम्, अच च हन् च इङ्गम् च तेषां। दुध्वूर्षतीत्यादि ध्वर्त्तुमिच्छ ध्वृ सन् (७४७) अनिम्पक्षे अनेन दीर्घे, अन्तरङ्गत्वादादौ (६२८) उर्, ततो द्वित्वा (२२८) दीर्घः, दुध्वूर्ष धातोर्मित्वादि। इम्पक्षे दिध्वरिषति। वरीतुमिच्छ वृ-सन् (७४७) इमो विकल्पपक्षे अनेन दीर्घं, ऋस्थाने उर्, ततो द्वित्वादिकं। इम (६२७) इमो वा दीर्घः। सस्कर्त्तुमिच्छति संस्कृ-सन् (७५७) स्कृवर्जनात् न इम, दीर्घे, (६२८) ऋस्थाने इर, तस्य दीर्घः। जेतुमिच्छति जि-सन् (६००) गि-आदे अनेन दीर्घे गीष इत्यस्य द्वित्वादि। चेतुमिच्छति चि-सन्, (७४६) वा कि-आदे अनेन दीर्घः। हन्तुमिच्छति हन-सन्, अनेन दीर्घः, हान्स इत्यस्य द्वित्वादि, (६ हस्य घः। पाणिनिः ६।४।१६।

इनिङोः स्थाने गमिः स्यात् सनि। जिगमिषति, अधिजिगांसते। *

८०७। नेमुगुहग्रहः। (न ।१।, इम् ।१।, उ गुह-ग्रहः ५।)।

उवर्णान्तात् गुहो ग्रहश्च सन इम् न स्यात्। जुहूषति, बुभूषति, जुघुक्षति। †

८०८। ग्रहस्वपप्रच्छां जिः। (ग्रह स्वप प्रच्छां ६।, जिः ।१।)।

एषां जिः स्यात् सनि। जिघृक्षति, सुषुप्सति। ‡

८०९। स्मिङ् पूङ् ऋ जनञ्जश् किर गिर दृङ्य धिय प्रच्छ इम्। (स्मिङ् पूङ्-ऋ-अनञ्ज-अश्--प्रच्छः ५।, इम् ।१।)।

---

* गमिरिति इकारानुबन्धेन गमधात्वादेशः स्यादित्यर्थः। गमधातुनैव पदसिद्धौ इनः स्थाने गमादेशकरणं, गमनार्थस्य इन-धातौ गमादेशः स्यात्, ज्ञानार्थस्य न स्यादिति ज्ञापनार्थं, तेन ज्ञानार्थे प्रतीषिषतीति (८१९) सनन्तशेषे स्वयमुदाहृतं। एतुमिच्छति इ-सन्, गमादेशे (६२४) गमोऽमे स इम् इति इम्, गमिष इत्यस्य द्वित्वादि। अध्येतुमिच्छति अधि-इ-सन्, गमादेशे (८०५) दीर्घे, इङः स्थानिवत्त्वादात्मनेपदविषये, गमोऽमे स इमित्यत्र आत्मनेपदवर्जनादिमोऽभावे, गांस इत्यस्य द्वित्वादि। पाणिनिः २।४।४७,४८। अत्र वक्तव्यम्--(२।४।४६) इति पाणिनिसूत्रेण इन्धातोः सन्वत् अन्तेऽपि गमादेशः, बोधनार्थे तु न भवति। यथा गमयतीति। बोधनार्थे तु प्रत्याययति।

† उश्च गुहश्च ग्रहश्च तस्मात्। उः उवर्णान्तः। होतुमिच्छति [illegible] सन्, (८०५) दीर्घे हूष इत्यस्य द्वित्वादि। एवं ह्वातुमिच्छति, ह्व सन्, (९०[illegible]) एस्थाने आ, ह्वास इत्यस्य द्वित्वे, (९६७) द्विरुक्तस्य जिः, ततः दीर्घे जुहूषति, अत्रापि उदन्तत्वादनेन इम्-निषेधः। भवितुमिच्छति बुभूषति दीर्घोदन्तत्वादिमनिषेधः। गूहितुमिच्छति गुह-सन्, अनेन इमनिषेधः, (१७५) हस्य ढ, (१७७) गस्य घ, (९०२) उस्य ओः, घुघ इत्यस्य द्वित्वादि। पाणिनिः ७।२।१२।

‡ ग्रहीतुमिच्छति ग्रह सन्, पूर्वसूत्रेण इमनिषेधः, अनेन जिः, हस्य ढ, गस्य घः, ढस्य कः, घृक्ष इत्यस्य द्वित्वादि। स्वप्तुमिच्छति स्वप सन् [illegible], अनेन जिः, सुप्स इत्यस्य द्वित्वादि, (१११) षत्वं। पाणिनि [illegible]

एभ्यः परस्य सन इम् स्यात्। सिस्मयिषते पिपविषते अरिरिषति अञ्जिजिषति अशिशिषते चिकरिषति पिपृच्छिषति। *

८१०। भ्रस्ज श्रि स्वृ यु ऊर्णु भर दरिद्रा सन तन पत ज्ञप र्द्धिं दम्भिवो वा। (भ्रस्ज—इषः ५।, वा ।१।)।

एभ्यः सन इम् स्याद्वा। बिभर्जिषति बिभ्रज्जिषति बिभ्रक्षति, शिश्रयिषति शिश्रीषति, सिस्वरिषति सुस्वूर्षति, यियविषति युयूषति, ऊर्णुनुविषति ऊर्णुनविषति ऊर्णुनूषति, बिभरिषति बुभूर्षति, दिदरिद्रिषति दिदरिद्रासति, सिसनिषति सिषासति, तितनिषति तितंसति,—तितांसतीत्येके। पिपतिषति। †

---

* स्मिङ् च पूङ् च ऋश्च अन्ज च अशूश्च किरश्च गिरश्च द्रियश्च धियश्च प्रच्छ च तस्मात्। स्मिङ्-पूङो ङकारः आत्मनेपदित्व-ज्ञापनार्थः। अशू इति ऊकारानुबन्धः। किर गिर द्रिय धिय इति कृ गृ दृ धृ इत्येषां ग्रहणं। स्मि ऋ दृ धृ एषां (५८७) एकाजिवर्णान्तत्वात् एकाजृवर्णान्तत्वाच्च, पू इत्यस्य (८०७) उवर्णान्तत्वात्, प्रच्छ इत्यस्य औदित्त्वाच्च इमोऽप्राप्तौ, अन्ज अश एतयोरुदित्त्वात् (५७३), कृ गृ एतयोश्च (७४७) विकल्पप्राप्तौ, नित्यार्थं विधानं। स्मेतुं पवितुं अर्त्तुं अञ्जितुं अशितुं करीतुं प्रष्टुञ्च प्रत्येकमिच्छतीति वाक्यानि। सिस्मयिषते इत्यत्र (८१९) जिस्कोरिति नियमेन मूलधातोर्न षत्वं। पिपविषते इति पू इ स इत्यस्य (५३७) प्रागच्कार्य्यादचि द्विरिति नियमेन आदौ द्वित्वे, (८१६) वक्ष्यमाण-जयल्पोरित्यनेन स्वरुकारस्य इः। अरिरिषति ऋ इ स इत्यस्य ऋकारस्य गुणे अरिष इत्यस्य (७१९) आद्यचं हित्वा रिष इत्यस्य द्वित्वं। अञ्जिजिषति अन्जिष इत्यस्य आद्यचं, (७२०) नकारञ्च हित्वा जिष इत्यस्य द्वित्वं। अशिशिषते इति अकारं हित्वा द्वित्वं। चिकरिषति इत्यत्र (६२७) इमो दीर्घे चिकरीषति इति च भवति। सिद्धान्तकौमुदीमते तु दीर्घो नेष्टः। एवं जिगरीषति जिगरिषति, दिदरिषति, दिधरिषति। पिपृच्छिषति (८०८) सूत्रसूत्रेण जिः। पाणिनिः ७।२।७४,७५।

† भ्रस्ज च श्रिश्च स्वृश्च युश्च ऊर्णुश्च भरश्च दरिद्राश्च सनश्च तनश्च पतश्च ज्ञपश्च ऋधिश्च दन्भ च इव च तत्तस्मात्। भ्रस्जो ज श पाके, श्रि ञ सेवायां, स्वृ ऊ शब्दो-

৮১১। মি মী মা দা রভ লভ শক পত পদ্ হিংসার্থরাধোঽচোঽনিমসনীস্ খিলোপশ্চ।

(মি—রাধ: ৬।, অচ: ৬।, অনিম্সনি ৭।, ইস্ ।১।, খিলোপ: ১।, চ।১।)।

এষামচ ইস্ স্যাত্ খিলোপশ্চানিমসনি। (২১৩) স্যাদেঃ সো লোপ:। পিৎসতি। জিজ্ঞপয়িষতি। *

পতাপযো:, যু ল মিশ্রণে, ঊর্ণু ঞ ল আচ্ছাদনে, ভৃ ঞ ভরণে ইতি ভৌবাদিকস্য গ্রহণং নতু ভৃ লি ভর্তিপুষ্ট্যোরিতি জুহোত্যাদে:, অস্য তু বুভূর্ষতীত্যেব। দরিদ্রা ঘ লু দুর্গত্যাং, ষন দু ঞ দানে, তনু ঞ দ বিস্তারে, পত লৃ ক গত্যাং, পত্য ঙৈশ্বৈ ইতি দ্বয়ং, জ্ঞা ক্ম মারণাদৌ, ঋধ্যু নির্বৃত্তৌ, দন্ভু ন দম্ভে, ইব ইতি ইবান্ত: দিব ষিব ষ্ঠিবাদি:। স্বৃ-ধাতো বৈমল্যেঽপি অত্র গ্রহণং, রু দু সু নো স্বত্ত্যা ইতি (৫৭৩) এষাং বেমামপি সনি বেমত্বং নাস্তীতি জ্ঞাপনার্থং, তেন নেসুমুহয়হ ইতি ইম্নিষেধে রুরুষতি দুদূষতি সুসূষতি নুনূষতীত্যেব। ভ্রষ্টুমিচ্ছতি ভ্রস্‌জ-সন্, অনেন ইম্ (৭৫১) বা ভর্জাদেশে দ্বিত্বাদি। পক্ষে ভ্রস্‌জ ই স ইতি (৬৪) সস্য দ, (৪৬) দস্য জ, মজ্জিষ ইত্যস্য দ্বিত্বাদি। ইমো বিকল্পপক্ষে (২১৩) স্যাদে: স-লোপে, (১৫৪) ষড্, (৬০২) ষস্য ক, ভক্ষ ইত্যস্য দ্বিত্বাদি। শ্রযিতুমিচ্ছতি ইমোঽভাবপক্ষে (৮০৫) দীর্ঘ, শ্রীষ ইত্যস্য দ্বিত্বাদি। স্বরিতুং স্বর্তুং বা ইচ্ছতি অনিমপক্ষে ঋকারস্য দীর্ঘে, (৬২৮) উর্, (২২৮) তস্য দীর্ঘে, স্বূর্ষ ইত্যস্য দ্বিত্বাদি। যবিতুমিচ্ছতি যু ই ষ ইত্যস্য (৫৩৭) প্রাগচ্কার্য্যাদিতি নিয়মেন আদৌ দ্বিত্বে ততো গুণাদৌ যুযবিষ ইত্যস্য (৮১৬) খিরুকারস্য ই:। ঊর্ণবিতুমিচ্ছতি ঊর্ণু ইষ ইত্যস্য (৭২১) ইমো ঙিত্বে, (৫৮৮) উকারস্য উব, ঊর্ণুবিষ ইত্যস্য, (৭১৯,৭২০) ঊং রস্য দ্বিত্বা ণুবিষ ইত্যস্য দ্বিত্বাদি। ইমো ঙিত্ত্ববিকল্পপক্ষে গুণ:। অনিম্পক্ষে অনিম্‌সনি (৮০৫) দীর্ঘ:। ভর্তুমিচ্ছতি, অনিম্পক্ষে ঋকারস্য দীর্ঘ:, ঋস্থানে উর্, তস্য দীর্ঘ:, ভূর্ষ ইত্যস্য দ্বিত্বাদি। দরিদ্রিতুমিচ্ছতি, অনেন ইম্, (৬১০) আ-লোপ:, দরিদ্রিষ ইত্যস্য দ্বিত্বাদি। অনিম্পক্ষে (৭০২) সন্বর্জনান্নাকার-লোপ:। সনিতু-মিচ্ছতি (৮১৯) জিস্থোরিতি নিয়মাত্ ন মূলস্য ষত্বং। অনিম্পক্ষে (৬৫৫) ঙা, সা স ইত্যস্য দ্বিত্বাদি। তনিতুমিচ্ছতি, অনিম্পক্ষে (৫০) নস্যানুস্বারে তংস ইত্যস্য দ্বিত্বাদি। (৮০৪) গুর্নানিমোত্যত্র গুণসম্ভাবনায়ামেব অনিম্সনোঽগুণত্ব, অতএবাত্র অগুণত্বাভাবে (৬৭৬) ন অম্লোপ:। এক ইতি পাণিনীয-জৌমরা:, তনোতেরনিম্সনি বা দীর্ঘ-মিচ্ছন্তীত্যর্থ: (পাণিনি: ৬।৪।১৭)। পতিতুমিচ্ছতি পিপতিষতি। পাণিনি: ৭।২।৪৯, বার্ত্তিকঞ্চ।

* ডু মি ঞ ন ক্ষেপে ; মী ঞ গ বধে, মী কি গত্যামিতি দ্বয়ং ; মা ইতি মা ল চ মানে, মা ঙ লি শব্দে, মা ঙ য ধ, মে ঙ প্রতিদানে, মে ঙ য তু চ ইতি পঞ্চ ; দা ইতি

८१२। ज्ञपर्द्धापामीर्य्यः। (ज्ञप-ऋध-आपां ६॥, ईर्य्यः १॥)।

एषामच ई ईर् ई एते क्रमात् स्युः खिलोपश्चानिम्सनि। ज्ञीप्सति। अर्द्दिधिषति ईर्त्सति। दिदम्भिषति।*

८१३। दभो यौ। (दभः ६।, यौ १॥)।

दन्भेरच इ ई च स्याद‌निमि सनि खिलोपश्च। धिप्सति धीप्सति अनकारनिर्द्देशात्। दिदेविषति।†

८१४। छ्वोः शूटावणौ असक्वौ यङ्लुग्वोस्तु वा।

(छ्वोः ६॥, शूटौ १॥, अणौ ७।, असक्वौ ७।, यङ्लुक्वोः ७॥, तु ।१।, वा ।१।)।

दा-संज्ञकः, तेन दा-न लूनौ, दा त दाने, डु दा ञ लि च, दे ङ पालने, दो य च्छेदे, डु धा ञ लि धारणे, धे ट पाने इति सप्त ; रभो ङ राभस्ये ; लभो ङ लाभे ; शक ऌ य शक न ऊ शक्तौ इति द्वयं ; पत ॡ न गत्या पत्यङैश्य इति द्वयं ; पद्यो ङ गतौ ; राध्यौ सिद्धौ अत्र तु हिंसार्थे। एषामच इस् स्यादित्यर्थः। शक-धातोः स्वमते ऊदित्वात् वेनत्वेऽपि बहुलादिना मते अनिमत्व। पित्सतीत्यादि, पतितुमिच्छति पूर्व्वसूत्रेण अनिम्पक्षे पत स इत्यस्य द्वित्वे, अनेन खिलोपे, अकारस्य इम् पिसत्स इति स्थिते स्यादेः स-लोपः। ज्ञपयितुमिच्छति ज्ञपि सन् पूर्व्वेण इम्, गुणादौ ज्ञपयिष इत्यस्य द्वित्वादि। पाणिनिः ७।४।५४, वार्त्तिकञ्च।

* ज्ञपश्च ऋध च आप च तेषां। ईश्च ईर् च ईश्च ते ईर्य्यः। ज्ञप इत्यस्य अचः स्थाने ई, ऋधः ईर्, आप. ई इति क्रमः। ज्ञीप्सतीति (८१०) अनिम्पक्षे अनेन खिलोपः अस्थाने ईश्च, (६४१) ञे लोपः। अर्द्धितुमिच्छति ऋध सन् (८१०) भसज इति इम्, अर्धिष इत्यस्य अ रञ्च हित्वा धिष इत्यस्य द्वित्वादि। अनिम्पक्षे (६४) ऋत्स इत्यस्य ऋं हित्वा त्स इत्यस्य द्वित्वे, अनेन खिलोपः, ऋस्थाने ईर् च। दम्भितु-मिच्छति दन्भ सन् (८१०) भसज इति इम्। पाणिनिः ७।४।५५,५८।

† इश्च ईश्च ई, तौ यौ। धिप्सतीत्यादि, दन्भ-सन्, (८१०) भसज इत्यनेन इमो ऽभावपक्षे, अत्र सूत्रे दभ इति अ-नकारनिर्देशात् गुणसम्भावनाभावेऽपि अनिमि सनि न-लोपः, ततः (१७७) दस्य ध, (६४) भस्य प, धप्स इत्यस्य द्वित्वं, अनेन खिलोपः अकारस्य इ, ई च। देवितुमिच्छति दिव सन्, भसज इत्यनेन इवन्तत्वात् वा इम्। पाणिनिः ७।४।५६।

छकार-वकारयोः शकारोटौ स्याताम् अणौ असे क्वौ च, यङ्-लुकि वे च वा स्तः । दुद्यूषति । *

मित्सति दित्सति धित्सति, रिप्सते लिप्सते, शिक्षति, पित्सते, प्रतिरित्सति, हिंसार्थः किं, आरिरात्सति । ईप्सति । †

८१५ । मुचोऽढे द्वे मोच वा सनि ।

(मुचः ६।, अढे ७।, द्वेः ६।, मोच ।१।, वा ।१।, सनि ७।) ।

अढस्य मुचो द्वेः स्थाने मोच वा स्यात् सनि । मोक्षते मुमुक्षते ।‡

---

* छ च व च छ्वौ तयोः । श च ऊट् च तौ । असे च क्विश्च तस्मिन् । यङ्-लुक् च व च यङ्लुग्वौ तयोः । अस् प्रत्याहारः । छ स्थाने शः, व स्थाने ऊट्—इति क्रमः । अणाविति पृथक्पदकरणात् यङ्लुकि तत्सम्बन्धाभावे गुणिनि अगुणे च असे वा स्तः, वकारे तु यङ्लुकि अन्यत्र च सर्व्वस्मिन् वकारे वा स्तः ; क्विपः पृथग्ग्रहणात् केवलं क्विपो वकारे नित्यमित्यर्थः । दुद्यूषतीति दिव-सन्, इमोऽभावपक्षे-अनिम् सनोऽगुणत्वे, अनेन वस्थाने ऊ, द्यूष इत्यस्य द्वित्वादि । पाणिनि ६।४।१९, भाष्यञ्च ।

† अमजणीत्यस्योदाहरणान्युक्तानि, मिमीमादित्यस्य उदाहरणान्याह—मित्सतीत्यादि, मेतुं मातुं वा इच्छति मि मी मा एतेभ्यः सन्, अनिमसनि अचः स्थाने इस् मिस्स इति (६६८) सस्य त, खिर्लोपः । आत्मनेपदिनात्तु मित्सते इत्येव । दातुमिच्छति दा-सन्, धातुमिच्छति धा-सन्, मित्सतिवत् साध्यं । रब्धुमिच्छति लब्धुमिच्छति रभ-लभाभ्यां सन्, अकारस्य इस् (२१३) स्यादेः सलोपः, (६४) भस्य प, रिप्स इति द्वित्वं, खिलोपः । शक्तुमिच्छति शक सन्, अचः स्थाने इस्, स्यादेः सलोपः, सनः सस्य (१११) षत्वं, शिक्ष इत्यस्य द्वित्वं, खिलोपः, शिक्षते इति च । पत्तुमिच्छति पद-सन्, इस्, स्यादेः सलोपः, पत्स इत्यस्य द्वित्वं, खिलोपः । प्रतिराद्धुमिच्छति, प्रतिराध-धातुः हिंसार्थः, अतएव अचः स्थाने इस् खिलोपश्च । आराध धातुराराधनार्थः अतो न इस्खिलोपौ । आप्तुमिच्छति आप सन् (८१२) आ स्थाने ई, ईप्स इत्यस्य द्वित्वं, खिलोपश्च ।

‡ ढस्याभावो ऽढं तस्मिन् । अकर्म्मके सतीत्यर्थः । वृत्तौ अढस्य इति मुचो विशेषणं । अढस्य द्वेर्मुचो मोच वा स्यात् सनीति कथनात् सनं हित्वा केवलस्य मुचो द्वित्वमिति तात्पर्य्यं । मोक्तुमिच्छति अढविवक्षायां पापात् स्वयं मुक्तो भवितुमिच्छतीत्यर्थः, मुच-सन् औदित्वान्निम्, द्विरुक्तस्य मुचो मोचादेशे (२११) कुडं, (१११) षत्व,

८१६। जयल्पोः ख्योर्य्यें।

(ज-यल्-पोः ५।, ख्योः ६।, इ ।१।, ए ७।)।

खेरुवर्णस्य जकार-यल-पवर्गात् परे अवर्णे परे इः स्यात् सनि। जु गतौ, जिजावयिषति। रिरावयिषति, पिपावयिषति बिभावयिषति। जयल्पोः किं, नुनावयिषति। अतएव ञौ द्वित्वे त्रिः। *

८१७। श्रु स्रु स्नु द्रु प्रु प्लु च्युङां वा।

(श्रु—च्युङां ६।।।, वा° ।१।)।

शिश्रावयिषति शुश्रावयिषति। †

मोच इति धातुः, पचे मुमुच-धातुः। कर्म्मकर्तृत्वादात्मनेपदं। षठि इति किं, मुमुचति वत्स गोपः, अत्र न पदद्वयं नात्मनेपदञ्च। पाणिनिः ७।४।५७।

* जश्च यल् च पुश्च तस्मात्। खिरुः ख्युस्तस्य। ए इति अ-शब्दात् सप्तमी। जकारात् य व र लात् पवर्गाच्च परस्थितो योऽवर्णः तस्मिन् परे खिरुवर्णस्य इः स्यात् अव्यवहितसनोऽसम्भवात् व्यवहिते सनोत्यर्थः। जु गताविति धातुपाठः। जावयितुमिच्छति जु-ञि-सन् (५३७) प्रागच्कार्य्यादचि द्विरिति नियमेन जु इ ष इत्यस्य द्वित्वे पश्चात् वृद्ध्यादौ जुजावयिष इति स्थिते, अनेन जकारात् परे ऽवर्णे परे खिरुवर्णस्य इः। एवं रावयितुमिच्छति, पावयितुमिच्छति, भावयितुमिच्छतीत्यादि। नावयितुमिच्छतीत्यत्र नकारपरस्थितावर्णे परे न स्यादिति। एवं सुश्रावयिषति जुह्वावयिषतीत्यादिषु न स्यात्। जवन्तं प्रैरिरदित्यादि वाक्ये अजीजवदित्यादिष्वपि (६३९) खेः सन्वद्भावे अनेन खिरुवर्णस्य इः। अतएव ञौ, द्वित्वे, पश्चात् त्रिरिति प्रागच्कार्य्यादित्यस्य स्मरणार्थः। पाणिनिः ९।३।८०।

† श्रुश्च स्रुश्च स्नुश्च द्रुश्च प्रुश्च प्लुश्च च्युङ् च तेषां। श्रु श्रवणे, स्रु गतौ, ष्णु स्रवणे... प्रस्रुत्यां. द्रु प्रुङ प्लुङ च्युङ च गतौ, एषां सप्तानां खिरुवर्णस्य इः स्याद्वा सनि, अव्यवहितावर्णस्यासम्भवात् वर्णद्वयव्यवहिते ऽवर्णे परे इत्यर्थः। श्रु प्रभृति धातुग्रहणात् जयल्पोरिति नानुवर्त्तते। श्रावयितुमिच्छति श्रु ञि सन् द्वित्वादौ खिरुवर्णस्य वा इः। एवं श्रृण्वन्तं प्रैरिरदिति वाक्ये श्रु-ञि टी दि, अङ्, श्रु इ इत्यस्य द्वित्वादौ, खेः सन्वद्भावे, अनेन खिरुकारस्य वा इः अशिश्रवत् अशुश्रवदित्यादि। पाणिनिः ७।४।८१। अत्र सूत्रे स्नुधातुर्न दृश्यते।

८१८। व्युङो ऽवो हसादेः सेमः क्त्वाच्च किद्वा रुदविदमुषस्तु नित्यं।

(व्युङः ५।, अ-वः ५।, हसादेः ५।, सेमः ५।, क्त्वाच् ।१।, च ।१।, कित् ।१।, वा ।१।, रुद-विद-मुषः ५।, तु ।१।, नित्यं १।)।

हसादेः सेम उकारोङ इकारोङश्च वान्तवर्जात् सन् क्त्वाच्च कित् वा स्यात् रुदादेस्तु नित्यं। रुरुचिषते रुरोचिषते, लिलिखिषति लिलेखिषति। रुदादेस्तु रुरुदिषति विविदिषति मुमुषिषति। वान्तः किं, दिदेविषति। *

८१९। ञिस्त्वोः खेः सः षः षण्यस्वित्स्वत्सहः। (ञि-स्त्वोः ६॥, खेः ५।, सः १।, षः १।, षणि ७।, अ-स्विद्-स्वद्-सहः ६।)।

खेः परस्य ञान्त-स्तौत्योः सस्य षत्वभूते षणि षः स्यात्, न तु स्विद-स्वद-सहां। सुष्वापयिषति तुष्टूषति। ञिस्त्वोः किं, सिसिक्षति। षणीति किं, तिष्ठासति। खेः किं, प्रतीषिषति।†

इति सनन्त-पादः।

---

* उश्च इश्च वौ, तौ उङौ यस्य स व्युङ तस्मात्। नास्ति व (वकारान्तः) यत्र सः अव तस्मात्। इकारोकारोङ्-मध्यमकारान्त-धातोरभावात् अत्र व इति दन्त्य एव। हस्-आदि र्यस्य तस्मात्। इमा सह वर्तमानः सेम् तस्मात्। क्त्वाच इति चकारेण प्रकरणवशात् सन् आकृष्यते। रोचितुमिच्छति रुच-सन्-इम, अनेन सनः कित्वे गुणाभावः, रुचिष इत्यस्य द्वित्वादि। पक्षे गुणे रोचिष इत्यस्य द्वित्वादि। एवं लेखितुमिच्छति। रोदितुमिच्छति वेदितुमिच्छति मोषितुमिच्छतीति त्रिषु नित्यं सनः कित्त्व; क्त्वाचि रुचित्वा रोचित्वा इत्यादि। देवितुमिच्छतीत्यत्र वान्तत्वात् न कित्त्व। एवं देवित्वा। पाणिनिः १।२।८,२६।

† षत्वप्राप्तौ नियमोऽयं। षत्वभूते षणि खिनिमित्तकं मूलधातोः षत्वं ञान्त-स्तौत्योरेव स्यात् नान्यस्येत्यर्थः। अषत्वभूते सनि, तथा खेरन्यस्मात् षत्वभूते षण्यपि पूर्ब्बनियमो बलवानिति। स्विद-स्वद-सहां ञान्तानामेव निषेधः। स्वापयितुमिच्छति,

३य पादः—यङन्तः।

८२०। मूत्र सूत्र सूचाटशर्त्त्यूर्णु हसाद्येकाचो ऽशुभरुचो मुहुर्भृशार्थे यङ्।

(मूत्र—एकाचः ५।, अशुभरुचः ५।, मुहुर्भृशार्थे ७।, यङ्।१।)।

एभ्यः शुभरुचवर्जेभ्यो यङ् स्यात् पौनःपुन्ये अतिशये चार्थे। *

८२१। गत्यर्थाद् गॄ लुप सद चर जप जभ दनश दहो वक्रगर्हे। (गत्यर्थात् ५।, गॄ—दहः ५।, वक्रगर्हे ७।)।

गत्यर्थात् वक्रे, शादे र्गर्हायां, यङ् स्यात् नतु पूर्व्वोक्तौ, तद्युक्तौ तु स्यात्। †

स्वप-ञि-सन्, स्वापयिस इत्यस्य द्वित्वं, (६४७) खे र्जिः, (१११) सनः सस्य मूलधातोश्च षत्वं। स्तोतुमिच्छति स्तु सन् (८०५) दीर्घः, स्तूस इत्यस्य द्वित्वं, उभयत्र षत्वं। सेक्तुमिच्छति सिच-सन् (२११) कुङ्, सिक्स इत्यस्य द्वित्वं, (१११) सनः सस्य षत्वं, अन्त-स्तु-भिन्नत्वात् मूलस्य न षत्वं। एवं सुसूषतीत्यादि। स्थातुमिच्छति स्था-सन् स्थास इत्यस्य द्वित्वादौ, निमित्ताभावात् सनः षत्वाभावं, एतन्नियमवहिर्भूतत्वात्, (१११) मूलस्य षत्वं। प्रत्येतुमिच्छति प्रति-इ-सन्, (७१८) इकारं द्वित्वा केवलं सन एव द्वित्वे, (६४०) खेरित्वे, सनः सस्य षत्वे, मूलधातुनिमित्तकं खेः सस्य षत्वं स्यादेव, अत्र खेः परस्थितमूलधात्वभावादेतन्नियमप्रवेशानवकाशः। स्विदादेस्तु सिस्विदयिषतीत्यादौ न षत्वं। पाणिनिः ८।३।६१,६२।

---

* हसादिश्चासौ एकाचेति हसाद्येकाच्। मूत्रश्च सूत्रश्च सूचश्च अटश्च अशश्च अर्त्तिश्च ऊर्णुश्च हसाद्येकाच्चेति तस्मात्। न विद्येते शुभरुचौ यत्र तस्मात्। मुहुश्च भृशश्च मुहुर्भृशौ तयोरर्थं तस्मिन्। हसाद्येकाच इति सामान्यग्रहणात्, मूत्रसूत्रसूचाना-मदन्तत्वेन अनेकाच्त्वात् अट अश अर्त्ति ऊर्णूनाञ्च अजादित्वात् अप्राप्तौ पृथगुक्तिः। यङो ङानुबन्धः अगुणार्थ. आत्मनेपदार्थश्च, अदन्त-य-स्थितिः। पाणिनिः ३।१।२२, वार्त्तिकं भाष्यञ्च।

† गॄश्च लुप च सद च चर च जप च जभ च दनश च दह च तस्मात्। वक्रश्च

८२२। खेर्णुः। (खेः ६।, णुः १।)।

यङि परे खेर्णुः स्यात्। पुनः पुनरतिशयेन वा मूत्रयति मोमूत्र्यते, सोसूत्र्यते सोसूच्यते। *

८२३। घो ऽनितः। (घः १।, अ-नितः ६।)।

अ-नकारेतः खेः घः स्यात् यङि। अटाट्यते अशाश्यते अरार्य्यते ऊर्णोनूयते।† देदीयते मेमीयते जेगीयते जेहीयते पेपीयते सेषीयते तेष्ठीयते। ‡

गर्हा च वक्रगर्हं तस्मिन्। गत्यर्थादिति गृलुपादेरिति च पृथक् पदकरणं वक्रगर्हाभ्यां यथासङ्ख्यार्थं, तेन गत्यर्थात् वक्रे ग्रादे र्गर्हायामिति। न तु पूर्व्वोक्ते इति एभ्यो मुहुर्भृशार्थे न स्यात्, तद्युक्ते मुहुरर्थेन भृशार्थेन वा युक्तयो र्वक्रगर्हयोस्तु स्यादित्यर्थः। अत्र गत्यर्थादिति हसाद्येकाच एव, पूर्व्वसूत्रे सामान्यतो ग्रहणात्। पाणिनिः ३।१।२३,२४।

* पुनःपुनरतिशयेन वा इत्यत्र क्रियाविशेषणे तृतीया। मूत्रत् क प्रस्रावे, मूत्र-धातोश्चुरादित्वात् ञिः (७७५) अकारलोपे, मूत्रिधातो र्यङ् (६४१) ञिलोपः, मूत्र इत्यस्य (६३२) द्वित्वं, खेराद्यचो लोपे, अनेन गुणे, मोमूत्र इति (६३१) धातु-सञ्ज्ञायां, यङो ङित्त्वादात्मनेपदं घे शप्, (५४३) यङोऽकारलोपः मोमूत्र्यते इति। एवं सूत्रत् क सोसूत्र्यते, सूचत् क सोसूच्यते। पाणिनि ७।४।८२।

† न इत् येषां ते नितः (नीन् नुन् रीन्), न विद्यन्ते नितो यस्य सोऽनित् तस्य, खेरित्यस्य विशेषणं। अटाट्यत इति, अट गतौ, पुनःपुनरतिशयेन वा वक्रं अटति, (केवलं) वक्रं अटतीति वा, इत्यर्थे अट-यङ् अट्य इति, (७१६) अकारं हित्वा ट्य इत्यस्य द्वित्वं, खेराद्यच इति यकारलोपे, अनेन अकारस्य दीर्घः। एवं पुनःपुनरश्नाति, अशाश्यते। पुनःपुनर्वक्रं ऋच्छति इयर्त्ति वा अरार्य्यते, ऋ-यङ् (६१५) गुणः, अर्य्य इत्यस्य अकारं हित्वा, (७२०) अ-र्ये इति कथनात् र्य्यं इत्यस्य द्वित्वे, खेराद्यच इति य-लोपे अर्य्यं इत्यस्य अनेन खेर्दीर्घः। पुनःपुनरूर्णोति ऊर्णु-यङ् (५६०) दीर्घः ऊर्णूय इत्यस्य (७१६, ७२०) ऊं रञ्च हित्वा णूय इत्यस्य द्वित्वं, खेर्णुः, रेफसम्बन्धाभावात् मूलधातो-र्नकारस्य दन्त्यत्वं। पाणिनिः ७।४।८३।

‡ हसाद्येकाच उदाहरणान्याह पुनःपुनर्ददाति दा-यङ् (६१२) ङौ, दीय इत्यस्य

शोशूयते शेश्वीयते, सास्मर्य्यते, चेक्रीयते सञ्चेस्क्रीयते, विसेसिच्यते, यङ्लान्न षः। * वक्रं व्रजति वाव्रज्यते।

८२४। ग्रो र लः। (ग्रः ६।, र।१।, लः १।)।

गिरते रो लः स्यात् यङि। गर्हितं गिरति जेगिल्यते। लोलुप्यते सासद्यते। †

८२५। क्रो च्युर्व्वा। (क्रोः ६।, चुः १।, वा।१।)।

क्रोः खेचुः स्याद्वा यङि। चोकूयते, कोकूयते।‡

८२६। नीन् वन्च स्नन्स ध्वन्स भ्रन्श कस पत पद स्कन्दां। (नीन्।१।, वन्च—स्कन्दां ६।।।)।

एषां खेर्नीन् स्यात् यङि। वनीवच्यते।§

द्वित्वादि। एवं पुनःपुनर्माति, गायति, जहाति, पिबति, स्यति, तिष्ठति। सो स्था इति ह्वयो र्मूलस्य (१११) षत्वं।

* पुनःपुनः श्वयति श्वि-यङ् (६६९) विकल्पेन जिः, (५९०) दीर्घं, शूय इत्यस्य द्वित्वादि, पक्षे श्वीय इत्यस्य द्वित्वादि। पुनःपुनः स्मरति स्मृ-यङ् (६१५) गुणः, स्मर्य्यं इत्यस्य द्वित्वादि। कृ-यङ् (४९७) ऋस्थाने रौ, क्रीय इत्यस्य द्वित्वादि। सं-कृ-यङ् (७६६) सुम् कृते, (६१५) स्कुम् क्वामेवेति नियमात् न गुणः। वि-पूर्व्वक सिच-यङ् विसेसिच्यते, (५७२) अत्र गि-निमित्तकं खिनिमित्तकमपि षत्वं न स्यात्, दश्वस्यादेर्वेश्च इति विधानवत् निषेधेऽपि तथा।

† गॄश निगरणे, यङ् (६२८) ऋस्थाने इर्, अनेन र ल, गिल्य इत्यस्य द्वित्वादि। ग्रतौ गिरतेरिति कथनात् गृणाति जेगीर्य्यते इत्येव। गर्हितं लुम्पति लोलुप्यते, गर्हितं सीदति सासद्यते। पाणिनिः ८।२।२०।

‡ मण्डूकगत्या खेरित्यस्यानुवृत्तिः। कु ङ शब्दे, पुनःपुनः कवते इति कु-यङ्, (५९०) दीर्घः, अनेन वा खेचु आदेशः। पाणिनिः ७।४।६३।

§ वन्चु गत्यां, स्नन्सु ॡङ भ्रंशे, ध्वन्सु ॡङ गतौ, भ्रन्श य ङ अधःपाते (तालव्यान्त, पाणिनिमत दन्त्यान्त), कस ञ गतौ, पत ॡ ञ गत्यां, पद स्थैर्य्ये—पद्यौ ङ

८२७ । जम जप जभ दह दनश भनज पश घपो ऽतो नुन् लवयस्तु वा ।

(जम—शप: ६।, अत: ६।, नुन् ।१।, ल-व-य: ६।, तु ।१।, वा ।१।) ।

जमन्तानां जपादीनाञ्च अदन्तस्य खे नुंन् स्यात् यङि, लवयान्तस्य तु वा । जञ्जन्यते जाजायते ।*

८२८ । हनो वा घ्नी । (हन: ६।, वा ।१।, घ्नी ।१।) ।

जेघ्नीयते जङ्घन्यते । जञ्जप्यते । चञ्चल्यते चाचल्यते, मम्मव्यते मामव्यते, दन्दय्यते दादय्यते । †

गतौ इति द्वयं, स्कन्दिरौ गति-शोषणयो: इति । नीनो न इत् अन्ते । अत्र पत लृ ज गत्यामित्यस्यैव ग्रहणं, पत्य ऐश्वर्य्ये इत्यस्य तु पापत्यते इत्येव, तेन (१११८) पांपतिरिति स्वयमुदाहरिष्यति । वक्रं वञ्चति, वन्च-यङ् (५६७) न-लोपे, वच्य इत्यस्य द्वित्वे, अनेन खेर्नीन् वनीवच्यते, (८१३) नकारेत्त्वात् न दीर्घः । एवं सनीसस्यते, दनीध्वस्यते, बनीभ्रश्यते, चनीकस्यते, पनीपत्यते, पनीपद्यते, चनीस्कद्यते । पाणिनि: ७।४।८४ ।

* जम् प्रत्याहार: । जमश्च जपश्च जभश्च दहश्च दनशश्च भनजश्च पशश्च घपश्च तस्य । अत्र नुन: केवलं न इत् अन्ते, न तु उकार इत्, अतो नु-रनुस्वार:, अन्यथा यंयम्यते रंरम्यते इत्यादौ झसपरत्वाभावात् (५०) अनुस्वारो न स्यात् । येन विधिस्तदन्तस्येति न्यायात् ल-व-य इति लान्त-वान्त-यान्तानामित्यर्थ: । ल-य-मध्यपाठात् वकारोऽत्र दन्त्य: । पुन: पुनर्जायते जन-यङ् (६५५) ङा-आदेशस्य विकल्पपक्षे जन्य इत्यस्य द्वित्वं, अनेन खेर्नुन, (५१) अनुस्वारस्य नित्यं जम् । जौमरास्तु—अनुस्वारस्य दान्तत्वं परिकल्प्य (५२) वा जम् कुर्व्वन्ति (तिङन्तपादस्य ५६० सूत्रे गोयीचन्द्र:) । नकारेत्त्वात् (८२३) खे न दीर्घः । जन-स्थाने (६५५) ङा-आदेशपक्षे जाजायते इति । एतत्सूत्रोदाहरणात्र आदौ ङाभावपक्षो दर्शित: । पाणिनि: ७।४।८५,८६ । अत्र घपधातुर्न दृश्यते ।

† हन-धातु: घ्नी स्याद्वा यङि । पुन:पुनर्हन्ति हन-यङ्, घ्नीय इत्यस्य द्वित्वादि । विकल्पपक्षे हन्य इत्यस्य द्वित्वे, पूर्व्वेण खेर्नुन्, (६७९) खे: परस्य हस्य घ: । गर्हितं जपति जञ्जप्यते । एवं जञ्जभ्यते, दन्दह्यते, दन्दश्यते बम्भज्यते, पम्पश्यते घंघप्यते । वक्रं चलति, पुन:पुनर्भवति, वक्रं दयते, एतेषु पूर्व्वेण वा नुन् । नुन्पक्षे खे न दीर्घ. ।
"हन्तेर्हिंसायां यङि घ्नीभावो वाच्यः" इति वार्त्तिकम् ।

८२९ । चरफलोरुच्चोङो न णुः ।

(चर-फलोः ६॥, उत् ।१।, च ।१।, उङः ६।, न ।१।, णुः १।)।

चरफलोः खेर्नुन् स्यात् उङ उकारश्च यङि, तस्य च न णुः । चञ्चूर्य्यते पम्फुल्यते । *

८३० । रीनृत्वतः । (रीन् ।१।, ऋत्वतः ६।) ।

ऋकारवतो धोः खेः रीन् स्यात् यङि । नरीनृत्यते । †

८३१ । व्येस्वपस्यमो ञिः । (व्ये-स्वप-स्यमः ६।, ञिः १।) ।

एषां ञिः स्यात् यङि । वेवीयते सोषुप्यते सेसिम्यते । ‡

८३२ । न वशः । (न ।१।, वशः ६।) ।

वष्टे ञिं र्न स्यात् यङि । वावश्यते । §

---

* खेर्नुन् इति अनुवर्त्तते, खेरुङोऽभावात् मूलधातोरुङ उकारस्य । यङ्लुकि प्रसक्तस्य गुणस्य निषेधार्थं न णुरित्युक्तं । वक्रं चरति चर्थ्य इत्यस्य द्वित्वे खेर्नुन्, मूलधातो रुङ उकारः (२२८) तस्य दीर्घः । पुनःपुनः फलति पम्फुल्यते । पाणिनि ७।४।८७,८८ ।

† ऋत् विद्यते यस्य स ऋत्वान् तस्य । ऋकारवत इत्यनेन यदा ऋकारस्थिति तदैव खेः रीन् स्यादित्यर्थः, तेन चेक्रीयते इत्यादौ (४९७) ऋकारस्य रीभावे न रीन्, यङ्लुकि तु चरीकर्त्तीत्यादौ स्यादेव । एवं ग्रह-प्रच्छ-व्रश्चादीनां (६६१) ञौ कृते ऋकारवत्त्वात् रीन् स्यात्, तेन जरीगृह्यते परीपृच्छ्यते वरीवृश्च्यते इत्यादि । पुनःपुन नृत्यति नृत-यङ् नृत्य इत्यस्य द्वित्वे खेः रीन्, क्षुभ्नादित्वात् णत्वाभावः । एवं दरीदृश्यते इत्यादि । पाणिनिः ७।४।९०, वार्त्तिकञ्च ।

‡ (६६१) स्वपादेः किति ञिरिति नियमादप्राप्तौ विधिरयं । अनिष्टत्वात् खेरित्यस्य नानुवृत्तिः । व्ये ञ वृतौ, स्वप षलु शयने, स्यमु ध्वाने, पुनःपुनर्व्ययतीत्यादि वाक्यानि । व्ये यङ्, अनेन ञिः, (५९०) दीर्घः, वीय इत्यस्य द्वित्वादि । स्वप-यङ ञिः सुप्य इत्यस्य द्वित्वादि, (१११) षत्वं । स्यम यङ् ञिः सिम्य इत्यस्य द्वित्वादि पाणिनिः ६।१।१९ ।

§ ग्रहादित्वात् प्राप्तौ निषेधः । वश ल कान्तौ, पुनःपुन र्वष्टि । पाणिनिः ६।१।२०

८३३ । चायः की । (चायः ६।, की ।१।) ।

चायतेः की स्यात् यङि । चेकीयते । *

८३४ । घ्राध्मो ङी । (घ्राध्मोः ६॥, ङी ।१।) ।

जेघ्रीयते देध्मीयते । †

८३५ । श्रीङो ङय् येऽणौ ।

(श्रीङः ६।, ङय् ।१।, ये ७।, अणौ ७।)

शाशय्यते । ‡

यङ्लुगन्तः ।

८३६ । यङो लुगवापो लुक् पं द्वि णादि च धृक्तान्तु वाऽनि तु नित्यं नोतः ।

(यङः ६।, लुक् ।१।, वा ।१।, अपः ६।, लुक् ।१।, पं १।, द्विः १।, णादि ।१।, च ।१।, धृक्तं १।, तु ।१।, वा ।१।, अनि ७।, तु ।१।, नित्यं १।, न ।१।, उतः ५।) ।

यङो लुक् स्याद्वा, लुकि सति अपो लुक् पं द्वित्वं णेर्णुरित्यादि कार्य्यञ्च स्यात्, धुग्रहणात्तान्तु वा स्यात्, अनि तु नित्यं लुक् स्यात्, उदन्तात्त्वनि न स्यात् । §

---

* पाणिनिः ६।१।२१ ।

† ङी इत्यस्य ङ इत् अन्त्यस्य स्थाने । पुनःपुन र्जिघ्रति, पुनःपुनर्धमतीति वाक्ये । पाणिनिः ७।४।३१ ।

‡ श्री धातो र्ङय् स्यात् अणौ ये, ङित्त्वादन्त्यस्य स्थाने, अय्-स्थितिः । अणौ ये इति कथनात् कर्म्मणि वाच्ये यक् शय्यते, क्त्वाचः स्थाने यप् संशय्य, क्यप् शय्या इति । पुनःपुनः शेते, शी-यङ्, ङय् शय्य इत्यस्य द्वित्वादि । पाणिनिः ७।४।२२ ।

§ यङो लुक्-करणेन त्यलोपे त्यलक्षणमिति न्यायप्राप्त-कार्य्यस्य लुकि न तन्नेति निषेधात् (४६७) यङ्ङ्यकि चर्ह्रीति, (६१५) स्वाद्यर्थ्यृतो णुरिति, (५६७) इमुङ्नी-

बोभवीति बोभोति, बोभूतः बोभुवति। अबोभवीत् अबोभोत् अबोभूतां अबोभुवन्, अबोभूत् अबोभुवीत्, बोभुवाञ्चकार। *

वनीवञ्चीति वनीवङ्क्ति, वनीवक्तः, वनीवचति। जङ्गमीति जङ्गन्ति, जङ्गतः, जङ्ग्मति जङ्गमति; जङ्गमीमि जङ्गन्मि, जङ्गन्वः, जङ्गन्मः। जङ्घनीति जङ्घन्ति, जङ्घतः, जङ्घ्नति जङ्घनति। †

लोप इत्यादीनि न स्युः, यङन्तत्वेन विहितं कार्य्यं स्यादेव, तेन धातुसंज्ञा थ्यामाम् च स्यात्। खादि-कार्य्यस्य यङि परे विहितस्य लुकि न तत्रेति निषेधादप्राप्तौ वचनं। धुग्रहणोक्तमिति, यत्र क्वचित् सूत्रे धातुविशेषग्रहणपूर्व्वकं यत् कार्य्यमुक्तं तद्वा स्यादिति। अनि तु इति (९९३) पचादित्वादनि कृते तस्मिन् परे नित्यं यङो लुक् स्यात्, ह्रस्वोदन्तधातोस्तु अनि परे न लुक् स्यात्। पाणिनिः २।४।७४, भाष्यञ्च।

तिपा शपानुबन्धेन निर्द्दिष्टं यत् गणेन च। यत्रैकाच्-ग्रहणं किञ्चित् पञ्चैतानि न यङ्लुकि। आचार्य्या यङ्लुकोक्ताः सेट्कत्वमनिटामपि॥ इति प्राचीनवचनमपि स्मरणीयं। (६८६) वेत्तेरित्यादौ तिपा निर्द्दिष्टत्वात्, (५७३) स्वर इति शपा, (७१०) शीङ इति अनुबन्धेन, (६९५) रुदा इत्यादौ गणेन, (५७६) एकाचो वक्तव्यत्वात्, तत्तत् कार्य्यं न स्यादिति। अनिटां सेट्कत्वं (८४१) बेभिदिता इत्यादौ।

* पुनःपुनर्भवति यङ्लुकि, भू-यङ तस्य लुक्, द्वित्वं खे गुणः, बोभू इत्यस्य धातुसंज्ञायां तिप्, शप् तस्य लुक्, (७२२) ईम्, गुणः, बोभवीति। ईमो विकल्पपक्षे गुणः, बोभोति। एवं सर्व्वत्र। बोभू-तस्, ङित्त्वात् न गुणः। अन्ति (६९७) अन्त्-स्थाने अत्, (५८८) उव्, बोभुवति। धी-दिप् (७२२) ईम् वा, अबोभवीत्, अबोभोत्, धी-तां अबोभूतां, धी-अन्, (५६३) भूवर्ज्जनात् न उम्, (५८८) उव्, अबोभुवन्। टी-दि (५५२) धुग्रहणोक्तत्वात् वा सिलोपः अबोभूत्, पक्षे अबोभुवीत्, (८४१) षरे गुणनिषेधात् उव्। ठी णप् (५८२) त्यान्तादाम् उय्, ततः (५८३) कृप्रयोगः।

† वन्च-यङ्लुक्, द्वित्वादि, (८२६) खे नीन् वनीवञ्च-धातोस्तिप्, ईम्। ईमो विकल्पपक्षे (२११) कुङ्, (५०,५१) नस्यानुस्वारे अनुस्वारस्य ङ्। तस्, (५६७) न-लोपः। अन्ति, (६९७) अन्तस्थाने अत्, न-लोपः। गम-यङ्लुक् (८२७) खे नुन् जङ्गमधातुः, ततस्तिप् वा ईम्। पक्षे मस्यानुस्वारे तस्य न। तस् (६७६) अम्लोपः। अन्ति (२३०) धुग्रहणोक्तत्वात् वा उङ्लोपः, अन्त अत्। मिप् ईम् वा, पक्षे (२०२) गमो म-स्थाने न। वस् मस् उभयत्र मस्थाने न। हन-यङ्लुक् गमवत्, अधिकन्तु (६७९) हस्य घ।

चञ्चुरीति चञ्चूर्त्ति। चाखातः चङ्खन्तः, चङ्ख्नति चङ्खनति। जाजातः जञ्जन्तः जञ्ज्नति जञ्जनति। देदिवीति देद्योति देदेति, देद्यूतः देदितः, देद्यूवः देदिवः। वेविच्छीति वेवेष्टि, वेविश्वः वेविच्छ्वः। *

८३७। हाकः खे र्न घें:। (हाकः ६।, खे. ६।, न ।१।, घेः १।)।

जहेति जहाति। †

८३८। दन्शो न-लोपो वा।

(दन्शः ६।, न-लोपः १।, वा ।१।)।

दन्दशीति दन्दंशीति दन्दष्टि दन्दंष्टि। ‡

८३९। जि र्न वा। (जिः १।, न ।१।, वा ।१।)।

---

* चर-यङ्लुक् (८२९) खे र्नुन् उङ् उकारस्य, तेनैव गुणनिषेधः, ईमोऽभावपक्षे (२२८) उकारस्य दीर्घः। खन-यङ्लुक्, तस् (६५५) धक्तत्वात् वा ङादेशे, जमन्तत्वाभावात् खे र्न नुन्, (८२३) दीर्घः। पक्षे जमन्तत्वात् खेर्नुन्। अन्ति ([illegible]०) वा उङ्लोपः, अन्त अत्। आगमादेशयोर्मध्ये बलीयानागमो विधिरिति न्यायात् तिप् सिप् प्रभृतिषु भादौ (७२२) ईमि ङादेशाभावे चङ्खनीति चङ्खनीत्यादि. ईमो-विकल्पपक्षेऽपि पिति झसे परे निषेधात् न ङा इति बोध्यं। जन-यङ्लुक् खनवत्। दिव-यङ्लुक् देदिव धातुः तिपि देदिवीति(७३४) निषेधात् न गुणः। ईमो विकल्पपक्षे (८१४) वस्थाने ऊट्, तस्य गुणः। ऊटो विकल्पपक्षे (६४२) वलोपः, ततो गुणः। तस् वस् उभयत्र वा ऊट्, पक्षे वलोपश्च। विच्छ-यङ्लुक् वेविच्छ-धातुः, तिप्, ईमो वकल्पपक्षे (८१४) छस्य शः, गुणः, (१५४) षङ्। वस्, वा छस्य शः।

† हाकधातोः खेः घेंर्न स्यात् वा यङ्लुकि। (८२३) घोंऽगित इति प्राप्त-दीर्घस्य निषेधोऽयं। जहेति (७२२) ईम्, सन्धिः। सिद्धान्तकौमुदीमते तु न दीर्घनिषेधः, तेन जाहेति जाहाति इति।

‡ दन्श-धातो र्नकारस्य लोपः स्याद्वा यङ्लुकि। दन्दशीतीति ईमपक्षे वा नकारलोपः, अनीमपक्षेऽपि वा नकारलोपः। (८२७) खेर्नुन्, अनिमपक्षे (१५४) षङ्, (४७) तस्थाने ट। पाणिनिः ७।४।८६, अत्र सूत्रे नित्यम्।

सास्वपीति सोषुपीति सास्वप्ति सोषोप्ति । *

८४० । रीनो रिन्रनौ वा ।

(रीन: ६।, रिन्-रनौ १॥, वा ।१।) ।

रीन: स्थाने रिन्रनौ वा स्त: यङ्लुकि ।

चरिकरीति चर्करीति चरीकरीति चरिकर्त्ति चर्कर्त्ति चरीकर्त्ति । †

८४१ । यङ्लुक्क्यलोपेऽरे न गुव्री ।

(यङ्लुक्-क्यलोपे ७।, अरे ७।, न ।१।, गु-व्री १॥) ।

बेभिदिता मर्मृजिता । अरे किं, बेभेत्ति मर्मार्ष्टि । ‡

इति यङन्त पाद: ।

---

* यङ्निमित्तक एव जि र्न स्यात् वा यङ्लुकि, तेन (८३१) ष्विस्वप्स्यमो जिरित्यस्यैव निषेध: । जिर्वेति कृते जिमात्रस्यैव विकल्पो लभ्यते । वस्तुतस्तु (६६१) ग्रहादे-र्जि र्नित्यमेव । सोषुपीति सोषोप्ति उभयत्र आदौ जि: पश्चात् द्वित्वादि । सोषुपीतीत्यत्र (७३४) गुणनिषेध: । एवं व्ये—वाव्येति वेवयीति वाव्यात्ति वेवेति । स्यम—संस्यमीति सेसिमीति संस्यन्ति सेसेन्ति । पाणिनिमते नित्यम् ।

† सूत्रत्वात् णत्वाभाव: । अत्र वा-ग्रहणं परत्र निवृत्त्यर्थं । रीन: स्थाने इति रीन उत्पत्तिस्थाने इत्यर्थ:, अन्यथा नित्त्वात् रीनोऽन्ते रिन्रन्प्रसक्ति: स्यात् । रनोऽकार उच्चारणार्थ: । कृ यङ्लुक्, ईम्पक्षे रिन्रन्रीन्, अनीम्पक्षेऽपि रिन्रन्रीन्, अतएव षट् पदानि ; एवं वृत—वरिवृतीति वर्वृतीति वरीवृतीति वरिवर्त्ति वर्वर्त्ति वरीवर्त्ति इत्यादि । ऋधातोस्तु अरियरीति अररीति अरियर्त्ति अरर्त्ति, अत्र (५८५) असमानवर्णे परे स्विरिय । पाणिनि: ७।४।९१,९२ ।

‡ यङ्लुक् च क्यलोपश्च तत्तस्मिन् । यङोलुकि क्यलोपे च सति अरे गुव्री न स्याता । पुन:पुनरतिशयेन वा भेत्ता बेभिदिता, बेभिद्-ङी ता (५५४) इम्, अनेन गुण-निषेध: । पुन:पुनर्मार्जिता मर्मृजिता, पूर्व्वसूत्रेण रवे: रन्, मर्मृज-ङी ता, इम्, (६९४) मृजोऽकङितीत्यनेन प्राप्तौ अनेन वृद्धिनिषेध: । क्य-लोपे तु (८४५) समिधिता इत्यादि । कौमरास्तु यङ्लुगन्तेभ्यो ञौ कृते विकल्पेन वृद्धिं कुर्व्वन्ति, बोभावयति बोभुवयतीत्यादि (संक्षिप्तसारे तिङन्तपादे ४६०सूत्रे) । पाणिनि: १।१।४ ।

८४२। लेः काम्यक् स्वेच्छायां।

(लेः ५।, काम्यक् ।१।, स्वेच्छायां ७।)।

लेः परः काम्यक् स्यात् आत्मेच्छायां। आत्मनः पुत्रमिच्छति पुत्रकाम्यति।*

८४३। क्योऽम्व्यात् ई च।

(क्यः १।, अम्व्यात् ५।, ई ।१।, अः १।, च ।१।)।

मान्त-व्य-वर्जात् लेः क्यः स्यात् स्वेच्छायां, तस्मिन्नवर्णे ई स्यात्।†

ज्ञानीयति। (४२३) ओदौतोऽज्वदिति। गव्यति नाव्यति। (४९७) यङ्ष्यक्ये इति। कर्त्रीयति। (२५९) क्यङ्च्वौ च गार्गीयति।‡

---

* स्वस्य इच्छायाः कर्म्मभूतं यल्लिङ्गं यदि असमस्तादिविशेषणात् आत्मभिन्न-सम्बन्धि-पदाद्वा उत्तरवर्त्ति न स्यात् तदा तस्मात् काम्यक् स्यादित्यर्थः, तेन महान्तं पुत्रमिच्छति इत्यादौ न स्यात् ; समासे तु महापुत्रमिच्छति राजपुत्रमिच्छति इत्यादौ स्यादेवेति। काम्यकः कित्त्वात् आत्मनो मुक्तिमिच्छति मुक्तिकाम्यतीत्यादौ न गुणः। आत्मनः पुत्रमिच्छतीति वाक्यविन्यासात् द्वितीयान्तात् लेरिति बोध्यं, तेन आत्मनः पुत्र इष्यते इत्यत्र न स्यादिति। पुत्रकाम्यतीति पुत्रमिति द्वितीयान्तात् काम्यक, (३१९) तोर्लुक् त्ये चेति त्ये परे तोर्लुकि, पुत्रकाम्य इति (६३१) धातुसंज्ञायां, तिप्-शपौ, (५४३) अकारलोपश्च। पाणिनिः ३।१।९।

† म च व्यश्च म्वौ, नास्ति म्वौ यत्र सोऽम्वास्तस्मात्। मकारान्तं अव्ययञ्च हित्वा अन्यस्मात् लिङ्गादित्यर्थः। अत्र चकारेण काम्यक् च स्यादिति सूचितं। तेन सर्व्वस्मात् लिङ्गात् क्यः काम्यक् च स्यात्, मकारान्तादव्ययाच्च केवलं काम्यगेवेति निष्कर्षः। क्यस्य क इत् अगुणार्थः, य-स्थितिः। पाणिनिः ३।१।८,७।४।३३, वार्त्तिकञ्च।

‡ आत्मनो ज्ञानमिच्छति ज्ञानमित्यस्मात् क्यः, तस्मिन् परे अकारस्य ई, ज्ञानीय इति

८४४ । न-लोपः क्यङेत्र । (न-लोपः १।, क्य-ङेत्र ७।) ।

राजीयति । *

८४५ । हसात्तयोर्व्वारे ।

(हसात् ५।, तयोः ६॥, वा ।१।, अरे ७।) ।

हसात् परयोः क्य-ङ्ययोर्लोपः स्याद्वा अरे । समिधिता समिध्यिता । † अस्यात् किं, किंकाम्यति खःकाम्यति । ‡

धातुः । एवं पुत्रीयतीत्यादि । पूर्व्वसूत्रेण ज्ञानकाम्यतीत्यपि । अवर्णस्य ई-कथनात् कन्यामिच्छति, कन्यीयति अत्र आकारस्य ई । कन्याकाम्यतीति च पूर्व्वसूत्रेण । गामिच्छति गव्यति, नावमिच्छति नाव्यति, उभयत्र कास्य अच्वद्भावात् (३५) क्रमेण अव् आव् च । 'आत्मनः कर्त्तारमिच्छति, ऋस्थाने री,। एव धात्रीयति । गर्गस्यापत्यं गार्ग्यः गर्गशब्दात् ण्यः, ततः गार्ग्यमिच्छति, क्ये परे ण्यलोपः, अकार ईश्च ।

* नान्तस्य ले नकारलोपः स्यात् क्ये ङेत्र च परे । (११८) नोलुप फेऽधावित्यनेन विरामे परे नकारस्य लुपि कृते (१५) तदादिविधि र्न स्यादित्यतो लोपविधानं ।

एवञ्च क्यञ्योः मत्योः विरामविहितं किमपि कार्य्यं न स्यादित्यप्यनुसन्धेयं, तेन विद्वांसमिच्छति विद्वस्यति अत्र न (१८३) दङ् । लिहमिच्छति लिह्यति अत्र न (१७५) हस्य ढ । दुहमिच्छति दुह्यति अत्र न (१७६) हस्य घ । वाचमिच्छति वाच्यति अत्र न (२११) कुङ् । पुमांसमिच्छति पुंस्यति अत्र न (१९३) स्यान्तलुप् । नमः करोति नमस्यति अत्र न (१०२) विसर्गः । सर्पिरिच्छति धनुरिच्छति सर्पिष्यति धनुष्यति इत्यादौ न (२२७) रङ् । गिरमिच्छति गीर्य्यति धुरमिच्छति धूर्य्यति इत्यादौ तु विरामविहितत्वाभावात् (२२८) इको दीर्घः । पाणिनिः ८।२।७।

राजानमिच्छति पूर्व्वसूत्रेण क्यः, अनेन न-लोपः, ततः पूर्व्वेण अकारस्य ईः ।

† विभक्तिविपरिणामेन क्य-ङ्ययोरनुवृत्तिः । समिधमैष्टा इति वाक्ये क्यः, समिध्य धातुः, डी-ता, (५५४) इम्, अनेन वा क्यलोपः । एवं दृषदमैष्टा दृषदिता दृषद्यिता । हसात् किं, ज्ञानीयिता । अरे किं, समिध्यति । पाणिनिः ६।४।५० ।

‡ (८४३) क्योऽस्यादित्यस्य प्रत्युदाहरणमाह—किमिच्छति खरिच्छति, उभयत्र पूर्व्वेण काम्यक् । एवं उच्चैःकाम्यतीत्यादि ।

८४६। धनोदकाशन-वृषाश्वले ग्रहपानान्न-जाभार्थे ङा डनङ् ङा सन् सनसनौ क्ये न षः।

(धन—लि: ६।, ग्रह—अर्थे ७।, ङा ।१।, डनङ् ।१।, ङा ।१।, सन् ।१।, सन्-असनौ १॥, क्ये ७।, न ।१।, ष: १।)।

धनस्य ग्रहणे ङा, उदकस्य पाने डनङ्, अशनस्य अन्ने ङा, वृषाश्वयोर्जाभे सन्, लेरर्थे काम्ये सन् असन् च स्यात्, क्ये—सः षो न स्यात्। *

धनायति उदन्यति अशनायति वृषस्यति अश्वस्यति, दधिस्यति दध्यस्यति। ग्रहादौ किं, धनीयति। †

---

* वृषश्च अश्वश्च वृषाश्वं, धनञ्च उदकञ्च अशनञ्च वृषाश्वञ्च लिश्चेति तस्य। ग्रहश्च पानञ्च अन्नञ्च (भक्षणं) जाभश्च अर्थश्च तत्तस्मिन्। सन् च असन् च सनसनौ। धन-शब्दस्य ग्रहणे काम्ये ङा, ङ:इत् अन्त्यस्य स्थाने, उदकस्य पाने काम्ये डनङ्, डङौ, इतौ अन स्थितिः, अशनस्य भक्षणे काम्ये ङा, वृषाश्वयो र्जाभे काम्ये सन्, न· इत् अन्ते, जाभो मैथुनं, एतद्भिन्न-लिङ्गस्य अर्थे काम्ये सन् असन् च स्यात्, क्ये परे इति सर्व्वत्र योजनीयं। क्ये परे इति कथनात् इच्छाप्राप्तौ, पुनर्व्वत्तो काम्ये इति कथनात् अति-तृष्णायामित्यर्थो बोध्यः। स: षो न स्यादिति एतत् सनादेशस्यैव, तेन धनुष्यति सर्पिष्यतीत्यादौ षत्वं स्यादेव। सर्व्वत्र कर्म्मकारकादेव स्यादिति। पाणिनि: ७।४।३४, ७।१।५१, वार्त्तिकं काशिका च।

† धनं ग्रहीतुमिच्छति·धनायति ङा, धनशब्दस्यार्थसङ्कोचनं प्राचीनानां मतं, तेन वस्त्रं धनायतीत्यादिप्रयोगः। उदकं पातुमिच्छति डनङ्, डित्वात् उदकशब्दस्य अन्त्यस्य अकारस्य स्थाने डन्, डित्वात् उदक् इत्यस्य (१२६) टे: अक्भागस्य लोपः, उदन्य-धातुः। अशनं (अन्नादि) भोक्तुमिच्छति ङा, अत्रापि अर्थसङ्कोचे अशनायति पायसम् इत्यपि प्रयोगः। वृषोऽत्र शुक्रलः पुरुषः, वृषं अश्वं वा जब्धुं (सङ्गमयितुम्) इच्छति; अत्र च अर्थसङ्कोचेन, पुरुषं वृषस्यतीत्येव प्रयोगः। दधि इच्छति सन् असन् च, न षत्वं। अत्र लिङ्गस्य अर्थे काम्ये इति कथनात् नैव अर्थसङ्कोचः, तेन दध्यस्यति तक्रं इति न स्यात्। एवं क्षीरस्यति लवणस्यतीत्यादि। आदौ दधिशब्दो-दाहरणेन अकारान्तभिन्नस्य लिङ्गस्येति कश्चित्। अतितृष्णाया किं, दधीयतीत्यादि। ग्रहणादौ किं, (भविष्यतीति शेषः), धनमिच्छति धनीयति, एवं उदकीयति, अशनी-यति, वृषीयति, अश्वीयति।

८४७। ढङोपमानादाचारे क्यः।

(ढ-ङोपमानात् ५।, आचारे ७।, क्यः १।)।

ढात् ङाच्चोपमानात् क्यः स्यादाचारेऽर्थे। शिवमिवाचरति शिवीयति विष्णुं, विष्णाविवाचरति विष्णूयति शिवे।*

८४८। घान्ङ्यक्वौ सलोपश्च वा गल्भ-क्लीव-होढात्तु मं।

(घात् ५।, ङ्यक्वौ १॥, स-लोपः १।, च ।१।, वा, ।१।, गल्भ-क्लीव-होढात् ५।, तु ।१।, मं १।)।

घादुपमानादाचारेऽर्थे ङ्य-क्वौ स्तः, सस्य च वा लोपः, गल्भादेस्तु क्वावपि मं। कृष्ण इवाचरति कृष्णायते कृष्णति, स्वायते स्वति, स्वामास (५८२) त्यान्तत्वादाम्। पयायते पयस्यते। गल्भायते गल्भते।†

---

* ढश्च ङश्च ढङं ढङश्च तदुपमानश्चेति ढङोपमानं तस्मात्। उपमानवाचकात् कर्म्मपदादधिकरणपदाच्च क्यः स्यात् आचारेऽर्थे। विष्णुं शिवमिव आचरति, शिवे विष्णौ इव आचरति, उभयत्र क्यः, (८४३) अकारस्य ई, विष्णूयतीत्यत्र (५९०) दीर्घः। काम्यक्प्रभृतीनां कित्करणात् धातुविहितं कार्य्यं लिधौ अपि स्यादिति बोध्यं। अधिकरणोपमानस्य क्ये परे न-लोपो न स्यादिति वक्तव्यं, तेन राजनि इवाचरति राजन्यति गुरौ। राजानमिवाचरतीत्यत्र राजीयतीत्येव। चौरीदीयन्तीत्यादि पदम् आत्मानं चौरीदमिवाचरन्तीत्यादि वाक्ये कर्म्मोपमानात् क्ये साध्यं। पाणिनि. ३।१।१०, वार्त्तिकञ्च।

† क्वचिदेकदेशस्येति न्यायात् उपमानादित्यनुवृत्य, समस्तस्यामस्तेन मित्याकाङ्क्षेण सङ्गतिरिति न्यायात् घादित्यनेन सम्बन्धः। ङ्ये कृते ङित्त्वादात्मनेपद, क्वौ कृतेऽपि गल्भादेरात्मनेपदं विधीयते। कृष्णायते इति (५९०) घेंऽङ्य्यरे इति दीर्घः। एवं हरीयते विष्णूयते। (४९७) पित्रीयते। (४२३) गव्यते नाव्यते। (२५९) गार्गायते। (८४४) राजायते दण्डीयते। (३२७) विदुषीवाचरति विद्वस्यते, सतीवाचरति सत्यते, सुन्दरीवाचरति सुन्दरायते, गुणीवाचरति स्वायते इति। कृष्णतीति क्विः, क इत् अगुणः इकार उच्चारणार्थः, ततः (४९६) वकारमात्र प्रत्ययस्य

८४९ । भृशादे च्व्यर्थे ङ्य त-स-लोपश्च ।

(भृशादेः ५।, च्व्यर्थे ७।, वा ।१।, त-स-लोपः १।, च ।१।) ।

भृशादे च्व्यर्थे ङ्य-क्वी वा स्तः, तस्मिन् त-स-लोपश्च । भृशायते भृशति भृशीभवति । चेतायते शश्वायते वेहायते । *

८५० । डाज् लोहितादेः पञ्च ।

(डाच् लोहितादेः ५।, पं १।, च ।१।) ।

डाजन्तात् लोहितादेश्च च्व्यर्थे ङ्य-क्वी वा स्तः पञ्च । पटपटा-यते पटपटायति पटपटीति पटपटास्यात् । लोहितायते

लोपः । तदन्तत्वेन क्वण इति (६३१) धातुसंज्ञा, तिप् शप्, (५४३) अकारलोपः । एवं हरि-रिवाचरति क्वि. हरयति, एवं पितृवति पितरतीत्यादि । स्व इवाचरति ङ्यः स्वायते, क्वि: स्वति । स्व इवाचचार क्वि: (५८२) स्वामास । पय इवाचरति ङ्यः, वा सलोपश्च । ओजायते अप्सरायते दुर्म्मनायते एतेषु नित्य सलोपो वक्तव्यः । गल्भ इवाचरति ङ्यः क्विश्च, उभयत्रात्मनेपदं । एवं क्लीवायते क्लीवते, होढायते होढते । गल्भोऽहङ्कारी, क्लीवो नपुंसकः, होढ़ं लोप्त्रं । पाणिनिः ३।१।११, वार्त्तिकञ्च ।

* भृश आदिर्यस्य स तस्मात् । च्वेरर्थश्चार्थः अभूततद्भावः तस्मिन् । तश्च सश्च तौ तयो र्लोपः तसलोपः । ङ्ये क्वौ तस्मिन् इति ङ्ये क्वौ च परे त स लोपो नित्य इत्यर्थः। अभृशो भृशो भवति ङ्यः भृशायते, क्वि: भृशति, पक्षे (४९५) च्विः भृशीभवति । एवं अचेतश्चेतो भवति चेतायते ङ्यः, सलोपः, (५९०) दीर्घः । क्वि: चेतति, पक्षे चेतीभवति अत्र (४९८) सलोपः । अशश्वत् शश्वत् भवति ङ्य-क्वी, शश्वायते शश्वति, उभयत्र तलोपः, पक्षे शश्वद्भवति । एवं अवेहत् वेहत् भवति वेहायते वेहति वेह-द्भवति (वेहत् गर्भोपघातिनी गौः) । भृशादिश्च—भृश शीघ्र चपल मन्द पण्डित उत्सुक सुमनस् दुर्म्मनस् अभिमनस् ओजस् तेजस् रहस् सुरजस् वर्च्चस्, डाच्प्रत्ययान्त, लोहित धर्म्म हरित नील मन्द फेन भद्र मल्ल वर्म्मन् निद्रा कृपा करुणा इति द्वात्रिंशत् । अत्र निद्रादिशब्दो धर्म्मवचनोऽपि शब्दशक्तिस्वभावात् धर्म्मिवचन एव, तेन निद्रायते जनः अनिद्रावान् निद्रावान् भवतीत्यर्थः । पाणिनिः ३।१।१२ ।

लोहितायति लोहितति लोहितीस्यात्, धर्म्मायते धर्म्मायति धर्म्मति धर्म्मीस्यात्। *

८५१। शब्दसुखकष्टादेः कृतिवेदपापे ङ्यः।

(शब्द सुख-कष्टादेः ५।, कृति-वेद-पापे ७।, ङ्यः १।)।

शब्दादेः कृतौ सुखादेरनुभवे कष्टादेः पापार्थे प्रवृत्तिरित्यस्मिन्नर्थे ङ्यः स्यात्। शब्दं करोति शब्दायते, वैरायते। सुखमनुभवति सुखायते, दुःखायते। कष्टं कर्म्म करोति कष्टायते। †

८५२। वाष्पोष्मफेनधूमादुद्वान्तौ।

(वाष्प—धूमात् ५।, उद्वान्तौ ७।)।

वाष्पायते उष्मायते फेनायते धूमायते। ‡

---

*, यद्यपि (५०१) सम्पद्यति कृभ्वस्तिषु परेषु डाच् विहित-स्तथापि अत्र डाजन्तात् ङ्यक्विविधानसामर्थ्यात् ङ्य-क्वि-विषयेऽपि डाच् स्यादिति वक्तव्यं। पश्चेति चकारेण ङित्त्वात् प्राप्तमात्मनेपदमपि स्यादिति सूचितं। अपटत् पटत् स्यात् इति वाक्ये ङ्यविषये डाचि द्विर्भावादौ पटपटा इति डाजन्तात् ङ्य आत्मनेपदं परस्मैपदञ्च, क्विः पटपटाति, विकल्पपक्षे च्विः। एवं अलोहितो लोहितो भवति, अधर्म्मो धर्म्मो भवति। लोहितादिश्च—भृशादिशेषा लोहितादयो द्वादश। पाणिनिः ३।१।१३,१।३।९०।

† शब्दश्च सुखञ्च कष्टञ्च तत् आदि र्यस्य तस्मात्। कृतिश्च वेदश्च पापञ्च तस्मिन्। वेद इति विद ल ज्ञाने इत्यस्य अलि रूपं। पापार्थे पापजनक कर्म्मणि। कष्टं कर्म्म करोति कष्टजनक-कर्म्म कर्त्तुं प्रवर्त्तते इत्यर्थः। शब्दादिः—शब्द वैर प्रतीपाभ्र कन्द-नीहारदुर्द्दिनाः, कलहः सुदिनं मेघः कोटा अट्टा अटा तथा, सीका सोटा च पोटा च मुष्टा शब्दादिरीरितः। सुखादिश्च—सुखं दुःखञ्च तृप्तञ्च कृपणः करुणस्तथा, प्रतीपालीकसोढास-कृच्छ्राश्राद्याः सुखादयः। कष्टादिश्च—कष्टञ्च सत्त्रो गहनञ्च कक्षः कृच्छ्रञ्च कष्टादिषु पञ्च शब्दाः। पाणिनिः ३।१।१४,१७,१८।

‡ एभ्यो ङ्यः स्यादुद्वान्तौ ऊर्द्धनिःसारणे इत्यर्थः। पाणिनिः ३।१।१६, वार्त्तिकञ्च।

८५३। रोमन्थाच्चर्व्वणे। (रोमन्थात् ५।, चर्व्वणे ७।)।

रोमन्थायते गौः। *

८५४। नमस्तपोवरिवःकण्ड्वादिभ्यः क्यः कृतौ।

(नमस्—कण्ड्वादिभ्यः ५॥, क्यः १।, कृतौ ७।)।

नमस्करोति नमस्यति, तपस्यति वरिवस्यति, कण्डूयति कण्डूयते, चित्रीयते, महीयते, हृणीयते। †

८५५। लेः कृत्याख्याने ञिः।

(लेः ५।, कृति-आख्याने ७।, ञिः १।)।

लेः परो ञिः स्यात् कृतावाख्याने च। प्रश्नं करोति आचष्टे वा प्रश्नयति, ऊढयति औडिढत्। औजिढदित्येके। (४६८) लुङ् मद्दिनामिति। ईश्वन्तमाचष्टे ईश्वयति। सुग्वन्तमाचष्टे सुचयति। स्रग्विनमाचष्टे स्रजयति। ‡

---

* पूर्व्वस्मादुद्वान्तौ इत्यस्याप्यनुवर्त्तनम् बोध्यं, तेन उद्‌गीर्य्य-चर्व्वणे अर्थे रोमन्थात् ञ्यः स्यादित्यर्थः। रोमन्थायते उद्‌गीर्य्य चर्व्वयतीत्यर्थः। पाणिनिः ३।१।१५।

† नमस् च तपस् च वरिवस् च कण्ड्वादिश्च तेभ्यः। एभ्यः क्यः स्यात् कृतौ अर्थे। वरिवस्शब्देन सेवा उच्यते। कण्ड्वादिगणमध्ये कण्डू-शब्दस्य ञानुबन्धेन, चित्री मही हृणी शब्दानां ङानुबन्धेन च, (क्यप्रत्ययेऽपि) यथासम्भवं उभयपदं आत्मनेपदञ्च। कण्ड्वादिश्च—कण्डूञ् चित्रीङ् महीङ् हृणीङ् असु मन्तु वल्गु लोट तिरस् उरस् मनस् पयस् उषस् कुसुभ मगध मेधा सुख दुःख चुरण भरण वरण दूषण अवर सपर अरम भिषज् गद्‌गद एला वेला खेला लेखा रेखा पम्पश प्रभृतिः। पाणिनिः ३।१।१५,१९,२७।

‡ अनुवृत्तावपि कृताविति कथनं स्पष्टार्थं। लेरिति कथनात् दान्तकार्य्यं न स्यादिति, तेन लवयतीत्यादौ न (२११) वृद्धः। ञ इत् उभयपदं। प्रश्नयतीत्यादि, प्रश्न-ञि (४६७) ङित्वात् (१२६) टिलोपे प्रश्नि इति (६३१) धातुसंज्ञा। वद्धातोः

८५६। श्वेताश्वाश्वतरगालोड़िताह्वरकस्याश्वतरेतक-लोपः। (श्वेताश्व—आह्वरकस्य ६।, अश्व—क-लोपः १।)।

श्वेताश्वमाचष्टे श्वेतयति, अश्वयति, गालोड़यति, आह्वरयति। *

८५७। नाप् सत्यार्थवेदैकाजतः।

(नाप् ।१।, सत्यार्थवेदैकाजतः ६।)।

सत्यादेरेकाचोऽकारान्तस्य च णौ नाप् स्यात्, न इत्। सत्यापयति अर्थापयति वेदापयति स्वापयति। (४७०)वाढ़ान्तिकेति साधादयः, साधयति। अश्वस्यमाचष्टे श्वापयति। †

णिः ऊढिः, ऊढिमाचष्टे इति ऊढि-शब्दात् ञि, डित्वात् टिलोपे ऊढ़िधातुः ऊढिमाख्यातवान् ऊढि-टीदि, अमागमः, (५८१) पुनरमागमः, (६१३) अङ्, (७१६) ऊकारं हित्वा ढि इत्यस्य द्वित्वादि, (६४१) अलोपे औडिढत्। एके वामनादयः। ईणन्तमिति ईशधातोः क्विप् ईट्, ततः ईट् विद्यते अस्य इति (४४१) मतुः, (१५४) षड्, (१५५) षस्य ड, (६४) डस्य ट, (५९) टस्य ण, ईण्मान्। अनेन ञिः, मतुलुकि, या यस्य लिङ्गस्य पूर्वा प्रकृतिः सा तस्येति न्यायात् पुनस्तालव्य-श-स्थितिः, ईशि धातुः। एवं सुग्वन्तं स्रग्विनश्च आचष्टे, वतु-विनोर्लुक्, पूर्वावयवस्थितिः। (४६८) लुङ् महद्दिनामिति बहुवचनेन अनट् क्तवतु घञ् अल् आनङ्युक्तेप्—एषां लुक् वक्तव्यः, तेन गमनमाचष्टे गमयति, गतवन्तमाचष्टे गमयति, बन्धमाचष्टे बन्धयति, वधमाचष्टे घातयति, ब्रह्माणीमाचष्टे ब्रह्मयति इत्यादि। एवं कर्त्तारमाचष्टे कारयति (४६९)। "तत् करोति तदाचष्टे।" वार्त्तिकद्वयम्।

* श्वेताश्वस्य अश्वतरस्य गालोड़ितस्य आह्वरकस्य तत् तस्य। अश्वस्य तरस्य इतस्य कस्य तेषां लोपः। एषां क्रमादेतेषामंशानां लोपः स्यादित्यर्थः। अश्वतरमाचष्टे, गालोड़ितमाचष्टे, आह्वरकमाचष्टे। (उन्मादशीले रोगार्त्ते मूर्खे गालोड़ितो मतः। आह्वरकमस्पष्टवाक्यम्।) भाष्यम्।

† एकाश्चासौ अत् चेति एकाजत्, सत्यश्च अर्थश्च वेदश्च एकाजश्च तत् तस्य। सत्यमाचष्टे, अर्थमाचष्टे, वेदमाचष्टे, स्वमाचष्टे इति वाक्यानि। वाढ़माचष्टे साधयति।

८५८। णिः कल्यादेः। (णि: ११, कल्यादेः ५।)।

कल्यादेरर्थविशेषे णिः स्यात्। कलिं गृह्णाति कलयति, अचकलत्। हलयति, अजहलत्। कृतयति, अचीकृतत् अचकृतत्। वर्णयति, त्वचयति। तूस्तानि विनिहन्ति वितूस्तयति। वस्त्रं संछादयति संवस्त्रयति। *
वर्म्मणा संनह्यति संवर्म्मयति'। चूर्णैरवध्वंसते अवचूर्णयति। हस्तिना अतिक्रामति अतिहस्तयति। वीणया उपगायति उपवीणयति। तूलैरवकुष्णाति अवतूलयति। श्लोकैरुपस्तौति उपश्लोकयति। सेनया अभिमुखं याति अभिषेणयति। अभिषिषेणयिषति। रूपं पश्यति रूपयति। लोमान्यनुमार्ष्टि अनुलोमयति। हस्तौ निरस्यति अतिहस्तयति।

एवं अन्तिकमाचष्टे नेदयति, स्थूलमाचष्टे स्थवयति, दूरमाचष्टे दवयति, युवानं यवयति; (४७४) कन्-आदेशे कनयति, क्षिप्रं क्षेपयति, क्षुद्रं क्षोदयति, प्रियं प्रापयति, स्थिरं स्थापयति, स्फिरं स्फापयति, उरुं वरयति, गुरुं गरयति, बहुलं बंहयति, तृप्रं त्रपयति, दीर्घं द्राघयति, ह्रस्वं ह्रसयति. वृद्धं वर्षयति, (४७२) ज्य-आदेशे ज्यापयति, वृन्दारकं वृन्दयति। कर्त्तारं (४६९) टिलोपे कारयति। (४७१) प्रशस्यस्याने श्र-आदेशे श्रापयति, (४७२) ज्यापयतीति च। (४७३) पृथुं प्रथयति. मृदुं म्रदयति, कृशं क्रशयति, भृशं भ्रशयति. दृढं द्रढयति, परिवृढं परिव्रढयति। (४७४) अल्पं कनयति अल्पयति, बहु आचष्टे भावयति, बहोर्भूरिति वक्तव्यं। वार्त्तिकम।

* कलिरादिर्यस्य स कल्यादि गणात्। कलि-हली कामधेनु सर्व्वार्थवाचकत्वादिति माधवः। कृतो आख्याने च (८५५) पूर्व्वेण णिविधानात् अत्र अर्थविशेषे स्यादित्युक्तम्। अर्थश्च स्वयं विवृणोति, कलिं गृह्णातीत्यादि। कलिशब्दात् णिः, (४६७) डित्, टिलोपः, कलि इति धातुः। अचकलदिति (६३९) कलि-हलि-वर्जनात् न सन्वद्भावः। रवं हलिं गृह्णाति, कृतं गृह्णाति। अचीकृतदिति (६३९) विकल्पेन सन्वद्भावः। वर्णं (वर्णद्रव्यं) गृह्णाति, त्वचं गृह्णाति। वितूस्तयति, तूस्तरहितं करोतीत्यर्थः। (तूस्तं रेणौ च पापे च जटायाश्च नपुंसकमिति मेदिनी।) संछादयति परिदधातीत्यर्थः। पाणिनिः ३।१।२१, वार्त्तिकानि च।

पुच्छमुत्क्षिपति उत्पुच्छयते। भाण्डानि संचिनोति संभाण्डयते। चीवरं संमार्जयति परिदधाति वा सञ्चीवरयते भिक्षुः। *

८५९। लिधो यथेष्टं द्विः, कण्ड्वाद्यजाद्योस्तु तृतीयानाद्योः।

(लिधोः ६।, यथेष्टं २।, द्विः १।, कण्ड्वादि-अजाद्योः ६॥, तु ।१।, तृतीयानाद्योः ६॥)।

पुपुत्रीयिषति पुतित्रीयिषति पुत्रीयियिषति, पुत्रीयिषिषति, पुपुतित्रीयियिषिषति। कण्डूयियिषति, अश्विश्वीयिषति। †

इति लिधु-पादः।

३य चतुर्गणाध्यायः।

---

* वर्म्मणा कवचेन संनह्यति बध्नातीत्यर्थः। चूर्णैश्चूर्णद्रव्यैः अवध्वंसते अवकिरतीत्यर्थः, नाशयतीति कश्चित्। हस्तिना इत्युपलक्षणं अश्वेन अतिक्रामति अत्यश्वयतीत्यपि स्यात्। तूलैः परिमापकदण्डैरवकुष्णाति परिमातीत्यर्थः। अभिषेणयतीति (५७२) गौक इति षत्वे, (१०७) णत्वं। अभिषेणयितुमिच्छति इति वाक्ये सेनिधातोः सन् (५५४) इम्, द्वित्वादौ, दशस्यादेरिति द्विरुक्तस्य षत्वं। भाण्डानि मूलधनानि सञ्चिनोति सञ्चितानि करोतीत्यर्थः। (भाण्डं पात्रे वणिङ्मूलधने भूषाश्वभूषयोरिति मेदिनी।) अत्र संवर्म्मयतीत्यादिषु सप्तसूदाहरणेषु करणकारकेभ्य एव ञिः अतएवैते सकर्म्मकाः प्रयोगाः, अन्येषु कर्म्मकारकेभ्यः तेन प्रायशः अकर्म्मका इति। एषूदाहरणेषु पुच्छभाण्डचीवरेभ्यः आत्मनेपदं, अन्येभ्यः परस्मैपदं प्राचीनसम्मतम्। पाणिनिः ३।१।२५,२०।

† आदौ लिः पश्चात् धुः लिधुः नामधातुरिति यावत्. इष्टमनतिक्रम्य यथेष्टं (क्रियाविशेषणं)। कण्डूरादिर्यस्य स कण्ड्वादिः, अच् आदिर्यस्य सः अजादिः। कण्ड्वादिश्च अजादिश्च तयोः। तृतीयश्च अनादिश्च तयोः। यथेष्टमिति क्रमेण युगपद्वा इत्यर्थः, तथाच कदाचित् प्रथमवर्णस्य, कदाचित् द्वितीयादेः, कदाचित सर्व्वेषां युगपत्, कण्ड्वादेस्तृतीयस्यैव, अजादेश्च आदिवर्णं हित्वा द्वितीयस्य तृतीयादेर्व्वा द्विर्भाव इत्यर्थः। पुत्रमिवाचरति शिष्यं इति वाक्ये (८४७) क्यः पुत्रीय-धातुः, ततः पुत्रीयितुमिच्छति सन् (५५४) इम्, पु त्री यि ष इत्यस्य पुप्रभृतीनां क्रमेण युगपच्च द्वित्वं। कण्डुं करोमीति वाक्ये (८५८) यः, ततः कण्डूयितुमिच्छति सन्, इम्, कण्डूयिष इत्यस्य तृतीयवर्णस्य यि इत्यस्य द्वित्वं। अश्वमिवाचरति गां (८४७) क्यः, अश्वीयितुमिच्छतीति सन्, अश्वीयिष इति स्थिते द्वितीयस्य द्वित्वं। तृतीयस्य द्वित्वे अश्वीयियिषति, एवं चतुर्थस्यापि। वार्त्तिकानि।

९मः। त्याद्यन्ताध्यायः।

१म पादः—पं।

८६०। घे पं परानु-कृ—प्रत्यभ्यति-क्षिप—प्र-वह—परि-मृष—व्यापरिरमो वा तूपरमः।

(घे ७।, पं १।, परा-अनु कृ, प्रति-अभि-अति-क्षिप, प्र-वह, परि-मृष, वि-आ-परि-रमः ५।, वा ।१।, तु ।१।, उप-रमः ५।)।

एभ्यः पं स्यात् घे, उप-रमस्तु वा। 'पराकरोति अनुकरोति, प्रतिक्षिपति, प्रवहति, परिमृष्यति, विरमति आरमति परिरमति, उपरमति उपरमते विष्णुः।*

८६१। कम्पान्नार्थेङ्बुधयुधप्रुद्रुस्रुजननशोऽञिप्राणिघाढ़ाच्च ञेः।

(कम्प—नशः ५।, अञि प्राणिघाढ़ात् ५।, च ।१।, ञेः ५।)।

चलयति भोजयति, अध्यापयति, बोधयति योधयति प्रावयति द्रावयति स्रावयति जनयति नाशयति, शाययति कृष्णं

---

* परानुभ्यां कृः परानुकृः, प्रत्यभ्यतिभ्यः क्षिपः प्रत्यभ्यतिक्षिपः, प्राद्वहः प्रवहः, परेर्मृषः परिमृषः, व्यापरिभ्यो रम व्यापरिरम। ततः, परानुकृश्च प्रत्यभ्यतिक्षिपश्च प्रवहश्च परिमृषश्च व्यापरिरम चेति तस्मात्। अनेन नियमेन कृ क्षिप वह मृष इति चतुर्णां ञित्त्वेऽपि आत्मनेपदं न स्यात्। येर्योगे (२८६) द्वितीया विहिता तेषामन्वादीनामिह न ग्रहणमिति, तेन वृषमनुकुरुते इत्यपि स्यात्। विष्णुः उपरमति उपरमते क्रीड़तीत्यर्थः। पाणिनिः १।३।७९—८५।

यशोदा। अप्राणिघात् किं, शोषयते शालिं। अढ़ात् किं, भक्तिं कारयते। अजौ किं, रूपयते हरिः। *

इति प-पादः।

२य पादः—मं।

८६२। वि-परा-जि—परि-व्यव-क्री—नि-वि-शानुप्रच्छो मं। (वि—प्रच्छः ५।, मं १।)।

एभ्यो मं स्यात् घे। विजयते पराजयते, परिक्रीणीते, निविशते, आनुते आपृच्छते। *

---

* कम्पश्चलनं, अन्नं भोजनं, ते अर्थां येषां ते कम्पान्नार्थाः, तेच इङ् च बुधश्च युधश्च प्रुश्च द्रुश्च स्रुश्च जनश्च नशश्च तस्मात्। प्राणी घो यस्य स प्राणिघः, नास्ति ढ यस्य सोऽढः, प्राणिघश्चासौ अढश्चेति प्राणिघाढः, अजौ प्राणिघाढः अजिप्राणिघाढ तस्मात्। एभ्यो ञान्तेभ्यः पं स्यात् घे, एतेन फलवत्कर्त्तर्य्यपि आत्मनेपदं न स्यादिति बोध्यं। चल-यति जनयतीति च घटादित्वात् ह्रस्वः। शाययति कृष्णमिति, कृष्णः शेते इति प्राणिकर्त्तृकोऽकर्म्मकः, ततो ञान्तात् परस्मैपदं, शालिः शुष्यतीति अप्राणिकर्त्तृकोऽकर्म्मकः, तेन ञान्तात् परस्मैपदनियमाभावे उभयपदं। रूपयते इति रूपत् क ततक्रतौ नित्यचुरादिः, सुतरां अञान्तदशाया असम्भवात् नैतन्नियमप्रसङ्गः, अतएव प्रेरणञान्तत्वे उभयपदमेव। पाणिनिः १।३।८६,८७,८८।

---

* वि-पराभ्यां जिः, परि-व्यवेभ्यः क्रीः, ने विशः, आङो नु-प्रच्छौ। ततः विपरा-जिश्च परिव्यवक्रीश्च निविशश्च आनुप्रच्छौ चेति तस्मात्। घे इति पूर्व्वादनुवर्त्तते। डु क्रीञ ग द्रव्यविपर्य्यये इत्यादि ञानुबन्धधातूनामात्मनेपद-विधानं अफलवत्कर्त्तर्य्यपि आत्मनेपदप्राप्त्यर्थं। एवं सर्व्वत्र। नि-विश इत्यनेन प्रणिविशतीत्यादौ न मं स्यात्। पाणिनिः १।३।१७,१८,१९, वार्त्तिकञ्च।

८६३। आ-दाञो ऽस्वप्रसारे।

(आ दाञः ५।, अस्वप्रसारे ७।)।

आदत्ते। स्वप्रसारे तु, व्याददाति मुखं कृष्णः। *

८६४। आ-गमेः चान्तौ। (आ गमेः ५।, चान्तौ ७।)।

आगमयते कालं। †

८६५। पर्य्यन्ववाङः क्रीड़ः।

(परि-अनु-अव-आङः ५।, क्रीड़ः ५।)।

परिक्रीड़ते अनुक्रीड़ते अवक्रीड़ते आक्रीड़ते। ‡

८६६। समो ऽकूजने। (समः ५।, अकूजने ७।)।

संक्रीड़ते। कूजने तु, संक्रीड़ति चक्रं। §

८६७। क्रो ऽपाद्धर्षान्नवासेच्छे चतुष्पाद्ववौ सुम् च।

(क्रः ५।, अपात् ५।, हर्षान्नवासेच्छे ७।, चतुष्पाद्ववौ ७।, सुम् ।१।, च ।१।)।

---

* स्वं स्वाङ्गं, स्वस्य प्रसारो विस्तारणं स्वप्रसारः, नञ्योगे तस्मिन्। आङ्-पूर्व्वात् दाञो मं स्यात् घे, न तु स्वप्रसारे। आदत्ते गृह्णाति, व्याददाति विस्तारयतीत्यर्थः। पाणिनिः १।३।२०। अत्र "अनास्यविहरणे" इत्युक्तम्।

† गमि ञंगन्तः, चान्तिः प्रतीक्षणं। आङ्पूर्व्वात् गमयते मं स्यात् घे चान्तौ (प्रतीक्षायाम्)। आगमयते कालं प्रतीक्षते इत्यर्थः। आनयनादौ अर्थे परस्मैपदमेव। वार्त्तिकम्।

‡ परिश्च अनुश्च अवश्च आङ् च तस्मात्। एभ्यः क्रीड़ते मं स्यात् घे। सहार्थकानुपूर्व्वात् न स्यादिति वक्तव्यं, तेन बालकमनुक्रीड़ति। पाणिनिः १।३।२१। अत्र भावः।

§ संपूर्व्वात् क्रीड़ते मं स्यात् घे, न तु कूजने। कूजन-मव्यक्तशब्दः। वार्त्तिकम्।

अपस्किरते मत्तः कुक्कुटः श्वा वा । अन्यत्र मल्लोऽपकिरति, गजोऽपकिरत्यम्भः । *

८९८ । शपथाशीर्गत्यनुकारे शप-नाथ-हृञः ।

(शपथ-आशी-गत्यनुकारे ७।, शप-नाथ-हृञः ५।) ।

कृष्णाय शपते गोपी । मोक्षाय नाथते मुनिः । पैतृकमनुहरते अश्वः । †

८९९ । प्रतिज्ञा-निर्णय-प्रकाशे संप्रव्यवाच्च स्थः ।

(प्रतिज्ञा-निर्णय-प्रकाशे ७।, सं-प्र-वि-अवात् ५।, च ।१।, स्थः ५।) ।

---

* अन्नञ्च वासश्च तौ, तयोरिच्छा अन्नवासेच्छा, हर्षेण अन्नवासेच्छा यस्य स हर्षान्नवासेच्छः तस्मिन् । चतुष्पाच्च विश्च तत्तस्मिन् । चतुष्पात् पशुः, विः पक्षी । हर्षहेतुक भक्षणेच्छावति हर्षहेतुक-वासेच्छावति वा चतुष्पदि पक्षिणि वा कर्त्तरि सति अपात् किरतेर्मं स्यात्, तस्य सुम् चेत्यर्थः । अपस्किरते, मत्तो हृष्टः कुक्कुटः भक्षार्थी श्वा वा वासार्थी भूमिमालिखतीत्यर्थः । अत्र कृधातुरालिखने एव बोध्यः । चतुष्पादौ किं, मल्लोऽपकिरति धूल्यर्थं भूमिमालिखति । हर्षान्नवासेच्छे इति किं, गजः अम्भो जलं अपकिरति ऊर्द्धं क्षिपतीत्यर्थः । अत्र तुल्ययोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिरिति न्यायेन आत्मनेपदाभावपक्षे सुमपि न स्यादिति । पाणिनिः ६।१।१४२ । "किरतेर्हर्षजीविकाकुलायकरणेषु वाच्यम्" इति वार्त्तिके हर्षादयस्त्रयो विषयाः उक्ताः, तत्र हर्षो विक्षेपस्य कारणम् इतरे फलं । बोपदेवस्तु मतान्तरमवलम्ब्य हर्षजनितं विषयद्वयमेव लिखितम् ।

† शपो आक्रोशे इत्यस्मात् शपथे, नाथृ ङ तापाशिषोरैश्वर्येऽर्थने इत्यस्मात् आशिषि, हृञ हृत्यामित्यस्मात् गत्यनुकारे, मं स्यात् घे । शपथः पुत्रादिशरीरस्पर्शादिना मिथ्यानिरसनं, आशी-रिष्टार्थाविष्करणं, गत्यनुकारो गतिसदृशीकरणं । गोपी कृष्णाय शपते, कस्यचित् शरीरं स्पृष्ट्वा मयैतन्न कृतमिति दिव्येन कृष्णं तोषयितुमिच्छतीत्यर्थः । शपथादन्यत्र नियमाभावा-दुभयपदमेव । मुनि र्मोक्षाय नाथते मोक्षो मे भूयादित्याशास्ते इत्यर्थः । उभयत्र (२९४) चतुर्थी । नाथधातो-रात्मनेपदित्वेऽपि आशिषोऽन्यत्र परस्मैपदमेव । अश्वः पैतृकं पितृसम्बन्धीयं गमनमिति यावत् अनुहरते अनुकरोति पितृवत् गच्छतीत्यर्थः । गतिग्रहणात् रूपाद्यनुकारे न स्यादिति । "शप उपालम्भे", "आशिषि नाथः", "हरतेर्गतताच्छील्ये" इति वार्त्तिकत्रयम् ।

नित्यं शब्दमातिष्ठते। त्वयि तिष्ठते विवादः। रामाय तिष्ठते सीता। सन्तिष्ठते प्रतिष्ठते वितिष्ठते अवतिष्ठते समस्थित। *

८७०। उदोऽनूर्द्ध्वेहे। (उदः ५।, अनूर्द्ध्वेहे ७।)।

मुक्तावुत्तिष्ठते। अन्यत्र आसनादुत्तिष्ठति, ग्रामाच्छतमुत्तिष्ठति। †

८७१। मन्त्रेणोपात्। (मन्त्रेण ३।, उपात् ५।)।

गायत्र्या उपतिष्ठते अर्कं। ‡

८७२। मैत्रय्ध्वसङ्गाराधे। (मैत्री-अध्व-सङ्ग-आराधे ७।)।

सन्तमुपतिष्ठते साधुः। गङ्गामुपतिष्ठते पन्थाः। पतिमुपतिष्ठते नारी। विष्णुमुपतिष्ठते वैष्णवः। §

---

* प्रतिज्ञादावर्थे तिष्ठते मं स्यात्, सं-प्र-वि-अवेभ्यो यस्मिन् कस्मिन्नप्यर्थे मं स्यात् घे, चकारात् अर्थद्वयं। प्रतिज्ञा अङ्गीकारः, निर्णयो निश्चयः, प्रकाशः स्वाभिप्रायप्रकटनं। नित्यं शब्दमातिष्ठते, नित्यमिति शब्दस्य विशेषणं, शब्दो नित्य इति प्रतिज्ञां करोतीत्यर्थः, मीमांसक इति शेषः। त्वयि विवादस्तिष्ठते इति निर्णयः। सीता रामाय तिष्ठते स्वाभिप्रायं प्रकाशयतीत्यर्थः। (२८४) चतुर्थी। समस्थित इति (७३६) ङिः। पाणिनिः १।३।२२,२३, वार्त्तिकञ्च।

† न ऊर्द्ध्वं अनूर्द्ध्वं, अनूर्द्ध्वं ईहा (चेष्टा) यस्य सः अनूर्द्ध्वेहः तस्मिन्, अनूर्द्ध्वेहे इति कर्त्तुर्विशेषणं। उत्पूर्व्वात् स्थाधातो मं स्यात् अनूर्द्ध्वविषये चेष्टमाने कर्त्तरि। मुक्तौ उत्तिष्ठते मुक्तिविषये चेष्टते इत्यर्थः। आसना-दुत्तिष्ठतीति कर्त्तुरूर्द्ध्वचेष्टत्वान्न मं। ग्रामात् शतमुत्तिष्ठतीति शतमुत्पद्यते इत्यर्थः, शतस्य कर्त्तुश्चेष्टाया अभावान्न मं। पाणिनिः १।३।२४।

‡ मन्त्रकरणके धात्वर्थे उपात् स्थो मं स्यात् घे। गायत्र्या मन्त्रेण अर्कं सूर्यं उपास्ते इत्यर्थः। मन्त्रेण किं, युवति यौवनेन भर्त्तारमुपतिष्ठति। पाणिनिः १।३।२५।

§ मित्रस्य भावो मैत्री, अध्वा पन्थाः, सङ्गः सङ्गमः, आराध आराधनं। एष्वर्थेषु उपात् स्थो मं स्यात् घे। अध्वनि कर्त्तरि सतीति भावः। साधुः सन्तं साधुं

८७३ । लिप्सायां वा । (लिप्सायां ७।, वा ।१।) ।

भिक्षु र्धार्म्मिकमुपतिष्ठते उपतिष्ठति वा । *

८७४ । अढात् । (अढात् ५।) ।

स्नानमुपतिष्ठते । †

८७५ । समो गम्‌च्छप्रच्छस्वृश्रुवेत्त्यर्त्तिदृशः ।

(समः ५।, गम-ऋच्छ-प्रच्छ-स्वृ-श्रु-वेत्ति-अर्त्ति-दृशः ५।) ।

सङ्गच्छते, समगत समगंस्त, सङ्गसीष्ट सङ्गंसीष्ट । समृच्छते, संपृच्छते, संस्वरते, संशृणुते, संविद्रते संविदते, समियृते, सम्पश्यते । अढात् किं, गङ्गां सङ्गच्छति । ‡

उपतिष्ठते मित्रं करोतीत्यर्थः । गङ्गामुपतिष्ठते पन्थाः गङ्गां गच्छतीत्यर्थ । पथि कर्त्तरि किं, पन्थानमुपतिष्ठति । पतिमुपतिष्ठते पत्या सह सङ्गं करोतीत्यर्थः । विष्णुमुपतिष्ठते आराधयतीत्यर्थः । "उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वाच्यम्" इति वार्त्तिकम् ।

* लब्धुमिच्छा लिप्सा । लिप्सार्थे उपात् स्थो मं स्याद्वा घे । धार्म्मिकमुपतिष्ठते उपतिष्ठति वा धार्म्मिकात् (धनं) लब्धुमिच्छतीत्यर्थः । वार्त्तिकम् ।

† उपात् अकर्म्मकात् स्थो मं स्यात् घे । विभाषाद्वय-मध्यवर्त्तित्वान्नित्यं । स्नानमुपतिष्ठते स्नानं उपस्थितं भवतीत्यर्थः । पाणिनिः १।३।२६ ।

‡ गमश्च ऋच्छश्च प्रच्छश्च स्वृश्च श्रुश्च वेत्तिश्च अर्त्तिश्च दृश चेति तस्मात् । समः परेभ्यः अकर्म्मकेभ्य एभ्यो मं स्यात् घे । एते सकर्म्मका अपि विवक्षावशादकर्म्मकाः । समगतेति सम्-गम टीतन्, सिः, (६५८) सेः कित्संज्ञा, (६७६) अम्-लोपः, (५६२) से लोपः । कित्संज्ञाभावपक्षे (५०) मस्यानुस्वारः । एवं ढी-सीष्ट । समृच्छते संपृच्छते तुदादित्वात् शः, (६६१) प्रच्छो ञिः । संशृणुते (६२१) श्रुः शिश्च । संविद्रते इत्यादि अन्ते (५५५) अन्तस्थाने अत्, (७१२) विकल्पेन रम् । समियृते इति ऋर्त्ति गत्यां (७२६) द्वित्वं, (७२८) द्वे किः, (५८५) इस्थाने इय । अर्त्ति-ग्रहणेन भौवादिकस्यापि, तेन समृच्छते इति च । पाणिनिः १।३।२९,[१।२।१३,७।१।७,] वार्त्तिकद्वयञ्च ।

८७६। गे वास्योहो ढे च।

(गे ५।, वा ।१।, अस्योहः ५।, ढे ७।, च ।१।)।

निरस्यते निरस्यति, समूहते समूहति। *

८७७। गेरूहः स्वो ये ऽणौ।

(गेः ५।, ऊहः ६।, स्वः १।, ये ७।, अणौ ७।)।

ब्रह्म समुह्यात्। †

८७८। आत्माङ्गढाद्ढाच्चा-हनयमः।

(आत्माङ्गढात् ५।, अढात् ५।, च ।१।, आ-हन-यमः ५।)।

उरआहते, पादमायच्छते। आहते आयच्छते। अन्यत्र शत्रुमाहन्ति, परश्चिर आयच्छति। ‡

८७९। हनः कित् सिः। (हनः ५।, कित् ।१।, सिः १।)।

---

* अस् उ इर् क्षेपे, ऊह ङ वितर्के। गेः पराभ्यामाभ्यां मं स्याद्वा घे; ढे कर्म्मणि विद्यमाने, चकारात् अकर्म्मणि च। वार्त्तिकम्।

† गेः परस्य ऊहधातोः स्वः स्यादणौ ये परे। ब्रह्म वेदं परमेश्वरं वा समुह्यात् ब्रह्मविषये वितर्कं क्रियादित्यर्थः। पूर्व्वसूत्रेण आत्मनेपदविकल्पपक्षे ढौ यात्, अत्र हृस्वः। पाणिनिः ७।४।२३।

‡ आत्मनः अङ्गं ढं यस्य स आत्माङ्गढस्तस्मात्। नास्ति ढं यस्य सोऽढस्तस्मात्। हन च यम् च हनयम्, आङो हनयम आहनयम् तस्मात्। मण्डूकगत्या घे मं इत्यनुवर्त्तते। स्वाङ्गकर्म्मकाभ्यामकर्म्मकाभ्याञ्च आङ्पूर्व्व-हनयमाभ्यां घे मं स्यात्। स्वाङ्गढादिति नोक्ता आत्माङ्गढादिति कथनं, (२६५) पारिभाषिक-स्वाङ्ग-व्यावृत्त्यर्थं, अतएव परश्चिर आयच्छतीत्यत्र नात्मनेपदं। उरो वक्षः आहते ताड़यतीत्यर्थः, पादं चरणं आयच्छते दीर्घं करोतीत्यर्थः। कर्म्माविवक्षायां आहते ताड़ितो भवति, आयच्छते दीर्घो भवतीत्यर्थः। पाणिनिः १।३।२८, भाष्यञ्च।

हनः परः सिः कित् स्यात् । आहत आवधिष्ट, आहसातां आवधिषातां । *

८८० । यमः सूचने वा तूद्वाहे ।

(यमः ५।, सूचने ७।, वा ।१।, तु ।१।, उद्वाहे ७।) ।

आयत । रामः सीतामुपायत उपायंस्त । †

८८१ । व्युत्तपः ।

(वि-उत्-तपः ५।) ।

वितपते उत्तपते पाणिं जनः । ‡ आत्माङ्गढाद्ढाच्च किं, मही वितपत्यर्कः ।

८८२ । तपोढाद् यक् च रे ।

(तपोढात् ५।, यक् ।१।, च ।१।, रे ७।) ।

तप्यते तपस्तापसः । रे किं, अतप्त । §

---

* आहत इति पूर्व्वेणात्मनेपदं, (६७८) वधादेश-विकल्पपक्षे अनेन सेः कित्त्वा (६७६) अम्लोपः, ततः (५६२) सिलोपः । वधादेशपक्षे (५५४) इम् आवधिष्ट । एवं टौ आतां । पाणिनिः १।२।१४,[२।४।४४] ।

† यमः परः सिः कित् स्यात् आत्मनेपदे सूचने अर्थे, विवाहार्थे तु वा । सूचनम् इङ्गितादिना विज्ञापनं । आयत इति आ-यम, पूर्व्वेणात्मनेपदे टौ-तन्, सिः, अनेन सेः कित्त्वं, (६७६) अम्लोपः । उपायतेत्यादि (९०९) उपयम इति वक्ष्यमाण सूत्रेणात्मनेपदे अनेन विकल्पेन सेः कित्त्वं । पाणिनिः १।२।१५,१६ ।

‡ व्युद्भ्यां परादात्माङ्गढाद्ढाच्च तपो घे मं स्यात् । मण्डूकगत्या घे मं इत्यनुवर्त्तते । जनः पाणिं हस्तं उत्तप्तं करोतीत्यर्थः । एवं जनः उत्तप्तो भवतीति अढादपि वितपते उत्तपते । पाणिनिः १।३।२७, भाष्यं, वार्त्तिकञ्च ।

§ तपः ढं (कर्म्म) यस्य स तपोढस्तस्मात् । पृथक्विधानात् व्युदिति नानुवर्त्तते तपोढादित्यनेन आत्माङ्गढाद्ढाच्चेति च निरस्तं । तपःकर्म्मकात् तपो मं स्यात् घे, परं यक् च स्यादित्यर्थः । अत्र यक् श्यपो बाधकः । तपस्तप्यते तपः अर्ज्जयतीत्यर्थः

८८३ । सृजः श्राद्धघात् तनीण् च ।

(सृजः ५।, श्राद्धघात् ५।, तनि ७।, इण् ।१।, च ।१।)।

सृज्यते स्रजं भक्तः। असर्जि। श्राद्धघात् किं, सृजति स्रजं मालिकः।*

८८४ । निसंव्युपह्वः । (नि-सं-वि-उप-ह्वः ५।)।

निह्वयते संह्वयते विह्वयते उपह्वयते । †

८८५ । स्पर्द्धाया-माङः । (स्पर्द्धायां ७।, आङः ५।)।

कृष्णश्चानूरमाह्वयते । ‡

८८६ । सूचनावक्षेपणसेवासाहसप्रतियत्न-कथोपयोगे कृञः । (सूचन—उपयोगे ७।, कृञः ५।)।

अपकुरुते, श्येनो वर्त्तिकामुपकुरुते, विष्णुं प्रकुरुते, परदारान् प्रकुरुते, एधोदकस्योपस्कुरुते, गीताः प्रकुरुते, शतं प्रकुरुते । §

एवं तप्यते तप्यतां अतप्यत। अतप्तेति टौ तन्, निमित्तगतविशेषात् सिरेव, न तु यक्, औदित्त्वान्नेम्, (५६२) सिलोपः। पाणिनिः ३।१।८७,८८।

* श्रत्पूर्व्वक-धाधातोर्ङः (११५७) श्रद्धा इति, श्रद्धा विद्यतेऽस्येति (४४६) प्रज्ञादित्वात् णः श्राद्धः, श्राद्धः घः यस्य सः श्राद्धघस्तस्मात्। श्राद्धघात् सृजो मं स्यात् घे, तनि परे इण्, चकारात् रे परे यक् च स्यादित्यर्थः। भक्तः श्रद्धाविशिष्टो जनः स्रजं मालां सृज्यते रचयतीत्यर्थः। असर्ज्जीति तन्, इण् सिबाधकः, (६४४) तन्लोपः। मालिको न श्रद्धावान्। वार्त्तिकद्वयम्।

† नि सम् वि उप एभ्यः परात् ह्वेञो मं स्यात् घे। अनिष्टत्वात् यगिणो-र्नानुवृत्तिः। पाणिनिः १।३।३०।

‡ आङः परात् ह्वेञो मं स्यात् घे स्पर्द्धायां गम्यमानायां। स्पर्द्धा पराभिभवेच्छा। चानूरं तन्नामकमसुरं। स्पर्द्धायां किं, पिता पुत्रमाह्वयति। पाणिनिः १।३।३१।

§ सूचनाद्यर्थेषु कृञो मं स्यात् घे। सूचनं—परदोषाद्याविष्करणं, अवक्षेपण—तिरस्कारः, सेवा—अनुवृत्तिः, साहसं—पश्चाद्दोषमनालोच्य करणं हिंसा-चौर्य-

८८७ । अधेः शक्तौ । (अधेः ५।, शक्तौ ७।) ।

दैत्यानधिकुरुते कृष्णः । *

८८८ । शब्दढाढ्वेः । (शब्दढाढात् ५।, वेः ५।) ।

स्वरान् विकुरुते, वायुर्विकुरुते। अन्यत्र चित्तं विकरोति कामः।†

८८९ । ज्ञानार्च्चोत्क्षेपोपनयनभृतिविगणन-व्ययेषु नीञः । (ज्ञान—व्ययेषु ७।।, नीञः ५।) ।

शास्त्रे नयते, विष्णुं नयते, दण्डमुन्नयते, पुत्रमुपनयते, भृत्यमुपनयते, ऋणं विनयते, द्रव्यं विनयते । ‡

परदारगमनादि, प्रतियत्नो—गुणान्तराधानं, कथा—व्याख्यानं, उपयोगो—धर्म्मार्थं द्रव्यविनियोगः। अपकुरुते कस्यचित् दोषमाविष्करोतीत्यर्थः। श्येनो वर्त्तिकामुपकुरुते तिरस्करोतीत्यर्थः। वर्त्तिका-श्येनौ पक्षिविशेषौ। विष्णुं प्रकुरुते सेवत इत्यर्थः। परदारान् प्रकुरुते साहसात् तेषु प्रवर्त्तत इत्यर्थः। एधः काष्ठं तस्य उदकं रसः, एधोदकस्य काष्ठरसस्य उपस्कुरुते अग्निसंयोगेन गुणान्तराधानं करोतीत्यर्थः, प्रतियत्नार्थे (७९९) सुम्। गीताः प्रकुरुते कथयतीत्यर्थः। शतं प्रकुरुते शतं द्रव्याणि विनियुङ्क्ते इत्यर्थः। पाणिनिः १।३।३२। अत्र सूचनमित्यत्र गन्धनपदं प्रयुक्तं तस्यार्थश्च प्राणवियोगानुकूलं सूचनम्। हिंसा इति भट्टोजिदीक्षितः।

* अधिपूर्व्वात् कृञो मं स्यात् घे शक्तौ। शक्तिरभिभवः। दैत्यानधिकुरुते कृष्णः अभिभवतीत्यर्थः। पाणिनिः १।३।३३। (अत्र प्रसहनं=पराभिभवश्च)।

† शब्दो ढं यस्य सः शब्दढः, नास्ति ढं यस्य सोऽढः, शब्दढश्च अढश्च तस्मात्। वेः परात् शब्दकर्म्मकादकर्म्मकाच्च कृञो मं स्यात् घे। स्वरान् शब्दान् विकुरुते विशेषेण करोतीत्यर्थः। वायुर्विकुरुते विकृतो भवतीत्यर्थः। पाणिनिः १।३।३४,३५।

‡ ज्ञानं प्रमेयनिश्चयः, अर्च्चा पूजा, उत्क्षेप उन्नयनं, उपनयनं यज्ञोपवीतदानसंस्कारः, भृतिर्वेतनं, विगणनं ऋणशोधः, व्ययो विनियोगः। एष्वर्थेषु नीञो मं स्यात् घे। शास्त्रे नयते प्रमेयनिश्चयं करोति, विष्णुं पूजयति, दण्डमुत्क्षिपति, पुत्रं यज्ञोपवीतदानेन संस्करोति, भृत्यमुपनयते भृत्याय वेतनं ददाति, ऋणं शोधयति, द्रव्यं विनियुङ्क्ते इत्यर्थः। पाणिनिः १।३।३६।

८९०। घस्थामूर्त्तढात्। (घस्थामूर्त्तढात् ५।)।

क्रोधं विनयते। घस्थं किं, गुरोः क्रोधं विनयति। अमूर्त्तं किं, गण्डं विनयति। *

८९१। वृत्त्युत्साहतायने क्रमः—परोपक्रमः। (वृत्ति-उत्साह-तायने ७।, क्रमः ५।, परा-उप-क्रमः ५।)।

ऋक्षु क्रमते बुद्धिः। धर्म्माय क्रमते साधुः। सतां श्रीः क्रमते। पराक्रमते उपक्रमते। †

८९२। आङो भोद्गमे। (आङः ५।, भोद्गमे ७।)।

आक्रमते अर्कः। भोद्गमे किं, आक्रामति धूमः, खं व्याप्नोतीत्यर्थः। ‡

८९३। वेः पद्भिः। (वेः ५।, पद्भिः ३।।।)।

साधु विक्रमते वाजी। पद्भिः किं, वाजिना विक्रामति राजा। §

---

* घे कर्त्तरि तिष्ठतीति घस्थं, घस्थं अमूर्त्तं ढं यस्य स तस्मात्, नीञो मं स्यात् घे। क्रोधं विनयते शमयतीत्यर्थः, अत्र क्रोधः कर्त्तृस्थः। गण्डं व्रणं। पाणिनिः १।३।३७।

† वृत्तिरप्रतिबन्धः, उत्साह उद्यमः, तायनं वृद्धिः (स्फीतता)। एष्वर्थेषु क्रमः परोपक्रमश्च मं स्यात् घे। परोपग्रहणमन्योपसर्ग-निरासाय। ऋक्षु वेदेषु बुद्धिः क्रमते अप्रतिहता भवति। धर्म्माय क्रमते उत्सहते। सतां श्री वर्द्धते। पाणिनिः १।३।३८,३९।

‡ भान्तीति भानि (९९७) आदन्तात् घे डः। भानां चन्द्रसूर्य्यादीनामुद्गमे आङ्-पूर्व्वात् क्रमो मं स्यात् घे। आक्रमते उद्गच्छतीत्यर्थः। पाणिनिः १।३।४०, वार्त्तिकञ्च।

§ वेः परात् क्रमो मं स्यात् घे पद्भिर्धात्वर्थे निष्पन्ने। वाजी घोटकः पद्भिर्गच्छति। पाणिनिः १।३।४१।

८९४। प्रोपादारम्भे। (प्र-उपात् ५।, आरम्भे ७।)।

भोक्तुं प्रक्रमते उपक्रमते। *

८९५। वाऽगेः। (वा।१।, अगेः ५।)।

क्रमते क्रामति। †

८९६। निह्नवे ज्ञः। (निह्नवे ७।, ज्ञः ५।)।

शतमपजानीते। ‡

८९७। अढात्। (अढात् ५।)।

सर्पिषो जानीते। §

८९८। संप्रतेरस्मृतौ। (सं-प्रतेः ५।, अस्मृतौ ७।)।

संजानीते प्रतिजानीते। अस्मृतौ किं, पुत्रं संजानाति। ¶

८९९। ञेर्ढेऽञौ घे। (ञेः ५।, ढे ७।, अञौ ७।, घे ७।)।

दर्शयते भवो भक्तान्। अञौ यत् ढं तच्चेत् घ इति किं—

---

* प्रोपाभ्यां परात् क्रमो मं स्यात् घे आरम्भे। भोक्तुं प्रक्रमते आरभते इत्यर्थः पाणिनिः १।३।४२।

† नास्ति गि र्यस्मिन् सोऽगि स्तस्मात्। अगेः क्रमो मं स्याद्वा घे। उपसर्गरहित क्रमधातुः उभयपदीत्यर्थः। पाणिनिः १।३।४३।

‡ जानाते र्मं स्यात् घे निह्नवे; निह्नवोऽपलापः। शतमपलपतीत्यर्थः। अप जानातिरपह्नवार्थः। पाणिनिः १।३।४४।

§ अकर्म्मकात् जानाते र्घे मं स्यात्। सर्पिषो घृतस्य जानीते सर्पिषा करणे प्रवर्त्तते इत्यर्थः। (३०३) ज्ञोऽज्ञाने धे इति करणे षष्ठी। पाणिनिः १।३।४५।

¶ सं-प्रतिभ्यां परात् जानाते र्घे मं स्यात्, न तु स्मृतौ। संजानीते प्रतिजानीते अङ्गीकरोतीत्यर्थः। पुत्रं संजानाति सोत्कण्ठं स्मरतीत्यर्थः। पाणिनिः १।३।४६।

दर्शयति शम्भुं भक्तान् भक्तिः। स्मृतौ तु, स्मारयति भक्तान् हरिः। *

९०० । ज्ञानयत्नप्रलोभे वदः।

(ज्ञान-यत्न-प्रलोभे ७।, वदः ५।)।

पाणिनि र्वदते, चैत्रे वदते, शिष्यमुपवदते। †

९०१ । अनोरढात्। (अनोः ५।, अढात् ५।)।

अनुवदते। ‡

९०२ । विमति-व्यक्तसहोक्त्योः।

(विमति-व्यक्तसहोक्त्योः ७॥)।

विवदन्ते शिष्याः। व्यक्तं किं, संप्रवदन्ति खगाः। §

---

* अञौ (अञ्यन्तदशायां) ढे कर्म्मणि घे (ञ्यन्तदशायामिति यावत्) कर्त्तरि सति, ञ्यन्ताद्धातो र्मं स्यात् घे, न तु स्मृतौ। भक्ताः भवं पश्यन्ति, 'भवः भक्तान् दर्शयते आत्मानमिति शेषः। भक्ताः शम्भुं पश्यन्ति, भक्तिः भक्तान् शम्भुं दर्शयति। अत्र अञ्यन्तस्य कर्म्म शम्भुः, ञ्यन्तस्य कर्त्री भक्तिः, अतो नात्मनेपदं। स्मारयतीति अत्र अञ्यन्तदशायां कर्म्मणो हरे र्ञ्यन्तदशायां कर्त्तृत्वेऽपि स्मरणार्थत्वान्नात्मनेपदं। पाणिनिः १।३।६७।

† ज्ञानं यत्नः प्रलोभः (उपमन्त्रणमिति पाणिनिः, रहस्युपच्छन्दनमिति क्रमदीश्वरः) एष्वर्थेषु वदे र्वाचीत्यस्मात् मं स्यात् घे। पाणिनि र्वदितुं जानातीत्यर्थः। चैत्रे यत्नं करोतीत्यर्थः। शिष्यं प्रलोभयतीत्यर्थः। पाणिनिः १।३।४७।

‡ अनुपूर्व्वादकर्म्मकात् वदो मं स्यात् घे। अत्रापि व्यक्तोक्तौ इति पाणिनिक्रमदीश्वरौ। अनुवदते रामस्य कृष्णः, रामो यथा वदति कृष्णोऽपि तथा वदतीत्यर्थः। अढात् किं, पूर्व्वोक्तमनुवदति। पाणिनिः १।३।४९।

§ विविधा मति र्विमतिः, व्यक्ता चासौ सहोक्तिश्चेति व्यक्तसहोक्तिः, विमतिश्च व्यक्तसहोक्तिश्च ते तयोः। एतयोरर्थयो र्वर्त्तमानात् वदो मं स्यात् घे। विवदन्ते शिष्या इति द्वयोरुदाहरणं, विरोधिज्ञानपूर्व्वकं वदन्ति, व्यक्तं सहवदन्ति वा इत्यर्थः। संप्रवदन्ति अस्फुटं वदन्तीत्यर्थः। पाणिनिः १।३।४७,४८।

९०३ । तद्योगे वा । (तद्योगे ७।, वा ।१।) ।

विप्रवदन्ते विप्रवदन्ति वैद्याः । *

९०४ । अवाद्गिरः । (अवात् ५।, गिरः ५।) ।

अवगिरते । †

९०५ । समः प्रतिज्ञायां । (समः ५।, प्रतिज्ञायां ७।) ।

शतं संगिरते । ‡

९०६ । उच्चरः सटात् । (उत्-चरः ५।, सटात् ५।) ।

धर्म्ममुच्चरते । सटात् किं, धूम उच्चरति । §

९०७ । समस्त्या । (समः ५।, त्या ३।) ।

अश्वेन सञ्चरते । ¶

९०८ । दानः सा चेच्चार्थे ।

(दानः ५।, सा ।१।, चेत् ।१।, च्यर्थे ७।) ।

---

* तयोः (विमति-व्यक्तसहोक्त्योः) योगस्तस्मिन् । अस्मिन्नर्थं वदो मं स्याद्वा घे । वैद्याः विरोधिज्ञानपूर्व्वकं व्यक्तं सहवदन्तीत्यर्थः । पाणिनिः १।३।५० ।

† अत्र गिर इति कथनात् गृणातेर्नेति भाष्यम् । पाणिनिः १।३।५१ ।

‡ संपूर्व्वात् गिरतेः प्रतिज्ञायां घे मं स्यात् । शतं प्रतिजानीते इत्यर्थः । प्रतिज्ञायां किं, ग्रामं संगिरति ददातीत्यर्थः ; (ग्रासं संगिरति वा) । पाणिनिः १।३।५२ ।

§ उत्पूर्व्वकात् सकर्म्मकात् चरो घे मं स्यात् । धर्म्ममुच्चरते उल्लङ्घयति । धूम-उच्चरति उद्गच्छतीत्यर्थः । पाणिनिः १।३।५३ ।

¶ साधन-तृतीयान्तेन योगे समपूर्व्वकात् चरो घे मं स्यात् । हेतौ सहार्थे च तृतीयया न स्यात्, तेन पुत्रेण सञ्चरति, पुत्रेण सञ्चरति । "हेतुतृतीयायुक्तादपि भवति, मुद्रया सञ्चरते नृपः" इति तु गोयीचन्द्रः । पाणिनिः १।३।५४ ।

दास्या संयच्छते कामी। च्यर्थे किं, दास्या संयच्छति भिक्षां भिक्षवे। *

६०९। उप-यमो विवाहे। (उप-यम: ५।, विवाहे ७।)।

रामः सीतामुपायत उपायंस्त। †

६१०। भुजो ऽशने। (भुज: ५।, अशने ७।)।

शालीन् भुङ्क्ते गौः। अनशने तु, पृथ्वीं भुनक्ति राजा। ‡

६११। संक्ष्णोः। (सं-क्ष्णोः ५।)।

अस्त्रं संक्ष्णुते। §

६१२। युजिर उदग्यचो ऽयज्ञपात्रे।

(युजिर: ५।, उदग्यच: ५।, अयज्ञपात्रे ७।)।

---

* सा तृतीया चेत् यदि च्यर्थे चतुर्थ्यर्थे भवति तदा तेन तृतीयान्तेन संपूर्व्वकात् दाणो मं स्यात्। कामी जनः दास्या संयच्छते दास्यै वस्त्रादिकं ददातीत्यर्थः। दास्या इति (२९३) अधर्म्यसम्प्रदाने तृतीया। दास्या संयच्छति भिक्षां भिक्षवे इत्यत्र दास्या इति करणे तृतीया। उपसर्गान्तरव्यवधानेऽपि यथा, दास्या समप्रयच्छते। पाणिनि: १।३।५५।

† उपात् यमो मं स्यात् घे विवाहे। विवाहशब्देनात्र स्वीकारार्थो बोद्धव्य इति भाष्यमतम्, यतः पाणिनौ 'स्वकरणे' इत्युक्तम्। "स्वीकरणे" इति च क्रमदीश्वरः। तेन "शस्त्राण्युपायंसत जित्वराणि" शकटमुपयच्छते इत्यादि सङ्गच्छते। वोपदेवेन तु "पाणिग्रहणमिह स्वीकरणं गृह्यते न स्वीकरणमात्रम्" इति जयादित्यसर्व्ववर्म्मचन्द्रादीनां मतमनुसृत्य 'विवाहे' इत्युक्तम्। उपायत इति (८८०) सेः कित्वात् (६७६) अमलोपे, (५६२) सिलोपः, कित्वविकल्पपक्षे मस्य (५०) अनुस्वारः। पाणिनि: १।३।५६।

‡ भोजनार्थे भुजो मं स्यात् घे। 'अनवने' इति तु पाणिनि:, अवनं रक्षणं तद्भिन्नेऽर्थे इत्यर्थः। शालीन् धान्यानि। रक्षाभिन्ने उपभोगार्थेऽपि क्वचित् महाकविप्रयोगादौ मं स्यादिति वक्तव्यं। यथा—बुभुजे पृथिवीपालः पृथिवीमेव केवलाम् (रघुवंशम्) इत्यादौ। पाणिनि: १।३।६६।

§ संपूर्व्वकात् क्ष्णौतेः मं स्यात् घे। संक्ष्णुते शाणयतीत्यर्थः। पाणिनि: १।३।६५

उद्युङ्क्ते प्रयुङ्क्ते । यज्ञपात्रे तु, प्रयुनक्ति स्रुचं । *

९१३ । प्रतारे वञ्चि-गर्द्धः । (प्रतारे ७।, वञ्चि-गर्द्धेः ५।) ।

वटुं वञ्चयते गर्द्धयते । प्रतारे किं, श्येनोऽहिं वञ्चयति । †

९१४ । पूजाभिभवे च लापेः ।

(पूजाभिभवे ७।, च ।१।, लापेः ५।) ।

जटाभि र्लापयते । श्येनो वर्त्तिकामुल्लापयते । पुत्रमुल्लापयते ।
एषु किं, घृतं विलापयति । ‡

९१५ । मिथ्या कारे-रभ्यासे ।

(मिथ्या ।५।, कारेः ५।, अभ्यासे ७।) ।

पदं मिथ्या कारयते । मिथ्या किं, साधु पदं कारयति ।
अभ्यासे किं, सकृत् पदं मिथ्या कारयति । §

---

* उत् च, गेरश्च तस्मात् । उदो गेरचश्च परात् युजिरौ ञ ध युती इत्यस्मात् मं स्यात् घे, न तु यज्ञपात्रे । प्रयुनक्ति स्रुचमिति स्रुचं यज्ञे नियोजयतीत्यर्थः । पाणिनिः १।३।६४, वार्त्तिकञ्च । "असंनिर्दुरः प्रादेः" इति क्रमदीश्वरः ।

† वन्चु गत्यां, गृधिर्यु लिप्से इत्येताभ्यां प्रेरणजान्ताभ्यां घे मं स्यात् प्रतारे । प्रलम्भनमिति पाणिनिसर्व्ववर्म्माणौ, विसंवाद इति क्रमदीश्वरः । वटुं ब्राह्मणकुमारं वञ्चयते गर्द्धयते प्रतारयतीत्यर्थः । श्येनः पक्षी अहिं सर्पं वञ्चयति परिहरतीत्यर्थः । पाणिनिः १।३।६९ ।

‡ पूजायां अभिभवे चकारात् प्रतारे च लापयते घें मं स्यात् । लापिरिति ली-धातो र्ञौ (७४५) ङापचे, ला-धातोश्च ञौ, उभयोरादन्तत्वात् (७८४) पणि रूपं । जटाभि र्जटिलकेशैः पुष्पजटाभिर्व्वा पूजयतीत्यर्थः । श्येनो वर्त्तिका-मभिभवतीत्यर्थः । पुत्रं प्रतारयतीत्यर्थः । घृतं द्रवीकरोतीत्यर्थः (७६१) । पाणिनिः १।३।७० ।

§ मिथ्या-शब्दात् परात् कारयते घें मं स्यात् पौनःपुन्ये । पदं मिथ्या कारयते स्वरादिदुष्टं पदं पुनःपुनरुच्चारयतीत्यर्थः । साधु पदं पुनःपुनरुच्चारयतीत्यर्थः । स्वरादिदुष्टं पदं सकृदुच्चारयतीत्यर्थः । पाणिनिः १।३।७१ ।

६१६। व्यतीहारे गतिहिंसाशब्दार्थ-हसान्य-हृवहो ऽनन्योन्यार्थे। (व्यतीहारे ७।, गति—वह: ५।, अनन्योन्यार्थे ७।)।

व्यतिभवते अर्कमिन्दुः, व्यतिहरते व्यतिवहते। व्यतिजज्ञिष्व व्यतिजज्ञिध्वं। *

६१७। होऽस्तेरेति। (ह: १।, अस्ते: ६।, एति ७।)।

अस्तेर्हः स्यादेकारे परे। व्यतिहे। †

गत्यर्थादेस्तु, व्यतिसर्पन्ति व्यतिघ्नन्ति व्यतिजल्पन्ति व्यति-हसन्ति। अन्योन्यार्थे तु, परस्परं व्यतिलुनन्ति। ‡

६१८। स्मृदृशो(ऽ)ननुज्ञानाप्रतिश्रोः सनः।

(स्मृ—श्रो: ५।, सन: ५।)।

---

* गतिश्च हिंसा च शब्दश्च गतिहिंसाशब्दाः, ते अर्था येषां ते गतिहिंसाशब्दार्थाः। ते च हसश्च ते गतिहिंसाशब्दार्थहसाः, तेभ्योऽन्यः गतिहिंसाशब्दार्थहसान्यः। गति-हिंसाशब्दार्थहसान्यश्च हृश्च वह चेति तस्मात्। अन्योन्यस्य अर्थ इव अर्थो यस्य सोऽन्यो-न्यार्थः, न अन्योन्यार्थो ऽनन्योन्यार्थ स्तस्मिन्। अन्योन्यार्थेन अन्योन्य-इतरेतर-परस्पर-शब्दा बोध्याः। गत्यर्थ हिंसार्थ शब्दार्थ हसति—भिन्न धातुभ्यो हृवहाभ्याञ्च मं स्यात् घे व्यतीहारे, न त्वन्योन्यार्थशब्दे प्रयुज्यमाने। परस्परमेकजातीय-क्रियाकरणं व्यती-हारः, क्रिया-विनिमयः क्रिया-विपर्य्ययः इत्यादि। हृवहोर्गत्यर्थत्वात् पृथगुक्तिः। इन्दुरर्कं व्यतिभवते, अर्को यथा इन्दावस्तं गते उदेति, इन्दुरपि तथा अर्के अस्तं गते उदेतीति व्यतीहारः। व्यतिहरते व्यतिवहते कृष्णं बालकः। एवं व्यतिहरन्ते धान्यं चौराः व्यतिवहन्ते भारं कृषकाः इत्यादि। व्यतिजज्ञिष्व त्वमिति शेषः, व्यतिजज्ञिध्वं यूयमिति शेषः, जन म लिट् जनौ, (७२६) द्वित्वं, (७०८) इम्, (२३०) उङ्लोपः। एवं व्यतिसे, व्यतिषजते इत्यादि। पाणिनिः १।३।१४,१५,१६, वार्त्तिकत्रयञ्च।

† व्यतिहे इति व्यति-अस-की-ए, अनेन असस्थाने ह-आदेशः। पाणिनिः ७।४।५२।

‡ व्यतिसर्पन्तीत्यादि गत्यर्थादित्वात् व्यतीहारेऽपि न मं। परस्परं व्यतिलुन-न्तीति परस्परशब्देनैव व्यतीहारस्योक्तत्वात् न मं। सम्यग्विनिमयेनोभौ दधतुर्भुवन-द्वयमिति रघुवंशे विनिमय-शब्दस्यापि अन्योन्यार्थकल्पनेन नात्मनेपदं।

एभ्यः सनन्तेभ्यो मं स्यात्। सुस्मूर्षते दिदृक्षते जिज्ञासते शुश्रूषते। अन्यत्र अनुजिज्ञासति आशुश्रूषति प्रतिशुश्रूषति। *

९१९। ञित् आन्त-पिब धे नृद्वद वस दम् रुचाद परिमुहायमयसो ऽगिज्ञापवदाग्र्योत्समायमः फलिनि। † (ञित्—यसः ५।, अगिज्ञा—यमः ५।, फलिनि ७।)।

ञितो आन्तपिबादे-रगिजानाते-रपवदो ऽग्र्योदादिपूर्व्वयमश्च फलवति घे मं स्यात्। यजते। पाययते धापयते नर्त्तयते वादयते वासयते दमयते रोचयते आदयते परिमोहयते आयामयते आयासयते। जानीते अपवदते उद्यच्छते संयच्छते आयच्छते। ग्रन्थे तु, वेदमुद्यच्छति। फलिनि किं, यजति याजकः। ‡

इति म-पादः।

---

* नास्ति अनुर्यस्मिन् सोऽननुः, स चासौ ज्ञश्चेति अननुज्ञाः। न विद्यते आ-प्रती यस्मिन् सोऽनाप्रतिः, स चासौ श्रुश्चेति अनाप्रतिश्रुः। स्मृश्च दृशश्च अननुज्ञाश्च अनाप्रतिश्रुश्चेति तस्मात्। एभ्यः सनन्तेभ्यो मं स्यात् 'घे। पाणिनिः १।३।५७,५८,५९।

† परेर्मुहः परिमुहः, आङो यम-यमौ आयमयसौ, पिबश्च धेश्च नृत् च वदश्च वसश्च दमश्च रुचश्च अदश्च परिमुहश्च आयमयसौ चेति तत्। आन्तश्चासौ पिबधेनृद्वदवसदमुचादपरिमुहायमयम् चेति तत्। ञिच्च आन्त-पिब——यस् चेति तस्मात्। नास्ति गि र्यस्मिन् सोऽगिः, अगिश्चासौ ज्ञाश्चेति अगिज्ञाः। अपात् वदः अपवदः। उद्च समुच आश्च उत्समाः, तेभ्यो यम् उत्समायम्, न ग्रन्थो ऽग्रन्थः, अग्रन्थे उत्समायम् अग्रन्थोत्समायम्। ततः अगिज्ञाश्च अपवदश्च अग्रन्थोत्समायम् चेति तस्मात्। पाणिनिः १।३।७२—७७,८९, वार्त्तिकद्वयञ्च।

‡ अत्र ञित्पदेन गणपाठे आनुबन्धाः आन्ताश्च गृह्यन्ते। तेन ञित्त्वेनैव आन्तप्राप्तौ आन्त-पिबादे र्ग्रहणं (८९१) कम्पाद्यर्थेङ् इत्यादिना विहित-परस्मैपदस्य बाधनार्थम्। अन्यथा पिब धे अद एषामन्नार्थत्वात् अन्येषामञिप्राणिपाठत्वात् तेन

६२०। ढ-भावे मं। (ढ-भावे ७।, मं १।)।

धो ढे भावे च मं स्यात्। *

६२१। र-तनो यगिणौ। (र-तनोः ७॥, यक्-इणौ १॥)।

धोः रे परे यक्, तनि परे इण्, स्यात् ढे भावे च।

स्तूयते विष्णुः स्तूयेत, स्तूयतां, अस्तूयत। अस्तावि। †

परस्मैपदापत्तिः स्यात्। ततश्च कम्पाद्यर्थेङित्यादि-विशेषविधेरन्यत्र सर्व्वजान्तेभ्यः फलवत्कर्त्तरि आत्मनेपदं सिद्धमिति। किञ्च ष्यम ञ क् वितर्के इत्यादि चुरादि-गणीयस्य ञानुबन्धात् चुरादेर्ञे ञकारेण ञानुबन्धित्वं नास्तीति सूचनात् गणपठित-ञानुबन्धभिन्न-चुरादेर्नेयं व्यवस्था। यजते इत्यादि। यजे ञो देवार्चादौ इति ञित्। पा पाने, धे ट पाने, नृत्य नर्त्तने, वदे वाचि, ऐ वसौ निवासे, दम् भ्य इर् शमे, रुच ङ् ऌ प्रीतिप्रकाशयोः, षद लो भते, मृशू ञि ऌ वैचित्र्ये, ञौ यमूपरमे, इर् यसु यतने, एकादशैते ञान्ताः। ज्ञा ग बोधे, वदे वाचि, ञौ यमूपरमे इति त्रयः। वेदमुद्यच्छति वेदमवगन्तुमुद्यमं करोतीत्यर्थः। याजको यजतीत्यत्र वेतनदानेन यजमान एव फलवान्, न तु याजक इत्यर्थः।

(५२१) मत्रशः पमे इत्यनेन उभयपदप्राप्तौ व्यवस्थेयं, फलवति कर्त्तरि आत्मनेपदं, अफलवति परस्मैपदमिति।

---

* ढं कर्म्म, भावो धात्वर्थः, समाहारे ढभावं तस्मिन्। (६२५) भावे मादयमिति वक्ष्यति, तथाप्यत्र भावग्रहणं परत्रानुवृत्त्यर्थं। वृत्तौ धोरिति कथनं धातुमात्रप्राप्त्यर्थं, तेन पच्यते, चिकित्स्यते, कार्य्यते, पिपक्ष्यते, पापच्यते इत्यादि। कर्म्मणि वाच्ये प्रत्ययेन कर्म्मण एवोक्तत्वात् कर्म्मपदस्य सङ्ख्या-नाम-युष्मदस्मदाद्यनुसारेण क्रियापदस्य वचनादि भविता। पाणिनिः १।३।१३।

† अर्थगत-विशेषापेक्षया निमित्तगत-विशेषस्य बलवत्त्वात् ण्यां विना यक् बाध्यते, इणा च निर्बाध्यते। कित्त्वात् यकि न गुणः, णित्त्वात् इणि वृद्धिः। स्तूयते इत्यादि

९२२ । हन ग्रह दृश्च: सिङ्यादेर्मिण् वा ।

(हन-ग्रह-दृश-चच: ५।, सि-आदे: ६।, मिण् ।१।, वा ।१।) ।

एभ्य: परासां सि-डी-ढी-ती-थीनां मिण् वा स्यात् ढ-भावे । अस्ताविषातां अस्तोषातां हरिहरी । तुष्टुवे, स्ताविता स्तविता स्तोता, स्ताविषीष्ट स्तोषीष्ट, स्ताविष्यते स्तोष्यते, अस्ताविष्यत अस्तोष्यत । * स्मर्य्यते, अर्य्यते, संस्क्रियते । †

९२३ । नेण् तपो ऽनुतापे ।

(न ।१।, इण् ।१।, तप: ५।, अनुतापे ७।) ।

अन्वतप्त । दीयते । ‡

९२४ । यन् ञिणतक्कदिण्यात: ।

(यन् ।१।, ञिणतक्कदिणि ७।, आत: ६।) ।

---

(५९०) घोंऽजय्यरे इति दीर्घ: । विष्णुरिति कर्म्म, अनेरिति शेष: । टी-तन् अस्तावि (५७७) वृद्धि:, (६४४) इषस्तन् लोप्य: । पाणिनि: ३।१।६६,६७ ।

* हनश्च ग्रहश्च दृशश्च अश्च तत्तस्मात् । सिश्च आदिश्च (डी ढी ती थी) तत्तस्य । मिणो मित्त्वादादौ, णित्त्वात् वृद्धि: । इमो बाधकोऽयं । स्तु-टी आतां सि:, सेरादौ मिण्, उकारस्य (५७७) वृद्धि: । पक्षे (५८७) नेमिकाणादिति इम्निषेध:, (५४२) गुण: । हरि-हरौ कर्म्म । डी-ता, वा मिण्, मिणो विकल्पपक्षे (६०६) वा इम् । एवं ढी-सीष्ट, ती-स्यते, थी-स्यत । पाणिनि: ६।४।६२ ।

† स्मृ-ते, यक्, (६१५) स्याद्यस्मृत इति गुण: । एवं ऋ-ते अर्य्यते । सं-कृ-ते, (७७६) सुम्, (६१५) स्कुस्तु ज्यामेवेति नियमात् गुणाभावे, (६२०) ऋद्रि: ।

‡ तपो ऽनुतापार्थे इण् न स्यात् ढभावे । अन्वतप्तेति तन्, इणो निषेधे ज्यां सि:, औदित्त्वान्नेम्, (५६२) सिलोप: । दीयते इति दा-न दाने, डु दा ञ लि दाने, दा ल लूनौ, दे ङ पालने, दै प शोधने, दो य च्छेदे इत्येषां (६१२) दामागे इति ङौ । पाणिनि: ३।१।६५ ।

आदन्तानां यन् स्यात् ञिणति क्वति, इणि च। *

अदायि, अदायिषातां अदिषातां। †

हन्यते, अवधि अघानि, अघानिषातां अवधिषातां अहसातां। ‡

गृह्यते, अग्राहि, अग्राहिषातां अग्रहीषातां। §

दृश्यते, अदर्शि, अदर्शिषातां अदृक्षातां। ¶

श्रम्यते मोहो मुकुन्देन, अश्रमि अश्रामि, अश्रमिषातां अश्रामिषातां अश्रमयिषातां। ‖

---

* अच णच ञणौ, तौ इतौ यस्य स ञिणत्, स चासौ क्वचेति ञिणत्क्वत्, सच इणच तस्मिन्। यनो न इत् अन्ते। आदन्तधातुभ्यो णपः स्थाने (६०९) डौ विधानात्, औ च (७८४) पण्-विधानात् अत्र ञिणति इत्यनेनैव सिद्धे क्वदिणो ग्रहणं दरिद्रा-धातोऽपि ददरिद्र इत्यत्र यनागम-निषेधार्थं, अन्यथा, लोपोऽप्यादेश उच्यते इति न्यायेन लोपस्यादेशत्वे, आगमादेशयोर्मध्ये बलीयानागमो विधिरिति न्यायात्, (७०२) दरिद्र आलोप इति सूत्रं बाधित्वा अनेन यनागमापत्तेः। पाणिनिः ७।३।३३।

† अदायीत्यादि दा-तन्, इण्, (६४४) तन्लोपः, अनेन यन्। आतां सिः, मिण्, इण्-मिणोरभेदात् यन्। मिणो विकल्पपक्षे (७३६) स्थादोरिति ङिः।

‡ अवधीत्यादि हन-तन्, इण्, तन्लोपः, (६७८) वधादेशः, (५७७) वृद्धिः, (७४४) पुनः ह्रस्वः। वधादेशविकल्पपक्षे (६७९) खिहौ घ इति हस्य घः, वृद्धिः। आतां सिः, मिण्, हस्य घः, वृद्धिः। मिणो विकल्पपक्षे वधादेशः, तस्यापि विकल्पपक्षे (८७९) हनः कित्सिरिति सेः कित्त्वं, (६७६) अम्-लोपः।

§ गृह्यते इति (६६१) ञिः। ठौ आतां, सिः, मिण्, वृद्धिः। पक्षे इम् (७७१) इमो दीर्घः।

¶ अदर्शि, दृश-टी-तन्, इण्, गुणः, तन्लोपः। टौ आतां सिः, मिण्, गुणः। पक्षे औदित्त्वान्नेम, (१५४) षङ्, (६०२) षस्य कः, (६५९) सेः कित्त्वं, (१११) षत्वं।

‖ श्रम्यते इति श्रमधातोः ञिः, (८००) वा श्रमेति नित्यं ह्रस्वः, श्रमि इति स्थिते यक्, (६४१) अेलोपः। मोह इति अजान्तकर्त्तुः कर्मत्वात् उक्तकर्मणि (२८०) प्रथमा। श्रमि-तन्, इण्, (७९८) औसनोस्तु घंश्चेति ह्रस्वो दीर्घश्च, ततः तन्लोपः। आतां, सिः (९२२) अजन्तत्वात् मिण्, औसमोस्तु घंश्चेति ह्रस्वो दीर्घश्च। मिणोविकल्पपक्षे इम्, न अेलोपः।

९२५। भावे माद्यं। (भावे ७।, माद्यं १।)

मस्याद्यं वचनं भावे प्रयुज्यते। मया भूयते, अभावि, बभूवे बुभूवे, भाविता भविता। शम्यते मुनिना, अशमि। अकामि अवामि आचामि। व्यशमि व्यशामि। अवधि। अजागारि, औ तु अजागरि अजागारि। *

९२६। भनजगिलम्भो वेण्मो र्नलोपः।

(भनज-अगिलम्भः ६।, वा ।१।, इण्‌मी: ७॥, न-लोपः १।)।

अभाजि अभञ्जि, अलाभि अलम्भि। गौ तु, प्रालम्भि। †

---

* भावे क्यादिविभक्तयः अकर्म्मकादेव धातोः स्युः, कृत्प्रत्ययास्तु सकर्म्मकादपि। भावो धात्वर्थः, तस्मिन् वाच्ये आत्मनेपदस्य आद्यं वचनं स्यादित्यर्थः। धात्वर्थस्य वाच्यत्वात् युष्मदस्मदोरवाच्यत्वे से-प्रभृतयो न स्युः, अपिच धात्वर्थस्य द्वित्वादेरविवक्षातो द्विवचन-बहुवचने न स्तः, धात्वर्थस्य द्वित्वादेर्विवक्षायामपि पुत्राभ्यां भूयते इत्यादौ द्विवचनादि न स्यादिति। भूयते इति, मया इति अनुक्तकर्त्तरि तृतीया। भू सत्तायामिति अकर्म्मकात् भावे क्यो ते, यक्। अभावि टी-तन्, इण्, वृद्धिः। बभूवे बुभूवे इति (५९०) भुवोऽङ् क्यां। इदन्तु पाणिनीया नेच्छन्ति। भाविता भविता, मिण् वा, पक्षे इम्। शम्यते मुनिना इति शमु भिर्य शमे, ते यक्। मुनिः शान्तोभवतीत्यर्थः। अशमि, टी-तन्, इण्, वृद्धिः, (७४४) जनवध इति ह्रस्वः। तत्रैव कम-वम-आचम-वर्जनात् तेषु न ह्रस्वः। आङ्-पूर्व-चमो वर्जनात् अचमीत्यत्र ह्रस्वः। शम-यम-विश्रमस्तु वेति व्यशमि व्यशामि, एवं अम अमि आमि, अयमि अयामि। अवधि वध हतौ टी-तन्, अत्रापि ह्रस्वः। अजागारि, (९९९) जाग्रोऽणिविति गुणनिषेधः, वृद्धिः। औ तु (७९८) औस्समीस्तु घंष जागृश्चेति वा ह्रस्वे पदद्वयं। भाष्यम्।

† नास्ति गि र्यस्मिन् सोऽगिः, स चासौ लम्भ चेति अगिलम्भ। भनज च अगिलम्भ च तत्तस्य। अनयोर्नस्य लोपः स्याद्वा इणि अमि च परे। अभाजीति भनज धौ मोटने टी तन्, इण्, नलोपः, ततः उङ् अकारस्य वृद्धिः। नलोपाभावपक्षे उङ् अकाराभावात् न वृद्धिः। एव लभी ङ य प्राप्तौ टी तन्, इण्, (७४१) नुण् रध इति नुण्, अनेन नलोपपक्षे वृद्धिः, अन्यत्र न वृद्धिः। गौ तु इति उपसर्गे उपपदे सतीत्यर्थः। पाणिनिः ६।४।३३, ७।१।६९।

८२७। ढवद् ढघो ऽढे। (ढवत् ।१।, ढघः ।१।, अढे ।७।)।

ढमेव घत्वं प्राप्तं ढघः, स च ढवत् स्यात् नतु ढे सति।*

तथाच—क्रियमाणन्तु यत् कर्म्म स्वयमेव प्रसिध्यति।
सुकरैः स्वैर्गुणैः कर्त्तुः कर्म्मकर्त्तेति तद्विदुः॥

स्वयमेव भिद्यते काष्ठं, अभेदि।†

---

* ढश्च तत् घश्चेति ढघः, आदौ ढ पश्चात् घ इत्यर्थः। ढघः कर्म्मकर्त्ता ढवत् कर्म्मवत् भवति, नतु ढे कर्म्मणि सति, द्विकर्म्मकस्थले एकस्य कर्म्मणः कर्त्तृत्वविवक्षायां अन्यस्मिन् कर्म्मणि विद्यमाने न स्यादित्यर्थः। तेन याच्यते राजा स्वयमेव भूमिमिति न स्यात्। ढवदित्यनेन कर्म्मवाच्यविहितं यक् इण् मिण् आत्मनेपदञ्च अतिदिश्यते, न तु कर्म्मकर्त्तुः कर्म्मत्वं विधीयते। पाणिनिः ३।१।८७, वार्त्तिकञ्च।

धात्वर्थाः केचित् कर्म्मस्थाः केचित् कर्त्तृस्थाश्च भवन्ति। अत्र कर्म्मस्थार्थधातूनामेव कर्म्मणः कर्त्तृत्वविवक्षा, नतु कर्त्तृस्थार्थधातूनां, तेन पच्यते ओदनः स्वयमेव, भिद्यते काष्टं स्वयमेव इत्यादि स्यात्, खाद्यते ओदनः स्वयमेव, गम्यते ग्रामः स्वयमेव इत्यादि तु न स्यादिति बोध्यं। तथाच प्राञ्चः—कर्म्मस्थेऽपि च धात्वर्थे कर्म्मकर्त्ता च कर्म्मवत्। कर्त्तृस्थेऽपि च धात्वर्थे कर्म्मकर्त्ता च कर्त्तृवत्॥ कर्म्मस्थः पचते र्भावः कर्म्मस्थाश्च भिदादयः। कर्त्तृस्थो बुध्यतेर्भावः कर्त्तृस्थाश्च गमादयः इति॥ पचतेर्भावस्तण्डुलादीनां विक्लित्तिस्तण्डुलादिष्वेव भवति नतु पाककर्त्तरि, एवं भिदादे र्भावो भेदादिः काष्ठादिष्वेव न तु भेदादिकर्त्तरि। बुध्यते र्भावो ज्ञानं शिष्येष्वेव न तु ग्रन्थादौ, एव गमादीनां भावः पादचालनादिः कर्त्तृष्वेव नतु ग्रामादावित्यर्थः। एवञ्च—निर्व्वर्त्त्ये च विकार्य्ये च कर्म्मवद्भाव इष्यते। न तु प्राप्ये कर्म्मणीति सिद्धान्तोऽयं व्यवस्थितः॥ किञ्च एकक्रियाकर्म्मण. कर्त्तृत्वं विवक्ष्यते इति बोध्यं, तेन पचत्योदनं देवदत्तः, राध्यते ओदनः स्वयमेव इत्यत्र न स्यात्।

† एकक्रियायां एकस्य कर्म्मत्वं कर्त्तृत्वञ्च कथं सम्भवतीत्यत आह—क्रियमाणमिति। क्रियमाणं साध्यमानं यत् कर्म्म. कर्त्तुः सुकरैः सुखनिष्पाद्यैः, स्वैर्निजैः कर्म्मसम्बन्धिभिरिति यावत् गुणैः, स्वयमेव प्रसिध्यति निष्पद्यते तत् कर्म्मकर्त्ता इति विदुर्जानन्ति बुधा इति शेषः। अन्येन भिद्यमानं काष्ठं स्वयमेव भिद्यते, काष्ठस्यातिभङ्गुरत्वरूपगुणेन कर्त्तुः सुकरेण स्वयमेव भेदो जायते इत्यर्थः। काष्ठमिति आख्यातेनोक्तत्वात् प्रथमा। टौ तन् अभेदि।

९२८ । कुषि-रनजः श्यन्-पे वा रे ।

(कुषि-रन्जः ५।, श्यन्-पे १॥, वा ।१।, रे ७।) ।

कुष्यति कुष्यते, रज्यति रज्यते । *

९२९ । वेणजदुहः । (वा ।१।, इण् ।१।, अज्दुहः ५।) ।

अजन्तात् दुहश्च इण् स्याद्वा ढघे । अकारि अकृत, अदोहि अदुग्ध । †

९३० । न तप-रुध-सढ़पचदुहः ।

(न ।१।, तप-रुध-सढ-पचदुहः ५।) ।

तपो रुधः सढाभ्यां पचदुहाभ्याञ्च इण् न स्यात् ढघे । अतप्त, अरुद्ध । अपक्व आम्रः फलं, अदुग्ध गौ दुग्धं । अतएवानयो-र्ढेऽपि ढवत्वं । ‡

---

* 'कुषिश्च रन्ज च तत्तस्मात् । श्यन् च पश्च ते । आभ्यां रे विषये श्यन् परस्मैपदञ्च स्याद्वा कर्म्मकर्त्तरि वाच्ये । कुष ग निष्कोषे, रे परे पं श्यन् च, पक्षे मं यक् । एवं रज्यतीति रन्जौ ञ रागे, (५६७) नलोपः । ' रे किं, अकोषि, चुकुषे । अरञ्जि, ररञ्जे ररञ्जे । पं वेति कृते सिद्धेऽपि श्यन्विधानं, कुष्यन्ती रज्यन्ती इत्यत्र (२४५) मित्यनुणार्थं । पाणिनिः ३।१।९० ।

† अच् च दुह च तत्तस्मात् । अजन्तधातो र्दुहधातोश्च तनि परे इण् वा स्यात् ढघे । वा-ग्रहणं वाधिकारनिवृत्त्यर्थं । अकारीति कृ-तन्, इण्, (६४४) तन्-लोपः, (५७७) वृद्धिः । पक्षे ध्यां सिः, (६५९) सेः किश्वं, (५६२) सलोपः । अदोहीति इणि गुणः । पक्षे (६५७) सिनिषेधे सकोऽप्राप्तिपक्षे अदुग्ध । पाणिनिः ३।१।६२,६३ ।

‡ ढन सह वर्त्तेते यौ तौ सढौ, सढौ च तौ पचदुहौ चेति, ततः तपश्च रुधश्च सढपचदुहौ चेति तस्मात् । अतप्तेति इण्-निषेधे ध्यां सिः, औदित्त्वात् नेम्, सिलोपः । एवं अरुद्ध, अत्र सेः कित्सञ्ज्ञा । अपक्व आम्र इत्यादि, कालेन फलं पच्यमान आम्रवृक्षः स्वयं फलं अपक्त, एवं गोपेन दुग्धं दुह्यमाना गौः स्वयं दुग्धं अदुग्ध । अत्र सकर्म्मक-

६३१। सन अन्थ ग्रन्थ ब्रू कॄ गॄ दुह नम-भूषार्थात् यक् च ञिस्नुश्रि-माढात्त्वमिण्।

(सन—भूषार्थात् ५।, यक् ।१।, च ।१।, ञि—माढात् ५।, तु ।१।, अमिण् ।१।)।

सनन्तादे-रिण् यक् च न स्यात् ढघे, ञ्यन्तादेस्तु मिण्वर्जं। *

चिकीर्षते अचिकीर्षिष्ट। श्रथ्नीते अश्रन्थिष्ट, ग्रथ्नीते अग्रन्थिष्ट। ब्रूते अवोचत। किरते अकीर्ष्ट, गिरते अगीर्ष्ट। दुग्धे अदुग्ध। नमते अनंस्त। तंसते अतंसिष्ट। कारयते, अचीकरत अकारिष्ट अकारयिष्ट। स्नुते अस्नाविष्ट अस्नोष्ट। श्रयते अशिश्रियत अश्रायिष्ट अश्रयिष्ट। आहते आवधिष्ट आघानिष्ट आहत। †

पचदुहाभ्यां इण्-निषेधे ञ्यां सिः, सिलोपः, उभयत्र औदित्त्वान्नेम्। अतएवेति, सूत्रे सकर्म्मक-पचदुहग्रहणात् अनयोः कर्म्मान्तरसत्त्वेऽपि कर्म्मकर्त्तृत्वमिति बोध्यं। पाणिनि: ३।१।६४,६५, वार्त्तिकञ्च।

* सन् सनन्तः। भूषा अर्थो यस्य स भूषार्थः। सन् च श्रन्थश्च ग्रन्थश्च ब्रूश्च कॄश्च गॄश्च दुहश्च नमश्च भूषार्थश्चेति तस्मात्। ञि ञ्यन्तः। मे (आत्मनेपदे) अढः (अकर्म्मकः) माढः। ञिश्च स्नुश्च श्रिश्च माढश्चेति तस्मात्। न मिण् अमिण्। एभ्यो यक्, चकारात् इण् च, न स्यात्, इणोऽभिन्नत्वेन मिण् अपि न स्यात् ढघे, ञ्यन्तादेस्तु मिण्भिन्नः इण् यक् च न स्यात्, मिण् तु स्यादेवेत्यर्थः। दुहधातोः पूर्व्वेण इण्-निषेधे अत्र ग्रहणं यक्-निषेधार्थं। ञ्यन्तब्रुवो द्विकर्म्मकत्वेऽपि अतएवानयो र्ढेऽपि ढघत्वमिति बोध्यं। पाणिनि: ३।१।८९, वार्त्तिकत्रयञ्च।

† चिकीर्षते इत्यादि, यं कर्त्तुमिच्छति स स्वयमेव चिकीर्षते इति चिकीर्ष-धातोः यक्निषेधे आश्रिककर्त्तृवाच्यत्वात् अप्। टी-तम् इण्-निषेधे (५५१) सिः, अभिन्नत्वात् मिणोऽपि निषेधे (५५४) इम्। सकृद्गतौ विप्रतिषेधो यद्बाधितं तद्बाधितमेवेति न्यायात् सिबाधकस्य इणोऽपि निषेधे पुनः कथं सिरिति चेत् न्यायस्य सर्व्वत्रास्वीकारादिति। श्रन्थ ग मोचे क्रौ-ते यको निषेधे आश्रिकर्त्तृवाच्यत्वात् (७३८) श्ना, (७०१) श्नाद्व्योरिति ईः, (५६७) नलोपः। टी-तन्, इण्-निषेधे सिः इम् च। एवं ग्रन्थ-ग दर्भे इत्यस्यापि।

६३२। न्यादि-ज्ञान्ताढगत्यर्था मुख्ये ढे ढत्वमाप्नुयुः। गौणे याचादयोऽन्ये, तु यथेष्टं द्विढधुष्विति॥*

ग्रन्थते ग्रन्थते इति भौवादिकौ कश्चिदुदाहरति। ब्रूते यक्निषेधे शप्, अदादित्वात् शपो लुक्। टी-तन्, इण्निषेधे, पर-विषये (७२५) वचादेशे, (६१८) वक्तास्येति ङः, (६५२) वोचादेशः। कॄ श विक्षेपे ते यक्-निषेधे, तुदादित्वात् (७३८) शः(६२८)ऋस्थाने इर्। टी-तन् इण्निषेधे, सिः, (७४७) स्याद्वृद्दिति इमोऽभावपक्षे (६५९) सेः किस्व, इर्, (२२८) दीर्घः। इमपक्षे तु अकरीष्ट अकरिष्ट इति च। एवं गॄ श निगरणे इत्यस्यापि। दुग्धे इति दुह ते, यक्निषेधे शप्, शपो लुक्, (१७६) दादेर्घः। टी-तन्, पूर्व्वसूत्रेणैव इण्निषेधे, (६५७) सकोऽप्राप्तिपक्षे सि-निषेधः। नम-ते यक्निषेधे शप्। टी-तन्, इण्निषेधे सिः, औदित्त्वान्नेम्। तस-धातुर्भूषार्थः। कारयते इति कृ ञिः कारिधातोः ते, यक्निषेधे शप्। टी-तन्, इण्निषेधे, (६१३) अङ्, द्वित्वादिकं, अचीकरत। अङो नित्यत्वेऽपि अत्र मिण्वर्ज्जमिति कथनेन मिणः प्राप्तयनुरोधात् ज्ञान्त-श्रिभ्यां पक्षे ङ्यां सिरिति, अतः मिणि ञेर्लोपे, अकारिष्ट, मिणोऽप्राप्तिपक्षे इमि ञेर्लोपाभावे अकारयिष्ट। णुल प्रस्तुत्यां स्नु ते यक्निषेधे, शप्, शपो लुक्। टी-तन्, इण्निषेधे, ङ्यां सिः, मिण् वृद्ध्यादि, अस्नाविष्ट। मिणोऽप्राप्तिपक्षे, (५९६) स्नुक्रमोऽमे इति नियमादिमनिषेधः। श्रि ञ सेवने ते, यक्निषेधे शप्। टी-तन् इण्निषेधे, अङ् द्वित्वादि, अशिश्रियत। मिण्पक्षे अश्रायिष्ट, इम्पक्षे अश्रयिष्ट। आहते इति आ-हन ते यक्निषेधे शप्, शपो लुक्, (६७६) अमलोपः। टी-तन्, इणो निषेधे, सिः, मिण्, (६७८) वधादेशः, वृद्धि (७४४) ह्रस्वः, आवधिष्ट। वधादेशाभाव-पक्षे (६७९) हस्य घः, वृद्ध्यादि, आघानिष्ट। मिणोऽभावपक्षे (८७९) सेः किस्वं, ततो अमलोपः, ततः सिलोपः, आहत। आङ्पूर्व्वहन्तेरकर्म्मकात् (८७८) आत्मनेपदविधानात्, सकर्म्मकोऽप्ययं नाढ. बोद्धव्यः अकर्म्मकस्य कर्म्मकर्त्तृत्वासम्भवात्।

* द्विकर्म्मकधातुभ्यः कर्म्मणि वाच्ये प्रत्ययोत्पत्तौ मुख्यं गौणमुभयं वा कर्म्म उक्तं भवतीति सन्देहे व्यवस्थामाह—न्यादीति। नास्ति ढं (कर्म्म) यस्य सोऽढः। अढश्च गत्यर्थश्च अढगत्यर्थौ, ज्ञान्तौ च तौ अढगत्यर्थौ चेति ज्ञान्ताढगत्यर्थौ। न्यादयश्च ज्ञान्ताढगत्यर्थ च ते। द्विढधुषु द्विकर्म्मकधातुषु मध्ये, (२८४) न्यादयो—नी वह हृ दण्ड ग्रह कृ मन्थ मुष पचाद्या नव, ज्ञान्ताकर्म्मका ज्ञान्तगत्यर्थाश्च धातवो मुख्ये ढे कर्म्मणि वाच्ये ढत्व कर्म्मप्रत्ययं आप्नुयुः। (२८५)याचादयो—याच्ञार्थ दुह चि प्रच्छ रुध ब्रू शास जि इत्यष्ट धातवो गौणे कर्म्मणि वाच्ये कर्म्मप्रत्ययमाप्नुयुः। अन्ये तु द्विकर्म्मका धातवः यथेष्ट मुख्ये गौणे वा कर्म्मणि वाच्ये कर्म्मप्रत्ययमाप्नुयुरिति व्यवस्था। (२८४) ज्ञान्तान् शब्दार्थाशनार्थ ज्ञानार्थ ग्रह दृश श्रु कृ इत्येतानेव धातून् अन्येषु कश्चित् पठति। साक्षात् क्रिया

निन्ये विजनमजागरि रजनिमगमि मुदमयाचि सम्भोगं ।
गोपी हावमकार्य्यत भावश्चैनामनन्तेन ॥ *

इति ढभाव-पादः ।

न्वयित्वं मुख्यत्वं, व्यवहितक्रियान्वयित्वं गौणत्वमिति । अत्र यथेष्टमिति अनिर्णयादुक्तं, सर्व्वत्र ञान्ताना प्रयोज्यं कर्म्मैवोक्तं भवतीति पाणिनि सर्व्ववर्म्म क्रमदीश्वराः । पाणिनिः यथा—"गौणे कर्म्मणि दुह्यादेः (दुह याच पच दण्ड रुध प्रच्छ चि ब्रू शास जि मन्थ मुष) प्रधाने नी हृ कृष् वहाम, बुद्धिभक्षार्थयोः शब्दकर्म्मणाञ्च निजेच्छया, प्रयोज्य-कर्म्मण्यन्येषां ण्यन्तानां लादयो मताः ।"

* उदाहरणान्याह निन्ये इत्याद्यार्य्यया । अनन्तेन कृष्णेन गोपी विजनं (वनं) निन्ये प्रापिता, अत्र गोपीति मुख्य कर्म्म उक्तं । अनन्तेन गोपी रजनिं अजागरि जागरिता, (२८२) देशाध्वकालत्यनेन कालाधिकरणस्य रजने. कर्म्मत्वे सकर्म्मकस्यापि, स्वभावा-दकर्म्मकस्य जागृधातोर्ञान्तकर्त्री गोप्याः (२८४) कर्म्मत्वं, ततश्च प्रेरणक्रियाया मुख्यं कर्म्म गोपीत्युक्तं । अनन्तेन गोपी मुदं हर्षं अगमि प्रापिता, अत्रापि गोपी मुख्यं कर्म्म उक्तं । अगमीति ञान्तगमधातोः टौ तन् । अनन्तेन गोपी सम्भोगं अयाचि प्रार्थिता, अत्र गोपी गौणं कर्म्म उक्तं । यथेष्टमाह—अनन्तेन हावं (भावविशेषं) अकार्य्यत कारिता, अत्र गोपी मुख्यं कर्म्म उक्तं । अनन्तेन एना गोपीं भावश्च अकार्य्यतेति शेषः, अत्र भाव इति गौणं कर्म्म उक्तं । अकार्य्यत इति कारि इति ञान्तकृधातोः घौ त ।

अकर्म्मकास्तु—

सत्ता-जीवन-दर्प-भीति-शयन-क्रीडा-निवास-त्रपा-
ऽव्यक्तध्वान-नभोगति-स्थिति-जरा-लज्जा-प्रमादोदये ।
उन्मादे च पलायन-भ्रमणयोः ख्यातौ च्यवे खोटने
मोहे धावन-युद्ध-शुद्धि-दहने शान्तौ सुतौ मज्जने ॥
दीप्तौ जागर-शोष-वक्रगमनोत्साहे मतौ संशये
म्लानौ मन्दगतौ च नृत्य-पतने चेष्टा-क्रुधौ रोदने ।
वृद्धौ हावकृतौ च सिद्धि-विरतौ हर्षोपवेशे बले
कम्पोद्वेग-निमेष-सङ्ग-यतन-स्वेदे धवोऽकर्म्मका. ॥

सकर्म्मकाश्च कर्म्माविवक्षायामकर्म्मका भवन्ति, तथाच भाष्यम्—

धातोरर्थान्तरे वृत्ते धात्वर्थेनोपसंग्रहात् ।
प्रसिद्धेरविवक्षातः कर्म्मणोऽकर्म्मिका क्रियेति ॥

धात्वर्थेन सह कर्म्मण उपसंग्रहादित्यर्थ, यथा, तपस्यति मुनिरित्यादि ।

৪র্থ পাদঃ—ক্রিঃ।

৫৩৩। ভবদ্ভূতভব্যে ত্রিশঃ ক্যাদ্যাঃ।

(ভবত্-ভূত-ভব্যে ৭।, ত্রিশঃ ।১ম, ক্যাদ্যাঃ ১।।।)।

ক্যাদ্যাঃ ক্রিয় স্ত্রিস্ত্রিস্ত্রঃ ক্রমাৎ বর্ত্তমানাতীতভবিষ্যৎসু কালেষু স্যুঃ। *

শেতে স চিত্ত-শয়নে মম মীন-কূর্ম্ম-
কোলোঽভবন্নৃহরিবামনজামদগ্ন্যঃ।

---

* ভবংশ্চ ভূতশ্চ ভব্যশ্চ তস্মিন্। কী আদ্যা যাসাং তাঃ। অত্র কালে ইতি বিশেষ্যং পদমধ্যাহার্য্যং। ভবন্নিতি বর্ত্তমানে শতুর্বিধানাৎ বর্ত্তমানঃ, ভূত ইতি অতীতে ক্তবিধানাদতীতঃ; ভব্যো ভবিষ্যৎকালঃ, সামান্যকালে তব্যাদি-বিধানাদপি ইহ ভবিষ্যৎকালে যঃ। কী খী গী—বর্ত্তমানে, ঘী টী ঠী—অতীতে, ডী ঢী তী—ভবিষ্যতি, থী—সর্ব্বকালে (৫৫২)।

আরব্ধক্রিয়ায়াঃ সমাপ্তিপর্য্যন্তঃ কালো বর্ত্তমানঃ, যথা মহাভারতং পঠতি। স চতুর্ব্বিধঃ—যথা, প্রবৃত্তোপরতশ্চৈব, বৃত্তাবিরত এব চ; নিত্যপ্রবৃত্তঃ, সামীপ্যো বর্ত্তমানশ্চতুর্ব্বিধঃ। ক্রমেণ যথা—মাংসং ন খাদতি, আদৌ প্রবৃত্তং মাংসভোজনং নিবর্ত্তয়তীত্যর্থঃ। ইহ কুমারাঃ ক্রীড়ন্তি, তদানীং ক্রীড়াভাবেঽপি পূর্ব্বক্রীড়ায়া বুদ্ধৌ বর্ত্তমানত্বাৎ। পর্ব্বতাস্তিষ্ঠন্তি, নিত্যপ্রবৃত্তত্বাৎ। কিঞ্চ পর্ব্বতানাং নিত্যপ্রবৃত্তাবপি সম্বন্ধবিবক্ষয়া ভূতভবিষ্যৎকালয়োরপি প্রয়োগো ভবিষ্যতি। সামীপ্যো দ্বিবিধঃ—ভূতসামীপ্যো ভবিষ্যৎসামীপ্যশ্চ, যথা—আগমনানন্তরমপি এষোঽহমাগচ্ছামি, এবং গমনাৎ পূর্ব্বমপি এষোঽহং গচ্ছামীতি। পাণিনিঃ ৩।২।১২৩।

যস্মিন্ কালে ক্রিয়াসমাপ্তি র্ভবতি স ভূতঃ, সচ ত্রিধা,—অদ্যতনঃ, হ্যস্তনঃ, পরোক্ষশ্চেতি। ক্রমেণ যথা—সঃ অদ্যাভবৎ, স হ্যোঽদ্রাক্ষীৎ,স বহুদিনং জগাম। অদ্যতনে ঘী, হ্যস্তনে টী, পরোক্ষে ঠীতি কশ্চিৎ তন্ন, সর্ব্বত্রৈব ব্যভিচারাৎ। পাণিনিস্তু "অনদ্যতনে লঙ্" (৩।২।১১১), "লুঙ্" (৩।২।১১০), "পরোক্ষে লিট্" (৩।২।১১৫)।

ভবিষ্যন্নপি ত্রিধা—অদ্যতনভবিষ্যন্ অনদ্যতনভবিষ্যন্ দূরভবিষ্যন্। যথা—অদ্য ভবিতা, শ্বো ভবিষ্যতি, বৎসরান্তে ভবিষ্যতীতি। পাণিনিস্তু "অনদ্যতনে লুট্" (৩।৩।১৫), "লৃট্ শেষে চ" (৩।৩।১৩)।

योऽभूद्बभूव भरताग्रजकृष्णबुद्धः
कल्की सताञ्च भविता प्रहरिष्यतेऽरीन् ॥ *

९३४ । कौ स्मेनातीते । (कौ ।१।, स्मेन ३।, अतीते ७।) ।

स्मेन योगे अतीते काले कौ स्यात् । हन्ति स्म रावणं रामः । †

९३५ । यावत्पुराभ्यां भव्ये । (यावत्-पुराभ्यां ३॥, भव्ये ७।) ।

यावद् भवति कल्की, पुरा दृश्यते कल्की । ‡

९३६ । कदाकर्हिभ्यां वा । (कदा-कर्हिभ्यां ३॥, वा ।१।) ।

कदा पश्यामि गोविन्दं, कर्हि द्रक्ष्यामि शङ्करं । §

९३७ । किम्भि लिप्सायां । (किम्भिः ३॥, लिप्सायां ७।) ।

डतरडतमन्तयन्त-किमो रूपे योगे भव्ये कौ वा स्यात् लिप्सायां । कतरः कतमः को वा भिक्षां रास्यति राति वा । ¶

---

* ख्णौ-गौ ढौ-घौनां विशेषविधिं वक्ष्यतीति ता विहाय उदाहरति शेते इति । स मम चित्तशयमे चित्तशय्यायां शेते, यः मीनकूर्म्मकोलोऽभवत्, नृहरिवामनजामदग्न्यः अभूत्, भरताग्रजकृष्णबुद्धो बभूव, कल्की भविता, सतां साधूनां अरीन् प्रहरिष्यते चेत्यन्वयः । मीन-कूर्म्माभ्यां कोलः मीनकूर्म्मकोलः, एवं सर्व्वत्र विग्रहः । कोलो वराहः ।

† स्म इत्यव्ययं अतीतकालवाचि । यद्यपि भूतमात्रे स्मशब्दः प्रयुक्तो वैयाकरणैः, तथापि भूतक्रियाक्रमान्वयित्वे एव प्रायशः शिष्टप्रयोगो दृश्यते । यथा "पश्यति स्म जनता दिनात्यये" इति रघुः । पाणिनिः ३।२।११८ ।

‡ आभ्यां योगे भविष्यत्काले कौ स्यात् । निकटागामिके पुरा, तत्साहचर्य्यात् यावदित्यव्ययं । अतएव, यावद्दास्यति तावद्भोक्ष्यते इत्यादौ अव्ययभिन्ने न स्यात् । पाणिनिः ३।३।४ ।

§ आभ्यां योगे भव्ये कौ वा स्यात् । पश्यामि द्रक्ष्यामीत्युदाहरणद्वयेन विकल्पो दर्शितः । पाणिनिः ३।३।५ ।

¶ किम्भिरिति बहुवचनेन सर्व्वविधानां किम्शब्दरूपाणां प्राप्तिः । लम्धुमिच्छा

९३८ । लिप्स्यसिद्धौ । (लिप्सा-सिद्धौ ७।) ।

लिप्सेरन्नादिना स्वर्गादेः सिद्धौ सत्यां भव्ये क्तौ वा स्यात् । यो भिक्षां ददाति दास्यति वा स स्वर्गं याति यास्यति वा । *

९३९ । ग्यर्थाशंसयोः । (ग्यर्थाशंसयोः ७॥) ।

ग्या अर्थे प्रैषादौ आशंसायाञ्च भव्ये क्तौ वा स्यात् । गुरुश्चेदायाति आयास्यति वा, अथ त्वं वेदमधीष्व वयं तर्कमधीमहे । †

९४० । जात्वपिभ्यां सदा क्षेपे ।

(जातु-अपिभ्यां ३॥, सदा ७।, क्षेपे ७।) ।

जातु निन्दसि गोविन्द-मपि निन्दसि शङ्करं । ‡

९४१ । कथमा खौ च वा ।

(कथमा ३।, खौ ।१।, च ।१।, वा ।१।) ।

लिप्सा तस्यां गम्यमानायामित्यर्थः । (५१०) द्वयोर्मध्ये कः, बहूनां मध्ये कः, को वा दाता, भिक्षां राति रास्यति वा, रा ल दाने । पाणिनिः ३।३।६ ।

* लब्धुमिष्यते यत् तत् लिप्स्यं (अन्नादि) कर्म्मणि यः, तेन सिद्धिस्तस्यां । पृथक्-योगात् किम्भिरिति नानुवर्त्तते । दातारं कश्चित् प्रोत्साहयति यो भिक्षामित्यादि । प्ररोचनायामिति कौमराः । पाणिनिः ३।३।७ ।

† ग्या अर्थो ग्यर्थः । वृत्तौ प्रैषादाविति कथनात्, (९५४) वक्ष्यमाणेषु ग्यर्थेषु विध्यादिषु मध्ये प्रैषप्राप्तकालानुमतय एव गृह्यन्ते । आशंसा सम्भावना । गुरुश्चे-दायातीति आशंसायां, त्वं वेदमधीष्वेति ग्या अर्थे अनुमतौ उदाहरणद्वयं, अधीष्व इत्यस्य पक्षे अधीषे इति क्तौ च, अधीमहे इत्यस्य पक्षे अध्ययामहे इति गौ च भविता । आशंसायां क्षीप्रार्थे भव्ये क्तौ नित्यमिति वक्तव्यं (संक्षिप्तसारे, तिङन्तपादे ८३९ सूत्रम्), तेन वृष्टिश्चेदायास्यति शीघ्रं धान्यं वप्स्यामीत्येव । पाणिनिः ३।३।८ ।

‡ जात्वपिभ्यां योगे, क्षेपे गर्हायां, सदा सर्व्वेषु कालेषु नित्यञ्च, क्तौ स्यादित्यर्थः । सदेत्यधिकारः । जातु कदाचित् । पाणिनिः ३।३।१४२ ।

कथं निन्दसि अजं, निन्देः शम्भुं, देवों निनिन्दिथ । *

६४२ । किम्भिः खौत्यौ । (किम्भिः ३॥, खौ त्यौ १॥) ।

को निन्दिष्यति लक्ष्मीशं निन्देत् कतर ईश्वरं । †

६४३ । अन्यैश्चाश्रद्धामर्षे । (अन्यैः ३॥, च ।१।, अश्रद्धामर्षे ७।) ।

किम्भिश्च (६३७) ।

न श्रद्दधे मर्षये नो यत् स गर्हिष्यते हरिं ।
हरं गर्हेत, को निन्देत् विष्णुं निन्दिष्यतीश्वरं ॥ ‡

६४४ । किंकिलास्त्यर्थाभ्यां तौ ।

(किंकिल-अस्त्यर्थाभ्यां ३॥, तौ ।१।) ।

त्वं किंकिल हृषीकेशं निन्दिष्यसि, न मंस्यसे ।
महादेवञ्चास्तिनाम, श्रद्दधे नो न मर्षये ॥ §

---

* कथम् शब्देन योगे सर्व्वेषु कालेषु खौ चकारात् तौ च वा स्यात् गर्हायां । भटा क्षेपे इत्यनुवर्त्तते । कथं निन्दसीति कथंशब्दस्य त्रिषु वाक्येषु सम्बन्धः । पाणिनिः ३।३।१४३ ।

† डतरडतमक्यन्त-किमौ रूपै योगे सर्व्वेषु कालेषु खौ-त्यौ स्यातां गर्हायां । पाणिनिः ३।३।१४४ ।

‡ श्रद्धा सम्भावना, मर्षः क्षमा । श्रद्धाया अभावः अश्रद्धं, मर्षस्याभावः अमर्षं । अश्रद्धस्य अमर्षस्य समाहारः । किम्भिश्चेति हृतिः । डतर डतम क्यन्त-किमौ रूपै-रन्यैश्च शब्दैः योगे सर्व्वेषु खौ-त्यौ स्तः अश्रद्धामर्षेऽर्थे, अत्र क्षेपे इति नानुवर्त्तते । स जनो यत् हरिं गर्हिष्यते हरं गर्हेत तदहं न श्रद्दधे नो मर्षये, को जनो विष्णुं निन्देत्, ईश्वरं निन्दिष्यति, तदहं न श्रद्दधे नो मर्षये इत्यन्वयः । पाणिनिः ३।३।१४५ ।

§ किमः परः किल, किंकिल । अस्त्यर्थो ऽस्तिभवत्यादिः । आभ्यां योगे सर्व्वेषु कालेषु तौ स्यादश्रद्धामर्षे । त्वं किंकिल निश्चितं हृषीकेशं निन्दिष्यसि, अस्तिनाम

६४५। जातु-यद्-यदा-यदिभिः खौ।

(जातु-यद्-यदा-यदिभिः ३॥, खौ ।१।)।

न मर्षये श्रद्दधे नो जातु निन्देज्जनार्द्दनम्। *

६४६। यच्च-यत्राभ्यां चेपचित्रे च।

(यच्च-यत्राभ्यां ३॥, चेपचित्रे ७।, च ।१।)।

यच्च निन्देत् विभुं, गर्हे चित्रं श्रद्धां न मर्षये। †

६४७। चित्रे त्ययदिना।

(चित्रे ७।, तौ ।१।, अयदिना ३।)।

यदि-वर्ज्जितेन शब्दमात्रेण योगे चित्रे गम्ये सदा तौ स्यात्।

चित्रं द्रक्ष्यति नामान्धः कृष्णं, पश्येत् यदीश्वरं। ‡

६४८। वाढ़ेऽप्युताभ्यां खौ।

(वाढ़े ७।, अपि-उताभ्यां ३॥, खौ ।१।)।

सम्भावनायां महादेवञ्च न मंस्यसे, तदहं नो श्रद्दधे न मर्षये इति श्लोकार्थः। पाणिनिः ३।३।१४६।

* जातुश्च यद् च यदा च यदिश्च ते तैः। एभि योगे सर्व्वेषु कालेषु खौ स्यादश्रद्धामर्षे। भवान् जातु कदाचित् जनार्द्दनं निन्देत् तदहं न मर्षये ना श्रद्दधे। एवं यन्निन्देत् यदा निन्देत् यदि निन्देदिति च। पाणिनिः ३।३।१४७, वार्त्तिकञ्च।

† यच्चश्च यत्रश्च ताभ्यां। आभ्यां योगे चेपे चित्रे चकारात् अश्रद्धामर्षे च, सर्व्वेषु कालेषु खौ स्यात्। चेपो गर्हा, चित्रमाश्चर्य्यं। जनो यच्च विभुं निन्देत तदहं गर्हे, तच्चित्र, तत्राहं श्रद्धां न करोमि, तदहं न मर्षये इत्यर्थः। एवं यत्र निन्देदिति। पाणिनिः ३।३।१४८-१५०।

‡ यदि-वर्जितेन इति वोपदेवमतम्; यच्च यत्र-यदि-वर्जम् इति तु भट्टोजिदीक्षितक्रमदीश्वरौ। नाम सम्भावनार्थं अन्धः कृष्णं द्रक्ष्यति तच्चित्रं। अ-यदिना किं, अन्धः ईश्वरं यदि पश्येत् तच्चित्रं, अत्र खौ-प्रयोगं दर्शयता यदिना योगे चित्रं गम्ये सदा खौ स्यादिति सूचितं। पाणिनिः ३।३।१५१।

अपि हन्यादघं शम्भु-रुत दुःखं जयेदजः। *

९४९। प्रौढ्या सम्भावने। (प्रौढ्या ३।, सम्भावने ७।)।

प्रौढिः सामर्थ्यं। सम्भावनं क्रियासु योग्यताध्यवसायः। प्रौढिहेतुक-सम्भावनोपाधिकेऽर्थे वर्त्तमानात् धोः सदा ख्री स्यात्। अपिहिंस्यात् जगन्नाथो महापातकपञ्चकं। †

९५०। श्रद्धार्थे वाऽयदि।

(श्रद्धार्थे ७।, वा ।१।, अ-यदि ७।)।

श्रद्दधे ऽजं भजेः प्राणै-र्भक्ष्यसेऽजं बभक्थ तं। ‡

९५१। भव्ये वा फलहेत्वोः।

(भव्ये ७।, वा ।१।, फलहेत्वोः ७॥)।

शं यायाच्चे-न्नमेदीशं, श्चीशं नंस्यति यास्यति। §

---

* बाढं अतिशयः। अतिशयार्थे वर्त्तमानाभ्यामप्युताभ्यां योगे सर्व्वेषु कालेषु ख्री स्यात्। शम्भुः अघं पापं अपि हन्यात् पापहनने अतियोग्य इत्यर्थः। अजः कृष्णः दुःखं उत जयेत् दुःखजये अतियोग्य इत्यर्थः। पाणिनिः ३।३।१५२।

† योग्यताध्यवसायः योग्यतावलम्बनं। सामर्थ्येन क्रियासु योग्यतावलम्बनं उपाधि-र्भेदकं यस्य तस्मिन्नर्थे वर्त्तमानात् धोः सर्व्वेषु कालेषु ख्री स्यादित्यर्थः। "सिद्धाप्रयोग" इति च पाणिनिः। जगन्नाथः महापातकपञ्चकं अपिहिंस्यात् सामर्थ्येन महापातकपञ्चक-हनने योग्य इत्यर्थः। पाणिनिः ३।३।१५४।

‡ न यद् अयद् तस्मिन्। श्रद्धार्थे योगे प्रौढ्या सम्भावने सर्व्वेषु कालेषु ख्री स्याद्वा न तु यदशब्दप्रयोगे। त्वं प्राणैः सामर्थ्यैः अजं भजेः अहं श्रद्दधे। पक्षे अजं भक्ष्यसे तं बभक्थ, इति भविष्यदतीतयोरुदाहरणद्वयं। अयदि किं, श्रद्दधेऽजं भवान् प्राणै-र्भजेत् यत् पुरुषोत्तममिति पूर्व्वेण (९४९) नित्यं ख्री। पाणिनिः ३।३।१५५।

§ वाग्रहणं परत्र वाधिकारनिवृत्त्यर्थं। फलं कार्य्यं, हेतुः कारणं। फलक्रियायां हेतुक्रियायाञ्च वर्त्तमानात् धोः भव्ये ख्री वा स्यात्। जनः ईशं नमेच्चेत् शं यायात्

६५२। कामोक्तौ ऽकच्चिति। (कामोक्तौ ७।, अकच्चिति ७।)।

कामं भजेत् भवान् भर्गं कच्चिदर्च्चिष्यते शिवं। *

६५३। गौ चेच्छार्थैः। (गौ ।१।, च ।१।, इच्छार्थैः ३।।।)।

इच्छामि, शर्व्वं सेवेत श्रीपतिं सेवतां भवान्। कामोक्ता इति किं, इच्छन् करोति। †

६५४। विधि-निमन्त्रणामन्त्रणाध्येषण-संप्रश्न-प्रार्थनाप्रेष्य-प्राप्तकालादौ। (विधि—प्राप्तकालादौ ७।)।

सदा। यागं कुर्य्यात्, इह भुञ्जीत भवान्, इह शयीत भवान्, पुत्रमध्यापयेत् भवान्, किं भो वेदमधीयीय उत तर्कमधीयीय, भो भोजनं लभेय, प्रेषितस्त्वं गङ्गां गच्छेः, प्राप्तस्ते कालस्तपः कुर्य्याः। एवं गौ। ‡

कल्याणं प्राप्नुयात्। ईश-नमस्कारो हेतुः, कल्याणप्राप्तिः फलं। पक्षे शीघ्रं गंस्यति चेत् स यास्यति। पाणिनिः ३।३।१५६।

* मण्डूकप्लुत्या सदेत्यनुवर्त्तते। कामोक्तमिच्छाप्रकाशः; तस्मिन्नर्थे सर्व्वेषु कालेषु खौ स्यात् न तु कच्चित्शब्दप्रयोगे। भवान् कामं यथेष्टं यथा स्यात्तथा भर्गं शिवं भजेत् इति वक्तुरिच्छया एतद्वाक्यं। अकच्चिदिति किं, कच्चित् शिवं अर्च्चिष्यते इति कच्चित्शब्देन वक्तुरिच्छाप्रकाशः। (कच्चित् कामप्रवेदने इत्यमरः।) पाणिनिः ३।३।१५३।

† इच्छार्थैर्योगे सर्व्वेषु कालेषु कामोक्तौ खौ गौ च स्यात्। अहं इच्छामि—भवान् शर्व्वं महादेवं सेवेत, श्रीपतिं सेवतां वा। अत्र इच्छाप्रकाशे खौ गौ च। इच्छन् अमः करोति इत्यत्र इच्छाप्रकाशो नास्तीति न खौ गौ च। पाणिनिः ३।३।१५७, वार्त्तिकञ्च।

‡ विधिश्च निमन्त्रणञ्च आमन्त्रणञ्च अध्येषणञ्च संप्रश्नश्च प्रार्थना च प्रेष्यञ्च प्राप्तकालादिश्चेति तस्मिन्। सदा इति वृत्तिः। एष्वर्थेषु सर्व्वेषु कालेषु खौ गौ च स्यात्। अप्राप्तप्रापको विधिः, (विधिः प्रेरणं भृत्यादेर्निकृष्टस्य प्रवर्त्तनमिति सिद्धान्तकौमुदी)

९५५। समर्थनाशिषो गीं।

(समर्थन-आशिषोः ७॥, गी ।१।)।

सिन्धुमपि शोषयाणि। *

९५६। तुह्योस्तातङ् वाशिषि।

(तु-ह्योः ७॥, तातङ् ।१।, वा ।१।, आशिषि ७।)।

पातु पाताद्वा शिवः, पाहि पाताद्वा शिवः। †

९५७। मुहुर्भृशार्थे हि-त-स्व-ध्वं।

(मुहुर्भृशार्थे ७।, हि-त-स्व-ध्वं ।१॥)।

पौनःपुन्ये अतिशये चार्थे सदा काले ग्या हि-त-स्व-ध्वं स्युः।

यथा, यागं कुर्य्यात्, एवं सन्ध्यामुपासीत। यस्याकरणे प्रत्यवायः स्यात्तन्निमन्त्रणं, (निमन्त्रणं नियोगकरणं आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्त्तनमिति सिद्धान्त-कौमुदी), यथा, इह भुञ्जीत भवान्। यस्याकरणे प्रत्यवायो न,स्यात्तदामन्त्रणं (आमन्त्रणं कामचारकरणम् इति सिद्धान्तकौमुदी), यथा, इह शयीत भवान्। सत्कारपूर्व्वकनि-योगनमध्येषणं, (सत्कारपूर्व्वको व्यापारः इति सिद्धान्तकौमुदी), यथा, पुत्रमध्यापयेत् भवान्। संप्रश्नो जिज्ञासा, (संप्रधारणमिति पाणिनिटीका), यथा, किं भो वेदमधी-यीय उत तर्कमधीयीय, अहमिति शेषः। प्रार्थना याच्ञा, यथा, भो भोजनं लभेय, अहमिति शेषः। कर्म्मणि प्रेरणं प्रैष्यं यथा, प्रेषितस्त्वं गङ्गां गच्छेः। तत्क्रियोचित-काललाभः प्राप्तकालः, यथा, प्राप्तस्ते कालः तपः कुर्य्याः। आदिशब्दादनुमतौ च (अतिसर्गः कामचारानुज्ञा इति पाणिनिः), यथा, श्राद्धमहं करिष्ये इति प्रश्ने, कुरुष्व इति। अनुमतौ ग्या न प्रयोगः। एवं गीति यागं करोतु इत्यादि। पाणिनिः ३।३।१६१-१६३।

* अशक्येऽध्यवसायः समर्थना, ("समर्थनाशिषोश्च" इति कातन्त्रम्), यथा सिन्धुमपि शोषयाणि। इष्टार्थस्याविष्करणमाशीः, यथा जीवतु भवान्। पाणिनिः ३।३।१७३।

† तु-ह्योः स्थाने तातङ् वा स्यादाशिषि गम्यमानायां। सर्व्वावयवादेशोऽयं, तेन ङित्त्वेऽपि नान्त्यस्य स्थाने। ङित्त्वन्तु, भवान् राजत्वं कुरुतादित्यादावगुणार्थं, वश च कास्ती—भवान् स्वर्गमुष्टादित्यादौ जिघ्रासग्रर्थेश्च। पाणिनिः ७।१।३५।

मुहुर्भृशं वा लुनाति लुलाव लविष्यति वा—लुनीहि लुनीत लुनीष्व लुनीध्वं । *

९५८ । मास्मेन घीध्यौ । (मास्मेन ३।, घी-ध्यौ १॥) ।

मास्मशब्देन योगे सदा घी-ध्यौ स्तः । मास्म भवत् दुःखं, मास्म भूत् शोकः । †

९५९ । मा टी वा । (मा ।३।, टी ।१।, वा ।१।) ।

मा-योगे सदा टी स्याद्वा । मा विरंसीत् सुखं, मा विरमतु, मा विरंस्यति । ‡

९६० । क्याशिषि । (टी ।१।, आशिषि ७।) ।

जीव्याच्चिरं सज्जनः । §

---

* पौनःपुन्ये अतिशये चार्थे, सर्व्वेषु कालेषु, लिङ्गे युष्मदि अस्मदि च प्रयुज्यमाने, तेषामेकत्वे द्वित्वे बहुत्वे च ग्या हि त स्व ध्वं स्युरित्यर्थः । तत्रायं विशेषः—कर्त्तरि वाच्ये परस्मैपदिनो हि त इति द्वयं, कर्त्तरि कर्म्मणि भावे च आत्मनेपदिनः स्व ध्वमिति द्वयं, कर्त्तरि उभयपदिनश्चत्वारीति । क्रियासमुच्चये सत्यप्ययं विधिर्वा भवतीति वक्तव्यम् । (पाणिनिः ३।४।३), यथा, पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हरामराङ्गनाः इति माघः, अत्र अतीतकाले प्रयोगः, रावणः कर्त्ता । अत्र पुन. पुनरवस्कन्देत्यर्थो भ्रममूलक एव इति सिद्धान्तकौमुदी । पाणिनिः ३।४।२ ।

† मास्म-योगोऽत्र व्यवहितोऽव्यवहितो वा । मास्म योगेऽपि (५५०) अमागमनिषेधः । पाणिनिः ३।३।१७६ ।

‡ अत्रापि योगो व्यवहितोऽव्यवहितो वा । पाणिनिः ३।३।१७५ ।

§ इष्टार्थस्याविष्करणमाशीः । आशिषि गम्यमानायां टी स्यात् । आशीश्च भव्ये एव सम्भवति, सुतरां सदेति निवृत्तं । पाणिनिः ३।४।११६ ।

९६१ । स्मृर्थैस्त्ययदि त्वतीते ।

(स्मृर्थैः ३।॥, ती ।१।, अयदि ७।, तु ।१।, अतीते ७।) ।

स्मरणार्थैर्योगे अतीते काले ती स्यात् । यच्छब्दश्चेन्न प्रयुज्यते । व्यपवादोऽयं । स्मरस्येमं नंस्यसीशं, यत् स्मरस्यानमः शिवं ।*

९६२ । वानेकस्मार्य्ये । (वा ।१।, अनेकस्मार्य्ये ७।) ।

अनेकस्मार्य्ये प्रयोक्तरि सति स्मरणार्थैर्योगे अतीते ती वा स्यात् । ध्यायसीदं यदीशानं द्रक्ष्यति स्तोष्यते भवान् । †

९६३ । व्यर्थासम्भवे थौ । (व्यर्थासम्भवे ७।, थौ ।१।) ।

धोरर्थस्यानिष्पत्तौ सदा थौ स्यात् । ज्ञानञ्चेदभविष्यत् सुखमभविष्यत् । ‡

९६४ । लियुष्मदस्मदि त्यादि त्रिशः ।

(लि-युष्मद्-अस्मदि ७।, त्यादि ।१॥, त्रिशः ।१॥) ।

---

* स्मृधातोरर्थ इव अर्थो येषां ते तैः । न यद् अयद् तस्मिन् । व्यपवादोऽयमिति व्या अपवादो विशेषः, तेन यदः प्रयोगे अस्याप्राप्तौ धौ एव, न तु टौ-त्यौ । त्वं ईशं नंस्यसि एनं स्मरसि अत्र तौ, यत् त्वं शिवं आनमः तत् स्मरसि, अत्र धौ । पाणिनिः ३।२।११२,११३ ।

† स्मर्य्यते यत् तत् स्मार्य्यमिति ऋदन्तात् कर्म्मणि यः । अनेक-मेकभिन्नं स्मार्य्यं स्मरणीयं येन सोऽनेकस्मार्य्यस्तस्मिन् । भवान् यत् ईशानं द्रक्ष्यति स्तोष्यते च इदं इयं ध्यायसि स्मरसीत्यर्थः । पक्षे ध्यायसीदं यदद्राक्षीदस्तावीच्च शिवं भवान् इत्यादि । स्मार्य्यस्य परस्परसाकाङ्क्षत्वे विधिरयं, तेन, स्मरसि यत् त्वं तर्कमपठः काशीमगच्छश्च इत्यादौ न स्यात् । पाणिनिः ३।२।११४ ।

‡ परत्वात् सर्व्वेषां बाधकोऽयं । ज्ञानञ्चेदिति, ज्ञानस्यासम्भवात् सुखस्याप्यसम्भव इति व्यर्थासम्भवः । भविष्यति भूते च इति पाणिनीयाः । पाणिनिः ३।३।१३९,१४० ।

लौ युष्मदि अस्मदि च त्यस्यार्थे प्रयुज्यमाने त्यादीनि त्रीणि त्रीणि क्रमात् स्युः। *

जानाति योऽखिलं, यञ्च न जानीतः श्रुतिस्मृती।
शास्त्राणि च न जानन्ति, स मया सेव्यते शिवः॥
भासि त्वमेको विश्वेश, भाथोऽच्युतशिवौ युवां।
भाथ यूयं हरिहरब्रह्माद्याः, पाह्यनेकशः॥ †

एको भवामि स्म भवेऽहमादौ, दारैरथोभौ स्म भवाव आवां।
वयं भवामो बहवः स्म पुत्रै-स्त्वन्माययाद्यापि विभो प्रसीद॥ ‡

इति त्रि-पादः।

इति त्याद्यन्ताध्यायः।

---

* लिश'युष्मच्च अस्मच्च तत्तस्मिन् गम्ये इत्यर्थः। त्यस्यार्थे इति कर्त्तरि कर्म्मणि च वाच्ये इत्यर्थः। यथा (५२१) नवशः पमे इत्यादिना कर्त्तरि वाच्ये प्रत्यये कर्त्तव्ये, लिङ्गे कर्त्तरि तिबादित्रयं, युष्मदि कर्त्तरि सिबादित्रयं, अस्मदि कर्त्तरि मिबादित्रयं; तथा (९२०) ढभावे मे-मित्यनेन कर्म्मणि वाच्ये प्रत्यये कर्त्तव्ये, लिङ्गे कर्म्मणि ते-आदित्रयं, युष्मदि कर्म्मणि से-आदित्रयं, अस्मदि कर्म्मणि ए-आदित्रयमिति। तेषामेकत्व-द्वित्व-बहुत्वेषु विभक्तीनामप्येकवचन-द्विवचन-बहुवचनानि स्युरित्यर्थः। भावे माद्यमिति (९२५) पूर्व्वमेव भाववाच्ये व्यवस्था कृता। पाणिनिः १।४।१०१,१०२,१०५,१०७,१०८।

† जानातीत्यादि। यः शिवः अखिलं सकलं जानाति, श्रुतिस्मृती च यं न जानीतः ज्ञापयितुं न शक्नुतः, अन्तर्भूतण्यर्थोऽयं, शास्त्राणि च यं न जानन्ति ज्ञापयितुं न शक्नुवन्ति, इति एकत्व-द्वित्व बहुत्वेषु कर्त्तरि प्रत्ययः, स शिवः मया सेव्यते इति कर्म्मणि प्रत्ययः। हे विश्वेश त्वं एको भासि, हे अच्युतशिवौ युवां भाथः, हे हरिहरब्रह्माद्याः अनेकशो यूयं भाथ, इति युष्मदि कर्त्तरि एकत्व-द्वित्व बहुत्वेषूदाहरणानि। पाहि, सुहुर्म्मं वा पाथेत्यर्थः, अस्मान् इति शेषः, (९५७) सुहुर्म्मार्थे इति हि।

‡ भवे संसारे आदौ उत्पत्तिकाले अहं एको भवामि स्म, अथ दारैः सह आवां उभौ भवावः स्म, तथा पुत्रैः सह वयं बहवो भवामः स्म, एतत् सर्व्वं त्वन्मायया, अतएव हे विभो अद्यापि त्वं प्रसीद प्रसन्नो भव, यथा न पुनर्भवामीत्यभिप्रायः। अत्र अस्मदि

१०मः। कृदन्ताध्यायः।

—∞◊◊∞—

१म पादः—त्यः।

६६५। कृद्धोः क्त-भावे। (कृत् ।१।, धोः ५।, क्त-भावे ७।)।

वक्ष्यमाण-त्यः कृत्संज्ञः स्यात्, स च धोः परः स्यात्, स च क्ते भावे च स्यात्। *

कर्त्तरि एकत्व द्वित्व-बहुत्वेषूदाहरणानि। युष्मदस्मदो र्मुख्ययोरेव ग्रहणं, गौणयोस्तु लिङ्गविहिता विभक्तिः। यथा, त्वं भवति अनहं भवतीत्यादि। एवं

प्रकृतेर्विकृतेश्चापि यत्रोक्तत्वं द्वयोरपि।

वाचकः प्रकृतेः सङ्ख्यां गृह्णाति विकृते र्न तु॥ इति प्राञ्चः।

यथा, एको वृक्षः पञ्च नौका भवति; पञ्च वृक्षा एका नौर्भवन्तीत्यादि।

---

* वक्ष्यमाणतव्यादिश्नम-पर्य्यन्त-त्यः प्रत्ययसमूहः कृत्संज्ञः स्यादित्यर्थः। करोतीति कृत, वक्ष्यमाणप्रत्ययानां संज्ञाकारक इत्यर्थः। स च धातुविशेषाद्विहितोऽपि प्रयोगानुसारादन्यस्मादपि धातोः स्यादित्यत आह, स च धोः परः स्यादिति, धोधातुमात्रादित्यर्थः, तेन (११५०) शीभ्राजादिभ्यो विहितः क्यप् ईरधातोरपि स्यात्, यथा ईर्य्या इत्यादि। एवं अर्थविशेषे विहितोऽपि कृत प्रयोगानुसारादर्थान्तरेऽपि स्यादित्यत आह, स च क्ते भावे च स्यादिति, तेन ढभानयोर्विहितस्तव्यो वसतेः कर्त्तर्य्यपि स्यात्, यथा वसतीति वास्तव्यः, अत्र मनीषादित्वात् वृद्धिः; अपादानेऽपि यथा, भेतव्या रजनी। एवञ्च कर्म्मसम्प्रदानकरणाधिकरणेष्वपि अनीयः स्यात्, यथा, प्रवक्तीति प्रवचनीयो गुरुर्धर्म्मस्य, ददात्यस्मै दानीयो विप्रः, स्नायतेऽनेनेति स्नानीयं जलं, रम्यतेऽस्मिन्निति रमणीयं गृहं, "यत्र रम्यते तत्र रमणीयं" इति गोयीचन्द्रः। एवं कर्त्तर्य्यपि घ्यण्, यथा नियोक्तुमर्हतीति नियोग्यः प्रभुः, जायते इति जन्यं, आपततीति आपात्यः इत्यादि। अतएव (११८२) कृद्धोः कभाव इत्युक्तेरन्यत्रापि प्रयोगत इति स्वयं वक्ष्यति। पाणिनिः ३।१।९१,९३।

९९६। सरूपो बाध्यः। (सरूप: ११, बाध्य: ११)।

समानरूपस्त्य: क्रता बाध्यते, न त्वसरूप:। *

९९७। तव्यानीयया ढ-भावे।

(तव्य-अनीय-या: १॥, ढ-भावे ७।)।

धोरेते स्यु ढे-भावे। चेतव्यं चयनीयं चेयं पुण्यं। भवितव्यं भवनीयं भव्यं त्वया। †

---

* विशेषेण सामान्यस्य बाधनं नियमयति। विशेषेण क्रता सामान्य: क्रत् सरूप-एव बाध्यते इत्यर्थ:। सरूपत्वन्तु अनुबन्धं हित्वा स्थायिभागेन एकावयवत्वं। यथा, विशेषेण घ्यणा सामान्यो य एव बाध्यते, न तु तव्यानीयौ। एवं एकार्थे एव सरूपत्वं गृह्यते न तु भिन्नार्थत्वे, तेन पचादित्वात् कर्त्तरि विहितेन विशेषेण अन्-प्रत्ययेन सामान्य: सरूपोऽपि घञ् न बाध्यते, अतएव पचतीति पच:, पचनं, पाक: इत्यादि स्यादेव। एवं (११५८) ऊीषीत्यादिना स्त्रीविहितेन अन-प्रत्ययेन अनट् न बाध्यते, तेन कारणा कारणमित्यादि। एवमन्यत्रापि। न त्वसरूपइत्यनेन असरूप विशेषणेन असरूपसामान्यो न बाध्यते इति। पाणिनि: ३।१।९४। एतन्मते विभाषा

† तव्यश्च अनीयश्च यश्च ते। ढश्च भावश्च तत्तस्मिन्। (९३२) भवद्भूतभव्यं इत्यत्र भव्य इति भविष्यद्वाचिप्रयोगात् तव्यादयो भविष्यत्काले स्युरिति, अत्र विशेष कथनाभावात् अन्यस्मिन् कालेऽपि। चि-तव्य, एकाजिवर्णान्तत्वान्न इम्, (५४२) गुण: एवं अनीये चयनीयं, ये चेयं। अत्र पुण्यमिति कर्मण: क्लीवत्वात् तद्विशेषणात् चेतव्यादीनामपि क्लीवत्वं। भावे तव्यादौ भवितव्यमित्यादि। भव्यमिति यकारस्य (४२३) अजवत्त्वात् (३५) ओकारस्थाने अव्। एवं भावयितव्यं, बुभूषितव्यं, बोभूयितव्यं, पुत्रकाम्यितव्यं श्यानीयितव्यं कृष्णायितव्यं। भावप्रत्ययान्तत्वात् क्लीवत्वं। तथाच—

अन्यानि कारके वाच्ये वाच्यलिङ्गा: कृदुच्यते।
भावे ल्युक्त-खलर्थान्ता अनटाद्या नपुंसके।
क्त्याद्यन्ताश्च स्त्रियां ज्ञेया:, पुंस्यघु घञन्तौ तथा।
अन्येषान्तु कृतां लिङ्गं वेदितव्यं प्रयोगत:॥ (परिशिष्टपत्र' द्रष्टव्यं)

पाणिनि: ३।१।९६,९७। एतन्मते तव्यत् इत्यधिकं दृश्यते।

८६८। नो ऽचोऽन्तरदुर्गेः प्राग्वत्णो ऽख्या-भाभूपृञ्क्रमगमप्यायवेपानिजादीदितो ञि-ह्साादीजुङस्तु वा।

(नः ६।, अचः ५।, अन्तरदुर्गेः ५।, प्राग्वत् ।१।, णः १।, अख्या—अनिजादीदितः ५।, ञिह्सादीजुङः ५।, तु ।१।, वा ।१।)।

अन्तरो दुर्-वर्ज-गेश्च परस्य णविधिहेतौ सति नस्याचः परस्य णः स्यात्, न तु ख्यादेः इजादिवर्जेदितश्च, आन्ताद्ह्सादीजुङस्तु वा। *

अन्तर्याणीयं प्रयाणीयं। प्रयापणीयं प्रयापनीयं, प्रकोपणीयं प्रकोपनीयं। ख्यादेस्तु—प्रख्यानीयं प्रख्यापनीयं, प्रभानीयं प्रभापनीयं, प्रभवनीयं प्रभावनीयं, प्रपवनीयं प्रपावनीयं, प्रक्रमनीयं प्रक्रामनीयं, प्रगमनीयं प्रप्यायनीयं प्रवेपनीयं प्रकम्पनीयं। इजादेस्तु प्रेङ्खणीयं। †

८६९। खनाट्टेरे ये। (खनात्-टेः ६।, ए ।१।, ये ७।)।

---

* नास्ति दुर्यत्र सोऽदुः, अदुश्चासौ गिश्चेति अदुर्गिः, अन्तर् च अदुर्गिश्च तत्तस्मात्। इच् आदि र्यस्य स इजादिः, न इजादिः अनिजादिः, अनिजादिश्चासौ इदिच्चेति अनिजादीदित्। ख्याश्च भाश्च भूश्च पूञ् च क्रमश्च गमश्च प्यायश्च वेपश्च अनिजादीदिच्चेति, पश्चात्नञ्‌योगे तस्मात्। ह्सादिश्चासौ इजुङ्चेति ह्सादीजुङ्, ञिश्च ह्सादीजुङ् चेति तस्मात्। अन्तरदुर्गेः पराद्धातोः परस्य कृत्सम्बन्धि-न-कारस्य अचः परत्वे सति णः स्यादित्यर्थः। ख्यादीनां केवलानां आन्तानाञ्च निषेधः। पाणिनिः ८।४।२९-३१,३४, वार्त्तिकञ्च।

† अन्तर्याणीयमित्यादि, एवं प्रपायिणौ प्रयाणं प्रहीणः प्रहाणिरित्यादि। विकल्पमाह आन्तस्य प्रयापणीयं प्रयापनीयं, ह्सादीजुङः प्रकोपणीयं प्रकोपनीयमित्यादि। प्रगमनीयमित्यादि, गमादीनां केवलानां आन्तानाञ्च अत्र तुल्यं रूपं। प्रेङ्खणीयमिति नित्यं णत्वं। अचः किं, प्रमग्न इत्यादि।

खन आदन्तस्य च टे-रे स्यात् ये परे। खेयं देयं। *

९७०। घ्यणो-रावश्यके।

(घ्यण् ।१।, औ: ५।, आवश्यके ७।)।

उवर्णान्तादवश्यम्भावेऽर्थे घ्यण् स्यात् ढभावे। विप्रेण शुचिना भाव्यं। †

९७१। हस्वृयासोः।

(हस्-ऋ-यु-आ-सोः ५।)।

हसन्तात् ऋवर्णान्तात् यौते रासुनोतेश्च घ्यण् स्यात् ढभावे। वाच्यं घात्यं जन्यं वध्यं, कार्य्यं, याव्यं, आसाव्यं। ‡

---

* खन च आश्च खनातौ, खनातोरिः खनादिस्तस्य। प्रकरणबलात् ये इति ल्यसंज्ञके यकारे परे इत्यर्थः। खेयमिति खनधातौ घ्यंणि अनेन टेरेकारः। देयमिति दास्वरूपोत् (९९७) यः, टेरेकारः। ल्यसंज्ञके किं, खन्यते, दीयते, प्रखन्य, प्रदाय इत्यादौ न स्यात्। पाणिनिः ३।१।१११,६।४।६५ (एतन्मते ई, ईत्)।

† अवश्यम् भावः आवश्यं, आवश्यमेव आवश्यकं तस्मिन्। क्रियाया अवश्यम्भावे इत्यर्थः। घ्यणौ णकावितौ य-स्थितिः। भाव्यमिति भू घ्यण् (५७७) वृद्धिः, (४२३) यस्य अज्वद्भावे, (३५) औस्थाने आव्। एवं तपस्विना विष्णुः स्ताव्य इत्यादि। अनावश्यके तु ये भव्यं, क्यपि स्तुत्यः। पाणिनिः ३।१।१२५ (एतन्मते ण्यत)।

‡ हस् च ऋश्च युश्च आ-सुश्च तस्मात्। पृथग्योगादावश्यके इत्यस्य नानुवृत्तिः। वाच्यमिति उच्यते यत् तत्, वच-घ्यण् (५७७) वृद्धिः। घात्यमिति हन्यते यत् तत, हन घ्यण्, (६७९) खेर्हौघ इति हस्य घः, वृद्धिः, (८०१) हन-स्तङ्। जायते इति जन्यं, (९६५) कभावे इत्युक्तेः कर्त्तरि घ्यण्, बध्यते यत् तत् वध्यं, उभयत्र वृद्धौ (७४४) जनवध इति ह्रस्वः। कार्य्यमिति कृ अ क् य इति ऋस्वदीर्घान्ताभ्यां घ्यणि वृद्धिः। याव्यमिति यु-घ्यण्, आसाव्यमिति आ-सु-घ्यण्, उभयत्र वृद्धौ (४२३) अज्वद्भावः, आव् च। पाणिनिः ३।१।१२४,१२६।

६७२ । चजोः कगौ घित्यसेमक्त-यज्ञाङ्गयज-गत्यर्थवञ्चां । (च-जोः ६॥, क-गौ, १॥, घिति ७।, अ-सेमक्त-यज्ञाङ्गयज-गत्यर्थवञ्चां ६॥) ।

घिति परे च-जोः क-गौ स्तो न तु सेमक्तादेः ।
पाक्यं रोग्यं । गतौ तु, वञ्च्यं । अन्यत्र वङ्ग्यं काष्ठं । *

६७३ । नावश्यके त्यज-यज-प्रवचाञ्च घ्यणि ।
(न ।१।, आवश्यके ७।, त्यज-यज-प्रवचां ६॥, च ।१।, घ्यणि ७।) ।

आवश्यकेऽर्थे एषाञ्च चजोः कगौ न स्तो घ्यणि । अवश्यं पाच्यं, त्याज्यः याज्यः प्रवाच्यः । †

६७४ । भुज-वच-नियुजो ऽन्नाशब्दशक्ये ।
(भुज-वच-नियुजः ६।, अन्न-अशब्द-शक्ये ७।) ।

भुजो भक्ष्येऽर्थे, वचोऽशब्देऽर्थे, निप्रपूर्व्वस्य युजः शक्येऽर्थे, चजोः कगौ न स्तो घ्यणि । भोज्यं, वाच्यं, नियोज्यः प्रयोज्यः । एषु

---

* सेम् क्तो यस्मात् स सेमक्तः, यस्मात् क्तो विहितः सेम् भवतीत्यर्थः । यज्ञस्याङ्गं यज्ञाङ्गं, यज्ञाङ्गे यजः यज्ञाङ्गयजः, गत्यर्थश्चासौ वञ्च चेति गत्यर्थवञ्च । सेमक्तश्च यज्ञाङ्गयजश्च गत्यर्थवञ्च चेति, ततो नञ्योगे तेषां । पाक्यमिति पच-घ्यण्, वृद्धिः, चस्य कः । रुज-घ्यण्, गुणः, जस्य गः । एवं घञि पाकः रोगः । सेमक्तात्तु याच-घ्यण् याच्य इत्यादि । यज्ञाङ्गयजस्तु घञि प्रयाजः अनुयाजः उपांशुयाजः, ऋतुयाजः, प्रधानयज्ञस्य अङ्गयज्ञा एते । यज्ञाङ्ग इति किं, यागः प्रधानयज्ञ इत्यर्थः । वञ्चु गत्यां वञ्ची ग्रामः । वक्रीभावार्थे वङ्ग्यं काष्ठं । पाणिनिः ७।३।५२,६२,६३, भाष्यञ्च ।

† क्रियाया अवश्यम्भावेऽर्थे सर्व्वेषां धातूनां, त्यज-यज-प्रवचाञ्च आवश्यके अनावश्यके चार्थे इत्यर्थः । अवश्यं पाच्यं, एवं अवश्यं रोज्यमित्यादि । त्यज-यज-प्रवचामिति बहु-वचनेन शोच्यः शोच्यः इत्यादावपि प्रयोगानुसारेण क-ग-निषेधो वक्तव्यः । पाणिनिः ७।३।६५,६६, "ऋतुप्रकरणे त्यजेरुपसंख्यानम्" इति वार्त्तिकञ्च ।

किं, भोग्या भूः, वाक्यं पद समुदायः, नियोक्तुमर्हति नियोग्यः प्रभुः । *

९७५ । पाय्य धाय्य प्रणाय्यानाय्य कुण्डपाय्य सञ्चाय्य राजसूय सान्नाय्य निकाय्य परिचाय्योपचाय्य चित्याग्निचित्या समूह्यामावस्यामावास्या याज्याः । (पाय्य—याज्याः १॥) ।

एते घ्यणन्ता निपात्यन्ते ।

पाय्यं मानं । दधात्यग्निमिति धाय्या सामधेनी, धाय्या ऋत्विजः । प्रणाय्योऽसम्मतः प्रियो वा । आनाय्यो दक्षिणाग्निः । कुण्डैः पीयते अत्र सोम इति कुण्डपाय्यः क्रतुः । सञ्चाय्यः क्रतुः । राज्ञा सूयते राजसूयः क्रतुः । सान्नाय्यं हविः । निकाय्यो निवासः । परिचाय्योऽग्निः, उपचाय्योऽग्निः, चित्योऽग्निः । अग्नेश्चयनं अग्निचित्या । समूह्योऽग्निः संवाह्य इत्यर्थः । अमा सह वसतोऽस्यां चन्द्रार्कावित्यमावस्या अमावास्या । यजन्त्यनया इति याज्या । निपातो ह्यर्थविशेषे । †

---

* भुजश्च वचश्च निप्राभ्यां युज च तस्य । अन्नश्च अब्दश्च प्रकाश्चेति तच्चिन्‌ । भुज्यते यत् तत् भोज्यं अन्नादि । वाच्यं वचनीयमित्यर्थः । नियोक्तुं प्रयोक्तुञ्च शक्यतेऽसौ नियोज्यः प्रयोज्यः सेवकः । भोग्या भूरिति उपभोग्या पालनीया वेत्यर्थः । वाक्यं पदसमुदायः परस्पराकाङ्क्षायुक्तपदसमूहः नियोक्तुमर्हति योग्यो भवतीत्यर्थः, अत्र (९६५) कभावे इत्युक्तेः कर्त्तरि घ्यण् । पाणिनिः ७।३।६७-६९ ।

† पा घ्यण् पाय्यं परिमाणं, पेयमन्यत् । मतान्तरे मा-घ्यण्, मेयमन्यत् । धा-घ्यण्, धाय्या सामधेनी अग्निज्वालनमन्त्रः, एवं धाय्याः ऋत्विजः ; धेयमन्यत् । प्रणीयतेऽसौ प्रणाय्यः ; अन्यत्र प्रणेयः । गार्हपत्यादग्नेरानीय यः प्रणीयते स आनाय्यो दक्षिणाग्निः ; अन्यत्र आनेयः । कुण्डपाय्यः क्रतुः ; अन्यत्र कुण्डपेयं दुग्धं । सोमो लताविशेषस्य रसः । सञ्चीयतेऽसौ सञ्चाय्यः क्रतुः ; अन्यत्र सञ्चेयं पुण्यं । राज्ञा सूयते मङ्गलपूर्व्वकं क्षायते

९७६। पु शक सह तक चत यत शसोऽचम वप रप लप त्रप दभो यो भज जप यजानमस्तु वा। (पु—शसः ५।, अचम—दभः ५।, यः १।, भज—आनमः ५।, तु ।१।, वा ।१।)।

पवर्गान्तात् शकादेश्च चमादिवर्जात् यः स्यात् ढभावे, भजादेस्तु वा। रम्यं शक्यं सह्यं तक्यं चत्यं यत्यं शस्यं। भज्यं भाग्यं, जप्यं जाप्यं, यज्यं याज्यं, आनम्यं आनाम्यं। चमादेस्तु आचाम्यं वाप्यं राप्य लाप्यं त्राप्य दाम्भं—अनकारनिर्द्देशात्। *

९७७। यत्रालभो मुण्। (यि ७।, आ-लभः ६।, मुण् ।१।)।

आङ्पूर्व्वस्य लभो मुण् स्यात् यकारे परे। आलम्भ्यो गौः। †

ऽभिषिच्यते इति राजसूयः क्रतुः, ("राजशब्दः सोमवाची, तेन सोतव्यं राजसूयं" इति तु क्रमदीश्वरः; भट्टोजिदीक्षितस्तु "राज्ञा सोतव्योऽभिषवद्वारा निष्पादयितव्यः, यद्वा लतात्मकः सोमो राजा स सूयते कण्ड्यतेऽत्रेति अधिकरणे क्यप् निपातनात् दीर्घः), सु-घ्यण्; अन्यत्र सव्यं। सम्नीयते इदं सान्नाय्यं हविः; अन्यत्र सन्नेयं। निचीयतेऽसौ निकाय्यो निवासः; अन्यत्र निचेयं। परिचीयतेऽसौ, परिचाय्यः, उपचीयतेऽसौ उपचाय्यः अग्निः, चीयतेऽसौ चित्यः; अन्यत्र परिचेयम्, उपचेयम्, चेयम। समुह्यतेऽसौ समूह्यः, सं-वह-घ्यण्, निपातनात् जिः, दीर्घश्च, अन्यत्र संवाह्यः। यद्यपि ऊहेः घ्यणि पदं सिध्यति, तथापि वहधातौ घ्यणि अनिष्टवारणार्थं निपातनं। अमा (अव्ययं) चन्द्रस्य कला, तया सह वसतोऽस्यां तिथौ चन्द्रार्कौ इत्यर्थे अमावस्या अमावास्या इति द्वयं। याज्या ऋक्। एकमर्थविशेषे एव निपातः, नतु सर्व्वत्र। बहुवचननिर्द्देशात् शको घ्यण् शिक्यं, चघ्यण् चैत्यमित्यादि। पाणिनिः ३।१।११४,१२२, १२७—१३२। एतन्मते राजसूयपदं क्यबन्तो निपातः।

* पुश्च शकश्च सहश्च तकश्च चतश्च यतश्च शस चेति तस्मात्। चमश्च वपश्च रपश्च लपश्च त्रपश्च दभ च ते, न विद्यन्ते ते यत्र सो ऽचम-वप-रप-लप-त्रप-दभ, तस्मात्। भजश्च जपश्च यजश्च आ-नम चेति तस्मात्। (९७१) हसन्तत्वात् प्राप्तस्य घ्यणो बाधकोऽयं। रम्यमिति पवर्गान्तत्वात् यः, एवं तप्य लभ्यमित्यादि। शकसहोर्दिवाद्योरेव ग्रहणं, अन्यत्र शाक्यं साह्यमिति। आचाम्यमित्यादिषु घ्यण् एव। दाम्भ्यमिति दन्भु न दम्भे इत्यस्य नकार-रहितपाठात् नकारलोपे,(५७७)वृद्धिः। पाणिनिः ३।१।९८,९९,१२६, वार्त्तिके च।

† मुणो ण इत् अन्त्याच्चः परः। आलम्भ्यो मारणीयः स्पर्शनीयो वा इत्यर्थः। पाणिनिः ७।१।६५। एतन्मते नुम्।

९७८। उपात् स्तुतौ। (उपात् ५।, स्तुतौ ७।)।

उपपूर्व्वस्य लभो मुण् स्यात् ये परे प्रशंसायां। उपलम्भ्यः साधुः। स्तुतौ किं, उपलभ्यमस्मात् किञ्चित्। *

९७९। गद-मद-यम-चराचरो ऽगे र्यः।

(गद मद यम चर आचरः ५।, अगेः ५।, यः।१।)।

अगिभ्य एभ्यो यः स्यात् ढभावे। गद्यं मद्यं यम्यं चर्य्यं आचर्य्यं। अगेः किं, प्रगाद्यं अभिचार्य्यं। †

९८०। पण्यावद्यवर्य्याचार्य्यवह्यजय्यक्रय्यार्य्योपसर्य्याजर्य्याः।

(पण्य—अजर्य्याः १।)।

एते यान्ता निपात्यन्ते। पण्यं विक्रेयं। अवद्यमनिष्टं। वर्य्या कन्या ; वर्य्यं श्रेष्ठं। आचार्य्यो गुरुः। उह्यतेऽनेनेति वह्यं शकटं। जेतुं शक्यं जय्यं, एवं क्रय्यं। क्रय्यं हट्टे प्रसारितं। अर्य्यः स्वामी वैश्यो वा। उपस्रियते इत्युपसर्य्या ऋतुमती। न जीर्य्यतीति अजर्य्यं सङ्गतं। ‡

---

* उपलम्भ्यः स्तव्य इत्यर्थः। उपलभ्यं प्राप्तव्यमित्यर्थः। पाणिनि: ७।१।६६।

† अयमपि घ्यणो बाधकः। गिपूर्व्वकेभ्यो घ्यण् एव। पाणिनि: ३।१।१००,वार्त्तिकञ्च।

‡ पण व्यवहारे स्तुतौ च, पण्यं ; अन्यत्र पाण्यो विष्णुः स्तव्य इत्यर्थः। नञ्-पूर्व्वस्य वदतेः अवद्यं अनिष्टं निन्दनीयमित्यर्थः, अन्यत्र अवाद्यं वाक्यं। वृ-घ्यण् वर्य्या वरणीया, वर्य्यं पूजनीयं ; अन्यत्र वार्य्यं। आ-चर-घ्यण् आचार्य्यः गुरुः, अन्यत्र आचर्य्यं। (९६६) सूत्रोक्त-नियमेन (९७९) घ्यणो बाधितत्वात् अत्र निपातः। उह्यतेऽनेनेति वह्यं ; अन्यत्र वाह्यं। जि, जय्यं ; अन्यत्र जेयं। जेतुं शक्यं जय्यं ; अन्यत्र जेयं। क्री, क्रय्यं ; अन्यत्र क्रेयं। ऋ, अर्य्यः ; अन्यत्र आर्य्यः विप्रः। उप-सृ, उपसर्य्या उपगमनीया, ऋतुमती ऋतुस्नातेत्यर्थः ; अन्यत्र उपसार्य्यं। न-जॄ अजर्य्यं सङ्गतं नित्यमित्यर्थः ; अन्यत्र अजार्य्यं। पाणिनि: ३।१।१०१—१०५, ६।१।८१,८२।

९८१। इ भृ जुष स्तु-शासृदुङ्-वृञो ऽकृपचृतऋच पाणिसृजसमवसृजः क्यप्। (इ—वृञः ५।, अकृप- समवसृजः ५।, क्यप् ।१।)।

ह्रादे ऋंकारोङो वृञश्च कृपादिवर्जात् क्यप् स्यात् ढभावे। *

९८२। ह्रस्व तन् पिति। (ह्रस्व ६।, तन् ।१।, पिति ७।)।

ह्रस्वान्तस्य तन् स्यात् पिति। आदृत्यः भृत्यः जुष्यः स्तुत्यः इत्यः शिष्यः वृध्यः वृत्यः। कृपादेस्तु कल्प्य चर्त्य अर्च्य पाणिसर्ग्या समवसर्ग्या रज्जुः। †

९८३। कृ वृष मृज गुह दुह शंनस संभृ प्रत्यपिग्रहो वा। (कृ—ग्रहः ५।, वा ।१।)।

एभ्यः क्यप् स्यात् वा ढभावे। कृत्यं कार्य्यं, वृष्यं वर्ष्यं, मृज्यं मार्ग्यं, गुह्यं गोह्यं, दुह्यं दोह्यं, शस्यं शंस्यं, संभृत्यः संभार्य्यः, प्रतिगृह्यं, प्रतिग्राह्यं, अपिगृह्यं अपिग्राह्यं। ‡

---

* ऋत् उङ् यस्य स ऋदुङ्, इश्च भृश्च जुषश्च स्तुश्च इन् च शास च ऋदुङ् च वृञ् चेति तस्मात्। पाणौ सृज पाणिसृज, समाऽवः समवः, समवात् सृज समवसृज; कृपश्च चृतश्च ऋचश्च पाणिसृज च समवसृज च तत, पश्चान्नञ्योगे तस्मात्। क्यपः किस्वात् अगुणः। पाणिनिः ३।१।१०९,११०,११२, वार्त्तिकद्वय, भाष्यञ्च।

† ह्रस्वान्तस्य तन् स्यात् प इत् कृति परे, निदृत्ते। अत्र येन केनापि प्रकारेण ह्रस्वान्तस्य ग्रहणं, न तु स्वभाव-ह्रस्वान्तस्य ; तेन वितत्येत्यादौ अमलोपे अनेन तन्। आदृत्य इत्यादि, आ-दृ-क्यप्, किस्वात् गुणाभावः, पित्वात् तन्। शिष्य इति शास-क्यप्, (७०५) अणौ इमि उङ इ, (११२) षत्वं। वृध्य इति अन्तर्भूतण्यर्थत्वात् सकर्मकत्व, कर्मणि क्यप्, वर्द्धनीय इत्यर्थः। वृञो आनुबन्धात् वृङ इत्यस्य वार्थ्य इत्येव। कल्प्यमिति कृपः घ्यण् (९४९) कृपादेशे, गुणः। पाणिभ्यां सृज्यतेऽसौ समवसृज्यतेऽसौ इति च वाक्ये घ्यणि, (९७२) जस्य गः। पाणिनिः ६।१।७१।

‡ समो भृ संभृ, प्रत्यपिभ्यां ग्रह प्रत्यपिग्रह, कृश्च वृष च मृज च गुह च दुह च

९८४। गृह्य विनीय विपूय जित्या सूर्य्य रुच्याव्यथ्य भिद्योद्ध्य पुष्य सिद्ध तिष्याज्य युग्य कृष्टपच्य कुप्य भार्य्याः। (गृह्य—भार्य्याः १॥)।

एते क्यबन्ता निपात्यन्ते।

प्रगृह्यं पदं, कृष्णगृह्यः कृष्णवर्ग्यः, गृह्योऽस्वैरी, ग्रामगृह्या ग्रामवाह्या। विनीयः कल्कः। विपूयो मुञ्जः। जित्या हलिः। सरतीति सूर्य्यः, एवं रुच्यः, अव्यथ्यः। कूलं भिनत्तीति भिद्यो नदः। वारि उज्झतीति उद्ध्यो नदः। कार्य्यं पुष्णातीति पुष्यो नक्षत्रं। कार्य्यं साधयतीति सिद्ध्यः, सएव तिष्योऽपि। आज्यं घृतं। युग्यं वाहनं। कृष्टे स्वयं पच्यते इति कृष्टपच्यो व्रीहिः। कुप्यं सुवर्णरूप्याभ्यामन्यत्। भार्य्या वधूः क्षत्रिया च। *

अन्भ च् संभृश्च प्रत्यपिग्रह चेति तस्मात्। सर्व्वत्र विकल्पपक्षे (९७१) घ्यण्। कार्य्यमित्यत्र (५७७) वृद्धिः। मार्ग्यमित्यत्र (६९४) वृद्धिः, (९७२) जस्य गः। गोप्यमिति घ्यणि, गुणे, (६५६) गुहो घोकरित्यत्र अचि परे विधानात् अत्र न ऊः। भस्यमित्यत्र (५६७) न-लोपः। पाणिनिः ३।१।११२,११३,११८,१२०, वार्त्तिकं काशिका च।

* पद-पक्ष्य-परतन्त्र-वहिर्भूतेषु (पाणिनिः ३।१।११९) गृह्यं निपात्यते, यथा, प्रगृह्यं पदं; कृष्णवर्ग्यः कृष्णपक्ष्यः पाण्डव इत्यर्थः; अस्वैरी अधीनः; ग्रामवाह्या ग्रामवहिर्भूता नदीत्यर्थः; एभ्योऽन्यत्र ग्राह्यं। कल्कोऽस्त्री समलैनसोरित्यमरः; अन्यत्र विनेयः। मुञ्जः शरपुङ्खः; अन्यत्र विपव्यः। हलि महत् हलं; अन्यत्र जेयः। सूर्य्यादयस्तिष्यान्ताः अष्टौ कर्त्तरि क्यबन्ताः, अन्यत्र सृ—सार्य्यः इत्यादि। रोचते इति रुच्यः। न व्यथते अव्यथ्यः। तोषयतीति तिष्यः, पुष्यनक्षत्रवाची। अज्यते म्रक्ष्यते ऽनेनेति आज्यं। युज्यते यत् तत् युग्यं। कृष्टपच्य इति कर्म्मकर्त्तरि क्यप्, "कृष्टेन पच्यन्ते" इति तु क्रमदीश्वरः। गुप्यते यत् तत् कुप्यं। स्वर्ण-रूप्ययोस्तु गोप्यं। भ्रियते ऽसौ भार्य्या। (९९९) स्वरूपो बाध्य इति नियमात् (९८१) सूत्रे घ्यणो बाधितत्वात् अत्र निपातनं। पाणिनिः ३।१।११४—११७,११९,१२१, वार्त्तिकानि च।

९८५। ले वदः क्यप्यौ। (लेः ५।, वदः ५।, क्यप्-यौ१॥)।

लेः परात् वदः क्यप्-यौ स्तः; ढभावे।

ब्रह्मणा उद्यते इति ब्रह्मोद्या ब्रह्मवद्या, कथा। *

९८६। म्रषोद्यं नित्यं। † (म्रषोद्यं १।, नित्यं १।)।

९८७। भू-हनः क्यप् भावे न तश्च।

(भू-हनः ५।, क्यप् ।१।, भावे ७।, न ।१।, तः १।, च ।१।)।

लेः पराभ्यामाभ्यां क्यप् स्यात् भावे, हनो नस्य तश्च। ब्रह्मभूयं ब्रह्मत्वं, ब्रह्महत्या। ‡

९८८। धोः केलिमो ढवे। (धोः ५।, केलिमः १।, ढवे ७।)।

धोः परः केलिमः स्यात् ढवे। स्वयमेव पच्यन्ते इति पचेलिमास्तण्डुलाः। एवं भिदेलिमाः माषाः। §

---

* क्यप्यौ इति द्वयं क्यपो विकल्पं सूचयति। ब्रह्मणा ब्राह्मणेन। ब्रह्मोद्या इति (९९१) जिः। यप्रत्यये ब्रह्मवद्या'। भावे तु, ब्रह्मोद्यं ब्रह्मवद्यं। एतादृशस्थलेषु स्याद्यन्तोपपदस्य कृदन्तेन धातुना समासो वक्तव्यः। अतएव "प्रादिवर्जिते सुपि" इति क्रमदीश्वरसूत्रव्याख्याने गोयीचन्द्रः। अनुद्यं अनूद्यं अनुवाद्यमिति तु पदानि भवन्ति। पाणिनिः ३।१।१०६।

† म्रषा उद्यते इति म्रषोद्यं, नित्यं क्यप्, जिः। नित्यमिति कथनेन म्रषावद्यमिति न स्यात्। पाणिनिः ३।१।११४।

‡ ब्रह्मणो भावः, ब्रह्मभूयं ब्रह्मत्वमित्यर्थः। ब्रह्मणो हननं ब्रह्महत्या, (९७६) अन्लोपे, (९८२) तन्, अभिधानात् स्त्रीलिङ्गता। पाणिनिः ३।१।१०७,१०८।

§ ढस्य तत् धर्मति ढधः तस्मिन्। धोरुपादानं सर्व्वधातुप्राप्त्यर्थं। केलिमः कि स्यात् न गुणः। कालेन पच्यमानास्तण्डुलाः स्वयमेव पच्यन्ते इत्यर्थः। गृहस्थेन भिद्यमानाः माषाः स्वयमेव भिद्यन्ते इति भिदेलिमाः। एवं भिदेलिमं काष्ठं'। मेधेन मुच्यमानं

९८९। ते त्याः, शक्यार्हप्रैष्यानुज्ञाप्राप्तकाले वा। (ते १।३, त्याः १।३, शक्य—प्राप्तकाले ७।, वा ।१।) ।

तव्यादयो त्य-संज्ञाः स्युः, ते च शक्याद्यर्थेषु वा स्युः । *

वोढुं शक्यो वोढव्यः वहनीयः वाह्यः । स्तोतुमर्हः स्तोतव्यः स्तवनीयः स्तुत्यः । प्रेषितस्त्वं त्वया गन्तव्यं गमनीयं गम्यं । अनुज्ञातस्त्वं त्वया अध्येतव्यं अध्ययनीयं अध्येयं । प्राप्तस्ते कालः त्वया ध्यातव्यं ध्यानीयं ध्येयं । †

इति त्य-पादः ।

वारि स्वयमेव मुच्यते इति मुचेलिमं । इत्यादि । अत्र ढघे इति कथनं काशिकामतानुसारि, वार्त्तिकभाष्ययोस्तु कर्म्मणीति । "केलिमर उपसंख्यानम्" इति वार्त्तिकम् ।

* शक्यश्च अर्हश्च प्रैष्यश्च अनुज्ञा च प्राप्तकालश्च तस्मिन् । शक्यते ऽसौ शक्यः कर्म्मणि यः । अर्ह्यते योग्यः क्रियतेऽसाविति अर्हः, अन्तर्भूतण्यर्थत्वात् कर्म्मणि यः । निर्यकार-पाठे तु कर्म्मणि घञ् । ते तव्यादयः—तव्य, अनीय, य, घ्यण्, क्यप्, केलिम इति षट्, "त्यः" संज्ञा येषां तादृशाः स्युः । ते च तव्यादयः शक्याद्यर्थेषु वा स्युः । वा-शब्दः समुच्चयार्थः । तेन, शक्याद्यर्थाभावेऽपि स्युरित्यर्थः । त्यादितद्धितान्त-शब्दानां नामसंज्ञामाहुः—

उणाद्यन्तं कृदन्तञ्च तद्धितान्तं समासजं ।
नामसंज्ञा भवेदेषां स्याद्युत्पत्तिस्ततः परं ॥

† अन्यार्थेषु पूर्व्वोदाहरणानि, शक्याद्यर्थेषु उदाहरणान्याह वोढुमित्यादि । वोढव्य इति वह-तव्य, (१७५) हस्य ढ, (४५३) अकारस्य ओकार, (५७१) तस्थाने ध, (४७) धस्य ढ, (७७) ढलोपः । वोढुं शक्यः स्वल्पो भार इति शेषः । वाह्य इति वह (९७१) घ्यण्, (५७७) वृद्धिः । स्तोतुमर्हः गुरुरिति शेषः । स्तुत्य इति (९८१) क्यप्, (९८२) ह्रस्य तन् । इत्युदाहरणद्वयं कर्म्मणि वाच्ये । प्रैष्यादीनामुदाहरणानि भाववाच्ये । ध्यातव्यमिति ध्यै तव्य, (६०८) आ, ध्येयमिति (६११) ए । पाणिनिः ३।१।९५, ३।३।१६३,१६९ । एतन्मते कृत्याः ।

९९० । तृण्णकौ घे। (तृन्-णकौ १॥, घे ७।)।

धोस्तृन्-णकौ घे स्तः। करोतीति—कर्त्ता, कारकः, दरिद्रायकः। *

९९१ । गलेचोपक-पादहारकौ ढे।

(गलेचोपक पादहारकौ १॥, ढे ७।)।

एतौ निपात्यौ ढे। †

९९२ । मार्हात् क्रमो नेम् तृणः।

(मार्हात् ५।, क्रमः ५।, न ।१।, इम ।१।, तृणः ६।)।

प्रक्रान्ता उपक्रान्ता। अन्यत्र क्रमिता अतिक्रमिता। ‡

९९३ । ग्रहनन्दिपचादे णिन्नान् घे।

(ग्रह-नन्दि-पच-आदेः ५।, णिन्-अन-अन् ।१।, घे ७।)।

ग्रहादे णिन्, नन्द्यादेरनः, पचादेरन्, स्यात् घे। ग्राही स्थायी

---

* तृन् च णकश्च तौ। तृन् इति दन्त्य-नकारं, औणादिकतृन्प्रत्ययान्तानां पितृ-भ्रातृ-शब्दानां विशेषार्थं। णकस्य णकारो (५७७) वृद्ध्यर्थः। तृन् तच्छीलतद्धर्म-तत्साधुकारिष्वर्थेष्वपि (पाणिनिः ३।२।१३५) स्यादिति बोध्यं, अतएव ग्रन्थकारेण (३०५) शीलार्थतृन् इति कथितं। दरिद्रायक इति (७०२) दरिद्र आलोप इत्यत्र अकधर्जनात् आलोपाभावे, (९२४) यन्। पाणिनि ३।१।१३३। एतन्मते तृन् तृन् च।

† एतौ कर्म्मणि वाच्ये णकप्रत्ययेन निपात्यौ। गले चुष्यतेऽसौ गलेचोपकः। पादाभ्यां ह्रियतेऽसौ पादहारकः। भाष्यम्।

‡ मं (आत्मनेपदं) अर्हतीति मार्हः। आत्मनेपदप्राप्तियोग्यात् क्रमः परस्य तृण-इम् न स्यात्। प्रक्रान्तेत्यादि (८९४) आत्मनेपद योग्यत्वं। मकारस्य (५०,५१) अनुस्वार-नकारौ। अन्यत्र आत्मनेपदायोग्ये इत्यर्थः। वार्त्तिकम्।

प्रपायिणौ, नन्दनः विचक्षणः जनार्द्दनः मधुसूदनः लवणः, पचः देवः लेलयः लोलुवः रोरुयः । *

९९४ । चिक्लिद चक्नस चराचर चलाचल पतापत वदावद घनाघन पाटपटा वा ।

(चिक्लिद—पाटपटाः १॥, वा ।१।) ।

एते अनन्ता निपात्यन्ते वा ।

पक्षे, क्लेदः क्नसः चरः चलः पतः वदः हनः पाटः । †

---

* ग्रहश्च नन्दिश्च पचश्च ते आदयो यस्य स तस्मात् । णिन् च अनश्च अन् च तत् । णिनौ ण इत् (५७७) वृद्ध्यर्थः । अनः अकारान्तः । अन् इत्यस्य नइत अ-प्रत्ययात् विशेषार्थः । ग्रहादिः—ग्रह स्था पा सह दास भास मन्त्र मर्द्द रक्ष श्रु वप श्री (श्रा) याच हृ व्रज वद वस क्ष नी भू राध रुध । नन्द्यादिः—नन्दि वाशि मदि दूषि साधि वर्द्धि शोभि रोचि सहि तपि दमि जल्पि रमि दर्पि क्रन्दि कर्षि हर्षि अर्द्दि यु सूदि शोषि लू नाशि चक्षि । पचादिः—पच वच वप वद चल पत नद भष प्लु चर स्तृप गम दृश तप चम स्निष व्रण क्लिद सूद लिख क्रम हन पट भू भ्रू सृ गॄ जॄ भॄ तॄ गाह दिव चुर सेव दु नी ज्वल स्तु । एवमपरेऽपि प्रयोगतो ज्ञेयाः । (३०५) ढपे क्रतीत्यत्र स्वयं कथनात् कदाचिद् भविष्यत्काले ऋणार्थे च णिन् स्यादिति (पाणिनिः ३।३।१७०) । एवं (९९०) स्वयमुक्तत्वात् घिणिन-प्रत्ययोऽपि वक्तव्यः ; घ इत्, अन्त्यस्य इकारस्य च इत्, ण इत्, इन्स्थितिः (पाणिनिः ३।२।१४१-१४५) । गृह्णातीति णित्त्वात् वृद्धिः । तिष्ठतीति (९२४) यन् । प्रपिबत. यौ, (९६८) णत्व, णत्वप्रदर्शनार्थमेव द्विवचनान्तं पदं । नन्दयतीति अनः, (६४१) ञलोपः । विचष्ट इति (७०६) अन-वर्जनात् न चक्षः कसाञ्ख्याञौ, (१०७) णत्व । जनं अर्द्दयतीति, मधुं सूदयतीति, जन-मधू असुरविशेषौ । लुनातीति लवणः राक्षसः, स्वभावात् णत्वं । पचतीति पचः, दीव्यतीति देवः, अत्र अन् (९९६) क-प्रत्ययस्य बाधकः । लेलीयते इति अन्, (८३६) अनि तु नित्यं यङ्लुक्, (८४१) गुणनिषेधं, (५८८) ईस्थाने यः । लोलूयते इति अनि यङ्लुकि उस्थाने उव् । रोरूयते इति अनि, उदन्तात् अनि यङ्लुकनिषेधः । (५४२) यङोऽकारलोपः । पाणिनिः ३।१।१३४ । ल्यु = अन । अच् = अन् ।

† क्लिदू इर् क्लेदे, क्नसु म उद्धृतौ, चर गतौ, चल ज गतौ, पत लृ ज गत्यां, वदे वाचि, हन ल वधे गतौ, पट क त्विषि, इत्यष्टभ्यः पचादित्वादनि एते वा निपात्यन्ते । पाटपट इत्यत्र पाटूपट इति चान्द्राः । .पाटूपट इति पाणिनीयाः । पक्षे क्लेद इत्यादि, पाट इति चुरादित्वात् ञौ, वृद्धिः । वार्त्तिकत्रयम् ।

९९५। रात्रेर्मन् वा कृति।

(रात्रेः ६।, मन् ।१।, वा ।१।, कृति ७।)।

रात्रेर्मन् स्याद्वा कृति। रात्रिञ्चरः रात्रिचरः। *

९९६। कॄ-गॄ-ज्ञा-प्रीङ्गुङः को—दुहो घङ् च।

(कॄ-गॄ-ज्ञा-प्री-इगुङः ५।, कः ।१।, दुहः ६।, घङ् ।१।, च ।१।)।

कॄादेरिगुङश्च कः स्यात्, तस्मिंश्च दुहो घङ् स्यात् घे।

किरः गिरः ज्ञः प्रियः चिपः भूरुहः कामदुघा गौः। †

९९७। हनजनाद्गमादेर्डः।

(हन-जन-आत्-गमादेः ५।, डः ।१।)।

हनो जन आदन्तात् गमादेश्च डः स्यात् घे। शोकापहः वराहः सरसिजं पङ्कजं अजः गोदः द्विपः प्रज्ञः आशुगः नगः गिरिशः, वारि चरतीति वार्चो हंसः। ‡

---

* कृति कृदन्ते धातौ परे इत्यर्थः। मनोऽनावितौ, नित्त्वादन्ते। "रात्रौ चरतीति पचादित्वादनि, अनेन मन्, (५०,५१) मस्यानुस्वारः, अनुस्वारस्य ञ। पक्षे रात्रिचरः। अगदङ्कारः सत्यङ्कारः (पाणिनि: ६।३।७०) (१००९) घण्, तिमिङ्गिलः ("गिलेऽगिलस्य" इति वार्त्तिकम्) (९९६) कः, इत्यादौ मन् वक्तव्यः। पाणिनि: ६।३।७२।

† इच् उङ् यस्य स इगुङ्, कॄश्च गॄश्च ज्ञाश्च प्रीश्च इगुङ् चेति तस्मात्। दुहो घङ् चेति चकारात् इगुङ्त्वात् के सतीत्यर्थः। परसूत्रेण डप्रत्ययेन सिद्धेऽपि अत्र ज्ञा-ग्रहणं, परसूत्रे उपपदपूर्व्वादेव डः स्यात्, इह तु केवलात् जानातेः क इति ज्ञापनार्थम्। अत्र इगुङ्मात्रनिमित्ततया विशेषस्य कप्रत्ययेन, सर्व्वधातु-निमित्ततया सामान्यो ढात् घण् (१००९) बाध्यते। किरतीति किरः, (६२८) इर्। एवं गिरतीति गिरः। जानातीति ज्ञः, (६१०) आलोपः। प्रीणातीति प्रियः (५८८) इस्थाने इय। चिपतीति चिपः, भुवि रोहतीति भू-रुहः, उभयत्र इगुङ्त्वात् कः। कामं दोग्धीति, कप्रत्यये, दुहस्य घङि, स्त्रीत्वात् (२४९) आप्। पाणिनि: ३।१।१३५, ३।२।७०।

‡ हन च जन च आच्च गमादिश्च तस्मात्। उदाहरण-दर्शनेन, उपपदपूर्व्वकादेवे-

९९८ । घेट-दृश-पा-घ्रा-ध्मः शः ।

(घेट—ध्मः ५।, शः १।) ।

एभ्यः शः स्यात् घे । उद्धयः उत्पश्यः उत्पिबः उज्जिघ्रः उद्धमः । *

९९९ । साहि साति चेति वेद्येजि धारि पारि लिम्प विन्दो ऽगेः । (साहि—विन्दः ५।, अगेः ५।) ।

अगिभ्य एभ्यः शः स्यात् घे । साहयः सातयः चेतयः वेदयः एजयः धारयः पारयः, लिम्पः विन्दः गोविन्दः । †

१००० । दुनीभूज्वलाद्यास्त्रुसंस्रो णौ वा ।

(दु—संस्रो. ५।, णः १।, वा ।१।) ।

त्यर्थः । शोकमपहन्ति, वरमाहन्ति, सरसि जायते (विभक्तेरलुक्), पङ्काज्जायते, न जायते, गां ददाति, द्वाभ्यां पिबति, प्र-ह्वयति, आशु गच्छति, न गच्छति, गिरौ शेते, इति क्रमेण वाक्यानि । एवं तमोपहः, दुःखापहः, द्विजः अनुजः सहजः इत्यादयः । गमादिस्तु प्रयोगतो ज्ञेयः । पाणिनिः ३।२।४८,४९,५० ; ३।२।९७-१०१ ; ३।१।१३६, ३।२।३ सूत्रयोः कः ।

* शस्य श इत् रसंज्ञः, अकारस्थितिः । उद्धयतीति शः, घे शप् रे शप्, (५४३) अकारलोपः । एवं उत्पश्यतीत्यादि वाक्यानि । सर्व्वत्र रे परे शप्, (५९७) दृशादेः स्थाने पश्याद्यादेशः । साहचर्य्याच्च पा इति भौवादिक एव । उदाहरणज्ञापकात् प्रायशः सोपसर्गाणामेवायं विधिरिति ; (अतएव "प्रादिघ्रादेः शङ्" "अप्रादेरेत्येके" इति क्रमदीश्वरः) । व्याघ्र इत्यत्र संज्ञानुरोधात् ड एव ("जिघ्र. संज्ञायात् प्रतिषेधः इति वार्त्तिकम्) । पाणिनिः ३।१।१३७ ।

† षह ञ ङ शक्तौ, षात क सुखे, चितो संज्ञाने, विद ल् मतौ, एजृ कम्पे, धृ ञ ङ स्थितौ, पृ लि पालने, एते ञान्ताः । ञि लिपो श प ञ लेपने, विद लृ श प ञौ लाभे, इत्युभयोः (७४१) मुचादित्वात् णन् । साहयतीत्यादि वाक्यानि । श-प्रत्यये, रे परे शप्, गुणादि । लिम्पः विन्दः इत्युभयत्र तुदादित्वात् शः । उदेजयः इत्यत्र तु उद्शब्दस्य उपसर्गप्रतिरूपकत्वेन अनुपसर्गत्वात् शः इति भाष्यम् । क्रमदीश्वरस्तु उद्शब्दस्य उपसर्गत्वात् "एजेरुदः" इति पृथक् सूत्रं कृतम् । पाणिनिः ३।१।१३८ ।

अगिभ्य एभ्यो णः स्यात् घे वा। दावः द्रवः, नायः नयः, भावः भवः, ज्वालः ज्वलः, चालः चलः, आस्रावः आस्रवः, संस्रावः संस्रवः। *

१००१। श्वस व्यधेन तन दावह्रसः। (श्वस—सः ५।)।

एभ्यो णः स्यात् घे। श्वासः व्याधः अत्यायः अवतानः दायः धायः अवहारः अवसायः। †

१००२। नृत्खनरनजः षकः। (नृत् खन-रनजः ५।, षकः १।)।

एभ्यः षकः स्यात् घे। नर्त्तकी खनकी रजकी। ‡

१००३। गो णनट्थकौ। (गः ५।, णनट् थकौ १॥)।

गायतेरेतौ घे स्तः। गायनी, गाथकः। §

---

* ण प्रत्ययस्य ण इत् वृद्ध्यर्थः, अकारस्थितिः। द्रुनोतीति दावः, ण-प्रत्यये, (वृद्धिः), पचे पचादित्वादन् द्रवः। एवं नयति, भवति, ज्वलति, चलति, आस्रवति, संस्रवति, इति वाक्यानि। आस्रुसंस्रु इत्यादौ। व्यतिकरसन्देहनिरासार्थं समासः न कृतं। एवं ग्राहः ग्रहः (पाणिनिः ३।१।१४३)। क-प्रत्यये गृह्णित्योपि (पाणिनिः ३।१।१४४)। ज्वलादिश्च—ज्वल चल टल स्थल हल नल पल बल शल पत क्वथ वम भ्रम क्षर सह रम शद सद कुच कस। पाणिनिः ३।१।१४० —१४२, काशिका च।

† ह्रश्च साश्च ह्रसौ, अवात् ह्रसौ अवह्रसौ। श्वसश्च व्यधश्च इन च तन च दाश्च अवह्रसौ चेति तस्मात्। पृथक्सूत्रकरणं नित्यार्थं, अगेरित्यस्य निवृत्त्यर्थञ्च। दा इति दासंज्ञकः। श्वसिति, विध्यति, प्रत्येति, अवतनोति, ददाति, दधाति, अवहरति, अवस्यति, इति क्रमेण वाक्यानि। दायः धायः अवसायः एतेषु आदन्तत्वात् (८२४) यन्। पाणिनिः ३।१।१३९,१४१, वार्त्तिकञ्च। अवश्याय-प्रतिश्यायौ च णप्रत्ययान्तौ इति वक्तव्यम्।

‡ षकः ष इत् (२५७) ईबर्थः अक-स्थितिः। नृत्यति, खनति, रजति या सा, इति वाक्यानि। रञ्जकोऽत्र (६६०) षके परे न-लोपः। पाणिनिः ३।१।१४५, वार्त्तिकञ्च।

§ णनटो णित्त्वात् वृद्धिः, टित्त्वादीप् अन-स्थितिः। गायति या सा गायनी, (८२४) यन्, (२५७) ईप्। पाणिनिः ३।१।१४६,१४७।

१००४ । हायनः । (हायनः १।) ।

अयं निपात्यते । भावं जहातीति हायनो वर्षः, अम्बु जहातीति हायनो व्रीहिः । *

१००५ । प्रु द्रु स्रु सृ ल्वो ऽकः । (प्रु—ल्वः ५।,अकः १।)।

एभ्योऽकः स्यात् घे । प्रवकः द्रवकः स्रवकः सरकः लवकः ।†

१००६ । आशिषि । (आशिषि ७।) ।

जीवतादिति जीवकः । ‡

१००७ । नाम्न्यन्ये तिक् च ।

(नाम्नि ७।, अन्ये १॥, तिक् ।१।, च ।१।) ।

धोराशिषि अन्येऽपि क्तः स्युः, तिक् च, संज्ञायां । देवरातः, रन्तिः । §

---

* काल-व्रीहिभ्यामन्यत्र हातः, (९७५) निपातो ह्यर्थविशेषे इत्युक्तेः । "जिहीते प्राप्नोतीति वा" इति भट्टोजिदीक्षितः । पाणिनिः ३।१।१४८ ।

† साधुकारिणि कर्त्तरीति वक्तव्यं, यतः "समभिहारे" इति पाणिनिना प्रोक्तम् । "साधुकारिण्युपसंख्यानम्" इति वार्त्तिकोक्तिश्च । "समभिहारग्रहणेन साधुकारित्वं लक्ष्यते" इति भट्टोजिदीक्षितः । साधु प्रवते प्रवकः, (५४२) गुणः । एवं साधु द्रवति, स्रवति, सरति, लुनाति । साधुकारिणि किं, प्रोता । पाणिनिः ३।१।१४९ । अत्र वुन् । भाष्यञ्च ।

‡ आशिषि गम्यमाने सर्व्वधातुभ्यो ऽकः स्यात् घे । जीवतादिति (९५६) तातङ् । एवं नन्दकः, वर्द्धक इत्यादि । स्त्रियां जीविका । पाणिनिः ३।१।१५० ।

§ आशिषि संज्ञायाञ्च गम्यमानायां कर्त्तरि वाच्ये कथितादन्येऽपि (उणादयः) क्तप्रत्ययाः स्युः, तिक् च स्यादित्यर्थः । देवाय रायात् देवरातः, कर्त्तरि क्तः । एवं देवाय देयात् देवदत्तः, यज्ञाय देयात् यज्ञदत्तः । एवञ्च वीरो भूयात् वीरभूः, मित्रं भूयात् मित्रभूः, इत्यादौ क्विप् । रमतां रन्तिः, (९७६) तिकि-वर्ज्जनात् न अम्लोपः । (परिशिष्टपत्रं द्रष्टव्यम्) । इदमेव सूत्रं "उणादयो बहुलम्" (पाणिनिः ३।३।१) इति सूत्रस्थानीयम् । पाणिनिः ३।३।१७४ ।

१००८। सति-साती वा। (सति-साती १॥, वा ।१।)।

सन्तिश्च। *

१००९। ढात् षण्। (ढात् ५।, षण् ।१।)।

ढात् परात् धोः षण् स्यात् घे। कुम्भकारः, अघटं घटं करोतीति घटीकारः। †

१०१०। हनचरग-टक। (हन-चर-गः ५।, टक् ।१।)।

ढात् परेभ्यः एभ्यः टक् स्यात् घे। पापघ्नः कुरुचरः सामगः। ‡

१०११। सृकृष्टः। (सृ-कृः ५।, टः १।)।

ढात् पराभ्यामाभ्यां टः स्यात् घे। पुरःसरी, यशस्करी विद्या। भास्करः चपाकरः, कर्म्मकरी दासी। §

---

* सतिश्च सातिश्च तौ। सनोतेराशिषि तिगन्तस्य एतौ वा निपात्यौ। पक्षे सन्तिः, सनुतादिति वाक्ये तिक्, (१०३३) इम् निषेधः, (६७६) अम्लोपाभावः। पाणिनिः ६।४।४५।

† षणो ष इत् ढञ्ज्ञार्थः ण इत् ईवर्थः, अकारस्थितिः। ढादिति निर्व्वर्त्त्यादिकर्म्मण एव, तेन मृदुकार इति न स्यात्। कुम्भं करोतीति कुम्भकारः। यद्यपि नित्यसमासे वाक्यरचना नास्ति, तथापि शिष्यबोधार्थमिति बोध्यम्। (११८३) कृत्तद्धितसमासानामभिधानं नियामकमिति कथनेन नतु सर्व्वत्र षण्। पाणिनिः ३।२।१।

‡ हनश्च चरश्च गाश्च तस्मात्। टकः कित्त्वादगुणः, टित्त्वादीप्, अकारस्थितिः। षणोऽपवादोऽयं। पापं हन्तीति पापघ्नः, टकः कित्त्वात् अगुणत्वे, (१३०) उङ्लोपः, (१८९) हस्थाने घ्नः। कुरून् चरतीति कुरुचरः (कुरुषु चरतीति पाणिनिः)। साम गायतीति सामगः, (६१०) आलोपः। एवं सहचरः अनुचरः इत्यादि वक्तव्यम्। पाणिनिः ३।२।८,१६,५२—५४।

§ पुरोऽग्रं सरतीति, टः, (५४२) गुणः, (२५७) टित्त्वादीप्। यशः करोति, भासं करोति, चपां करोति, कर्म्म करोति, इति वाक्यानि। (१००९) कुम्भकार इत्युदा-

१०१२ । शकृत्स्तम्बात् दृति-नाथात् फले-रजो-मलात् देववातात् कृ-हृ-ग्रहाप इः ।

(शकृत् स्तम्बात् ५।, दृति-नाथात् ५।, फलि-रजस्-मलात् ५।, देव-वातात् ५।, कृ हृ ग्रह आपः ५।, इः १।) ।

एभ्यः परेभ्यः क्रमादेतेभ्य इः स्यात् घे । शकृत्करि वत्सः, स्तम्बकरि व्रीहिः, दृतिहरिः श्वा, नाथहरिः पशुः, फलेग्रहिः रजोग्रहिः मलग्रहिः, देवापिः वातापिः ।*

१०१३ । कुक्ष्यात्मोदराद् भृः खिः ।

(कुक्षि-आत्मन् उदरात् ५।, भृः ५।, खिः १।) ।

एभ्यः परात् भृञः खिः स्यात् घे ।†

१०१४ । खित्यव्याजरुषो मन्स्वौ ह्रीकान्तत्वं त्वेकाजिचः ।

(खिति ७।, अव्याजरुषः ६।, मन्-स्वौ १॥, ह्रीकान्तत्वं १।, तु ।१।, एकाजिचः ६।) ।

इरता ग्रन्थकारेण अभिधानात् क्वचित् षण्, क्वचित् टश्च स्यादिति सूचितं । एवं अभिसर-इत्यादि वक्तव्यम् । पाणिनिः ३।२।१८—२२ ।'

* पृथक् पदकरणं यथासङ्ख्यार्थं । तेन, शकृत्-स्तम्बाभ्यां कृञः, दृति-नाथाभ्यां हृञः, फलेरजोमलेभ्यो ग्रहः, देव-वाताभ्यां आपः, इः स्यादित्यर्थः । शकृत् अव्ययशब्दः तालव्यादि विष्ठावाचकः, शकृत् करोतीति इः, गुणः । स्तम्बं गुच्छं करोतीति स्तम्बकरिः । दृतिं चर्म्म हरतीति, नाथं प्रभुं हरति वहतीति । फलं गृह्णातीति एकारान्तग्रहणात् अधिकरणविवक्षा, अलुक् च । फलग्राहक इत्यर्थः । रजो गृह्णातीति रजोग्रहिः धूलिग्राहको वायुरित्यर्थः । मलं गृह्णातीति मलग्रहिः, हड्डिक इत्यर्थः । देवं आप्नोति देवापि देवयाजकः (देवयाज्ञिक इति क्रमदीश्वरः) । वातमाप्नोति वातापि-रसुरविशेषः । पाणिनिः ३।२।२४—२६ । सर्व्ववर्म्मा क्रमदीश्वरश्च ।

† कुक्षेश्च आत्मनश्च उदरस्य तत्सम्बन्धात् । खिप्रत्ययस्य ख इत् इकारस्थितिः । पाणिनिः ३।२।२६, कालापाः चान्द्राश्च ।

व्यवर्जस्याजन्तस्याग्रस्य च मन् स्यात् खश्च, एकाजिचस्तु द्वीकान्तत्वं स्यात् खिदन्ते धौ परे। कुक्षिम्भरिः आत्मम्भरिः उदरम्भरिः । *

१०१५ । खश्रेजेः । (खश् ।१।, एजेः ५।) ।

ढात् परात् एजयतेः खश् स्यात् घे । जनमेजयः ।†

१०१६ । मन्यात् स्वार्थे । (मन्यात् ५।, स्वार्थे ७) ।

आत्मानं गां मन्यते गांमन्यः, श्रियंमन्या ।‡

१०१७ । मुञ्जकूलास्यपुष्पात् धेटः ।

(मुञ्ज कूल-आस्य-पुष्पात् ५।, धेटः ५।) ।

एभ्यः परात् धेटः खश् स्यात् घे । मुञ्जन्धयः कूलन्धयः आस्यन्धयः पुष्पन्धयः । मुञ्जन्धयी, धेटष्टित्त्वादीप् (२५७) । §

---

* नास्ति व्यं यत्र सोऽव्यः, अव्यश्चासौ अच् चेति अव्याच् । (अच् – अजन्तः) । अव्याच्च अग्रस् च तत्तस्य । द्वी द्वितीया, तस्याः कं (एकवचनं) द्वीकं, द्वीकं अन्तं यस्य स द्वीकान्तः, तस्य भावः द्वीकान्तत्वं । एकाश्चासौ इच् चेति एकाजिच् तस्य । इच् इजन्तः । मनो म इत् अन्त, म-स्थितिः, अकार उच्चारणार्थः । कुक्षिं बिभर्त्ति, खिः, गुणः, कुक्षिशब्दस्य अजन्तत्वात् मन् । आत्मानं बिभर्त्ति, (३१९) कौलुंकि, (११८) विरामे परे नस्य लुपि, (१५) नञा निर्दिष्टमनित्यमिति न्यायात् तदादिविधिनिषेधस्यानित्यत्वे अनेन मन् । एवं उदर बिभर्त्ति उदरम्भरिः । पाणिनिः ६।३।६६,६७,६८ ।

† एजेरिति एज् कम्पे इत्यस्य अन्तस्य ग्रहणं । खशः खशाविती अकारस्थितिः । जनं एजयतीति खश्, (५४१) घे शप् रे इति शप्, (५४२) गुणादिः, (५४३) अकारलोपः, पूर्व्वस्य मन् । पाणिनिः ३।२।२८ ।

‡ ढात् परात् मन्यतेः खश् स्यात् घे स्वार्थे, स्व-निमित्तक-धात्वर्थे इत्यर्थः । गांमन्य इति (७३८) दिवादित्वात् श्यन्, (५४३) अकारलोपः । गामिति एकाजिजन्तत्वात् द्वितीयैकवचनान्तत्वं । एवं श्रियंमन्या (भाष्यमते श्रिमन्या) । पाणिनिः ३।१।८३ ।

§ मुञ्जं (तृणविशेषं) धयतीत्यादि वाक्यं । खिदन्त धातौ परे पूर्व्वस्य मन् ।

१०१८। नाड़ी शुनी स्तन कर मुष्टि पाणि नासिकात् ध्मस्च। (नाड़ी—नासिकात् ५।, ध्मः ५।, च ।१।)।

एभ्यः परात् ध्मो धेटश्च खश् स्यात् घे। नाड़िन्धमः नाड़िन्धयः।*

१०१९। घटी-खारी-वाताद् विध्वरुस्तिला-दसूर्य्योग्राल्ललाटा-न्मित-नख-मानात् ध्मा-तुद-दृश-तप-पचः। (घटी-खारी-वातात् ५।, विधु-अरुस्-तिलात् ५।, असूर्य्य-उग्रात् ५।, ललाटात् ५।, मित-नख-मानात् ५।, ध्मा-तुद-दृश-तप-पच: ५।)।

एभ्यः परेभ्यः क्रमादेतेभ्यः खश् स्यात् घे। घटिन्धमः खारिन्धमः वातन्धमः, विधुन्तुदः अरुन्तुदः तिलन्तुदः, असूर्य्यम्पश्यः उग्रम्पश्यः, ललाटन्तपः, मितम्पचः नखम्पचः द्रोणम्पचः।†

१०२०। कूलादुद्रुजद्वहः।

(कूलात् ५।, उद्-रुज-उद्-वह: ५।)।

धेटधातोष्टित्त्वात (२५७) ङीप्। यत्र धेटधातो-रेकारस्थाने अयादेशः स्यात् तत्रैव टित्त्वादीप् इति वक्तव्यं, तेन धेट-तव्य=धातव्या इत्यादौ न ङीप्। कातन्त्रम्।

* नाड़ी च शुनी च स्तनश्च करश्च मुष्टिश्च पाणिश्च नासिका चेति तस्मात्। नाड़ीं धमतीति खश्, (५९७) धमादेशः, पूर्व्वपदस्य मन् ह्रस्वश्च। एवं नाड़िन्धय इत्यादि। पाणिनिः ३।२।२९,३०,३७, वार्त्तिकं कातन्त्रञ्च।

† पृथक् पदकरणं यथासङ्ख्यार्थं, तेन, घटी-खारी-वातेभ्यः ध्मः, विध्वरुस्तिलेभ्यस्तुदः, असूर्य्योग्राभ्यां दृशः ललाटात् तपः, मित-नख-मान-वाचकेभ्यः पचः, खश् स्यात् घे इत्यर्थः। घटीं धमतीत्यादि वाक्यं (१०१४) घटी-खारी-शब्दयो र्मन् ह्रस्वश्च। खारी परिमाणविशेषः। खरीति च वार्त्तिके, खरी गर्दभी (गर्द्दभीति सिद्धान्तकौमुदी)। अरुः मर्म्म तुदतीति अरुन्तुदः, अरुसो मन्, (२१३) सलोपः। न सूर्य्यं पश्यतीति असूर्य्यम्पश्यः। द्रोणम्पचः इति द्रोणः परिमाणविशेषः। एवं आढकम्पचः इत्यादि। पाणिनिः ३।२।३२—३७, वार्त्तिकञ्च।

कूलात् आभ्यां खश् स्यात् घे। कूलमुद्रुजा नदी, कूलमुद्वहः समुद्रः। *

१०२१। प्रियवशाद् भयर्त्तिमेघात् सर्व्वकूलाभ्रकरीषात् वद-कृ-कषः खः। (प्रिय-वशात् ५।, भय-ऋति-मेघात् ५।, सर्व्व-कूल-अभ्र-करीषात् ५।, वद-कृ-कषः ५।, खः १।)।

एभ्यः परेभ्यः क्रमादेतेभ्यः खः स्यात् घे। प्रियंवदः वशंवदः, भयङ्करः ऋतिङ्करः मेघङ्करः, सर्व्वङ्कषः कूलङ्कषः अभ्रङ्कषः करीषङ्कषः। †

१०२२। क्षेम-प्रिय-मद्रात् कृर्वा।

(क्षेम-प्रिय-मद्रात् ५।, कृः ५।, वा।१।)।

एभ्यः कृञः खो वा स्यात् घे। क्षेमङ्करः प्रियङ्करः मद्रङ्करः। पक्षे क्षेमकारः।‡

१०२३। भावघे त्वाशितात् भुवः।

(भाव-घे ७।, तु।१।, आशितात् ५।, भुवः ५।)।

आशितात् भुवः खः स्यात् भावे घे वा।

---

* उभयत्र उदो ग्रहणं स्पष्टार्थं। कूल-मुद्रुजति, कूल-मुद्वहति इति वाक्यद्वयं। उभयत्र खश्, कूलशब्दस्य मन्। पाणिनिः ३।२।३१।

† पृथक्पदकरणं वदादिभि र्यथासङ्ख्यार्थं, तेन प्रिय-वशाभ्यां वदः, भय-ऋति-मेघेभ्यः कृञः, सर्व्वकूलाभ्रकरीषेभ्यः कषः, खः स्यात्। प्रियं वदतीत्यादि वाक्यानि। सर्व्वत्र पूर्व्वपदस्य मन्। सञ्ज्ञायामपि निन्दाया-मशुभे गमने स्त्रियां, कल्याण-वर्त्मनो-रेव ऋतिरित्यभिधीयते। करीषः शुष्क-गोमयं। पाणिनिः ३।२।३८,४२,४३।

‡ क्षेमं करोतीत्यादि वाक्यानि। पक्षे (१००६) ढात् षण्। पाणिनिः ३।२।४४।

आशितम्भवं वर्त्तते, आशितं भवत्यनेनेति आशितम्भव ओदनः ।*

१०२४ । तृ भृ वृ दॄ जि धृ तप यम दम मद लिह गम सहाजो नाम्नि । (तॄ—भजः ५।, नाम्नि ७।) ।

एभ्यः खः स्यात् संज्ञायां । रथेन तरतीति रथन्तरः, विश्वम्भरः, पतिंवरा, पुरन्दरः, धनञ्जयः, वसुन्धरा, शत्रुन्तपः परन्तपः, वाचंयमः, अरिन्दमः, इरया माद्यतीति इरम्मदो हस्ती, वहंलिहः, भुजङ्गमः (पतङ्गमः प्लवङ्गमः), सर्व्वंसहः, वातमजः । †

१०२५ । शर्द्धंजहोरङ्गमोरग तुरग तुरङ्गम विहग विहङ्गम (भुजग)भुजङ्ग (पतग)पतङ्ग (प्लवग) प्लवङ्गाः । (शर्द्धंजह—प्लवङ्गाः १॥) ।

---

* धे करणे । आशितं तृप्तिः । आशितस्य भवनं आशितम्भवं भावे खः । ख-प्रत्यये परे गुणः पूर्व्वस्य मन् । "आशितो भवत्यनेनाशितम्भवः ओदनः । आशितस्य भवनम् आशितम्भवः" इति तु सिद्धान्तकौमुदी । पाणिनिः ३।२।४५ ।

† तॄ तरे, भृ ञि धृतिपुष्ट्योः, वृ न ञ ग वृतौ, दॄ य गि विदारे, जि जये, धृ ञ धृत्यां, तपौ सन्तापे, औ यमु उपरमे, दमुश इर् शमे, मदी भि र्य जि हर्षे, लिह्न ल स्वादे, औ गम ऌ गत्यां, सह भ ङ शक्तौ, अज गतौ क्षेपणे, इति चतुर्द्दशभ्यो धातुभ्यः नाम्नि वाच्ये खः स्यात् । विश्वं बिभर्त्ति । पतिं वृणोति या सा । पुरं दीर्य्यति (दारयतीति पाणिनिः) पुरन्दरः, एवं भगन्दरः ("भगे च दारेः" इति काशिका) । धनं जयति धनञ्जयः, एवं रिपुञ्जयः । वसूनि धरति (धारयतीति पाणिनिः) । शत्रुं तपति, परं तपति (तापयतीति पाणिनिः, एवं द्विषन्तपः) । वाचां यच्छति, अच मन् आपी ह्रस्वश्च । अरिं दाम्यति । इरा जलं, इरम्मद इत्यत्र मन् ह्रस्वश्च । वहं लेढ़ि वहंलिहः, एवं अभ्रंलिहः ; ग्रन्थकृता तॄभृवृदॄजिधृ इति गुणप्राप्तियोग्यधातूनां मध्ये लिहधातोः सन्निवेशनं न कृत्वा वहंलिह इत्यत्र गुणो न स्यादिति सूचितं । भुजेन वक्रगमनेन गच्छति भुजङ्गमः, एवं पतङ्गमः प्लवङ्गमः । हृदयङ्गमः इति असंज्ञायामपीति वक्तव्यं । सर्व्वं सहते । वातमजतीति वातमजः वातमृगः, संज्ञानुरोधात् न वी-आदेशः (५८६) । पाणिनिः ३।२।३२,३७,३९,४०,४१,४६,४७, ६।३।६९, वार्त्तिकञ्च ।

एते खान्ता निपात्यन्ते। शर्द्धं जहातीति शर्द्धंजहो माषः, उरसा गच्छतीति उरङ्गमः, उरगः, त्वरया गच्छतीति तुरगः तुरङ्गमः, विहायसा गच्छतीति विहगः विहङ्गमः, भुजेन गच्छतीति (भुजगः) भुजङ्गः, पतेन गच्छतीति (पतगः) पतङ्गः, प्लवेन गच्छतीति (प्लवगः) प्लवङ्गः। *

१०२६। नग्नपलितप्रियान्धस्थूलसुभगाढ्यात् कृञः खनट् घे च्व्यर्थे।

(नग्न-आढ्यात् ५।, कृञः ५।, खनट् ।१।, घे ७।, च्व्यर्थे ७।)

एभ्यः परात् कृञः खनट् स्यात् घे च्व्यर्थे। अनग्नो नग्नः क्रियतेऽनेनेति नग्नङ्करणं द्यूतं, पलितङ्करणं, प्रियङ्करणं, अन्धङ्करणः शोकः, स्थूलङ्करणं दधि, सुभगङ्करणं रूपं, आढ्यङ्करणं वित्तं। †

१०२७। भुवो घे खिष्णु-खुकञौ।

(भुवः ५।, घे ७।, खिष्णु-खुकञौ १॥)।

---

* शर्द्धः सशब्दः अपानवायुत्यागः। पत्यतेऽनेनेति पतः पक्षः। प्लवोऽत्र उल्लम्फनं। बहुवचनादन्येऽपि, तेन त्वरया गच्छतीति तुरङ्गः, विहायसा गच्छतीति विहङ्गः इत्यादि। अत्र भुजग-पतग-प्लवग पदानि ड-प्रत्ययेन साध्यान्यपि लिपिकर-प्रमादात् एतत्सूत्रे निवेशितानि। वार्त्तिकानि।

† नग्नश्च पलितश्च प्रियश्च अन्धश्च स्थूलश्च सुभगश्च आढ्यश्च तत्तस्मात्। खनटः खटावितौ, अन-स्थितिः। च्व्यर्थश्च्व्यर्थः (४९५) अभूततद्भावः। घे करणवाच्ये। नग्नङ्करणमित्यादि खित्त्वात् (१०१४) पूर्व्वपदस्य मन्। कृधातोर्गुणः। एवं अपलितं पलितं क्रियतेऽनेनेति पलितङ्करणं वार्द्धक्यं। प्रियङ्करणं सेवनं। च्व्यर्थे खनट्विधानात् च्विप्रत्यये न स्यात्, तेन नग्नीकरोत्यनेन इत्यत्र खनट् न स्यादिति पाणिनीयाः। काशिकामते अनट् अपि न स्यात्, भाष्यमते तु स्यादेव। पाणिनि ३।२ ५६।

नग्नादिभ्यः परात् भुवस्त्वार्थे एतौ वे स्तः। नग्नभविष्णुः नग्नभावुकः। *

१०२८। ढात् भज-वह-सहो विण्।

(ढात् ५।, भज-वह-सहः ५।, विण् ।१।)।

ढात् परेभ्यः एभ्यो विण् स्यात्। सुखभाक् प्रष्ठवाट् तुराषाट्।†

१०२९। अनडुच्छ्वेतवाहादिः। (१।)।

एते विणन्ता निपात्यन्ते। अनो वहतीति अनड्वान् वृषः। श्वेतैरुह्यते इति श्वेतवाः इन्द्रः। अवयजतीति अवयाः, उक्थानि शंसतीति उक्थशाः यजमानः। पुरोडाः हविः, पुरोडाशः। ‡

१०३०। क्रम गम खन सन जनो विट्।

(क्रम—जनः ५।, विट् ।१।)।

---

* क्रिणौ. ख इत्, इष्णु-स्थितिः। खुकञः खञावितौ, उक-स्थितिः। अत्रापि ह्रिप्रत्यये न स्यात्। अनग्नो नग्नो भवतीति नग्नम्भविष्णुः, भूधातो गुणः, खित्वात् नग्न-शब्दस्य मन्। एवं नग्नम्भावुकः ञित्वात् वृद्धिः। एवं पलितम्भविष्णुः पलितम्भावुकः इत्यादि। पाणिनिः ३।२।५७।

† विण् इत्यस्य इकार उच्चारणार्थः, ण इत् (५७७) वृद्ध्यर्थः। अवशिष्ट-वकारस्य (४९६) त्यो वमात्र इति लोपः, सुतरां विणः सर्व्वाभावः। सुखं भजतीति सुखभाक्, विलासी, (२११) कुङ्। प्रष्ठं अग्रगं वहतीति प्रष्ठवाट् अश्वः, तुरां वेगं सहते इति तुराषाट् इन्द्रः, उभयत्र (१७५) हस्य ढ, तुराषाडिति (१११) षत्वं। पाणिनिः ३।२। ६२—६४।

‡ श्वेतवाह आदि र्यस्य सः। अनड्वानिति (१८१) आन्। श्वेतवाः इति कर्त्तुः परात् वहः कर्म्मणि वाच्ये विण्। पुरः आदौ दाश्यते दीयते इति पुरोडाः, एतेषु (१८४) डसङ्, (१८५) दीर्घः। पुरोडाश इति अकारान्तोऽपि निपात्यते। पाणिनिः ३।२।७१,७२।

एभ्यो विट् स्यात् घे । *

१०३१ । विड्वनो ङा । (विट्-वनोः ७॥, ङा ।१।) ।

धोरन्त्यस्य ङा स्यात् विटि वनि च । उदधिक्राः, अग्रेगाः, विसखाः, गोषाः, अब्जाः । †

१०३२ । त्रासुसिस् मन् क्वनिप् वनिप् विच् क्विपः । (१॥) ।

धोरेते स्युः के भावे च । नीयतेऽनेनेति नेत्रं दंष्ट्रा नद्री योत्रं, उरुव्यचाः नृचक्षाः रजः, चक्षुः, सर्पिः, सुष्ठु ददातीति सुदामा गन्मा । ‡

---

* विटः इटावितौ, (४९६) वमात्रस्यापि लोपः, सुतरां विटः सर्व्वाभावः । पाणिनिः ३।२।६७ ।

† विट्-साहचर्य्यात् वन् इति गुणी ग्राह्यः, तेन न क्वनिपः प्रसङ्गः । ङा इत्यस्य ङ इत् अन्त्यस्य स्थाने, अत आह धोरन्त्यस्येति । उदधिं क्रामतीति उदधिक्राः, एवं अग्रे गच्छति, विसं (मृणालं) खनति, गां सनोति (ददाति), अप्सु जायते इति वाक्यानि । सर्व्वत्र पूर्व्वेण विट्, अनेन ङा, आकारान्ताः शब्दाः । गोषा इति सन धातोः सस्य (५७०) कृतत्वात् (१११) षत्वं । उदाहरणज्ञापकात् अमन्तानामेव ङा, नान्यस्य । पाणिनिः ६।४।४१ ।

‡ त्रश्च अस् च उस् च इस् च मन् च क्वनिप् च वनिप् च विच् च क्विप् च ते । क्वनिपः क इ प इतः, वनिपः इपावितौ, उभयत्र वन्-स्थितिः । विच्-क्विपोः सर्व्वाभावः । धोरिति सामान्येनोक्तावपि प्रयोगानुसारात् ज्ञेयं । दश्यतेऽनयेति दंष्ट्रा दन्तः, (१५४) षङ् । नह्यते ऽनयेति नद्री रज्जुः (२३७) हस्य धङ्, (५७५) तस्य ध, (६४) पूर्व्वधस्य द । उभयत्र अभिधानात् स्त्रीत्वं, नदादित्वादीप् । यूयतेऽनेनेति योत्रं । एवं युज्यते ऽनेनेति योक्त्रं, दा लूनौ दात्रं, पा पाने पात्रं, स्तु स्तोत्रं, मिह मेढ्रं, पत पत्त्रं, शस शस्त्रं, अस अस्त्रं, भस भस्त्रा इत्यादि । उरु महान्तं विचति उरुव्यचाः, (७५६) असवर्णनात् न ञिः । नरं चष्टे नृचक्षाः, (७०६) अस्-

१०३३ । ह्वन्ते नेम् । (ह्व-न-तेः ६।, न ।१।, इम ।१।) ।

क्तौ ह्वस्य नस्य तेश्च इम् न स्यात् । सशर्म्मा, सुपीवा प्रातरित्वा सुत्वा, भूरिदावा वारिजावा, सोमपाः रेट् रीट् क्रुङ्, युङ् प्रत्यङ् अन्नद्यूः मित्रशीः आशीः गीः बहुभ्रट् घृतस्पृक् शस्यात् क्रव्यात् । *

१०३४ । छादे स्त्रमन्क्विसघे स्वः ।

(छादेः ६।, त्र-मन्-क्वि इस् घे ७।, स्वः १।) ।

छादयतेः स्वः स्यात् त्रे मनि क्वाविसि घे च । छत्त्रं, छद्म, तनुच्छत्, छदिः, उरश्छदः । †

वर्जनात् न क्मा-ष्यादेशः । रज्यतेऽनेनेति रजः, (६६०) न-लोपः । एवं विधतीति वेधाः । चष्टे (पश्यति) अनेन चक्षुः, (७०६) उसवर्जनात् न कसा-ख्यादेशः । एवं धन रवे धनतीति धनुः । सर्पतीति सर्पिः । एवं हूयते यत्तत् हविः । गच्छतीति गन्मा (२०२) मस्य न । पाणिनिः ३।२।६१, ७३—७७, ८७—९६, उणादिश्च ।

* ह्व इति वर्ग्य बकारान्तः प्रत्याहारः । सु-शृ-मन्, अनेन इमनिषेधः, गुणः । सुपिबतीति सुपीवा, सु पा-क्वनिप् कित्त्वादगुणे, (६१२) ङी । प्रातरेति प्रातरित्वा, सुनोतीति सुत्वा, उभयत्र (९८२) तन् । भूरि ददातीत्यत्र वनिप् (१६४,११८) भूरिदावा, वारिणि जायते वारिजावा, इत्यत्र वनिप्, (१०३१) ङा । सोमं पिबतीति सोमपाः, विच्, विचः च इत् प्राचीनानुवादार्थः न त्वव्ययार्थः । (४९६) वमान्त-लोपः । रेषति रीषति रेट् रीट्, विच्, गुणः । क्रुञ्चतीति विच् क्रुङ् । युनक्तीति युङ्, युनज-क्विप्, (५६७) न-लोपः, युज्शब्दः, सिः, (२१०) नुण् । प्रत्यञ्चतीति क्विप् (५६८) पूजार्थस्य अनुचः न-लोपाभावे प्रत्यङ्, गत्यर्थस्य च नलोपेऽपि, प्रत्यच्शब्दस्य (१९२) नुण् कृते प्रत्यङ् । अन्नैर्दीव्यति अन्नद्यूः, (८१४) ऊट् । मित्रं शास्ति मित्रशीः, आशास्ते आशीः, उभयत्र (७०५) उङः स्थाने इन, (२२७,२२८) रङ्, दीर्घः । (७०५) क्वौ त्वाशासश्चेति कथनात्, अन्यत्र प्रशास्तीति प्रशाः । गृणातीति गीः, (६२८) इर् । बहु भृज्जतीति बहुभ्रट्, (६६१) जिः । घृतं स्पृशतीति घृतस्पृक् । शस्यं अत्ति, क्रव्यं (मांसं) अत्ति, शस्यात् क्रव्यात् । पाणिनिः ७।२।८,९ ।

† छद कि संवृतौ । छादयतेऽनेनेति छत्त्रं, (१०३३) इमनिषेधे, (६४१) जे-

१०३५। दृहज्जुह्वाक्प्राट्श्रीस्रुद्रुज्वायतस्तुकटप्रुपरिव्राट्दिद्युज्जगत्दृषक्स्रगुष्णिहः। (दृहत्—उष्णिहः १॥)।

एते क्विबन्ता निपात्यन्ते। दीर्य्यतीति दृहत्, जुहोत्यनयेति जुहूः, वक्त्यनयेति वाक्, पृच्छतीति प्राट्, श्रयत्येनां श्रीः, स्रवतीति स्रुः, द्रवतीति द्रुः, जवतीति जूः, आयतं स्तौतीति आयतस्तूः, कटं प्रवते कटप्रूः, परिव्रजतीति परिव्राट्, द्योतते इति दिद्युत्, गच्छतीति जगत्, धृष्णोतीति दृषक्, सृज्यते इति स्रक्, ऊर्द्धं स्निह्यतीति उष्णिक्।*

१०३६। जि घोऽन्त्यः। (जिः १।, घः १।, अन्त्यः १।)।

अन्त्यो जि घः स्यात्। मित्रं ह्वयतीति मित्रहूः।†

१०३७। वेध्याप्यां क्वौ। (वे-ध्या-आप्यां ६॥, क्वौ ७।)।

ऊः धीः आपीः। ध्याप्योरतएव जिः।‡

लोपः, अनेन ह्रस्वः, (६४) दस्य त। छद्म इति मन्, ह्रस्वश्च। तनुं छादयतीति, तनुच्छत् क्विपि ह्रस्वः। छाद्यतेऽनेनेति छदिः, इसि ह्रस्वः। घ-प्रत्यये परे ह्रस्वविधानात् छादयतेः कर्त्तरि नाम्नि घ-प्रत्ययो वक्तव्यः, (१००७), घ इत् अकारस्थितिः। तेन उरश्छादयतीति उरश्छदः। एवं प्रच्छदः परिच्छदः दन्तच्छदः इत्यादि। पाणिनिः ६।४।९६,९७। एतन्मते "अद्व्युपसर्गस्य"। यथा समुपच्छादः।

* "जुहोतेर्ह्वयतेर्वा जुहूः। दृणातेर्दीर्य्यतेर्वा दृहत्" इति भाष्यम्। पाणिनिः ३।२।५९,१७७,१७८, वार्त्तिकपञ्चकम्, उणादिश्च।

† अन्त्य इति क्वत्प्रत्ययाव्यवहितपूर्ववर्त्ती। मित्रहूरिति क्विप्, (९९१) जिः, दीर्घः। एवं हूतः हूतवान्, हूतिः, हूत्वा। ज्या—जीनः, श्वि—शूनः। अन्त्यः किं, इष्टः उष्टः पृष्टः। वार्त्तिकं, भाष्यञ्च।

‡ एषां जे घः स्यात् क्वौ। वे जे सूतौ, वयतीति ऊः, क्विपि (९९१) जिः,

१०३८। अमुङो झस्यणौ चातिकि।

(अमुङ: ६।, झसि ७।, अणौ ७।, च।१।, अतिकि ७।)।

अमन्तस्य उङो घ: स्यात् अणौ झसे क्कौ च, न तु तिकि। प्रशान्।*

१०३९। स्रिवाव मव ज्वर त्वरां वुङङा ऊमे च।

(स्रिव-अव-मव-ज्वर-त्वर: ६।, व्।१।, ऊट्।१।, उङा ३।, अमे ७।, च।१।)।

एषां व उङा सह ऊट् स्यात् क्कौ झसि अणौ अमे च। स्रू: ऊ: मू: जू: तू:।†

१०४०। रात्च्छ्वो लोपः। (रात् ५।, छ्वो: ६॥, लोप:।१।)

रात् परयो-श्छकार-वकारयो लोपः स्यात् क्कौ झस्यणौ अमे च। मुर्च्छा मू:, धुर्व्वी धू:।‡

दीर्घ.। पूर्व्वसूत्रेण सिद्धेऽपि नियमोऽयं, अस्य जे: क्कावेव दीर्घ:, नान्यत्र, तेन उत: उत्वा इत्यादि। ध्यायत्यनया धी:, ("ध्यायतेर्दधातेर्वा धी." इति भाष्यम), आप्यायते इति आपी:; ध्यै प्यै एतयो र्जेरसम्भवेऽपि, जे र्दीर्घविधानादेव क्कौ जि र्वक्तव्य:। वार्त्तिकं भाष्यञ्च।

* अम् अमन्तो धातु:, तस्य उङ् तस्य। प्रशाम्यतीति प्रशान्, प्रशम-क्किप्, अनेन उङो दीर्घ:, (२०२) मस्य न। अणौ झसे यथा, शान्त: शान्ति: शान्त्वा इत्यादि। हत: हति: हत्वा इत्यादौ तु (६७६) अम् लोपे अमन्तत्वाभावात् न दीर्घ:। अतिकीति किं, रन्ति: तन्ति:। पाणिनि: ६।४।१५।

† स्रिव्यु शोषे गतौ, स्रीव्यतीति स्रू:। अव रक्षादौ, अवतीति ऊ:। मव बन्धे, मवतीति मू.। प्रथमाद्विवचनादौ, (१३५) उव, स्रुवौ. उवौ, मुवौ इत्यादि। ज्वर म रोगे, ज्वरतीति जू:, ("ज्वरतेर्जीर्य्यतेर्वा जृ:" इति भाष्यम्), ञि त्वरा अङ् स्वरे, त्वरते इति तू:। अणौ झसे—स्रूति: ऊति: मूति: जूर्त्ति: तूर्त्ति:। अमे च, स्रिव-मन् स्रोमा, अव-मन् ओम् इत्यादि। पाणिनि: ६।४।२०।

‡ मुर्च्छा मोह उच्छ्रये, धुर्व्वी हिंसे, उभौ ऋस्ववन्तौ। क्किपि अनेन छ-व-लोपे, मुर्, धुर् शब्दौ, तत: प्रथमैकवचने, (२२८) दीर्घ:। अणौ झसे च मूर्त्त: धूर्त्त: इत्यादि।

१०४१। आदूटो व्रिः। (आत् ५।, ऊटः ६।, व्रिः १।)।

अवर्णात् परस्य ऊटो व्रिः स्यात्। जनान् अवतीति जनौः।*

१०४२। यम मन तन गमोऽन्तलोपः क्वौ।

(यम-मन-तन-गमः ६।, अन्तलोपः १।, क्वौ ७।)।

एषामन्तस्य लोपः स्यात् क्वौ। संयत् परिमत् परीतत् संगत्।†

१०४३। स्व-विष्वग्-देवस्य टेरद्रिञ्चौ क्वौ।

(स्व-विष्वच्-देवस्य ६।, टेः ६।, अद्रि ।१।, अञ्चौ ७।, क्वौ ७।)।

स्वे विष्वचो देवस्य च टेरद्रिः स्यात् क्विबन्ते अञ्चतौ। सर्व्वानञ्चतीति सर्व्वद्र्यङ्, विष्वद्र्यङ्, देवद्र्यङ्।‡

अत्र रेफसाहचर्य्यात् वकारो दन्त्यएव, तेन धर्व गतौ इत्यादौ वर्ग्यवकारे न प्रसङ्गः। पाणिनिः ६।४।२१।

* जनौरिति, जनान् इति उपपदेन अव-धातोः समासे, ततः क्विप्, (१०३९) ऊट्, जन-ऊ, अनेन ऊ इत्यस्य वृद्धिः औ, ततः सन्धिः। यत्रादौ क्विप् ततः समासस्तत्र, जनस्य ऊः जनोरिति, एवं तत्र ऊः तवोरित्यादि। एकपदे तु अव-धातोः क्विप्, (८१४)वस्य ऊट्, अनेन वृद्धिः, औरित्यादि। पाणिनिः ६।१।८९।

† संयच्छति, परिमन्यते, परितनोति, सङ्गच्छते—इति वाक्यानि। सर्व्वत्र क्विपि, अन्त्याक्षरलोपे, (९८२) ह्रस्वस्य तन्। परीतदिति दीर्घनिर्द्देशात् क्विबन्ते धातौ परे क्वचिदुपसर्गस्य दीर्घो भवतीति सूचितं, "उपसर्गस्य दीर्घत्वं क्विप्घञादौ क्वचिद्भवेत्" तेन, विरोहति वीरुत्, उपनह्यति उपानत्, उपवर्त्तते उपावृत्, प्रवर्षति प्रावृट् (मतान्तरे) इत्यादि। पाणिनिः ६।४।४०, वार्त्तिकञ्च। परिमत्स्थाने "सुमत्" इति सिद्धान्तकौमुदी।

‡ स्वञ्च विष्वक् च देवश्चेति तस्य। विष्वगिति मूर्द्धन्यमध्यं चान्तमव्ययं। विष्वक् समन्तात् अञ्चति विष्वद्र्यङ्, देवानञ्चति देवद्र्यङ्। सर्व्वत्र टेः स्थाने अद्रि-आदेशः। एतेषु पूजार्थस्य (५९८) नलोपनिषेधे सर्व्वद्र्यञ्च् देवद्र्यञ्च् शब्दौ, गत्यर्थस्य तु (५९७) नलोपे विष्वद्र्यच् शब्दः, ततः सिः, (१९२) लुक्। पाणिनिः ६।३।९२।

१०४४। अमुद्र्यङ् अमुमुयङ् अदद्र्यङ् अद-मुयङ्। (१॥)।

अमुमञ्चतीत्यर्थे एते निपात्यन्ते। *

१०४५। सह-सन्तिरः सध्रि-समि-तिरि।

(सह-सम्-तिरः।६।, सध्रि-समि-तिरि।१।)।

एषां क्रमादेते स्युः क्विबन्तेऽञ्चतौ। सध्र्यङ् सम्यङ् तिर्य्यङ्।†

१०४६। वीरुहो धङ् क्वौ।

(वीरुहः ६।, धङ्।१।, क्वौ ७)।

वीरुत्। ‡

१०४७। त्यदादि-भवत्-समानान्योपमानात् दृशष्टक्-सक्-क्विपो ढे।

(त्यदादि—उपमानात् ५।, दृशः ५।, टक्-सक्-क्विपः १॥, ढे ७।)।

त्यदादेर्भवतः समानादन्यस्माच्च उपमानात् दृश एते स्युः ढे। §

१०४८। खेङी। (खेः ६।, ङी।१।)।

---

* पाणिनिः ८।२।८०।

† सह अञ्चति, सम् अञ्चति, तिरः अञ्चति, इति वाक्यानि। पाणिनिः ६।३।९३-९५।

‡ विपूर्व्वस्य रुहो धङ् स्यात् क्वौ। ङ इत् अन्त्यस्य स्थाने। विरोहतीति वीरुत्। वेर्दीर्घस्य वीजं (१०४२) सूत्रस्य टीकायां द्रष्टव्यं। पाणिनिमते विपूर्व्वकात् रुधधातोः क्विपि वीरुध् इति सिद्धम्।

§ त्यद् आदि र्यस्य स त्यदादिः, त्यदादिश्च भवांश्च समानश्च अन्यश्च तत्, तच्च तत् उपमानञ्चेति तस्मात्। अन्य इत्येव शब्दः। उपमानभूतेभ्य एभ्यः परात् दृशः टक् सक् क्विपः स्युः कर्म्मणि वाच्ये इत्यर्थः। टकः ट-काविती अकारस्थितिः, सकः क इत् सस्थितिः, क्विपः सर्व्वाभावः। पाणिनिः ३।२।६०, वार्त्तिकद्वयञ्च।

स्ते ङा स्यात् टगाद्यन्ते दृशि। स इव दृश्यते तादृशः तादृक्षः तादृक्। भवादृशः। *

१०४९। समानेदंकिमदः सेक्यमु।

(समान-इदम्-किम्-अदः ।६।।।, स-ई-की-अमु ।१।।।)।

एषां स्थाने स ई की अमू एते क्रमात् स्युः टगाद्यन्ते दृशि। सदृशः ईदृशः कीदृशः अमूदृशः। अन्यादृशः। †

इति त्यदादि-पादः।

३य पादः—क्तादिः।

१०५०। क्त-क्तवतु भूते ढभावे घे।

(क्त-क्तवतु ।१।।, भूते ।७।, ढभावे ।७।, घे ।७।)।

धोरतीतेऽर्थे ढभावे क्तो घे क्तवतुः स्यात्, उकावितौ। सुतस्त्वया विष्णुः, स्नातं मया, विष्णुर्विश्वं कृतवान्। *

---

* स्ते: सर्व्वादिगणस्य स्थाने इत्यर्थः। ङा इत्यस्य ङ इत् अन्त्यस्य स्थाने। तादृश-इति तद्-दृश-टक्, किच्चात् गुणाभावः, तद् स्थाने ङा। टित्त्वात् (२५७) ईपि तादृशी इति च। तादृक्ष इति सक्, (१५४) षङ्, (६०२) षस्य क, (१११) कवर्गात् षत्वं। स्त्रियान्तु तादृक्षा। क्विपि तादृश् शब्दः, (२११) कुङ्। भवानिव दृश्यतेऽसौ, टक् भवादृशः, स्त्रियां भवादृशी। एवं भवादृक्षः, भवादृक् इति। पाणिनिः ६।३।९१।

† समान इव दृश्यते, अयमिव दृश्यते, क इव दृश्यते, असाविव दृश्यते, अन्य इव दृश्यते—इति क्रमेण वाक्यानि। सर्व्वत्र टक्। एवं सदृक्षः सदृक् इत्यादि। अन्यादृश-इति पूर्व्वेण ङा। पाणिनिः ६।३।८९,९०। ८।२।८०।

---

* सुत इति षुञ् स सुतौ, कर्म्मणि क्तः (६०६) वेमत्वेऽपि, (१०५३) इमौ

१०५१ । क्षेर्घोऽढे भावदैन्याक्रोशे तु वा ।

(क्षेः ६।, घः १।, अढे ७।, भावदैन्याक्रोशे ७।, तु ।१।, वा ।१।) ।

क्षे घः स्यात् न तु ढे, भाव-दैन्याक्रोशे तु वा, तयोः परयोः ।*

१०५२ । सूल्वाद्योदिद्द्र-क्षी-यल्स्यातो न तोऽप्-मुर्च्छ-ख्या-ध्या-मदो दस्य ।†

(सू-लू-आदि-ओत्-इत्-द-र-क्षी-यल्-स्य-आतः ५।, न ।१।, तः ६।, अप्—मदः ५।, दः ६।, च ।१।) ।

स्वादे ल्वादे ओकारेतो दान्तात् रेफात् क्षीशब्दात् यलस्ययुक्ता-कारान्तात् परयोस्तयोस्तस्य नः स्यात्, पूर्व्वस्य च दस्य नः, न तु प्रादिभ्यः । क्षीणः क्षीणवान् । अढे किं, क्षितः कामो मया । ‡

१०५३ । वृदुग्विज्ञणोः क्तितो नेम् ।

(वृ-ऋत्-उ-विज्-ऊर्णोः ५।, क्तितः ६।, न ।१।, इम् ।१।) ।

निषेधे, क्तित्वात् गुणाभावः । ख्या ल शोधने, भावे क्तः, स्नातं । डु क्र ञ द करणे क्तवतुः, कित्त्वात् गुणाभावे कृतवत्शब्दः, प्रथमैकवचने, (१९२) उदित्त्वात् नुण्, (१८५) दीर्घः, (१९३) स्यान्तलोपः । पाणिनिः १।१।२६, ३।२।१०२ ।

* भावस्य दैन्यस्य आक्रोशस्य तत्तस्मिन् । भावो धात्वर्थः, दैन्यं दीनता, आक्रोशः क्रोधोक्तिः । क्षेरिति अविशेषात् सर्व्वगणपठित-क्षिधातो ग्रहणं । पाणिनिः ६।४।६०,६१।

† सूश्च लूश्च सूल्वौ, तौ आदौ ययोस्तौ सूल्वादौ । ओत् इत् यस्य स ओदित् । यलः यलान्तः, स चासौ स्यश्चेति यलस्यः, तेन युक्त आत् यलस्यात् । ततः सूल्वादौ च ओदिच्च दश्च रश्च क्षीश्च यलस्याच्चेति तस्मात् । पश्च मुर्च्छश्च ख्याश्च ध्याश्च मद चेति, न पमुर्च्छख्याध्यामद तस्मात् । क्षी इति कृतदीर्घस्य ग्रहणं । स्वादयः—सू दू दी डी धी मी री ली व्री । ल्वादयः पूभिन्नाः प्वादयः,४१० पृष्ठे द्रष्टव्याः। पाणिनिः८।२।४२-४६,५७। एतन्मते स्वादयः ओदितः ।

‡ क्षीण इति अकर्म्मकात् वक्ष्यमाणेन (१०९३) कर्त्तरि क्ते, (१०५१) पूर्व्वेण दीर्घे, अनेन तस्य न, (१०७) णत्वं । एवं क्तवतु, क्षीणवान् । मया कामः क्षितः हिंसित-इत्यर्थः । अत्र कर्म्मकत्वात् (१०५१) क्षेर्घ इति न दीर्घः, दीर्घाभावाच्च न क्तस्य न । भाव वाच्ये तु क्षीणं क्षितमिति विकल्पेन दीर्घः ।

वृञो वृङ ऋदन्ता-दुवर्णान्तात् श्रिञ ऊर्णोश्च क्तित इम् न स्यात् । *

सूनः सूनवान् दीनः, लूनः जीनः, रुग्णः भुग्नः प्रहीणः, भिन्नः निर्व्विस्नः, प्यानः ग्लानः भ्राणः । प्रादेस्तु—पूर्त्तः मूर्त्तः ख्यातः ध्यातः मत्तः । †

वृतः शीर्णः भूतः श्रितः ऊर्णुतः । ‡

१०५४ । दिव्यञ्चश्योऽजिगीषाजास्पर्शे न तस्तयोः ।

(दिवि-अञ्च-श्य:५।, अजिगीषा-अज-अस्पर्शे७।, न।१।, त ६।, तयोः ६॥) ।

---

* वृश्च ऋच्च उश्च श्रिञश्च ऊर्णुश्च तत्तस्मात् । क इत् यस्य स कित् तस्य । वृ-ऋतोः (७४७) स्वाद्यृद्दुरिति वेमत्वेन, श्रिधातोः (८१०) असुजश्रीति वेमत्वेन च, (१०७१) नेम् डीश्वीत्यादिना क्त-क्तवत्वोरिम्निषेधे, क्ति-आदौनाञ्च (१०३३) ऋवृत्तेरित्यनेन इम्-निषधे सिद्धेऽपि इहोपादानं क्ताच इम् निषेधार्थं । उवर्णान्तत्वेन प्राप्तावपि ऊर्णोः पुनर्ग्रहणं, असुजश्रीत्यनेन विकल्पितेमः ऊर्णुधातोः नेम् डीश्वीत्यत्र अनेकाचवर्जनात् इम्प्रसक्तौ, पुनर्निषेधार्थं । अतएवात्र उवर्णान्त एकाच एव बोध्यः । पाणिनिः ७।२।११, वार्त्तिकञ्च ।

† स्वादिमाह सून इत्यादि—सू ग्री ङ सूतौ कर्म्मणि क्तः, अनेन इम्-निषेधे, पूर्व्वेण तस्य न । एवं क्तवतुः सूनवान् । ओ दी ङ य चये, दीनः स्वादित्वात् तस्यान न । ल्वादिमाह—लू ञ गि छिदि लून, ज्या गि जरायां जीनः, (६६१) जिः, (१०३६) दीर्घः । ओदितमाह—रुजो ग्रौ भङ्गे रुग्णः (१०७) णत्वं । भुजो ग्रौ वक्रणे भुग्नः, अन्तरङ्गत्वादादौ (२११) चुडिति कुङ्, पश्चात् तस्यान न । ओ हा क त्यागे प्रहीणः, (६१२) ईः, (८६८) णत्वं । दान्तमाह—इर् भिदा स्नेहे भिन्नः, (१०७२) इम्-निषेधः । विदो ङ भावे निर्व्विन्नः, अध्ययने जड इत्यर्थः, अत्र णत्वं वक्तव्यं । रान्तस्य उदाहरणं न दत्तं, गुर—गूर्णः, चुर—चूर्णः इत्यादि ऊह्यं । यलयुक्तादन्तमाह—प्यै —प्यानः (६०८) ऐ स्थाने आ, ग्लै—ग्लानः, घ्रा—घ्राणः । पॄ—पूर्त्तः, (६२८) उर्, (२२८) दीर्घः । मुर्छ —मूर्त्तः, (१०७२) इम् निषेधः, (१०४०) छ-लोपः, (२२८) दीर्घः । ख्या—ख्यातः, ध्यै—ध्यातः । मद—मत्तः ।

‡ वृ क्त वृतः, (५५४) इम्प्राप्तौ अनेन निषिद्धः । शॄ—शीर्णः, इत्यादि ।

दिवेरजिगीषायां अञ्चतेरजे श्यायतेरस्पर्शे तयोस्तस्य नः स्यात्। आद्यूनः समक्नः। *

१०५५। घनस्पर्शे श्यो जिः।

(घन-स्पर्शे ७।, श्यः ६।, जिः १।)।

घने स्पर्शे चार्थे श्यो जिः स्यात् तयोः। शीनं घृतं। जिगीषादौ तु, द्यूतं, उदक्तमुदकं कूपात्, शीतं जलं। घनस्पर्शे किं, संश्यानो वृश्चिकः शीतात् सङ्कुचित इत्यर्थः। †

१०५६। प्रतेः। (प्रतेः ५।)।

प्रतिपूर्व्वस्य श्यो जिः स्यात्तयोः। प्रतिशीनः। ‡

१०५७। अभ्यवाद्वा। (अभि-अवात् ५।, वा ।१।)।

अभ्यवात् परस्य श्यो जिः स्याद्वा तयोः। अभिशीनः अभिश्यानः, अवशीनः अवश्यानः। §

---

* दिविश्च अञ्चश्च श्याश्च तत्तस्मात्। न जिगीषा अजिगीषा। जं अपादानं, न जं अजं। न स्पर्शो ऽस्पर्शः। अजिगीषा च अजश्च अस्पर्शश्च तत्तस्मिन्। आ-दिव-क्त, (८१४) वस्थाने ऊट्, अनेन तस्थाने न। आद्यूनः स्या-दौदरिक इत्यमरः। सम्-अन्च-क्त, (५६७) नलोपः, (२११) कुङ्, तस्थाने न, समक्नः सङ्गत इत्यर्थः। "समक्नौ शकुनेः पादौ" इति पाणिनिटीका। उभयत्र (१०७१) इम्-निषेधः। पाणिनिः ८।२।४७—४९।

† घने द्रवद्रव्यस्य घनीभावे इत्यर्थः। शीनमिति श्यै ङ गतौ, क्तः, घनेऽर्थे अनेन जिः, (१०३६) दीर्घः, पूर्व्वेण तस्थाने न। पूर्व्वस्य प्रत्युदाहरणमाह—द्यूतं, दिव-भावे क्तः, जिगीषार्थे न त-स्थाने न। उदक्तं उद्गतमित्यर्थः, कूपादिति अपादानप्रयोगात् न त-स्थाने न। शीतमिति श्यै-क्तः, स्पर्शार्थे अनेन जिः, पूर्व्वेण न त-स्थाने न। संश्यान इति घनस्पर्शाभावे न जिः, पूर्व्वेण अस्पर्शार्थे त स्थाने न। पाणिनिः ६।१।२४।

‡ पृथक्योगात् घनस्पर्शयोर्नानुवृत्तिः। पाणिनिः ६।१।२५।

§ "व्यवस्थितविभाषेयं, तेनेह न समवश्यातः" इति सिद्धान्तकौमुदी। पाणिनिः ६।१।२६।

१०५८। षिञो ढघे न तो ग्रासे।

(षिञः ५।, ढघे ७।, न ।१।, तः ६।, ग्रासे ७।)।

षिञः परस्य तयोस्तस्य नः स्यात् ढघे, ग्रासे वाच्ये। सिनो ग्रासः स्वयमेव।*

१०५९। पूञो नाशे। (पूञः ५।, नाशे ७।)।

पूनो नष्टः, अन्यत्र पूतः। †

१०६०। दुग्वो घश्च। (दु-ग्वोः ६॥, घः १।, च ।१।)।

आभ्यां तयोस्तस्य नः स्यात् तयो घश्च। दूनः गूनः। ‡

१०६१। व्रश्चेः कङ् च। (व्रश्चेः ६।, कङ् ।१।, च ।१।)।

व्रश्चेस्तयो स्तस्य नः स्यात्, कङ् च। वृक्णः। §

---

* षिञ इति षोपदेश-निर्देशः। (५६९) षस्य स। षि ञ न बन्धे. कर्म्मकर्त्तरि क्तः, देवदत्तेन सीयमानो ग्रासः स्वयमेव सिनः बद्ध इत्यर्थः, ग्रासः कवलः। ढघे किं. सितो ग्रामी देवदत्तेन। ग्रासे किं सितश्चौरः स्वयमेव। वा-ह्यमध्यवर्त्तित्वा-देवदादीनां चतुर्णां नित्यता। "सिनोतेर्ग्रासकर्म्मकर्त्तृकस्य" इति वार्त्तिकम्।

† धातूनामनेकार्थत्वात्, नाशार्थ-पूञ-धातो-स्तयोस्तस्य नः स्यात्। "पूञो विनाशे" इति वार्त्तिकम्।

‡ दु गतौ (दु टु्ऽनुतापे इत्यस्य तु न, तत्र दुत इति पदं), गु ङ ध्वनौ, गु भि तु विट्सृगौ, इत्येतेषां ग्रहणं। दू गू इति दीर्घान्ताभ्यां क्तप्रत्ययेन पदसिद्धावपि एतत्-सूत्रकरणं ह्रस्वान्तयोर्दुग्वोः प्रयोगनिषेधार्थं। "दुग्वोर्दीर्घश्च" इति वार्त्तिकम्।

§ (१५४) ग्रह्ज्येति षङ्प्राप्तिवारणार्थमिह कङ्विधानं। ङ इत् अन्त्यस्य स्थाने। वृक्ण इति, व्रश्चू श छेदे, क्त, (१०७१) नेम् डीश्वीति इमो निषेधे. (६६१) जिः, अनेन क्तस्थाने न, चस्य क, निमित्तस्यापाये नैमित्तिकस्याप्यपाय इति न्यायेन तालव्यशस्य दन्त्यत्वे, (२१३) स्यादिः सो लोपः, (१०७) णत्वं। पाणिनि. ८।२।३६, वार्त्तिकञ्च।

१०६२ । ह्रीघ्राघ्रोन्दनुदविन्दो वा ।

(ह्री—विन्दः ५। वा ।१।) ।

एभ्यस्तयो स्तस्य नः स्याद्वा । ह्रीणः ह्रीतः, घ्राणः घ्रातः, त्राणः त्रातः, उन्नः उत्तः, नुन्नः नुत्तः, विन्नः वित्तः । *

१०६३ । त्तैशुषपचो मकवः ।

(त्तै शुष·पच· ५।, म·क·वः १।) ।

एभ्यस्तयो स्तस्य म क व एते क्रमात् स्युः । क्षामः शुष्कः पक्वः । †

१०६४ । प्रस्त्यो म वा, जिश्च ।

(प्र—स्त्यः ५।, म ।१।, वा ।१।, जिः १।, च ।१।) ।

प्रस्त्यस्तयो स्तस्य मः स्याद्वा, जिश्च । प्रस्तीमः प्रस्तीतः । प्रात् किं. संस्त्यानः । ‡

---

* ह्रीश्च घ्राश्च त्राश्च उन्दश्च नदश्च विन्द च तस्मात । ह्री जि लज्जे क्तः, वा तस्थाने नः । एव घ्रा गन्धग्रहणे त्रै ङ् पालने, क्तः । उन्द श्री क्लेदे क्तः, (१०७१) नेम डीश्वीति ईदित्त्वात 'इम निषेधे, (५६७) नलोप' । नुदी ज श्र प्रेरणे । धी विद ङ मीमांसे । अत्र सूत्रे विन्द इत्यनेन गौधादिको विदधातुर्बोध्यते,—प्रमाणानि यथा —(१) पाणिनिः (८।२।५६) "नुद दीन्दत्राघ्राह्रीभ्य'ऽन्यतरस्याम्"—विद विचारणे गौधादिक एव गृह्यते, इति भट्टोजिदीक्षितः । (२) भाष्य "वेत्तेस्तु विदितो निष्ठा विद्यतेर्विन्न इष्यते । विन्तेर्विन्नश्च वित्तश्च भोगे वित्तश्च विन्दतेः ॥" (३) कातन्त्रम् "ह्रीघ्राघ्रोन्दनुदविन्दां वा ।" कृत्सु ५३८ सूत्रम् । (४) सुपद्मम् "नुदोन्दविन्दित्राघ्रा-ह्रीभ्यां वा ।" 'विद विचारणे' । (५) संक्षिप्तसारः "उन्दीह्रीघ्रात्राविन्तिनुदां वा ।" कृदन्तपादे ५०० सूत्रम् । 'विनत्तीति निर्देशात् विद सत्तायामित्यस्य नित्यं विन्नमिति' गोयीचन्द्रः ।

† त्तै क्षये क्षामः, शुष्यौ ल्ट शोषे शुष्क, उभयत्र अकर्मकत्वात (१०८३) कर्त्तरि क्त । डु ओ ष पच पाके अन्तरङ्गत्वादादौ (२११) कुङ्, ततः क्तस्य वः । पाणिनिः ८।२·५१—५३ ।

‡ अत्र वा-शब्दस्य मकारेणैव सम्बन्धात जिर्नित्यः । स्त्यै संहतौ ध्वनौ, प्रस्तीमः प्रस्तीतः, (१०३६) अन्त्य-जे दीर्घः । संस्त्यान इति (१०५२) क्तस्य नः । एवं स्त्यानः । पाणिनिः ८।२।५४, ६।१।२३ ।

১০৬৫। निर्व्वाण भिन्नर्ण वित्त फुल्लोत्फुल्ल संफुल्ल प्रफुल्ल क्षीव कृश परिकृशोल्लाघाः। (१॥)।

एते क्तान्ता निपात्यन्ते। निर्व्वाणः शान्तः निर्व्वाणं मुक्तिः, भिन्नं खण्डं, ऋणं विशोध्यं, वित्तं धनं वित्तः प्रतीतः, फुल्लो विकसितः उत्फुल्लः संफुल्लः प्रफुल्लश्च, क्षीवो मत्तः, कृशस्तनुः परिकृशश्च, उल्लाघो नीरुजः। *

১০৬৬। क्षुध वस पूजार्थाञ्चागाध्‍र्यार्थ-लुभः क्त्वेम्। (क्षुध—लुभः ৫।, क्त्वः ৬।, च ।১।, इम् ।১।)।

एभ्यः परयो स्तयोः क्त्वश्च इम् स्यात्। क्षुधितः उषितः अञ्चितः लुभितः। गतौ तु अक्तः। गाध्‍र्यार्थे तु लुब्धः। †

---

* निपातो ह्यर्थविशेषे इत्याह निर्व्वाणः शान्त इत्यादि। वा ल गमनहिंसयोः निर्व्वाणः, अन्यत्र निर्व्वातः। भिदिर् धौ ञ भिदि भिन्नं, अन्यत्र भिन्नं। ऋ गतौ ऋणं, अन्यत्र ऋतं सत्यं। विद लृ श प ओ लाभे वित्तं, अन्यत्र विन्नं, विद ल मतौ वित्तः, अन्यत्र विदितः। फुल्ल विकसने फुल्लादि-चतुष्टयं, केवलस्य उत्संप्रपूर्व्वस्य च निपातनात् अन्यत्र सफुल्लित इत्यादि। पाणिनौ अनुपसर्गात् ञि फला विसरणे इति फलधातोः क्तान्तो निपातः, प्रफुल्ल इति रूपं तु फुल्ल विकसने इत्यस्य पचाद्यचि बोध्यम्। क्षीव ङ दर्पे क्षीवः, सोपसर्गात्तु प्रक्षीवितः। कृशि यं कार्श्ये कृशः, एवं परिकृशः, अन्यत्र परिकृशितः। लाघृ ङ शक्तौ उल्लाघः, अन्यत्र प्रलाघितः। पाणिनिः ८।२।५०, ।५,५৮—৬০, वार्त्तिकञ्च। "परिकृश इति प्रादिसमासः" इति क्रमदीश्वरः।

† पूजार्थश्चासौ अञ्च चेति पूजार्थाञ्च। गाध्‍र्य (लिप्सा) अर्थो यस्य स गाध्‍र्यार्थः, न गाध्‍र्यार्थः अगाध्‍र्यार्थः, स चासौ लुभ चेति अगाध्‍र्यार्थ-लुभ। ततः क्षुधश्चेत्यादि द्वन्द्वसमासात्। क्त्वः क्ताच् इत्यर्थः। क्षुध-वसौ-रौदित्त्वात्, अञ्चः उदित्त्वेन (১১৭২) क्ताचो वेमत्वे लुभश्च (৬০৬) वेमत्वे (১০৭১) नेम् डौश्मौति निषेधात्, इमोऽप्राप्तौ विधिरयं। उषित इति (৬৬১) ञिः। अञ्चित इति पूजार्थत्वात् (৫৬৮) न नलोपः। लुभित-इति लुभ विमोहने। अक्त इति (৫৬৭) न-लोपः, (২১১) कुङ्। लुब्ध इति लुभ्य गार्ध्ये, (৫৭৫) त-स्थाने ध, (৬৪) भ-स्थाने ब। क्त्वापस्तु क्षुधित्वा उषित्वा अञ्चित्वा, लुभित्वा लोभित्वा (৮১৮) वा कित्त्वं। पाणिनिः ৭।২।৫২—৫৪।

१०६७। पू क्लिश वम जप व्याश्वस स्तयोर्वा। (पू—व्याश्वस: ५।, तयो: ६॥, वा ।१।)।

एभ्यस्तयोरिम् स्याद्वा। *

१०६८। पू शी धृष मिद् क्ष्विद् स्विद् क्षमार्थमृषां सेमौ णु:। (पू—मृषां ६॥, सेमौ: ७॥, णु: १।)।

एषां णु: स्यात् तयो: सेमो:। पवित: पूत:, क्लिशित: क्लिष्ट:, वमित: वान्त:, जपित: जप्त:, विश्वसित: विश्वस्त:, आश्वसित: आश्वस्त:। शयितं धर्षितं मेदितं क्ष्वेदितं स्वेदितं मर्षितं। क्षमार्थ: किं, अपमृषितं वाक्यं। †

१०६९। भावादिढे वोदुङो ऽब्वत:। (भाव-आदिढे ७।, वा ।१।, उत्-उङ: ६।, अप्-वत: ६।)।

विहिताप उदुङो भावादिढयो र्णु र्वा स्यात् तयो: सेमो:। द्योतितं द्युतितं तेन। अनपस्तु क्षुधितं। ‡

---

* विश्व आश्व ताभ्यां श्वस व्याश्वस, पूश्च क्लिशश्च वमश्च जपश्च व्याश्वस च तस्मात्। पू-धातो-रुवर्णान्तत्वात् (१०५३) निषेधे, क्लिश्धातोरूदित्त्वादिमत्वेन (१०७१) नेमृडी-शीति निषेधे, वमादीनां (५५४) नित्यप्राप्तौ विभाषेयं। पाणिनि: ७।२।५०,५१। वमजपव्याश्वसानामिम्विकल्प: चन्द्रवर्द्धमानमतानुसारेण; "पाणिनीयास्तु 'पूङश्च' इति सूत्रे चकारस्यानुक्तसमुच्चयार्थत्वेन साधयन्ति" इति गोयीचन्द्र:।

† क्षमार्थश्चासौ मृष चेति क्षमार्थ-मृष, तत: पूश्च शीश्च धृषश्च मिदश्च क्ष्विदश्च स्विदश्च क्षमार्थ-मृष च तेषां। इमा सह वर्त्तेते यौ तौ सेमौ तयो:। पवित इत्यादि, पूङ्क्षेण इम, अनेन गुण:। क्लिष्ट इति (१५४) षङ्। वान्त इति (१०३८) दीर्घ:। शयित-मित्यादीनि अस्मोदाहरणानि। धृष ञि प्रागल्भ्ये, ञी-मिदा स्नेहे, क्ष्विद ञि मोचे, ञिष्विदा ञि स्नेहने, एषां चतुर्णां (१०७२) इमप्राप्ते, गुण:। मर्षितं (५५४) इम्। अपमृषितं निन्दितमित्यर्थ:। पाणिनि: १।२।१९,२०,२२।

‡ आदिढ क्रियारम्भ:। भावश्च आदिढश्च तस्मिन्। उत् उङ् यस्य स तस्य। अप् विद्यतेऽस्य अश्वान् तस्य इति उदुङो विशेषणं। अतो विहिताप इति, विहित:

१०७०। लोपो ञेः। (लोपः ११, ञेः ६।) ।

ञे र्लोपः स्यात् तयोः सेमोः । भावितः भावितवान् । *

१०७१। नेम् डीश्वीदिद्वेमो ऽपत्यनेकाज्‌-निष्कुषः। (न ।१।,इम ।१।,डी-श्वि-ईदित्‌-वेमः ५।, अ-पति-अनेकाच्‌ निष्कुषः ५।)।

डीनः शूनः दीप्तः गूढ़ः रुतः ततः। पत्यादेस्तु पतितः दरिद्रितः निष्कुषितः । †

१०७२। आदितः। (आदितः ५।) ।

क्रतः अप् यस्मात् स तस्य, भ्वादेरदादेश्चेत्यर्थः । अदादेः शपोऽस्थायित्वेऽपि (६७०) तद्विधानमेतदर्थं । द्युत ङ वलृ दीप्तौ भावे क्तः, (५५४) इम्, अनेन वा गुणः । अदादेश्च रोदितं रुदितमिति । आदिढे तु, (१०९२) घेचादिढे क्त इति कर्त्तरि क्ते, द्योतितः द्युतित इत्यादि । भ्वाद्यदादिभ्या-मन्यस्य तु क्षुध यो क्षुधि क्षुधितमित्यादि । सेमोः किं, लुब्धं गुप्तं । पाणिनिः १।२।२१, भाष्यञ्च ।

* (६४१) इमि ञिलोपनिषेधादिह विधानं । भावित इति भू-ञि, भावि-क्त, (५५४) इम्, ञिलोपः । पाणिनिः ६।४।५२ ।

† ईत् इत् यस्य स ईदित् । वा इम् येभ्यस्ते वेमः, येन केनापि विकल्पितेम इत्यर्थः । डीश्च श्विश्च ईदिच्च वेमश्चेति तस्मात् । पतिश्च अनेकाच्च निष्कुष च ते, न विद्यन्ते ते यत्र सोऽपत्यनेकाज्‌निष्कुष तस्मात् । डीन इति ओ डी ङ य नभोगतौ, अनेन इम्‌निषेधे, ओदित्त्वात् (१०५२) क्त स्थाने न । शून इति टु ओ श्वि इर् गतिवृद्ध्योः, क्तः, (६६१) ञिः, (१०३६) ञे र्दीर्घः, पूर्व्ववत् त-स्थाने न । दीपी ञ ऋट दीपने, दीप्तः, (१०७१) ईदित्त्वादिम्‌निषेधः, एवं चिती संज्ञाने चित्तमित्यादि । गुह ञ संवृतौ, गूढ़ः, रु ल ध्वनौ, रुतः, उभयत्र (५७३) वेमत्वात् (१०७१) इम्‌निषेधः, गूढ़ इत्यत्र च (१७५) हस्थाने ढ, (५७५) त-स्थाने ध, (४७) धस्य ढः, (७७) ढलोपः पूर्व्वस्य दीर्घश्च । तन दु ञ् विस्तृतौ, (११७२) पुल्लिङ्गदित इति (८१०) असञ्ज इति च वेमत्वात् (१०७१) इम्‌निषेधः, (६७६) अम्लोपः । एवं सह—सोढः (६०६) वेमत्वात् । नृत—नृत्तः, (७३९) वेमत्वात् । पतितः दरिद्रितः उभयत्र (८१०) असञ्ज्ञोति, निष्कुषितः इति (५७३) वेमूदिदिति वेमत्वेऽपि, अत्र वर्जनादिम् । पाणिनिः ७।२।१४,१५,४७, भाष्यञ्च । सुपद्मे 'डी'धातुर्दृश्यते ।

आकारेतस्तयो रिम् न स्यात् । मिन्नः, मिन्नवान् । *

१०७३ । भावादिढे वा । (भाव-आदिढे ७।, वा ।१।)।

मिन्नं मेदितं तेन । प्रमिन्नः प्रमेदितः सः । †

१०७४ । शके ढौ । (शकेः ५।, ढे ७।) ।

शकितोऽर्च्चितुं शिवस्तेन, शक्तः । ‡

१०७५ । क्षुब्ध वाढ स्वान्त ध्वान्त फाण्ट कष्ट धुष्ट लग्न क्लिष्ट विरिब्ध धृष्ट विशस्त परिवृढ दृढ शृत हृत्ताभ्यर्णाः । (१।।।) ।

एते क्तान्ता निपात्यन्ते । क्षुब्धो मन्थः, वाढं भृशं, स्वान्तं मनः, ध्वान्तं तमः, फाण्टं कषायभेदः, कष्टं कृच्छ्रं, घुष्टं शब्दितं, लग्नं सक्तं, क्लिष्टं अस्पष्टं, विरिब्धः स्वरः, धृष्टः प्रगल्भः, विशस्तश्च, परिवृढः प्रभुः, दृढो बली, शृतं पक्कं, हृत्तो गुणश्छात्त्रेण, अभ्यर्णं समीपं । §

---

* आत् इत् यस्य स तस्मात् । इर् मिदा स्नेहे, कर्त्तरि क्तः, (१०५२) क्त स्थाने न, पूर्व्वस्य दस्य च न, मिन्नः, एवं क्तवतुः मिन्नवान् । पाणिनिः ७।२।१६ ।

† आदिभूतं ढं, क्रियारम्भ इति यावत् । भावश्च आदिढश्च तस्मिन् । आकारेतो धो भावे आदिकर्म्मणि च विहितस्य क्तस्य इम् न स्याद्वा । भावादिढयोः क्तवतोरसम्भवात् केवलं क्तस्यैवेत्यर्थः । मिन्नमिति भावे क्तः, पक्षे इम्, (१०६८) पुश्चीति गुणः मेदितं । एवं प्रमिन्नः इति (१०९२) क्रियारम्भे कर्त्तरि क्तः, प्रशब्देन आरम्भो द्योत्यते । स्नेहं कर्त्तुमारब्धवानित्यर्थः । पाणिनिः ७।२।१७ ।

‡ शक धातोः कर्म्मणि विहितस्य क्तस्य इम न स्याद्वा । ढे इति किं, तेन शक्तं, स शक्तः, अत्र ऊदित्त्वाद्विमत्वे, (१०७१) नेम डौश्चीति इमनिषेधः । "शक्लृ सकर्म्मकः" इति क्रमदीश्वरः ।

§ क्षुभ ङ ऌ सञ्चलने, क्तः क्षुब्धः, मन्थो मन्थनदण्डः, अन्यत्र क्षुभितः । वाहृ ङ

१०७६ । नेम् संनिव्यर्द्दः ।

(न ।१।, इम् ।१।, सं नि-वि-अर्द्दः ५।) ।

संनिविपूर्व्वा-दर्द्दतेस्तयोरिम् न स्यात् । समर्ण्णः न्यर्ण्णः; व्यर्ण्णः ।*

१०७७ । वा रुषाम ह्रष त्वर संघुषास्वनः ।

(वा ।१।, रुष-अम-ह्रष-त्वर-संघुष-आस्वनः ५।) ।

एभ्यस्तयोरिम् न स्याद्वा । रुष्टः रुषितः, आन्तः अमितः, हृष्टः हृषितः, तूर्णः त्वरितः, संघुष्टं संघुषितं, आस्वान्तं आस्वनितं ।†

यत्ने, वाढं भृशं, अन्यत्र वाहितं । स्वन ण शब्दे स्वान्तं मनः, अन्यत्र स्वनितं । ध्वन मि ण रवे ध्वान्तं, अन्यत्र ध्वनितं । फण ण निस्नेहे, ञिः, ततः क्तः फाण्टं कषायविशेषः, (फाण्टमनायासभाव्यमिति पाणिनिः), अन्यत्र फाणितं । कष वधे कष्टं कृच्छ्रं, (कृच्छ्रगहनयोः कष इति पाणिनिः), अन्यत्र कषित । घुष कि विशब्दे घुष्टं शब्दितं, (घुषिरविशब्दने इति तु पाणिनिः, घुषिः प्रतिज्ञायामिति तु क्रमदीश्वरः), अन्यत्र घुषितं । लग म सङ्गे लग्नं सक्तं, अन्यत्र लगितं । म्लेच्छ कि देश्योक्तौ म्लिष्टं अस्पष्टं, अन्यत्र म्लेच्छितं । रेभृ ङ शब्दे विरिब्धः स्वरः, अन्यत्र विरेभितं । ञि धृषा न प्रागल्भ्ये धृष्टः प्रगल्भः, अन्यत्र धर्षितं । (१०७२) आदित इति इम्निषेधे पदसिद्धावपि, (१०७३) भावादिष्ठे वेति पाक्षिकस्य इमो निषेधार्थं निपातनं । शस उ वधे विशस्तः प्रगल्भः, अन्यत्र विशसितः । अत्र (१०७१) नेम् डीश्वीति इम्निषेधेऽपि, प्रगल्भादन्यत्र इम्प्राप्त्यर्थं निपातनं । वृहि दृहि च वृद्धौ, परिवृढः प्रभुः, दृढो बली, (दृढः स्थूलबलयोरिति पाणिनिः), अन्यत्र परिवृंहितं दृंहितं । श्रा ल् अ पाके केवलस्य ण्यन्तस्य च शृतं पक्वं, एतच्च क्षीरे हविषि च वाच्ये निपातितं, अन्यत्र श्राणः श्रपितः । वृत ङ व लृ वर्त्तने वृत्तः अधीतः गुणो ग्रन्थविशेषः, (णिजन्तवृतधातुरेवोक्तः पाणिनिना, णिलुक् च), अन्यत्र वर्त्तितः । अर्द्द पीडायां, समीपादन्यत्र अभ्यर्द्दितः । पाणिनिः ७।२।१८—२१,२५,२६,२७ ।

* समर्ण्णः इत्यादि, अर्द्द पीडायां, अनेन इम्निषेधः, (१०५२) तस्य दस्य च नः, एवं समर्ण्णवानित्यादि । एभ्य. किं, अर्द्दितः प्रार्द्दित इत्यादि । पाणिनिः ७।२।२४ ।

† रुषस्य अमस्य ह्रषस्य त्वरस्य संघुषस्य आस्वनश्च तस्मात् । रुष्ट इत्यादि, रुषञि क्रुधि, अम गतौ भजने शब्दे अमक् रोगे, हृष्य इर् तुष्टौ, ञि त्वरा अङ् स्यदे, घुष

१०७८। दान्त शान्त पूर्ण दस्त स्पष्ट च्छन्न ज्ञप्ता वा। (दान्त-ज्ञप्ताः १॥, वा ।१।)।

एते अन्ताः क्तान्ता निपात्यन्ते वा। पक्षे दमितः शमितः पूरितः दासितः स्पाशितः छादितः ज्ञपितः। *

१०७९। स्फायः स्फी वा। (स्फायः ६।, स्फी ।१।,वा।१।)।

स्फीतः स्फीतवान्, स्फातः स्फातवान्। †

१०८०। प्यायोऽगेः प्यस्वाङ्गे तु वा। (प्यायः ६।, अगेः ६।, पी ।१।, अस्वाङ्गे ७।, तु ।१।, वा ।१।)।

अगेः प्यायः पी स्यात्, स्वाङ्गादन्यत्र तु वा तयोः। पीनं मुखं, प्यानः पीनः स्वेदः। ‡

क्ष इर् हतौ, स्वन ण शब्दे, एभ्यः क्त-क्तवतप्रत्यययोः वा इमनिषेधः। ध्वान्त इति, ध्वान्तं इति च (१०३८) अमुङ इति दीर्घः। तूर्ण इति (१०३९) स्त्रिवेति ऊट्, (१०५२) क्तस्ये न. णत्वञ्च। अत्र हृष धातोः (६०६) वेमसहेति, हृष धातोः (११७२) पूक्लिशेति वेमत्वे, (१०७१) नेम् डीश्वीति निषेधादप्राप्तौ, अन्येषाञ्च (५५४) वसोऽरस्येति नित्यप्राप्तौ विभाषा। पाणिनिः ७।२।२८,२९। "हृष्टं हृषितं लोम" इति पाणिनिः, "विस्मितप्रतिघातयोश्च" इति वार्त्तिकम्। हृष तुष्टौ इट्। इति सिद्धान्तकौमुदी।

* दमु-शमु भिर्यं शमे, प्रेरणार्थे, (७७७) ञौ, कर्म्मणि क्ते (१०३८) दान्तः शान्तः इति, पक्षे (७९८) ह्रस्वे, (५५४) इमि, (१०७०) ञेर्लोपे दमितः शमितः इति च। एवं पूरी ञ पूर्त्तौ—पूर्णः, पक्षे (५५४) इम्, (१०७०) ञेर्लोपे, पूरितः। दसु इर् उत्क्षेपणे दस्तः, पक्षे दासितः। स्पश ञ ग्रन्थ-बाधयोः, स्पष्टः, पक्षे स्पाशितः। छद कि संवृतौ, स्वार्थञौ छन्नः, पक्षे छादितः। ज्ञप क्म तु ज्ञप्तौ—ज्ञप्तः, पक्षे ज्ञापितः। पाणिनिः ७।२।२७।

† स्फायतेः स्फी वा स्यात् तयोः। स्फायी ङ वृद्धौ, ईदित्वात (१०७१) इम्-निषेधे, स्फी-आदेशः, पक्षे (६४२) य-लोपः। पाणिनिः ६।१।२२, भाष्यञ्च।

‡ पीनमिति, ओ प्यायी ङ वृद्धौ, क्तः, (१०७१) ईदित्वादिमनिषेधे, ओदित्वात (१०५२) तस्य न। अगेः किं, प्रप्यानं मुखं, (६४२) यलोपः। अस्वाङ्गे तु प्यानः पीनः स्वेदः, स्वेदस्य स्वाङ्गभिन्नत्वं (२६५) सूत्रे द्रष्टव्यं। पाणिनिः ६।१।२८, भाष्यञ्च।

१०८१। आङोऽम्बूधसोः। (आङः ५।, अम्बु ऊधसोः ७॥)।

आङः परस्य प्यायः पी स्यात् तयोः, अम्बूधसोः। आपीनोऽम्बुः, आपीनमूधः। *

१०८२। ह्लादेः ह्रः क्तौ च।

(ह्लादेः ६।, ह्रः १।, क्तौ ७।, च।१।)।

ह्लादेः ह्रः स्यात् तयोः क्तौ च। प्रह्लन्नः। †

१०८३। दो-षो-मा-स्थां ङिस्त्यणौ।

(दो – स्थां ६॥, ङिः १।, ति ७।, अणौ ७।)।

एषां ङिः स्यादणौ तकारे। दितः सितः मितः स्थितः। ‡

१०८४। छाशो वा। (छा-शोः ६॥, वा।१।)।

छितः छातः, शितः शातः। §

१०८५। शो व्रते नित्यं। (शः ६।, व्रते ७।, नित्यं १।)।

संशितं व्रतं। ¶

---

* अम्बुः कूपः, ऊधः गवादेः स्तनः, एतयोरर्थयोरित्यर्थः। (६।१।२८) सूत्रे वार्त्तिकम।

† प्रह्लन्न इति, ह्लादी ङ मोदने, कर्त्तरि क्तः, (१०७१) इमनिषेधे, अनेन ह्रस्वे दान्तत्वात (१०५२) तस्य दस्य च न। क्तौ प्रकृतिरिति। पाणिनिः ६।४।९५।

‡ दो य छेदे, षो य नाशे (षोपदेशनिर्देशः), मा इति मा स्वरूपं, तेन मे ङ प्रतिदाने, मा ङ लि शब्दे, मा ल च माने, मा ङ य च माने इत्येतेषां ग्रहणं। ष्ठि ष्ठा गतिनिवृत्तौ। एवं दितवान् दितिः दित्वा। अणौ किं, दाता दातुं दात्र-मित्यादि। पाणिनिः ७।४।४०।

§ छा शो ङिः स्याद्वा अणौ तकारे। छो य लूनौ, शो य निशाने, (९०८) ओस्याने आ, ततः ङिः। अणौ किं छातं। पाणिनिः ७।४।४१।

¶ शो य निशाने इत्यस्य नित्यं ङिः स्यात् अणौ तकारे। व्रते वाच्ये क्तस्यैव प्रयोगः। "श्यतेरित्वं व्रते नित्यम्" इति वार्त्तिकम्।

१०८६। धाञो हिः। (धाञः ६।, हिः १।)।

धाञो हिः स्यादणौ ते परे। हितः।*

१०८७। चरफलोऽदुः। (चर-फलः ६।, अत् ।१।, उः१।)।

अनयोरकार उः स्यादणौ ते। प्रफुल्लतः।†

१०८८। दद् दोऽधः। (दत् ।१।, दः ६।, अधः ६।)।

दासंज्ञकस्य धावर्जस्य दत् स्यात् अणौ ते। दत्तः। अधः किं, धीतः।‡

१०८९। ण्यचस्त वा। (णि-अचः ५।, त ।१।, वा ।१।)।

णेरचः परस्याधो दासंज्ञकस्य वा तः स्यादणौ ते। प्रत्तः प्रदत्तः।§

---

* हिधातुना सिद्धेऽपि धाञो निग्रहणार्थः। एवं हितवान्, हितिः, हित्वा, हिधिमं। धाञः किं, धेट-धीतः। पाणिनिः ७।४।४२।

† चर गमने इत्यस्मात् क्त क्तवत्वोः क्त्वाचश्च,(५५४) वसोऽरस्थेतीमि अव्यवहित-तकाराभावादुकाराभावे चरितः चरितवान् चरित्वा इति भविता। क्तौ तु (१०३३) इवत्रतेरितीमनिषेधे अनेन अकारस्य उकारे, (२२८) दीर्घे पूर्तिरिति। ञि फला भिदि, (१०७२) इमनिषेधे, अनेन अकारस्य उकारे प्रफुल्तः। एवं फुल्तवान्, फुल्तिः। पाणिनिः ७।४।८८।

‡ दा ल लूनौ, दा तु दाने, डु दा ञ लि च, दे ङ पालने इति चतुर्णां दत्तः, एवं दत्तवान् दत्तिः दत्त्वा। डु दा ञ् लि दाने इत्यस्य दत्रिममिति च। दासंज्ञकेति कथनात् दैपधातोः दातमिति। धीत इति धे ट पाने इत्यस्य, (६१२) ऊो-आदेशः। पाणिनिः ७।४।४६।

§ अधः किं, धे-ट पाने इत्यस्य प्रधीतः। अचः किं, निर्दत्त इत्यादि। पाणिनिः ७।४।४७।

१०९० । घौ दा-ते गीच: । (घ: ११, दा-ते ७।, गीच: ६।)।

नीत्तं । इच: किं, प्रत्तं । *

१०९१ । जग्धोऽदो यपि च ।

(जग्ध: १।, अद: ६।, यपि ७।, च ।१।) ।

अदो जग्ध: स्यात् अणौ ते यपि च । जग्धं । †

१०९२ । घे चादिढे क्त: । (घे ७।, च ।१।, आदिढे ७।, क्त: १।)।

आदिढे विहित: क्तो घे स्यात् ढभावयोश्च । प्रकृत: कटं स:, प्रकृत: कटस्तेन । (१०५१) चेर्घ इति प्रचीण: स: । प्रचीणं प्रचितं तेन, चीण: चितोऽयं तपस्वी, चीणायु: चितायु: प्रभु: । ‡

---

* वाद्द्यमध्यवर्त्तित्वात् एतदादीनामष्टानां नित्यत्वं । गेरिचो घ: स्यात् दा-स्थानजाते तकारे परे । नीत्तमिति पूर्व्वेण दास्थाने तकारे अनेन नि इत्यस्य दीर्घ: । एवं नीत्ति: परीत्तं अनूत्तमित्यादि । पाणिनि: ६।३।१२४ ।

† क्रियापदत्वेनैव प्रयुज्यमानस्य अदधातो र्जग्धादेश इत्यर्थ:, तेन पक्वतण्डुलादौ रूढ़ं अन्नमिति भविता । जग्धमिति भक्षितमित्यर्थ:, जग्धादेशे, (५७५) तस्य ध:, (६४) पूर्व्वधस्य द । यपि प्रजग्धा । [पाणिनिमते तु (८।४।६५) झरोझरीति सूत्रेण धलोपे क्तादौ जग्ध इत्यादि रूपम् ।] क्त्वाचि परे आदौ जग्धादेशे पश्चात् यपि कृते सिद्धेऽपि, अत्र यपीति ग्रहणं, क्त्वाच: स्थाने यबादेशात् प्राक् प्रकृते: किमपि कार्य्यं न स्यादिति सूचनार्थं, तेन विसुच्येत्यादौ न कुङ् (२११), प्रविश्येत्यादौ न षङ् (१५४), प्रणह्येत्यादौ न धङ् (२३०), प्रलिह्येत्यादौ न ढ (१७५), आपृच्छ्य प्रदीव्येत्यत्र च न भ-कटौ (८१४) । पाणिनि: २।४।३६ ।

‡ आदिभूतं ढं कर्म्म (क्रिया), आदिढं आदिक्रिया, क्रियारम्भ इति यावत् । स कटं प्रकृत कर्त्तुमारब्धवान्, तेन कट: प्रकृत: कर्त्तुमारब्ध इत्यर्थ: । प्रचीण इति अनेन कर्त्तरि क्त:, अकर्म्मकत्वात् नित्यं दीर्घ:, चौ इति दीर्घान्तात् (१०५२) तस्य नः, (१०७) णत्वं । प्रचीणं प्रचितमित्यादि भावदेत्याक्तेषु क्रमेणोदाहरणानि । पाणिनि: ३।४।७१ ।

१०९३। गत्यर्थाढ शी स्थास वस जन जॄ श्लिष रुहः। (५।)।

एभ्यो घे क्तः स्यात् ढभावयोश्च। गङ्गां गतः कृष्णं प्राप्तः, शयितः, शेषमधिशयितो विष्णुः, वैकुण्ठमधिष्ठितः, शिवमुपासितः, हरिदिनमुपोषितः, राममनुजातोऽच्युतः, विश्वमनुजीर्णोऽनन्तः, लक्ष्मीमाश्लिष्टो मुकुन्दः, गरुड़मधिरूढ़ो गोविन्द । *

१०९४। ध्रौव्यगत्यदनार्थात् ङे च।

(ध्रौव्य-गति-अदनार्थात् ५।, ङे ७।, च ।१।)।

निश्चलार्थात् गत्यर्थाद् भोजनार्थाच्च क्तो ङे स्यात् ढभावे घे च।

---

* नास्ति ढं येषां ते अढाः। गत्यर्थाश्च अढ़ाश्च शीश्च स्थाश्च आसश्च वसश्च जनश्च जॄश्च श्लिषश्च रुहश्च तत्तस्मात्। घे, च, क्तः, इति त्रयमनुवर्त्तते। परसूत्रेणैव सिद्धे अत्र गत्यर्थग्रहणं, गत्यर्थ-प्राप्त्यर्थयोरैक्यात् द्वाभ्यां कर्त्तरि क्तः स्यात्, परसूत्रे तु केवलं गत्यर्थादेव न तु प्राप्त्यर्थादिति ज्ञापनार्थं। शीस्थादीनामकर्म्मकत्वादेव प्राप्तौ पुनर्ग्रहणं, येन केनापि सकर्म्मकत्वेऽपि कर्त्तरि क्त-प्राप्त्यर्थं। गत इति (६७६) अम्लोपः। सर्व्वे गत्यर्थाः ज्ञानार्थाः प्राप्त्यर्थाश्चेति वचनात् प्राप्त इति गत्यर्थत्वादेव कर्त्तरि क्तः। एवं लब्ध इत्यपि। शयित इति अढत्वात् कर्त्तरि क्तः, (१०६८) गुणः। अधिशयित इत्यस्य शेषमिति, अधिष्ठित इत्यस्य वैकुण्ठमिति च, अधिकरणे (२८१) कर्म्मत्वं। अधिष्ठित इति (१०८३) ङिः। उपासित इति आराधनार्थत्वात् सकर्म्मकत्वं, एवं घोषमध्यासित इत्यादावधिकरणस्य कर्म्मत्वेऽपि कर्त्तरि क्तः। उपोषित इत्यस्य हरिदिनमिति (२८२) कर्म्मत्वेऽपि कर्त्तरि क्तः, (१०६६) इम्, (६६१) षिः। अनुजातः अनुजीर्णः इति अनुपूर्व्वकयोरेतयोः सकर्म्मकत्वं, यस्य पश्चाज्जननादि तदेव कर्म्म। जात इति (१०७१) इम्निषेधे, (६५५) ज्ञा। जीर्ण इति (१०५२) इमनिषेधे, (६२८) इर्, (२२८) दीर्घः। आश्लिष्टः अधिरूढ़ इति च सकर्म्मकत्वेऽपि कर्त्तरि क्तः। रूढ़ इति (१७५) हस्य ढः, (५७५) तस्य ध, (४७) धस्य ढ, (७७) ढलोपः पूर्व्वदीर्घश्च। पाणिनिः ३।४।७२।

मुकुन्दस्यासितमिद-मिदं यातं रमापतेः ।
भुक्तमेतदनन्तस्येत्यूचुर्गोप्यो दिदृक्षवः ॥ *

१०८५ । ज्ञार्चेच्छार्थ ञीच्छीलादेः सति ।

([ज्ञा-अर्चा इच्छा]-अर्थ-ञि-इत्-शीलादेः ५।, सति ७।) ।

एभ्यो वर्त्तमाने क्तः स्यात् तेषु । विदितः, पूजितः, वाञ्छितः, इद्धः, शीलितः,—ञिवोऽनुवर्त्तते । †

---

* ध्रुवो निश्चलः । ध्रुवस्य भावो ध्रौव्यं, ध्रौव्यञ्च गतिश्च भदनञ्च समाहारे तत् अर्थो यस्य स तस्मात् । ङे अधिकरणे, चकारात् ठे भावे से च । मुकुन्दस्येति । मुकुन्दस्य कृष्णस्य इदं (कुञ्जं) आसितं, आस ङ ल उपवेशने, निश्चलार्थत्वादधिकरणे क्तः, इदमिति अधिकरणमुक्तं । रमापतेः कृष्णस्य इदं (कुञ्जं) यातं, या ल गतौ अधिकरणे क्तः, इद-मित्यधिकरणमुक्तं। अनन्तस्य कृष्णस्य एतत् (तरुतलं) भुक्तं, भुज धौ त्राण-भक्षयोः अधि-करणे क्तः, एतदित्यधिकरणमुक्तं। (मुकुन्दं) दिदृक्षवो गोप्यः इति ऊचुः । सर्व्वत्र (३०६) क्तमुकेति कर्त्तरि षष्ठी । कर्म्मणि वाच्ये यथा—मुकुन्देन पीठमध्यासितं, मथुरा याता, यज्ञिकान्नं भुक्तं । भाववाच्ये—मुकुन्देन आसितं, यातं, भुक्तमिति । कर्त्तरि वाच्ये—मुकुन्दः पीठे आसितः, मथुरां यातः, यज्ञिकान्नं भुक्त इत्यादि । पाणिनिः ३।४।७६ ।

† ज्ञा ज्ञानं, ज्ञाञ्च अर्च्चा च इच्छा च ज्ञार्च्चेच्छाः अर्था येषां ते ज्ञार्च्चेच्छार्थाः । ञिरित् यस्य स ञीत् । शील (धातुः) आदि र्यस्य स शीलादिः । ततः ज्ञार्च्चेच्छा-र्थाश्च ञीच्च शीलादिश्चेति, तस्मात् । सति वर्त्तमानकाले, अतीतेऽपि इति वक्तव्यम् । एतत् सूत्रं कालमात्रविधायकं, कर्म्मादि-वाच्ये तु यथासम्भवं स्यादित्यर्थः । विद ल ज्ञाने विदितः ज्ञायते इत्यर्थः । पूज क पूजे. पूजितः (१०७०) ञिलोपः, पूज्यते इत्यर्थः । वाछि कामे वाञ्छितः वाञ्छ्यते इत्यर्थः । एषु कर्म्मणि क्तः । ञि इन्धी ञ ङ द्युतौ, अकर्म्मकत्वात् (१०९२) कर्त्तरि क्तः, (१०७१) इम्-निषेधः, (५६७) न-लोपः, (५७५) तस्य ध, (६४) पूर्व्व-धस्य द ;—इद्धः द्योतते इत्यर्थः । ञि शील समाधौ, कर्म्मणि क्ते शीलितः, ध्यायते इत्यर्थः । आदिशब्दात् ञि रक्ष पालने रक्षितः इत्यादि । गणपाठे शीलादयोऽपि ञिकारानुबन्धाः । तद्यथा—शीलितो रक्षितः क्षान्तः आक्रुष्टो जुष्ट इत्यपि । रुष्टश्च रुषितश्चोभावभिव्याहृत इत्यपि ॥ हृष्टतुष्टौ तथा कान्तस्तथोभौ संयतोद्यतौ । कष्टं भविष्यतीत्याहुरमृताः पूर्व्ववत् स्मृताः ॥ पाणिनिः ३।२।१८७, १८८, चकारात् शीलादि ।

१०६६। ठी-प-म-वत् क्वसु-कानौ।

(ठी-प-म-वत् ।१॥, क्वसु-कानौ १॥)।

धोरेतौ क्रमात् स्याः प-म-वत् स्तः।

बभज्वान्, जजागर्व्वान् जजागृवान्, दुद्यूवान् दिदिवान्, विविश्वान् विविच्छान्। *

१०६७। वसो घसेकाज्जिनात् इम्।

(वसोः ६।, घस-एकाच्-ऋ-इन-आत: ५।, इम् ।१।)

घस एकाचो ऽत्ते रिन आदन्ताच्च वसो रिम् स्यात्, नान्यतः।

जक्षिवान् आदिवान् आरिवान् ईयिवान् ददिवान्। †

---

* ठी-पमे इव ठी-पमवत्, तेन अतीते काले कर्त्तरि वाच्ये परस्मैपदिभ्यः क्वसुः, आत्मनेपदिभ्यः कानः, उभयपदिभ्यो द्वय स्यात ; कर्म्मणि भावे च वाच्ये कानः स्यादित्यर्थः। क्वसु-कानयोः क इत् अगुणार्थः, उकारः (२५७) ईबर्थः। बभज्वानिति भन्ज-क्वसुः, (५६७) न-लोपः, (५५८,५६४) द्वित्वादि, बभज्वस् शब्दः, ततः सिः, (१९२) उदित्त्वात् नुष्, नसन्तत्वात् (१६४) दीर्घः, (१९३) स्यान्तलुप्। एवं स्त्रियां (२५७) उदित्त्वादीप्, (२२९) वस्य उः, बभञ्जुषी। जागृ-क्वसुः, द्वित्वादि, (६९९) वा गुणः, जजागर्व्वान् जजागृवान्। दिव-क्वसुः, (८१४) वस्थाने ऊट्, द्वित्वादि, दुद्यूवान्, पक्षे (६४२) वलोपे दिदिवान्। एवं विच्छ-क्वसुः, (८१४) छस्थाने वा श, विविश्वान् विविच्छान्। पाणिनिः ३।२।१०६,१०७।

† घस च एकाच्च ऋश्च इन च आश्च तस्मात्। घसः पृथक् ग्रहणात् एकाच् इति द्वित्वे कृतेऽपि य एकाच् सएव ग्राह्यः। एतेभ्य एव धातुभ्यो वसु-स्थाने इम् नान्यत इति नियमः। जक्षिवानिति अद-क्वसुः, (६७४) क्वां वेति घसादेशे, अनेन इमि, द्वित्वादौ, (२३०) उङ्-लोपे, (६४) घस्य क, (१११) षत्वं। पक्षे अदो द्वित्वे, (१६४) दस्य लोपे, सन्धौ, एकाच्त्वादिम, आदिवान्। एवं यज-क्वसुः, (६५१,६६१) खे मूलस्यापि जिः, एकाच्त्वादिम ईजिवान्, वस ऊषिवान्। एवं (५७९) तृफलेति खे लोपे पेचिवान् भेजिवान् इत्यादि। ऋ-क्वसुः, द्वित्वं, (५५९) खे ऋकारस्य अ, (६१५) मूलस्य गुणः, ततः सन्धिः, आरिवान्। इन गतौ, क्वसुः, द्वित्व, (६८३) खदीर्घ., (६८१) मूलस्य यकारः ईयिवान्। दा-क्वसुः, द्वित्वादि, (७०१) आद्योरिति आलोप. ददिवान्। पाणिनि. ७।२।६७।

१०९८ । हन-गम-दृश-विश-विन्दो वा ।

(हन—विन्द: ५।, वा ।१।) ।

एभ्यो वसो रिम् स्याद्वा । *जघ्निवान् जघन्वान्, जग्मिवान् जगन्वान्, ददृशिवान् ददृश्वान्, विविशिवान् विविश्वान्, विविदिवान् विविद्वान् । *

१०९९ । दाश्वान् साह्वान् मीढ्वान् । (।१॥) ।

एते वस्वन्ता निपात्यन्ते । †

चक्राण:, जजागराण: जजाग्राण:, अनूचान: । ‡

११०० । क्री-प-म-वत् शतृ-शानौ ।

(क्री-प-म-वत् ।१॥, शतृ शानौ १॥) ।

धोरेतौ क्रमात् क्या: प-म-वत् स्त: । पचन् । §

---

* हन-क्वसु:, इम्, द्वित्वादि, (२३०) उङ्लोप:, (१०९) ह्रस्य घ, जघ्निवान् । पक्षे, (६७९) हनो हस्य घ:, जघन्वान् । गम-क्वसु:, उङ्लोपे जग्मिवान्, पक्षे (१०२) मस्याने न, जगन्वान् । दृश-क्वसु, ददृशिवान्, पक्षे ददृश्वान् । एवं विश-क्वसु, विद् लृ श प ओ लाभे विद क्वसु:, वेत्तेस्तु विविद्वान् । पाणिनि: ७।२।६८, वार्त्तिकञ्च ।

† दाश ङ् दाने, तालव्यान्त:, दन्त्यान्त इति केचित् । सह ज ङ शक्तौ । मिहौ सेचने । एतेभ्य: क्वसु: । पाणिनि: ६।१।१२ ।

‡ कानमुदाहरति, कृञ धातो: कर्त्तरि कर्म्मणि वा कान: । जागृधातो: कर्म्मणि कान:, (६९९) वा गुण: । अनु-ब्रूधातो: कर्त्तरि कान, (७२५) वचादेश:, द्वित्वादि, (६५१.६६१) खे मूलस्य च जि: । अनूचान: साङ्गवेदाध्यायी । पाणिनि: ३।२।१०९ ।

§ क्री पमे इव क्री-पमवत् । एतेन वर्त्तमानकाले कर्त्तरि वाच्ये परस्मैपदिभ्य: शतृ:, आत्मनेपदिभ्य: शान:, उभयपदिभ्या द्वयं स्यात्, एवं कर्म्मणि भावे च वाच्ये सर्व्वेभ्य: शान: स्यादित्यर्थ: । शित्वात् दसंज्ञा, पित्त्वाभावाच्च ङित्संज्ञा । शतृ इत्यस्य च ऋ इत् (२५७) इत्यर्थ: । एतयो: प्रयोगे क्रियासमाप्ति नास्तीति बोध्यं । क्रियाया: पराधके विके हेतौ च अर्थे तौ भवत: । यथा शयाना भुञ्जते यवना: ; हरिं

११०१। शाने ऽतो मन्। (शाने ७, अतः ६।, मन् ।१।)।

अकारस्य मन् स्यात् शाने। पचमानः।*

११०२। यासो ऽस्य। (ई ।१।, आ ।१।, आसः ५।, अस्य ६।)।

आसः परस्यास्य आ ई स्यात्। आसीनः।†

११०३। वेत्तेः शतुः क्वसु र्वा।

(वेत्तेः ५।, शतुः ६।, क्वसु १।, वा ।१।)।

विदः परस्य शतुः क्वसुः स्याद्वा। विद्वान् विदन्।‡

११०४। शक्तिवयस्ताच्छील्ये शतुः शानः।

(शक्ति-वयस्-ताच्छील्ये ७।, शतुः ६।, शानः १।)।

शत्रुं निघ्नानः, कवचं बिभ्राणः, भोगं भुञ्जानः।§

पच्यन् मुच्यते। पचन् इति, डु ओ ञ् पच पाके, शतृ, (५४१) शप्, (५४३) अकार-लोपे पचत्शब्दः, ततः सिः, ऋदित्वात् (१८२) नुण्, (१८३) स्यान्तलुप्। स्त्रियां (२५७) ईप्, (२४५) नुण्, पचन्ती। पाणिनिः ३।२।१२४, १२६।

* मनो न इत् अन्ते। पचमान इति कर्त्तरि शानः, अनेन मन्। कर्म्मणि विप्रेण पच्यमान ओदनः। पाणिनिः ७।२।८२।

† अस्य शानस्य। आसीन इति, आस ङ ल उपवेशने, कर्त्तरि शानः, (५४१) शप्, तस्य (६७०) लुक्, अनेन आकारस्य ई। पाणिनिः ७।२।८३।

‡ क्वसुप्रत्ययस्य शतृ-स्थानजातत्वेन द्वित्वं अतीतत्वञ्च न स्यात्। विद्वानिति विद ल ज्ञाने, शतृ, तस्य स्थाने क्वसुः, विद्वस्शब्दः, ततः सिः, (१८२) नुण्, (१६४) दीर्घः, (१८३) स्यान्तलुप्। पक्षे विदन्। पाणिनिः ७।१।३६।

§ शक्तिः सामर्थ्यं, वयो यौवनादि, ताच्छील्यं तत्स्वभावत्वं। एष्वर्थेषु शतृ-स्थाने शानः स्यात्। शत्रुं निघ्नान इति, हन-शतृ, शक्त्यर्थे शतृस्थाने शानः, (६७०) शपोलुकि, (२२०) उङ्-लोपः, (१८६) ह स्थाने घ। कवचं (वर्म्म) बिभ्राण इति, भृ-शतृ,

११०५। तौ-प-म-वत् स्यट-स्यमानौ।

(तौ-प-म-वत् ।१॥, स्यट-स्यमानौ १॥)।

धोरेतौ क्रमात् त्याः प-म-वत् स्तः। करिष्यन् करिष्यमाणः।*

इति क्वादि-पादः।

४र्थ पादः—इष्णुादिः।

११०६। जि भ्राज भू सह रुच चर वृध वृत प्रजनापत्रपालंकृ निराकृन्मदपतपच इष्णु घे।

(जि—पचः ५।, इष्णुः १।, घे ७।)।

एभ्य इष्णुः स्यात् घे। कारयिष्णुः भ्राजिष्णुः भविष्णुः सहिष्णुः रोचिष्णुः चरिष्णुः वर्द्धिष्णुः वर्त्तिष्णुः प्रजनिष्णुः अपत्रपिष्णुः अलङ्करिष्णुः निराकरिष्णुः उन्मदिष्णुः उत्पतिष्णुः उत्पचिष्णुः।*

यौवनवयसि अर्थे शतस्थाने शानः, (७२६) द्वादौ रे द्विः, खे भंकारस्य (५५६) वकारे, (७२८) खे ङिः, (१०७) णत्वं। भोगं भुञ्जान इति भुज-शट, तत्स्वभावार्थे शतस्थाने शानः, रुधादित्वात् श्नण,(७५६) नणां नकारे,तस्य (४६) अकारः। पाणिनिः ३।२।१२६।

* भविष्यत्काले कर्त्तरि परस्मैपदिभ्यः स्यटः आत्मनेपदिभ्यः स्यमानः, उभयपदिभ्यो द्वयं स्यात्, एवं कर्म्मणि भावे च वाच्ये स्यमानः स्यादित्यर्थः। स्यट इत्यस्य ऋट इत् (२५७) ईवर्थः। करिष्यन् इत्यादि, (६१७) इम्। पाणिनिः ३।३।१४।

---

* प्रात् जन प्रजन, अपात् त्रप अपत्रप, अलम् कृ अलंकृ, निरः आ निरा तस्मात् कृ निराकृ, मद च पत च पच चेति मदपतपच, उदो मदपतपच उन्मदपतपच। ततः जिश्च भ्राजश्चेत्यादि द्वन्द्वे तस्मात्। जि ञ्यन्तः। अत्र पूर्व्वसूत्रादनुवर्त्त्य केवलं ताच्छील्यार्थे इष्णुः स्यादिति वक्तव्यं। ताच्छील्यार्थस्य च (११३२) स्वयंभ्रंविसंप्रादिति पर्य्यन्तेष्वधिकारः। तेन, कारयितुं शीलमस्येत्यादि वाक्ये कारयिष्णुरित्यादि। भ्राजिष्णु-रिति काशिका वृत्तिः। पाणिनिः ३।२।१३६—१३८। एतन्मते तच्छीलतद्धर्म्मतत्साधु-कारिषु अर्थेषु।

११०७। ग्स्नुक् भूजेः। (ग्स्नुक् ।१।, भू-जेः ५।)।

आभ्यां ग्स्नुक् स्यात् घे। भूष्णुः जिष्णुः। *

११०८। ग्ला म्ला स्था क्षि पच परिमृजः स्नुः। (ग्ला—परिमृजः ५।, स्नुः १।)।

एभ्यः स्नुः स्यात् घे। ग्लास्नुः म्लास्नुः स्थास्नुः क्षेष्णुः पक्ष्णुः परिमार्ष्णुः। †

११०९। क्षिप त्रस गृध धृषः क्नुः। (क्षिप—धृषः ५।, क्नु १।)।

एभ्यः क्नुः स्यात् घे। क्षिप्नुः त्रस्नुः गृध्नुः धृष्णुः। ‡

१११०। मृ स्था भू कम गम हन लष वृष पत पदो उकञ्। (मृ—पदः ५।, उकञ् १।)।

एभ्यो उकञ् स्यात् घे। मारुकः स्थायुकः भावुकः कामुकः गामुकः घातुकः लाषुकः वर्षुकः पातुकः पादुकः। §

---

* ग्स्नुकः कित्वात् (१०५३) वृद्ध्यीति इमनिषेधः, गुणाभावश्च। पाणिनिः ३।२।१३९, वार्त्तिकञ्च।

† क्षेष्णुरिति गुणे, (१११) षत्वं। पक्ष्णुरिति (२११) कुङ्, षत्वं। परिमार्ष्णुरिति ऊदित्वादनिमपक्षे (९९४) वृद्धिः, (१५४) षङ् (६०२) षस्य कः, षत्वं। अस्य इमपक्षे न प्रयोगः। पाणिनिः ३।२।१३९। "ज्यादेः स्नुः" इति संक्षिप्तसारे कृत्प्रत्ययौणादिपादे ९९ सूत्रे।

‡ क्नु इत्यस्य कित्वात् न गुणः। पाणिनिः ३।२।१४०।

§ उकञो ञित्वात (५०७) वृद्धिः। स्थायुक इति (९२४) यम्। घातुक इति (६७९) हस्य घः, (८०१) हनस्तङ्। पाणिनिः ३।२।१५४।

११११ । भिक्ष-जल्प-कुट्ट-लुण्ट-वृञः षाकः ।

(भिक्ष—वृञः ५।, षाकः १।) ।

एभ्यः षाकः स्यात् घे । भिक्षाकी जल्पाकी कुट्टाकी लुण्टाकी वराकी । *

१११२ । पति गृहि स्पृहि शीङ आलुः ।

(पति—शीङः ५।, आलुः १।) ।

एभ्य आलुः स्यात् घे । पतयालुः गृहयालुः स्पृहयालुः शयालुः । †

१११३ । शत सद सि धे दो रुः । (शत—दः ५।, रुः १।) ।

एभ्यो रुः स्यात् घे । शत्रुः सद्रुः सेरुः धारुः दारुः । ‡

१११४ । घसस्रदः क्मरः । (घस-सृ-अदः ५।, क्मरः १।) ।

एभ्यः क्मरः स्यात् घे । घस्मरः सृमरः अद्मरः । §

१११५ । भिद-भास-भञ्जो घुरः ।

(भिद-भास-भञ्जः ५।, घुरः १।) ।

---

* षाकस्य षित्त्वात् (२५७) ईप् । पाणिनिः ३।२।१५५ ।

† पत त् कैश्ये, गृह त् क ङ ग्रहे, स्पृह त् कीप्से, चयोऽदन्तचुरादयः, शी ङ ख शयने, (६४१) आलु-वर्जनात् न ञेर्लोपः, गुणश्च । पाणिनिः ३।२।१५८, वार्त्तिकञ्च ; एतन्मते दय निद्रा तन्द्रा श्रद्धा इति चतुष्टयादपि आलुच् । वोपदेवेन तु (४४६) निद्रादित्वात् आलुः इति तद्धिते निवेशितम् ।

‡ घे इत्यस्य पृथक्-ग्रहणात् दा इति न दासंज्ञः, तेन दैप शोधने इत्यस्यापि प्राप्तिः । शत्रुरिति सूत्रे तान्त-निर्देशात् शदो दस्य त, मनीषादित्वादिति केचित् । पाणिनिः ३।२।१५९ । एतन्मते शदधातोः शद्रुः, शत्रुस्तु शातयतेरौणादिकः क्रुन् ।

§ क्मरः क इत् चगुणः, मर स्थितिः । पाणिनिः ३।२।१६० ।

एभ्यो घुरः स्यात् घे। भेदुरः भासुरः भङ्गुरः।*

१११६। छिद्-भिद्-विदः कुरः।

(छिद-भिद-विदः ५।, कुरः १।)।

एभ्यः कुरः स्यात् घे। छिदुरः भिदुरः विदुरः।†

१११७। जागृ यङन्त-यजजपवद्दन्श ऊकः।

(जागृ—दन्शः ५।, ऊक. १।)।

एभ्य ऊकः स्यात् घे। जागरूकः, यायजूकः जञ्जपूकः वावदूकः दन्दशूकः।‡

१११८। यङन्त-चल पत सह वहः किः।

(यङन्त—वहः ५।, किः १।)।

एभ्यः किः स्यात् घे। चाचलिः पापतिः सासहिः वावहिः।§

---

* घुर इत्यस्य घ इत्। भङ्गुर इति (६७२) घिति जस्य गः, (५०) मस्यानुस्वारः, (५१) अनुस्वारस्य ङ। पाणिनिः ३।२।१६१।

† कुरस्य कित्त्वान्न गुणः। अत्र विदः ज्ञानार्थः। पाणिनिः ३।२।१६२।

‡ यजश्च जपश्च वदश्च दन्शश्च तत्, यङन्तश्च तत् यजजपवद्दन्शश्चेति, ततः जागृश्च यङन्त-यजजपवद्दन्शश्च तस्मात्। पुनः पुनः यजतीति यायज्य-धातोः ऊकः, (७७५) यलोपः। एवं गर्हितं जपति जञ्जप्यते इति जञ्जपूकः। वावद्यते वावदूकः। दन्दश्यते दन्दशूकः। एवं भक्ष बन्ध मण्ड मल भ्रम धातुभ्यः ऊकः वक्तव्यः (उणादिषु द्रष्टव्यः)। पाणिनिः ३।२।१६५, १६६। एतन्मते वावदूकः औणादिकः।

§ चल ञ गतौ, पत्ऌ ऊैश्ये, सह्य कि सह ञ ङ च शक्तौ इति द्वयं, वह ञौ प्रापणे, यङन्तेभ्य एभ्य इत्यर्थः। चाचल्यते इत्यादि वाक्यानि। पापतिरिति, (८२६) नीग् वञ्चेत्यत्र पतॢज गत्यामित्यस्य ग्रहणात्। पत्ऌ ऊैश्ये इत्यस्य नीगोऽभावे पापत्य-धातुः, तस्मात् किः, (७७५) इचाल्लोप इति अकार-यकारयो र्लोपः। वार्त्तिकम्।

१११९ । क्वि श्चादृङुलोपिनः ।

(क्वि १।, च ।१।, आत्-ऋ-ङुलोपिनः ५।) ।

आदन्तात् ऋवर्णान्तात् ङुलोपिनश्च क्विः स्यात् घे, तेषाञ्च द्वित्वं । ददिः चक्रिः जग्निः ।*

११२० । यायाय भास कस स्थेश पिश प्रमदो वरः ।

(यायाय—प्रमदः ५।, वरः १।) ।

एभ्यो वरः स्यात् घे । यायावरः भास्वरः कस्वरः स्थावरः ईश्वरः पेश्वरः प्रमद्वरः ।†

११२१ । क्वरप् सृजीन्नशगम स्त मश्च ।

(क्वरप् ।१।, सृ-जि-इन्-नश-गमः ५।, त ।१।, मः ६।, च ।१।) ।

एभ्यः क्वरप् स्यात् घे, मस्य तश्च । सृत्वरी जित्वरी इत्वरी नश्वरी गत्वरी ।‡

---

* आत् च ऋश्च ङुलोपी चेति तस्मात् । ङुलोपिनश्च (२३०) सूत्रे दर्शिताः । ददातीति ददिः, क्विः, द्वित्वं, (६१०) उसेचेति आलोपः । एवं दधि । करोति किरति इति वयोः चक्रिः । एवं सस्रिः । जायते इति जग्निः, द्वित्वं, (२३०) ङुलोपः, (४६) नस्य ञ । एवं हन—जघ्निः, गम-जग्मिः, खन—चख्निः, घस—जक्षिः । पाणिनिः ३।२।१७१, वार्त्तिकञ्च ।

† वक्र यातीति यङि यायाय धातुः, भासृ ङ न दीप्तौ, कस ञ गतौ, ष्ठा स्थाने, ईश ङ ल ऐश्वर्य्ये, पिश श पावयवे, प्रपूर्व्व-मदी भिर्यं ञि हर्षं—एभ्य इत्यर्थः । यायाय धातोः वरः (१०३३) इमनिषेधे, (७७५) अकारलोपे, (६४२) यलोपः । ईश्वरः इति वरप्रत्ययस्य दन्त्यादित्वात् (१५४) न षङ् । पाणिनिः ३।२।१७५,१७६ । एतन्मते पिस दन्त्यान्तः । प्रमद्वर इति पदं कातन्त्रादगृहीतम् ।

‡ क्वरपः कित्त्वात् (५४२) अगुणः, षित्त्वात् (२५७) ईप्, पित्त्वात् (९८२) तन् । सरति जयति एति नश्यति गच्छतीति वाक्यानि । नश्वरीति (१०३३) इवर्त्तेरिति इमनिषेधः । गत्वरीति अनेन मस्य त । पाणिनि, ३।२।१६३,१६४ ।

११२२। हिंस दीप कम्पाजस स्मिङ् कम नमो रः। (हिंस—नमः ५।, रः १।)।

एभ्योः रः स्यात् घे। हिंस्रः दीप्रः कम्प्रः अजस्रः स्मेरः कम्रः नम्रः। *

११२३। सनभिक्षाशंस उः।

(सन्-भिक्ष-आशंसः ५।, उः १।)।

एभ्यः उः स्यात् घे। रिप्सुः भिक्षुः आशंसुः। †

११२४। विन्दिच्छू। (१॥)।

एतौ निपात्यौ। वेत्तीति विन्दुः, इच्छतीति इच्छुः। ‡

११२५। स्वप तृष धृषो नजङ्।

(स्वप-तृष-धृषः ५।, ङ्नज् ।१।)।

एभ्यो नजङ् स्यात् घे।, स्वप्नक् तृष्णक् धृष्णक्। §

११२६। शृवन्द आरुः। (शृ-वन्दः ५।, आरुः १।)।

आभ्यामारुः स्यात् घे। शरारुः वन्दारुः। ¶

---

* हिनस्ति दीप्यते कम्पते न जस्यति स्मयते कामयते नमतीति वाक्यानि। हिंस इत्यादौ (१०३३) इमनिषेधः। कम इति (५९२) वारे इति ञिङोऽप्राप्तिपक्षे। पाणिनिः ३।२।१६७।

† रब्धुमिच्छति, सन्, (८११) खिलोपः इम च, (२१३) स्यादेः स-लोपः, (६४) भस्य प, रिप्स इत्यस्मात् उः, (७७५) अकारलोपे रिप्सुः। भिक्षते भिक्षुः, आशंसते आशंसुः। पाणिनि. ३।२।१६८।

‡ पाणिनिः ३।२।१६९।

§ ङ्नजो ङ इत् गुणाभावः, नज्-स्थितिः। स्वपिति, तृष्यति, धृष्णोति, इति वाक्यानि, तृषधृषोः (१०३३) इमनिषेधः, (२११) कुक्। पाणिनिः ३।२।१७२, वार्त्तिकञ्च।

¶ शृणाति वन्दते इति वाक्यद्वयं। पाणिनि, ३।२।१७३।

११२७। क्रुक्लुकौ भियः । (क्रुक्लुकौ १॥, भियः ५।) ।

भीरुः भीलुकः । *

११२८। स्पृहि गृहि श्रु दृ जे राय्यः ।

(स्पृहि—जेः ५।, आय्य. १।) ।

एभ्य आय्यः स्यात् घे । स्पृहयाय्यः गृहयाय्यः श्रवाय्यः दराय्यः जयाय्यः । †

११२९। गण्डि मण्डि जि जनि नन्दिभ्योऽन्तः ।

(गण्डि—नन्दिभ्यः ५॥, अन्तः १।) ।

एभ्योऽन्तः स्यात् घे । गण्डयन्तः मण्डयन्तः जयन्तः जनयन्तः नन्दयन्तः । ‡

११३०। स्तनि गदि मदि हृदि दूषे रित्नुः ।

(स्तनि—दूषेः ५।, इत्नुः १।) ।

एभ्य इत्नुः स्यात् घे । स्तनयित्नुः गदयित्नुः मदयित्नुः हृदयित्नुः दूषयित्नुः । §

---

* भीधातो रेतौ स्यातां घे । उभयोः कित्त्वात् गुणाभावः । बिभेतीति वाक्यं । क्रुकन्नपि वक्तव्यम् । भीरुकः । पाणिनिः ३।२।१७४ ।

† स्पृहत् कीप्से, गृहत् क ङ ग्रहे, द्वौ अदन्त चुरादी ; श्रु श्रुतौ, दृङ आदरे, जि जये—एभ्य इत्यर्थः । आद्योदाहरणद्वये,(६४१) आय्य-वर्जनात् न ञेर्लोपः । उणादिः ।

‡ गडि गण्डे, मडि क भूषे, जि जये, जनी य्यङ् प्रादुर्भावे, टु नदि समृद्धि । अत्र ञिवर्जाः सर्व्वे ञ्यन्ताः । गण्डयन्त इत्यादौ, (६४१), अन्त-वर्जनात् न ञेर्लोपः । गण्डयन्त इति तु पदं संक्षिप्तसारे दृश्यते । उणादिः ।

§ स्तनत् क गदत् क वाक्यध्वनौ, द्वावदन्तचुरादी । मदी भिर्य ञि हर्षे, ञ्यन्तः, घटादित्वात् ह्रस्वे मदि । हृत् करोति आचष्टे वा (८५५) ञिः हृदिः । दुर्दुष्यौ

११३१ । कॄ गॄ जागृः क्विः । (कॄ गॄ-जागृः ५।, क्विः १।) ।

एभ्यः क्विः स्यात् घे । कीर्व्विः गीर्व्विः जागृविः । *

११३२ । स्वयं शं वि सं प्राद् भुवो डुः ।

(स्वयं—प्रात् ५।, भुव. ५।,(डुः १।) ।

एभ्यो भुवो डुः स्यात् घे । स्वयम्भुः शम्भुः विभुः सम्भुः प्रभुः ।†

११३३ । लू ऋ धू खन सू चर पू सह वह इत्रो घे । (लू-ऋ धू खन-सू चर-पू-सह-वहः ५।, इत्रः १।, घे ७।) ।

एभ्य इत्रः स्यात् घे । लवित्रं अरित्रं धवित्रं खनित्रं सवित्रं चरित्रं पवित्रं सहित्रं वहित्रं । ‡

११३४ । घञलनटो ऽघे । (घञ्-अल्-अनटः १॥, अघे ७।) ।

घोरेते स्युः न तु घे । प्राकारः, पादः, दासः, उपाध्यायः,

वैकृते, ञि, गुणे, (७९७) भीस्थाने ऊ कृते दृषिः । स्तनयित्नुरित्यादौ (६४१) इनु-वर्ज्जनात् न ञेर्लोपः । उणादिः । तत्र तु हृदिस्थले हृषिर्दृश्यते ।

* कॄ श विक्षेपे, गॄ श निगरणे गॄगि शब्दे इति द्वयं, जागृ स्लु जागरे । किरतीति कीर्व्विः, (१०३३) इवत्रतेरिरिति इमनिषेधे, (६२८) इर्, (२२८) दीर्घः । एवं गिरति गृणाति वा गीर्व्विः । जागर्त्तीति जागृविः (६९९) वि-वर्ज्जनात् न गुणः । उणादिः । क्विः जागर्विरिति तु संक्षिप्तसारः ।

† डु इत्यस्य डित्वात् (१२६) टिलोपः । एतत्-पर्य्यन्तेषु ताच्छील्यार्थाधिकारः । पाणिनिः ३।२।१८०, वार्त्तिकञ्च ।

‡ लू ञ गि छिदि, ऋ प्रापे, धू ञ गि कम्पे, खनु ञ विदारे, षू ङ ल सूतौ, चर गतौ भदने आचारे, पू ञ गि शोधे, सह कि षह ञ ङ शक्तौ, वहे ञौ प्रापणे । घे करणवाच्यं । लूयतेऽनेन, अर्य्यतेऽनेन इत्यादि वाक्यानि । पाणिनिः ३।२।१८४—१८६। एतन्मते वहित्रम् उणादिसिद्धम् । देवतायां कर्त्तरि पवित्रं ।

प्रासादः। समाजः, ग्रमः, कामः वामः आचामः, श्रमः श्रामः यमः यामः विश्रमः विश्रामः। *

११३५। क्भावेऽसौ। (क भावे ७।, असौ १॥)। †

प्रघसः, वधः, करः निलयः समजः मयः लयः।

स्नानं मानं दानं प्रवेपनं, वयनं अजनं, दरिद्राणं ग्रयनं। ‡

---

* घस्य वर्जनात् कर्म्मादि-कारके भावे च वाच्ये इत्यर्थः। 'भावो धात्वर्थः, क्रियामात्रवाचीति यावत्। क्रियायाश्च अवस्थाद्वयं भवति, तथाच—अवस्थे द्वे क्रियायाः स्तः साध्यता सिद्धतापि च। साध्यता त्यादि-वाच्या स्यात् सिद्धता द्रव्यवत् भवेत्। द्रव्यवत्त्वं घञादिः स्यात् योगो लिङ्गेन सङ्ख्यया इति। तेन पाकः पाकौ पाकाः इत्यादि। पाणिनिः ३।३।१८,१९,५६-८७,११५ ११७। एतन्मते अच्, अप् = अल्। ल्युट् = अनट्।

घञो घकारः (९७२) घजो कगार्थः,ञकारः (५७७) वृद्ध्यर्थः। यथा पाकः भाग इत्यादि। अलो लकारः कातन्त्राद्यनुयायी। अनटष्टकार (२५७) ईबर्थः। प्राकार इत्यादि, प्रकर्षेण क्रियते ऽसौ, कर्म्मणि घञ्, वृद्धिः। अस्य दीर्घविधानात् घञन्त-धातौ परे क्वचिदुपसर्गस्य दीर्घत्वं स्यादिति सूचितं। तथाच—उपसर्गस्य दीर्घत्वं क्विप्घञादौ क्वचित् भवेदिति प्राञ्चः, ("उपसर्गस्य घञि अमनुष्ये बहुलम्" इति पाणिनिः (६।३।१२२), मनुष्यभिन्ने इति किं, निषादः।) यथा—प्रा[illegible]: नीहारः नीवारः प्रतीकारः प्रतीहारः व्यतीहारः व्यतीपातः परीरम्भः परीवादः अतीसारः, क्विपि परीतत् नीवृत् (१०४२,१०४६ सूत्रटीका द्रष्टव्या) इत्यादि।

पद्यते ऽनेनेति पादः, दास्यते ऽस्मै दासः, उपेत्य अधीयते ऽस्मात् उपाध्यायः, प्रसीदन्ति (मनांसि) अस्मिन् प्रासादः इति कारकोदाहरणानि। भावे यथा, समजनं समाजः समूहः, (५८६) घञ्वर्जनात् न वी-आदेशः। ग्रमनं ग्रमः, घञि वृद्धौ, (७४४) अमवधेति ह्रस्वः। काम इति (५९२) वारे इति ञिडोऽप्राप्ति-पक्षे घञि वृद्धिः, अमवधेत्यत्र वर्जनात् न ह्रस्वः, एवं वामः आचामः। श्रम यम विश्रमा वा ह्रस्वे श्रमः श्रामः इत्यादि।

† पूर्व्वसूत्रे घञादयः कर्त्तरि न स्युरित्युक्तापि, अत्र सूत्रे असौ सर्व्वकारकेषु भावे च स्युरित्युक्तवता, प्रयोगानुसारेण क्वचित् कर्त्तर्य्यपि स्युरिति सूचितं। यथा, घञि रुजतीति रोगः, अतिसरतीति अतीसार इत्यादि। अन्यच्च पूर्व्वसूत्रे संज्ञायां, अत्र असंज्ञायामिति। पाणिनिः ३।३।११३।

‡ अलि उदाहरति, प्राश्नोति प्रघसः, (९७३) अदो घसादेशः। हननं वधः, (९७८) हनो वधादेशः। क्रियते ऽनेन करः। निलीयते ऽस्मिन् निलयः, (७४५)

११३६। ष्ठीवन-सीवने वा। (ष्ठीवन-सीवने १॥, वा ।१।)।

एते निपात्ये वा। पक्षे ष्ठेवनं सेवनं। *

११३७। मुण् लभोऽनेकदुःसोर्गेः खलघञोः।

(मुण् ।१।, लभः ६।, अन्-एक-दुः-सोः ५।, गेः ५।, खल्-घञोः ७॥)।

केवलदुःसुवर्जात् गेः परस्य लभो मुण् स्यात् खलि घञि च। प्रलम्भः। अन्यच दुर्लभः। एकेति किं, अतिदुर्लम्भः। †

११३८। स्यदैधावोद हिमश्रथ प्रश्रथ स्फार स्फाल राग काय निकायाकायाः। (१॥)।

एते घञन्ता निपात्यन्ते। स्यदो वेगः। एध इध्मं। अवोद अवक्लेदः। हिमश्रथः हिमश्रन्थनं। प्रश्रथः प्रश्रन्थनं। स्फारः

अलवर्जनात् न ङा। सञ्जनं सङ्गः, (५८६) अलवर्जनात् न वी-आदेशः। डु मि ञ न क्षेपे मी ञ ग वधे इति द्वाभ्यां भावे अल् मयः, (७४५) अलवर्जनान्न ङा। एवं ली ङ् य श्री-श्लिषि, लयनं लयः। अनट् यथा, ग्लायते इति भावे ऽनट् ग्लानं। मा-स्वरूपाणा मिम्योश्च (७४५) ङादेशे मानं। दा-स्वरूपाणां दीङश्च (७४३) ङादेशे दानं। प्रवेपनमिति (६६८) वेपवर्जनात् न णत्वं। अज-अनट् (५८६) विकल्पेन वी-आदेशे वयनं अजनं। दरिद्राणमिति (७०२) अनपवर्जनान्न आलोपः। श्री ङ ल श्रयने श्रयनं। कारके अनट् यथा—छिद्यते ऽनेनेति छेदनः खङ्गः, बध्नाति रज्जुरित्यादि।

* ष्ठिवु निरसने, षिव्यु तन्तुसन्ततौ एतयो र्भावे ऽनटि दीर्घो वा निपात्यते, पक्षे गुणः। "ष्ठिवुसिवोर्दीर्घश्च" इति चान्द्रसूत्रम्। पृषोदरादित्वादिति पाणिनीयाः।

† एकौ (अद्वितीयौ) च तौ दुःसू चेति एकदुःसू, न विद्येते एकदुःसू यत्र सोऽनेकदुःसु तस्मात्। मुणो ण इत् अन्त्यात् परः, उकारश्चिकार्थः, म-स्थितिः। प्रलम्भः इति घञि अनेन मुण्। केवल-दुःसुवर्जनात् दुर्लाभः, एवं सुलाभः। अतिदुर्लम्भः इत्यत्र न केवलदुः। (७४१) मुणरध इत्यनेन सिद्धेऽपि एतद्विधानं नियमार्थं। पाणिनिः ७।१।६७,६८।

स्फोरणं। स्फालः स्फोलनं। रज्यतेऽनेनेति रागः। कायो देहः। निकायो निवासः। आकायश्चितिः। *

११३९। खनो ड-डरेकेकवकाः।

(खनः ५।, ड-डर-इक-इकवकाः १॥)।

आखः आखरः आखनिकः आखनिकवकः। †

११४०। व्याप्तौ भावे णिनः।

(व्याप्तौ ७।, भावे ७।, णिनः १।)।

धोर्भावे णिनः स्यात् व्याप्तौ सत्यां। णिनान्तात् स्वार्थे ष्णः। सांराविणं वर्त्तते। ‡

११४१। व्यतीहारे णन् स्त्री।

(व्यतीहारे ७।, णन् ।१।, स्त्री ।१।)।

---

* स्यन्द् ङ-वल्ह् चरणे स्यदः, वेगादन्यत्र स्यन्दः। ञि इन्धीङ् दुतौ एधः कार्ष्ठं, अन्यत्र इन्धः। अवपूर्व्व उन्द धौ क्लेदे अवोदः, अवादन्यत्र उन्दः प्रौन्दः। ग्रन्थ ग मोचे, हिमस्य ग्रन्थनं हिमश्रथः प्रश्रन्थनं प्रश्रथः, अन्यत्र ग्रन्थः परिग्रन्थः। स्फुर स्फुल च श्रि स्फूर्त्तौ आन्तस्य स्फारः, स्फालः। स्फार इति (७९३) क्रीञीङ् इत्यनेन आ कृते, स्फुल धातोश्च स्फाल इति सिद्धावपि, निपातनं, पक्षे स्फोरः स्फोल इति अनिष्ट-निवारणार्थं। रन्ञौ ञ रागे, करणे भावे वा रागः, अन्यत्रे रङ्गः। चि ञ न चित्यां कायः, निकायः, आकायः, अन्यत्र चायः निचायः आचाय इति। चितिश्चितेत्यर्थः। पाणिनिः ६।१।४७, ६।४।२७,२८,२९, ३।३।४१।

† खन धातोः ड डर इक इकवक एते स्युः कभावे इत्यर्थः। ड डरयो डित्त्वात् टिलोपः। वार्त्तिकम्।

‡ णिनस्य ण इत् वृद्ध्यर्थः। संपूर्व्व रु स ध्वनौ भावे णिने, वृद्धौ, संराविण इति स्थिते, (४३३) स्वार्थे ष्णे, (४१६) ष्णित्त्वे त्रिरिति आद्यचो वृद्धौ, (२५८) ययोर्लोप इत्यकार-लोपे, सांराविणं, बहूनां समवेतशब्द इत्यर्थः। पाणिनिः ३।३।४४, ५।४।१५।

धोर्भावे णन् स्यात् व्यतीहारे, णनन्तात् स्वार्थे ष्णः, तदन्तस्य स्त्रियां। व्यावहारी। *

११४२। ट्वितोऽथुर्भावे।

(ट्वितः ५।, अथुः १।, भावे ७।)।

टुकारेतो धोरथुः स्यात् भावे। वेपथुः। †

११४३। ड्वितस्तज्जे त्रिमक।

(ड्वितः ५।, तज्जे ७।, त्रिमक् १।)।

डुकारेत स्त्रिमक् स्यात् ध्वर्थान्निष्पन्ने। करणाज्जातं कृत्रिमं। ‡

११४४। स्वप रक्ष यत प्रच्छ विच्छ याच यजो नङ् भावे न जिः।

(स्वप—यजः५।, नङ्।१।, भावे ७।, न।१।, जिः १।)।

---

* णनो णकारो वृद्ध्यर्थः, नकारस्तु (१०००) दुर्भीभुज्वन्तादीति णप्रत्ययेन सह प्रभेदार्थः, तत्फलञ्च (४१७) य्वोर्य्युमदान्तेत्यत्र* व्यक्तं। अकार-स्थितिः। परस्पर-व्यवहरणं इति वाक्ये व्यावहारी, व्यव-हृ-णन्, (५७७) वृद्धिः, व्यवहार इति स्थिते, (४३२) स्वार्थे ष्णः, (४१७) य्वोर्य्युम इत्यत्र णनन्तवर्जनात् यकारस्य न इम, (४१६) आद्यचो वृद्धिः, (२५८) अकारलोपः, (२५७) षित्त्वादीप्, पुनः अकारलोपः। एवं परस्पर-व्याक्रोशनं व्याक्रोशीत्यादि। पाणिनिः ३।३।४३, ५।४।१४।

† टु इत् यस्य स ट्वित् तस्मात्। पृथक् योगात् व्यतीहारस्य स्त्री इत्यस्य च नानुवृत्तिः। वेपनं वेपथुः। एवं वमथुः दवथुः भाजथुरित्यादि। पाणिनिः ३।३।८९

‡ डु इत् यस्य स ड्वित् तस्मात्। तस्मात् (ध्वर्थात्) जातं तज्जं (९९७) डप्रत्ययेन सिद्धं, तस्मिन्। डु कृ ञ इत्यस्मात् त्रिमक्, कित्त्वादगुणे कृत्रिमं, एवं डु दा ञ दत्त्रिमं (१०८८) दा स्थाने दत्, डु धा ञ (१०८६) हित्रिमं, डु पच ष पक्त्रिमं, डु वप उप्त्रिमं, डु भृ ञ भृत्रिममित्यादि। पाणिनिः ३।३।८८, ४।४।२०।

एभ्यो नङ् स्यात् भावे, न च जिः। स्वप्नः रक्ष्णः यत्नः प्रश्नः विश्नः याच्ञा यज्ञः। *

११४५। क्विहृद्रोऽन्तागेः। (क्विः ११, द ५।, अन्तर्-गेः ५।)।

अन्तरो गेश्च परात् दा-संज्ञकात् क्विः स्यात् भावे। अन्तर्द्धिः आदिः। †

११४६। ढाड्डे। (ढात् ५।, ङि ७।)।

ढात् परात् दः क्विः स्यात् ङे। वारिधिः पयोनिधिः। ‡

११४७। क्तिः स्त्र्यघे। (क्ति ११, स्त्री ११, अघे ७।)।

धोः क्तिः स्यात् न तु घे, तदन्तश्च स्त्रियां। कृतिः बुद्धिः मतिः स्मृतिः प्रकृतिः। (१०८२) ह्लादेः स्वः क्तौ चेति। प्रह्लत्तिः, भूतिः फुल्तिः। §

---

* नङो ङित्त्वात् गुणाभावः, न-स्थितिः। न जिरिति निषेधात् (६६१) यङ्स्वपाद्योरिति प्राप्तस्य जेर्निषेधः। प्रश्नः विश्नः उभयत्र (८१४) च्छ्वोः शूटाविति छस्य शः। याच्ञा इति (४६) नस्य ञः, अभिधानात् स्त्रीत्वं, (२४६) आप्। यज्ञ इति (४६) नस्य ञः। एषु (१०३३) ह्वष्वतेरिति इमनिषेधः। पाणिनिः ३।३।९०,९१।

† अन्तर्द्धानं अन्तर्द्धिः, आदानं आदिः, क्वित्त्वादगुणे, (६१०) उसचोति आलोपः। पाणिनिः ३।३।९२, वार्त्तिकञ्च।

‡ ङे अधिकरणवाच्ये। वारि धीयतेऽस्मिन्, पयो निधीयतेऽस्मिन् इति वाक्यद्वयं। पाणिनिः ३।३।९३।

§ घः कर्त्ता, तस्य वर्जनात् कर्त्तृभिन्न-कारके भावे च वाच्ये इत्यर्थः। क्रियतेऽसौ इति कर्म्मणि, करणमिति भावे वा कृतिः। बुध्यतेऽनया इति करणे, बोधनमिति भावे वा बुद्धिः, (५७५) तस्य ध, (६४) धस्य द। मननं मतिः, (६७६) अमृलोपः। स्मरणं स्मृतिः। प्रक्रियतेऽनया करणे प्रकृतिः। प्रह्लादनं प्रह्लत्तिः, (१०३३) ह्वष्वते-

११४८। कॄ गॄ ज्याग्लाह्लाल्वादेर्निः।

(कॄ—ल्वादेः ५।, निः १।)।

एभ्यः परस्याः क्तौ निः स्यात्। कीर्णिः गीर्णिः ज्यानिः ग्लानिः ह्रानिः लूनिः पूर्णिः। *

११४९। साति हेति यूति जूति। (१।॥)।

स्यति-हिनोति-यौति-जवतीना-मेते क्त्यन्ता निपात्यन्ते। †

११५०। शी व्रज यज विद् स्वास मन चर भ्रटाव्येन समज निपत निषदः क्यप्।

(शी—निषदः ५।, क्यप् ।१।)।

एभ्यो भावे क्यप् स्यात् तदन्तश्च स्त्रियां। शय्या व्रज्या इज्या विद्या सुत्या आस्या मन्या चर्या भृत्या अटाट्या इत्या समज्या निपत्या निषद्या। ‡

रितीम्निषेधः (प्रह्निरिति तु सिद्धान्तकौमुदी)। भूयते ऽनया भूतिः सम्पत्तिः, भवनमिति वा, (१०५३) वृदुश्रीति इम्निषेधः। फलनं फुल्तिः, (१०८७) चरफलोऽदुरिति अकारस्य उः। पाणिनिः ३।३।९४।

* लू आदि र्यस्य स ल्वादिः, कॄश्च गॄश्च ज्याश्च ग्लाश्च ह्राश्च ल्वादिश्च, समाहारे तस्मात्। ल्वादिश्च (७६९) सूत्रटीकायां द्रष्टव्यः। कीर्णिरिति, क्तेः स्थाने निः (१०५३) इम्निषेधः, (६२८) ऋस्थाने इर्, (२२८) दीर्घः। एवं गीर्णिः। ज्यानिरित्यत्र क्तेः स्थानिवत्त्वाम्नीकारात् (६६१) न गिः। ह्रानिरिति ह्रा-ङ धातोः क्तेः स्थाने निः, (६१२) दामागेह्राक इति ह्राक-ग्रहणात् न ङी। ("ओ हाक् हानिरपचयः" इति तु संक्षिप्तसारः)। लूनिरिति (१०५३) इम्निषेधः। पूर्णिरिति पॄ-धातोः। पूर्त्तिरिति तु पूर-धातोरेव। सुपद्मे संक्षिप्तसारे च तु पॄधातोः पूर्त्तिरिति। उणादिः, वार्त्तिकञ्च।

† सो य नाशे, हि न वर्द्धने गतौ, यु ल मिश्रणे, जु गतौ, एषामेते प्रयोगा इत्यर्थः। सातिरित्यत्र, (१०८२) दोषोमास्थां ङिरिति न ङिः। पाणिनिः ३।३।९७।

‡ अत्र, सूत्रे भावे इति नोक्ता वृत्तौ भावे इति व्याख्यानात् प्रयोगानुसारेण

११५१ । कृ: श्च । (कृ: ५।, श: १।, च ।१।) ।

करोते: श: स्यात् क्यप् च, भावे, सच स्त्रियां। क्रिया, कृत्या ।*

११५२ । सृ-जागृ र्य: । (सृ-जागृ: ५।, य: १।) ।

आभ्यां य: स्यात् भावे, सच स्त्रियां । परिसर्य्या जागर्य्या । †

११५३ । शंस्त्याद: । (शंस् त्यात् ५।, अ: १।) ।

आभ्याम: स्यात् भावे, सच स्त्रियां । प्रशंसा, दिदृक्षा अटाटा कण्डूया । ‡

कर्त्तृभिन्ने कारकेऽपि स्यात्, यथा, शेतेऽस्यामिति अधिकरणे शय्या खट्वादि:, शयनमिति भावे वा, क्यप्, (८३५) शीङो ङय्, स्त्रीत्वात् (२४९) आप् । व्रजनं व्रज्या । यजनं इज्या, (६६१) जि । विदन्त्यनया इति करणवाच्ये विद्या, वेदनं (ज्ञानं) इति वा । सवनं (यजनं) सुत्या, (९८२) तन् । आसनं आस्या । मन्यते ऽनया मन्या (पश्चाद्ग्रीवाशिरा), मननमिति वा । चरणं (आचरणं) चर्य्या । भरणं (पोषणं) भृत्या । अट-यङ्, अटाट्यधातो: क्यप्, (७७५) हसाल्लोप इति क्रमश: अकार-यकारयो-र्लोप: अटाट्या मुहुर्भ्रमणं । एति अनया, अयनं वा, इत्या । समजन्ति (सङ्गच्छन्ते) अस्यामिति समज्या, सभा, समजनमिति वा । (५८६) क्यप्वर्जनात् न वी-आदेश: । निपतन्त्यस्यामिति निपत्या, पिच्छिला भूमि: । निषीदन्त्यस्यामिति निषद्या, क्रयविक्रय-भूमि: । पाणिनि: ३।३।९८,९९ वार्त्तिकञ्च ।

* श इत् र-संज्ञ:, अकार-स्थिति: । कृ-अ:, (भाववाच्ये) (९२१) र-तनोरिति यक्, (६२०) ऋत रि:, स्त्रियामाप्, क्रिया । क्यपि च, गुणाभावे, (९८२) तन्, कृत्या । अत्र चकारेण क्तेरपि समुच्चयात् कृति: इति च । पाणिनि: ३।३।१०० ।

† परिसरणं परिसर्य्या, परिपूर्व्वस्यैव प्रयोग: । जागरणं जागर्य्या । वार्त्तिकम् ।

‡ शन्स च त्यश्चेति शंस्त्यं तस्मात् । त्य: प्रत्ययान्त: । प्रशंसनं प्रशंसा । दृश-सन्, (१५४) षढ् (६०२) षस्य क:, दिदृक्ष धातो: अ-प्रत्यय:, (५४३) पूर्व्वाकार-लोप:, दिदृक्षा । एवं चिकित्सा इत्यादि । अटाटा इति अट-यङ्, अटाट्यधातो:

११५४। सेम्क्तात् सरोः। (सेमक्तात् ५।, सरोः ५।) ।

यस्मात् क्तो विहितः सेम् स सेम्क्तः, तस्मात् रुमतो धोः अः स्यात् भावे, सच स्त्रियां। ईहा जागरा। सेम्क्तात् किं, नीतिः राद्धिः। रुमतः किं, पक्तिः। *

११५५। तुलेच्छारा तारा धारा कारा हारा गोधा लेखा रेखा चूड़ाः। (१॥) ।

एते अान्ता निपात्यन्ते। चोदना चूड़ा। †

११५६। भीषि चिन्ति पूजि कथि कुम्बि चर्चि स्पृहि तोलि दोलि षिद् भिदाद्यात्वर् घटादेङः। (भीषि—आत्वर् घटादेः ५।, ङः १।) ।

अः, (७७५) अकार-यकारयो र्लोपः। कण्डूया इति कण्डूशब्दात् (८५४) क्यः, कण्डूय धातोः अः। अचः परत्वात् (७७५) न अकार-यकार-लोपः। एवं ऋतीया गोपाया इत्यादि। पाणिनिः ३।३।१०२। "शंसिप्रत्ययाद:" इति कातन्त्रे कृत्सु पञ्चमे पादे।

* इमा सह वर्त्तते यः स सेम्, सेम् क्तो यस्मात् स सेम्क्तस्तस्मात्। सेमक्तात् गुर्व्वक्षरयुक्तात् धातोः अः स्यादित्यर्थः। ईहनं ईहा, जागरणं जागरा। क्ते कृते ईहितं जागरितं। नयनं, नीयते ऽनया इति वा, नीतिः; राधनं राद्धिः। क्ते कृते नीतं राद्धं। पक्तिरिति पच-क्तिः, क्ते पचितमिति। पाणिनि. ३।३।१०३, वार्त्तिकञ्च।

† तुल धातोः, तोलयत्यनया तुला परिमाणदण्डः। इष धातो-रिच्छा। ऋ—आरा क्षुरिका। तॄ—तारा नक्षत्रं, उद्धारकारिणी भगवती च। धृ—धारा, द्रवद्रव्यपतनं, वृष्ट्यादिपतनं, खड्गादि निशितस्थलं, समूहः, प्रकारश्च। कॄ—कारा बन्धनालयः। हृ—हारा हरणं, हारश्च। गुध—गोधा अङ्गुलित्रं, गोधिका च। लिख—लेखा लिखनं, लकारस्य रेफे रेखा च, श्रेणी। चुड—चूड़ा, चोदना प्रेरणा इत्यर्थः। पाणिनिः ३।३।१०१,१०४। तुलाशब्दस्तु पृथक् सिद्धः।

एभ्यो भावे: ङः स्यात्, सच स्त्रियां।
भीषा चिन्ता पूजा कथा कुम्बा चर्चा स्पृहा तोला दोला, पचा,
भिदा छिदा गुहा विदा चिपा जना पीड़ा सरा वसा रुजा,
घटा व्यथा त्वरा। *

११५७। आतो ऽन्तःश्रद्गेः।

(आतः ५।, अन्तर्-श्रत्-गेः ५।)।

एभ्यः परादादन्तात् ङः स्यात्, सच स्त्रियां। अन्तर्द्धा श्रद्धा, संज्ञा प्रमा। †

११५८। औ-षि अन्थि ग्रन्थि वेत्ति वन्दासो ऽनः।

(जि—आसः ५।, अनः १।)।

एभ्यो ऽनः स्यात् सच स्त्रियां।

---

* ष इत यस्य स षित्। भिद आदि र्यस्य स भिदादिः। आत्वर् त्वरपर्य्यन्तः, स चासौ घटादिश्चेति आत्वर्घटादिः। ततः, भीषिश्च चिन्तिश्चेत्यादि द्वन्द्वे तस्मात्। भीष्यादि दोलि-पर्य्यन्ता नव ञ्यन्ताः। षित् गणपाठे मूर्द्धन्यषकारेत् धातुः। भिदादि र्गणः। ङ इत्यस्य ङ इत, अकारस्थिति। भी-ञि, भीषि—ङः, (६४१) ञिलोपः, (२४९) आप्, भीषा। एवं चिन्ता इत्यादि। पचा इति डु औ ष् पच पाके, षित्त्वात् ङः। एवं मृजा क्षमा इत्यादि। भिदादि र्यथा, भिदा छिदा गुहा विदा चिपा एषु ङित्त्वात् न गुणः। जना इति (२३०) हनगमेत्यत्र ङवर्जनात् न उङ्-लोपः। सरा इति (६१९) इग्नोरिति गुणः। आत्वर् घटादि र्यथा, घटा व्यथा त्वरा। एवं जॄ जरा, प्रथ प्रथा, त्रप त्रपा, लज्ज लज्जा, मेध मेधा, वप वपा, कृप कृपा इत्यादयः। पाणिनि: ३।३।१०४,१०५। भीषि इत्यारभ्य दोलि इत्यतः सर्व्वं क्रमिकं कातन्त्रम्।

† अन्तर्धानं अन्तर्द्धा, एवं श्रद्धा, श्रत इत्यव्ययं। संज्ञायतेऽनया संज्ञा नाम। प्रमीयतेऽनया प्रमाणमिति वा प्रमा। एषु (६१०) उस्येचीति आ-लोपे, स्त्रीत्वादाप्। पाणिनि: ३।३।१०६, वार्त्तिकञ्च।

कारणा ईषणा अन्यना ग्रन्थना वेदना वन्दना आसना। *

११५९। प्रश्नाख्याने णिः। (प्रश्न-आख्याने ७।, णिः १।)।

प्रश्ने आख्याने च धो र्णिः स्यात्, सच स्त्रियां। कां कारिमकार्षीः, सर्व्वां कारिमकार्षं। †

११६०। नञो ऽन्याक्रोशे स्त्री।

(नञः ५।, अनि ।१।, आक्रोशे ७।, स्त्री ।१।)।

नञः परात् धो रनिः स्यात्, आक्रोशे, सच स्त्रियां। अजीवनिस्तव भूयात्, अप्रयाणिः। ‡

११६१। ईषत्-दुःसोः खल् भावे ढे।

(ईषत्-दुर्-सोः ५।, खल् ।१।, भावे ७।, ढे ७।)।

एभ्यः परात् धोः खल् स्यात् भावे ढे च। ईषदाढ्यम्भवं भवता, दुराढ्यम्भवं भवता। ईषत्करः कट-स्त्वया, दुष्करः सुकरः। §

---

* जि ञान्तः, जिश्च ईषिश्चेत्यादि द्वन्द्वः। कारि—अनः कारणा इत्यादि। एषु (६४१) ञेर्लोपः। पाणिनिः ३।३।१०७, वार्त्तिकञ्च। "इषेरनिच्छार्थस्य" इति वार्त्तिके तु इषधातोः अन्वेषणा। कातन्त्रे तु ईषिधातुर्लिखितः।

† णि इत्यस्य ण इत् वृद्ध्यर्थं, इ-स्थितिः। कृ-णि, (५७७) वृद्धिः, कारिः कार्य्यमित्यर्थः, अकार्षीः त्वमिति प्रश्नः; अकार्षं अहमिति शेषः। प्रश्ने, आख्याने (उत्तरदाने) च उदाहरणद्वयं। पाणिनिः ३।३।११०। एतन्मते विभाषा। विभाषाग्रहणात् पक्षे यथाप्राप्तं प्रत्यया भवन्ति, क्रियां कृत्यां कृतिं वा।

‡ अ-जीव-अनिः अजीवनिः, अ-प्र-या अनिः अप्रयाणिः (९६८) नोऽच इति णत्वं। स्त्र्यधिकारेऽपि स्त्रीग्रहणं स्त्र्यधिकारनिवृत्त्यर्थं। आक्रोशे किं, अकृतिस्तस्य घटस्य। पाणिनिः ३।३।११२।

§ खलः ख-लौ इतौ, अकारस्थितिः। एषामव्ययत्वात् (१०१४) खित्कार्य्याभावेऽपि, ईषत्दुःसोः परात् धातोः खल्विधानसामर्थ्यात् आढ्यादिशब्दव्यवधानेऽपि

११६२। आतोऽनोऽदरिद्रः।

(आतः ५।, अनः १।, अदरिद्रः ५।)।

दरिद्रावर्जादादन्ता-दीषद्दुःसोः परात् अनः स्यात् भावे ढे च। ईषत्पानः दुष्पानः सुपानः। अदरिद्रः किं, ईषद्दरिद्रं। *

११६३। दृश शास युध धृष मृषो वा।

(दृश—मृषः ५।, वा।१।)।

ईषत् दुः सोः परेभ्य एभ्यो ऽनः स्यात् भावे ढे च वा। सुदर्शनः सुदर्शः, दुःशासनः दुःशासः, दुर्य्योधनः दुर्य्योधः, सुधर्षणः सुधर्षः, ईषन्मर्षणः ईषन्मर्षः। †

११६४। तादर्थ्य चतुम्। (तादर्थ्ये ७।, चतुम् ।१।)।

धो-श्चतुम् स्यात् तादर्थ्ये। कृष्णं द्रष्टुं याति। ‡

स्यादिति, तेन, ईषदाढ्येन भूयते इति वाक्ये ईषदाढ्यशब्दात् भूधातो र्भावे खल्, गुणः, खित्त्वात् आढ्यस्य मन् ईषदाढ्यम्भवं, एवं दुराढ्यम्भवं। ईषत् क्रियतेऽसौ ईषत्करः, एवं दुःखेन क्रियतेऽसौ, सुखेन क्रियतेऽसौ, एषु अव्ययत्वात् न मन्। पाणिनिः ३।३।१२६।

* ईषत् पीयते ऽसौ, दुःखेन पीयते ऽसौ, सुखेन पीयते ऽसौ, एषु कर्म्मणि अनः। ईषत् दरिद्रायते इति पूर्व्वेण भावे खल्, (७०२) दरिद्र आलोपः। पाणिनिः ३।३।१२८।

† सुखेन दृश्यते ऽसौ, अनः सुदर्शनः, पक्षे खल् सुदर्शः। दुःखेन शिष्यतेऽसौ दुःशासनः दुःशासः। दुःखेन युध्यते ऽसौ दुर्य्योधनः दुर्य्योधः। एवं सुखेन धृष्यते ऽसौ, ईषत् मृष्यते ऽसौ। वार्त्तिकम्। एतन्मते नित्यम्। कातन्त्रमते विभाषा।

‡ स धात्वर्थः, स चासौ अर्थः प्रयोजनश्चेति तदर्थः, तस्य भावस्तादर्थ्यं तस्मिन्। यस्य धातोरर्थः अन्य-धात्वर्थस्य प्रयोजनं भवति तस्मात् धातोः चतुम् स्यात्, च इत् अव्ययं, तुम्-स्थितिः। अत्र भावे वाच्ये भविष्यत्काले चेति बोध्यं। द्रष्टुमिति दृश-तुम्, (६०४) ऋकारस्य र, (१५४) षङ्, (४७) तस्थाने ट। अत्र दृश धातोरर्थः या-धात्वर्थस्य प्रयोजनं। क्रिययोरेककर्त्तृत्वे सत्येव चतुम् स्यात्, तेन विप्रं भोक्तुं निमन्त्रयते इति न स्यात्, भोजनाय निमन्त्रयते इत्येव स्यात्। पाणिनिः ३।३।१५८।

११६५ । क्ताच् वा निषेधे ऽलं-खलुना ।

(क्ताच् ।१।, वा ।१।, निषेधे ७।, अलं-खलुना ३।) ।

निषेधार्थयोरलं-खल्वोर्योगे धोः क्ताच् स्याद्वा भावे ।
अलं दत्त्वा अलं दानेन, खलु पीत्वा खलु पानेन । *

११६६ । पूर्व्वकाले । (७) ।

पूर्व्वस्मिन् काले स्थितात् धोः क्ताच् स्यात् । विष्णुं नत्वा स्तौति । †

११६७ । न कित् स्कन्दस्यन्दः ।

(न ।१।, कित् ।१।, स्कन्द-स्यन्दः ५।) ।

स्कन्त्वा स्यन्त्वा । ‡

---

* क्ताच् चकारोऽव्ययार्थः, क इत गुणाभावः, त्वा-स्थितिः । अलं दत्त्वा दानं निषिद्धमित्यर्थः, (१०८८) दा स्थाने दत-आदेशः, पक्षे दानेन (२८९) सहवारणेनेति तृतीया। खलु पीत्वा, पानं निषिद्धमित्यर्थः (६१२) दामा इति ङी। पाणिनिः ३।४।१८।

† यदा कर्त्ता क्रियाद्वयं क्रियात्रयं वा करोति तदा परक्रियापेक्षया पूर्व्वस्मिन् काले वर्त्तमानात् धातोः भावे क्ताच् स्यादित्यर्थः। विष्णुं नत्वा स्तौतीति स्तुति-क्रियायाः पूर्व्वकाले वर्त्तमानात् नम-धातोः क्ताच्, (६७६) अमलोपः। नमति च स्तौति च इत्यादौ समकालत्वात् न स्यात्। अत्रापि क्रियाणा-मेककर्त्तृत्वे एव क्ताच् स्यादिति। पुत्रं दृष्ट्वा सुखं भवतीत्यादौ तु स्थितस्येत्यध्याहारादेककर्त्तृत्वं। अनत्-क्रत्य पतति, मुखं व्यादाय स्वपिति इत्यादौ तु पूर्व्वकालविवक्षयेति वक्तव्यं। पाणिनिः ३।४।२१।

‡ आभ्यां परः क्ताच् किन्न स्यात्। क्ताचः कित्त्वनिषेधस्य फलं (५६७) इमुङ्न इति नलोपाभावः। स्कन्त्वा इति औदित्त्वादिम्निषेधः, स्यन्त्वा इति ऊदित्त्वादिमो विकल्पपक्षे उदाहरणं। उभयत्र त्रौ यत्रैतद्वर्गीया मध्यमस्तत्र लुप्यते इति द-लोपः। एताभ्यां क्ताच एव कित्त्वनिषेधः, क्ताच-स्थानजातस्य यपस्तु कित्त्वमेवेति, तेन प्रस्कद्य प्रस्यद्य। पाणिनिः ४।४।३१।

११६८। सेमऽक्षुध कुष क्लिश गुध मृड मृद वद वस ग्रहः। (सेम् ।१।, अक्षुध—ग्रहः ५।)।

धोः पर इम्सहितः क्त्वाच् कित्न स्यात्, नतु क्षुधादेः। शयित्वा। सेम् किं, श्रुत्वा। क्षुधादेः किं, क्षुधित्वा। *

११६९। तृष मृष कृष वञ्च लुञ्च ऋतो वा।

(तृष— ऋतः ५।, वा ।१।)।

एभ्यः सेम् क्त्वाच् कित्न स्याद्वा। तर्षित्वा मर्षित्वा कर्षित्वा वञ्चित्वा लुञ्चित्वा अर्तित्वा। पक्षे तृषित्वा इत्यादयः। †

११७०। थफान्नुङः। (थ-फात् ५।, नुङः ५।)।

नकारोङ्स्थान्तात् फान्ताच्च सेम् क्त्वाच् कित्न स्याद्वा। श्रन्थित्वा श्रथित्वा, ग्रन्थित्वा ग्रथित्वा, गुम्फित्वा गुफित्वा। नुङः किं, कोथित्वा रेफित्वा। ‡

---

* सह इमा वर्त्तते योऽसौ सेम्, क्त्वाच् इत्यस्य विशेषणं। शयित्वा इति शी त्वा, (५५४) वसोरस्येतीम्, कित्त्वनिषेधात् (५४२) गुणः, (२५) एस्थाने अय। क्षुधित्वा इति, एवं कुषित्वा क्लिशित्वा गुधित्वा मृडित्वा मृदित्वा उदित्वा उषित्वा गृहीत्वा। एषु क्षुधित्वा उषित्वा उभयत्र (१०६६) क्षुधवसेतीम्। क्लिशित्वा इति ऊदित्त्वात् (५७३) इम्पक्षे प्रयोगः। अन्येषु (५५४) वसोरस्येतीम। उदित्वा उषित्वा गृहीत्वा इति (६६१) ञिः। गृहीत्वा इति (७७१) इमोदीर्घः। पाणिनिः १।२।१८,७,८। क्षोधित्वापीति भट्टोजि दीक्षितः।

† ऋत इति ऋत धातुः। तर्षित्वा इत्यादिषु (५५४) वसोऽरस्येतीम्, कित्त्वा-भाव-पक्षे यथासम्भवं गुणः नलोपाभावश्च, कित्त्वपक्षे तु गुणाभावो नलोपश्च। पाणिनिः १।२।२४,२५। एतन्मते कृशः तालव्यान्तः।

‡ येन विधिस्तदन्तस्येति न्यायात् थान्तात् फान्तादिति। श्रन्थित्वेत्यादि सर्व्वत्र (५५४) वसोऽरस्येतीम्। कित्त्वाभाव-पक्षे नलोपाभावः, कित्पक्षे (५६७) नलोपः। कोथित्वा रेफित्वा इति (११६८) सेमऽक्षुधेति कित्त्वनिषेध, गुणः। पाणिनिः १।२।२३।

११७१ । नश-जोऽनिमः । (नश-ज: ५।, अनिम: ५।)।

नशो जान्ताच्च गुणोऽनिमः परः क्त्वाच् किन्न स्यात् ।

नष्ट्वा नंष्ट्वा भक्त्वा भङ्क्त्वा । अनिमः किं, अञ्जित्वा । *

(८१८) व्युणोऽवो हसादेरिति । द्युतित्वा द्योतित्वा, लिखित्वा लेखित्वा । रुदादेस्तु रुदित्वा विदित्वा मुषित्वा । अवः किं, देवित्वा । हसादेः किं, एषित्वा ओषित्वा । †

११७२ । पूक्लिशुदित इम् । (पू-क्लिश-उदित: ५।, इम् ।१।)।

एभ्यः क्त्वाच इम् स्याद्वा । पवित्वा पूत्वा, क्लिशित्वा क्लिष्ट्वा, शमित्वा शान्त्वा । ‡

११७३ । क्रमो घो वा । (क्रम: ६।, घ: १।, वा ।१।)।

---

* नश च ज चेति तस्मात् । नष्ट्वा इति, नश ल य् नाशे ऊदित्वात् (५७३) इमोऽभावपक्षे (७४१) नुण् रध इति नुण्, कित्पक्षे (५६७) न-लोपे, (१५४) षङ्, (४७) तस्थाने ट । अकित्पक्षे नस्यानुस्वारः नंष्ट्वा इति । भक्त्वा इति, भन्ज औ मोटने, औदित्वादिमोऽभावे, कित्पक्षे न-लोपे, (२११) कुङ्, अकित्पक्षे (५०,५१) नस्यानुस्वारः, तस्य च ङ् । अञ्जित्वा इति ऊदित्वात् (५७३) इम्, (११६८) सेमऽसुधेति किन्त्वनिषेधे, नस्यानुस्वारे, तस्य च ञ । अनिम्पक्षे तु अक्त्वा अङ्क्त्वा इति । पाणिनिः ६।४।३२ ।

† व्युणोऽवो हसादेरित्यस्योदाहरणमाह, द्युतित्वेत्यादि (५५४) वमोऽरस्येतीम् । देवित्वा इति दिव्यु क्रीड़ायां उदित्वात (११७२) पूक्लिशुदित इति वा इम्, (११६८) नित्यकिन्त्वाभावे गुणः । अनिमपक्षे (८१४) द्यूत्वा इति । एषित्वा ओषित्वा इति ऊदित्वादनयोरपि वेमत्वादिम्पक्षे नित्य-किन्त्वाभावः । पाणिनिः १।२।२६ ।

‡ (१०५३) वदुश्रीत्यनेन किन्त इम्-निषेधादप्राप्तौ विकल्पार्थं पू इत्यस्य ग्रहणं, पवित्वा (११६८) सेमऽसुधेति किन्त्वनिषेधात् गुणः । तत्रैव क्लिशवर्जनात् क्लिशित्वेत्यत्र न गुणः । शान्त्वा इति (१०३८) अमुङ इति दीर्घः, मस्यानुस्वारस्तस्य च नकारः । पाणिनिः ७।२।५०,५१,५६ ।

क्रमित्वा, क्रान्त्वा क्रन्त्वा । *

११७४ । जृव्रश्चो न ञिः । (जृ-व्रश्चः ६।, न ।१।, ञिः १।)।

आभ्यां क्त्वाच इम् स्यात्, नतु व्रश्चे ञिः । जरित्वा व्रश्चित्वा । †

११७५ । हाको हिः । (हाकः ६।, हिः १।) ।

हित्वा । ‡

११७६ । व्यादनञः क्त्वो यप् से ।

(व्यात् ५।, अनञः ५।, क्त्वः ६।, यप् ।१।, से ७।) ।

नञ्वर्जात् व्यात् परात् धोः क्त्वो यप् स्यात् से सति । प्रकर्षेण कृत्वा प्रकृत्य, प्रवत्य प्रतत्य प्रहत्य, उदज्य, प्रदाय प्रमाय प्रगाय प्रहाय प्रपाय प्रस्थाय । §

---

* क्रमो घंः स्याद्वा क्त्वाचि । क्रमित्वा इति उदित्त्वात् पूर्णिगुदित इति इम्, विकल्पपक्षे अनेन वा दीर्घः । पाणिनिः ६।४।१८ ।

† विभाषाद्वयमध्यवर्त्तित्वादस्य नित्यता । जरित्वा इति (१०५३) वृदुर्षीति इम्-निषेधेऽपि, अनेन इम, (११६८) सेमऽनुधेति कित्त्वनिषेधात् गुणः । (६२७) वृतो वेमीर्घ इति वा इमो दीर्घत्वे जरीत्वा इत्यपि । व्रश्चित्वा इति ऊदित्त्वेन वेमत्वेऽपि अनेन नित्यमिम् । सेम्क्त्वाचः कित्त्वनिषेधादेव ञेरप्राप्तौ अत्र ञेर्निषेधः प्रव्रश्च्य इति क्त्वाचो यपि ञिनिषेधार्थः । पाणिनिः ७।२।५५ ।

‡ हाको हिः स्यात् । हाकः किं, हाङ् इत्यस्य हात्वा । पाणिनिः ७।४।४३ ।

§ नास्ति नञ् यत्र सोऽनञ् तस्मात्, व्यात् इत्यस्य विशेषणं । प्रकर्षेण कृत्वा इति (५४८) व्यस्य ग्यनुकारेति समासे, अनेन क्त्वाचो यपि, क्त्वाचः स्थानित्वेन कित्त्वात् गुणाभावे, (९८२) ह्रस्य तन्, प्रकृत्य । प्र-वन प्रवत्य, प्र-तन प्रतत्य, प्र-हन प्रहत्य, एषु (६७६) अमलोपे, ह्रस्य तन् । उद्-अनुञ (५६७) हसुङ् न इति न-लोपे उदज्य । दा इत्यस्य प्रदाय, मा इत्यस्य प्रमाय, गै प्रगाय, हा-क प्रहाय, पा पाने प्रपाय, स्था प्रस्थाय, एषु (६१२) दामागै इत्यत्र यप्वर्जनात् न ङी । पाणिनिः ७।१।३७ ।

(७४३) दीङस्त्रामिति यपि ङा, प्रदाय। (७४५) मिम्यो-रिति ङा, प्रमाय, प्रलाय प्रलीय। *

११७७। म्लोपो वानिमः।

(म्-लोपः १।, वा ।१।, अनिमः ६।)।

अनिमो मस्य लोपः स्याद्वा यपि। प्रणत्य प्रणम्य। अनिमः किं, प्रशम्य। †

११७८। घो ञेरयः। (घोः ५।, ञेः ६।, अयः १।)।

घु-पूर्व्वस्य ञेरयः स्यात् यपि। विगणय्य। घोः किं, सम्प्रधार्य्य। ‡

११७९। वापः। (वा ।१।, आपः ५।)।

आपः परस्य ञेरयः स्याद्वा यपि। प्रापय्य प्राप्य। §

११८०। वा मेच्व्यो मिच्व्यौ।

(वा ।१।, मे-च्व्योः ६॥, मि च्व्यौ १॥)।

मेङो मिः च्वेः च्वी स्याद्वा यपि। अपमित्य अपमाय, प्रच्वीय प्रच्वित्य। ¶

---

* ओदौ ङ य नये, ङा प्रदाय। डु मि ञ न चंपे, मी ङ य त्, मी ञ ग वधे एषां ङा प्रमाय। ली इत्यस्य विकल्पे ङा प्रलाय प्रलीय इति। अनञः किं, न कृत्वा अकृत्वा। से किं, सर्वादि कृत्वा इत्यादौ न यप्।

† प्र-नम, क्त्वाचो यपि अनेन मलोपे, स्वस्य तन् प्रणत्य, पक्षे प्रणम्य, (५४६) णत्वं। एवं आगत्य आगम्य इत्यादि। प्रशम्य इति सेमत्वात् न मलोपः, एवं विक्रम्य आक्रम्य इत्यादि। निर्जित्य आहृत्य विधृत्य इत्यादौ आगमविधेर्बलवत्त्वात् आदौ स्वस्य तन्, सुतरां (५९०) धौँऽजय्यरे इति न दीर्घावकाशः। पाणिनिः ६।४।३८।

‡ लघोरव्यवहित-परस्थितस्य ञेरसम्भवात् हस्व्यवधाने इत्यर्थः। वि-गणि इति अन्तात् क्त्वाचो यपि, अनेन ञेः स्थाने अय, विगणय्य, एवं विघटय्य इत्यादि। सं-प्र-धारि इति अन्तात् यपि, धा इति गुर्व्वक्षरपूर्व्वत्वात् ञेरयाभावे, ञेर्लोपे संप्रधार्य्य, एवं विभाव्य विनाश्य इत्यादि। पाणिनि. ६।४।५६।

§ प्र-आपि-यप्, प्रापय्य प्राप्य इति, गुरुपूर्व्वत्वादप्राप्तौ, विभाषा। पाणिनिः ६।४।५७।

¶ पुनर्वाग्रहणं न्वाधिकार निवृत्त्यर्थं। अपमित्य इति मे स्थाने मि आदेशे, स्वस्य

११८१। न वे-ज्या-व्यो जिः।

(न ।१।, वे-ज्या-व्यः ६।, जिः १।)।

एषां जि र्न स्यात् यपि। प्रवाय प्रज्याय प्रव्याय। *

११८२। सं-परि-व्यो वा। (सं-परि-व्यः ६।, वा ।१।)।

आभ्यां व्येञो जि र्वा स्यात् यपि। संवीय संव्याय, परिवीय परिव्याय। †

११८३। णम् वाभीक्ष्ण्ये पूर्व्वकाले।

(णम् ।१।, वा ।१।, आभीक्ष्ण्ये ७।, पूर्व्वकाले ७।)।

धोः पूर्व्वकाले णम् स्याद्वा पौनःपुन्ये। स्मृत्वा स्मृत्वा नमसि, स्मारं स्मारं नमसि। ‡

तन्; पक्षे (६०८) ण्चोऽम्रिया इति अपमाय। क्षिधातोः चो इति दीर्घान्तादेशे प्रक्षीय, पक्षे स्वस्य तनि प्रक्षित्य। पाणिनि ६।४।५९,७०।

* वे ञ् स्यूतौ, ज्या गि जरायां, व्ये ञ् वृतौ, एषां (६६१) ग्रहस्वपाद्योरिति प्राप्तौ जि र्न स्यात् यपि। पाणिनिः ६।१।४१-४३।

† सं-परि-पूर्व्वस्य व्ये ञ् वृतौ इत्यस्य जि र्वा स्यात यपि। संवीय परिवीय उभयत्र जौ कृते, (१०३६) जिर्धोऽन्त्य इति दीर्घः। पाणिनिः ६।१।४४।

‡ अभीक्ष्णं मुहुरर्थ-मव्ययं, तस्य भाव आभीक्ष्ण्यं तस्मिन्। अत्रापि क्रिययोरेककर्तृकत्वे सतीति बोध्यं। स्मृत्वा स्मृत्वा नमसि, पक्षे स्मारं स्मारं नमसि। स्मृ-णम्, ण इत् अव्ययं, ण इत् (५७७) वृद्धिः, अम इत्यस्य स्थितिः। आभीक्ष्ण्यार्थे द्वित्वं वक्तव्य (पा. ८।१।४)। क्वचिदाभीक्ष्ण्याभिन्नेऽपि णम् भवति यथा, चौर इति कृत्वा इति चौरङ्कारमाक्रोशति (पा. ३।४।२५), स्वादुङ्कारं भुङ्क्ते (पा ३।४।२६), मूलकोपदंश भुङ्क्ते (पा. ३।४।४७); एवङ्कारं, कथङ्कारं, अन्यथाकारं (पा. ३।४।२७); यथाकारं, तथाकारं (पा. ३।४।२८)। क्वचिच्च णमन्तस्यार्थभाषो भवति यथा, समूलघातं हन्ति जीवग्राहं गृह्णाति (पा ३।४।३६), चूर्णपेषं पिनष्टि (पा. ३।४।३५), विद्युत्प्रणाशं नश्यति (पा. ३।४।४५) इत्यादि। पाणिनिः ३।४।२२-६४।

कृतो ये यत्र विहितास्तत्र नूनं भवन्ति ते ।
कृद्भोः कभाव इत्युक्ते-रन्यत्रापि प्रयोगतः ॥
तथाच । कृत्तद्धितसमासाना-मभिधानं नियामकम् ।
लक्षणन्त्वनभिज्ञानां तदभिज्ञानसूचकम् ॥ *

११८४ । बहुलं ब्रह्मणि । (बहुलं १।, ब्रह्मणि ७।) ।

यदिदं लौकिकप्रयोगव्युत्पत्तये लक्षणमुक्तं तत् वैदिकप्रयोग-व्युत्पत्तौ बहुलं ज्ञेयं । क्वचित् विहितं न स्यात् (१), क्वचित् निषिद्धं स्यात् (२), क्वचित् वा स्यात्, क्वचित् ततोऽन्यदपि स्यादित्यर्थः । यथा,—पूर्व्वेभिः (१), ब्राह्मणास् (२), इत्यादौ वेदसिद्धेः । † 'ब्रह्म' शब्दोऽत्र मङ्गलार्थः ।

इति इणादि-पादः ।

कृदन्ताध्यायः ।

समाप्तम् ।

---

* कृदन्तप्रकरणं समाप्य ग्रन्थकृत् न्यूनता-परिहारार्थमाह—कृतो ये इति । ये कृतः यत्र येष्वर्थेषु विहिताः, ते तत्र तेष्वर्थेषु नूनं निश्चितं भवन्ति । प्रयोगतः महाकवि-प्रयोगानुसारेण अन्यत्रापि स्युः । तत्र हेतुमाह (९६५) कृद्भोः कभावे इत्युक्तेरिति । तथाच, प्राञ्चः इति शेषः । कृतां तद्धितानां समासानाञ्च, अभिधानं प्राचीनः शब्दकोष-एव नियामकं, यस्मिन्नर्थे यस्मिन् लिङ्गे च यत् भवति तन्नियमकारकं । व्याकरणलक्षणन्तु अनभिज्ञानां प्रसिद्धप्रमाणमजानतां तदभिज्ञानस्य सूचकं प्रकाशकमित्यर्थः ।

† ब्रह्मणि वेदे, बहुलं—बहवः (प्रकाराः) सन्त्यस्य, चूडादित्वात् (४४६) लः, अथवा बहून् प्रकारान् लाति गृह्णातीति बहुलं, आदन्तत्वात् (९९७) डः । सामान्यत्वात् नपुंसकं । एतत् व्याकरणं लौकिकप्रयोग-साधनाय, वैदिकप्रयोग-साधनार्थन्तु प्रकारा-न्तरमपि स्यादित्यर्थः, तथाहि क्वचिदित्यादि । पूर्व्वेभिरित्यत्र, भिसः स्थाने ऐस् (१०६) विहितमपि न जातं । ब्राह्मणास् इत्यत्र, सस्थाने विसर्गः (१०२) विहितोऽपि निषिद्ध-इति । वेदसिद्धेरिति हेतौ पञ्चमी । पाणिनिः २।४।३९, ७३, ७६ ; ३।२।८८ ; ५।२। १२२ ; ६।१।३४ ; ७।१।८, १०, १०३ ; ७।३।९७ ; ७।४।७८ ।

परिशिष्ट-पञ्चम् ।

लिङ्गानुशासनम् ।

(११४७) सूत्रोक्त-स्त्रीलिङ्गसूचनामवलम्ब्य अत्र प्रचलितानां कतिपय-कृत्तद्धित-समास-प्रत्ययान्तानामेव लिङ्गनिर्देश: क्रियते ।

(९६७ सूत्रस्य टीका द्रष्टव्या ।)

कृदन्त-पुंलिङ्गा:—

(११३४) घञन्ता: *, (११३४) अलन्ता:*, (११४४) नङन्ता: †, (११४५-११४६) कि-प्रत्ययान्ता: ‡, (१११३) रु-प्रत्ययान्ता: §, (११४२) अथु-प्रत्ययान्ता:, (१०००-१००१) ण-प्रत्ययान्ता: ।

तद्धित-पुंलिङ्गा:—

(४७५) इमन्-प्रत्ययान्ता: ¶ ।

समास-पुंलिङ्गा:—

(३६२) रात्रान्ता:, (३५३) अहान्ता: ‖, (३५४) अह्नान्ता: ।

कृदन्त-स्त्रीलिङ्गा:—

(११४७-११४९) क्ति-प्रत्ययान्ता:, (११५०) भावविहितक्यप्प्रत्ययान्ता:*, (११५२) भावविहित-यप्रत्ययान्ता: †, (११५३-११५५) अप्रत्ययान्ता:, (११५६-११५७) ङ-प्रत्ययान्ता:, (११४१) युच्-प्रत्ययान्ता:, (११५८) अन-प्रत्ययान्ता: ‡, (११५९) णि-प्रत्ययान्ता:, (११६०) अनि-प्रत्ययान्ता: ।

तद्धित-स्त्रीलिङ्गा:—

(४३८) त-प्रत्ययान्ता:, (४४९) सूत्रोक्ता: कतिपये— (तद्धित-नपुंसक-लिङ्गा: द्रष्टव्या:) ।

समास-स्त्रीलिङ्गा:—

(३८९) अप्रत्ययान्त-धुर्शब्दान्ता: ।

---

* घञन्ता: अलन्ताश्च भावार्थे एव पुंलिङ्गा:, अन्यार्थे तु विशेष्यलिङ्गा अपि भवन्ति। अलन्तेषु—भयं वर्षं पदं सुखं नपुंसकम् ।

† याञ्ञा—स्त्री ।

‡ इषुधि:—पुमान्, स्त्री च ।

§ दारु (काष्ठं), जतु —नपुंसकम् ।

¶ प्रेम—नपुंसकमपि ।

‖ पुण्याहं—नपुंसकम् ।

* (९८१-९८७) सूत्रोक्तक्यबन्ता: प्रायेण कर्म्मविहिता: कर्त्तृविहिता वा दृश्यन्ते, भावविहितास्तु नपुंसकलिङ्गा: ।

† (९६७-९६९, ९७६-९८०) सूत्रोक्तयान्ता: प्रायेण कारक-विहिता:, भावविहितास्तु नपुंसकलिङ्गा: ।

‡ (११६२-११६३) कर्म्मविहितानप्रत्ययान्तास्तु विशेष्यलिङ्गा: ।

कृदन्त-नपुंसकलिङ्गाः—

(१११४-११२६) अनट्-प्रत्ययान्ताः *, (११२२) इत्र-प्रत्ययान्ताः, (१८५०) भावविहित-क्तप्रत्ययान्ताः ।

तद्धित-नपुंसकलिङ्गाः—

(४२२) भावार्थ-समूहार्थ-प्रत्ययान्ताः †, (४३८) त्व-प्रत्ययान्ताः, (४६०-४६१) तयट्-अयट्-प्रत्ययान्ताः *, (४९२) तेल-जाहान्ताः, (४९३) आकट-आकिन-प्रत्ययान्ताः ।

समास-नपुंसकलिङ्गाः—

(३२२) समाहार-द्वन्द्वनिष्पन्नाः, (३२२) समाहार-द्विगुनिष्पन्नाः †, (३२२) अव्ययीभावनिष्पन्नाः, (३८५) अप्रत्ययान्त-पुरुषब्दान्ताः ।

* भावविहिता एव बोध्याः। कारकविहितास्तु प्रायेण विशेष्यलिङ्गाः ।

† (४४९) जनता, बन्धुता, खलिनी, हलिनी, गोत्रा, रथकड्या—स्त्रीलिङ्गाः । वातूलस्तु पुंलिङ्गः ।

* स्त्रीलिङ्गा अपि भवन्ति ।

† (३६९) अकारान्त-भिन्नाः, पात्रादीनि तु नपुंसकानि एव । (३७०, ३७१) सूत्रयोस्तु स्त्रीलिङ्गा नपुंसकलिङ्गाश्च ।

उणादयः ।

(१००७) सूत्रोक्त-सङ्केतमाश्रित्य कतिपये प्रचलिताः उणादि-प्रत्ययान्ताः लिख्यन्ते ।

अ

अङ्गच्—कुर-कुरङ्गः, तॄ-तरङ्गः, मृद-मृदङ्गः, लु-लवङ्गः, सृ-सारङ्गः ।

अटन्—कनक-कङ्कटः, कप-कपटः, कृ-करटः, कर्क-कर्कटः, कृप-कर्पटः, मर्क-मर्कटः, शक शकटः, सृ-सरटः ।

अठ—कम-कमठः, जॄ-जरठः ।

अण्डन्—कृ-करण्डः, वृ-वरण्डः ।

अत्—पृष-पृषत्, मह-महत्, वह-वहत् ।

अति—वस-वसतिः, हन-अंहतिः ।

अत्रन्—अम अमत्रं, गड़-कलत्रं, नक्ष-नक्षत्रं, पत-पतत्रं, वृ-वरत्रा ।

अत्रिन्—पत-पतत्रिः ।

अथन्—शप-शपथः, आ-वस-आवसथः ।

अद्—शॄ-शरत, दृ-दृषत् ।

अनि—ऋ-अरणिः, अव-अवनिः, अश-अशनिः, आ-शुष-सन्-आशुशुक्षणिः, वह-वहणिः, तॄ-तरणिः, धम-धमनिः, धृ-धरणिः, अनुज-रजनिः, सृ-सरणिः ।

अन्ति—अव-अवन्तिः, किंवद-किंवदन्तिः ।

अन्य—ऋ-अरण्यं, पृष-पर्जन्यः ।

अप—सृ-सर्षपः ।

अभच्—ऋष-ऋषभः, कृ-करभः, कल-कलभः, गर्द्द-गर्द्दभः, रास-रासभः,

वल्ल-वल्लभः, वृष-वृषभः, शॄ-शरभः, शल-शलभः ।

अम—अध-अधमः, कर्द्द-कर्द्दमः, कल-कलमः, चर-चरमः, प्रथ-प्रथमः ।

अम्बच्—कड़-कड़म्बः, कद-कदम्बः, स्था-स्तम्बः ।

अयु, अयू—सृ-सरयुः, सरयूः ।

अरन्—अट-अटरं, कृ-कवरः, चम-चमरः, जन-जठरं, जर्ज-जर्जरं, झर्झ-झर्झरः, दिव-देवरः, भम-भमरः, वस-ज्जि-वासरः ।

अरु—ऋट-अरुः ।

अल—तृ-तरलः, मन्ग-मङ्गलं, सृ-सरलः ।

अलि—अनज-अञ्जलिः ।

अवक—स्था-स्तवकः ।

असच्—चम-चमसः, तम-तमसं, नभ-नभसं, पन-पनसः, यु-यवसः, रभ-रभसः, वे-वेतसः ।

आ

आ—नि-कष-निकषा, सम्-इ-समया ।

आक—तड़-तड़ाकः, तड़ागः, पत-पताका, पा-पिनाकः, बल-बलाका, शल-शलाका ।

आनक—भी-भयानकः ।

आनुक्—कृश-कृशानुः ।

आन्य—वद-वदान्यः ।

आर—अङ्ग-अङ्गारः, कड़-कड़ारः भृ-भृङ्गारः, मन्द-मन्दारः, मृज-मार्जारः ।

आलञ्—पत-पातालं, चण्ड-चण्डालः ।

इ

इज्—वण-वणिज् ।

इतन्—रुह-रोहितः, हृ-हरितः ।

इत्—तड़-तड़ित्, युष-योषित्, सृ-सरित्, हृ-हरित् ।

इथिन्—अत-अतिथिः ।

इन—अज-अजिनं, ऋ-इरिणः, कठ-कठिनः, कुण्ड-कुण्डिनः, तुह-तुहिनं, दक्ष-दक्षिणः, द्रु-द्रविणं, मल-मलिनं, पुल-पुलिनं, मल-मलिनः, वेप-विपिनं, रुह-रोहिणः, श्यै-श्येनः ।

इल—अन-अनिलः, कप-कपिलः, कुक-कोकिलः, कुट-कुटिलः, मन्थ-मिथिला, मह-महिला, सल-सलिलं ।

ई

ई—अव-अवीः, तन्त्र-तन्त्रीः, तॄ-तरीः, लक्ष-लक्ष्मीः, वात-प्र-मा-वातप्रमीः ।

ईकन्—अन-अनीकं, अल-अलीकं, इष-इषीका, वल-वलीकं, हृष-हृषीकं ।

ईचि—मृ-मरीचिः, वे-वीचिः ।

ईरन्—कट-कटीरं, कॄ-करीरः, पट-पटीरं, शॄ-शरीरं, शौट-शौटीरः ।

ईषन्—अम्ब-अम्बरीषं, कॄ-करीषं, पॄ-पुरीषं, शॄ-शिरीषं ।

उ

उ—अण-अणुः, उन्द-इन्दुः, इष-इषुः, कट-कटुः, स्कन्द-कन्दुः, गड-गडुः, चर-चरुः, जन-जनुः, जन-जतु, जन-दनुः, तन-तनुः, तॄ-तरुः, त्सर-त्सरुः, धन-धनुः, नि-अन्च-न्यङ्कुः, पट-पटुः, फल-फल्गुः, बन्ध-बन्धुः, भृ-भरुः, मन-मधु, मन-मनुः, मृ-मरुः, मस्ज-मद्गुः, सृज-रज्जुः, वट-वटुः, वल-वल्गुः, वस-वसुः, विद-विन्दुः, शॄ-शरुः, शो-शिशुः, स्यन्द-सिन्धुः, हन-हनुः ।

उण्—अश-आशु, कृ-कारुः, वा-वायुः, स्वद-स्वादुः ।

उत्—गॄ-गरुत्, मृ-मरुत् ।

उन, उनि, उन्न, उन्नि—शक-शकुनः, शकुनिः, शकुन्नः, शकुन्निः ।

उनन्—कृ-करुणः, अर्ज-अर्जुनः, क्रु-करुणः, तृ-तरुणः, दृ-जि-दारुणः, पिश-पिशुनः, मिथ-मिथुनं, वृ-वरुणः ।

उसक्—कुस-कुसुमम् ।

उम्भक्—कुस-कुसुम्भम् ।

उर—अनक-अङ्कुरः, कर्व-कर्वुरः, चत-चतुरः, दृ-दर्दुरः, बन्ध-बन्धुरः, मनथ-मथुरा, मद-मद्गुरः, मन्द-मन्दुरा, मनक-मुकुरः, आशु-अश-श्वशुरः ।

उल—चट-चटुलः, तनड-तण्डुलः ।

उलि—अनग-अङ्गुलिः ।

उश—अनक-अङ्कुशः ।

उषन्—कल-कलुषं, नह-नहुषः, पृ-परुषः ।

ऊ

ऊ—चम-चमूः, जन-जनूः, तन-तनूः, दरिद्रा-दर्द्रूः, बन्ध-बधूः, वह-वधूः ।

ऊक—वल-उलूकः, भल्ल-भल्लूकः, मनड-मण्डूकः, शम-शम्बूकः, बन्ध-बन्धूकं ।

ऊख—मय-मयूखः ।

ऊथन्—वृ-वरूथः ।

ऊम—गुध-गोधूमः ।

ऊर—क्रप-कर्पूरं, खर्ज-खर्जूरः, मि-मयूरः, स्यन्द-सिन्दूरं ।

ऊल—लनग-लाङ्गूलं ।

ऊषन्—गड-गण्डूषः, पीय-पीयूषं, मस्ज-मञ्जूषा ।

ऋ

ऋ—दिव-देवा, न-मन्द-नन(ना)न्दा, सव्ये स्था-सव्येष्टा, सु-अस स्वसा ।

ऋत्—अक-अकृत् ।

ए

एनु—क्र-करेणुः ।

एण्य—वृ-वरेण्यः ।

एरक्—कठ-कठेरः ।

ओ

ओरन्—कठ कठोरः, किम्-शृ किशोरः, चक-चकोरः ।

ओल—कप-कपोलः, पट-पटोलः ।

क

क—कल-कल्कः, कै काकः, नि-सद-निष्कः, रा-राका, वल-वल्कं, शल-शल्कं ।

कक्—उष-उल्का, सुष-सुष्कः, शुभ शुक्रः ।

कन्—इ एकः, भी भेकः ।

कण—चित-चिक्कणः ।

कतु—क्र-क्रतुः ।

कन—कॄ-किरणः, धृष धिषणः ।

कनस—वश-उशनाः ।

कनिन्—तक्ष-तक्षा, यु-युवा, राज-राजा ।

कन्यन्—हृ-हिरण्यं । [कुणपः ।

कपन्—उल-उलपं, विट-विटपः, क्रण-

कयन्—तन-तनयः, मल-मलयः, वल-वलयं, हृ-हृदयं ।

करन्—पुष-पुष्करं, शृ-शर्करा ।

कल—कम-कम्बलः, कु,कम-कोमलः, चुप-चपलः, की कमलः, पल-पललं, मुष-मुषलं, लनग-लाङ्गलं, वल-वल्कलं, वृष-वृषलः, शक-शकलः, शप-शबलः ।

कालन—कप-कपालः, कुल-कुलालः, तम-तमालः, पनच-पञ्चालः, पल-पलालः, पीय पियालः, मण-मृणालः, बिड-बिडालः, विश-विशालः ।

किकन्—मुष-मूषिकः, व्रश्च-वृश्चिकः ।

कित—वच-उचितः ।

खिन्द—पुल-पुलिन्दः।

खिर—अज-अजिरं, इष-इषिरः, खद-खदिरः, खिद-खिदिरः, छिद-छिदिरः, तिम-तिमिरं, बन्ध-बधिरः, भिद-भिदिरं, मद-मदिरा, मन्द-मन्दिरं, मिह-मिहिरः, मुद-मुदिरः, रुच-रुचिरः, रुध-रुधिरं, शी शिबिरं, शश-शिशिरः, शुष-शुषिरः, स्था-स्थविरः, स्था-स्थिरः, स्फाय-स्फिरः।

किष्यन्—भुज भुजिष्यः।

कीटन्—कृ-किरीटं, कृप-कृपीटं।

कु—अस-असुः, ऊर्णु-उरुः, ऊरुः, ऋज-ऋजुः, कृ-कुरुः, खन-खरुः, गृ-गुरुः, दृश-पशुः, पन्श-पांशुः, पृ-पुरुः, प्रथ-पृथुः, बन्ह-बहुः, भ्रस्ज-भृगुः, मद-मदुः, रन्घ-रघुः, लन्घ-लघुः, व्यध-विधुः।

कुषन्—पुर-पुरुषः।

कू—अन्द अन्दूः, जन, जम-जम्बूः, दिधि-षो-दिधिषूः, हम-हन्भः।

क्त—चि-चित्रं, मिद-मित्तं।

क्थन्—अव-भृ-अवभृथः, काश-काष्ठं, कुष-कुष्ठं, रम-रथः।

क्थिन्—अस-अस्थि, सन्ज-सक्थि।

क्न—तृह-तृणं।

क्मलन्—कुट-कुड्मलं।

क्ररन्—कु-कुररः।

क्रि—भू-भूरिः, सू-सूरिः।

क्रु—रु-रुरुः।

क्वन्—लिह-जिह्वा, विश-विश्वं।

क्सि—कुष-कुक्षिः।

क्सु—इष इक्षुः।

क्स्न—श्लक्ष-श्लक्ष्णं, तिज-तीक्ष्णः, श्लिष-श्लक्ष्णः।

ख

ख—मुह-मूर्खः, शम-शङ्खः, शी-शिखा।

ग

गक्—छो-छागः, पू-पूगः, भृ-भृङ्गः, मुद-मुद्गः, शृ-शृङ्गं, षिट-षिड्गः।

गन्—खड-खड्गः, गम-गङ्गा, गृ-गर्गः।

च

चट्—षिव-सूची।

ञ

ञुण्—किं-शृ किंशारुः, कृक वच कृकवाकुः, चट चाटु, चर-चारु, जरा-इ-जरायुः, जन-जानुः, तृ-तालु, दृ-दारु, सन-सानुः।

ट

टिषच्—अम-आमिषं, किल-किल्बिषं, मह-महिषः।

ठ

ठ—कण-कण्ठः।

ड

ड—अम-अण्डं, कण-काण्डं, खन-खण्डं, गम-गण्डः, दम-दण्डः, पण पण्डः, मन-मण्डः, रम-रण्डा, शम-षण्डः।

डउ—तन-तितउः।

डक्—गु-गुडः।

डति—पा-पतिः।

डवतु—भा-भवान्।

डिम्—की-किम्।

डुत—अत-भू-अद्भुतं।

डुन्—अ-श्रि अश्रु, श्मन्-श्रि-श्मश्रु।

डुम्सुन्—पा पुमान्।

डू—भ्रम-भ्रूः।

डृ—नी-ना।

डै—रा-राः।

डैस्—उद्-चि उच्चैः, नि-चि-नीचैः।

डौ—गम-गौः, द्युत-द्यौः ।
डोस्—दम-दोः ।
डौ—ग्लै-ग्लौः, नुद-नौः ।
ड्ट्—स्त्यै-स्त्री ।
ड्रि—तॄ-त्रयः ।

ढ

ढ—सन-षण्ढः ।

ण

णित्रम्—चर-चारित्रं ।
णु—अज-वेणुः, स्था-स्थाणुः ।
ण्य—धृष-धिष्ण्या ।

त

तकन्—अश-अष्टका ।
तकक्—इष-इष्टका ।
तन्—अम-अन्तः, इ एतः, गॄ-गर्त्तः, तृस-तृस्तं, दम-दन्तः, धुर्व्व-धूर्त्तः, पू पीतः, मृ-मर्त्तः, हस-हस्तः ।
तनन्—पत-पत्तनं, अज-वेतनं ।
ति—अग,अस अगस्तिः, गभ-भर्ह गभस्तिः, पद-पत्तिः, वस-वस्तिः, वि-तस-वितस्तिः, शास-शास्तिः, सु-अस-स्वस्ति ।
तिक—कृत-कृत्तिका, वृत-वर्त्तिका ।
तुक्—ऋट-ऋतुः ।
तुण्—वस-वास्तुः ।
तुन्—अव-ओतुः, चाय-केतुः, क्रुश-क्रोष्टा, जन-जन्तुः, जै जातु, तन-तन्तुः, धा-धातुः, मन-मन्तुः, मस-मस्तु, या-यातुः, वस-वस्तु, शच-शक्तुः, सि-सेतुः, हि-हेतुः ।
तृच्—जाया-मा-जामाता, दुह-दुहिता, पा पिता, भ्राज-भ्राता, मान-माता ।
त्युक्—मृ-मृत्युः ।
त्रिप्—अद-अत्रिः, रा-रात्रिः ।

थ

थक्—वच-उकथं, उद्-गै-उद्गीथं, गू-गूथं, तॄ-तीर्थः, तुद तुत्थं, नि शी-निशीथः, पृष-पृष्ठं, यु यूथं, रिच-रिक्थं, सिच-सिक्थं ।
थण्—सृ-सार्थः ।
थन्—ऋट-अर्थः, उष-ओष्ठः, कुष-कोष्ठः, गै-गाथा, प्रु-प्रोथः, शु-शोथः ।

द

द—अव-अब्दं, कम कम्दं, कु कुन्दं, वृष-वृन्दं, शी-शादः ।

ध

धुक्—शी-शीधु ।

न

न—ऋट-अर्णः, कॄ-कर्णः, द्रु-द्रोणः, धा-धानः, रम जि रत्नं, सू-सूना, सि-सेना, स्था स्थूणा ।
नक्—इ-इनः, उष-उष्णः, कृष कृष्णः, जि जिनः, तृष तृष्णा, स्फाय-फेनः, बन्ध-बुध्नः,ब्रध्नः, मी मीनः, वी-वीणा, सि-सिनः ।
नण्—रस-रास्ना, सस-सास्ना ।
नि—अग,अनग-अग्निः, द्रु-द्रोणिः, स्पृश-पृश्निः,यु-योनिः,वह-वह्निः, श्रि श्रोणिः ।
निक्—वृष वृष्णिः, सृ सृणिः ।
नु—धा-अङ्कुः, धे-धेनुः, भा-भानुः ।
नुक्—विष विष्णुः, सू-सूनुः ।

प

प—तल-तल्पं, पा-पापं, बाध,वा-बाष्पः, वास्पः, शस शष्प, शॄ शूर्पः ।
पक्—कु-कूपः, नी नीपः, पू-पूपः, यु-यूपः, शिल-शिल्पं, सू-सूपः, स्तु-स्तूपः ।
पास—कॄ कर्पासः ।

फ

फक्—गल-गुल्फः।

भ

भ—ऋ-ऋभः, गॄ-गर्भः, दॄ-दर्भः।

भक्—इ-इभः।

म

म—अव-ओम्, वि-क्षेमं, यस-यामः, घृ-घर्मः, ह्वा-जिह्मः, धृ-धर्मः, नी-नेमः, पद-पद्मं, भा-भामः, या-यामः, वा-वामः, सू-सोमः, हु-होमः।

मक्—इन्ध-इध्मं, ईर-ईर्म्मं, क्षु-क्षुमा, ग्रस-ग्रीष्मः, तिज-तिग्मः, धृ-धूमः, भी-भीमः, भीष्मः, युज-युग्मं, रुच-रुक्मं, श्यै-श्यामः।

मद्—अस-अस्मद्, युष-त्वं, युष-युष्मं।

मि—ऋ-ऊर्म्मिः, नी-नेमिः, अश-रश्मिः।

मिक्—भू-भूमिः।

मुक—उष-उल्मुकं।

य

य—कन-कन्या, छो-छाया, जन-जाया, जन्यं, पू-पुण्यं, मा-माया, सस-सस्यं।

यु—जन-जन्युः, दस-दस्युः, मन-मन्युः।

र

र—अम-अम्रः, अस-अस्रं, अर्द-आर्द्रः, इन्द-इन्द्रः, तम-ताम्रं, दस-दस्रौ भी-भीरः, मद-मद्रः, मन्द-मन्द्रः, वज-वज्रं, वप-वप्रः, विप्रः, अज-वीरं, शक-शक्रः, स्फाय-स्फारः।

रक्—अङ्ग-अग्र्यं, इ-इरा, उष-उग्रः, उन्द-उद्रः, वस-उस्रः, कृत-कृच्छ्रं, क्रूरः, क्षिप-क्षिप्रः, क्षुद-क्षुद्रः, क्षुर-क्षुरः, खुर-खुरः, गृध-गृध्रः, चन्द-चन्द्रः, चि-चीरं, छिद-छिद्रं, तक-तक्रं, दम्भ-दभ्रः, दुर् इ-दूरं, नी-नीरं, भन्द-भद्रः, मुद-मुद्रा, रुद-रुद्रः, वन्क-वक्रः, वृत-वृत्रः, शुच-शुक्रः, शुद्रः, शुभ-शुभ्रः, श्वित-श्वित्रं, षि-सीरः, सु-सुरः, सू-सूरः।

रि—अन्घ-अङ्घ्रिः, अद-अद्रिः, भी-भेरिः।

रु—अश-अश्रु, जन-जत्रु, मि-मेरुः।

ल

लक्—शी-शीलं, शुच-शुक्लः।

व

व—अश-अश्वः, खट-खट्वा, कण-कण्वः, गॄ-ग्रीवा, नी-निम्बः, प्र-ह्वा-प्रह्वः, बी-बिम्बं, शी-शिवः, ह्रस-ह्रस्वः।

वल—इल-इल्वलः, पल-पल्वलः।

वलच्, वालञ्—शी-शैवलं, शैवालं।

वालन्—चत-चत्वालः।

वि—दॄ-दर्विः।

श

शुन्, श्वन्—स्पृश-पर्शुः, पार्श्वः।

ष

षिवन्—प्रथ-पृथिवी।

ष्ट्रन्—उष-उष्ट्रः, वृध-वर्ध्रं, शस-शस्त्रं।

ष्वरच्—गाह-गाह्वरं, चत-चत्वरं, चि-चीवरं, तॄ-तीवरः, धा-धीवरः, प्ये-पीवरः, वृ-वर्वरः, शॄ-शर्वरी।

स

स—उन्द-उत्सः, कम-कंसः, कष-कक्षः, मन-मास, वद-वत्सः, हन-हंसः।

सक्—ऋष-ऋक्षः, व्रश्च-वृक्षः, स्नु-स्नुषा।

सरक्—कॄ-कृसरः, धृ-धूसरः।

सरन्—मद-मत्सरः, वस-वत्सरः।

स्मन्—सूच-सूक्ष्मः।

स्यन्—मद-मत्स्यः।

सूचीपत्राणि ।

सूत्रसूची ।

सूत्राङ्कः ।

प

संज्ञासूची।

आगम-सूची ।

आदेश-सूची।

शब्द-सूची ।

स्त्रीत्य-सूची ।

समासान्त-सूची । *

* वोपदेवमते समासान्ता: तद्धितान्तर्गता एव, (५२७) सूत्रं द्रष्टव्यम् ।

तद्धित-सूची ।

सूत्राङ्कः।

सूत्राङ्कः।

धातु-सूची ।

कृदन्त-सूची ।

सूत्राङ्कः ।

स्त्रीत्य-समासान्त-तद्धित-कृदन्तेतर-प्रत्यय-(धात्ववयव)-सूची ।